DAMAGE BOOK

UNIVERSAL
LIBRARY

OU_184219

UNIVERSAL
LIBRARY

OUP—390—29-4-72—10,000.

OSMANIA UNIVERSITY LIBRARY

Call No. S294.1 V41R Accession No. PG 11436

Author

Title ऋग्वेद संहिता · 1957 · VOL. I. PT. 2.

This book should be returned on or before the date last marked below.

सन्दर्भ-ग्रन्थ

ऋग्वेदसंहिता

श्रीकपालिशास्त्रिविरचितवेदगुप्तार्थ-

सिद्धाञ्जनाख्यभाष्यसमेता

Post Graduate Library
College of Arts & Commerce, O. U.



प्रथमाष्टकम्

द्वितीयो भागः

(३३-१२१सूक्तानि)

प्रकाशकः-

माधव पुण्डलीक पण्डित
श्रीअरविन्दाश्रमः
पाण्डिचेरी (भारत)

सर्वाधिकारः सुरक्षितः

शके १९५१

मूल्यम् ५० रु.

भागद्वयात्मकप्रथमाष्टकस्य

मुद्रणम्-
श्रीअरविंदाश्रम मुद्रणालये

RIGVEDA SAMHITA

WITH THE COMMENTARY ENTITLED

SIDDHĀNJANA

BY

SRI T. V. KAPALI SASTRY

Post Graduate Library
College of Arts & Commerce, O. U.

FIRST ASHTAKA

VOL. I—PART 2

(33-121 SUKTAS)

Hindi Seminar Library
OSMANIA UNIVERSITY
No.....

Publisher:
M. P. PANDIT
SRI AUROBINDO ASHRAM
PONDICHERRY (INDIA)

All Rights Reserved

1951

Price Rs. 50/-

Vol. I (Part 1 & 2)

SRI AUROBINDO ASHRAM PRESS
PONDICHERRY

PRINTED IN INDIA

59/1/49/500

प्रथमाष्टकम्

द्वितीयो भागः

अथ प्रथमाष्टके तृतीयोऽध्यायः प्रारभ्यते। प्रथममण्डले सप्तमेऽनुवाके पञ्च सूक्तानि। तत्र एतायामेति तृतीयं पञ्चदशर्चं सूक्तम्। आङ्गिरसो हिरण्यस्तूप ऋषिः त्रिष्टुपृच्छन्दः इन्द्रो देवता॥

तत्र प्रथमामृचमाह-

एतायामोप गव्यन्त इन्द्रमस्माकं सु प्रमतिं वावृधाति।
अनामृणः कुविदादस्य रायो गवां केतं परमावर्जते नः॥१॥

आ इत अयाम उप गव्यन्तः इन्द्रम् अस्माकम् सु प्रऽमतिम् ववृधाति अनामृणः कुवित् आत् अस्य रायः गवाम् केतम् परम् आऽवर्जते नः॥

दिव्यज्ञानरश्मिद्योतकगोलिप्सून् समानमार्गप्रवृत्तान् सखीन् संबोध्य प्राह ऋषिः। गव्यन्तः गाः प्राप्तुमिच्छन्तः हे सखायः! यूयं एत आगच्छत। इन्द्रम् गवां प्राप्तिं साधयितुं समर्थं उपायाम प्राप्नुवाम। स इन्द्रः अस्माकम् गोलाभोद्यमिनां प्रमतिम् गोप्राप्तौ निमित्ते प्रकृष्टां बुद्धिं सु ववृधाति सुष्ठु वर्धयति। आत् अनन्तरं अनामृणः हिंसकरहितः स इन्द्रः गवाम् गोसमूहसंबन्धिनः गोरूपस्येत्यर्थः, अस्य प्रेप्सितस्य रायः धनस्य परम् उत्कृष्टं केतम् ज्ञानं नः अस्माकं कुवित् अधिकं आवर्जते प्रापयति॥ इत-इण् गतौ, लोट्। गव्यन्तः-गा आत्मन इच्छन्तः, गोशब्दात् कर्मणः क्यच्। ववृधाति-वृधु वृद्धौ लेटि आडागमः, संहितायां अभ्यासस्य दीर्घः। अनामृणः-मृण हिंसायाम्, आमृणन्तीति आमृणाः, न सन्त्यामृणाः अस्य। कुवित्-बहुनाम॥ देवाः परस्परमेवं कथयन्तीति सायणीयम्। ऋषेरेवेदं 'एत' इत्यादिवाक्यमिति चेत्, द्वितीयर्चि 'उपेत् पतामि' इति ऋष्युक्तिः संगता भवति॥ ऋषिरिन्द्रस्य महिमानं वर्णयति सूक्तद्वयेन। तथा 'इन्द्रस्य नु वीर्याणि प्रवोचम्' इत्युपक्रान्तवान्। अस्यामृचि इदं प्राह ऋषिः-या गावः ऋतमरीचयः अस्माकं धनभूताः पणिभिरसुरैर्वृत्रबन्धुभिः अनृजुव्यवहारिभिरपहृत्य पर्वतगुहाशब्दबोधिते जडगते तमसि निक्षिप्ताः, तासां लाभाय परं ज्ञानं आवश्यकं भवति। तच्च दातुं प्रभुरिन्द्रः, सखायः! एत, तमुपास्महे-इति॥

द्वितीयामृचमाह–

उपेदहं धनदामप्रतीतं जुष्टां न श्येनो वसतिं पतामि।
इन्द्रं नमस्यन्नुपमेभिरर्कैर्यः स्तोतृभ्यो हव्यो अस्ति यामन् ॥२॥

उप इत् अहम् धनऽदाम् अप्रतिऽइतम् जुष्टाम् न श्येनः वसतिम् पतामि इन्द्रम् नमस्यन् उपऽमेभिः अर्कैः यः स्तोतृऽभ्यः हव्यः अस्ति यामन् ॥

अहम् हिरण्यस्तूपोऽहं उपासकः धनदाम् धनं उक्तलक्षणं गोरूपं ददातीति धनदाः, तं अप्रतीतम् अप्रतिगतं शत्रुभिः अप्रतिरुद्धं अतिरस्कृतमिति यावत् इन्द्रम् देवराजं उपेत् पतामि उपगम्यैव श्रयामि वेगेन, पक्षिवत् क्षिप्रं डयनं द्योतयति 'पतामि' इति क्रिया। तत्र दृष्टान्तमाह–जुष्टाम् प्रियसेवितां वसतिम् नीडात्मिकां वासभुवं श्येनो न वेगवान् पक्षी इव। पक्षी यथा सुखं वासस्थानं नीडं प्रीत्या श्रयते, तथा अहं इन्द्रं प्राप्नोमि, स एव मम प्रियवासभूः। किं कुर्वन्? नमस्यन् नमस्कुर्वन् शरणं गच्छन्नित्यर्थः। तादृशनमस्कृतेः साधनं स्तोत्रमित्याह। उपमेभिः उपमानस्थानीयैः अर्कैः मन्त्रात्मकैः दीप्तैः स्तोत्रैः। क इन्द्रः एवमुपगम्यते? आह। यः यामन् यामनि प्रयाणे, प्राप्तव्यनिमित्तं गमने प्रवर्तमाने स्तोतृभ्यः स्तोतॄणामुपासकानां अनुग्रहाय हव्यः अस्ति आह्वातव्यो भवति। 'यामन्' शत्रुभिः सह युद्धे इति सायणीयम्। तर्हि ते शत्रवः असुराः, तेजोबलाद्यपहारिण इति ग्राह्यम्। यामन्–या प्रापणे, मनिन्॥

तृतीयामृचमाह–

नि सर्वसेन इषुधीँरसक्त समर्यो गा अजति यस्य वष्टि।
चोष्कूयमाण इन्द्र भूरि वामं मा पणिर्भूरस्मदधि प्रवृद्ध ॥३॥

नि सर्वऽसेनः इषुऽधीन् असक्त सम् अर्यः गाः अजति यस्य वष्टि चोष्कूयमाणः इन्द्र भूरि वामम् मा पणिः भूः अस्मत् अधि प्रऽवृद्ध ॥

सर्वसेनः सर्वा सेना यस्य स सम्पूर्णसैन्ययुक्तः सेनापतिः इषुधीन् इषवो बाणा एषु धीयन्ते, तान् निषङ्गान् न्यषक्त पृष्ठभागे संयोजितवान्। वीरश्रेष्ठ इन्द्रो युद्धाय सन्नद्धो भवतीत्युक्तम्। तथा सन्नाहे सत्येव, सः अर्यः स्वामी गाः पणिभिरपहृतं गोरूपं धनं समजति सम्यक् प्रापयति तं यजमानं उपासकं ऋषिं वा। आवश्यकोऽयमध्याहारः उत्तरत्र यस्येति श्रवणात्। यस्य भक्तस्य गोधनप्राप्तिं वष्टि कामयते तं गाः समजति इति संबन्धयितव्यः। अथ इन्द्रं संबोधयन्नाह। अस्मदधि अस्मासु प्रवृद्ध प्रकर्षेण वृद्धिं प्राप्त, हे इन्द्र, भूरि प्रभूतं वामम् वननीयं गोधनं चोष्कूयमाणः ददानः त्वं पणिः व्यवहारी वणिगिवेत्यर्थः मा भूः सरल उदारो भवेत्यर्थः। अस्मासु रहोयागरतेषु प्रवृद्धत्वात् तवोचितमौदार्यम्॥ इषुधीन्–संहितायां नकारस्य रुत्वम्। असक्त–षच समवाये, छन्दसि शपो लुक्। अजति–अज गतिक्षेपणयोः, अत्र अन्तर्भावितण्यर्थः। वष्टि–वश कान्तौ। चोष्कूयमाणः–स्कुञ् आवरणे, अप्रतिष्कुत इत्यत्र व्याख्यातम्, अत्र दानार्थः, यथा "इन्द्र चोष्कूयसे वसु" (८मं.६सू.४१ऋ.)॥

चतुर्थीमृचमाह–

वधीर्हि दस्युं धनिनं घनेनँ एकश्चरन्नुपशाकेभिरिन्द्र।
धनोरधि विषुणक्ते व्यायन्नयज्वानः सनकाः प्रेतिमीयुः॥४॥

वधीः हि दस्युम् धनिनम् घनेन एकः चरन् उपऽशाकेभिः इन्द्र
धनोः अधि विषुणक् ते वि आयन् अयज्वानः सनकाः प्रऽइतिम् ईयुः॥

हे इन्द्र, त्वं धनिनम् बहुधनं दस्युम् चोरं वृत्रं घनेन दृढेन वज्रेण वधीर्हि हतवान् खलु। कीदृशस्त्वम्? उपशाकेभिः समीपवर्तिभिः शक्तियुक्तैः सहितः एकः अद्वितीयः चरन् शत्रुमध्ये सञ्चरन् "वधीः" इति संबन्धः। अथ किं वृत्तम्? ते तव इन्द्रस्य धनोः धनुषः अधि उपरि विषुणक् विष्वक् सर्वतः अयज्वानः यज्ञविरोधिनः सनकाः एतन्नामकाः वृत्रानुचराः व्यायन् विविधमागताः, आगत्य च प्रेतिम् मृतिं ईयुः प्रापुः॥ वधीः–हन्तेर्लुङि वधादेशः। उपशाकेभिः–उपशक्तं कुर्वन्तीति उपशाकाः, शक्लृ शक्तौ। विषुणक्–विषुपूर्वस्य अञ्चतेर्नुडागमः। सनकाः–अवयवार्थः

संदिग्धः। सायणस्तु 'सनन्ति ददतीति सनाः दातारः तान् कायन्ति शब्दयन्तीति सनकाः' इति॥

अस्यामृचि वृत्रो धनीत्युक्तम्। तस्य धनस्य स्वरूपं ब्राह्मणान्येवमाहुः-वृत्रस्यान्तः सर्वे देवाः सर्वाश्च विद्याः सर्वाणि हवींषि चासञ्जिति। प्रभूते तमःशरीरे सर्वावरके वृत्रे ज्ञानबलैश्वर्यादितिरस्करणप्रतिरोधबन्धनकरे असुरे सर्वं ज्योतिरादिकं गूढं सुप्तप्रायं भवति, तत्प्रणाशे अन्तर्लीनानि नष्टप्रायाणि तेजोबलादीनि निर्गतानि विकासमाप्नुवन्तीति गूढार्थ-सिद्धान्तसमुन्मेषोऽत्रावधेयः॥

पञ्चमीमृचमाह-

परा चिच्छीर्षा ववृजुस्त इन्द्रायज्वानो यज्वभिः स्पर्धमानाः।
प्र यद्दिवो हरिवः स्थातरुग्र निरव्रताँ अधमो रोदस्योः॥५॥

परा चित् शीर्षा ववृजुः ते इन्द्र अयज्वानः यज्वभिः स्पर्धमानाः
प्र यत् दिवः हरिऽवः स्थातः उग्र निः अव्रतान् अधमः रोदस्योः॥

हे इन्द्र, हरिवः हरिनामक-अश्वयुक्त, स्थातः स्थितिमन्, तव धर्षको नास्ति तस्मात् स्थिरोसीत्यर्थः, उग्र शूर, यत् यदा त्वं दिवः अन्तरिक्षात् रोदस्योः द्यावापृथिव्योः सकाशात्, त्रैलोक्यादित्यर्थः अव्रतान् व्रतरहितान् धर्म्यकर्मशून्यान् वृत्रानुचरान् निष्प्राधमः निःशेषेण त्वन्मुखवायुना धूतान् अकरोः। तदा यज्वभिः यजनशीलैः पुण्यपुरुषैः सह स्पर्धमानाः संघर्षं कुर्वाणाः अयज्वानः यागरहिताः यज्ञविरोधिनः ते वृत्रसंबन्धिनः शीर्षा शीर्षाणि, शिरांसि पराचित् पराञ्चि कृत्वा, पराङ्मुखा भूत्वा ववृजुः जग्मुः, पलायिता इत्यर्थः॥ शीर्षा—शेर्लोपः, छन्दसि। ववृजुः—वृजी वर्जने, किच्चात् लिटि गुणाभावः। अधमः—ध्मा शब्दाग्निसंयोगयोः, लङ्॥

इति प्रथमस्य तृतीये प्रथमो वर्गः

षष्ठीमृचमाह-

अयुयुत्सन्ननवद्यस्य सेनामयातयन्त क्षितयो नवग्वाः।
वृषायुधो न वध्रयो निरष्टाः प्रवद्भिरिन्द्राञ्चितयन्त आयन्॥६॥

अयुयुत्सन् अनवद्यस्य सेनाम् अयातयन्त क्षितयः नवऽग्वाः वृषऽयुधः न वध्रयः निःऽअष्टाः प्रवत्ऽभिः इन्द्रात् चितयन्तः आयन् ॥

अनवद्यस्य निर्दोषस्येन्द्रस्य सेनां सैन्यं प्रति अयुयुत्सन् योद्धुमैच्छन् वृत्रबान्धवा इति शेषः। तथा तेषां युद्धेच्छामात्रे सति, न तु युद्धे प्रवृत्ते, नवग्वाः एतन्नामकाः अङ्गिरसः क्षितयः मनुष्याः, इन्द्रं अयातयन्त प्रयत्नवन्तमकुर्वन् प्रोत्साहितवन्त इत्यर्थः। तदा इन्द्रे युद्धाय प्रोत्साहिते सन्नद्ध एव, तेन निरष्टाः निराकृता वृत्रानुचराः इन्द्रात् इन्द्रस्य स्थानात् दूरे प्रवद्भिः प्रवणैर्मार्गैः चितयन्तः स्वीयामशक्तिं ज्ञापयन्तः आयन् गतवन्तः पलायिता इत्यर्थः। के इव? वृषयुधः वृष्णा सेचनसमर्थेन पुंस्त्वयुक्तेन शूरेण सह युद्धं कुर्वन्तः वध्रयो न षण्डा इव। प्रबलेनेन्द्रेण दूरीकृता दुर्बला वृत्रबान्धवाः पलायिता इत्यर्थः ॥

अयुयुत्सन्–युध संप्रहारे, सनि व्यत्ययेन परस्मैपदम्, अयातयन्त–यती प्रयत्ने, हेतुमण्णिचि, लङ्। नवग्वाः—'नवभिर्मासैर्गच्छन्तीति नवग्वाः गमेरौणादिको ड्वप्रत्ययः, यद्वा क्विप्' इत्यादिप्रक्रियामभिमन्यते सायणः। नवग्वाः दशग्वाश्च अङ्गिरसः पूर्वे पितरः वलविजये वृत्रतमोभेदने इन्द्रसाहाय्यं कुर्वन्तो गाः अविन्दन्निति बहुधा वेदेषु प्रसिद्धौ सत्यां, नवभिः रश्मिपर्यायगोभिर्युक्ता नवग्वाः, तथा दशग्वाश्चेति वक्तव्यम्। वृषायुधः–संहितायां षकारस्य दीर्घः। निर्–अष्टाः–अशू व्याप्तौ, भावे निष्ठा। प्रवद्भिः–प्रपूर्वात् वनतेः क्विप्। चितयन्तः–चिती संज्ञाने अस्मात् ण्यन्तात् शतृ, गुणाभावः छान्दसः ॥

सप्तमीमृचमाह–

त्वमेतान्रुदतो जक्षतश्चायोधयो रजस इन्द्र पारे।
अवादहो दिव आ दस्युमुच्चा प्र सुन्वतः स्तुवतः शंसमावः ॥७॥

त्वम् एतान् रुदतः जक्षतः च अयोधयः रजसः इन्द्र पारे अव अदहः दिवः आ दस्युम् उच्चा प्र सुन्वतः स्तुवतः शंसम् आवः ॥

हे इन्द्र, त्वम् रुदतः विलपतः जक्षतः च हसतश्च एतान् वृत्रसंबन्धिनः रोदनं कुर्वतः हसनं कुर्वतो वा द्विधापि वर्तमानान् रजसः अन्तरिक्षस्य पारे दविष्ठे परभागे अयोधयः युद्धेन हतवानसि। दस्युम् वृत्रं उच्चा उच्चैः दिवः आ द्युलोकादानीय, (त्रैलोक्यमेवाक्रान्तं

वृत्रेण तत्र उच्चैः द्यौरप्याक्रान्ता तस्मात् तत आनीतवानित्युक्तम्) अवादहः दग्धवानसि। ततः परं सुन्वतः सोममभिषुण्वतः स्तुवतः शंसम् स्तोत्रं स्तुवतः स्तुतिं कुर्वतः, यजमानान् स्तोतॄन् प्रावः प्रकर्षेण रक्षितवानसि। सपरिवारवृत्रवधात्परं रक्षां अदाः सोमयाजिभ्यो भक्तेभ्यः॥ रुदतः—रुदिर् अश्रुविमोचने, लटः शतृ। जक्षतः—जक्ष भक्षहसनयोः, लटः शतृ। सुन्वतः—गतम्॥

अष्टमीमृचमाह—

चक्राणासः परीणहं पृथिव्या हिरण्येन मणिना शुंभमानाः।
न हिन्वानासस्तितिरुस्त इन्द्रं परि स्पशो अदधात्सूर्येण ॥८॥

चक्राणासः परिऽनहम् पृथिव्याः हिरण्येन मणिना शुंभमानाः न हिन्वानासः तितिरुः ते इन्द्रम् परि स्पशः अदधात् सूर्येण॥

पृथिव्याः भूमेः परिणहम् परितोबन्धनवदवस्थितं आच्छादनं चक्राणासः कुर्वाणाः, हिरण्येन हिरण्मयेन मणिना गात्रगतेनाभरणेन शुम्भमानाः दीप्यमानाः हिन्वानासः सत्वरं गच्छन्तः (इन्द्रं प्रति योद्धुं) ते वृत्रानुचराः तथाविधा अपि इन्द्रम् युद्धायोद्यतं न तितिरुः जेतुं नाशक्नुवन्। तदा इन्द्रः स्पशः वृत्रसम्बन्धिनो गूढप्रणिधीन्, पृथिवीं सर्वतस्तमसा व्याप्य आच्छाद्य स्वयं शोभमानान् तान् सूर्येण उत्तमेन ज्योतिषा पर्यदधात् आच्छादितवान्। आच्छादकानेव आच्छादितवान्॥ चक्राणासः—करोतेः छन्दसि लिटः कानच्, ततोसुक्। परिणहम्—परिपूर्वात् बन्धनार्थात् नह्यतेर्भावे क्विप्, परिणद्। हिन्वानासः—हि गतौ वृद्धौ च, ताच्छीलिकः चानश्। तितिरुः—तिरतिर्गत्यर्थः॥

नवमीमृचमाह—

परि यदिन्द्र रोदसी उभे अबुभोजीर्महिना विश्वतः सीम्।
अमन्यमानाँ अभि मन्यमानैर्निर्ब्रह्मभिरधमो दस्युमिन्द्र ॥९॥

परि यत् इन्द्र रोदसी इति उभे इति अबुभोजीः महिना विश्वतः सीम् अमन्यमानान् अभि मन्यमानैः निः ब्रह्मऽभिः अधमः दस्युम् इन्द्र॥

हे इन्द्र, यत् यदा त्वं रोदसी द्यावापृथिव्यौ उभे द्वे अपि विश्वतः सीम् सर्वतश्च महिना तव महिम्ना परिगृह्य पर्यबुभोजीः पर्यभुङ्क्थाः, तदा अभि मन्यमानैः त्वां अभिलक्ष्य अनुध्यायद्भिः त्वद्विषयिकां मतिं कुर्वद्भिः पुरुषैः द्वारा अमन्यमानान् त्वद्विषयक-ध्यानशून्यान् अभक्तान् निरधमः निस्सारितवानसि। तथा हे इन्द्र, ब्रह्मभिः मन्त्रैः स्तोतृभिः ऋषिभिः प्रयुक्तैरिति शेषः दस्युम् वृत्रं निरधमः इति संबन्धः॥ अत्र सायणीयं तात्पर्यं तु—मन्त्रार्थमनुध्यातुमशक्तानपि (अमन्यमानान्) केवलमन्त्रपाठकान्, 'अस्मदीया एते' इति 'अभिमन्यमानैः' मन्त्रैः दस्युं अधमः—इति॥ अबुभोजीः—अभुङ्क्थाः, छान्दसः। महिना—महच्छब्दात् इमनिच्, मलोपः छान्दसः। मन्यमानान्—मन ज्ञाने॥

दशमीमृचमाह—

न ये दिवः पृथिव्या अन्तमापुर्न मायाभिर्धनदां पर्यभूवन्।
युजं वज्रं वृषभश्चक्र इन्द्रो निर्ज्योतिषा तमसो गा अदुक्षत्॥१०॥

न ये दिवः पृथिव्याः अन्तम् आपुः न मायाभिः धनऽदाम् परिऽ अभूवन् युजम् वज्रम् वृषभः चक्रे इन्द्रः निः ज्योतिषा तमसः गाः अधुक्षत्॥

ये वृत्रनिरुद्धाः अब्विशेषाः दिवः द्युलोकात् पृथिव्याः भूमेः अन्तम् स्थानं नापुः न प्राप्ताः। ये च ते वृत्रमायावशंवदाः वृत्राभासाः भूत्वा मायाभिः कपटप्रज्ञाभिः वृत्रकर्मभिर्वा धनदाम् धनस्य ज्योतिर्बलादिगोरूपधनस्य दातारं इन्द्रं न पर्यभूवन् परितो न व्याप्ताः, भुवं न प्राप्ताः वृत्रनिरोधात्, दिवस्पतिं वा न व्याप्ता मायाबलेनेत्यर्थः। तदानीं तान् विमोच्य गाश्च लब्ध्वा दुग्धवानिन्द्र इत्याह। इन्द्रः वृषभः वर्षिता वज्रम् आयुधं युजम् युक्तं चक्रे कृतवान्। तथा स्वयुक्तेन वज्रेण ज्योतिषा स्वीयेन तमसः वृत्रस्य मृत-शरीरभूतात् तमसः (अपादानम्) गाः गुहान्धकारबन्धिताः गाः निरधुक्षत् निश्शेषेण दुग्धवान्। युजम्—युजिर् योगे, ऋत्विगित्यादिना किन्। अधुक्षत्—दुह प्रपूरणे, लुङ् दादेर्धातोर्घ इति धत्वम्, छान्दसः संहितायां षभ्भावाभावः॥

अत्र सायणः—'यदा आपः अन्तरिक्ष एव निरुद्धा भूमिं न प्राप्ताः, धनप्रदां भूमिं

सस्योपकारादिकर्ममिः न व्याप्ताः तदा इन्द्रः मेघं भित्वा जलं वृष्टवान्' इति व्याचष्टे। अस्यानुकूलाः पदार्था एवमुक्ताः 'तमसः अन्धकाररूपात् मेघात्, गाः गमनशीलानि उदकानि' इति। तथा 'धनदां भूमिं' इत्यादि च चिन्त्यम्। अपां बन्धविमोचने गावश्च विमुक्ताः इति बहुशः मंत्रवर्णाः भवन्ति, कथं तर्हि गाव एव आप इति कथ्यते? सूक्तान्ते तात्पर्यविचारे क्रियमाणे सर्वोऽप्येवंविधः क्लेशो निर्धुतः स्यात्॥

इति प्रथमस्य तृतीये द्वितीयो वर्गः

एकादशीमृचमाह—

अनु स्वधामक्षरन्नापो अस्यार्वधत मध्य आ नाव्यानाम्।
सधीचीनेन मनसा तमिन्द्र ओजिष्ठेन हन्मनाहन्नभि द्यून्॥११॥

अनु स्वधाम् अक्षरन् आपः अस्य अवर्धत मध्ये आ नाव्यानाम्
सधीचीनेन मनसा तम् इन्द्रः ओजिष्ठेन हन्मना अहन् अभि द्यून्॥

अस्य इन्द्रस्य स्वधाम् अनु स्वधापदवाच्यं स्वधारणसामर्थ्यरूपं स्वभावं अनुरुध्य, इन्द्रविभवसंपोषक-तत्स्वभावानुरोधेनेत्यर्थः आपः अक्षरन् स्यन्दमाना आसन्। तत्रापि तथा इन्द्रानुकूलासु प्रवाहिणीषु अप्सु, नाव्यानाम् नावा तार्याणामपां मध्ये अधः पतितोऽपि वृत्रः आ समन्तात् अवर्धत वृद्धिं प्राप्तः। तदा इन्द्रः सधीचीनेन सह गच्छता मनसा यत्रेन्द्रः स्थितस्तत्रैव गच्छता मनसा युक्तं तम् वृत्रं ओजिष्ठेन बलिष्ठेन हन्मना हननसाधनेन वज्रेण अभि द्यून् कतिपयदिवसान् अभिलक्ष्य अहन् हतवान्॥ स्वधाम्—गतम् (१. ६. ४.)। नाव्यानाम्—अपां गभीरत्व-प्रभूतत्वद्योतनायेदं अपां विशेषणम्, अधः पतित्वा मग्नस्य वृत्रस्य उन्मज्जनं सुकरमिति गम्यम्। सधीचीनेन—सहस्य सधिरादेशः, सह अञ्चतीति सधयङ्, ततः खप्रत्ययः स्वार्थे, तस्य ईनादेशः। ओजिष्ठेन—ओजोऽस्यास्तीति ओजस्वी, आतिशायनिक इष्ठन् विन्मतोर्लुक् इति विनः टिलोपः। हन्मना—हन्यते अनेनेति हन्म करणे मनिन्। द्यून् अभि—द्युरिति अहर्नाम अभि कर्मप्रवचनीयम्॥

द्वादशीमृचमाह—

न्याविध्यदिलीबिशस्य दृळ्हा वि शृंगिणमभिनच्छुष्णमिन्द्रः।
यावत्तरो मघवन्यावदोजो वज्रेण शत्रुमवधीः पृतन्युम्॥१२॥

नि अविध्यत् इलीबिशस्य दृळ्हा वि शृङ्गिणम् अभिनत् शुष्णम् इन्द्रः यावत् तरः मघऽवन् यावत् ओजः वज्रेण शत्रुम् अवधीः पृतन्युम् ॥

इलीबिशस्य इलाबिलशयस्य, तस्मादेतदाख्यस्य असुरस्य दृळ्हा दृढानि अभेद्यानि वासस्थानानि इन्द्रः न्यविध्यत् नितरां विद्धवान्। शृङ्गिणम् आयुधस्थानीयविषाणयुक्तं, दर्पात् शरीरैकदेशेन दृढप्रहारकुशलं शुष्णम् रसशोषकं, अतएव एतदाख्यं असुरं व्यभिनत् विविधं मर्दितवान्। मघवन् धनयुक्त इन्द्र, यावत् तरः तव यावान् वेगः यावत् ओजः यावद्बलं तत्सर्वं प्रयुज्य त्वं पृतन्युम् पृतनामिच्छन्तं युद्धेच्छुम् शत्रुम् वृत्रं वज्रेण अवधीः हतवानसि। इलीबिशः शुष्णश्च वृत्रान्नान्याविति मत्वा तदनुसारेण सायणव्याख्या चलति। "शुष्णमवातिरः" (१. ११. ७) इत्यत्र व्याख्याऽवधेया॥ इलीबिशस्य—पृषोदरादित्वात् अभिमतरूपसिद्धिः। पृतन्युम्—पृतनाशब्दात् क्यचि छन्दसि उप्रत्ययः॥

त्रयोदशीमृचमाह—

अभि सिध्मो अजिगादस्य शत्रून्वि तिग्मेन वृषभेणा पुरोऽभेत्।
सं वज्रेणासृजद् वृत्रमिन्द्रः प्र स्वां मतिमतिरच्छाशदानः ॥१३॥

अभि सिध्मः अजिगात् अस्य शत्रून् वि तिग्मेन वृषभेण पुरः अभेत् सम् वज्रेण असृजत् वृत्रम् इन्द्रः प्र स्वाम् मतिम् अतिरत् शाशदानः ॥

अस्य इन्द्रस्य सिध्मः साधको वज्रः शत्रून् अभि असुरानभिलक्ष्य अजिगात् अगच्छत्। स इन्द्रः तिग्मेन तीक्ष्णेन वृषभेण प्रहारवर्षिणा वज्रेण पुरः शत्रुपुराणि व्यभेत् विविधं भिन्नवान्। ततः इन्द्रः वृत्रम् असुरं वज्रेण स्वीयेनायुधेन समसृजत् संयोजितवान्। तेन कर्मणा शाशदानः वृत्रं हिंसन् स्वां मतिं स्वाभीष्टसिद्धिरूपां बुद्धिं प्रातिरत् प्रकर्षेण साधितवान्॥ अजिगात्—जिगातिर्गतिकर्मा। अभेत्—भिदिर् विदारणे श्नमि व्यत्ययेन शप्, तस्य लुक् छन्दसि। अतिरत्—तरतेः व्यत्ययेन शः, ऋत इत् धातोरिति इत्वम्। शाशदानः—शदॢ शातने, तस्मात् यङन्तात् शानच्॥

चतुर्दशीमृचमाह—

आवः कुत्समिन्द्र यस्मिञ्चाकन्प्रावो युध्यन्तं वृषभं दशद्युम् ।
शफच्युतो रेणुर्नक्षत द्यामुच्छ्वैत्रेयो नृषाह्याय तस्थौ ॥१४॥
आवः कुत्सम् इन्द्र यस्मिन् चाकन् प्र आवः युध्यन्तं वृषभम् दशऽद्युम् शफऽच्युतः रेणुः नक्षत द्याम् उत् श्वैत्रेयः नृऽसह्याय तस्थौ ॥

हे इन्द्र, त्वं, यस्मिन् विषये चाकन् सन्मङ्गलं कामयमानो भवसि तं कुत्सम् नाम्ना कुत्सं आवः अरक्षः । युध्यन्तम् युद्धं कुर्वन्तं वृषभम् वर्षितारं श्रेष्ठं वा दशद्युम् एतन्नामकं प्रावः प्रकर्षेण रक्षितवानसि । शफच्युतः त्वदीयाश्वस्य शफात् गलितः रेणुः धूलिः द्याम् द्युलोकं नक्षत गच्छति । श्वैत्रेयः श्वित्राख्यायाः पुत्रः (अप्सु निमग्नः) नृसह्याय नृभिः बलिभिः पुरुषैः सोढव्याय उत्तस्थौ उत्थितः, अद्भ्यो निर्गम्य उद्गतवान् ॥ चाकन्—कमु कान्तौ, अस्माद् यङ्लुगन्तात् लङि, चक तृप्तौ इत्यस्माद्वा शतरि छान्दसं रूपं इति प्रक्रियामाहुः पूर्वे । युध्यन्तम्—व्यत्ययेन परस्मैपदम् । नक्षत—णक्ष गतौ व्यत्ययेन आत्मनेपदम् । नृसह्याय—शकिसहोश्चेति कर्मणि यत् ॥

कुत्स–दशद्यु–श्वैत्रेयाणामनुग्रहं कृतवान् इन्द्र इत्यत्रोक्तम् । तर्हि ऐतिहासिकाः पुरुषास्तेऽभ्युपगन्तव्याः । तथा बहव ऋषयो राजानश्च श्रूयन्ते मन्त्रेषु । तन्नाम्नां गूढान्यर्थान्तराणि अवयवार्थानुसारीणि ग्राह्याणि । विशेषतः प्रसिद्धाः कुत्स–कक्षीवत्–शुनःशेपादयः अन्तर्यागाध्वनि सिद्धानुभूतिप्रतिष्ठाप्रतिमानभूताः भवन्ति । यथा बन्धत्रयनिर्मोक्षसिद्धेः प्रतिष्ठा शुनःशेपे, यथा वा भगवतः श्रीकृष्णस्य अर्जुन इव, इन्द्रस्य कुत्से सख्यम् । ईदृशसाहचर्यसख्यादेः प्रतिष्ठा कुत्से । एवमन्यत्रापि बोध्यम् ॥

अथ कुत्सादीनां अत्र श्रुतानां निर्वचनं पश्यामः । 'करोतेः कृन्ततेर्वा' इति पूर्वे । चिन्त्यमिदम् । देवद्वेषिणां शत्रूणां वा कुत्सनात् अधःकरणात् कुत्स इत्युत्पश्यामः । दशद्युम्–अप्रसिद्ध ऋषिः । दशसु दिक्षु प्रकाशोऽस्येति प्राहुः । श्वैत्रेयः—श्वित्राया अपत्यम् । श्वित्रा श्वेता निष्प्रभा निष्कला वा केयमिति न विदिता तत्त्वतः । इतिहासे वा न प्रसिद्धा । स्याद्वा प्रभाहीना रुग्णेव प्रकृतिः, यस्यां संभूतः पुरुषो ज्योतिर्बलादिसंपादनात् प्राक् जीवनधारणसमर्थासु अप्सु समाहितो भूत्वा, इन्द्रानुग्रहात् प्रभाववान् निर्गतोऽभीः संवृत्तः ॥

पञ्चदशीमृचमाह—

आवः शमं वृषभं तुग्र्यासु क्षेत्रजेषे मघवञ्छ्वित्र्यं गाम् ।
ज्योक् चिदत्र तस्थिवांसो अक्रञ्छत्रूयतामधरा वेदनाकः ॥१५॥

आवः शमम् वृषभम् तुग्र्यासु क्षेत्रऽजेषे मघऽवन् श्वित्र्यम् गाम् ज्योक् चित् अत्र तस्थिऽवांसः अक्रन् शत्रुऽयताम् अधरा वेदना अकरित्यकः ॥

हे मघवन् धनवन्निन्द्र, श्वित्र्यम् श्वित्रायां पूर्वोक्तस्वरूपायां भवं पुरुषं आवः रक्षितवानसि । कीदृशम् ? क्षेत्रजेषे पार्थिवं क्षेत्रं स्थानं जित्वा स्वीयं विधातुं तुग्र्यासु प्रेरणबलवाहिनीषु अप्सु अवस्थायापि शमम् व्याकुलताशून्यं शान्तं वृषभम् पुंबलश्रेष्ठं गाम् चित्प्रकाशरश्मिरूपम्, एवंभूतं श्वित्राभवं जीवमात्मानं 'आवः' इति संबन्धः । अत्र अस्मिन् 'श्वित्र्ये' विषये ज्योक्चित् चिरकालमपि तस्थिवांसः अवस्थिताः सन्तः अक्रन् शत्रुत्वं अकुर्वन् वैरिणः । तथा शत्रूयताम् शत्रुत्वमिच्छतां अधरा निकृष्टानि वेदना दुःखानि अकः अकरोः ॥

तुग्र्यासु—तुग्रशब्दाद् घन् घस्य इयादेशः, इत्वलोपश्छान्दसः । क्षेत्रजेषे—जेषृ गतौ, अस्मात् संपदादिलक्षणः क्विप्, जेट्, क्षेत्रस्य जेट् क्षेत्रजेट् तस्मै । श्वित्र्यम्—भवे छन्दसि यत् । अक्रन्—करोतेर्लुङ् च्लेर्लुक्, छान्दसम् । शत्रूयताम्—शत्रुमात्मन इच्छन्तीति शत्रूयन्तः, क्यच्, तदन्तात् शतृ । अधरा, वेदना—शेर्लोपः छन्दसि । अकः—करोतेः लुङ्, च्लेर्लुक्, छान्दसम् ॥

सायणीये—'तुग्र्यासु जलेषु गां गतं मग्नमित्यर्थः' इति पदार्थे भेदः । तात्पर्ये अन्वये च व्याख्या भिद्यत एव । तत्र कारणमिदं भवति । श्वैत्रेयः न केवलं ऐतिहासिकः । स नित्यः कश्चन अर्थः स्यात् । तथा श्वित्राशब्दः पूर्वत्रैव व्याख्यातायां गृहीतः । तुग्र्याः उदकनामसु पठितत्वात् अप्सु इति पूर्वव्याख्यानम् । बलप्रेरणप्रापणाद्यर्थात् तुञ्जतेर्निष्पन्नस्तुग्र्यशब्दः इति गृहीत्वा अप्पर्यायत्वेऽपि अप्छब्दो गूढार्थद्योतकसङ्केतरूपो व्याख्यातः ॥

इति प्रथमस्य तृतीये तृतीयो वर्गः

आङ्गिरसस्य हिरण्यस्तूपस्य ऐन्द्रं सूक्तद्वयं व्याख्यातम्। समासतस्तस्य रहस्यार्थोपपादकं तात्पर्यं पर्यालोच्येह संदृभ्यते। यद्यपि सूक्तद्वयेऽपि इन्द्रप्रभावो वर्णितः, तथापि 'इन्द्रस्य नु वीर्याणी'ति सूक्ते वृत्रवधादपां विमोचनस्य प्राधान्यं लक्ष्यते, 'एतायामे'ति सूक्ते तु वृत्रवधादपां उत्सर्जनेन सह गवां अधिगमः, वृत्रानुचराणां निग्रहः, कुत्सादीनामनुग्रहश्च वर्णिताः। इतिहासकथानां वेदेषु परोक्षवचनत्वाभ्युपगमात् वृत्रादिशब्दानां सङ्केतत्वमवधाय ध्येयो रहस्यार्थः। पर्वतः आपः समुद्रः गावः उषः सूर्यः वृत्रबलपणयः इत्यादयः बहिः सङ्केतरूपा अन्तर्गूढार्था बोध्याः। वृत्रकथासु अन्यत्र च ऋक्संहितायां प्रयुक्तानां पर्वतादिमुख्यपदार्थरहस्यं प्रथममुद्घाटयितव्यम्॥

अद्रिः, पर्वतः, शिलोच्चयः—सङ्केतो भवति भूगर्भात्प्रभृति नाकपृष्ठावधि अवस्थितस्य त्रैलोक्यसद्भावस्य सर्वस्यापि ब्रह्माण्डस्य, रहोयागरतानां पिण्डाण्डस्यापि अन्नप्राणमनस्तत्त्वात्मकत्रिकस्य चेति बोध्यम्। अत्युन्नतोऽयं विश्वसंस्थानपर्वतः पर्ववान्, इममेव ऋषय आरोहन्ति क्रमशः प्रस्थादुपरि प्रस्थं 'सानोः सानुमारुहत्'। अदितिः—अखण्डस्वरूपिणी प्रकृतिः, अघ्न्या गौः, इन्द्रादीनां देवानां ज्योतिषां प्रसूः। दितिः खण्डिता प्रकृतिः, अस्याः सूनवो दस्यवो दानवा वृत्रादयः तमसस्पुत्राः। ज्योतिः सत्यं ऋतं ऊर्ध्वमवस्थितम्, नित्यं 'अहो' भवति। तमः अनृतं अधोऽवस्थितं 'रात्रिः' भवति। अनयोः ज्योतिषः तमसश्च मध्ये त्रैलोक्यमवस्थितम्। यथा ज्योतिषः पुत्राणां आदितेयानां ऊर्ध्वमावासो देवानाम्, तथा तमसस्पुत्राणां दैतेयानां पर्वतस्य मूले निवासः। पर्वतस्य पादे गुहा बिलं वा वासस्थानमात्रं दानवानां वृत्रादीनाम्। तेषां कर्माणि त्रैलोक्याक्रमणानि भवन्ति। अत एव देवानां दैत्यानां च युद्धम्॥

अथ गावः चिद्रश्मयः, अदितेर्बृहत्या अंशाः, तस्मादादितेयाः। आपः चित्प्रभाववाहिन्यः, इमाश्च सप्त सिन्धवो भवन्ति, सप्तसंख्या तु सप्ततत्त्वात्मकविश्वसत्तासंबन्धिनी, यतः सप्तस्वपि धामसु भूरादिषु प्रवहन्ति चित्क्रियाशक्तयः। समुद्रश्च अखण्डनिरवधिकामृतसत्त्वस्य सङ्केतः, स ऊर्ध्वो भवति वेदान्तिसंमतसच्चिदानन्दस्थानीयः। अन्यश्च समुद्रः अधःस्थानः जडगतः, अचित्तिरेव सः। तं 'अप्रकेतं सलिलम्' इति दृष्टवान् परमेष्ठी। जडाद् अस्मात्समुद्रादुत्थितः सृष्टो वा त्रैलोक्यलक्षणः पर्वतः। तत्र अरणशील उद्यमी चित्क्रियां अप्लब्दलक्षितां, चिद्रश्मिं गोपदप्रतिपादितां, चिदानन्दरसं सोमशब्दलक्षितं च प्राप्य सत्यं उत्तमं ज्योतिः अमृतं प्राप्तुं प्रयतते। देवसाहाय्येनैवायमुद्यमः

सफलः स्यात्। तस्माद् यजति देवान्। स्वीयसर्वानुभूतिरसं सोमपदवेदनीयं निष्कृष्य, संस्कृतं तं देवेभ्यो ददाति। देवानां राजा वीरस्तेन बलवान् जातः कर्तव्यं करोति यजमानाय॥

दिव्याः स्रवन्त्य आपः वृत्रेण निरुद्धाः, तथा गावश्च पणिभिरपहृत्य तेषां मुख्येन वलेनाधिष्ठिते बिले गुहास्थले बन्धिताः। एताश्च विमोचयितव्याः। अत्रेदमवधेयम्। इमाश्च सिन्धवः परमात्समुद्रात् स्रवन्त्यः दिव्याः, न भौमाः, वृत्रेण अपां आवरकेण प्रतिरुद्धाः। आसां भूप्राप्तिं रुन्धन्तं असुरं ज्वलता वज्रेण हतवान् इन्द्रः। तेन हननेन अपां विमोचनं निरवहत्। पर्वतमूर्धनि द्वारमकरोत्। तेन मार्गेण आपः प्रावहन्। एषा सारतो वृत्रवधादपां विमोचनकथा बहुभ्यः सूक्तेभ्योऽवगम्यते। अवधार्यं चेदम्। यद्यपि अद्रिः पर्वतो वा सङ्केतोऽस्माभिर्विवृतः तथापि पर्वतो मेघपर्यायो वेदे न विस्मार्यः, तत्र मेघस्य अवावरकत्वविवक्षा ज्ञेया॥

अथ गा अधिकृत्य। दस्यवश्चोराः पणयो व्यवहारिणः एषां मुख्यो वलः, वलयिता गवाम्। सोऽद्रिबिलवासी। तमसि गुहायां गोव्रजं गूहते। अङ्गिरोभिः सह इन्द्रो गत्वा तं विजित्य गाः निस्तरेत्। कथमिदं कर्म स करोति? नष्टं गोधनं अधिगन्तुं यजमानस्य यज्ञः साधनम्। तत्र उपकारिणोऽङ्गिरसः देवर्षयः, पूर्वं मनुष्याः एव भूत्वा देवभावं प्राप्ता वा, मन्त्रमुच्चारयन्त इन्द्रस्य साहाय्यमाचरन्ति। सोमपानेन बलवान् भवति मघवा। गुहां प्रविश्य अद्रिबिलं भित्त्वा वा गा विमोच्य उद्गमयति। अत्र देवशुनी सरमा सहजावबोधचक्षुः गोगुप्तिस्थानं गत्वा दृष्ट्वा च इन्द्रादीनां प्रथमं दर्शयति। ततः परं गोलाभ इत्यन्यत्र सूक्ते वर्णितम्॥

इदं च सार्वकालिकमिन्द्रकृत्यम्। अस्मै कर्मणे सर्वथा प्रभुरिन्द्रः। यद्यपि स प्रथममिदं गोलाभपरिनिष्ठितं गवेषणं पूर्वैर्ऋषिभिरङ्गिरोभिर्द्वारा निर्वर्त्य तेषु एतां गोलब्धिरूपां सिद्धिं प्रतिमानभूतां विधाय प्रतिष्ठापितवान् लोकानुग्रहाय, तथापि मानुषे लोके अस्य स्वीयकृत्यस्य अद्याप्यावृत्तिमादधानः अनवरतगवेषणपरो गोधनमुक्तलक्षणं लम्भयन्नेव राजति राजा त्रैलोक्यदेवानाम्॥

अथेदानीं सूक्तद्वयऋचां तात्पर्यग्रहः सुकरः स्यात्। एतावत्युक्तेऽपि संदिग्धार्थाः सन्त्येव काश्चन ऋचः। ताश्च समालोचनीयाः। प्रथमं द्वात्रिंशसूक्तऋचां निरीक्षणं भवति। ऋ. १. इन्द्रस्य वीरकर्मकीर्तने वृत्रहननादपां निष्पीडनं नदीनां भेदनं चोक्ते–इदं च

प्रागुक्तं विवृतम्। ऋ. २. स्वर्लोकीयेनेन्द्रवज्रेण वृत्रे हते 'अञ्जः समुद्रं अवजग्मुरापः' इत्युक्तम्। अत्र 'अञ्जः' ऋजुना मार्गेण, 'अव' जग्मुः अधो गताः आपः इत्युक्तम्। ऊर्ध्वस्थानादृजु यथा तथा अधोगतं जडं अचित्तिसमुद्रं प्राप्ताः, येन ताभिरद्भिः चित्क्रिया-शक्तिवाहिनीभिः पोषितो नवीकृतः फलितो भवति अन्नमयादिशरीरवान् यजमानः। समुद्रं प्रति भौमानां अपां नदीनां वर्षजलानां वा गमनं तिरश्चीनं, न तु ऋजु गमनं, अधोगमनं वा भवति। ऋ. ३. 'त्रिकद्रुकेषु' ज्योतिर्गौरायुरिति त्रिषु आभिप्लविकेषु अहःसु सुतं सोमं इन्द्रः पिबतीति याज्ञिकाः ज्योतिर्गौरायुरिति त्रयाणां यानि स्थानानि पात्राणि तत्र सुतं सोमं इन्द्रः पीत्वा बलवान् वृत्रं जघान। ज्योतिः पिण्डाण्डे परमं धीस्थानम्, गौः अत्र वाक् स्यात्, आयुः प्राणः। इदं च ज्योतिरादित्रिकस्य याज्ञिकोक्तस्य अस्मदीयं विवरणम्। केवलमन्त्रवर्णाधारेण त्रिकद्रुकशब्दस्य अन्यथा भवति अर्थविवृतिः। कद्रुः पिङ्गलो बभ्रुर्वा वर्णः लतादिषु परिपक्वः। तेन सोमो लक्ष्यते वेदे। तस्मात् त्रिषु सोमपात्रेषु पृथिव्यादित्रिके (देहे प्राणे मनसि) सुतः सोमः इन्द्रेण स्वीक्रियते। तेन प्रवृद्धबलो वृत्रहा भवति। "त्रिकद्रुकेषु चेतनं देवासो यज्ञमत्नत। तमिद्वर्धन्तु नो गिरः"। (८.९२.२१)। अत्र देवाः चेतनं ज्ञानसाधनं यज्ञं 'त्रिकद्रुकेषु विस्तारितवन्तः' इत्युक्तम्। त्रिकद्रुकाः त्रिलोकी त्रिपात्रीति गृहीते सुगमं तात्पर्यम्। 'त्रिकद्रुकेषु महिषो यवाशिरं तुविशुष्मस्तृपत् सोममपिबत्' (२.२२.१) अत्रापि अस्मद्विवरणस्योपपत्तिर्द्रष्टव्या॥

ऋ. ४. वृत्रहतेः परं वृत्रानुयायिनां मायाविनां ध्वंसेन उषसं द्यां सूर्यं च अजनय-दिन्द्रः। वृत्रवधस्य युगपत् फलानि प्रागुपन्यस्तानि स्मार्याणि। अधस्तात् अचित्ति-समुद्रादेव सूर्यस्योदयो जन्म। तथा दिवः उषसश्च। उत्तमं सत्यं ज्योतिः सूर्यः। अन्यच्च तदनुरोधेनावधार्यम्। 'वि गोभिरद्रिमैरयत्' (१.७.३) इति प्राग् व्याख्यातम्। ऋ. ७. 'अपात् अहस्तः' अहिः सर्पः स्वभावतः अपाणिपादोऽपि, छिन्नबाहुः सर्वथा छिन्नाङ्ग इति पूर्वमन्त्रोक्त्यनुसारेण ग्रहणेऽदोषः। ऋ. ८. नदं नेत्यृचि 'मनो रुहाणा अति यन्त्यापः' इत्यस्य तात्पर्यमवधेयम्। तमोमूर्तेरसुरस्य वृत्रस्याधः पतने तेन पूर्वं निरुद्धाः आपः विमोचिता अधुना तमतिक्रम्य ऊर्ध्वं मनोभुवं आरोहन्ति, न तु तिरश्चीनतया प्रवहन्ति। ताश्चित्क्रियाधाराः एतावन्तं कालं तमसाऽऽवृताः पर्वते पर्वतेन वा जडेनावरकेण वा बन्धिताः अन्नप्राणमयप्रस्थोपरि गत्वा मनोभुवं फलितां कर्तुं उद्गताः प्रवहन्ति॥

ऋ. ९. दानुः वृत्रमाता, दितिरित्युच्यते। उभयोरवयवार्थः समानः। दाप् लवन इत्यस्मान्निष्पन्नौ। अखण्डात्मिकायाः इन्द्रादिदेवमातुरदितेः विपरीता दितिः खण्डात्मिका वृत्राद्यसुरमाता। वृत्रे हन्यमाने स्वस्या बाहुप्रसारेण वज्रप्रहारं परिहर्तुं स्थिता तन्माता। तदानीं माता उपरि अधस्तात् वृत्रः हत एव। सेयं खण्डिता खण्डात्मिका सर्व-भूतविभागभेदमूलभूता अपरा प्रकृतिः वृत्रमाता उपरि, तज्जातो घनीभूततमोमूर्तिरधस्ताच्च निश्चेष्टं अभवताम्। अनेन तमसोऽगाध-दुष्प्रवेश-अदृश्यता लक्ष्यते। तं अन्तर्धारयन्त्याः जडतमःप्रकृतेः दृश्यता च गम्यते। ऋ. १०. स वृत्रः 'दीर्घं तम आशयत्' मृतिप्रायां दीर्घनिद्रामास्थितः, सुप्तो निश्चेष्टोऽभूत्, तस्य शरीरं 'निण्यं' अपां मध्येऽन्तर्हितम्। ऋ. १४. अत एव वा इन्द्रस्य वृत्रं हतवतोऽपि भीतिर्जाता कुत्रापि निलीनः पुनर्निर्गतः स्याद्वेति। वृत्रः अधोगतो न दृष्टः, वृत्रमातैव सुप्ता निश्चेष्टा लक्षिता। इदं च भय-कारणं इन्द्रस्येत्यस्मदूहः। वृत्रवधपापाद् भीतिरिति कथा पुराणेषु प्रसिद्धा, तत्र नास्मा-कमादर इति किमु वक्तव्यम्? ऋ. १५. 'अरान् न नेमिः परि ता बभूव' इत्युपमया सर्वं जगत् परितो वृत्वा शक्त्या परिमाणेन च महानिन्द्रस्तस्य स्थितिकृत् आधारश्च भवतीति ऋषेर्दृष्टिवैशाल्यं द्योत्यते॥

'एतायामे'ति सूक्ते विशेषतोऽवधेया विषयाः व्याख्यायां अङ्गिरोविचारे अन्यत्र चोपन्यस्ताः। गोकामानामामन्त्रणपूर्वकं सूक्तमारभत ऋषिः। ऋ. ६. 'नवग्वाः इन्द्रं अयातयन्त' इत्यत्र अङ्गिरसः स्वमन्त्रबलैरिन्द्रं उद्योजितवन्त इत्युक्तमवधेयम्। 'अद्रिं रुजन्नङ्गिरसो रवेण' इत्यादिमन्त्रवर्णैरिदं च सङ्गच्छते। वृत्रे हते, अदृश्यतां गते, दीर्घस्वापमास्थितेऽपि तदीयानुचराः न युद्धान्निवृत्ता इति बहुधा कीर्त्यतेऽस्मिन् सूक्ते। तेन तमोनाशे निर्वर्तितेऽपि तच्छेषो व्याप्रियत एव कञ्चित्कालमिति बोध्यम्। एव-मन्येषामसुराणां यथा संहारः कृतः, तथा कुत्सादीनां प्रतिमानभूत-पुरुषाणां रक्षणं च कृतं भगवतेन्द्रेणेति सूक्तसमाप्तिः। अन्ये च विस्तरास्तत्र तत्र व्याख्याता इत्यलं दिङ्मात्रप्रदर्शनेन॥

अथ सप्तमेऽनुवाके 'त्रिश्चिन्नो अद्य' इति चतुर्थं द्वादशर्चं सूक्तम्। हिरण्यस्तूप एव ऋषिः अश्विनौ देवता। 'क त्री चक्रा' इति नवमी 'आ नो अश्विना' इति द्वादशी च त्रिष्टुभौ शिष्टा जगत्यः॥

तत्र प्रथमामृचमाह—

त्रिश्चिन्नो अद्या भवतं नवेदसा विभुर्वां याम उत रातिरश्विना।
युवोर्हि यन्त्रं हिम्येव वाससोऽभ्यायंसेन्या भवतं मनीषिभिः॥१॥

त्रिः चित् नः अद्य भवतम् नवेदसा विऽभुः वाम् यामः उत रातिः अश्विना युवोः हि यन्त्रं हिम्याऽइव वाससः अभिऽआयंसेन्या भवतम् मनीषिऽभिः॥

हे नवेदसा ज्ञातारौ कालविभागस्य काले कर्तव्यस्येति वा शेषः, अश्विना हे अश्विनौ, अद्य इदानीं नः अस्मदर्थं त्रिः चित् त्रिवारमपि भवतम् युवां सन्निहितौ भवतम्। अत्र 'त्रिः' इति सवनत्रयापेक्षं अश्विनोरागमनं प्रार्थितं याज्ञिकपक्षे। अन्तर्यजने तु सर्वत्र अस्मिन् सूक्ते त्रिसंख्या भूरादिलोकत्रयं तत्सदृशं अन्तःस्थानत्रयं देहप्राणमनस्त्रयं तत्तदुचितनिष्ठानियमानुसारप्राप्तं कालविभागं देशविभागं वा द्योतयतीति बोध्यम्। अत्र त्रिरिति अन्तर्यजनविधानाधीनं दिव्यं समयभेदं बोधयेत्। तथा अश्विनोः समयानुसारेणागमनं सन्निधानं सुलभमित्याह। वाम् युवयोः यामः यानसाधनभूतो रथः विभुः सर्वतो व्याप्तः, उत अपि च रातिः दानं स्वीयसन्निधेरिति शेषः, विभुरिति संबन्धः। युवोः युवयोः यन्त्रम् हि उभयोर्नियमनं अस्ति खलु। तत्र दृष्टान्तमाह। वाससः वाससस्य हिम्या इव रात्र्या इव, यथा दिवसस्य रात्र्या सह संबन्धो नित्यो नियमितः तद्वत्। तथा परस्परनियमनसम्पन्नौ युवां मनीषिभिः धीमद्भिः देवताविषयकमेधाशालिभिः अभ्यायंसेन्या अभितो नियन्तव्यौ भक्तिबलेन युष्मदनुग्रहवशात् सान्निध्यं कर्तुं स्वयं तद्वशवर्तिनौ भवतम्।

नवेदसा—'नञ्राण् नपान्नवेदा' इत्यादिना नञः प्रकृतिभावे प्राप्ते, न वेदः ज्ञानं यस्येति विग्रहो वक्तव्यः। अत एव 'विपरीतं न वित्तः इति नवेदसौ' इति सायणः। अन्यत्र न वेदो यस्य न इति नञ्द्वयं विग्रहे प्रयुज्य कथञ्चित् समर्थ-

यति। अवयवार्थः संदिग्ध एव। कविर्मनीषीति तन्नामसु पठितत्वात्। नवेदः-शब्दप्रयोगस्थलेषु ज्ञात्राद्यर्थस्य सङ्गतेश्च। नवेदाः ज्ञाता, निरीक्षक इत्याद्यर्थे ग्राह्यः। यामः—यायते गम्यतेऽनेनेति यामः, मन्। युवोः—छन्दसि यलोपः, टिलोपश्च। हिम्या इव—हिमा रात्रिनाम, ततस्तृतीयैकवचनस्य ङ्यादेशः। वाससः—वस आच्छादने वासयति प्रकाशेनेति अहर्वासः। अभ्यार्यस्येन्या—अभि-आङ् इति उपसर्गद्वयपूर्वकात् यम उपरम इति धातोः औणादिकः सेन्यप्रत्ययः॥

'हिम्येव वाससः' इत्यत्र हिमयुक्तया रात्र्या सह (शैत्यबाधानिवारणाय) वाससः आच्छादनस्य वस्त्रस्येव इति नव्यानां एके। एते च मन्यन्ते—हेमन्तरात्रौ आच्छादनं यथा आश्रयन्ते जनाः, तथा अश्विनौ वयमाश्रयामहे इति ऋषेर्विवक्षेति। बहुशब्दाध्याहारनिष्पादनीयोऽयं भावः। नैतद्युक्तम्। अत्र अश्विनोरुभयोः 'यन्त्रम्' नियन्त्रणं नियमनरूपः संबन्धः अहोरात्रवदित्युक्तम्। यद्यपि तौ पृथक् जातौ भवतः 'नाना जातौ' (५.७३.४), तथापि नासे अक्षिणी हस्तौ दम्पती इत्यादिवत् समानकार्यप्रवृत्तौ नियतसंबन्धौ नित्यद्वन्द्वभूतौ इति विश्रुतौ वेदे (मं. २. सू. ३९)। तदेवेह प्रतिपादितं 'हिम्येव वाससः' इति दृष्टान्तेन। अश्विनावधिकृत्य माधुच्छन्दसे तृचे विचारितम्॥ (मं. १. सू. ३. पृ. ११२–११६)॥

द्वितीयामृचमाह—

त्रयः पवयो मधुवाहने रथे सोमस्य वेनामनु विश्व इद्विदुः।
त्रयः स्कंभासः स्कभितास आरभे त्रिर्नक्तं याथस्त्रिर्वश्विना दिवा॥२॥

त्रयः पवयः मधुऽवाहने रथे सोमस्य वेनाम् अनु विश्वे इत् विदुः त्रयः स्कंभासः स्कभितासः आऽरभे त्रिः नक्तम् याथः त्रिः ऊम् इति अश्विना दिवा॥

मधुवाहने मधु सोम्यं मधु देवानां अशनं प्रसिद्धं, तद्वाह्यतेऽनेनेति मधुवाहनः तद्युक्त इत्यर्थः तस्मिन् रथे अश्विनोः रथे त्रयः त्रिसंख्याकाः भूरादित्रिस्थानसदृशाः पवयः वज्रदृढाः चक्रविशेषाः सन्ति। सोमस्य विश्वसत्तास्थिरांशभूत-रसात्मनः सोमस्य राज्ञः वेनाम् अनु कमनीयां कान्तां भोग्यभूतां आनन्दमयीं उत्तमज्योतिर्ध्रुवं अनुलक्ष्य

प्रयाणे विश्वे सर्वेऽपि देवाः विदुः इत् जानन्त्येव, सोमस्य वेनामनु उक्तलक्षणस्य रथस्य गमनं इति शेषः। अत्र सोमस्य चन्द्रस्य भार्यया वेनया सह विवाहे अश्विनोर्गमनमुक्तमिति मन्यते सायणः। न क्वाप्येषा कथा श्रूयते ब्राह्मणाख्यायिकासु पुराणकथासु वा। अथ सोम इह चन्द्रश्चेत् 'गन्धर्वस्य ध्रुवे पदे' (१.२२.१४) 'इत्था चन्द्रमसो गृहे' इत्यादिमन्त्रप्रतिपादितं तत्त्वमवधेयम्। रथगमनसाधनं त्रिचक्रमुक्तम्। आलम्बनार्थाः त्रयः स्तम्भा रथे प्रोच्यन्ते। त्रयः स्कम्भासः स्तम्भाः आरभे आलम्बितुं स्कभितासः स्थापिताः रथस्योपरि इति शेषः। हे अश्विना अश्विनौ, युवां त्रिः त्रिवारं नक्तम् रात्रौ याथः गच्छथः, त्रिः त्रिवारं दिवा अहनि याथः गच्छथः। उ पादपूरणे। अविद्याच्छन्ना तमोव्याप्ता रात्रिः अधस्तनत्रैलोक्यावस्थानं लक्षयति, अहस्तु नित्यप्रकाशं ऊर्ध्वं त्रैलोक्यमिति विवेकः। 'नक्तोषासे'त्यत्र व्याख्या (१.१३.७) तत्त्वबोधाय कल्पेत॥

स्कम्भासः, स्कभितासः—स्कम्भुः सौत्रो धातुः, द्वितीयस्य इडागमो निपातितः। आरभे—रभ राभस्ये, भावे क्विप्॥

तृतीयामृचमाह—

समाने अहन्त्रिरवद्यगोहना त्रिरद्य यज्ञं मधुना मिमिक्षतम्।
त्रिर्वाजवतीरिषो अश्विना युवं दोषा अस्मभ्यमुषसश्च पिन्वतम्॥३॥

समाने अहन् त्रिः अवद्यऽगोहना त्रिः अद्य यज्ञम् मधुना मिमिक्षतम् त्रिः वाजऽवतीः इषः अश्विना युवम् दोषाः अस्मभ्यम् उषसः च पिन्वतम्॥

हे अश्विना अश्विनौ, युवम् युवाम् समाने अहन् एकस्मिन्नेव दिने अन्तर्यजने चलति त्रिः त्रिवारं अवद्यगोहना अवद्यानां यजनगतदोषाणां गोहनौ गूहयितारौ, दोषापनोदकारिणौ इत्यर्थः। त्रिवारं देहत्रयापेक्षया स्यात्। अद्य इदानीं यज्ञम् अस्मदीयं यजनं त्रिः त्रिवारं मधुना दिव्येन रसेन मिमिक्षतम् सिञ्चतम्, रसार्द्रं क्रियतामस्मदन्तर्यजनम्। किंच दोषाः रात्रीः उषसः च दिवसांश्च, निरन्तरं अहोरात्रमित्यर्थः त्रिः त्रिवारं वाजवतीः समृद्धिमतीः इषः प्रबलप्रेरणाः अस्मभ्यम् पिन्वतम् सिञ्चतम्॥

मिमिक्षतम्—मिह सेचने, सनः किच्चाल्लघूपधगुणाभावः। पिन्वतम्—पिवि सेचने, इदित्त्वात् नुम्॥

चतुर्थीमृचमाह—

त्रिर्वर्तिर्यातं त्रिरनुव्रते जने त्रिः सुप्राव्ये त्रेधेव शिक्षतम् ।
त्रिर्नान्द्यं वहतमश्विना युवं त्रिः पृक्षो अस्मे अक्षरेव पिन्वतम् ॥४॥

त्रिः वर्तिः यातम् त्रिः अनुऽव्रते जने त्रिः सुप्रऽअव्ये त्रेधाऽइव शिक्षतम् त्रिः नान्द्यम् वहतम् अश्विना युवम् त्रिः पृक्षः अस्मे इति अक्षराऽइव पिन्वतम् ॥

हे अश्विना अश्विनौ, युवम् युवां वर्तिः वर्तनं, अस्मद्गृहं त्रिः यातम् त्रिवारं प्राप्नुतम्। तथा अनुव्रते जने अनुकूलव्यापारपरे जने त्रिः यातमिति सम्बन्धः। दैव्यं कर्मैव अनुकूलव्यापारः तद्यक्ते जने अनुग्रहः क्रियताम्। त्रिः त्रिधा सुप्राव्ये सुष्ठु प्रकर्षेण अवितुं रक्षितुं योग्ये कर्मणि अन्तर्यजने विषये त्रेधा इव त्रिप्रकारैरिव शिक्षतम् अस्मान् शिक्षयतं (अन्तर्भावितण्यन्तः) रहोविद्यां नः प्रापयतमित्यर्थः। नान्द्यम् नन्दनीयं, प्रीतिकरं फलं त्रिः वहतम् प्रापयतम्। अस्मे अस्मासु त्रिः त्रिवारं पृक्षः प्रीणनं दिव्यं रसं पिन्वतम् सिञ्चतम्। कानीव? अक्षरेव अक्षराणि उदकानि यथा पर्जन्यो वर्षति तद्वत्। अक्षरा उदकनाम ॥ वर्तिः—वर्ततेऽत्रेति वर्तिः। सुप्राव्ये—सुप्रपूर्वकादवतेः कर्मणि ण्यत्। नान्द्यम्—ण्यदन्तः। पृक्षः—पृची संपर्के, प्रीणनेऽपि वर्तते, असुनि सुडागमः। प्रीणयितृत्वादन्नं पृक्षो भवति सायणीये, कुक्षिसम्पर्चनाद्वा ॥

पञ्चमीमृचमाह—

त्रिर्नो रयिं वहतमश्विना युवं त्रिर्देवतातां त्रिरुतावतं धियः ।
त्रिः सौभगत्वं त्रिरुत श्रवांसि नस्त्रिष्ठं वां सूरे दुहितारुहद्रथम् ॥५॥

त्रिः नः रयिम् वहतम् अश्विना युवम् त्रिः देवऽतातां त्रिः उत अवतम् धियः त्रिः सौभगऽत्वम् त्रिः उत श्रवांसि नः त्रिऽस्थम् वाम् सूरे दुहिता आ रुहत् रथम् ॥

हे अश्विना अश्विनौ, युवम् युवाम् रयिम् धनं त्रिः त्रिवारं नः अस्मान् वहतम् प्रापयतम्। देवताता देवतातौ (स्वार्थिकः तातिल् प्रत्ययः) देवसदसीत्यर्थः त्रिः त्रिवारं आगच्छतमित्यध्याहारः। उत अपि च त्रिः धियः बुद्धीः अवतम् [illegible]वर्धयतं, सौभगत्वम्

सौभाग्यं अपि च त्रिः वहतम्। उत अपि च श्रवांसि दिव्यावेशश्रवणानि नः अस्मभ्यं त्रिः वहतम्। वाम् युवयोः त्रिष्ठम् त्रिचक्रावस्थितं रथम् सूरे सूर्यस्य (विभक्तिव्यत्ययः) दुहिता पुत्री आरुहत् आरूढवती। अश्विनोर्भार्या सूर्या तद्रथमारोहतीति प्रसिद्धम्। आश्विनतत्त्वविचारे चोपन्यस्तम्॥

त्रिष्ठम्–त्रिषु तिष्ठतीति, सस्य षत्वम्। सूरे–षू प्रेरणे, क्रन् प्रत्ययः। दुहिता–दुर्हिता दूरे हितेति यास्कः, दुह धातोर्निष्पन्नो दुहितृशब्दः, दोग्धि पितरौ दुहिता॥

षष्ठीमृचमाह—

त्रिर्नो अश्विना दिव्यानि भेषजा त्रिः पार्थिवानि त्रिरु दत्तमद्भ्यः।
ओमानं शंयोर्ममकाय सूनवे त्रिधातु शर्म वहतं शुभस्पती ॥६॥

त्रिः नः अश्विना दिव्यानि भेषजा त्रिः पार्थिवानि त्रिः उम् इति दत्तम् अत्ऽभ्यः ओमानम् शंऽयोः ममकाय सूनवे त्रिऽधातु शर्म वहतम् शुभः पती इति॥

हे अश्विना अश्विनौ, नः अस्मभ्यं दिव्यानि द्युस्थानानि भेषजा औषधानि त्रिः त्रिवारं दत्तम् प्रयच्छतम्। पार्थिवानि पृथिवीस्थानानि औषधानि त्रिः दत्तम्। तथा अद्भ्यः उ आप्यस्थानात् अन्तरिक्षादपि औषधानि त्रिः दत्तम्। हे शुभस्पती शोभनस्य सर्वस्य पालकौ, ममकाय मदीयाय सूनवे पुत्राय शंयोः बार्हस्पत्यस्य ऋषेः ओमानम् रक्षात्मकं सुखं दत्तम्। तथा त्रिधातु त्रयाणां अन्नप्राणमनसां धारकं (त्रयो धातवो धारकाः यस्मिन् तत्) शर्म शरणं सुखं वा वहतम् प्रापयतम्॥ ओमानम्–अवतेः। शुभस्पती–व्याख्यातम्॥

शंयुः ऐतिहासिकः। शं शान्तिसुखमात्मन इच्छतीति शंयुः, शान्तिसुखप्रतिष्ठाया निदर्शनभूत ऋषिः। तोक-तनय-अपत्य-प्रजा-पुत्रादिशब्दाः रहस्यार्थपक्षे यजमानस्य ऋषेः दिव्यसमृद्धिविसरा रहोविद्यासन्तानमहिम्ना प्रजासु प्राप्तप्रतिष्ठा इति बोध्यम्॥ भेषजानि नानाविधार्तिहराणि। "त्रिधातु" वातादिधातुत्रयशमनविषयमिति भैषज्यपक्षमाचक्षते सायणः। अस्याप्यन्तर्भावो भवतु नाम। नेदं धातुत्रयं वातादिकमात्रं, मन्त्रान्तरेषु त्रिधातुशब्दार्थमन्यथैवाचष्टे। मा भूदिह विस्तरः।

इति प्रथमस्य तृतीये चतुर्थो वर्गः

सप्तमीमृचमाह—

त्रिर्नो अश्विना यजता दिवेदिवे परि त्रिधातु पृथिवीमशायतम् ।
तिस्रो नासत्या रथ्या परावत आत्मेव वातः स्वसराणि गच्छतम् ॥७॥

त्रिः नः अश्विना यजता दिवेऽदिवे परि त्रिऽधातु पृथिवीम् अशायतम् तिस्रः नासत्या रथ्या पराऽवतः आत्माऽइव वातः स्वसराणि गच्छतम् ॥

हे अश्विना अश्विनौ, दिवेदिवे अहरहः यजता यजनीयौ युवां नः अस्मदीयां पृथिवीम् जागरितस्थानां अन्नमयक्षेत्रभूतां भूमिं, तत्सदृशीं चितिं, परि परितः त्रिः प्राप्य त्रिधातु त्रयो धातवः धारकाः कक्ष्यात्रयभूताः अन्नमयाद्याधारतत्त्वत्रयात्मकाः यस्मिन् कर्मणि तत् अशायतम् अशयातां, शयनं कुरुतम् । हे रथ्या नासत्या रथस्वामिनौ अश्विनौ, तिस्रः उक्तलक्षणां त्रिकक्ष्यायुक्तां पृथिवीमित्यर्थः परावतः परस्मात् स्थानादत्यन्तदूरात् गच्छतम् प्राप्नुतम् । तत्र दृष्टान्तः—आत्मा इव आत्मभूतः वातः प्राणवायुः स्वसराणि स्ववासस्थानानि यथा गच्छति तद्वत् । आत्मा जीवः प्राणात्मा यथा स्वीयं शरीरं प्रविशति तथा अश्विनौ परमाद्धान्नः आगत्य त्रिकक्ष्यायुक्तं पार्थिवस्थानमस्मदीयं वेदिस्थानीयं शरीरं प्रविशताम् इति प्रार्थना ॥

यजता—यजतेः अतच् प्रत्ययः । अशायतम्—अशयातां, ह्रस्वदीर्घयोर्व्यत्ययः । रथ्या—रथार्हौ, यप्रत्ययः । नासत्या, स्वसराणि, व्याख्यातौ प्रथमानुवाके ॥

अष्टमीमृचमाह—

त्रिरश्विना सिन्धुभिः सप्तमातृभिस्त्रयं आहावास्त्रेधा हविष्कृतम् ।
तिस्रः पृथिवीरुपरि प्रवा दिवो नाकं रक्षेथे द्युभिरक्तुभिर्हितम् ॥८॥

त्रिः अश्विना सिन्धुऽभिः सप्तमातृऽभिः त्रयः आऽहावाः त्रेधा हविः कृतम् तिस्रः पृथिवीः उपरि प्रवा दिवः नाकम् रक्षेथे इति द्युऽभिः अक्तुऽभिः हितम् ॥

हे अश्विना अश्विनौ, सप्तमातृभिः सप्ततत्त्वात्मिकाः मातृस्थानीयाः आपः यासां ताभिः सिन्धुभिः स्यन्दनशीलाभिः नदीभिः शोधयन्तीभिः त्रिः सोमसंस्कारः कृत इति शेषः । तथा

त्रयः त्रिसंख्याकाः आहावाः कूपस्थानीयाः सोमस्याधारपात्रभूताः सिद्धा भवन्तीति शेषः। त्रेधा त्रिभिः प्रकारैः, दैव्यसमयानुसारेण त्रिधा समर्पणीयं हविः सोमरूपं कृतं संपादितम्। तिस्रः पृथिवीः उपरि तिसृभ्यः भूर्भुवस्स्वरिति लोकत्रयवर्तिनीभ्यः भूमिभ्यः ऊर्ध्वं प्रवा प्रवौ प्रवन्तौ गच्छन्तौ युवां दिवः द्युसंबन्धिनं नाकम् स्वर्लोकभूतं ज्योतिरात्मानं सूर्यं रक्षेथे रक्षथः। कीदृशं नाकम्? द्युभिः अहोभिः अक्तुभिः रात्रिभिः च हितम् स्थापितम्॥ प्रवा-प्रुङ् गतौ प्रवेते गच्छत इति प्रवौ॥

सप्ततत्त्वात्मकचित्तजोवाहिनीभिः शक्तिभिः सर्वसत्तोपभोगसारभूतः संमदात्मा सोमः संस्कृतः। तदाधारपात्राणि अन्नमयादीनि कूपसदृशानि त्रीणि सिद्धानि। हे अश्विनौ, परिगृह्येमं मधुपातमौ युवां त्रैलोक्यादूर्ध्वं गच्छतम्। गत्वा च तत्र नः उत्तमं ज्योतिः रक्षतम्। तच्च सूर्याख्यं नाकपदवाच्यं 'स्वः' नैकेन अह्ना प्रतिष्ठापितम्। 'द्युभिः' अहोभिः प्रकाशदशा लक्षिताः। 'अक्तुभिः' रात्रिभिरप्रकाशदशाश्चेति बोध्यम्। 'अह्ना अनुवाकं अधीते' इतिवत् अपवर्गे तृतीया। पर्यायेण प्रकाशाप्रकाशदशाभिः अन्तर्यजनगताभिः निष्पादितं उत्तमं नाकपदं नः। तद्रक्ष्यतां युवाभ्यामस्मदर्थम् इति सूक्ष्मं तत्त्वम्॥

नवमीमृचमाह—

क ई त्री चक्रा त्रिवृतो रथस्य क ई त्रयो वंधुरो ये सनीळाः।
कदा योगो वाजिनो रासभस्य येन यज्ञं नासत्योपयाथः॥९॥

क त्री चक्रा त्रिऽवृतः रथस्य क त्रयः वंधुरः ये सऽनीळाः कदा योगः वाजिनः रासभस्य येन यज्ञम् नासत्या उपऽयाथः॥

हे नासत्या अश्विनौ, त्रिवृतः त्रिभिर्वियते वर्त्यते वा भागैः त्रिवृत् तस्य त्रिधाभूतस्य रथस्य युष्मदीयस्य त्री त्रीणि चक्रा चक्राणि क्व कुत्र सन्ति? अस्मदीयः सन्नाहो भवत्येव, युष्मदीयो रथस्तु अद्यापि न लक्ष्यते, क्षिप्रं कृपां कुरुतं, सवाहो रथ आगच्छतु इत्याह— ये सनीळाः नीडवत् रथस्योपरि निवेशनस्थानं तेन सह वर्तन्ते ते वन्धुरः नीडबन्धनाधारभूताः त्रयः आधारस्तम्भाः क्व कुत्र स्थिताः? कदा कस्मिन् काले वा वाजिनः अश्वस्थानीयस्य रासभस्य गर्दभस्य (रासभस्य आश्विनवाहत्वं प्रसिद्धम्) योगः रथसंयोजनं निष्पन्नमिति नास्माभिर्ज्ञायते। येन त्रिचक्रत्रिनीडरासभयोगवता रथेन यज्ञम् अस्मदीयं यजनं उपयाथः

युवां प्राप्नुथः। त्री, चक्रा-उभयोः शेर्लोपः छन्दसि। वन्धुरः-बन्धेरौणादिक उरप्रत्ययः, बस्य वत्वं छान्दसम्॥

दशमीमृचमाह—

आ नासत्या गच्छतं हूयते हविर्मध्वः पिबतं मधुपेभिरासभिः।
युवोर्हि पूर्वं सवितोषसो रथमृताय चित्रं घृतवन्तमिष्यति ॥१०॥
आ नासत्या गच्छतम् हूयते हविः मध्वः पिबतम् मधुऽपेभिः आसऽभिः युवोः हि पूर्वम् सविता उषसः रथम् ऋताय चित्रम् घृतऽवन्तम् इष्यति॥

हे नासत्या अश्विनौ, आगच्छतम्, अस्माभिः हविः हूयते सोमरूपं हविर्दीयते। युवां च मधुपेभिः मधु पिबन्तीति मधुपानि तैः आसभिः आस्यैः, आस्यशब्दस्य आसन्नादेशः, मध्वः मधूनि (लिङ्गव्यत्ययः यणादेशश्छान्दसः) मधुराणि हवींषि सोमात्मकानि पिबतम्। हि यस्मात् सविता सर्वप्रेरको देवः सूर्यः उषसः पूर्वम् उषस उदयात् पुरा युवोः युवयोः रथम्, ऋताय सत्याय ज्योतिषे उत्तमं पदं प्रति, इष्यति प्रेरयति। कीदृशं रथम्? चित्रम् पूर्वोक्तलक्षणं त्रिचक्रादियुक्तं विचित्रं, घृतवन्तम् दीप्तिमन्तम्। यस्मादेवं प्रेरयति सूर्यः, तस्मात् सोमं शीघ्रं पिबतमिति संबन्धः॥

एकादशीमृचमाह—

आ नासत्या त्रिभिरेकादशैरिह देवेभिर्यातं मधुपेयमश्विना।
प्रायुस्तारिष्टं नी रपांसि मृक्षतं सेधतं द्वेषो भवतं सचाभुवा ॥११॥
आ नासत्या त्रिऽभिः एकादशैः इह देवेभिः यातम् मधुऽपेयम् अश्विना
प्र आयुः तारिष्टं निः रपांसि मृक्षतम् सेधतम् द्वेषः भवतम् सचाऽभुवा॥

हे नासत्या अश्विना क्षिप्रगतिकौ अश्विदेवौ, युवां इह अत्रास्मद्यजने त्रिभिः त्रिसंख्याकैः एकादशैः एकादशात्मकवर्गत्रयगतैः देवेभिः देवैः सह मधुपेयम् सोमरूपमधुपानमभिलक्ष्य आयातम् आगच्छतम्। आयुः आयुष्यं प्रतारिष्टम् प्रवर्धयतम्। रपांसि दुरितानि निर्मृक्षतम् निःशेषेण शोधयतम्। द्वेषः द्वेषकारिणः सेधतम् प्रतिषिद्धान्

कुरुतम्। सचाभुवा अस्माभिः सहावस्थितौ भवतम्। अस्यामृचि एकादशात्मकवर्गत्रयगता देवा उक्ताः। एकैकस्मिन् स्थाने एकादश देवाः, पृथिव्यादिलोकत्रये त्रयस्त्रिंशद्देवा भवन्ति। तर्हि नेमे अष्टौ वसवः एकादश रुद्राः द्वादशादित्याः प्रजापतिर्वषट्कारश्चेति पुराणप्रसिद्धा भवन्ति। क इमे एकादशेति निर्णयो दुष्करः॥

एकादशैः–एकादशानां पूरणैः, तस्य पूरण इति डट्। मधुपेयम्–पा पाने, कर्मणि यत्। तारिष्टम्–तरतेर्लुङ्, छान्दसम्, लोडर्थे। मृक्षतम्–मृश आमर्शने, लोडर्थे लुङ्। द्वेषः–कर्तरि विच्। सचाभुवा–सचा सह भवत इति सचाभुवौ॥

द्वादशीमृचमाह—

आ नो अश्विना त्रिवृता रथेनार्वाञ्चं रयिं वहतं सुवीरम्।
शृण्वन्ता वामवसे जोहवीमि वृधे च नो भवतं वाजसातौ॥१२॥

आ नः अश्विना त्रिऽवृता रथेन अर्वाञ्चम् रयिम् वहतम् सुऽवीरम्
शृण्वन्ता वाम् अवसे जोहवीमि वृधे च नः भवतम् वाजऽसातौ॥

हे अश्विना अश्विनौ, नः अस्माकं अर्वाञ्चम् अभिमुखं सुवीरम् शोभनवीरबलोपेतं रयिम् धनं त्रिवृता त्रिषु लोकेषु वर्तमानेन रथेन युवयोर्वहनसाधनेन आवहतम् आनीय प्रापयतम्। शृण्वन्ता अस्मदीयां वाचं शृण्वन्तौ वाम् युवां अवसे अस्मद्रक्षणार्थं जोहवीमि आह्वयामि नः अस्माकं वाजसातौ समृद्धिलाभे कर्मणि वृधे च वर्धनाय च भवतम्॥ जोहवीमि–ह्वेञ् स्पर्धायां शब्दे च, यङ्लुकि लडुत्तमैकवचने ईडागमः। वृधे–वृधु वृद्धौ भावे क्विप्। वाजसातौ–वाजानां सातिर्यत्रेति बहुव्रीहिः॥

इति प्रथमस्य तृतीये पञ्चमो वर्गः

अथ 'ह्वयाम्यग्निम्' इति एकादशर्चं पञ्चमं सूक्तं हिरण्यस्तूपस्यार्षम्। आद्या नवमी च जगतीच्छन्दस्के। शिष्टास्त्रिष्टुभः। कृत्स्नस्य सूक्तस्य सविता देवता। आद्याया अग्न्यादयो लिङ्गोक्तदेवताः॥

तत्र प्रथमामृचमाह—

ह्वयाम्यग्निं प्रथमं स्वस्तये ह्वयामि मित्रावरुणाविहावसे।
ह्वयामि रात्रीं जगतो निवेशनीं ह्वयामि देवं सवितारमूतये॥१॥

ह्वयामि अग्निम् प्रथमम् स्वस्तये ह्वयामि मित्रावरुणौ इह अवसे
ह्वयामि रात्रीम् जगतः निवेशनीम् ह्वयामि देवम् सवितारम् ऊतये ॥

स्वस्तये (स्वस्ति अविनाशिनाम) अविनाशाय प्रथमम् आदौ अग्निम् ह्वयामि आह्वयामि। इह अत्र यजने अवसे रक्षणाय मित्रावरुणौ ह्वयामि। जगतः जङ्गमस्य लोकस्य निवेशनीम् स्थितिहेतुभूतां रात्रीम् अप्रकाशमयीं दिवसप्रतिद्वन्द्वभूतां अन्तर्निहितसर्वसृष्टिगर्भां जगदाविष्कारप्रयोजिकां अनाविष्कृतसमस्तजगदाधारभूतां रात्रिदेवतां ह्वयामि। ऊतये अस्मद्वर्धनाय सवितारम् देवम् सर्वप्रेरकं सूर्यं ज्योतिर्मयं ह्वयामि ॥ रात्रीम्—रात्रेश्चाजसाविति ङीप्। निवेशनीम्—निविशन्तेऽस्यामिति निवेशनी, अधिकरणे ल्युट् ॥

द्वितीयामृचमाह—

आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च ।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥२॥
आ कृष्णेन रजसा वर्तमानः निवेशयन् अमृतम् मर्त्यम् च
हिरण्ययेन सविता रथेन आ देवः याति भुवनानि पश्यन् ॥

कृष्णेन कृष्णवर्णेन रजसा लोकेन मार्गेण वर्तमानः उदितो गच्छन्, अमृतम् मरणरहितं देवं मर्त्यं च मनुष्यं च निवेशयन् यथास्थानमवस्थापयन् सविता देवः सर्वप्रेरको ज्योतिष्मान् सूर्यः हिरण्ययेन सुवर्णमयेन रथेन आयाति आगच्छति। किं कुर्वन्? भुवनानि पश्यन् सर्वं जगज्जातं अवेक्षमाणः, स्वेन ज्योतिषा प्रकाशयन्नित्यर्थः। इदमवधेयम्। अधोभुवनं "तमसा परिवीतम्"। तस्मादुदेति प्रज्ञानघनज्योतिः सूर्यः। कृष्णवर्णस्य प्रतिद्वन्द्वी हिरण्यवर्णः। मर्त्यं अमृतं च प्रकाश्य अवस्थापयति उदितः सुवर्णज्योतिरात्मा सूर्यः। तथा अवस्थापनेन उभयोः कर्म सुकरं भवति। मर्त्यस्य कार्यं यजनं, येन अमृतत्वलाभः। अमृतस्य देवजातस्य कार्यं तु मर्त्योपकारकत्वम्। एवं अमृतं मर्त्यं च निवेशयन्नुदितश्चरति सविता ॥ हिरण्ययेन—हिरण्मयेन, मयटो मकारलोपः निपातितः। मर्त्यम्—मर्ते भवं, छन्दसि यत्। अमृतम्—मृतं मरणं नास्त्यस्येति बहुव्रीहिः ॥

तृतीयामृचमाह—

यातिं देवः प्रवता यात्युद्वता यातिं शुभ्राभ्यां यजतो हरिभ्याम् ।
आ देवो यांति सविता परावतोऽप विश्वा दुरिता बाधमानः ॥३॥

यातिं देवः प्रऽवता यातिं उत्ऽवता यातिं शुभ्राभ्यांम् यजतः हरिंऽभ्याम् आ देवः यातिं सविता पराऽवतः अप विश्वा दुःऽइता बाधमानः ॥

देवः द्योतमानः सूर्यः प्रवता प्रवणवता मार्गेण याति गच्छति, तथा उद्वता उद्गमवता मार्गेण याति, ऊर्ध्वस्थानादवरोहति, इतश्च ऊर्ध्वमारोहति। इदं च आरोहणावरोहणात्मकं यजमानानुग्रहार्थकं ऋतज्योतिर्गमनं अन्तर्यजने प्रसिद्धं। तथा यजतः यष्टव्यः स देवः शुभ्राभ्यां स्वच्छाभ्यां हरिभ्याम् अश्वाभ्यां याति गच्छति अस्मदनुग्रहार्थम्। सविता देवः सर्वलोकप्रेरकज्योतिःस्वरूपी विश्वा सर्वाणि दुरिता दुर्गतानि अपबाधमानः प्रध्वंसयन् परावतः परस्माद् द्युलोकात् आयाति आगच्छति ॥ प्रवता, उद्वता—उभयोः समानप्रक्रिया, वनधातोः क्विप्, अनुनासिकलोपः, ततः तुक्। यजतः—यजतेः अतच्। विश्वा, दुरिता—शेर्लोपः छन्दसि ॥

चतुर्थीमृचमाह—

अभीवृतं कृशनैर्विश्वरूपं हिरण्यशम्यं यजतो बृहन्तम् ।
आस्थाद्रथं सविता चित्रभानुः कृष्णा रजांसि तविषीं दधानः ॥४॥

अभिऽवृतम् कृशनैः विश्वऽरूपम् हिरण्यऽशम्यम् यजतः बृहन्तम् आ अस्थात् रथम् सविता चित्रऽभानुः कृष्णा रजांसि तविषीम् दधानः ॥

सविता रथम् आस्थात् आस्थितः सूर्यो रथमारूढवान्। कीदृशं रथम्? अभिवृतम् अभितो वर्तमानं, कृशनैः (कृशनं हिरण्यनाम) हिरण्यैः विश्वरूपम् विश्वानि सर्वाणि विविधानि रूपाणि यस्य तं, हिरण्मयरूपबाहुल्ययुक्तमित्यर्थः हिरण्यशम्यम् हिरण्मयशङ्कुयुक्तं, (शङ्कवः शम्याः) हिरण्मयशिल्पकर्मयुक्तमिति वा (शमी कर्मनाम) बृहन्तम् महान्तम्। कीदृशः सविता? यजतः यष्टव्यः, चित्रभानुः नानावर्णरश्मियुक्तः। किं कुर्वन्? कृष्णा कृष्णानि तमो-

मयानि रजांसि भुवनानि अभिलक्ष्य तमसोऽपहत्यै तविषीम् बलं प्रकाशात्मकं दधानः धारयमाणः ॥ अभीवृतम्—अभितो वर्तत इति अभीवृत् तं, नहिवृतीत्यादिना पूर्वपदस्य दीर्घत्वम्। तविषीम्–तवतिः सौत्रो धातुः ॥

पञ्चमीमृचमाह—

वि जनाञ्छ्यावाः शितिपादो अख्यन्रथं हिरण्यप्रउगं वहन्तः ।
शश्वद्विशः सवितुर्दैव्यस्योपस्थे विश्वा भुवनानि तस्थुः ॥५॥
वि जनान् श्यावाः शितिऽपादः अख्यन् रथम् हिरण्यऽप्रउगम् वहन्तः
शश्वत् विशः सवितुः दैव्यस्य उपऽस्थे विश्वा भुवनानि तस्थुः ॥

श्यावाः एतन्नामकाः सूर्याश्वाः, कपिशवर्णाः ते च शितिपादः शितयः श्वेताः पादाः येषां ते श्वेतवर्णपादयुक्ताः हिरण्यप्रउगम् रथस्य युगबन्धनस्थानं प्रउगम्, हिरण्यं सुवर्णमयं प्रउगं यस्य तं रथम् वहन्तः जनान् प्रजाः व्यख्यन् विशेषेण प्रकाशितवन्तः। शश्वत् सदा विशः प्रजाः दैव्यस्य सर्वदेवसंबन्धिनः सवितुः प्रेरकस्य देवस्य उपस्थे समीपे स्थाने तस्थुः स्थिताः। तथा विश्वा सर्वाणि भुवनानि लोकाश्च तस्थुः। पूर्वमेव हिरण्यवर्णरथयुक्तशुभ्राश्वैः प्रापितप्रकाशाः विशः भुवनानि च सर्वप्रकाशमूलस्थानमुपेत्य स्थिताः। ये पुनर्लोका विशो न तथा लब्धप्रकाशाः, तेषां तमस्येवावस्थानं, तेषां लोकाश्च 'असूर्या नाम' ॥ शितिपादः—सुपां सुलुगिति जसः सु आदेशः। अख्यन्—ख्यातेर्लुङि च्लेरङादेशः। दैव्यस्य—देवाद्यञ्, तस्येदमित्यर्थे ॥

षष्ठीमृचमाह—

तिस्रो द्यावः सवितुर्द्वा उपऽस्थाँ एका यमस्य भुवने विराषाट् ।
आणिं न रथ्यममृताधि तस्थुरिह ब्रवीतु य उ तच्चिकेतत् ॥६॥
तिस्रः द्यावः सवितुः द्वौ उपऽस्थाः एका यमस्य भुवने विराषाट्
आणिम् न रथ्यम् अमृताः अधि तस्थुः इह ब्रवीतु यः उम् इति तत् चिकेतत् ॥

तिस्रः द्यावः स्वर्गोपलक्षिताः नित्यप्रकाशाः लोकास्त्रयः सन्ति। तत्र द्वौ द्युलोकौ सवितुः प्रेरकस्य देवस्य उपस्था उपस्थौ समीपस्थितौ भवतः। एका तृतीया शिष्टा द्यौः, अद्वितीया वा यमस्य विश्वनियन्तुः सूर्यस्य भुवने लोके विराषाट् भवति। द्वे द्यावौ सूर्यस्य सन्निहिते, एका तु सूर्यभुवन एव भवति। सा च 'विराषाट्' उक्ता। विरान् गन्तॄन् सहते, प्रेताः पुरुषाः अन्तरिक्षमार्गेण गच्छन्ति पितृपतेर्यमस्य लोकमिति व्याचष्टे सायणः। विरशब्दस्य कापि प्रक्रिया च दत्ता। वेदे सकृदेव प्रयुक्तोऽयं शब्दः। संदिग्धा प्रक्रिया, संदिग्ध एव शब्दार्थः। वीरशब्दस्यैव विर इति ह्रस्व इकारः स्याद्वेति ऊहः। इदं तु निःसंशयं वक्तुं शक्यम्—अत्र यमस्य भुवने तिसॄणामेका द्यौरेव स्थिता यमश्च नियन्ता सवितृदेव एव। नायं विवस्वत्पुत्रः पितृपतिः प्रेतानां राजा। तिस्रः पृथिव्य इव तिस्रो द्यावः वेदे प्रसिद्धाः। ताश्च स्वर्लोकीयाः। तत्र द्युलोकौ सवितुः सामीप्यमेव भजेते, एकस्तु सवितुः सर्वनियन्तुर्भुवन एव तदात्मतया वर्तते। वीरैरेव पुण्यपुरुषैस्तत्र गन्तुं शक्यम्, ते च न निवर्तन्ते तत्र गत्वा। अन्यद् द्युलोकद्वयं सवितुः समीपवर्त्येव, न तदात्मकतां भजते। एकत्रैव सायुज्यं, अन्यत्र द्वयोः सामीप्यमात्रम्। विरान् गन्तॄन् सहत इति सायणोक्त्यनुसारतः, वीरान् यजनेन साधनेन निःशेषार्पणशूरान् सहत इति वा प्रोच्यताम्। तिस्रो द्याव इत्यत्र अन्तरिक्षलोक एका द्यौरिति सायणीयम् प्रसिद्धा द्यौः पृथिवी च द्वे द्यावौ, सूर्येण प्रकाशितत्वात् द्युशब्दव्यवहार्यौ भवतः, सायणानुसारतः। कथं अन्तरिक्षं सूर्यप्रकाशवर्जितं स्यात्? अथ च पृथिवीनाम्नी द्यौः सूर्यस्य समीपवर्तिनी चेत्, अन्तरिक्षं समीपतरवर्ति प्रकाशितं च स्यात्। चिन्त्यतामिदं चिन्तकैः। यमः सवितैवेत्यभ्युपगतं चेत् कष्टं शिथिलितं भवति, अर्थश्च ऋजुः। रहस्यगर्भितेयमृगिति उत्तरार्धेन स्पष्टं भवति। अमृताः मृतिरहिताः देवाः, सवितारं अधि अधिगम्य तस्थुः स्थिताः। तत्र दृष्टान्तः—रथ्यम् आर्णिं न रथसंबन्धिनं 'आर्णि' कीलविशेषं अक्षच्छिद्रे प्रक्षिप्तं आश्रित्य यथा रथस्तिष्ठति तद्वत्, सर्वे देवाः सवितारमाश्रित्यावतिष्ठन्ते। चरेषु सर्वेषु सवितुः स्थिरत्वं लक्षयति दृष्टान्तः। यः उ यश्च तत् सवितृरूपं चिकेतत् जानाति, सः इह अस्मिन् विषये रहस्यं ब्रवीतु भणतु, दुरधिगममिदं रहस्यमिति भावः॥ रथ्यम्—रथस्येदं, यत्। चिकेतत्—कित ज्ञाने, लेट्॥

इति प्रथमस्य तृतीये षष्ठो वर्गः

सप्तमीमृचमाह—

वि सुपर्णो अन्तरिक्षाण्यख्यद्गभीरवेपा असुरः सुनीथः ।
क्व ३ दानीं सूर्यः कश्चिकेत कतमां द्यां रश्मिरस्या ततान ॥७॥
वि सुऽपर्णः अन्तरिक्षाणि अख्यत् गभीरऽवेपाः असुरः सुऽनीथः क्व इदानीम् सूर्यः कः चिकेत कतमाम् द्याम् रश्मिः अस्य आ ततान ॥

सुपर्णः शोभनपतनः सूर्यरश्मिः अन्तरिक्षाणि ऊर्ध्वलोकस्थानानि व्यख्यत् प्रकाशितवान् । कीदृशः ? गभीरवेपाः गभीरं गम्भीरं दुरवगाहं वेपः दृष्टिवैचक्षण्यं यस्य सः, दुरवगाहप्रज्ञाचक्षुरयं सुपर्णः, न लौकिकः साधारणो रविरश्मिः । अत्र सायणस्तु वेपः कम्पनमिति मन्यते, अन्यत्र "गम्भीरवेपसः गम्भीरकर्माणः" (१०. ६२. ५) इत्याह । "वेपिष्ठो अङ्गिरसां . . . विप्रः" (६. ११. ३) 'अतिशयेन स्तुतेः प्रेरयिता मेधावी' इति व्याख्यातम् । अन्यत्र पुनः वेपः कर्मनाम इति बहुधा सायणीयम् । पुनः कीदृशः ? असुरः महान् बलिष्ठः, सुनीथः शोभनप्रापणः, प्रकाशदानेन गन्तव्यं स्थानं सुखं प्रापयतीत्यर्थः । तथाविधरश्मिसंपन्नः सूर्यः इदानीम् क्व अधुना कुत्र स्थितः ? कः चिकेत को जानाति ? अस्य सूर्यस्य रश्मिः उक्तलक्षणः कतमाम् किंजातीयां द्याम् दिव्यभुवं आततान व्याप्तवान्, इदमपि दिव्यं रहस्यं दुर्ज्ञेयं मनुष्यस्येत्यर्थः ॥

असुरः—असु क्षेपणे, अस्यति शत्रूनित्यसुरः, उरन् । सुनीथः—णीञ् प्रापणे, कथन् प्रत्ययः । चिकेत—कित ज्ञाने, लिट् । कतमाम्—किंशब्दात् डतमच् जातिपरिप्रश्ने ॥

अष्टमीमृचमाह—

अष्टौ व्यख्यत्ककुभः पृथिव्यास्त्री धन्व योजना सप्त सिन्धून् ।
हिरण्याक्षः सविता देव आगाद्दधद्रत्ना दाशुषे वार्याणि ॥८॥
अष्टौ वि अख्यत् ककुभः पृथिव्याः त्री धन्व योजना सप्त सिन्धून् हिरण्यऽअक्षः सविता देवः आ अगात् दधत् रत्ना दाशुषे वार्याणि ॥

अष्टौ ककुभः दिशो विदिशः सर्वाश्च व्यख्यत् प्रकाशितवान् सविता । तथा पृथिव्याः पृथिवीसंबन्धीनि, त्री त्रीणि योजना योजयितृणि धन्व मरुप्रायाणि निर्जलानि

स्वतस्तेजःशक्तिवाहिनीभिरद्भिर्विरहितानि क्षेत्राणि लोकत्रयसंबन्धीनि अन्नप्राणमनस्तत्त्वप्रधानानि व्यरुणत्। ईदृशे स्वभावतो नीरसे पार्थिवे क्षेत्रे, दिव्यशक्तिवाहिनीनां क्षरणाय सप्त सिन्धूनपि प्रकाशितवानित्याह, सप्त सिन्धून् व्यरुणत्। हिरण्याक्षः हिरण्यज्योतिर्विसारिचक्षुर्युक्तः देवः सविता आगात् आगतवान्। किं कुर्वन्? दाशुषे दत्तवते यजमानाय वार्याणि वरणीयानि रत्नानि रमणीयानि रतिप्रदानि दिव्यानि दधत् दधानः प्रयच्छन्नित्यर्थः। अत्र पृथिव्या अष्टौ ककुभः व्यरुणत्, 'योजना' योजयितॄन् प्राणिनः व्यरुणत्, 'त्री धन्व' अन्तरिक्षोपलक्षितान् त्रीन् लोकान् व्यरुणत्, तथा सप्त सिन्धून् गङ्गादिनदीः व्यरुणत् इति सायणव्याख्या नेहाङ्गीक्रियते, सर्वथा न युक्ता॥

नवमीमृचमाह—

हिरण्यपाणिः सविता विचर्षणिरुभे द्यावापृथिवी अन्तरीयते।
अपामीवां बाधते वेति सूर्यमभि कृष्णेन रजसा द्यामृणोति॥९॥

हिरण्यऽपाणिः सविता विऽचर्षणिः उभे इति द्यावापृथिवी इति अन्तः ईयते अप अमीवाम् बाधते वेति सूर्यम् अभि कृष्णेन रजसा द्याम् ऋणोति॥

हिरण्यपाणिः सुवर्णमयहस्तः, विचर्षणिः विश्वस्य द्रष्टा सविता प्रेरको देवः उभे उभयोः द्यावापृथिवी द्यावापृथिव्योः अन्तः मध्ये ईयते गच्छति। अमीवाम् आर्तिम् रोगादिम् अपबाधते निरस्यति। सूर्यम् वेति उत्तमं ज्योतिःस्थानं सूर्याख्यं प्राप्नोति। प्रथमं यजमानस्योद्वाराय उदितः सविता तस्मै लोकत्रयसंबन्धिनि स्थानत्रये प्रकाशं दत्त्वा तत्र सर्वां बाधां निराकृत्य ततः परं उत्तमं पदं प्राप्नोति। तस्मान्नानुपपत्तिः 'सूर्यं वेति सविता' इत्युक्तौ। केन मार्गेण सविता गच्छति सूर्याख्यं द्युशब्दवाच्यं तदुत्तमं पदम्? कृष्णेन रजसा कृष्णवर्णेन तमसा व्याप्तेन मध्यमस्थानेन अन्तरिक्षेण, अधस्तनलोकत्रयेण वा द्याम् परमं आकाशं उत्तमज्योतिः अभ्यृणोति अभितः प्राप्नोति॥ ईयते—ईङ् गतौ। वेति—वी गतिव्याप्त्यादिषु। ऋणोति—ऋणु गतौ—तनादिः। अमीवाम्—अम रोग इत्यस्मात् ईडागमः वन् प्रत्ययश्च॥

दशमीमृचमाह—

हिरण्यहस्तो असुरः सुनीथः सुमृळीकः स्ववाँ यात्वर्वाङ् ।
अपसेधन्रक्षसो यातुधानानस्थाद्देवः प्रतिदोषं गृणानः ॥१०॥
हिरण्यऽहस्तः असुरः सुऽनीथः सुऽमृळीकः स्वऽवान् यातु अर्वाङ्
अपऽसेधन् रक्षसः यातुऽधानान् अस्थात् देवः प्रतिऽदोषम् गृणानः ॥

हिरण्यहस्तः सुवर्णमयपाणिः असुरः महाबलः, शत्रूणां क्षेप्ता सुनीथः शोभनप्रापणः सुष्ठु नेता वा, सुमृळीकः सुष्ठु मृडयिता सुखयिता स्ववान् धनवान् अर्वाङ् अभिमुखः यातु प्राप्नोत्वस्मदीयं यजनं अस्मान्वा। प्रतिदोषम् दोषा दोषा प्रतिरात्रि गृणानः स्तूयमानः अस्थात् स्थितवान् अयं देवः। किं कुर्वन्? रक्षसः बाधकत्वेन रक्षानिमित्तभूतान् यातुधानान् राक्षसविशेषान् अपसेधन् निराकुर्वन्॥ स्ववान्—स्वं धनं अस्येति। रक्षसः—रक्ष पालने इत्यस्मादपादाने। यातुधानान्—यत निकारोपस्कारयोः अस्मादुप्रत्ययः (यातुः) यातवो यातना एषु धीयन्त इति यातुधानाः। गृणानः—गृ शब्दे कर्मणि लटः शानच्, व्यत्ययेन श्ना॥

एकादशीमृचमाह—

ये ते पन्थाः सवितः पूर्व्यासोऽरेणवः सुकृता अन्तरिक्षे ।
तेभिर्नो अद्य पथिभिः सुगेभी रक्षा च नो अधि च ब्रूहि देव ॥११॥
ये ते पन्थाः सवितरिति पूर्व्यासः अरेणवः सुऽकृताः अन्तरिक्षे
तेभिः नः अद्य पथिऽभिः सुऽगेभिः रक्ष च नः अधि च ब्रूहि देव ॥

हे सवितः, ते तव ये पन्थाः मार्गाः पूर्व्यासः पूर्वसिद्धाः अरेणवः निर्धूलयः स्वच्छाः सुकृताः सुष्ठु संपादिताः अङ्गिरःप्रभृतिभिः पूर्वैर्ऋषिभिः ये पन्थानः समीचीनतया अस्मदादाननुग्रहीतुं तवागमनाय प्रतिष्ठिताः सन्ति अन्तरिक्षे आकाशे, सुगेभिः सुखेन गन्तुं शक्यैः तेभिः पथिभिः मार्गैः अद्य इदानीं नः अस्मदर्थं एहि। एत्य हे देव, नः अस्मान् रक्ष च पालय, अधिब्रूहि च अस्मासु विषये यद्वक्तव्यं तद् ब्रूहि च॥

पन्थाः-जसः सुः। पूर्व्यासः-पूर्वैः कृताः, असुगागमः। सुगेभिः-सुष्ठु गच्छन्त्येषु इतिः सुगाः, अधिकरणे गमेर्डप्रत्ययः॥

इति प्रथमस्य तृतीये सप्तमो वर्गः
इति प्रथमे मण्डले सप्तमोऽनुवाकः

अष्टमेऽनुवाके अष्टौ सूक्तानि। 'तत्र प्र वो यह्वम्' इति विंशत्यृचं प्रथमं सूक्तम्। घोरपुत्रः कण्व ऋषिः। अयुजो बृहत्यः, युजः सतोबृहत्यः। अग्निर्देवता॥

तत्र प्रथमामृचमाह—

प्र वो॑ यह्वं पु॒रू॒णां वि॒शां दे॑वय॒तीना॑म्।
अ॒ग्निं सू॒क्तेभि॒र्वचो॑भिरीमहे॒ यं सी॒मिद॒न्य ईळ॑ते ॥१॥

प्र वः॒ यह्व॒म् पु॒रू॒णाम् वि॒शाम् दे॒व॒ऽय॒तीना॑म् अ॒ग्निम् सु॒ऽउ॒क्तेभिः॑ वचः॑ऽभिः ईम॒हे॒ यम् सी॒म् इत् अ॒न्ये ईळ॑ते ॥

देवकामान् प्रति ऋषेः संबोधनम्। देवयतीनाम् देवान् कामयमानानां पुरूणाम् बहूनां विशाम् प्रजारूपाणां वः युष्माकं अर्थे यह्वम् (महन्नाम) महान्तं अग्निम्, सूक्तेभिः वचोभिः शोभनवचनैर्मन्त्रात्मकैः प्रेमहे प्रार्थयामहे। यम् अग्निं सीम् सर्वतः अन्य इत् अन्येऽपि ऋषयः ईळते स्तुवन्ति तमग्निमिति पूर्वेण संबन्धः॥ देवयतीनाम्—सुप आत्मनः क्यच्, शतरि ङीप्, अनित्यमागमशासनमिति नुमभावः। ईमहे-याच्ञाकर्म॥

द्वितीयामृचमाह—

जना॑सो अ॒ग्निं द॑धिरे सहो॒वृधं॑ ह॒विष्म॑न्तो विधेम ते।
स त्वं नो॑ अ॒द्य सु॒मना॑ इ॒हावि॒ता भवा॒ वाजे॑षु सन्त्य ॥२॥

जना॑सः अ॒ग्निम् द॒धि॒रे स॒हः॒ऽवृ॒धम् ह॒विष्म॑न्तः वि॒धे॒म॒ ते॒ सः त्वम् नः॒ अ॒द्य सु॒ऽमना॑ः इ॒ह अ॒वि॒ता भ॒व॒ वाजे॑षु स॒न्त्य॒ ॥

जनासः देवभक्ता जनाः सहोवृधम् बलस्य वर्धनं अग्निं दधिरे धृतवन्तः। हविष्मन्तः हविर्युक्ता वयं सोमात्मकसर्वरसार्पणपराः ते त्वदर्थं, त्वां इति विभक्तिव्यत्ययो

वा विधेम परिचरेम, विधतिः परिचरणकर्मा, हविरर्पयेम वा। वाजेषु समृद्धिषु निमित्तभूतासु, हे सन्त्य दानशील अग्ने, स त्वम् तादृशस्त्वं अद्य इदानीं इह नः अस्मान् प्रति सुमनाः शोभनमनस्कः अविता वर्धयिता भव ॥ सहोवृधम्-वृधु वृद्धौ, अस्मादन्तर्भावितण्यन्तात् क्विप्। विधेम-विध विधाने, तुदादित्वात् शः। सन्त्य-षणु दाने, क्तिच्, सन्तिर्दाता, तत्र भवः, यत् ॥

तृतीयामृचमाह—

प्र त्वा दूतं वृणीमहे होतारं विश्ववेदसम्।
महस्ते सतो वि चरन्त्यर्चयो दिवि स्पृशन्ति भानवः ॥३॥

प्र त्वा दूतम् वृणीमहे होतारम् विश्वऽवेदसम् महः ते सतः वि चरन्ति अर्चयः दिवि स्पृशन्ति भानवः ॥

हे अग्ने, होतारम् आह्वातारं विश्ववेदसम् विश्वानि वेत्तीति विश्ववेदाः (असुन्) तं सर्वविदं दूतम् देवदूत्यवर्तिनं त्वाम् प्र वृणीमहे प्रकर्षेण वरयामः। महः महतः (अल्लोपः छन्दसि) सतः नित्यं वर्तमानस्य ते तव अर्चयः दीप्तयः ज्वालाः विचरन्ति विततं गच्छन्ति, विस्तृतप्रचारास्तव ज्वाला इत्यर्थः। तव भानवः रश्मयस्तु दिवि स्पृशन्ति ऊर्ध्वगाः द्युलोकं प्राप्नुवन्ति ॥

चतुर्थीमृचमाह—

देवासस्त्वा वरुणो मित्रो अर्यमा सन्दूतं प्रत्नमिन्धते।
विश्वं सो अग्ने जयति त्वया धनं यस्ते ददाश मर्त्यः ॥४॥

देवासः त्वा वरुणः मित्रः अर्यमा सम् दूतम् प्रत्नम् इन्धते विश्वम् सः अग्ने जयति त्वया धनम् यः ते ददाश मर्त्यः ॥

हे अग्ने, वरुणः मित्रः अर्यमा, एते त्रयो देवासः देवाः प्रत्नं पुरातनं दूतम् त्वा त्वाम् समिन्धते सम्यग्ज्वलयन्ति। यः मर्त्यः मनुष्यः ते तुभ्यं ददाश दत्तवान् भवति, सः त्वया सहायभूतेन सिद्धिं निष्पादयता देवेनेत्यर्थः। विश्वम् धनम् जयति

विश्वात्मकं धनं, सर्वविधमपि धनं वा जयति ॥ अर्यमा–अर्यान् अरणशीलान् उद्यमिनः पुरुषान् मिमीत इत्यर्यमा, श्वन्नुक्षन्नित्यादिना कनिन्प्रत्ययान्तो निपातितः। इन्धते–ञि इन्धी दीप्तौ। ददाश–दाशृ दाने ॥

पञ्चमीमृचमाह—

मन्द्रो होता गृहपतिरग्ने दूतो विशामसि।
त्वे विश्वा सङ्गतानि व्रता ध्रुवा यानि देवा अक्रृण्वत ॥५॥

मन्द्रः होता गृहऽपतिः अग्ने दूतः विशाम् असि त्वे इति विश्वा सम्ऽगतानि व्रता ध्रुवा यानि देवाः अक्रृण्वत ॥

हे अग्ने, त्वं मन्द्रः मदकारकः हर्षयिता, होता आह्वाता देवानां, विशाम् प्रजानां गृहपतिः गृहस्य पालकः दूतः देवदूतः असि। त्वे त्वयि विश्वा सर्वाणि व्रता कर्माणि दैव्यानि सङ्गतानि सम्यग्युक्तानि भवन्ति। यानि ध्रुवा ध्रुवाणि स्थिराणि अव्यभिचारीणि देवाः अक्रृण्वत कृतवन्तः। सर्वदेववृन्दकार्याणि सुनियतानि अग्नौ प्रणिहितानि। अत एव अग्निमुखेन तानि सर्वाणि इन्द्रादीनां कर्माणि निष्पाद्यानि भवन्ति ॥ मन्द्रादयो व्याख्याताः। त्वे–सप्तम्येकवचनस्य शे आदेशः ॥

इति प्रथमस्य तृतीयेऽष्टमो वर्गः

षष्ठीमृचमाह—

त्वे इदग्ने सुभगे यविष्ठ्य विश्वमा हूयते हविः।
स त्वं नो अद्य सुमना उतापरं यक्षि देवान्त्सुवीर्या ॥६॥

त्वे इति इत् अग्ने सुऽभगे यविष्ठ्य विश्वम् आ हूयते हविः सः त्वम् नः अद्य सुऽमनाः उत अपरम् यक्षि देवान् सुऽवीर्या ॥

हे यविष्ठ्य, युवतम, अग्ने, सुभगे सौभाग्यसंपन्ने त्वे इत् त्वय्येव विश्वम् सर्वं हविः देवेभ्यो देयं सोमरूपं द्रव्यं आहूयते सर्वतः हुतं भवति, प्रक्षिप्यत इत्यर्थः। स त्वं तादृशस्त्वं नः अस्मान् प्रति सुमनाः शोभनमनस्कः सन् अद्य इदानीं उत अपरम् इतः परमपि सुवीर्या शोभनवीर्योपेतान् देवान् यक्षि यज ॥ यविष्ठ्य–युवशब्दा-

दिष्ठन्, यकारोपजनश्छान्दसः। यङि-शपो लुक्, छन्दसि बहुलम्। सुवीर्या-सुपां सुलुगिति विभक्तेराकारः॥

सप्तमीमृचमाह—

तं घेमित्था नमस्विन उप स्वराजमासते।
होत्राभिरग्निं मनुषः समिन्धते तितिर्वांसो अति स्रिधः॥७॥

तम् घ ईम् इत्था नमस्विनः उप स्वऽराजम् आसते होत्राभिः अग्निम् मनुषः सम् इन्धते तितिर्वांसः अति स्रिधः॥

हे अग्ने, नमस्विनः नमस्कारयुक्ताः सर्वथा प्रणताः प्रपन्ना इति यावत्, तादृशाः पुरुषाः स्वराजम् स्वतः राजमानं दीप्यमानं तं घ ईम् तमेवैनं त्वां इत्था अनेन प्रकारेण उपासते उपासीना आश्रयन्ते। स्रिधः शत्रून् अति तितिर्वांसः अतिशयेन तरन्तः मनुषः मनुष्याः अग्निम् त्वां होत्राभिः आह्वात्रीभिर्वाग्भिः समिन्धते सम्यग्दीपयन्ति। स्तोतुर्वाग्भिः हृदयस्थोऽग्निर्ज्वलितो भवति खलु। 'सप्त होत्राः वषट्कुर्वन्ती'ति प्राहुर्याज्ञिकाः। अन्तर्यागे सप्त वाचः 'सप्त वाणी'रिति प्रथिताः तच्चसप्तकसंबद्धा ज्ञेयाः॥ नमस्विनः–मत्वर्थीयो विनिः। तितिर्वांसः–तरतेः तिरतेर्वा लिटि क्वसुः, अन्यत्सर्वं छान्दसम्। स्रिधः–स्रिधु शोषणे, क्विप्॥

अष्टमीमृचमाह—

घ्नन्तो वृत्रमतरन्रोदसी अप उरु क्षयाय चक्रिरे।
भुवत्कण्वे वृषा द्युम्न्याहुतः क्रन्ददश्वो गविष्टिषु॥८॥

घ्नन्तः वृत्रम् अतरन् रोदसी इति अपः उरु क्षयाय चक्रिरे भुवत् कण्वे वृषा द्युम्नी आऽहुतः क्रन्दत् अश्वः गोऽइष्टिषु॥

हे अग्ने, घ्नन्तः प्रहरन्तः वृत्रम् अतरन् तीर्णवन्तः त्वत्साहाय्येन देवाः। ततः परं रोदसी द्यावापृथिव्यौ अपः अपां स्यन्दनभुवश्च क्षयाय निवासाय उरु विस्तृतं यथा तथा चक्रिरे कृतवन्तः। वृत्रवधात्परं द्यौः भूमिः आपश्च आवरणरहिताः बन्धा-

द्विमुक्ता वा यथासम्भवं कृताः। तेन तत्र सर्वत्र देवानां देवकामानां ऋषीणां वास-योग्यता जायते। भवान् कण्वे मेधाविनि यजमाने, एतन्नामनि मयि च, वृषा वर्षिता कामानां द्युम्नी दीप्तिमान्, गविष्टिषु गवेषणेषु गोलाभे निमित्तभूते क्रन्दत् क्रन्दन् शब्दं कुर्वन् अश्वः जेता विशिष्टक्रियाशक्तिः प्राणात्मा आहुतः सर्वतो होमयुक्तः, अत एव संतर्पितः भुवत् भवतु॥ घ्नन्तः-हन्तेः शतरि प्रथमाबहुवचनम्। भुवत्-भवतेर्लेट्। द्युम्नी-द्युम्नं प्रकाशो दीप्तिर्वा अस्येति। आहुतः-हु दानादनयोः कर्मणि क्तः। क्रन्दत्-शतरि नुमभावः छान्दसः। गविष्टिषु-गवां इष्टिः एषणं येषु कार्येषु, बहुव्रीहिः॥

वृत्रवधे निस्तमस्के द्यावापृथिव्यौ, बन्धमुक्ता आपः उपलब्धाश्च गावः-इतीदं सर्वं इह निर्दिष्टमवधेयम्। प्राणबलप्रभावादेव गवात्मकप्रज्ञारश्मिव्रजः सम्पादनीयः। तस्मा-दग्निरेव 'अश्व' इत्युक्तम्। उपमावाचकस्याश्रवणान्नेह दृष्टान्तः। पूर्वव्याख्यातारो 'गविष्टिषु अश्व इव' इत्याचक्षते॥

नवमीमृचमाह—

सं सीदस्व महाँ असि शोचस्व देववीतमः।
वि धूममग्ने अरुषं मियेध्य सृज प्रशस्त दर्शतम्॥९॥

सम् सीदस्व महान् असि शोचस्व देवऽवीतमः वि धूमम् अग्ने अरुषम् मियेध्य सृज प्रऽशस्त दर्शतम्॥

हे अग्ने, सं सीदस्व सम्यगुपविश, महान् असि विभवैर्बृहन् भवसि। देववीतमः अतिशयेन देवान् कामयमानः सन् शोचस्व दीप्यस्व। हे मियेध्य मेधार्ह, प्रशस्त उत्कृष्ट, अरुषम् रोचमानं दर्शतम् दर्शनीयं धूमम् ऊर्जवेगेन वाष्पगतिप्रायो यः कम्पो जायते, तं वि सृज विशेषेण सम्पादय॥ अवयवार्थानुसारेण धूमशब्दस्य गूढोऽर्थः प्रागुक्तः (१. २७. ११)। सीदस्व-व्यत्ययेन आत्मनेपदम्। महान्-संहितायां नकारा-कारयोः रुत्वानुनासिकौ उक्तौ। शोचस्व-शुच दीप्तौ। देववीतमः—देवान् वेति गच्छति कामयते वा देववीः, क्विप्, अतिशयेन देववीः, तमप्। अरुषम्—व्याख्या-तम् (१. ६. १)। मियेध्य—अर्हार्थे यत्प्रत्ययः, मपर इयगागमश्छान्दसः॥

दशमीमृचमाह—

यं त्वा देवासो मनवे दधुरिह यजिष्ठं हव्यवाहन ।
यं कण्वो मेध्यातिथिर्धनस्पृतं यं वृषा यमुपस्तुतः ॥१०॥

यम् त्वा देवासः मनवे दधुः इह यजिष्ठम् हव्यऽवाहन यम् कण्वः मेध्यऽअतिथिः धनऽस्पृतम् यम् वृषा यम् उपऽस्तुतः ॥

हे हव्यवाहन, हव्यं हविः वहति प्रापयति देवानिति हव्यवाहनः, तस्य संबोधनम्, अग्ने, मनवे मनुष्याणां मूलपुरुषाय, मन्त्रे पुरुषाय वा तदर्थं यजिष्ठम् यष्टृतमं यम् त्वाम् इह अत्र यजनशालायां अन्तरे देवासः सर्वे देवाः दधुः धृतवन्तः, यम् त्वां कण्वः मेधाविनां निदर्शनभूत ऋषिर्यजमानः मेध्यातिथिः मेध्याः अतिथयो यस्य सः कण्वपुत्रो वा धनस्पृतम् धनेन स्वीयेन दिव्येन अस्मान् स्पृणोति प्रीणयति धनस्पृत् तं तथाभूतं विधाय दधे। तथा वृषा इन्द्रः यं त्वामिह दधे, उपस्तुतः कोऽपि स्तोता यजमानः यं त्वां दधे, स त्वं संसीदस्वेति पूर्वेण संबन्धः॥ यजिष्ठम्—यष्टृशब्दादगुणवचनादपि इष्ठन्, छन्दसि। उपस्तुतः—कर्तरि क्तः। उपस्तुत इति एतन्नामकः पुरा प्रसिद्धो वा स्यात्, स्तोतॄणां दृष्टान्तभूतः॥

इति प्रथमस्य तृतीये नवमो वर्गः

एकादशीमृचमाह—

यमग्निं मेध्यातिथिः कण्व ईध ऋतादधि ।
तस्य प्रेषो दीदियुस्तमिमा ऋचस्तमग्निं वर्धयामसि ॥११॥

यम् अग्निम् मेध्यऽअतिथिः कण्वः ईधे ऋतात् अधि तस्य प्र इषः दीदियुः तम् इमाः ऋचः तम् अग्निम् वर्धयामसि ॥

मेध्यातिथिः मेध्या अतिथयो यस्य सः कण्वः मेधाविप्रतिमानभूतः, ऋषिः ऋतादधि ऊर्ध्वं सत्यात् ज्योतिषः उत्तमस्थानात् आहृत्य यम् अग्निम् ईधे दीप्तवान् अत्र पृथिवीस्थाने मानुषे यजनगृहान्तरे, तस्य अग्नेः इषः प्रेरणाः प्रेरणात्मिकाः ज्वालाः प्रदीदियुः प्रकर्षेण दीप्यन्ते, ज्वलन्ति। तम् अग्निं इमाः इदानीमस्माभिः प्रयुज्यमानाः

ऋचः वर्धयन्ति इति पुरुषव्यत्ययेनाध्याहार्यः। तम् अग्निम् वयं वर्धयामसि वर्धयामः॥ दीदियुः—दीदेतिः छान्दसो धातुः दीप्तिकर्मा, लिटि उसि इयङादेशः। वर्धयामसि—मस इकारागमः॥

द्वादशीमृचमाह—

रायस्पूर्धि स्वधावोऽस्ति हि तेऽग्ने देवेष्वाप्यम्।
त्वं वाजस्य श्रुत्यस्य राजसि स नो मृळ महाँ असि ॥१२॥

रायः पूर्धि स्वधाऽवः अस्ति हि ते अग्ने देवेषु आप्यम् त्वम् वाजस्य श्रुत्यस्य राजसि सः नः मृळ महान् असि॥

हे स्वधावः स्वधारणसामर्थ्यरूपः स्वभावः स्वधा भवति, तेन सर्वपुष्टिप्रदस्वभावसमृद्धः स्वधावान् भवति, भूमार्थे मतुप्, छन्दसि मतुवसो रुत्वम्। हे पोषणसामग्रीसमृद्ध, अग्ने, रायः अस्माकं धनानि पूर्धि पूरय, पूर्णानि कुरु, मास्तु तेषां लोपः। हि यस्मात् ते तव देवेषु आप्यम् बन्धुत्वं, सख्यं अस्ति, तस्मात् 'रायस्पूर्धि' इति संबन्धः। त्वम् श्रुत्यस्य श्रवणीयस्य वाजस्य समृद्धिबलस्य राजसि राजा भवसि। सः तादृशस्त्वं नः अस्मान् मृळ सुखय। त्वं महान् असि प्रभावात् ऐश्वर्येण वा महांस्त्वम्॥ पूर्धि—पॄ पूरणे, छन्दसि हेर्धिरादेशः। अन्यच्च छान्दसम्। आप्यम्—आपनीयो बन्धुः आपिः, भवे छन्दसीति यत्। श्रुत्यस्य—श्रुतिशब्दाद् भवे यत्। मृळ—मृड सुखने, शस्य ङित्त्वाद् गुणाभावः॥

त्रयोदशीमृचमाह—

ऊर्ध्व ऊ षु ण ऊतये तिष्ठा देवो न सविता।
ऊर्ध्वो वाजस्य सनिता यदञ्जिभिर्वाघद्भिर्विह्वयामहे ॥१३॥

ऊर्ध्वः ऊम् इति सु नः ऊतये तिष्ठ देवः न सविता ऊर्ध्वः वाजस्य सनिता यत् अञ्जिऽभिः वाघत्ऽभिः विऽह्वयामहे॥

हे अग्ने ('यूपात्मकदारुनिष्ठाग्ने' इति याज्ञिकाः, तर्हि 'यजमानो वै यूपः' इति श्रुत्यनुसारेण यजमानशरीरस्थोऽग्निरिति व्याख्येयम्) नः अस्माकं ऊतये अभिवृद्धये

ऊर्ध्वः उन्नतः तिष्ठ। क इव? सविता देवः न यथा सविता उत्तमस्थानो ज्योतिरात्मा सर्वदा ऊर्ध्व एव स्थितः, स इव तिष्ठेति संबन्धः। ऊर्ध्वः उन्नतः सन् वाजस्य समृद्धेः सनिता दाता भव। यत् यस्मात् कारणात् अञ्जिभिः अञ्जद्भिः व्यञ्जद्भिः, गुप्तानि यानि दैव्यानि भवन्ति तानि व्यक्तानि कुर्वद्भिः वाघद्भिः स्तोतृभिः, तदुपलक्षितैः मन्त्रात्मकस्तोत्रवाग्भिः, वयं विह्वयामहे विविधं आह्वयामः, तस्मात् 'वाजस्य सनिता भवे'ति पूर्वेणान्वयः॥ ऊ षु णः-संहितायां इको दीर्घः, सस्य षत्वम्, नस्य णत्वम्। उ-पादपूरणः। सु सुतरां तिष्ठेति वा संबन्धनीयः। अञ्जिभिः-अञ्जू-व्यक्तिम्रक्षणकान्तिगतिषु, खनीत्यादिना इप्रत्ययः॥

चतुर्दशीमृचमाह—

ऊ॒र्ध्वो नः॑ पा॒ह्यंह॑सो॒ नि के॒तुना॒ विश्वं॒ सम॒त्रिण॑ं दह ।
कृ॒धी न॑ ऊ॒र्ध्वाञ्च॒रथा॑य जी॒वसे॑ वि॒दा दे॒वेषु॑ नो॒ दुवः॑ ॥१४॥

ऊ॒र्ध्वः नः॒ पा॒हि अंह॑सः नि के॒तुना॑ विश्वं॑म् सम् अ॒त्रिण॑म् द॒ह॒
कृ॒धि न॒ः ऊ॒र्ध्वान् च॒रथा॑य जी॒वसे॑ वि॒दाः दे॒वेषु॑ न॒ः दुवः॑ ॥

हे अग्ने, ऊर्ध्वः उन्नतः सन् नः अस्मान् अंहसः दुरितात् केतुना दृष्टिरूपज्ञानेन नि पाहि नितरां रक्ष। विश्वम् सर्वं अत्रिणम् अत्तारं भक्षकं राक्षसं सं दह सम्यक् दग्धं कुरु, भस्मसात्कुर्वित्यर्थः। चरथाय चरणाय ऊर्ध्वं सञ्चाराय जीवसे ऊर्ध्वं जीवनाय, नः अस्मान् ऊर्ध्वान् उन्नतान् अत्रस्थान् इहैव ऊर्ध्वगान् कृधि कुरु। नः अस्माकं दुवः परिश्रमं देवेषु मध्ये विदाः लम्भय ज्ञापयेत्यर्थः॥ अत्रिणम्-अद भक्षणे, त्रिनिप्रत्ययः औणादिकः। कृधि-श्रुशृण्वादिभ्यः हेर्धिरादेशः, विकरणस्य लुक्, संहितायां दीर्घः। ऊर्ध्वान्-ऋचु विकल्पविधानात् नकारस्य रुत्वाभावः। चरथाय-भावे अथप्रत्ययः। जीवसे-तुमर्थे असेप्रत्ययः। विदाः-विदॢ लाभे, अस्मादन्तर्भावितण्यर्थात् लेट्॥

पञ्चदशीमृचमाह—

पा॒हि नो॑ अग्ने र॒क्षसः॑ पा॒हि धू॒र्तेररा॑व्णः ।
पा॒हि रीष॑त उ॒त वा॒ जिघां॑सतो॒ बृह॑द्भानो॒ यवि॑ष्ठ्य ॥१५॥

पाहि नः अग्ने रक्षसः पाहि धूर्तेः अराव्णः पाहि रिषतः उत वा जिघांसतः बृहद्भानो इति बृहत्ऽभानो यविष्ठ्य ॥

हे बृहद्भानो, बृहन्तो भानवो रश्मयो यस्य तादृश, हे यविष्ठ्य युवतम, अग्ने, नः अस्मान् रक्षसः राक्षसादेः पाहि रक्ष। अराव्णः अदातुः धूर्तेः हिंसकात् लोभाददानशीलाद् द्रोग्धुर्हिंसतः मानुषरूपादमानुषात्पापात्मनो वा पाहि। रिषतः अविशेषेण हिंसकात् पाहि। उत वा अथवा जिघांसतः हन्तुमिच्छतो मानुषादमानुषाद्वा भूतात् पाहि॥ धूर्तेः—धुर्वी हिंसार्थः, क्तिच्। अराव्णः—रा दाने, वनिप्। रिषतः, जिघांसतः, अन्ये च प्रागुक्ताः॥

इति प्रथमस्य तृतीये दशमो वर्गः

षोडशीमृचमाह—

घनेव विष्वग्वि जह्यराव्णस्तपुर्जभ यो अस्मध्रुक्।
यो मर्त्यः शिशीते अत्यक्तुभिर्मा नः स रिपुरीशत ॥१६॥

घनाऽइव विष्वक् वि जहि अराव्णः तपुःऽजम्भ यः अस्मऽध्रुक् यः मर्त्यः शिशीते अति अक्तुऽभिः मा नः सः रिपुः ईशत ॥

हे तपुर्जम्भ तपूंषि सन्तापकरा रश्मयः जम्भानि आयुधानि यस्य तादृशाग्ने, अराव्णः अदातॄन् वैरिणः विष्वक् सर्वतः घनेव घनेन दण्डादिनेव विजहि विशेषेण मारय। यः अन्योपि अस्मध्रुक् अस्मद्द्रोहकारी रिपुः शत्रुर्भवति, यः मर्त्यः यश्च मनुष्योऽपि रिपुः अक्तुभिः तमोभिः अप्रकाशैरदिव्यैः करणैः अतिशिशीते तनूकरोति अस्मानिति शेषः, स द्विविधोऽपि वैरी नः अस्मान् प्रति मा ईशत ईश्वरो मा भूत्, शक्तो मा भूत॥ घना इव—तृतीयायाः डादेशः। जहि—हन्तेर्लोट्। तपुर्जम्भ—तप सन्तापे, औणादिक उसिन् प्रत्ययान्तः 'तपुस्' शब्दः जंभ्यन्ते नाश्यन्ते शत्रव एभिरिति जम्भान्यायुधानि, अन्यदुक्तम्। अस्मध्रुक्—द्रुह जिघांसायां, क्विप्, हस्य घत्वम्। शिशीते—शो तनूकरणे, व्यत्ययेनात्मनेपदम्, विकरणस्य श्लुः। अक्तुभिः—अञ्जनादक्तुस्तमः, अत एव रात्रिपर्यायः, अत्र लक्षणया आयुधैरिति व्याख्यातं सायणीये॥

सप्तदशीमृचमाह—

अग्निर्वन्ने सुवीर्यमग्निः कण्वाय सौभगम् ।
अग्निः प्रावन्मित्रोत मेध्यातिथिमग्निः साता उपस्तुतम् ॥१७॥
अग्निः वन्ने सुऽवीर्यम् अग्निः कण्वाय सौभगम् अग्निः प्र आवत् मित्रा उत मेध्यऽअतिथिम् अग्निः सातौ उपऽस्तुतम् ॥

अग्निः देवः सुवीर्यम् शोभनवीर्योपेतं वस्तु उद्दिश्य वन्ने याचितः । सः अग्निः कण्वाय प्रसिद्धाय महर्षये, मेधाविलक्षणाय यजमानाय वा सौभगम् सौभाग्यं प्रावत् प्रकर्षेण रक्षितवान् । तथा अग्निः मित्रा मित्राणि प्रावत् । उत अपि च मेध्यातिथिम् उक्तलक्षणं वा यजमानं, प्रसिद्धं कण्वपुत्रं ऋषिं प्रावत् । तथा अग्निः उपस्तुतम् प्रागुपन्यस्तं कमपि स्तोतारं, तन्नामकं च सातौ सम्पल्लाभे निमित्तभूते, प्रावत् ॥ वन्ने–वनु याचने, कर्मणि लिट्, उपधालोपश्छान्दसः । सौभगम्–सुभगान्मन्त्रे इत्युद्गात्रादिषु पाठात्, तस्य भाव इत्यर्थे अञ् ॥

अष्टादशीमृचमाह—

अग्निना तुर्वशं यदुं परावत उग्रादेवं हवामहे ।
अग्निर्नयन्नववास्त्वं बृहद्रथं तुर्वीतिं दस्यवे सहः ॥१८॥
अग्निना तुर्वशम् यदुम् पराऽवतः उग्रऽदेवम् हवामहे अग्निः नयत् नवऽवास्त्वम् बृहत्ऽरथम् तुर्वीतिम् दस्यवे सहः ॥

अग्निना देवेन सह अवस्थितान्, पूर्वान् प्राप्तदिव्यप्रतिष्ठान् अन्वर्थनामधेयान् अवयवार्थसदृशप्रभावप्रतिमानभूतान् व्यक्तिविशेषान् शक्तिविशेषान्वा वक्ष्यमाणान् हवामहे आह्वयामः अस्माकं साहाय्यमनुग्रहीतुम् । कान् ? तुर्वशम् यदुम् उग्रदेवम् इत्येतान् । कस्मात् स्थानात् ? परावतः परमात् स्थानात् । दस्यवे उपद्रवहेतोः क्षपयितुः यजनविघातकस्य, षष्ठ्यर्थे चतुर्थी, सहः साहयिता, अभिभविता अग्निः स्वकर्मनिर्वाहाय सहायान् पूर्वान् इह नयत् आनयतु । कान् ? नववास्त्वम्, बृहद्रथम् तुर्वीतिम् एतन्नामकान् ॥ तुर्वशः–तुर्वतेः क्षिप्रकारी जयवेगवान् । यदुः–तुर्वशेन सह अन्यत्रापि पठितः इन्द्रानुग्रहपात्रं भवति,

अविदितोऽवयवार्थः। उग्रदेवः—उग्रो देवः यस्यासौ। नववास्त्वः—नवं वास्तु यस्यासौ नूतनवासप्रतिष्ठः। बृहद्रथः—नववास्त्वेन सह अन्यत्रापि पठितः, नववास्त्वविशेषणं वा स्यात्। तुर्वीतिः—तुर्वशवत् तुर्वतेः, क्षिप्रगमनः, जयज्वाली ॥

अत्र नववास्त्वनामको राजर्षिरिति सायणः। अन्यत्र सोऽसुर इति व्याचष्टे। तदनुरोधेन व्याख्या च भवति। तुर्वीतिवत् इन्द्रेणानुगृहीतः प्रतिमानभूतो नववस्त्व इति गृहीत्वा व्याख्या नः प्रवर्तते। सह तुर्वीतिना हि पठित इह नववास्त्वः। तर्हि कस्याः सिद्धेः प्रतिमानभूतोऽसौ? अवयवार्थादवगन्तव्यः। नवं नूतनं वास्तु वेश्मभूपर्यायः यस्य सः नवीकृतशरीरात्मकवासभूसम्पन्न इत्यर्थः। तादृशं यजमानमृषिं इन्द्र इत उद्धृत्य ऊर्ध्वं नयन् रोचमानस्य ज्योतिर्लोकस्य दूरे पारे स्थापितवानित्यर्थको वैकुण्ठस्य मन्त्रवर्णो भवति (१०. ४९. ६)। उद्धरणसमये पीडा भवत्येव, सा च संस्करणार्था। 'दासं' क्षपयितारं वृत्रं वध्यं यथा अरुजं तथा अदासं भक्तं अपीडार्हमपि नववास्त्वं अपीडयम्। तथा निष्पीड्य 'दूरे पारे रजसो रोचनाकरम्' उज्ज्वलस्य लोकस्य दूरे पारे अस्थापयम् इति वैकुण्ठस्योक्तिः। अत्र सायणव्याख्या तु वृत्रमिव दासं नववास्त्वं अरुजम् इति भवति, अत एव यो राजर्षिरभूत् प्रथमे मण्डले स दशमेऽसुरः कृतः। एवं षष्ठेऽपि (६. २०. ११) नववास्त्वं असुरं 'परा' पराहत्य पित्रे 'नपातं' दत्तवानिति सायणः। 'परा नववास्त्वं अनुदेयं महे पित्रे ददाथ स्वं नपातम्' अत्र महान् पिता उत्तमो ज्योतिर्मयो लोकः तस्मै 'महे पित्रे' अनुदेयं अनुक्रमेण दातव्यं नववास्त्वं स्वं नपातं स्वभूतं पुत्रं 'परा ददाथ' परस्ताद्दत्तवानित्यर्थः। अयमर्थः वैकुण्ठस्य मन्त्रवर्णेन संगच्छते। तत्र "दूरे पारे रजसो रोचनाकरम्" इति स्थितम्, अत्र तु 'परा ददाथ' इति ॥ तस्मान्नायमसुरो नववास्त्व इति सिद्धम्। एवं सायणव्याख्यानुसारेण नववास्त्वमधिकृत्य यः पौर्वापर्यविरोध आपद्यते स परिहृतोऽस्मन्मन्त्रार्थविवरणे ॥

एकोनविंशीमृचमाह—

नि त्वामग्ने मनुर्दधे ज्योतिर्जनाय शश्वते ।
दीदेथ कण्व ऋतजात उक्षितो यं नमस्यन्ति कृष्टयः ॥१९॥

नि त्वाम् अग्ने मनुः दधे ज्योतिः जनाय शश्वते दीदेथ कण्व ऋतऽजातः उक्षितः यम् नमस्यन्ति कृष्टयः ॥

हे अग्ने, ज्योतिः ज्योतिःस्वरूपं त्वाम् शश्वते शाश्वताय जनाय सार्वकालिकाय जन्मिने, सर्वदा मनुष्यजातये तदनुग्रहायेत्यर्थः ('शश्वते वीर्याय शाश्वताय वीर्याय' इति सायणः (३. ३२. ५) अत्र बहुविधाय जनायेत्याह)। मनुः मन्ता मनुष्याणां मूलपुरुषो देवः निदधे स्थापयामास। हे अग्ने, ऋतजातः ऋतात् सत्यादुत्तमस्थानात् जातः उक्षितः सिक्तः, तर्पितः सोमरूपैर्हविर्भिः त्वं कण्वे मेधाविनि यजमान ऋषौ, अधुना मयि, दीदेथ दीप्तवानसि यम् कृष्टयः प्रयत्नवन्तो मनुष्याः नमस्यन्ति नमस्कुर्वन्ति॥ दीदेथ-दीदेतिः छान्दसो धातुः। कृष्टयः-कृष विलेखने, क्तिच्॥

विंशीमृचमाह—

त्वेषासो अग्नेरमवन्तो अर्चयो भीमासो न प्रतीतये।
रक्षस्विनः सदमिद्यातुमावतो विश्वं समत्रिणं दह ॥२०॥

त्वेषासः अग्नेः अमऽवन्तः अर्चयः भीमासः न प्रतिऽइतये रक्षस्विनः सदम् इत् यातुऽमावतः विश्वम् सम् अत्रिणम् दह॥

अग्नेः देवस्य अर्चयः ज्वालाः त्वेषासः दीप्ताः अमवन्तः बलवन्तः भीमासः घोराः प्रतीतये न प्रत्येतुं प्रतिगन्तुं शत्रुभिः प्रत्यवस्थातुं न शक्या इत्यर्थः। तस्मात्, हे अग्ने रक्षस्विनः रक्षोबलयुक्तान् यातुमावतः यातुधानान् यजनविरोधिनः राक्षसविशेषान् सदमित् सदैव संदह भस्मीकुरु। तथा विश्वम् सर्वं अत्रिणम् भक्षकं शत्रुं संदह॥

त्वेषासः-त्विष दीप्तौ, पचाद्यच्। अमवन्तः-अम रोगे अमति रुजति शत्रून् इति अमः बलं तद्वन्तः। रक्षस्विनः-रक्षः बलं रक्षन्त्यनेनेति व्युत्पत्तिं मन्यते सायणः। मत्वर्थीयो विनिः। रक्षांसि एषां सन्तीति युक्तम्। यातुमावतः-यातवो यातनाः तान् मिमते निर्मिमत इति यातुमाः राक्षसव्यापाराः, ततो मतुप्।

इति प्रथमस्य तृतीये एकादशो वर्गः

क्रीळं व इति पञ्चदशर्चं द्वितीयं सूक्तम्। मरुद्देवताकम्, गायत्रं, घोरपुत्रः कण्व ऋषिः॥

तत्र प्रथमामृचमाह—

क्रीळं वः शर्धो मारुतमनर्वाणं रथेशुभम्।
कण्वा अभि प्र गायत ॥१॥

क्रीळम् वः शर्धः मारुतम् अनर्वाणम् रथेऽशुभम् कण्वाः अभि प्र गायत ॥

हे कण्वाः, मेधाविनः, कण्ववंश्या वा, वः युष्माकं सम्बन्धिनं मारुतम् मरुतामिदं शर्धः बलं, मरुद्गणं अभि प्र गायत अभितः प्रकर्षेण स्तुत। कीदृशं शर्धः ? क्रीळम् विहरणशीलं अनर्वाणम् युद्धाश्वरहितं, (अर्वा युद्धाश्वः) रथेशुभम् रथे शोभमानम् ॥ क्रीळम्-क्रीडतेः पचाद्यच्। शर्धः-शृधु प्रसहने शर्धयत्यनेन शत्रूनिति शर्धो बलं सैन्यम्। रथे-शुभम्-रथे शोभत इति रथेशुप्, क्विप्, तत्पुरुषे कृति बहुलमित्यलुक् ॥ मरुतोऽधिकृत्य प्रागुक्तम्। मरुतश्चण्डवेगाः प्राणमयधामानः ऐन्द्रज्योतिर्बलदीपितानां धीवृत्तीनां दिव्यगति-विधायिनः प्रवातप्रायवेगाः देवविशेषा इत्युक्तम्। (१. ६ सू; १. १९ सू; १. २३. १०)॥

द्वितीयामृचमाह—

ये पृषतीभिर्ऋष्टिभिः साकं वाशीभिरञ्जिभिः ।
अजायन्त स्वभानवः ॥२॥

ये पृषतीभिः ऋष्टिऽभिः साकम् वाशीभिः अञ्जिऽभिः अजायन्त स्वऽभानवः ॥

ये मरुतः पृषतीभिः बिन्दुयुक्तमृगीभिः वाहनभूताभिः ऋष्टिभिः आयुधैः साकम् सह, तथा अञ्जिभिः अलङ्करणैः वाशीभिः वाग्भिः साकं स्वभानवः स्वकीयरश्मियुक्ता अजायन्त सम्पन्नाः। प्रागुक्तमरुद्गणतत्त्वग्रहणेन पृषत्यादीनां लाक्षणिकत्वं सुगमं स्यात्। पृषत्यः प्रवात-वेगचुञ्चवः प्राणभूसमुद्भवं धीवृत्तीनां दिव्यगतिविधायिनं मरुद्गणं वहन्ति॥ ऋष्टयः (ऋषते-र्दर्शनार्थात्) दृष्टयः, हिंसार्थात् आयुधानि। प्रचण्डवेगानां मरुतां दृष्टय एव आयुधानि भवन्ति। अञ्जिभिः वाशीभिरित्यत्र, व्यञ्जयन्तीभिः वाग्भिरिति उभयोः सामानाधिकरण्यं ग्राह्यम्॥ मरुतां प्रवातवेगोत्थाः शब्दा वाचः गहनानि गुप्तानि वा विभिद्य व्यञ्जयन्ति, प्रकाशयन्ति। अत एव मरुतः 'अञ्जिभिः वाशीभिः' साकं स्वभावोचितचित्प्रकाशरश्मिभिर्युक्ताः प्रादुर्भूताः ऋषेरन्तर्यागप्रवृत्तस्येति बोध्यम्॥

तृतीयामृचमाह—

इहेव शृण्व एषां कशा हस्तेषु यद्वदान् ।
नि यामंश्चित्रमृञ्जते ॥३॥

इहऽइव शृण्वे एषाम् कशाः हस्तेषु यत् वदान् नि यामन् चित्रम् ऋञ्जते ॥

एषाम् मरुतां हस्तेषु स्थिताः वशवर्तिन्य इत्यर्थः कशाः वाहनप्रेरणसाधनभूताः वाचः (कशा वाङ्नाम) यत् वदान् यद्वदन्ति तत् इहेव अत्रैव ध्यानमास्थितोऽहं शृण्वे शृणोमि । स वाग्विशेषः यामन् यामनि यात्रायां मदीयेऽस्मिन्नन्तर्यागे चित्रम् अद्भुतं, विविधं वा व्यापारं नि ऋञ्जते नितरां प्रसाधयति, यात्रायां विचित्रशोभावहो भवति श्रूयमाणः शब्दः ॥ शृण्वे—व्यत्ययेनात्मनेपदम् । वदान्—वदतेर्लेटि आडागमः ॥

चतुर्थीमृचमाह—

प्र वः शर्धाय धृष्वये त्वेषद्युम्नाय शुष्मिणे ।
देवत्तं ब्रह्म गायत ॥४॥

प्र वः शर्धाय धृष्वये त्वेषऽद्युम्नाय शुष्मिणे देवत्तम् ब्रह्म गायत ॥

हे कण्वाः, सखायो वा, वः युष्माकं संबन्धिने शर्धाय मरुतां गणाय देवत्तम् देवैर्दत्तं देवता-प्रसादाल्लब्धं ब्रह्म मन्त्रं प्र गायत प्रकर्षेण स्तुत । कीदृशाय शर्धाय ? धृष्वये धर्षणयुक्ताय, त्वेषद्युम्नाय त्वेषं दीप्तं द्युम्नं द्योतनं, प्रकाशो, यस्य तं, (द्युम्नं यश इत्युक्त्या च प्रकाश एव लक्ष्यते) शुष्मिणे शुष्मं बलमस्येति शुष्मी, तस्मै ॥ धृष्वये—कृविधृष्वीत्यादिना क्विन्-प्रत्ययान्तो निपातितः । देवत्तम्—देवदत्तम्, छान्दसो दवर्णलोपः ॥

पञ्चमीमृचमाह—

प्र शंसा गोष्वघ्न्यं क्रीळं यच्छर्धो मारुतम् ।
जंभे रसस्य वावृधे ॥५॥

प्र शंस गोषु अघ्न्यम् क्रीळं यत् शर्धः मारुतम् जंभे रसस्य ववृधे ॥

गोषु तेजस्सु अवस्थितं अघ्न्यम् अहन्तव्यं गां वृषवद्बलिनं, क्रीळम् विहारयुक्तं यत् मारुतं शर्धः यत् मरुद्गणात्मकं बलं वर्तते, तत् प्रशंस स्तुहि, हे यजमान, (अन्तरात्मनः संबोधनम्)। तच्च मारुतं शर्धः रसस्य आनन्दस्य सोमात्मकस्य जम्भे उदरे, आस्ये वा ववृधे वृद्धमभूत्॥ सांशयिकस्तृतीयः पादः। 'रसस्य गोक्षीररूपस्य सम्बन्धि तत्तेजः (शर्धः) जम्भे मुखे उदरे वा ववृधे' इति सायणः, मारुतं बलं गोक्षीरसंबन्धि तेजः किल, तच्च उदरे मुखे वा वृद्धमभूत् इति कथनेन विवक्षितं न ज्ञायते। अतिस्पष्टार्थं पादमिव व्याचष्टे। 'जम्भे जभि नाशने जम्भ्यते भक्ष्यते अनेनेति जम्भमास्यं करणे घञ्' इति सायणीयप्रक्रिया—जभिधातोर्भक्षणार्थो गौणोऽभ्युपगतश्चेत्, जम्भो जम्भनं भक्षणं, प्राशनमित्यपि वक्तुं युक्तम्। तर्हि 'रसस्य जम्भे वावृधे' सोमस्य पाने ववृधे—इति सुलभं स्यात् तात्पर्यम्। मारुतं शर्धः रसप्राशनेन वृद्धमभूत्। इदं च अन्तर्यजने मरुद्गणस्य प्रादुर्भावात्परं तस्य सोमरसेन वृद्धिर्भवतीत्युपपन्नं स्यात्॥

इति प्रथमस्य तृतीये द्वादशो वर्गः

षष्ठीमृचमाह—

को वो वर्षिष्ठ आ नरो दिवश्च ग्मश्च धूतयः।
यत्सीमन्तं न धूनुथ ॥६॥

कः वः वर्षिष्ठः आ नरः दिवः च ग्मः च धूतयः यत् सीम् अन्तम् न धूनुथ॥

दिवश्च द्युलोकस्यापि ग्मश्च भूलोकस्य च धूतयः कम्पयितारः, हे नरः नेतारः बलिनः, वः युष्माकं मध्ये आ समन्तात् वर्षिष्ठः वृद्धतमः कः? यत् यस्मात् सीम् सर्वतः अन्तम् न वाससोऽन्तमिव, वृक्षाग्रमिव (सायणः) धूनुथ चालयथ। सर्वेऽपि प्रबला लक्ष्यन्ते मरुतः अयं बलाधिकोऽयं नेति न शक्यं वदितुम्॥ 'अन्तं न' इत्यत्र सुखेन चालयितुं योग्यं वस्तु विवक्षितम्। तत् वस्त्राञ्चलं वृक्षाग्रं वा भवतु। ग्मः—ग्मा भूनाम, षष्ठ्येकवचने आकारलोपः। धूतयः—धूञ् कम्पने क्तिच्। धूनुथ—स्वादिभ्यः श्नुः॥

सप्तमीमृचमाह—

नि वो यामाय मानुषो दध्र उग्राय मन्यवे ।
जिहीत पर्वतो गिरिः ॥७॥
नि वः यामाय मानुषः दध्रे उग्राय मन्यवे जिहीत पर्वतः गिरिः ॥

हे मरुतः, वः युष्माकं यामाय गमनाय मानुषः मनुजः दैवतरहस्यवित् निदध्रे दृढं निक्षिप्तवान् आधारस्तम्भं इति शेषः । चण्डवेगेन मरुतां गमने अन्तर्याजिनो गृहं शरीररूपं पतेद्वेति भिया, दार्ढ्याय शरीरगृहं स्तम्भाधारयुक्तं करोतीत्यर्थः । कीदृशाय यामाय ? उग्राय तीव्राय, मन्यवे चालनमभिमन्यमानाय चण्डभावयुक्ताय । तथा हि पर्वतः बहुपर्वयुक्तः गिरिः सानुमान् जिहीत गच्छेत् । तादृशः प्रबलो युष्माकं वेगः ॥ दध्रे—धृङ् अवस्थाने, लिट् । जिहीत—ओहाङ् गतौ लिङ् । पर्वतः—मत्वर्थीयः तप्प्रत्ययः ॥

अष्टमीमृचमाह—

येषामज्मेषु पृथिवी जुजुर्वाँ इव विश्पतिः ।
भिया यामेषु रेजते ॥८॥
येषाम् अज्मेषु पृथिवी जुजुर्वान्ऽइव विश्पतिः भिया यामेषु रेजते ॥

येषाम् मरुतां यामेषु गमनेषु अज्मेषु क्षेपकेषु सत्सु, पृथिवी भूमिः भिया रेजते कम्पते, तत्र दृष्टान्तः—जुजुर्वान् इव विश्पतिः वयसा जीर्णः दुर्बलः प्रजानां पालको राजा यथा शत्रुभयात् कम्पते तद्वत् ॥ अज्मेषु—अज गतिक्षेपणयोः, औणादिको मन् । जुजुर्वान्—जॄ वयोहानौ, लिटः क्वसुः, छन्दसि उत्वम् । यामेषु-यमधातोः घञ् ॥

नवमीमृचमाह—

स्थिरं हि जानमेषां वयो मातुर्निरेतवे ।
यत्सीमनु द्विता शवः ॥९॥
स्थिरम् हि जानम् एषाम् वयः मातुः निःऽएतवे यत् सीम् अनु द्विता शवः ॥

एषां मरुतां जानम् जन्मस्थानं स्थिरम् हि ध्रुवं खलु। मातुः प्राणध्रुवोऽन्तरिक्षस्थानात् वयः पक्षिणः, इमे मरुतः, निरेतवे निर्गन्तुं समर्था इति शेषः। यत् यस्मात् कारणात् मरुतां शवः दीप्तं बलं सीम् सर्वतः द्विता द्वित्वेन अनु वर्तते, तस्मात् 'स्थिरं हि जानं' इति पूर्वेणान्वयः॥ मरुतः 'पृश्निमातरः' (१. २३. १०) इत्यत्र व्याख्यातमवधेयम्। मरुतां माता पृश्निश्चित्रवर्णा गौः। सङ्केतरहस्यमिदम्–प्राणशक्त्याविर्भावविलासक्षेत्रभूता अन्तर्हितधीवृत्तिरश्मिप्रसूः अदितिवदखण्डाकारान्तरिक्षस्थाना विविधाविष्कारकलासम्पन्ना सत्त्वमयी शक्तिर्माता मरुतां चित्रवर्णा गौः पृश्निरुच्यते॥ मरुतां बलं द्विरूपं क्रियाज्ञानशक्त्यात्मकं, अत एव 'द्विता' इत्युक्तम्। धीवृत्तीनां पक्षिरूपत्वं वर्णयन्त्यन्यत्र च मन्त्राः। मरुतः प्राणात्मका अपि धीवृत्तिरूपतां प्राप्ता इत्युक्तमवधेयम्॥

दशमीमृचमाह—

उदु त्ये सूनवो गिरः काष्ठा अज्मेष्वत्नत।
वाश्रा अभिज्ञु यातवे॥१०॥

उत् उम् इति त्ये सूनवः गिरः काष्ठाः अज्मेषु अत्नत वाश्राः अभिऽज्ञु यातवे॥

गिरः सूनवः वाचः प्रेरकाः, पूर्वप्रकृतस्य 'इहेव शृण्वे' 'साकं वाशीभिः' इति प्रस्तुतस्य वाग्रूपस्य शब्दस्योत्पादकाः त्ये ते मरुतः अज्मेषु स्वीयगमनेषु काष्ठाः अपः उदु उत्कर्षेणैव अत्नत अतनिषत विस्तारितवन्तः। तथा तननेन तेजसां रसादानं सुकरमित्याह। वाश्राः हम्भारवोपेताः गाः अभिज्ञु अभिमुखजानु यथा तथा यातवे यातुं प्रेरितवन्त इति शेषः। मरुतां घोषवाग्विभवं वर्णयति। शिखरिणोऽपि भग्ना भवन्तीति प्रागुक्तम्, अधुना आपो वितन्यन्ते गावश्च अपः आजानु प्रविश्य आददतामिति ताश्च प्रेर्यन्त इत्युक्तम्। इन्द्रभ्रातरो मरुतः प्रसिद्धाः। इन्द्रकृत्यानुरोधिनः सन्तः अप्सङ्केतितपोषणधारणादिक्रियाशक्तिविस्तरणेन गोसङ्केतितचिद्रश्मिविषयकरसपोषणप्रेरणार्था भवन्तीति बोध्यम्॥ सूनवः–षू प्रेरणे, सुवः किदिति नुप्रत्ययः। अत्नत–तनु विस्तारे, लङ्, विकरणस्य लुक्, छान्दसम्। अभिज्ञु–अभिगते जानुनी यस्य तत्। प्रसंभ्यां जानुनोः ज्ञुरादेशः। यातवे–तुमर्थे तवेन्प्रत्ययः॥

इति प्रथमस्य तृतीये त्रयोदशो वर्गः

एकादशीमृचमाह—

त्यं चिद्धा दीर्घं पृथुं मिहो नपातमम्रृधम् ।
प्र च्यावयन्ति यामभिः ॥११॥

त्यम् चित् घ दीर्घम् पृथुम् मिहः नपातम् अम्रृधम् प्र च्यवयन्ति यामऽभिः ॥

त्यं चित् घ तमपि, योऽपामावरकः प्रसिद्धस्तमपि तमोघनं यामभिः गमनैः प्रच्यावयन्ति प्रकर्षेणाधो गमयन्ति अपो वर्षयन्ति, कीदृशम् ? दीर्घम् आयतम् पृथुम् विस्तृतं मिहो नपातम् मेहते सिञ्चतीति मिट् अपां आवारको मेघस्तमोघनस्तस्य नपातं सन्तानभूतं अमृधम्—केनाप्यनिष्पीड्यम् ॥ नपातम्—न पातयितारमिति सायणः । प्रसिद्धमर्थं नप्तारं अङ्गीकुर्मः । अमृधम्—मृधु—उन्दने, हिंसार्थे च, औणादिको रक्प्रत्ययः । च्यवयन्ति—पदपाठे ह्रस्वश्छान्दसः ।

द्वादशीमृचमाह—

मरुतो यद्ध वो बलं जनाँ अचुच्यवीतन ।
गिरींरचुच्यवीतन ॥१२॥

मरुतः यत् ह वः बलम् जनान् अचुच्यवीतन गिरीन् अचुच्यवीतन ॥

हे मरुतः, यत् ह यस्मादेव वः युष्माकं बलम् अस्ति, तस्मादेव कारणात् जनान् जन्मिनः अचुच्यवीतन प्रेरयत, तथा गिरीन् मेघान् उक्तलक्षणान् अपां विसृष्टये अचुच्यवीतन प्रेरयत ॥ अचुच्यवीतन—च्यवतेर्लिङि व्यत्ययेन परस्मैपदम्, तनबादेशः, श्नपः श्लुः । अन्यच्च छान्दसम् ॥

त्रयोदशीमृचमाह—

यद्ध यान्ति मरुतः सं ह ब्रुवतेऽध्वन्ना ।
शृणोति कश्चिदेषाम् ॥१३॥

यत् ह यान्ति मरुतः सम् ह ब्रुवते अध्वन् आ शृणोति कः चित् एषाम् ॥

यत् ह यदा खलु मरुतः यान्ति गच्छन्ति, तदा आ सर्वतः अध्वन् मार्गे संब्रुवते ह एते मरुतः गणात्मकत्वात्, संभूय वाचं प्रयुञ्जत एव, शब्दं कुर्वन्तीत्यर्थः। स च शब्दः न सर्वेषां श्रवणगोचरो भवतीत्याह—एषाम् मरुतां तं शब्दं कश्चित् अन्तर्मुखः, विकसितान्तरिन्द्रियः अन्तर्याजी शृणोति, नान्यः, साधारणश्चेदयं शब्दः सर्वेऽपि जनाः शृणुयुः, नायं तथा॥ अध्वन्—सप्तम्या लुक्॥

चतुर्दशीमृचमाह—

प्र यात शीभमाशुभिः सन्ति कण्वेषु वो दुवः।
तत्रो षु मादयाध्वै ॥१४॥

प्र यात शीभम् आशुऽभिः सन्ति कण्वेषु वः दुवः तत्रो इति सु मादयाध्वै॥

हे मरुतः, आशुभिः वेगवद्भिः स्वीयवाहनैः शीभम् शीघ्रं क्षिप्रनाम प्रयात प्रस्थानं कुरुत अस्मदीययजनभुवं प्रति, वः युष्मदर्थं कण्वेषु मेधाविषु, एतन्नामकेष्वस्मासु वा दुवः दुवांसि परिश्रमात्मकानि कर्माणि सन्ति वर्तन्ते। तत्रो तत्र तेषु कण्वेषु, तेषु दुवःसु वा सु सुतरां मादयाध्वै तृप्ता भवत॥ आशुभिः—अशू व्याप्तौ उण्। मादयाध्वै—मद तृप्तियोगे चुरादिः आत्मनेपदी, लेटथाडागमः, एकारस्य ऐकारादेशः॥

पञ्चदशीमृचमाह—

अस्ति हि ष्मा मदाय वः स्मसि ष्मा वयमेषाम्।
विश्वं चिदायुर्जीवसे ॥१५॥

अस्ति हि स्म मदाय वः स्मसि स्म वयम् एषाम् विश्वम् चित् आयुः जीवसे॥

हे मरुतः, वः युष्माकं मदाय तृप्तये अस्ति हि स्म अस्त्येव खलु यदस्माभिर्देयं तदित्यर्थः। एषाम् युष्माकं संबन्धिनः वयम् स्मसि स्म विद्यामहे खलु। विश्वम् चित् आयुः सर्वमप्यायुः जीवसे जीवितुं युष्मदायाः वयं स्म इति संबन्धः॥ स्म—संहितायां दीर्घः। स्मसि—इदन्तो मसिः।

इति प्रथमस्य तृतीये चतुर्दशो वर्गः

'कद्ध नूनम्' इति पञ्चदशर्चं तृतीयं सूक्तम्। घोरपुत्रः कण्व ऋषिः गायत्री छन्दः मरुतो देवताः॥

तत्र प्रथमामृचमाह—

कद्ध नूनं कधप्रियः पिता पुत्रं न हस्तयोः।
दधिध्वे वृक्तबर्हिषः ॥१॥

कत् ह नूनम् कधऽप्रियः पिता पुत्रम् न हस्तयोः दधिध्वे वृक्तऽबर्हिषः॥

हे मरुतः, कत् ह कदा खलु वृक्तबर्हिषः वृक्तं बर्हिः आस्तीर्णं यैस्तानस्मान् कधप्रियः स्तुतिप्रीताः यूयं नूनम् अवश्यं हस्तयोः दधिध्वे हस्ते धारयथ! तत्र दृष्टान्तः—पिता पुत्रम् न यथा पिता पुत्रं हस्ते धारयति, तद्वत्॥ कत्—कदा आकारलोपः छान्दसः। कधप्रियः—कथया स्तुत्या प्रीणयन्ति, क्विप्, थस्य धः, हस्वश्च छान्दसाः। दधिध्वे—छन्दसि वर्तमाने लिट्। वृक्तबर्हिषः मरुत इति सायणः, व्याख्यातं प्राक् (१. ३. ३—पृ. ११३. ११४)॥

द्वितीयामृचमाह—

क्व नूनं कद्वो अर्थं गन्ता दिवो न पृथिव्याः।
क्व वो गावो न रण्यन्ति ॥२॥

क्व नूनम् कत् वः अर्थम् गन्त दिवः न पृथिव्याः क्व वः गावः न रण्यन्ति॥

हे मरुतः, नूनम् क्व यूयं इदानीं कुत्र गताः। कत् कदा वः युष्माकं अर्थम् गन्तव्यं स्थानं, प्राप्तव्यं वस्तु वा यूयं प्राप्नुथेति शेषः। दिवः द्युलोकात् गन्त गच्छत, पृथिव्याः न पृथिवीस्थानात् न गच्छत—अयमर्थः सायणानुसारी, दुर्घटो भावः। अथ नञ्शब्दः उपमार्थीयश्चेत् क्लेशो नश्यति, सुगमो भवति मन्त्रार्थः। दिवो न द्युस्थानादिव पृथिव्याः पृथिवीस्थानात् गन्त गच्छत। मरुतां देवताविशेषत्वात् द्युलोकाद्गमनं सुलभम्, जडघननत्वात् प्रतिबन्धकबाहुल्यात् पृथिवीस्थानादाविर्भूय गमनं तु न तथा। तस्मादाह—

दिव इव पृथिव्याश्च स्थानात् गमनं सुखं भवतु युष्माकमिति। अथ कस्मिन् स्थाने युष्मानाह्वयन्ति आह्वातार इति प्रश्नेन तत् स्थानं ज्ञापयत अपरोक्षाः भवत चेति गमयति तृतीयः पादः। गावो न गावः दोहार्थमिव वः युष्मान् प्रति क्व कुत्र रण्यन्ति शब्दं कुर्वन्ति आह्वयन्ति स्तोतारः॥ रण्यन्ति—रणतिः शब्दकर्मा, व्यत्ययेन श्यन्॥

तृतीयामृचमाह—

क्व वः सुम्ना नव्यांसि मरुतः क्व सुविता।
को ३ विश्वानि सौभगा॥३॥

क्व वः सुम्ना नव्यांसि मरुतः क्व सुविता को ३ इति विश्वानि सौभगा॥

हे मरुतः, वः युष्माकं संबन्धीनि नव्यांसि नवतराणि सुम्ना सुम्नानि सुखानि सुखहेतुभूतानि वा, (धनानि इति पूर्वे) क्व कुत्र वर्तन्ते? तथा सुविता सुवितानि दुरितप्रतिद्वन्द्वीनि भद्राणि क्व? विश्वानि सौभगा सर्वाणि सौभाग्यानि ऐश्वर्याणि को क्व, कुत्र वर्तन्ते? एभिः सर्वैर्युक्ताः प्रसीदतेति भावः॥

चतुर्थीमृचमाह—

यद्यूयं पृश्निमातरो मर्तासः स्यातन।
स्तोता वो अमृतः स्यात्॥४॥

यत् यूयम् पृश्निऽमातरः मर्तासः स्यातन स्तोता वः अमृतः स्यात्॥

हे पृश्निमातरः पृश्निर्माता येषां ते मरुतः, यूयम् यत् यदा मर्तासः मनुष्याः स्यातन भवेत, तदा वः युष्माकं स्तोता यजमानः अमृतः स्यात् अमृतत्वं देवभावं प्राप्नुयात्। मरुतां मानुषे लब्धजन्मत्वं प्राग्विवृतम् (१.६ सू.)॥ पृश्निमातरः—व्याख्यातः। मर्तासः—म्रियतेस्तन्, आज्ञसेरसुक्। स्यातन—अस्तेर्लिङि तस्य तनादेशः॥

पञ्चमीमृचमाह—

मा वो मृगो न यवसे जरिता भूदजोष्यः॥
पथा यमस्य गादुप॥५॥

मा वः मृगः न यवसे जरिता भूत् अजोष्यः पथा यमस्य गात् उप ॥

हे मरुतः, वः युष्माकं संबन्धी जरिता स्तोता अजोष्यः अप्रीण्यः मा भूत्। तत्र दृष्टान्तः—मृगो न यवसे यथा भक्षणीये 'यवसे' तृणादौ मृगः पशुः अत्यन्तलोभात् अतृप्तः 'अजोष्यः' भवति, तथा मृग इव अत्यन्ततृषितो मा भूत् तव स्तोता भक्त इत्यर्थः। किं तु यमस्य नियन्तुर्देवस्य पथा मार्गेण उप गात् उप गच्छतु, नियन्त्रिततृष्णः सुप्रीतो भवतु। अयं चार्थः 'मो षु णः' इत्युत्तरयर्चा संगच्छते। सायणस्तु यथा तृणे भक्षणीये मृगः कदाचिदप्यसेव्यो न भवति, तथा स्तोतापि असेव्यो मा भूदिति व्याचष्टे, यमलोकसंबन्धिमार्गेण तस्य मरणं मा भूदिति च ॥ पूर्वोत्तरसंबन्धो मृग्यः ॥ अजोष्यः—जुषी प्रीतिसेवनयोः, कर्मणि ण्यत्। अन्यत् गतम् ॥

इति प्रथमस्य तृतीये पञ्चवशो वर्गः

षष्ठीमृचमाह—

मो षु णः परापरा निर्ऋतिर्दुर्हणा वधीत्।
पदीष्ट तृष्णया सह ॥६॥

मो इति सु नः परोऽपरा निःऽऋतिः दुःऽहना वधीत् पदीष्ट तृष्णया सह ॥

हे मरुतः, नः अस्मान् निर्ऋतिः पापदेवता, मायात्मिका वा मो षु वधीत् सर्वथा हतान् मा कार्षीत्। कीदृशी निर्ऋतिः ? परापरा अत्यन्तमुत्कृष्टा बलेन, अतिबलेत्यर्थः। दुर्हणा दुःखेन हन्तुं शक्या, केनापि हन्तुं दुःशक्या। सा तृष्णया सह बहुदोषप्रसूर्हि तृष्णा दुराशा, तस्मात् तया सह निर्ऋतिः पदीष्ट पततु विनश्यतु इति प्रार्थना। पूर्वया अस्मदुक्तार्थयर्चा सङ्गच्छत एवेदम् ॥ मो षु णः—सुञः षत्वं, नस्य णः। पदीष्ट—पद गतौ आशीर्लिङि सलोपः छान्दसः ॥

सप्तमीमृचमाह—

सत्यं त्वेषा अमवन्तो धन्वञ्चिदा रुद्रियासः।
मिहं कृण्वन्त्यवाताम् ॥७॥

सत्यम् त्वेषाः अमवन्तः धन्वन् चित् आ रुद्रियासः मिहम् कृण्वन्ति अवाताम् ॥

त्वेषाः दीप्ताः अमवन्तः बलवन्तः रुद्रियासः रुद्रस्य इमे सम्बन्धिनः (घोरकर्मत्वं मरुतां प्रसिद्धम्) मरुतः धन्वन् चित् आ मरुदेशेऽपि अवाताम् वायुरहितां मिहम् वृष्टिं कृण्वन्ति कुर्वन्ति। सत्यम् सत्यमेतत्। वृष्टिविघातकवायुवर्जं प्रचण्डवातवेगा अपि मरुतो वृष्टिं विदधते॥ 'धन्वनि' नीरसे जडे पार्थिवे शरीरेऽपि रसमादधत इति रहस्यम्॥ त्वेषादयो व्याख्याताः॥

अष्टमीमृचमाह—

वाश्रेव विद्युन्मिमाति वत्सं न माता सिषक्ति।
यदेषां वृष्टिरसर्जि ॥८॥

वाश्राऽइव विऽद्युत् मिमाति वत्सम् न माता सिसक्ति यत् एषाम् वृष्टिः असर्जि ॥

वाश्रा इव शब्दायमाना धेनुरिव विद्युत् विद्योतमाना तडित् मिमाति शब्दं करोति। माता वत्सं न धेनुर्वत्समिव सिषक्ति सेवते। यत् यस्मात् कारणात् एषाम् मरुतां संबन्धिनी वृष्टिः असर्जि विसृष्टा भवति। विद्युत्काले मेघगर्जनं ततो वृष्टिश्च मरुतां व्यापाराद्भवतीति स्थूलोऽर्थः स्यात्। अन्तर्यागे चलति, दशाविशेषेषु मध्यमस्थाने ज्योतिर्दर्शनं दिव्यनादश्रवणं रसवृष्टिश्च मरुत्प्रसादाद्भवन्तीति प्रोक्तं भवति॥ वाश्रेव—वाशृ शब्दे रक्प्रत्ययः। मिमाति—माङ् माने शब्दे च व्यत्ययेन परस्मैपदम्। सिषक्ति—षच समवाये (सेवायां च) शपः श्लुः। असर्जि—सृज विसर्गे, कर्मणि लुङ्॥

नवमीमृचमाह—

दिवा चित्तमः कृण्वन्ति पर्जन्येनोदवाहेन।
यत्पृथिवीं व्युन्दन्ति ॥९॥

दिवा चित् तमः कृण्वन्ति पर्जन्येन उदऽवाहेन यत् पृथिवीम् विऽउन्दन्ति ॥

उदवाहेन उदकवाहिना पर्जन्येन मेघेन दिवा चित् दिनवेलायामपि तमः अन्धकारं कृण्वन्ति कुर्वन्ति। यत् यदा पृथिवीम् भूमिम् व्युन्दन्ति विशेषेण क्लेदयन्ति। तदा तमः कृण्वन्तीति पूर्वेणान्वयः। अन्तर्यागे सत्यपि नित्ये ज्योतिर्विलासे रसवर्षातिरेकात् क्वचित् विश्वं तमोवृतमिव भवति, इदं च तात्कालिकं मरुद्वेगकृत्यं कादाचित्कमिति बोध्यम्॥ उदवाहेन–उदकानि वहतीत्युदवाहः, उदकशब्दस्य उदभावः। व्युन्दन्ति–उन्दी क्लेदने रुधादिः॥

दशमीमृचमाह—

अध स्वनान्मरुतां विश्वमा सद्म पार्थिवम्।
अरेजन्त प्र मानुषाः ॥१०॥

अध स्वनात् मरुताम् विश्वम् आ सद्म पार्थिवम् अरेजन्त प्र मानुषाः॥

मरुताम् संबन्धिनः स्वनात् ध्वनेः अध अनन्तरं पार्थिवम् पृथिवीसंबन्धि विश्वं सर्वं सद्म गृहं आ समन्तात् अरेजतेति शेषः। मानुषाः मनुष्या अपि प्रारेजन्त प्रकर्षेण अकम्पन्त। अत्र सर्वं सद्म सर्वं यजमानशरीरं भवति। मानुषाः शरीरिणः जीवाः आत्मानः, न केवलं शरीरे कम्पः, अन्तरेऽपि। तथाविधो मारुतः क्रियावेगः॥ अधथस्य धः छान्दसः। अरेजन्त–रेजृ कम्पने॥

इति प्रथमस्य तृतीये षोडशो वर्गः

एकादशीमृचमाह—

मरुतो वीळुपाणिभिश्चित्रा रोधस्वतीरनु।
यातेमखिद्रयामभिः ॥११॥

मरुतः वीळुपाणिऽभिः चित्राः रोधस्वतीः अनु यात ईम् अखिद्रयामऽभिः॥

हे मरुतः, यूयं वीळुपाणिभिः वीळु बलनाम, वीळवः दृढाः पाणयः हस्ताः तैः सहिताः सन्तः, चित्राः दर्शनीयाः रोधस्वतीः अनु कूलयुक्ता नदीरनुलक्ष्य अखिद्रयामभिः अच्छिद्र-

गमनैः ईम् एनं यजमानमुद्दिश्य यात गच्छत। कूलस्थानीयं शरीरं नद्यः शक्तिधारावाहिन्यः प्राणस्थानाः॥ रोधस्वतीः-रुधिर् आवरणे, रुणद्धि स्रोत इति रोधः कूलं, असुन्। तद्वत्यः मतुपो वत्वम्। अखिद्रयाममिः-खिद दैन्ये रक्, खिद्रं यान्तीति खिद्रयामानः तैः॥

द्वादशीमृचमाह—

स्थिरा वः सन्तु नेमयो रथा अश्वास एषाम्।
सुसंस्कृता अभीशवः॥१२॥

स्थिराः वः सन्तु नेमयः रथाः अश्वासः एषाम् सुऽसंस्कृताः अभीशवः॥

हे मरुतः एषाम् वः युष्माकं नेमयः रथाङ्गवलयाः स्थिराः सन्तु। तथा रथाः अश्वासः अश्वाश्च स्थिराः सन्तु। अभीशवः-रथबन्धनरज्जवः सुसंस्कृताः परिष्कृताः सन्तु॥ अभीशवः-अभिदश्नोतेः उण्॥ अङ्कुलय इति निघण्टुः। किरणा इत्यर्थान्तरम्॥ रथयुक्ताश्वस्थानीयप्राणशक्तिविभवानां बन्धनरज्जुस्थानीयाः चिद्रश्मयः संस्कृताः स्वच्छाः सन्त्वित्युक्तं भवति॥

त्रयोदशीमृचमाह—

अच्छा वदा तना गिरा जरायै ब्रह्मणस्पतिम्।
अग्निं मित्रं न दर्शतम्॥१३॥

अच्छ वद तना गिरा जरायै ब्रह्मणः पतिम् अग्निम् मित्रम् न दर्शतम्।

ऋषेरात्मसंबोधनम्। मारुतेऽस्मिन् सूक्ते मरुद्गणस्वरूपप्रकाशनाय मरुत्सखस्य अग्नेः प्रसादात् वाक् प्रयुज्यतामित्याह-तना तनया देवतास्वरूपं विस्तारयन्त्या प्रकाशयन्त्या गिरा वाचा जरायै स्तुतये अग्निम् वाचोऽधिदैवतं अच्छ आभिमुख्येन वद ब्रूहि। कीदृशं अग्निम्? ब्रह्मणः पतिम् मन्त्रस्य पालकं अधिदैवतं, मित्रम् न दर्शतम् मित्रमिव प्रियसुहृदमिव दर्शनीयम्॥ अग्निः होतृवाग्विशिष्टोऽपि सामान्येन

सर्वस्याश्च वाचो देवता। तत्र वाग्विशेषस्य मन्त्रस्य तु सर्वदेवात्मकोऽग्निरेव ब्रह्मणस्पतिर्भवति। तना–तनु विस्तारे, पचाद्यच्, तना, तृतीयाया डादेशः॥

चतुर्दशीमृचमाह—

मिमीहि श्लोकमास्ये पर्जन्य इव ततनः।
गायं गायत्रमुक्थ्यम् ॥१४॥

मिमीहि श्लोकम् आस्ये पर्जन्यःऽइव ततनः गायं गायत्रम् उक्थ्यम् ॥

अत्रापि ऋषेरात्मसंबोधनं युक्तम्। आस्ये स्वीये मुखे श्लोकम् स्तोत्रं मिमीहि मितं कुरु, यः श्लोकः हृदये प्रादुर्भूतः, तं मुखे आविष्कृतं धेहि। ततः तं पर्जन्य इव मेघः वर्षमिव ततनः विस्तारय। उक्थ्यम् शस्त्रयोग्यं मन्त्रविशेषं गायत्रम् गायत्रीच्छन्दस्कं गाय गानं कुरु॥ वाचा स्तोत्रोच्चारणस्य वैभवं देवताप्रीणनं भवतीति बोध्यम्॥ ततनः–तनु विस्तारे, लेट्, विकरणस्य श्लुः॥

पञ्चदशीमृचमाह—

वन्दस्व मारुतं गणं त्वेषं पनस्युमर्किणम्।
अस्मे वृद्धा असन्निह ॥१५॥

वन्दस्व मारुतम् गणम् त्वेषम् पनस्युम् अर्किणम् अस्मे इति वृद्धाः असन् इह ॥

सर्वोऽपि देवभक्तः प्रेर्यते। मारुतम् मरुत्संबन्धिनं गणम् समूहं वन्दस्व स्तुहि, नमस्कुरु वा। कीदृशं गणम्? त्वेषम् दीप्तम् पनस्युम् स्तोत्रकामम् अर्किणम् अर्कः दीप्तः स्तवः सोऽस्यास्तीति अर्की तम्। अस्मे अस्मासु इह अस्मिन्नन्तर्यागे वृद्धाः वृद्धिं प्राप्ताः असन् भवन्तु मरुतः॥ वन्दस्व–वदि अभिवादनस्तुत्योः। पनस्युम्–पन स्तुतौ असुन्, पनः स्तोत्रं आत्मन इच्छति पनस्युः, क्यच्।

इति प्रथमस्य तृतीये सप्तदशो वर्गः

'प्र यदित्थे'ति दशर्चं चतुर्थं सूक्तम्। घोरपुत्रः कण्व ऋषिः मरुतो देवता। अयुजो बृहत्यः, युजः सतोबृहत्यः॥

तत्र प्रथमामृचमाह—

प्र यदित्था परावतः शोचिर्न मानमस्यथ।
कस्य क्रत्वा मरुतः कस्य वर्पसा कं याथ कं ह धूतयः॥१॥

प्र यत् इत्था पराऽवतः शोचिः न मानम् अस्यथ कस्य क्रत्वा मरुतः कस्य वर्पसा कम् याथ कम् ह धूतयः॥

हे धूतयः कम्पनकारिणः मरुतः, यत् यदा शोचिर्न तेज इव मानम् मननीय बलं इति सायणः, मननीयां मतिं इति वयम्, परावतः दूरादूर्ध्वदेशात् इत्था इत्थं अन्तरिक्षात् प्रास्यथ प्रक्षिपथ, ऊर्ध्वदेशात् यथा ज्योतींषि तेजः प्रक्षिपन्ति भूमौ तथा मरुतः स्वमतिं सङ्कल्परूपां मर्त्ये प्रक्षिपन्ति। यदैवं कुरुथ, तदानीं कस्य पुरुषस्य क्रत्वा क्रतुना प्रज्ञाकर्मणा सङ्गच्छध्वे यूयम्? कस्य पुण्यपुरुषस्य वर्पसा रूपेण सङ्गताः भवथ? कम् याथ कं भक्तं प्राप्नुथ? कम् ह कं वा अनुग्रहास्पदं कुरुथ? मरुतः स्वमतिप्रक्षेपेण द्वारेण पुरुषस्य प्रज्ञाकर्मबलेन रूपेण च एकतां प्राप्य तमाविश्य अनुगृह्णन्ति। कस्य 'क्रत्वा' 'वर्पसा' इत्यत्र अन्यथाप्यध्याहारो घटते। कस्य क्रतुना प्रेरिताः कस्य 'वर्पसा' रूपव्यक्त्या आकृष्टाः युष्मदीयां मतिं प्रक्षिपथेति तात्पर्यमुपपद्यते। उभयथापि, 'कीदृशी स्यात् तस्य योग्यता यस्मिन् पुरुषे युष्मदीयः सङ्कल्पः पतेदि'ति तात्पर्यं भवति। 'मानम्' इत्यत्र विविधमाचक्षते वेदार्थचिन्तकाः। मन ज्ञाने इति धातोरेव निष्पन्नं मन्यते सायणः, मानं मननीयं बलमित्याह। मानं ज्ञानमिति कश्चित्। 'माङ् माने' इति धातोर्निष्पादयन्ति नव्यानामेके, आहुश्च मरुद्व्यापारस्य लक्ष्यभूतानां तरुगिरिभृङ्गादीनां मरुतां च अन्तरं कियद्दूरमिति निर्णये मरुतो 'मानम्' गन्तव्यदेशमानं कामपि मानरेखां प्रक्षिपन्तीति॥

द्वितीयामृचमाह—

स्थिरा वः सन्त्वायुधा पराणुदे वीळू उत प्रतिष्कभे।
युष्माकमस्तु तविषी पनीयसी मा मर्त्यस्य मायिनः॥२॥

स्थिरा वः सन्तु आयुधा पराऽनुदे वीळु उत प्रतिष्कभे युष्माकम् अस्तु तविषी पनीयसी मा मर्त्यस्य मायिनः ॥

हे मरुतः, वः युष्माकं आयुधा आयुधानि परा नुदे शत्रूणां अपनोदनाय स्थिरा सन्तु स्थिराणि भवन्तु। उत अपि च प्रतिष्कभे प्रतिबन्धाय, प्रत्यवरोधाय वीळु दृढानि सन्तु। युष्माकं संबन्धिनी तविषी बलं पनीयसी अतिशयेन स्तोतव्यं अस्तु। मायिनः माया कूटयुक्तिः तद्वतः मर्त्यस्य मनुष्यस्य 'तविषी पनीयसी' मा भूत्॥ यद्यपि मानुषबलेन शत्रुजयः संभवेत् क्वचित् तथापि तत् मायाख्य-अनृतप्रज्ञावशंवदत्वात् न स्पृहणीयं स्तुत्यं भवति, तादृशेन मानुषबलेन जयो मा भूत्, अतः तद्बलं स्तुत्यं न भवति, मा भूच्च। मारुतबलमेव जयप्रदं स्यात् अतः स्तुत्यम्॥ स्थिरा, आयुधा–उभयोः शेर्लोपः। पराणुदे–णुद प्रेरणे, क्विप्, उपसर्गादसमासेऽपि णत्वम्। वीळु–वीळृनि, विभक्तेर्लुक्। प्रतिष्कभे–स्कम्भुः सौत्रो धातुः, संपदादिलक्षणो भावे क्विप्। पनीयसी–पनतिः स्तुतिकर्मा, औणादिकः असुन्, तत ईयसुनि टेर्लोपः, ङीप्। मायिनः–मत्वर्थीय इनिः॥

तृतीयामृचमाह—

परा ह यत्स्थिरं हथ नरो वर्तयथा गुरु।
वि याथन वनिनः पृथिव्या व्याशाः पर्वतानाम् ॥३॥

परा ह यत् स्थिरं हथ नरः वर्तयथ गुरु वि याथन वनिनः पृथिव्याः वि आशाः पर्वतानाम् ॥

हे नरः नेतारः मरुतः, यत् यदा स्थिरम् वस्तु परा ह हथ पराहतं कुरुथ, गुरु दुर्भरं अलघु वस्तु वर्तयथ प्रेरयथ तदा पृथिव्याः संबन्धिनः वनिनः वनवतः पृथिवीरुहान् वियाथन वियुज्य गच्छथ, पर्वतानाम् सानुमतां आशाः पार्श्वदिशः वि वियाथनेति संबन्धः। अत्र 'स्थिरं' वृक्षादिकं 'गुरु' पाषाणादिकं इति मन्यते सायणः। मन्त्रे तु रहस्यार्थद्योतनाय 'इदं स्थिरं इदं गुरु' इत्यनुक्त्वा, उत्तरार्धे च स्थिरा पृथिवी गुरवः पर्वता इति पूर्वार्धश्रुतस्थिरगुरुशब्दक्रमानुसारेण बोधनीयतया विसृष्टम्। एवं मरुतां पृथिव्यां अन्नमयभुवि प्रवेशः अन्नमयशरीरसंभृतानां वननीयानां सुखानां द्वारेण

साध्यो भवति। ततः उपर्युपरि अवस्थितैः पर्वभिः युक्तानां पर्वतानां आशाः प्रदेशाः अन्नमयप्राणमयाद्याः ऊर्ध्वकक्ष्याः मरुद्भिः प्रवेश्या भवन्ति॥ याथन-थनादेशः। अन्ये च गताः॥

चतुर्थीमृचमाह—

नहि वः शत्रुर्विविदे अधि द्यवि न भूम्यां रिशादसः।
युष्माकमस्तु तविषी तना युजा रुद्रासो नू चिदाधृषे॥४॥

नहि वः शत्रुः विविदे अधि द्यवि न भूम्याम् रिशादसः युष्माकम् अस्तु तविषी तना युजा रुद्रासः नु चित् आऽधृषे॥

हे रिशादसः हिंसकानां भक्षकाः शत्रुनाशनाः, अधि द्यवि द्युलोकस्योपरि वः युष्माकं शत्रुः नहि विविदे न विद्यते, न भूम्याम् पृथिव्यामपि शत्रुर्न भवति। हे रुद्रासः रुद्राः रुद्रसंबन्धिनः भयङ्कराः मरुतः, युष्माकम् गणात्मकानां सर्वेषां युजा योगेन परस्परसङ्गत्या आधृषे सर्वतः शत्रूणां धर्षणाय तविषी बलं नु चित् क्षिप्रमेव तना अस्तु विस्तृता भवतु, प्रकटिता भवतु॥ विविदे-विद सत्तायाम्-लडर्थे लिट्। रिशादसः-रिश हिंसायाम्, अद भक्षणे, रिशान् अदन्ति इति रिशादसः, असुन्। युजा-युजिर् योगे-क्विन् ऋत्विगित्यादिना। अन्ये गताः॥

पञ्चमीमृचमाह—

प्र वेपयन्ति पर्वतान्वि विञ्चन्ति वनस्पतीन्।
प्रो आरत मरुतो दुर्मदा इव देवासः सर्वया विशा॥५॥

प्र वेपयन्ति पर्वतान् वि विञ्चन्ति वनस्पतीन् प्रो इति आरत मरुतः दुर्मदाःऽइव देवासः सर्वया विशा॥

पर्वतान् पृथिवीभृतः, रहस्यपक्षे प्रागुक्तलक्षणान् प्रवेपयन्ति प्रकर्षेण कम्पयन्ति मरुतः। तथा वनस्पतीन् महीरुहान् विविञ्चन्ति वियुक्तान् सान्तरान् कुर्वन्ति। अत्रापि 'परा ह यत्' इत्यत्र व्याख्यातमनुसंधेयम्। हे देवासः, देवाः, हे मरुतः, सर्वया विशा प्रजया संयुक्ताः भूत्वा यूयं दुर्मदा इव मदोन्मत्ता स्वेच्छाविहारिण इव प्रो आरत प्रकर्षेण गच्छत।

युष्माभिर्युक्तैः सर्वैरपि भक्तैः सह परिश्रमं कुरुत प्राप्तव्यं प्रति। वेपयन्ति–वेपृ कम्पने–हेतुमण्णिच्। आरत–अर्तेः छन्दसि लोडर्थे लुङ्॥

इति प्रथमस्य तृतीयेऽष्टादशो वर्गः

षष्ठीमृचमाह—

उपो रथेषु पृषतीरयुग्ध्वं प्रष्टिर्वहति रोहितः।
आ वो यामाय पृथिवी चिदश्रोदबीभयन्त मानुषाः ॥६॥

उपो इति रथेषु पृषतीः अयुग्ध्वम् प्रष्टिः वहति रोहितः आ वः यामाय पृथिवी चित् अश्रोत् अबीभयन्त मानुषाः ॥

हे मरुतः, रथेषु युष्मदीयेषु पृषतीः बिन्दुमृगीः वाहनभूताः उपो समीपमेव अयुग्ध्वम् यूयं योजितवन्तः। प्रष्टिः वाहनत्रययुगमध्यवर्ती रोहितः लोहितवर्णः मृगविशेषः वहति नयति रथम्। वः युष्माकं यामाय गमनाय पृथिवी चित् पृथिव्यपि पृथुला भूमिः सर्वापि (अन्तरिक्षमिति एके) आ आभिमुख्येन अश्रोत् अशृणोत् शृणोति, तव गमनं प्रतिपालयतीत्यर्थः। मानुषाः पृथ्वीवर्तिनः पुरुषाः अबीभयन्त स्वयं भीताः भीतिमन्येषां जनयन्ति, तथाविधं वः प्रचण्डगमनम्। पृषत्यो मरुद्वाहा उक्ताः। अत्र तेषां त्रित्वं शरीरप्राणमनस्तत्त्वापेक्षयेति बोध्यम्। रोहितो लोहितवर्णस्तु क्रियाभोगसमर्थप्राणतत्त्वद्योतकं ज्ञेयम्। एवं मरुतां रोहितवाहत्वे प्राधान्यम् भवति॥ उपो–निपातद्वयम्। अयुग्ध्वम्–युजिर् योगे लुङ्। यामाय–यमेर्भावे घञ्। अश्रोत्–शृणोतेः, विकरणस्य लुक् छन्दसि। अबीभयन्त–जिभी भये, ण्यन्ताल्लुङ्। भीस्म्योर्हेतुभये इत्याद्यनेपदम्॥

सप्तमीमृचमाह—

आ वो मक्षू तनाय कं रुद्रा अवो वृणीमहे।
गन्ता नूनं नोऽवसा यथा पुरेत्था कण्वाय बिभ्युषे ॥७॥

आ वः मक्षु तनाय कम् रुद्राः अवः वृणीमहे गन्त नूनम् नः अवसा यथा पुरा इत्था कण्वाय बिभ्युषे॥

हे रुद्राः रुद्रसंबन्धिनो रुद्रकर्माणो मरुतः, तनाय कम् वितनये, अस्मद्विकासविसरायेत्यर्थः (स्थूलपक्षे तनयाय पुत्राय) वः युष्मत्संबन्धि अवः वर्धनं आ सर्वतः मन्नु क्षिप्रं वृणीमहे प्रार्थयामः। यथा येन प्रकारेण पुरा पूर्वं नः अस्माकं अवसा वर्धनेन निमित्तभूतेन यूयं प्राप्तवन्तः, इत्था अनेन प्रकारेण बिभ्युषे भीतियुक्ताय कण्वाय मेधाविने यजमानाय, एतन्नाम्ने मह्यं, अनुग्रहार्थं नूनं गन्त प्राप्नुत॥ मन्नु-संहितायां दीर्घः। तनाय-तनु विस्तारे पचाद्यच्। कम् पादपूरणः। रुद्राः-रोदयन्ति शत्रून्, रोदेर्णिलुक् चेति रक्प्रत्ययः। गन्त-लोटि शपो लुक्, तबादेशः अनुनासिकलोपाभावश्च छान्दसः। बिभ्युषे-बिभेतेर्लिटः क्वसुः॥

अष्टमीमृचमाह—

युष्मेषितो मरुतो मर्त्येषित आ यो नो अभ्व ईषते।
वि तं युयोत शवसा व्योजसा वि युष्माकाभिरूतिभिः॥८॥
युष्माऽइषितः मरुतः मर्त्यऽइषितः आ यः नः अभ्वः ईषते वि तम् युयोत शवसा वि ओजसा वि युष्माकाभिः ऊतिऽभिः॥

हे मरुतः, यः यः कोऽपि अभ्वः बलेन महान्, बलाधिकः, युष्मेषितः युष्माभिः इषितः प्रेरितः, मर्त्येषितः मर्त्यैः मनुष्यैः प्रेरितो वा नः अस्मान् आ ईषते आभिमुख्येन प्राप्नोति अभिगच्छतीत्यर्थः, तम् युष्मदीयबलदर्पितं मानुषबलदर्पितं वा बलिनं शवसा दीप्तेन विसारिणा बलेन वि युयोत वियुक्तं कुरुत। तथा ओजसा देहधारणेन प्राणबलेन वि युयोत। तथा युष्माकाभिः ऊतिभिः युष्मदीयाभिः रक्षाभिश्च वि युयोत॥ सायणस्तु अभ्वः शत्रुः पृषोदरादित्वादभिमतरूपस्वरसिद्धिरिति मन्यते। तथा भक्तैः सह योद्धुं भक्तान् प्रत्येकमभिभवितुं वा मरुतो देवाः शत्रून् प्रेषयन्तीति द्योतितो भावो वैरस्यमावहति अतात्त्विकश्च भवति। मनुष्यतपसो बिभ्यति असूयया देवाः, मनुष्याणां परीक्षायै शत्रून् प्रेषयन्तीत्यादिपुराणकथासु तत्त्वं किमपि अस्ति वेति नेह विचार्यते। इदं त्विह वक्तव्यम्। वेदे मरुतः अन्ये वा देवाः मनुष्यस्य सखायः, न शत्रवः, नापि प्रेषयन्ति शत्रुं मनुष्याभिभूत्यै॥ युष्मेषितः-युष्माभिरिषितः सुब्लुकि प्रत्ययलक्षणेन युष्मदस्मदोरनादेशे इत्यात्वम्। अभ्वः-अभ्वं महन्नाम। ईषते-ईष गतिर्हिंसा-

दर्शनेषु। युयोत—यु मिश्रणे अमिश्रणे च, लोण्मध्यमबहुवचने शपः श्लुः, तबादेशश्च। युष्माकाभिः—युष्मच्छब्दस्य युष्माकादेशः, ङीप् वृद्धिश्च न भवतः छान्दसत्वात् ॥

नवमीमृचमाह—

असामि हि प्रयज्यवः कण्वं दद प्रचेतसः ।
असामिभिर्मरुत आ न ऊतिभिर्गन्ता वृष्टिं न विद्युतः ॥९॥
असामि हि प्रऽयज्यवः कण्वम् दद प्रऽचेतसः असामिऽभिः मरुतः आ नः ऊतिऽभिः गन्त वृष्टिम् न विऽद्युतः ॥

असामि हि संपूर्णमेव यथा भवति तथा प्रयज्यवः प्रकर्षेण यष्टव्याः प्रचेतसः प्रकृष्टज्ञानाः हे मरुतः, कण्वं मेधाविनं, एतन्नामकं वा दद धारयत। असामिभिः पूर्णाभिः ऊतिभिः रक्षाभिः नः अस्मान् प्रति आगन्त आगच्छत। तत्र दृष्टान्तः—विद्युतः वृष्टिम् न विद्युतो यथा वृष्टिं गच्छन्ति तथा यूयमस्मान् आगच्छत ॥ असामि—न सामि, सामि अर्धम्। प्रयज्यवः—यजेः कर्मणि युप्रत्ययः। दद—डुदाञ् दाने लोण्मध्यमबहुवचनस्य लङात्मनेपदप्रथमपुरुषबहुवचनादेशः, आकारलोपादयश्छान्दसाः। प्रचेतसः—प्रकृष्टं चेतो येषां ते। विद्युतः—विद्योतते इति विद्युत् ॥

दशमीमृचमाह—

असाम्योजो बिभृथा सुदानवोऽसामि धूतयः शवः ।
ऋषिद्विषे मरुतः परिमन्यव इषुं न सृजत द्विषम् ॥१०॥
असामि ओजः बिभृथ सुऽदानवः असामि धूतयः शवः ऋषिऽद्विषे मरुतः परिऽमन्यवे इषुम् न सृजत द्विषम् ॥

हे सुदानवः शोभनदानयुक्ताः, मरुतः, असामि पूर्णं ओजः बलं देहे प्राणधारणसमर्थं, बिभृथ धारयथ। हे धूतयः कम्पनकारिणः, असामि पूर्णं शवः अमितो विसारि दीप्तं बलं बिभृथ। परिमन्यवे क्रोधपरिवृताय ऋषिद्विषे मन्त्रदर्शिषु द्वेषं कुर्वते राक्षसादये मानुषाय वा जनाय, तद्विघातार्थं द्विषम् शत्रुं प्रतिवैरिणं सृजत मुञ्चत क्षिपत। इषुम् न बाणमिव, यथा शत्रोरुपरि बाणं मुञ्चति कश्चित् तद्वत् ॥ परिमन्यवे—प्रादिसमासः, मन्युना परिवृतः।

इषुम्—इष गतौ, इष्यति गच्छति लक्ष्यं प्रति। सृजत—सृज विसर्गे। द्विषम्—क्विप्। अन्ये गताः॥

इति प्रथमस्य तृतीय एकोनविंशो वर्गः

अथाष्टमेऽनुवाके पञ्चमं सूक्तम् अष्टर्चं कण्वास्यार्षं बार्हतम्। ब्रह्मणस्पतिदेवताकम्। युजः सतोबृहत्यः अयुजो बृहत्यः॥

उत्तिष्ठेत्यस्य सूक्तस्य व्याख्यानात् प्राक् सूक्ते प्रतिपादितां देवतामधिकृत्येषद् वक्तव्यम्। यद्यपि वेदे वर्णितानां देवतानां नामानि अग्नीन्द्रादीनि पुराणेष्वपि स्मृतानि भवन्ति, तथापि उभयत्र देवतानां स्वरूपव्यापारस्थानादिष्वस्ति भेदः। पुराणेषु वेदप्रतिपादितदेवतानां नामान्यपि कानिचिन्न श्रुतानि भवन्ति, येषामेकं ब्रह्मणस्पतिनाम। ब्रह्मणस्पतेस्तत्त्वे विचार्य निर्धारिते, अयमेव देवो वेषान्तरेण तान्त्रिकयोगग्रथितो मूलाधारचक्रनिलयः परस्या वाचोऽधिदैवतं गणपतिरित्याराधितो योगिभिरित्यसंशयं भवति, एष एव गजमुख ओंकारवदनो गणपतिर्बहुनामतां भजते पुराणेषु। वेदवर्णितमिमं देवमधिकृत्य बहुभ्यो मन्त्रवर्णेभ्यः उद्धृतं सारांशमत्र ब्रूमहे॥

ब्रह्मणस्पतिः बृहस्पतिः ब्रह्मेति त्रीणि नामान्येकां देवतां निर्दिशन्ति। ब्रह्मा इति पुँल्लिङ्गोऽपि शब्दः प्रयुज्यते 'यस्मिन् ब्रह्मा राजनि पूर्व एति' (४.५०.८) 'ब्रह्मणे राजा तमवन्ति देवाः' (४.५०.९)। वेदे ब्रह्म मन्त्रो मन्त्रात्मिका वाक् च भवति। ब्रह्मा तस्याधिदैवतं भवति। वाक् स्रष्ट्री विश्वस्य। नैषा आद्या तीव्रतमस्पन्दना ब्रह्माण्डस्य स्थूलजगत एव निष्पादिका भवति, अपितु पिण्डाण्डे हृदये सहजावबोधाद्वा अन्तर्दृष्टस्यार्थस्य शब्दात्मकतया आविष्कर्त्री शक्तिश्च भवति। एवमाविष्कृतोऽर्थवान् नादात्मा ब्रह्मपदवेदनीयो वेदमन्त्रो भवति। सैषा मूलतश्छान्दसी वाक्, यया विश्वसृष्टिरन्तर्बहिर्वा प्रवर्तिता अनवरतं प्रवर्त्यते चेति बोध्यम्॥

यद्यपि चिन्मयमखण्डं "स्वधया तदेकं" वेदान्तभाषया सच्चिदानन्दं परस्मिन् धामनि स्वतः स्वस्मिंश्च विश्वं धत्त एव, तथापि इह अधस्ताद्रात्रिपदलक्षिते तमसि तमसा गूढं सर्वं प्रविश्य अचित्तिभ्यः अद्भ्यः 'अप्रकेतात् सलिलात्' जगतोऽर्थानां उद्धाराय व्यक्ततामापाद्य स्वमहिम्ना यथायथं तानूर्ध्वमुन्नेतुमाविष्कुरुते। तथा आविष्कर्तृ प्रज्ञानं 'सुप्रकेतम्' च वागात्मकं ब्रह्मशब्देन व्यवहियते। एवं इत ऊर्ध्वं उद्यन्नात्मा यः पुरुषो मनुष्ये वर्तते, स ब्रह्मा भवति देवस्य पुरुषस्यैव तथा ज्ञानशक्त्यात्मना आविर्भावात्। देवस्यायं विभवो

यदा ब्रह्मशब्दवाच्यो भवति, तदा वाचा प्रकाशितां पुरुषगतां दिव्यशक्तिं स विशेषतो लक्षयति, न तु वाचो वैशिष्ट्यस्य प्राधान्यम्। एष एव आविष्कृतस्वात्मशक्तिः दिव्यो विभवः अन्नमयादूर्ध्वभूकक्ष्यायां प्रबोधवति मानुषे पुरुषे निर्मिमाणो ब्रह्माख्या छन्दोमयी वागुच्यते, अस्याः पतिः बृहस्पतिः। अनेन नाम्ना स्रष्टृयाः वाचः प्राधान्यं विशेषतो द्योत्यते, न तु तथा सा देवशक्तिः या प्रागुक्तलक्षणाया वाचोऽप्याधारभूता भवति। एवमेव एव देवताविशेषः अंशद्वयबोधकत्वाद्धेतोः ब्रह्मबृहस्पतिनामभ्यां निर्दिश्यते। यद्यप्युभयोः सूक्ष्मो विशेषस्तत्र तत्र मन्त्रार्थानुसन्धानबलाद् ग्राह्यः, तथापि उभयोः एकदेवतानिर्देशकत्वं संबन्धकत्वं समीकरणं च ब्रह्मणस्पतौ युक्तानि भवन्ति। एवं त्रीणि नामानि एकां देवतामभिदधत इत्युक्तं भवति। इदं च गार्त्समदसूक्तेभ्यः (२. २३-२६) वामदेवसूक्तात (४. ५०) अन्यतश्च स्फुटं लक्ष्यते॥

बृहस्पतिर्ज्ञानगर्भितां छन्दोमयीं वाचं उत्तमपदप्रज्ञानाविष्कारिणीं देवेभ्यो दिशति विशेषत इन्द्राय। स हि राजा त्रैलोक्यदेवानां, दैव्यस्य मनसस्पतिः। आङ्गिरसतत्त्वविचारे बृहस्पतेराङ्गिरसत्वं इन्द्रसाहाय्यकारित्वादीनि चोक्तानि। यथा अग्नेर्मरुतां इन्द्रस्य वा कार्येषु अङ्गिरसां मुख्यं कृत्यं वर्ण्यते वेदेषु, तथा बृहस्पतेरपीति ज्ञेयम्। अत एव मरुद्भिः इन्द्रेण वा सह ब्रह्मणस्पतिः स्तूयते। ब्रह्मणस्पतिर्मनुष्यस्यान्तः सुप्त इव स्थितः उत्थानाय प्रार्थ्यते प्रथममस्मिन् सूक्ते, तस्य ब्रह्मणो महिम्ना मरुतः सूनृता वाक् इन्द्रो मित्रो वरुणोऽर्यमेत्यन्ये च देवा यजमाने लब्धस्थाना भवन्ति, यजमानस्यान्तः स्वयं निवासं च धत्ते स देव इत्यादि चावगम्यते॥

तस्यास्य सूक्तस्य प्रथमामृचमाह—

उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे।
उप प्र यन्तु मरुतः सुदानव इन्द्रं प्राशूर्भवा सचा॥१॥

उत् तिष्ठ ब्रह्मणः पते देवऽयन्तः त्वा ईमहे उप प्र यन्तु मरुतः सुऽदानवः इन्द्रं प्राशूः भव सचा॥

हे ब्रह्मणस्पते एतन्नामक देव, उत्तिष्ठ उत्थानं कुरु, त्वदीयगुप्तिस्थानात् व्यक्तीभूयोद्गच्छ। देवयन्तः देवकामाः वयं त्वा त्वां ईमहे प्रार्थयामहे। सुदानवः शोभनदानोपेताः

मरुतः उप प्रयन्तु समीपे प्रकर्षेण गच्छन्तु। हे इन्द्र, प्राशुः प्रकर्षेण शीघ्रो भव, सचा ब्रह्मणस्पतिना सह गमनाय॥ प्राशुः-(सोमस्य) प्राशको (वृत्रस्य) हिंसको वेति सायणः। प्रकर्षेण शीघ्र इति उवटः। आशु शब्दे दीर्घश्छान्दस इति महीधरः। आशु विलम्बाभावमात्रे क्लीबं, तद्विशिष्टद्रव्यपरत्वे त्रिलिङ्गम्। तस्मात् शीघ्रो भवेत्येव गृहीतमस्माभिः दीर्घस्तु छान्दसः। सोमप्राशनवृत्रवधप्रस्तावोऽत्र नोपपद्यते। ब्रह्मणस्पतेरुत्थाने अन्येषां देवानां तेन सह गमनं भवतीति हेतोः तेषां क्षिप्रगतिः प्रार्थ्यते॥

द्वितीयामृचमाह—

त्वामिद्धि सहसस्पुत्र मर्त्य उपब्रूते धने हिते।
सुवीर्यं मरुत आ स्वश्व्यं दधीत यो व आचके ॥२॥

त्वाम् इत् हि सहसः पुत्र मर्त्यः उपऽब्रूते धने हिते सुऽवीर्यम् मरुतः आ सुऽअश्व्यम् दधीत यः वः आऽचके॥

हे सहसस्पुत्र, बलस्य पुत्र ब्रह्मणस्पते! सहसस्पुत्र इति अग्नेर्विशेषणं प्रसिद्धं वेदे। अवस्थाविशेषेषु अग्निसाहचर्यात् अग्निकार्यकारित्वात् अग्निविशेषणमुपपद्यते। एवमुत्तरत्र "वज्रिणः" इति इन्द्रकार्यकारितया इन्द्रविशेषणं ब्रह्मणस्पतेः प्रयुक्तम्। मर्त्यः मनुष्यः हिते धने निहिते गुप्तं निक्षिप्ते धने गवाश्वादिरूपे चित्प्रकाशप्राणबलादौ प्राप्तव्यतया निमित्तभूते सति, त्वामित् त्वामेव उपब्रूते हि अन्तिके वक्तव्यं वक्ति खलु, लब्धव्यं धनं लम्भय नः इति प्रार्थयते हि। हे मरुतः, ब्रह्मणस्पतिसहायान् वः युष्मान् यः यो मर्त्यः आ चके स्तौति, सः स्वश्व्यम् शोभनाश्वयुक्तं सुवीर्यम् शोभनवीर्योपेतं च धनं दधीत धारयेत्॥ हिते-दधातेर्निष्ठायां हिरादेशः। सुवीर्यम्-शोभनं वीर्यं यस्य तत्। स्वश्व्यम्-अश्वानां समूहः, समूहार्थे छप्रत्ययः। आचके-कै शब्दे लडर्थे लिट्॥

तृतीयामृचमाह—

प्रेतु ब्रह्मणस्पतिः प्र देव्येतु सूनृता।
अच्छा वीरं नर्यं पङ्क्तिराधसं देवा यज्ञं नयन्तु नः ॥३॥

प्र एतु ब्रह्मणः पतिः प्र देवी एतु सूनृता अच्छ वीरम् नर्यम् पङ्क्तिऽराधसम् देवाः यज्ञम् नयन्तु नः॥

ब्रह्मणस्पतिः देवः प्रैतु प्राप्नोत्वस्मान् । सूनृता देवी शुभसत्यरूपा वाग्देवता प्रैतु अस्मान् प्राप्नोतु । देवाः ब्रह्मणस्पतिप्रमुखाः वीरम् वीरवन्तमिति मतुबर्थे, वीर्ययुक्तमित्यर्थः नर्यम् नरेभ्यो नेतृभ्यो हितम् पङ्क्तिराधसम् पङ्क्तिसमृद्धं राधो यस्य तम्, बहुविधधनसन्ततियुक्तमित्यर्थः, तादृशं यज्ञम् नः अस्मान् अच्छ आभिमुख्येन नयन्तु प्रापयन्तु । देवानां प्रसादाद्वयं उक्तलक्षणयज्ञसमृद्धाः स्यामेत्युक्तम् ॥ पङ्क्तभी राध्नोतीति पङ्क्तिराधास्तं पङ्क्तिराधसमिति सायणः ॥

चतुर्थीमृचमाह—

यो वाघते ददाति सूनरं वसु स धत्ते अक्षितिं श्रवः ।
तस्मा इळां सुवीरामा यजामहे सुप्रतूर्तिमनेहसम् ॥४॥
यः वाघते ददाति सूनरम् वसु सः धत्ते अक्षिति श्रवः तस्मै इळाम् सुवीराम् आ यजामहे सुऽप्रतूर्तिम् अनेहसम् ॥

यः यो यजमानः भक्तः वाघते मन्त्रमुच्चारयते आत्मार्थध्यानानि वाचा आविष्कुर्वते ब्रह्मणस्पतये सूनरम् सुष्ठु नेतव्यं वसु धनं (स्वीयं सत्त्वं) ददाति समर्पयति, सः अन्तर्याजी भक्तः अक्षिति क्षयरहितं श्रवः अन्तःश्रवणं दिव्यावेशवाचमित्यर्थः धत्ते धारयति । अत्र वाघत् ब्रह्मणस्पतिरेव भवति, 'प्र नूनं ब्रह्मणस्पतिर्मन्त्रं वदति' इति स्पष्टमुक्तमुत्तरस्यामृचि। अन्तर्यागे यदा यजमाने ब्रह्मणस्पतिरुत्थितो भवति यजमानवसु च स्वीकुरुते, तदा स एव मन्त्रवाचमुच्चारयति यजमानार्थम्, करोति च तं अक्षयान्तःश्रुतिसम्पन्नम् । तस्मै तादृशाय पुण्यपुरुषाय तदनुग्रहार्थं इळाम् एतन्नाम्नीं पश्यन्तीं वाचं आ यजामहे सर्वतो यजामः वयं देवकामा ऋषयः । कीदृशीं इळाम् ? सुवीराम् शोभनवीर्यसम्पन्नां सुप्रतूर्तिम् सुष्ठु प्रकर्षेण वेगवतीं हिंसाकारिणीं शत्रूणामिति शेषः । अनेहसम् केनाप्यहिंस्याम् ॥ सुप्रतूर्तिम्—तुर्वी हिंसायाम् । सूनरम्—सुखेन नीयते, खल्, निपातस्य चेति उपसर्गस्य दीर्घत्वम् । अक्षिति—क्षयो नास्त्यस्येति । श्रवः—श्रूयत इति श्रवः, असुन् । सुप्रतूर्तिम्—तुर्वी हिंसायाम्, प्रपूर्वादस्माद्भावे क्तिन्, शोभना प्रतूर्तिर्यस्याः सा । अनेहसम्—न हन्यत इत्यनेहाः—धातोः एह आदेशः ॥

पञ्चमीमृचमाह—

प्र नूनं ब्रह्मणस्पतिर्मन्त्रं वदत्युक्थ्यम् ।
यस्मिन्निन्द्रो वरुणो मित्रो अर्यमा देवा ओकांसि चक्रिरे ॥५॥

प्र नूनम् ब्रह्मणः पतिः मन्त्रम् वदति उक्थ्यम् यस्मिन् इन्द्रः वरुणः मित्रः अर्यमा देवाः ओकांसि चक्रिरे ॥

ब्रह्मणस्पतिः देवः उक्थ्यम् शस्त्रयोग्यं (शस्त्रं शंसनम्) मन्त्रम् नूनम् अवश्यं वदति प्रकर्षेण ब्रूते । यस्मिन् मन्त्रे, ब्रह्मणस्पतिसाधितवागाविष्कारे देवाः इन्द्रादयः ओकांसि स्थानानि चक्रिरे कृतवन्तः । के ते देवाः ? इन्द्रः मित्रः वरुणः अर्यमा इत्येते । ब्रह्मणस्पतिना उदीरिते मन्त्रे देवाः स्वीयाधारस्थानानि कृत्वा यजमानं पुरुषमनुग्रहीतुं प्रसन्ना भवन्तीत्यर्थः ॥

इति प्रथमस्य तृतीये विंशो वर्गः

षष्ठीमृचमाह—

तमिद्वोचेमा विदथेषु शंभुवं मन्त्रं देवा अनेहसम् ।
इमां च वाचं प्रतिहर्यथा नरो विश्वेद्वामा वो अश्नवत् ॥६॥

तम् इत् वोचेम विदथेषु शम्ऽभुवम् मन्त्रं देवाः अनेहसम् इमाम् च वाचम् प्रतिऽहर्यथ नरः विश्वा इत् वामा वः अश्नवत् ॥

हे देवाः, तमित् तमेव इन्द्रादिदेवानां प्रादुर्भावस्थानभूतं ब्रह्मणस्पतिविभवं मन्त्रम् विदथेषु ज्ञानागमेषु यजनेषु वोचेम ब्रवाम । कीदृशं मन्त्रम् ? शंभुवम् सुखस्य भावयितारम्, अनेहसम् अहिंसनीयम् निर्दोषमित्यर्थः । हे नरः नेतारो देवाः, इमां च अस्माभिरुच्यमानां वाचम् स्तुतिं च प्रतिहर्यथ कमनीयां कान्तिमतीं कुरुत, ब्रह्मणस्पतिप्रयुक्तायाः दिव्यायाः मन्त्रवाचः प्रतिध्वनिभूतां प्रतिबिम्बवद्वा निष्पन्नां इमामस्मदीयां वाचं शोभायुक्तां विधत्तेत्यर्थः । विश्वा इत् सर्वापि वामा वननीया संभजनीया वाक् वः युष्मान् अश्नवत् प्राप्नोतु ॥ वोचेम–वचधातोराशीर्लिङ्, छान्दसम् । विदथेषु–विद ज्ञाने, गतम् । शम्भुवम्–भवतेरन्तर्भावितण्यर्थात् क्विप् । प्रतिहर्यथ–हर्य गतिकान्त्योः । अश्नवत्–अशू व्याप्तौ, लेटि आडागमः ॥

सप्तमीमृचमाह—

को देवयन्तमश्नवज्जनं को वृक्तबर्हिषम् ।
प्रप्र दाश्वान्पस्त्याभिरस्थितान्तर्वावत्क्षयं दधे ॥७॥

कः देवऽयन्तम् अश्नवत् जनम् कः वृक्तऽबर्हिषम् प्रऽप्र दाश्वान् पस्त्याभिः अस्थित अन्तःऽवावत् क्षयम् दधे ॥

देवयन्तम् देवान् कामयमानं जनम् मनुष्यं कः ब्रह्मणस्पतिमन्तरा को वान्यो देवः अश्नवत् प्राप्नुयात् ? तथा वृक्तबर्हिषम् देवार्थं कृतासनसन्नाहं जनं कः को वान्योऽश्नवत् इति संबन्धः । दाश्वान् दत्तवान् यजमानः पस्त्याभिः गोनिवासस्थानैः द्वारा (पस्त्यं गृहनाम, गोष्ठेऽपि वर्तते) चिद्रश्मिस्थानभूमिकानां द्वारेणेति भावः, प्रास्थित प्रस्थितवान् । तथा प्रस्थाय अन्तर्वावत् अन्तर्गतवस्तुसम्पन्नं क्षयम् निवासस्थानं दधे धृतवान् । यजमानः 'पस्त्याभिः' ऋत्विग्भिः सह प्रस्थाय बहुपुत्रपौत्रादिसम्पन्नं गृहं दधे इति स्थूलं व्याचष्टे सायणः ॥ 'पस्त्याभिः' 'अन्तर्वावत्' इति शब्दद्वयार्थे निर्धारिते सूक्ष्मोऽर्थः सुगमः स्यात् । पस्त्याभिः प्रजाभिः ऋत्विग्भिरिति चेत् ताः प्रजाः दैव्याः, न मानुष्याः इति ग्राह्यम् । अन्तर्वावत्–अन्तर्वाति गच्छतीति अन्तर्वाः, अन्तर्गतं अन्तःस्थितं वा वस्तु, ततो मतुप्, मतोर्वः । यस्मिन् क्षये अन्तरे सर्वस्वभूतं वस्तु विद्यते तं वासस्थानं 'दधे' धारयितुं प्रभुरभवद्यजमानः । देवयन्तमित्यादयो गताः । प्रप्रेति द्विर्भावः पादपूरणः ॥

अष्टमीमृचमाह—

उप क्षत्रं पृञ्चीत हन्ति राजभिर्भये चित्सुक्षितिं दधे ।
नास्य वर्ता न तरुता महाधने नार्भे अस्ति वज्रिणः ॥८॥

उप क्षत्रम् पृञ्चीत हन्ति राजऽभिः भये चित् सुऽक्षितिम् दधे न अस्य वर्ता न तरुता महाऽधने न अर्भे अस्ति वज्रिणः ॥

ब्रह्मणस्पतिः क्षत्रम् बलं उप पृञ्चीत स्वात्मनि संपृक्तं कुर्यात् । ततो राजभिः इन्द्रादिभिः सह हन्ति मारयति देवशत्रून् । भये चित् भीतिहेतौ वर्तमानेऽपि सुक्षितिम् सुष्ठु

वासं दधे धारयति निवासं स्थैर्येण। महाधने महति धने लब्धव्यतया निमित्तभूते अर्भे अल्पे वा वस्तुनि प्राप्तव्ये अस्य ब्रह्मणस्पतेः वज्रिणः वज्रवतो दृढायुधस्य सहसस्पुत्रवत् (वज्रिविशेषणस्य तात्पर्यं प्रागुक्तं स्मार्यम्) वर्ता प्रवर्तयिता न अस्ति, न तरुता तरणस्य उल्लङ्घनस्य कर्ता नास्ति। द्विविधोऽपि न नास्ति॥ पृश्चीत—पृची संपर्के, रुधादिः, लिङ्। सुक्षितिः—शोभना क्षितिः। वर्ता—वर्ततेर्वृणोतेर्वा, इडभावश्छान्दसः। तरुता—तरतेः, तृचि उडागमो निपातितः॥

इति प्रथमस्य तृतीय एकविंशो वर्गः

यं 'रक्षन्ती'ति नवर्चं षष्ठं सूक्तं गायत्रम्। घोरपुत्रः कण्व ऋषिः। यद्यपि सर्वं सूक्तं आदित्यदेवताकं भवति मित्रादीनामप्यादित्यत्वात्, तथापि पूर्वे "आद्यान्तयोस्तृचयोः वरुण-मित्र-अर्यमणो देवताः मध्यतृचस्य 'सुगः पन्था' इत्यस्य आदित्या देवता" इत्याहुः। सामान्यत आदित्या विशेषतो मित्रादय इति तत्र कारणं बोध्यम्॥

तत्र प्रथमामृचमाह—

यं रक्षन्ति प्रचेतसो वरुणो मित्रो अर्यमा।
नू चित्स दभ्यते जनः॥१॥

यम् रक्षन्ति प्रऽचेतसः वरुणः मित्रः अर्यमा नु चित् सः दभ्यते जनः।

प्रचेतसः प्रकृष्टज्ञानाः वरुणः मित्रः अर्यमा एते देवाः यम् रक्षन्ति, स जनः यजमानः नुचित् क्षिप्रमेव दभ्यते दभ्नोति हिनस्ति। दमयति वा शत्रून्॥ नुचित्—ऋचित् नु धेत्यादिना दीर्घः। दभ्यते—व्यत्ययेन श्यन् आत्मनेपदं च॥

द्वितीयामृचमाह—

यं बाहुतेव पिप्रति पान्ति मर्त्यं रिषः।
अरिष्टः सर्व एधते॥२॥

यम् बाहुताऽइव पिप्रति पान्ति मर्त्यम् रिषः अरिष्टः सर्वः एधते॥

यम् यजमानं पिप्रति पूरयन्ति पूर्वोक्ताः देवा इति शेषः। केन पूरयन्ति ? व्याख्यातृपक्षानुसारेणाध्याहारः "धनै" रिति, बलेन ऐश्वर्येण वेत्युपपद्यते। देवाः स्वयं पूरयन्ति इत्युपपन्नतमम्। तत्र दृष्टान्तः—बाहुता इव बाहुता भावे तल्, समूहार्थे वा, यथा स्वीया बाहुशालिता मर्त्यं पूरयति स्वत्वेन स्वबलेन बलसमृद्ध्या वा, तथा वरुणादयो देवा यं मर्त्यं स्वयं पूरयन्ति, पान्ति तथा पूरणेन पान्ति रक्षन्ति रिषः हिंसकात्, स सर्वः तादृशः सर्वोऽपि मर्त्यो यजमानः अरिष्टः अहिंसितः सन् एधते वर्धते॥ पिप्रति—पिपर्तेः पूरणार्थात् प्रथमपुरुषबहुवचनान्तः, जुहोत्यादिः। पान्ति—पा रक्षणे। रिषः—रिष हिंसायाम्, क्विप्, पञ्चम्येकवचनम्। अरिष्टः—रिष हिंसायाम्, कर्मणि क्तः, एकाच इति इट्प्रतिषेधः॥

तृतीयामृचमाह—

वि दुर्गा वि द्विषः पुरो घ्नन्ति राजान एषाम्।
नयन्ति दुरिता तिरः॥३॥
वि दुःऽगा वि द्विषः पुरः घ्नन्ति राजानः एषाम् नयन्ति दुःऽइता तिरः॥

एषाम् पूर्वोक्तविधानां यजमानानां पुरः पुरस्तात् राजानः वरुणादयः दुर्गा दुःखेन गन्तुं शक्यानि शत्रूणां नगराणि विघ्नन्ति विशेषेण नाशयन्ति। तथा द्विषः शत्रूनपि विघ्नन्ति। दुरिता दुरितानि यजमानसंबन्धीनि तिरो नयन्ति विनाशं प्रापयन्ति॥ दुर्गादयो गताः॥

चतुर्थीमृचमाह—

सुगः पन्था अनृक्षर आदित्यास ऋतं यते।
नात्रावस्वादो अस्ति वः॥४॥
सुऽगः पन्थाः अनृक्षरः आदित्यासः ऋतम् यते न अत्र अवऽस्वादः अस्ति वः॥

हे आदित्यासः आदित्याः, ऋतम् सत्यं प्रति यते गच्छते भवद्वृन्दाय पन्थाः मार्गः सुगः सुष्ठु गन्तुं शक्यः अनृक्षरः कण्टकवर्जितश्च भवति। अत्र अस्मदीयेऽस्मिन् यजने वः युष्माकं अवस्वादो अवमः स्वादो नास्ति न विद्यते, दीयमानं सर्वं भोग्यमेव भवतां, न किमपि जघन्यरसमित्यर्थः॥ सुगः—सुदुरोरधिकरणे डप्रत्ययः। अनृक्षरः—ऋक्षरः कण्टकः। यते—इण् गतौ, अदादिः, शतरि चतुर्थ्येकवचनम्॥

पञ्चमीमृचमाह—

यं यज्ञं नयथा नर आदित्या ऋजुना पथा।
प्र वः स धीतये नशत्॥५॥

यम् यज्ञम् नयथ नरः आदित्याः ऋजुना पथा प्र वः सः धीतये नशत्॥

हे नरः आदित्याः, यम् यज्ञम् ऋजुना पथा अञ्जसा मार्गेण यूयं नयथ गन्तव्यं प्रापयथ, सः यज्ञः वः युष्माकं धीतये पोषणाय, भोगाय, प्रणशत् प्राप्नोति लडर्थे लेट्॥ धीयते—धेट् पाने क्तिच्, पानायेति सायणः, तर्हि भोगायेति ग्राह्यम्। धीरिव धीतिशब्दोऽपि दधातेः निष्पाद्यः, तर्हि धारणाय पोषणाय वेत्यर्थः। नशत्—नशतिर्गत्यर्थः, लेट्। 'ऋजुना पथा' इत्यत्र यज्ञयात्रामार्गस्य अवक्रता आञ्जस्यं आदित्यैः सम्पाद्यत इति ज्ञेयम्॥

इति प्रथमस्य तृतीये द्वाविंशो वर्गः

षष्ठीमृचमाह—

स रत्नं मर्त्यो वसु विश्वं तोकमुत त्मना।
अच्छा गच्छत्यस्तृतः॥६॥

सः रत्नम् मर्त्यः वसु विश्वम् तोकम् उत त्मना अच्छ गच्छति अस्तृतः॥

हे आदित्याः, स तादृशः मर्त्यः भवदनुग्रहपात्रं यजमानः अस्तृतः अहिंसितः रत्नम् रमणीयं हर्षाधायकं विश्वं वसु सर्वं धनं लौकिकमलौकिकं च अच्छ आभिमुख्येन गच्छति प्राप्नोति। उत अपि च त्मना आत्मना तोकम् अपत्यं गच्छति, स्वकैभवेन सन्ततिं

प्राप्नोति। तादृशस्तस्य प्रभावः येन स्वयं विस्तृतो भूत्वा स्वं तेजोऽन्यत्र सङ्क्रमय्य स्वसदृशं सृजतीत्यर्थः॥ त्मना–आङि आदेरात्मनः आकारलोपो मन्त्रेषु। अस्तृत–स्तृञ् हिंसायाम्॥

सप्तमीमृचमाह—

कथा राधाम सखायः स्तोमं मित्रस्यार्यम्णः।
महि प्सरो वरुणस्य॥७॥

कथा राधाम सखायः स्तोमम् मित्रस्य अर्यम्णः महि प्सरः वरुणस्य॥

हे सखायः समानोद्योगाः सुहृदः, सखिभूतानां देवानामादित्यानामेव वा संबोधनम्। युष्मासु विशिष्टानां मित्रादीनां, मित्रस्य अर्यम्णः वरुणस्य च महि महत् प्सरः भक्षणं आहारभूतं स्तोमम् स्तोत्रं कथा राधाम कथं साधयामः? स्तोत्रं हि देवानामाराधनं, स्तुत्या हि देवताः वर्धन्ते। तस्माद्वर्धनहेतुं स्तोमं भक्ष्यस्थानीयमाहुः। "देवप्सरस्तमं वचः" (१. ७५. १) इत्यत्र सायणः 'देवानां प्रीणयितृतमं' वच इति व्याचष्टे। अत्रापि प्सातेर्भक्षणार्थादेव निष्पादयति। किंतु 'प्सरो रूपं अतस्तदनुरूपं स्तोमं' कथा राधाम इत्याह। तदनुरूपमित्यमूलम्। प्सरो रूपं चेत् स्तोमो मन्त्र एव रूपं शरीरं वरुणादीनां देवानामिति व्याख्याय, तादृशं देवानां शरीरभूतं स्तोमं कथं साधयाम इति भावो वक्तव्यः। प्सरो भक्षणमित्युक्तमेव साधीयः॥ कथा–था हेतौ च च्छन्दसि। राधाम–राध साध संसिद्धौ, लेटि विकरणस्य लुक्। महि–मह पूजायां औणादिक इन्प्रत्ययः। प्सरः–प्सा भक्षणे औणादिको डरप्रत्ययः॥

अष्टमीमृचमाह—

मा वो घ्नन्तं मा शपन्तं प्रति वोचे देवयन्तम्।
सुम्नैरिद्व आ विवासे॥८॥

मा वः घ्नन्तम् मा शपन्तम् प्रति वोचे देवऽयन्तम् सुम्नैः इत् वः आ विवासे॥

हे मित्रादयो देवाः, देवयन्तम् देवकामं यजमानं यो हन्ति तं घ्नन्तम् हिंसितारं वः युष्मभ्यं मा प्रति वोचे न कथयामि प्रतीकारेच्छया। तथा शपन्तम् यो यजमानं देवकामं शपति शत्रुः तमपि मा प्रति वोचे। कुतः ? नेदमावश्यकं भवति मम कर्तव्यं वा युष्मासु यजमानयोगक्षेमधुरंधरेषु परीक्षणविचारणशिक्षणाद्यधिकारिषु जाग्रत्सु। तर्हि किं करोमि ? वः युष्मान् सुम्नैरित् सुखमयैः स्तोत्रैरेव आविवासे प्रकाशयामि, परिचरामि वा निरुक्तानुसारतः ॥

नवमीमृचमाह—

चतुरश्चिद्ददमानाद्बिभीयादा निधातोः।
न दुरुक्ताय स्पृहयेत् ॥९॥

चतुरः चित् ददमानात् बिभीयात् आ निऽधातोः न दुःऽउक्ताय स्पृहयेत् ॥

प्रथमं सायणमनुसृत्य मन्त्रार्थमुक्त्वा अनन्तरं अस्मदीयमाचक्ष्महे। दुरुक्ताय न स्पृहयेत् दुष्टं वाक्यं न कामयेत, दुष्टं प्रतिवचो न दद्यात्। किं तु दुरुक्ताद्बिभीयात्। अवशिष्टो मन्त्रभागः सर्वोऽपि दृष्टान्तः। चतुरः चित् चतुःसंख्याकान् कपर्दकान् ददमानात् हस्ते धारयतः पुरुषात् अक्षद्यूतं कुर्वतः आ निधातोः कपर्दकनिपातपर्यन्तं अन्यो द्यूतवर्ती पुरुषः बिभीयात् अस्य जयो भविष्यति न वेति भीतो भवेत्, अत्र यथा भयं तथा दुरुक्ताद्भेतव्यमिति धर्मरहस्यम्। इदं सायणीयं तात्पर्यं, अस्याधारः यास्कः। मूले अक्षशब्दो न श्रूयते। चित् उपमार्थीयः गृहीतः। नासाधु तथा ग्रहणम्। किं तु चिदित्येषोऽनेकार्थः। अप्यर्थे वर्तते यच्चिदित्यादौ। 'आचार्यश्चिदिद ब्रूयात्' पूजायाम्। अथास्यां ऋचि पूर्वव्याख्यातारो यजमानस्य दुरुक्ताद् भयस्यावश्यकतां दृष्टान्तेन चमत्कृतां पश्यन्ति॥ नैतद्युक्तं दृश्यते। चित् इह नोपमार्थीयः। चतुरश्चित् चतुरो देवानपि ददमानात् ददतः यजमानाय तदनुग्रहार्थं, आ निधातोः समन्तात् नितरां धारकात् एकस्मादेवदेवात् बिभीयात् उद्विजेत, इमे चत्वारो देवाः मह्यं तेनैकेन निधातुना देवदेवेन दत्ताः मां मा हासिषुः मय्येव तिष्ठन्तु, तान् मे दत्तवतो निधातोः सर्वस्वामिनः शिक्षाधिकारे सति, दुरुक्तस्य प्रतिक्रियां माऽहं कार्षमिति 'निधातो'र्भयं स्यात्। एवं "मा वो

म्नन्त"मिति पूर्वयर्चा अर्थसङ्गतिः। तृतीयपादे न विशेषः। क इमे चत्वारो देवताः? त्रयोऽत्र सूक्ते प्रतिपादिताः मित्रो वरुणोऽर्यमा च। यद्यप्यवशिष्टो भगो नोऽक्तः, तथापीदं देवताचतुष्टयं व्यूहात्मकं वेदे प्रसिद्धम्। प्रागुपन्यस्तम्। (पृ.११०) "अदर्शि गातुः... चक्षुर्भगस्य रश्मिभिः। द्युक्षं मित्रस्य सादनं अर्यम्णो वरुणस्य च..." (१. १३६. २) इति चतुर्णामेकसदनत्वं श्रूयते॥ ददमानात्--दद दाने शानच्। बिभीयात्–बिभेतेर्लिङ्। निधातोः–निपूर्वाद्धातेः भावे तुन्प्रत्ययः, तेन तस्य कर्ता लक्षितः। दुरुक्ताय स्पृहयेत्–संप्रदानसंज्ञायां चतुर्थी, स्पृह ईप्सायाम्, चुरादिरदन्तः॥

इति प्रथमस्य तृतीये त्रयोविंशो वर्गः

अथ सं पूषन्निति दशर्चं सप्तमं सूक्तम्। ऋषिर्घौरः कण्वः गायत्री छन्दः पूषा देवता। आदित्यानामेकः पूषा कीर्त्यते। पृथिव्यभिमानीति सायणः तैत्तिरीयश्रुतिबलदाह। 'पूषाध्वनः पात्वित्याह, इयं वै पूषा' 'इयं वै पूषा इयं हीदं सर्वं पुष्यति यदिदं किञ्चे'ति। सर्वथा पोषकत्वात् पूषा। यद्यपि सर्वेषां देवानामूर्ध्वमायतनं भवति, तथापि तेषां मुख्यं स्थानं कार्यक्षेत्रं वा भिद्यत इति बोध्यम्। एवं दैव्यस्य मनसस्पतेरिन्द्रस्य तृतीयं स्थानं स्वराख्यम्। अग्निः सन्निहितोऽस्माकं पृथिव्याम्। मरुतः प्राणभृतो मध्यमस्थानाः। एवमन्ये च देवाः तत्तत्स्थानमधिष्ठाय स्वीयानि कृत्यानि निर्वहन्ति। पूषा त्वादित्यस्तृतीयस्थानोऽपि मातुः पृथिव्याः पतिर्दिधिषुः पोषकः, एतदर्थं पृथिवीस्थानो वक्तव्यः। यदात्र बहिः पृथिवीक्षेत्रं अन्तः पृथिवीचिर्ति च स्वीयादित्यविभवेन पुष्णन् स्वयं च पोषं प्राप्तः प्रादुर्भवति, तदा तदनु प्रज्ञानप्रभातलक्षणा उषोदेवी जायते। ततोऽयं अश्विनोः सूर्यायाः उषसः परिग्रहे, तौ अश्विनौ स्वीयस्योत्तरोत्तरपोषस्य विधायकौ आरोग्यप्रदौ पितृत्वेन वृणोति। पातृत्वाद्धि पिता। एवं पोषितः पूषा आदित्य इन्द्रस्य तेजोबलैश्वर्यादीनां वर्षिता भ्राता भवति। अन्ते पृथिव्याः दिवश्च सुबन्धुर्भवति। एवमुक्तमर्थं ज्ञापयन्तो मन्त्रवर्णाः सन्ति बहव ऋक्संहितायाम्। इह केचनोदाह्रियन्ते॥ "मातुर्दिधिषुमब्रवं स्वसुर्जारः शृणोतु नः। भ्रातेन्द्रस्य सखा मम" (६.५५.५)॥ "पूषा सुबन्धुर्दिव आ पृथिव्या इळस्पतिर्मघवा दस्मवर्चाः। यं देवासो अददुः सूर्यायै कामेन कृतं तवसं स्वञ्चम्" (६.५८.४)॥ "यदश्विना पृच्छमानावयातं... विश्वे देवा अनु तद्वामजानन् पुत्रः पितराववृणीत पूषा" (१०.८५.१४)॥

वृत्रवधात्परमपि पणयोऽसुराः यजमानस्य मार्गं रुन्धन्ति, गाश्चापहरन्ति अन्ये च तादृशाः देवद्विषः ऊर्ध्वगामिनं देवभक्तं पुरुषं प्रत्यक्षमप्रत्यक्षं वा बाधन्ते तद्रोधनाद्यपहारेण मार्गतिरोधानविधिना अमार्गदर्शनेन। अत्रैव पूष्णः कृत्यं विशिष्टं लक्ष्यते। पणीनामसुराणां वणिजामिव व्यवहारिणां व्यवहारः पूष्णि देवे न मूर्च्छति। अयं पथस्पतिः। अनष्टपशुश्च भवति। जीवत्येव यजमाने लोकान्तरमार्गं अधिगन्तुं उद्यते, पूषैव सहकारी देवो भवति। अत्रैते मन्त्रा भवन्ति॥ "अदित्सन्तं चिदाघृणे पूषन् दानाय चोदय। पणेश्चिद् वि म्रदा मनः" (६.५३.३)॥ "परि तृन्धि पणीनामारया हृदया कवे। अथेमस्मभ्यं रन्धय" (६.५३.५)॥ "इमं च नो गवेषणं सातये सीषधो गणम्। आरात् पूषन्नसि श्रुतः" (६.५६.५)॥ "पूषा त्वेतश्च्यावयतु प्रविद्वाननष्टपशुर्भुवनस्य गोपाः" (१०.१७.३)॥ मेधातिथेस्तृचस्य (१.२३.१५) व्याख्यायां यदुक्तं तदप्यवधेयम्। 'देवद्विड्भिः अपहृत्य रहसि निहितं देवानामन्नभूतममृतं सोममाहृत्य यजमानं पुष्णन् ऊर्ध्वलोकविभवान् सोमरसभरितान् पदे पदे पुनः पुनः सम्पाद्य सर्वथा तं सोमसम्पन्नं विधत्ते स एष पौष्णो विभव' इत्युक्तम्॥ 'दिवो धरुणं (सोमं) आजा नष्टं यथा पशुम्... अपगूळ्हं गुहाहितं राजानं (सोमं) अविन्दत् गोभिर्यवं न चकृषत्' (पृ. २४४.२४५) इत्यादयो मन्त्रभागा अत्र प्रमाणम्॥ संपूषन्नित्यस्मिन् अन्यत्र च मन्त्रेषु 'विमुचो नपात्' इति पूषा निर्दिश्यते। प्रथमं तावदस्य विवरणं कर्तव्यम्। विमुञ्चतीति विमुक् (क्विप्) मेघः तस्य नपात् पुत्रः पूषेत्याह सायणः। उपपादयति चैवम्—जलविमोचनहेतोर्मेघस्य पुत्रः पूषा, पृथिव्या एव पूषत्वात्। अद्भ्यः पृथिवीति श्रुतेः अपां सार एव पृथिवी, सैव पूषा भवतीति। अस्त्वेष स्थूलपक्षीयोऽर्थः युक्तोऽयुक्तो वा। अस्मदीयः पूषा तु पोषको यजमानस्य, पृथिव्याश्च। स ज्ञानैश्वर्यतेजोबलादीनां वर्षितुः इन्द्रात्मन आदित्यस्य सन्ततिः, पतिः पाता पृथिव्याः पूर्वज उषसः, भ्रातेन्द्रस्य, यजमानस्य पथस्पतिः मार्गरक्षी, यजमानगवेषणपरायणः, यजनोद्यमप्रचोदनपरश्चेत्यादिगुणविशिष्टो भवतीति बोध्यम्॥

तामेतां सूक्ते प्रथमामृचमाह—

सं पूषन्नध्वनस्तिर व्यंहो विमुचो नपात्।
सक्ष्वा देव प्र णस्पुरः॥१॥

सम् पूषन् अध्वनः तिर वि अंहः विऽमुचः नपात् सक्ष्व देव प्र नः पुरः ॥

हे पूषन् देव, अध्वनः मार्गात् सं तिर सम्यक् प्रापय गन्तव्यं स्थानम्। अंहः दुरितं वितिर विनाशय। हे विमुचो नपात् वर्षितुरिन्द्रात्मन आदित्यस्य पुत्र देव, नः अस्माकं पुरः पुरस्तात् प्र सक्ष्व प्रसक्तो भव ॥ सक्ष्व—षच सेवने, लोट्, शपो लुक्, छन्दसि बहुलम्। प्र णः—नस्य णत्वं, उपसर्गाद्बहुलम् ॥

द्वितीयामृचमाह—

यो नः पूषन्नघो वृको दुःशेव आदिदेशति ।
अप स्म तं पथो जहि ॥२॥

यः नः पूषन् अघः वृकः दुःऽशेवः आऽदिदेशति अप स्म तम् पथः जहि ॥

हे पूषन्, यः प्रतिपक्षी नः अस्मान् आदिदेशति आज्ञापयति इतो गन्तव्यं इतो नेति तम् पथः मार्गात् अपजहि स्म अवश्यमपाकुरु। कीदृशः सः? अघः आहन्ता पापः वृकः ईहामृग इव आच्छिद्य अपहर्ता धनस्य दुःशेवः दुष्टसुखः ॥ यागयात्रायां ईदृशः पापवर्गः मार्गे बाधको वर्तते, तदपसारणं पूष्णो देवस्य सुकरम्, तस्मात्प्रार्थना ॥ वृकः—कुक वृक आदाने इत्यस्मात्, छेदनार्थाद् वृश्चतेर्वा। दुःशेवः दुष्टं शेवं यस्य सः। आदिदेशति—दिश अतिसर्जने, लेट्, छन्दसि शपः श्लुः ॥

तृतीयामृचमाह—

अप त्यं परिपन्थिनं मुषीवाणं हुरश्चितम् ।
दूरमधि स्रुतेरज ॥३॥

अप त्यम् परिऽपन्थिनम् मुषीवाणम् हुरःऽचितम् दूरम् अधि स्रुतेः अज ॥

त्यम् तं पूर्वोक्तविधं परिपन्थिनम् मार्गे प्रत्यवस्थातारं मुषीवाणम् तस्करूपं

हुरश्चितम् कौटिल्यानां सञ्चेतारं सुतेः मार्गात् अधि अधिकं दूरम् दूरस्थानं प्रति अपाज अपगमय ॥ परिपन्थिनम्-"छन्दसि परिपन्थिपरिपरिणौ प्रत्यवस्थातरि" इति शत्रावभिधेये इनिप्रत्ययान्तो निपातितः । मुषीवाणम् मुषीव इति तस्करनाम, मुष स्तेये मोषणं मुषिः औणादिको भावे किप्रत्ययः, मुषिं वनति संभजते मुषीवान्, पूर्वपददीर्घः छान्दसः । हुरश्चितम्-हुर्छा कौटिल्ये, क्विप् सम्पदादिलक्षणः । राल्लोप इति छकारलोपः, हुरश्चिनोति, क्विप्, हुरश्चित्, तम् । सुतेः-सु गतौ । अज-गत्यर्थे अन्तर्भावितण्यर्थः ॥

चतुर्थीमृचमाह—

त्वं तस्य द्वयाविनोऽघशंसस्य कस्य चित् ।
पदाभि तिष्ठ तपुषिम् ॥४॥

त्वम् तस्य द्वयाविनः अघऽशंसस्य कस्य चित् पदा अभि तिष्ठ तपुषिम् ॥

हे पूषन्, त्वम् तस्य उक्तविधस्य दुष्टस्य तपुषिम् अन्यतापकं देहं पदा त्वदीयेन पादेन अभितिष्ठ अभिगम्य तिष्ठ । कीदृशस्य ? द्वयाविनः प्रत्यक्षमप्रत्यक्षं चापहरणं द्विविधम्, तद् द्वयमस्येति द्वयावी, तस्य अघशंसस्य अघं अस्मदनिष्टं शंसतः कस्यचित् कस्यापि विशेषनिर्देशरहितस्य ॥ द्वयाविनः-मत्वर्थीयो विनिः, दीर्घः छन्दसि अन्येषामपि दृश्यते । अघशंसस्य-अघे पापे शंसोऽभिलाषोऽस्य । तपुषि-तापयत्यनेनेति तपुषिः, औणादिकः उषिन्प्रत्ययः ॥

पञ्चमीमृचमाह—

आ तत्ते दस्र मन्तुमः पूषन्नवो वृणीमहे ।
येन पितॄनचोदयः ॥५॥

आ तत् ते दस्र मन्तुऽमः पूषन् अवः वृणीमहे येन पितॄन् अचोदयः ॥

हे मन्तुमः ज्ञानवन्, दस्र शत्रूपक्षयकारिन्, पूषन् क्रियादक्ष, अत्र प्रसक्तौ, कर्मशूरत्वं ज्ञानवत्त्वं च पूष्णः उक्ते । (दर्शनीयेति सायणः) ते त्वदीयं तत् अवः तथाविधं रक्षणं

आ वृणीमहे सर्वतः प्रार्थयामहे । येन रक्षणेन पितॄन् पूर्वान् ऋषीन् अचोदयः प्रेरितवानसि, तत् तथाविधमिति पूर्वेणान्वयः ॥ दस्र-गतः । मन्तुमः--मन ज्ञाने, भावे तुप्रत्ययः, मन्तुर्ज्ञानमस्येति मन्तुमान्, संबुद्धौ मतुवसोरिति रुत्वम् ॥

इति प्रथमस्य तृतीये चतुर्विंशो वर्गः

षष्ठीमृचमाह—

अधा नो विश्वसौभग हिरण्यवाशीमत्तम ।
धनानि सुषणा कृधि ॥६॥

अध नः विश्वऽसौभग हिरण्यवाशीमत्ऽतम धनानि सुऽसना कृधि ॥

हे विश्वसौभग, विश्वानि सौभगानि सौभाग्यानि यस्य सः सर्वसौभाग्ययुक्त, हिरण्यवाशीमत्तम हिरण्मयी वाशी आयुधं तदेषामस्तीति हिरण्यवाशीमन्तः, अतिशयेन हिरण्यवाशीमान्, तादृश, पूपन्, अध अथ अस्मत्प्रार्थनानुरोधेनातः परं नः अस्मदीयानि धनानि भोग्यानि वस्तूनि सुषणा सु सनानि सुखेन संभक्तुं दातुं वा शक्यानि कृधि कुरु ॥ अधसौभगादयो गताः । सुषणा-ईषद्दुःसुष्विति खल् ॥

सप्तमीमृचमाह—

अति नः सश्चतो नय सुगा नः सुपथा कृणु ।
पूषन्निह क्रतुं विदः ॥७॥

अति नः सश्चतः नय सुऽगा नः सुऽपथा कृणु पूषन् इह क्रतुम् विदः ॥

सश्चतः बाधनाय अस्मासु सक्तान् शत्रून् नः अति अस्मानतिक्रम्य नय अन्यतः प्रापय । नः अस्मान् सुगा सुष्ठु गन्तुं शक्येन सुपथा शोभनेन मार्गेण कृणु गन्तॄन् कुरु । हे पूषन्, इह अस्मिन् मार्गे क्रतुं प्राज्ञं कर्म विदः जानीहि ॥ सश्चतः-सश्चतेर्गत्यर्थादिति सायणो मन्यते । षच समवाये इत्यस्यैव शकारोपजनश्छान्दसः, एवं हि 'सश्चिर'इत्यादिप्रयोगस्थलेषु उपपत्तिर्दृश्यते । सुगा, सुपथा-उभयोस्तृतीयाया आकारः । विदः-विद ज्ञाने लेट्, अडागमः, इकारलोपः । अन्ये गताः ॥

अष्टमीमृचमाह—

अभि सूयवसं नय न नवज्वारो अध्वने ।
पूषन्निह क्रतुं विदः ॥८॥
अभि सुऽयवसम् नय न नवऽज्वारः अध्वने पूषन् इह क्रतुम् विदः ॥

हे पूषन्, सुयवसम् शोभनतृणोपलक्षितं उपभोगक्षमं प्रदेशं अभि अभितः नय अस्मान् । अध्वने मार्गाय शोभनपथाधिगमार्थं नवज्वारः नूतनः संतापः अस्माकं न न भवतु । शिष्टं व्याख्यातम् ॥ सूयवसम्–शोभनं यवसं यस्मिन् सः, पूर्वपदस्य दीर्घत्वम् छन्दसि । नवज्वारः–ज्वर रोगे, भावे घञ् । अन्यत् व्याख्यातम् ॥

नवमीमृचमाह—

शग्धि पूर्धि प्र यंसि च शिशीहि प्रास्युदरम् ।
पूषन्निह क्रतुं विदः ॥९॥
शग्धि पूर्धि प्र यंसि च शिशीहि प्रासि उदरम् पूषन् इह क्रतुम् विदः ॥

हे पूषन्, शग्धि शक्तो भव । पूर्धि पूरय । प्रयंसि प्रयच्छ । च अपि च शिशीहि तीक्ष्णीकुरु । उदरम् कुक्षिं प्रासि पूरय । अस्मदनुग्रहे शक्तिमान् भव, अस्मान् तेजस्विनः कुरु, स्वात्मनैवास्मान् पूरय, क्षेमं नः प्रदेहि, उपभोगक्षमैराहारैरस्मदन्तरं पूरयेत्युक्तम् । शिष्टं गतम् ॥ शग्धि–शक्ल शक्तौ, लोटो हिः, विकरणस्य लुक्, हेर्धिरादेशः । पूर्धि–पॄ पूरणे, अन्यत् पूर्ववत् । शिशीहि–शो तनूकरणे लोट्, अन्यत् छान्दसम् । प्रासि–प्रा पूरणे अदादिः ॥

दशमीमृचमाह—

न पूषणं मेथामसि सूक्तैरभि गृणीमसि ।
वसूनि दस्ममीमहे ॥१०॥

न पूषणम् मेथामसि सुऽउक्तैः अभि गृणीमसि वसूनि दस्मम् ईमहे ॥

पूषणम् देवं न मेथामसि न वयं निन्दामः । सूक्तैः शोभनवचनात्मकैः मन्त्रैः अभि गृणीमसि अभितः स्तुमः । दस्मम् अद्भुतकर्मकारिणं एनं बलाढ्यमित्यर्थः वसूनि सत्त्वात्मकानि धनानि ईमहे याचामहे ॥ मेथामसि-मेथृ हिंसने, मस इकारः । गृणीमसि-गृ शब्दे, इदन्तो मसिः । दस्म-दस्यतेर्बलकर्मार्थात् मक् ॥

इति प्रथमस्य तृतीये पञ्चविंशो वर्गः

अथ 'कद्रुद्राये'ति नवर्चं अष्टमं सूक्तम् । घौरः कण्व एव ऋषिः । गायत्री छन्दः, अन्त्या अनुष्टुप् । रुद्रो देवता, तृतीयाया मित्रावरुणौ अन्त्यायाः सोमः ॥

तत्र प्रथमामृचमाह—

कद्रुद्राय प्रचेतसे मीळ्हुष्टमाय तव्यसे ।
वोचेम शन्तमं हृदे ॥१॥
कत् रुद्राय प्रऽचेतसे मीळ्हुःऽतमाय तव्यसे वोचेम शम्ऽतमम् हृदे ॥

कत् कदा रुद्राय एतन्नामकाय देवाय शंतमम् अतिशयेन सुखकरं स्तोत्रं वोचेम ब्रूयाम । हृदे हृदयाय शंतमं हृदयस्यार्थे सुखकरं, हृद्यं इति अन्वय उपपद्यते । हृदे हृदयनिष्ठाय हृदयभूताय रुद्रायेति वा अन्वयः स्यात् । कीदृशाय रुद्राय ? प्रचेतसे प्रकृष्टं चेतो यस्य तस्मै प्रकृष्टज्ञानाय, मीढुष्टमाय सेक्तृतमाय, अतिशयेन दिव्यसम्पदां वर्षित्रे तव्यसे तवीयसे अतिशयेन तवित्रे प्रवृद्धाय ॥ कत्-कदा, अन्त्यलोपः छान्दसः । रुद्राय रोदेः णिलुक् रक्, रोदयति सर्वं इति पूर्वे, पापानिति वयम् । मीढुष्टमाय-अतिशयेन मीढ्वान्, क्तसुप्रत्ययान्तो निपातितः । तव्यसे-तवतिर्वृद्ध्यर्थः, तृलोपः ईयसुनः इकारलोपः छान्दसः । अन्ये गताः ॥

द्वितीयामृचमाह—

यथा नो अदितिः करत्पश्वे नृभ्यो यथा गवे ।
यथा तोकाय रुद्रियम् ॥२॥

यथा नः अदितिः करत् पश्वे नृऽभ्यः यथा गवे यथा तोकाय रुद्रियम् ॥

अदितिः अखण्डसत्त्वक्षेत्रभूता सर्वदेवमाता अघ्न्याशब्दवाच्या देवी नः अस्माकं रुद्रियम् रुद्रसंबन्धि यत् किमपि भवतु तत् (सत्त्वं बलं वेति ब्रूमः) यथा येन प्रकारेण सिध्यति तथा करत् करोतु । किं च अस्मदीयाय पश्वे अश्वादये नृभ्यः पुरुषेभ्यः यथा गवे तोकाय च अपत्याय च यथा रुद्रियं सत्त्वं सिध्यति तथा करोतु । अत्र अस्मत्-संबन्धि यद्यद्वस्तु वर्तते तत्सर्वं रुद्रानुग्रहपात्रं रुद्रबलसंपन्नं भवत्विति विवक्षा । तस्मात् पशु-नृ-गो-तोकशब्दानां तत्त्वार्थदानं नावश्यम् ॥ पश्वे—संज्ञापूर्वकविधिरनित्यः, तस्माद् गुणाभावः यणादेशः । रुद्रियम्—रुद्रस्येदम्, घप्रत्ययः ॥

तृतीयामृचमाह—

यथा नो मित्रो वरुणो यथा रुद्रश्चिकेतति ।
यथा विश्वे सजोषसः ॥३॥

यथा नः मित्रः वरुणः यथा रुद्रः चिकेतति यथा विश्वे सऽजोषसः ॥

नः अस्मान् मित्रः यथा चिकेतति जानाति, वरुणः यथा चिकेतति, रुद्रः यथा चिकेतति, यथा विश्वे देवाः सजोषसः समानप्रीतयः सन्तः चिकेतन्ति तथा भवत्विति शेषः । मित्रादीनां अस्मद्विषयकं ज्ञानं च अनुग्रहार्थकं ज्ञेयम् । तेषां ज्ञानमेव अनुग्रहात्मकं वा बोध्यम् । "यद्वा यथाशब्दोपेतस्य मन्त्रद्वयस्य तथा कदा वोचेमेति पूर्वत्रान्वयः" इति सायणीयं रमणीयम् उपपन्नं च ॥ चिकेतति, सजोषसः अन्ये च गताः ॥

चतुर्थीमृचमाह—

गाथपतिं मेधपतिं रुद्रं जलाषभेषजम् ।
तच्छंयोः सुम्नमीमहे ॥४॥

गाथऽपतिम् मेधऽपतिम् रुद्रम् जलाषऽभेषजम् तत् शम्ऽयोः सुम्नम् ईमहे ॥

शंयोः सुखकामस्य दृष्टान्तभूतो यः शंयुर्नाम ऋषिर्बार्हस्पत्यः तस्य तत् प्रसिद्धं सुम्नम् सुखं ईमहे याचामहे । कमभिलक्ष्य 'ईमहे' ? गाथपतिम् स्तुतिरूपायाः वाचः पतिं, मेधपतिम् मेधो यज्ञः तल्लक्षितः सोमसवः तस्य पतिं, जलाषभेषजम् जलाषं सुखरूपं भेषजं औषधं यस्य तं रुद्रम् प्रस्तुतं देवम् ॥ गाथपतिम्-गै शब्दे, थन्प्रत्ययः । जलाषभेषजम्-जायन्त इति जाः, जानां लाषः अभिलाषो यस्मिन् तत् जलाषं सुखम्, जलाषरूपं सुखरूपं भेषजं यस्य तम् । रुद्रसंबन्धि औषधं अलौकिकं सुखरूपम् । जलमेव जलाषं भेषजं यस्येति प्राहुरेके, तत्र प्रक्रिया न ज्ञायते ॥

पञ्चमीमृचमाह—

यः शुक्र इव सूर्यो हिरण्यमिव रोचते ।
श्रेष्ठो देवानां वसुः ॥५॥
यः शुक्रःऽइव सूर्यः हिरण्यम्ऽइव रोचते श्रेष्ठः देवानाम् वसुः ॥

यः रुद्रः शुक्र इव सूर्यः सूर्य इव दीप्तिमान् हिरण्यमिव रोचते सुवर्णम् इव प्रीतिकरो भवति, सः देवानाम् सर्वेषां मध्ये श्रेष्ठः प्रशस्यतमः वसुः वासयिता, सर्वेषां वासहेतुश्च भवति ॥ रोचते-रुच दीप्तौ प्रीत्यां च । वसुः-वस निवासे, अन्तर्भावितण्यर्थः, उप्रत्ययः ॥

इति प्रथमस्य तृतीये षड्विंशो वर्गः

षष्ठीमृचमाह—

शं नः करत्यर्वते सुगं मेषाय मेष्ये ।
नृभ्यो नारिभ्यो गवे ॥६॥

शम् नः करति अर्वते सुऽगम् मेषाय मेष्ये नृऽभ्यः नारिऽभ्यः गवे ॥

नः अस्माकं सम्बन्धिने अर्वदादये सुगम् सुष्ठु गम्यम् शम् सुखं देवः करति करोति । केभ्यः ? अर्वते अश्वाय मेषाय तज्जातिपुरुषाय मेष्ये मेष्यै तज्जातिस्त्रियै नृभ्यः पुरुषेभ्यः नारिभ्यः स्त्रीभ्यः गवे गोजातये, एवं अस्मदीयेभ्यः सर्वेभ्यः शं करोति रुद्रः ॥ करति-करोति, व्यत्ययेन शप् । अर्वते--अर्ति अर्वा, वनिप्, चतुर्थ्येकवचने नकारस्य तृ आदेशः । मेष्ये--चतुर्थ्येकवचने आगमानुशासनमनित्यम् इति आडागमाभावः ॥

सप्तमीमृचमाह—

अस्मे सोम श्रियमधि नि धेहि शतस्य नृणाम् ।
महि श्रवस्तुविनृम्णम् ॥७॥

अस्मे इति सोम श्रियम् अधि नि धेहि शतस्य नृणाम् महि श्रवः तुविऽनृम्णम् ॥

हे सोम, नृणाम् शतस्य पुरुषशतस्य, शतं बहुवाचि, पर्याप्तां श्रियम् सम्पदं अस्मे अस्मासु अधि निधेहि आधिक्येन निक्षिप, बहुपुरुषसङ्घस्य समाश्रयदानसमर्थं शरणं अस्मासु निधेहि । महि महत् तुविनृम्णम् प्रभूतबलयुक्तं श्रवः श्रवणं च निधेहि । विपुलप्रभावाः भवेम येन बहूनां आश्रयतां प्राप्नुयाम, प्रबलं च भवतु दिव्यावेशश्रवणं नः ॥ अस्मे-सप्तम्याः शे आदेशः । अन्ये गताः ॥

अष्टमीमृचमाह—

मा नः सोम परिबाधो मारातयो जुहुरन्त ।
आ न इन्दो वाजे भज ॥८॥

मा नः सोमऽपरिबाधः मा अरातयः जुहुरन्त आ नः इन्दो इति वाजे भज ॥

सोमपरिबाधः सोमस्य सोमाभिषवस्य परिबाधकाः अयज्ञानो रसनिष्पादनप्रतिबन्धकाः अदैव्या इति यावत्। नः अस्मान् मा जुहुरन्त मा बलात्कुर्वन्तु। तथा अरातयः अदातारः अन्ये शत्रवः मा जुहुरन्त। हे इन्दो क्लेदनकारितया रसेन सुखप्रद, सोम देव, वाजे बलसमृद्धौ विषये नः अस्मान् आ सर्वतः भज सेवस्व॥ सोमपरिबाधः–बाधन्त इति बाधः, क्विप् चेति क्विप्। जुहुरन्त–हृ प्रसह्यकरणे, लङि जुहोत्यादित्वात् श्लुः, अन्यच्च छान्दसम्॥

नवमीमृचमाह—

यास्ते प्रजा अमृतस्य परस्मिन्धामन्नृतस्य।
मूर्धा नाभा सोम वेन आभूषन्तीः सोम वेदः ॥९॥
याः ते प्रऽजाः अमृतस्य परस्मिन् धामन् ऋतस्य मूर्धा नाभा सोम वेनः आऽभूषन्तीः सोम वेदः॥

हे सोम, अमृतस्य मरणरहितस्य नित्यस्य, परस्मिन् उत्तमे धामन् धामनि स्थाने स्थितस्य ऋतस्य सत्यस्य ते तव त्वत्संबन्धिन्यः, त्वत्सेविन्यः याः प्रजाः सन्ति ताः वेनः कामयस्व। कीदृशस्त्वम्? मूर्धा शिरःस्थानीयस्त्वं नाभा नाभौ मध्ये, चक्रस्य नाभिरिव स्थिते मुख्ये मध्ये अन्तरे स्थाने त्वदीयाः प्रजाः सुस्थिताः विधाय ताः कमनीयाः कुरु इत्यर्थः। कीदृशीस्ताः? आभूषन्तीः अलङ्कुर्वाणाः नाभिभूतं सर्वान्तरमन्तर्यजनस्थानं इति शेषः। सर्वतस्त्वामलङ्कुर्वाणा इति सायणो मन्यते। हे सोम! तथाभूताः प्रजाः वेदः जानीहि॥ धामन्–सप्तम्या लुक्। नाभा–सप्तम्या डादेशः। वेनः–वेनतिः कान्तिकर्मा, लेट्। वेदः–विद ज्ञाने, लेट्। उभयत्र सिप्यडागमः॥

घौरस्य कण्वस्य रौद्रं सूक्तं समाप्तम्। इदानीं रुद्रस्य तत्त्वमधिकृत्य अवधातव्यः सारांशो वक्ष्यते। त्रिमूर्तिव्यवस्थानुरोधेन पुराणेषु शैवशाक्ताद्यागमेषु च प्रसिद्धो रुद्रः संहारकृत् शिव इत्यपि गीयते। पुराणे वर्णितानां ब्रह्मेन्द्रादीनां वेदे प्रतिपादितानां तेषामेव च विशेषो बोध्यः। प्रागेवोक्तं यदग्न्यादयो देवाः यद्यपि मुखतः पृथक्स्थिताः स्वाधिकारेषु वर्तमाना अत एव विशिष्टलिङ्गा भवन्ति, तथापि तेषामेकैकोऽपि स्वयं

सर्वदेवसहायः अन्तर्निहितसर्वदेवप्रकृतिकः सर्वदेवतामूलभूतपरमपुरुषः स एकस्तदेकं च ज्योतिर्वा भवतीति। एवं एकैकस्या देवतायाः स्वरूपगुणबोधके लिङ्गे लक्ष्यमाणेऽपि तत्रैव क्वचित् अन्यदेवतालिङ्गदर्शनेन देवतावैशिष्ट्यप्रतिपादनं न सुकरं भवति। यथा 'आ वो राजानमध्वरस्य रुद्रम्' (४.३.१) इत्याग्नेयसूक्ते रुद्रवैभवश्रवणात् सामान्यतः अग्निरुद्रयोर्लिङ्गभेदेप्यभेदश्रवणं स्पष्टम्, तथा रुद्रेन्द्रयोः अभेदः अन्यत्र श्रूयते। यद्यप्येवं रुद्रे अग्निगुणं इन्द्रगुणं सर्वेश्वरगुणं च तत्र तत्र मन्त्रेषु वर्णितं लक्षयामः, तथापि रुद्रतत्त्वं दाशतय्या उद्धृत्य कथञ्चिद् ग्राह्यम्। याजुषाथर्वणसंहितयोर्बहुषु रुद्रस्वरूपप्रतिपादकेषु मन्त्रेषु सत्स्वपि, ऋक्संहितायां पठितान् रुद्रमन्त्रान् समालोच्य तत्र वर्णितस्य रुद्रस्य वैशिष्ट्यमेवेह स्मारयामः। अत्रैके मन्यन्ते—यथा पुराणेषु ब्रह्मविष्णुरुद्राणां महत्त्वं, न तथा वेदे। अत एव पुराणग्रथितत्रिमूर्तिवर्णनपराणि सूक्तान्यल्पसंख्याकानि भवन्ति। इन्द्रस्याग्नेर्वा सूक्तानि भूयांसि, तेषां महत्त्वादिति। नैतद्युक्तं। न हि सूक्तसंख्याबाहुल्यं देवताविशेषस्य महत्त्वनिर्णायकं भवति। इन्द्रसूक्तानि भूयिष्ठानि दाशतय्यां, अल्पीयांस्येव सूर्यसूक्तानि, तथापि सूर्य एव परमो देव इति निर्विवादम्। रुद्रदेवताकानि सूक्तानि त्रिचनुराण्येव ऋग्वेदे, मारुतानि त्वधिकानि, तथापि मरुतां पितेति वेदगीतो रुद्रो मरुद्भ्यो न्यून इति चेदुपहसनीयमेव भवति। न वा विष्णुरल्पसंख्याकैः सूक्तैरभिवर्णितः अत्यधिकसूक्तप्रतिपादितादिन्द्रादग्नेर्वा न्यूनो भवति। तस्मान्न सूक्तसंख्यया महत्त्वं निश्चीयते देवताविशेषस्येति बोध्यम्॥

कथं तर्हि महत्तरत्वमन्तरा भूयिष्ठानि सूक्तानीन्द्रस्य भूयांस्यग्नेर्वा वेदे गीतानि भवन्ति? ब्रूमः। अन्तर्यागप्रवृत्तानामाद्यानामृषीणां स निष्ठामार्गः ऊर्ध्वारोहणपद्धतिः, यत्र ऋषेरुपास्तिदशाविशेषेषु यस्य यस्य देवताविशेषस्य प्रसादोऽन्तर्याजिन आवश्यकः साहाय्यकारी भवति तस्य तस्य प्राधान्यं सूक्तैराविष्कृतं भवति। एवं रुद्रस्य विष्णोर्वा न तथा प्राधान्यं भवति यथा दशाविशेषेषु अग्नेरिन्द्रस्य वा आवश्यकतामूलकं प्राधान्यं भवति। इदं तर्हि विचारणीयम्—कीदृशं वर्णितं भवति वेदे ब्रह्मणो रुद्रस्य विष्णोर्वा स्वरूपं लक्षणं वेति? उच्यते। ब्रह्मणस्पतेस्तत्त्वं विचारितम्। तत्र ब्रह्मणोऽधिकार उपन्यस्तः। तत्रोक्तस्य सारांश इह स्मार्यः। ब्रह्मबृहस्पत्योरधिकारस्य ब्रह्मणस्पतौ समन्वयमवोचाम। स वाचा सृजति सर्वम्। सृष्टिश्च आविष्कारात्मिका भवति। सतामेव वस्तूनां तमसि निमग्नानां उद्धरणद्वारा प्रकाशप्राप्तिः सम्पद्यते। तामेतां

सृष्टिशब्दवाच्यां विश्वस्याप्याविष्कृतिं निर्वहन् ब्रह्मा ब्रह्मणस्पतिः स्रष्टोच्यते। सोऽचेतनात्तमसः सर्वाणि वस्तून्युत्थाप्य तेषां प्राणमनोज्ञानयुक्तानि रूपाणि सम्पादयति। स एष ब्रह्मा ॥

रुद्रस्तु तां सृष्टिं प्रसह्योर्ध्वं नयति। तस्योन्नयनस्य ये प्रतिरोधकाः सन्तः तत्र प्रमत्ता वा प्रत्यवतिष्ठन्ते तान् प्रहरति, कशाभिस्ताडयन्निव शिक्षयति, प्रध्वंसयति च पापान् प्रतिबन्धकान् आयुधपाणिरुग्रः शर्व इति श्रुतश्च। एवं घोरोऽपि स शिवो दयालुः प्रसादयत्यार्तान् सर्वार्तिनाशनः शिवङ्करः शिवतमभैषज्येन। विष्णुस्तु पदत्रयक्रमणेन विश्वं धारयमाणः मर्त्येष्वस्मासु इन्द्राय विततं स्थानं दधाति, येन वयं परं धाम गच्छेम। एवं वेदप्रतिपादितस्य महतो देवतात्रयस्य विवरणं सुलभं भवति तत्तत्सूक्तार्थविचारतः इत्यलं विस्तरेण ॥

अथ रुद्रशब्दोऽवयवार्थानुगमेनापि घोर उग्र इत्याद्यर्थको भवति। यद्यपि प्राचीनार्यभाषाशाखीयानां रक्तकान्त्याद्यर्थकधातूनां रुष्यतिरुशत्यादीनां परीक्षणेन रुद्रशब्दस्य रुधिरार्थकधातुसंबन्धो वृत्तचर इति नव्यानामूहो न्याय्य एव भवति, तथापि तेषामेव धातूनां उग्रभीषणाद्यर्थकत्वं वर्तत इति बहुमन्त्रपर्यालोचनेन सुगमं स्यात्। 'सोऽरोदीत् यदरोदीत् तद्रुद्रस्य रुद्रत्वं' इत्यादिब्राह्मणनिर्वचनम् वैदिकपदस्वरूपपरीक्षायां न युक्तं भवति। न वोपयुक्तं स्यात् 'रुद्रो रौतीति सतो रोरूयमाणो द्रवतीति वा रोदयतेर्वे'त्यादि विशृङ्खलविकल्पभूयिष्ठं शब्दरूपावतारमर्यादाविदूरकल्पनाशबलं नैरुक्तं निर्वचनम्। उग्रो घोरो वा भवति रुद्रशब्दार्थो वेदे रूढः। तस्मादास्तां रुद्रो रोदयतेः, उन्नयनमार्गपरिपन्थिनः रोदयति रोषणो रुद्र इति। ईदृशः प्रचण्डकर्मा प्राणबलानामखण्डनिधिरेक एव बहूनां रुद्राणां पिता, मरुतां पितेति च प्रसिद्धः, शिवं तन्वानो जगत्पितेति च ऋग्वेदे कुत्सगृत्समदवसिष्ठसूक्तान्यावेदयन्ति। अन्यत्र च 'रुद्रस्य ये मीळ्हुषः सन्ति पुत्राः' (६.६६.३) 'ते जज्ञिरे दिव ऋष्वास उक्षणो रुद्रस्य मर्याः असुरा अरेपसः' (१.६४.२) इत्येवंजातीयकैर्मन्त्रैः रुद्रस्य महत्त्वं बहुपुत्रत्वं पृश्निमातृणां इन्द्रभ्रातृणां मरुतां पितृत्वं च आर्तिहरत्वादि च प्रतिपादितानि भवन्ति। स एष रुद्रो भुवनस्य पिता सर्वस्यापि सुखकृत् अन्तःस्थितो मृत्युञ्जय इति चान्ये मन्त्रा उद्घोषयन्ति। 'भुवनस्य पितरं गीर्भिराभी रुद्रं दिवा वर्धया रुद्रमक्तौ' (६.४९.१०) 'अन्तरिच्छन्ति तं जने रुद्रं परो मनीषया' (८.७२.३) 'शं नो रुद्रो रुद्रेभिर्जलाषः' (७.३५.६)

'रुद्रो रुद्रेभिर्देवो मृळयाति नः' (१०.६६.३) इत्यन्याश्चैवंविधा ऋचः सूक्तेषु तत्र तत्र द्रष्टव्याः। 'त्र्यम्बकं यजामहे' इति (७.५९.१२) मृत्युञ्जयरुद्रमन्त्रार्थचिन्तनात् मृत्योर्विमोक्षणलक्षणं वेदोक्तमतिचिरन्तनरहस्यं विदितं भवति। तत्र उत्तरेणार्धर्चेन बन्धनान्मोक्षो येन दृष्टान्तेन निरूपितं भवति, सोऽद्यापि योगिभिर्ज्ञानिभिः भाषाभेदेनोपयुज्यते स्वानुभूतिमूलकतत्त्वोपदेशप्रसङ्गेषु। 'उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्' इत्यस्य तात्पर्यं तु—यथा उर्वारुकं नाम कर्कटीफलं परिपक्वं सत् परिवेष्टनत्वचः पृथग्भूतं अत एव मुक्तं भवति (वृन्तात् बन्धनात् फलं मुक्तं भवतीत्येके) तथा अन्तरात्मनः पुरुषस्य मृत्युग्रस्ताच्छरीरात्पृथग्भावः परिपक्वस्य मानुषस्य अनुभवात्मको मोक्षो भवतीत्याशयः। एवं मृत्योर्बन्धनान्मोचय, अमृतात् मा मोचयेति ऋषिर्ब्रूते। ईदृशमोक्षविषयकानुभव एव मूलं भवति 'तं स्वाच्छरीरात् प्रवृहेन्मुञ्जादिवेषीकां धैर्येण' (कठोपनिषत् ६.१७) एवंविधस्योपनिषद्वाक्यस्य। एतावान् महिमा त्रिलोकपितुः 'त्र्यम्बकस्य' 'पुष्टिवर्धनस्य' मृत्युञ्जयस्य रुद्रस्य वेदे गीत इति शिवम्॥

इति प्रथमस्य तृतीये सप्तविंशो वर्गः

इति प्रथमे मण्डलेऽष्टमोऽनुवाकः

अथ नवमोऽनुवाकः। तत्र सप्त सूक्तानि। कण्वपुत्रः प्रस्कण्व ऋषिः। चतुर्दशर्चं 'अग्ने विवस्वत्' इति प्रथमं सूक्तम्। कृत्स्नं सूक्तमाग्नेयम्। आद्ये द्वे अश्विदेवताके उषोदेवताके च। अयुजो बृहत्यः, युजः सतोबृहत्यः॥

तत्र प्रथमामृचमाह—

अग्ने॒ विव॑स्वदु॒षस॑श्चि॒त्रं राधो॑ अमर्त्य।
आ दा॒शुषे॑ जातवेदो वहा॒ त्वम॒द्या दे॒वाँ उ॑ष॒र्बुधः॑॥१॥

अग्ने॑ विव॑स्वत् उ॒षसः॑ चि॒त्रम् राधः॑ अ॒मर्त्य॑ आ दा॒शुषे॑ जा॒त॑ऽवेदः॑ वह॒ त्वम् अ॒द्य दे॒वान् उ॒ष॒ःऽबुधः॑॥

हे अमर्त्य मरणरहित, जातवेदः जातानां वेदितः, अग्ने, त्वम् विवस्वत् प्रकाशयुक्तं चित्रम् नानाविधम् राधः धनं उषसः उषोदेव्याः सकाशात् आवह आहर। कस्मै? दाशुषे दत्तवते यजमानाय। किञ्च, अद्य इदानीं उषर्बुधः उषसि बुध्यमानान् देवान्

आवहेति संबन्धः। ऋतज्योतिरुदयात्प्रागुषस आविष्कार इति पूर्वं सविस्तरमुक्तमत्र स्मार्यम्। अन्तर्यजने तस्मादुषसि सर्वदेवानयनं अग्नेः कृत्यं भवति॥ विवस्वदादयः सर्वे गताः। जातवेदः-अस्य बहुधा भवति यास्कीयं निर्वचनम्। अस्माकं तु, जातानि वेत्तीति जातवेदाः, असुन्। उषर्बुधः-उषसि बुध्यन्त इति उषर्बुधः, रोरुत्वाभावः छान्दसः॥

द्वितीयामृचमाह—

जुष्टो हि दूतो असि हव्यवाहनोऽग्ने रथीरध्वराणाम्।
सजूरश्विभ्यामुषसा सुवीर्यमस्मे धेहि श्रवो बृहत् ॥२॥

जुष्टः हि दूतः असि हव्यऽवाहनः अग्ने रथीः अध्वराणाम् सऽजूः अश्विऽभ्याम् उषसा सुऽवीर्यम् अस्मे इति धेहि श्रवः बृहत् ॥

हे अग्ने, त्वं जुष्टः सेवितः, दूतः देवानां दूतः, हव्यवाहनः हव्यस्य हविषः अर्पितस्य वाहनो वोढा प्रापयिता अध्वराणां रथीः यज्ञानां रथस्थानीयः असि हि। यज्ञान् गन्तव्यं स्थलं प्रापयिता चासि। तथाभूतस्त्वं अश्विभ्याम् उभाभ्याम् उषसा च सजूः सहितो भूत्वा सुवीर्यम् शोभनवीर्ययुक्तं बृहत् महत् दिव्यं श्रवः श्रवणं अस्मे अस्मासु धेहि प्रक्षिप॥ रथीः-रथशब्दात् स्वार्थिक ईकारप्रत्ययः। जुष्टादयः सर्वे गताः॥

तृतीयामृचमाह—

अद्या दूतं वृणीमहे वसुमग्निं पुरुप्रियम्।
धूमकेतुं भाऋजीकं व्युष्टिषु यज्ञानामध्वरश्रियम् ॥३॥

अद्य दूतम् वृणीमहे वसुम् अग्निम् पुरुऽप्रियम् धूमऽकेतुम् भाःऽऋजीकम् विऽउष्टिषु यज्ञानाम् अध्वरऽश्रियम् ॥

अद्य इदानीं, अस्मिन् दिने अग्निम् वृणीमहे प्रार्थयामहे। कीदृशम्? दूतं देवानां दूतं वसुम् धनभूतं पुरुप्रियम् पुरूणां बहूनां प्रियं धूमकेतुम् धूमलक्षणं (प्रागुक्तस्वरूपं १.२७.११) भाऋजीकम् भासः प्रकाशस्य ऋजीकं प्रार्जयितारम् व्युष्टिषु उषःसु यज्ञानां यजनविशेषाणां संबन्धिनं अध्वरश्रियम् अध्वरं श्रयत इति अध्वरश्रीः तम्॥ अद्या-निपातस्य

चेति दीर्घः। भाऋजीकम्-ऋजेश्चेति कन्प्रत्ययः, भासं ऋज्वीं करोतीत्यर्थः। व्युष्टिषु उच्छी विवासे ॥

चतुर्थीमृचमाह—

श्रेष्ठं यविष्ठमतिथिं स्वाहुतं जुष्टं जनाय दाशुषे ।
देवाँ अच्छा यातवे जातवेदसमग्निमीळे व्युष्टिषु ॥४॥

श्रेष्ठं यविष्ठम् अतिथिम् सुऽआहुतम् जुष्टम् जनाय दाशुषे देवान अच्छ यातवे जातऽवेदसम् अग्निम् ईळे विऽउष्टिषु ॥

श्रेष्ठम् अतिशयेन प्रशस्तं यविष्ठम् युवतमं अतिथिम् सततगमनक्षमं सत्कारा स्वाहुतम् सुष्ठु समन्तात् हुतं दाशुषे दत्तवते जनाय यजमानाय जुष्टम् प्रीतं जातवेदस जातानां सर्वेषां वेदितारं, अग्निम् देवम् व्युष्टिषु उषस्सु देवान् सर्वान् अच्छ अभिमु यातवे गन्तुं ईळे अध्येषे ॥ अतिथिम्-अत सातत्यगमने, इथिन्प्रत्ययः। स्वाहुतम्--आहूय अस्मिन् इत्याहुतः, हु दानादनयोः ॥

पञ्चमीमृचमाह—

स्तविष्यामि त्वामहं विश्वस्यामृत भोजन ।
अग्ने त्रातारममृतं मियेध्य यजिष्ठं हव्यवाहन ॥५॥

स्तविष्यामि त्वाम् अहं विश्वस्य अमृत भोजन अग्ने त्रातारम अमृतम् मियेध्य यजिष्ठम् हव्यऽवाहन ॥

विश्वस्य सर्वस्यापि जगतः अमृत भोजन अमृतत्वविशिष्टभोगसमर्थ विश्वस्य नित्यं भोक्ता भोजयिता परिपालकोऽग्निरित्यर्थः, तादृश, हव्यवाहन, हविषो वोढः, मियेध्य मेध्य यज्ञार्ह, अग्ने, अमृतं मरणरहितं, त्रातारम् विश्वस्य रक्षकं यजिष्ठं अतिशयेन यष्टारं त्वा अहम् स्तविष्यामि स्तोष्यामि स्तुत्या कीर्तयिष्यामि ॥ स्तविष्यामि-इडागमव्यत्ययः छान्दसः भोजन-भुनक्तेः, नन्द्यादिलक्षणो ल्युः। मियेध्य-इयागमः छान्दसः। यजिष्ठम्-यष्टृशब्दा इष्ठन् छन्दसि ॥

इति प्रथमस्य तृतीयेऽष्टाविंशो वर्गः

षष्ठीमृचमाह—

सुशंसो बोधि गृणते यविष्ठ्य मधुजिह्वः स्वाहुतः ।
प्रस्कण्वस्य प्रतिरन्नायुर्जीवसे नमस्या दैव्यं जनम् ॥६॥
सुऽशंसः बोधि गृणते यविष्ठ्य मधुऽजिह्वः सुऽआहुतः प्रस्कण्वस्य प्रऽतिरन् आयुः जीवसे नमस्य दैव्यम् जनम् ॥

हे यविष्ठ्य युवतम अग्ने, गृणते स्तुवते यजमानाय त्वं सुशंसः शोभनः शंसः स्तुतिः यस्य सः, सुष्ठु शंसनीय इत्यर्थः, मधुजिह्वः मधुमयी आनन्दकरी जिह्वा ज्वाला यस्य सः, स्वाहुतः सुष्ठु आभिमुख्येन हुतः सन् बोधि बुध्यस्व यजमानगतं सर्वं जानीहि तदनुग्रहार्थमित्यर्थः, अपि च प्रस्कण्वस्य अस्य मम यजमानस्यर्षेः (ज्ञानार्थककण्वप्रभवस्य प्रकृष्टज्ञानस्येत्यवयवार्थानुगमादुपपत्तिरन्तर्यागे द्रष्टव्या) जीवसे जीवनाय आयुः प्रतिरन् वर्धयन् दैव्यम् देवसंबन्धिनं जनम् नमस्य पूजय, प्रस्कण्वस्य शुभजीवनाय आयुर्वर्धय, तेन देववृन्दस्य पूजनं कृतवान् भवेः । कथम् ? प्रस्कण्वस्यायुः देवतार्थमेव विहितं भवति ॥ प्रस्कण्वस्य—प्रभूतिरुत्पत्तिः कण्वाद्यस्य तस्य, प्रस्कण्वे हरिश्चन्द्रे च सुडागमो निपातितः । प्रतिरन्—प्रपूर्वस्तिरतिर्वर्धनार्थः । नमस्य—नमसः क्यच् पूजार्थे । दैव्यम्—देवाद्यञ् तस्येदमित्यर्थे ॥

सप्तमीमृचमाह—

होतारं विश्ववेदसं सं हि त्वा विश इन्धते ।
स आ वह पुरुहूत प्रचेतसोऽग्ने देवाँ इह द्रवत् ॥७॥
होतारम् विश्वऽवेदसम् सम् हि त्वा विशः इन्धते सः आ वह पुरुऽहूत प्रऽचेतसः अग्ने देवान् इह द्रवत् ॥

विशः प्रजाः होतारम् विश्ववेदसम् विश्वस्य वेदितारं सर्वज्ञं त्वा त्वाम् समिन्धते हि ज्वलयन्ति खलु । हे पुरुहूत बहुभिराहूत अग्ने, सः तादृशस्त्वं प्रचेतसः प्रकृष्टचेतोयुक्तान् देवान् इह अस्मिन् यजने द्रवत् क्षिप्रं आवह आभिमुख्येन प्रापय ॥ होतारम् इत्यादयः सर्वे गताः ॥

अष्टमीमृचमाह—

सवितारमुषसमश्विना भगमग्निं व्युष्टिषु क्षपः ।
कण्वासस्त्वा सुतसोमास इन्धते हव्यवाहं स्वध्वर ॥८॥

सवितारम् उषसम् अश्विना भगम् अग्निम् विऽउष्टिषु क्षपः कण्वासः त्वा सुतऽसोमासः इन्धते हव्यऽवाहम् सुऽअध्वर ॥

हे स्वध्वर शोभनाध्वरात्मकयज्ञयुक्ताग्ने, व्युष्टिषु उषःसु क्षपः रात्रिषु, विभक्तिव्यत्ययः सर्वदेत्यर्थः सवितृप्रभृतीनावहेति पूर्वेण संबन्धः । सवितारम्, उषसम् उषोदेवीं अश्विना अश्विनौ भगम् एतन्नामकं आदित्यं अग्निम् देवान् प्रति हविषः प्रापयितापि अग्निः तत्र भागमर्हति, तस्मात् देवतान्तरत्वेन तं गणयित्वा तमेव प्रार्थयते । अत्र अग्नेः सामान्यविशेषभावो बोध्यः । सामान्याग्निर्दूतः प्रार्थितः । हविर्भागादानाय आगतानां देवानां अग्निः अप्येकः, उच्यतां सोऽग्निविशेषः । 'व्युष्टिषु' उषसमप्यावहेत्यत्रापि उषोदेवीमावह अहःसु क्षपास्वपि इति सार्वकालिकदेवतासान्निध्यसम्पादनसमर्थमग्निं याचते । अत्र 'क्षपः' रात्र्यभिमानिनीं देवतां च आवहेति केचिन्मन्यन्ते । सुतसोमासः अभिषुतसोमाः कण्वासः कण्वा ऋषयो मेधाविनः हव्यवाहं त्वा त्वां इन्धते ज्वलयन्ति । क्षपः--क्षपाः, द्वितीयाबहुवचनम् । शसि आतो धातोरिति आकारलोपः । अन्ये गताः ॥

नवमीमृचमाह—

पतिर्ह्यध्वराणामग्ने दूतो विशामसि ।
उषर्बुध आ वह सोमपीतये देवाँ अद्य स्वर्दृशः ॥९॥

पतिः हि अध्वराणाम् अग्ने दूतः विशाम् असि उषःऽबुधः आ वह सोमऽपीतये देवान् अद्य स्वःऽदृशः ॥

हे अग्ने, विशाम् प्रजानां दूतः देवान् प्रति असि । अध्वराणां पतिः हि त्वं यज्ञानां पालकः खलु । अत एव विशां क्षेमाय दूतकर्म करोषि । अद्य अस्मिन् दिने उषर्बुधः उषसि प्रबुध्यमानान् स्वर्दृशः स्वःशब्दवाच्यस्य सत्यज्योतिरात्मनः सूर्यस्य द्रष्टॄन् देवान्, सोमपीतये सोमपानाय आवह इह प्रापय ॥ स्वर्दृशः—सुष्ठु अर्तिं गच्छतीति स्वरादित्य इति

सायणः । प्रकाशार्थात् स्वृधातोः स्वरधातोर्वा सूर्यवाची स्वरिति वयम् । स्वरव्ययम् तृतीया व्याहृतिः । स्वः पश्यन्तीति स्वर्दृशः, क्विप् चेति क्विप् ॥

दशमीमृचमाह—

अग्ने पूर्वा अनूषसो विभावसो दीदेथ विश्वदर्शतः ।
असि ग्रामेष्वविता पुरोहितोऽसि यज्ञेषु मानुषः ॥१०॥
अग्ने पूर्वीः अनु उषसः विभाऽवसो इति विभाऽवसो दीदेथ विश्वऽदर्शतः असि ग्रामेषु अविता पुरःऽहितः असि यज्ञेषु मानुषः ॥

हे विभावसो विशिष्टा भा प्रकाशः विभा वसु धनं यस्य स तथाभूत अग्ने, विश्वदर्शतः विश्वं दर्शतं दर्शनीयं दर्शनक्षमं यस्य सः, विश्वदृष्टिः, विश्वं दृष्टिगोचरमग्नेरित्यर्थः तादृशः त्वं पूर्वा उषसः अनु अतीतानि चित्प्रकाशप्रभातान्यनुलक्ष्य दीदेथ दीप्तवानसि । ग्रामेषु संघेषु युध्यमानेषु अविता असि रक्षिताऽसि । यज्ञेषु पुरोहितः पुरस्तान्निहितः देवः, मानुषः यजमानस्य मनुष्यस्य हितः असि भवसि ॥ ग्रामेषु--जननिवासस्थानेषु इति सायणः । अवितेत्यस्यासत्तेः संघपर्यायो युक्ततरः, एवं सायण एवान्यत्र 'ग्रामः भरतानां संघः' (३.३३.११) 'अपश्यं ग्रामम् (भूत) सङ्गम्' (१०.२७.१९) । अन्तर्यजने महत ऋतस्य ज्योतिषः प्रादुर्भावात् पूर्वं बह्व्य उषसो भवन्ति । तत्रैकैकस्यामुषसि प्रबुद्धोऽग्निः यजमानस्य हितः कार्यं निर्वहति पुरोहितो भूत्वा । बाह्ये कर्मणि तु प्रत्यहं उषःकाल एव भवति ॥

इति प्रथमस्य तृतीय एकोनत्रिंशो वर्गः

एकादशीमृचमाह—

नि त्वा यज्ञस्य साधनमग्ने होतारमृत्विजम् ।
मनुष्वद्देव धीमहि प्रचेतसं जीरं दूतममर्त्यम् ॥११॥
नि त्वा यज्ञस्य साधनम् अग्ने होतारम् ऋत्विजम् मनुष्वत् देव धीमहि प्रऽचेतसम् जीरम् दूतम् अमर्त्यम् ॥

हे अग्ने, देव, त्वा त्वां मनुष्वत् मनुरिव, यथा मनुः तथा वयम् निधीमहि स्थापयामः । कीदृशम् ? यज्ञस्य साधनम् यागनिष्पादकं होतारम् ऋत्विजम् काले यष्टारं प्रचेतसम् प्रकृष्ट-

ज्ञानयुक्तं जीरम् शीघ्रं दूतम् देवानां दूतं अमर्त्यम् मरणरहितम् ॥

मनुष्वत्–औणादिक-उसिप्रत्ययान्तो मनुस्शब्दः, गतः । प्राग्व्याख्यातम् (१.३१.१७) । जीरम्–क्षिप्रनाम, जु इति सौत्रो धातुः, जोः ई चेति रक्प्रत्ययः इति कात्यायनः, उपपन्ना चेयं रूपनिष्पत्तिः क्षिप्रार्थत्वात् । जॄ वयोहानौ इति धातोर्निष्पन्न इति कृत्वा व्याख्याय सायणः प्रक्रियादाने तु कात्यायनमुदाहरति ॥

द्वादशीमृचमाह—

यद्देवानां मित्रमहः पुरोहितोऽन्तरो यासि दूत्यम् ।
सिन्धोरिव प्रस्वनितास ऊर्मयोऽग्नेर्भ्राजन्ते अर्चयः ॥१२॥

यत् देवानां मित्रऽमहः पुरःऽहितः अन्तरः यासि दूत्यम् सिन्धोःऽइव प्रऽस्वनितासः ऊर्मयः अग्नेः भ्राजन्ते अर्चयः ॥

हे मित्रमहः मित्रैः अन्यैर्देवैः मह्यते पूज्यते इति मित्रमहाः तथाभूत मित्राणां पूज्य अग्ने, यत् यदा पुरोहितः पुरस्तात् स्थापितस्त्वं अन्तरः अन्तर्यजनस्थानमध्ये वर्तमानः सन् दूत्यम् देवानां दूतकर्म यासि प्राप्नोषि, तदा अग्नेः तव अर्चयः दीप्तयः भ्राजन्ते दीप्यन्ते । तत्र दृष्टान्तः–सिन्धोरिव यथा समुद्रस्य प्रस्वनितासः प्रकृष्टघोषयुक्ताः ऊर्मयः तरङ्गाः भ्राजन्ते तद्वत् ॥ प्रस्वनितासः–स्वनितं, स्वन शब्दे, भावे निष्ठा, प्रकृष्टं स्वनितं येषां ते, जसः असुगागमः ॥

त्रयोदशीमृचमाह—

श्रुधि श्रुत्कर्ण वह्निभिर्देवैरग्ने सयावभिः ।
आ सीदन्तु बर्हिषि मित्रो अर्यमा प्रातर्यावाणो अध्वरम् ॥१३॥

श्रुधि श्रुत्ऽकर्ण वह्निभिः देवैः अग्ने सयावऽभिः आ सीदन्तु बर्हिषि मित्रः अर्यमा प्रातःऽयावानः अध्वरम् ॥

हे श्रुत्कर्ण श्रवणशालिकर्णसम्पन्न, अग्ने, श्रुधि शृणु अस्मत्प्रार्थनामिति शेषः । मित्रः अर्यमा प्रातर्यावानः प्रभाते यजनं गच्छन्तो ये चान्ये देवाः सन्ति, ते सयावभिः त्वया

सह समानगतिभिः वह्निभिः वोढृभिर्हविर्भागस्येति शेषः, अन्यैः देवैः सह अध्वरम् यजनमुद्दिश्य बर्हिषि आस्तीर्णे आ सीदन्तु उपविशन्तु ॥ श्रुत्कर्ण-गतम् । सयावभिः-समानं यान्तीति सयावानः, आतो मनिन्निति वनिप् । एवमेव प्रातर्यावानः ॥

चतुर्दशीमृचमाह—

शृण्वन्तु स्तोमं मरुतः सुदानवोऽग्निजिह्वा ऋतावृधः ।
पिबतु सोमं वरुणो धृतव्रतोऽश्विभ्यामुषसा सजूः ॥१४॥

शृण्वन्तु स्तोमम् मरुतः सुऽदानवः अग्निऽजिह्वाः ऋतऽवृधः पिबतु सोमम् वरुणः धृतऽव्रतः अश्विऽभ्याम् उषसा सऽजूः ॥

मरुतः देवाः स्तोमम् इदं स्तोत्रं शृण्वन्तु आकर्णयन्तु । कीदृशाः ? सुदानवः सुष्ठु दातारः अग्निजिह्वाः अग्निर्जिह्वास्थानीयो येषां ते । ऋतावृधः सत्यस्य वर्धकाः । तथा धृतव्रतः धृतं गृहीतं व्रतं कर्म येन स वरुणः देवः अश्विभ्याम् देवाभ्यां उषसा देव्या च सजूः सहितः सोमम् पिबतु ॥ अग्निजिह्वाः-अन्तोदात्तत्वं छान्दसम् । अन्ये गताः ॥

इति प्रथमस्य तृतीये त्रिंशो वर्गः

अथ नवमेऽनुवाके द्वितीयं 'त्वमग्ने वसू'निति दशर्चं सूक्तम् । प्रस्कण्व ऋषिः अनुष्टुप्-छन्दः अग्निर्देवता, दशम्यां 'अयं सोम' इत्यर्धर्चो देवदेवत्यः ॥

तत्र प्रथमामृचमाह—

त्वमग्ने वसूँरिह रुद्राँ आदित्याँ उत ।
यजा स्वध्वरं जनं मनुजातं घृतप्रुषम् ॥१॥

त्वम् अग्ने वसून् इह रुद्रान् आदित्यान् उत यज सुऽअध्वरम् जनम् मनुऽजातम् घृतऽप्रुषम् ॥

हे अग्ने, त्वं इह अस्मिन् मदीये यजने वसून् रुद्रान् आदित्यान् उत अपि यज पूजय । अपि च स्वध्वरम् शोभनयज्ञसंपन्नं मनुजातम् मनोर्देवस्य मन्तुः प्रजापतिरूपात्

जातं लब्धजन्मानं घृतप्लुषम् घृतेन दीप्त्यात्मकेन घरणेन सेचनेन प्लुष्णन्तं स्नेहयन्तं अञ्जन्तम् इति यावत्, तथाभूतं जनम् च यजेति संबन्धः। न केवलं वस्वादीन् देवान् यज, शुभाध्वरसम्पन्नं धीगतदीप्त्या अग्निं तन्मुखेन देवांश्च अभ्यञ्जन्तं मानुषं जनमपि यज, तादृशस्य मनुजन्मनः देवतुल्यत्वात् देवार्थजीवित्वाच्च ॥ वसुरुद्रादित्याः क्रमशः पृथिव्यादित्रिस्थानाः प्रसिद्धाः ॥

द्वितीयामृचमाह—

श्रुष्टीवानो हि दाशुषे देवा अग्ने विचेतसः ।
तान्रोहिदश्व गिर्वणस्त्रयस्त्रिंशतमा वह ॥२॥

श्रुष्टीऽवानः हि दाशुषे देवाः अग्ने विऽचेतसः तान् रोहित्ऽअश्व गिर्वणः त्रयःऽत्रिंशतम् आ वह ॥

हे अग्ने, विचेतसः विशिष्टज्ञानसम्पन्नाः देवाः, दाशुषे दत्तवते यजमानाय श्रुष्टीवानो हि श्रवणानुरोधेन साहाय्यकारिणः खलु। हे रोहिदश्व रोहिन्नामकैः लोहितवर्णैरश्वैर्युक्त, गिर्वणः गीर्भिः स्तुतिभिर्वननीय अग्ने, त्रयस्त्रिंशतं अनया संख्यया संख्यातान् तान् देवान् आवह इहानय ॥ त्रयश्च त्रिंशच्च देवाः प्रागुपन्यस्ताः (१.३४.११) ॥ श्रुष्टीवानः—श्रुष्टी क्षिप्रार्थकः सर्वत्र, प्रेरणार्थकः इत्यत्र सायणः। शृणोतेरानुषङ्गिकात् श्रुषधातोर्निष्पन्न इति प्रयोगबलादूह्यः। श्रुष्टिं श्रवणं वनन्ति संभजन्ते अनन्तरकर्तव्यायेति श्रुष्टीवानः, दीर्घश्छान्दसः। अन्ये गताः ॥

तृतीयामृचमाह—

प्रियमेधवदत्रिवज्जातवेदो विरूपवत् ।
अङ्गिरस्वन्महिव्रत प्रस्कण्वस्य श्रुधी हवम् ॥३॥

प्रियमेधऽवत् अत्रिऽवत् जातऽवेदः विरूपऽवत् अङ्गिरस्वत् महिऽव्रत प्रस्कण्वस्य श्रुधि हवम् ॥

हे महिव्रत, महाव्रत प्रभूतकर्मन्, जातवेदः अग्ने, प्रस्कण्वस्य मम हवं आह्वानं श्रुधि शृणु। अत्र चत्वारो दृष्टान्ताः—प्रियमेधवत् प्रियमेधस्येव, यथा प्रियमेधस्य ऋषेः,

हवं शृणोषि तद्वत्। अत्रिवत् अत्रेरिव, विरूपवत् विरूपस्येव अङ्गिरस्वत् अङ्गिरस इव। एते च दृष्टान्तभूता ऋषयः॥ प्रियमेधवत्-प्रियो मेधो यज्ञो यस्य सः, तत्र तस्येवेति षष्ठ्यर्थे वतिः। एवम् अत्रिवत्, अत्रिरत्तेः। विरूपः-विविधरूपः नानाकारः। अन्ये गताः॥

चतुर्थीमृचमाह—

महिकेरव ऊतये प्रियमेधा अहूषत।
राजन्तमध्वराणामग्निं शुक्रेण शोचिषा॥४॥

महिऽकेरवः ऊतये प्रियऽमेधाः अहूषत राजन्तम् अध्वराणाम् अग्निम् शुक्रेण शोचिषा॥

महिकेरवः महाकारवः प्रभूतस्तोत्रकर्माणः प्रियमेधाः प्रियमेधसम्पन्नाः ऋषयः ऊतये वृद्धये अग्निम् देवं अहूषत आहूतवन्तः। कीदृशम्? शुक्रेण शुभ्रेण शोचिषा रोचिषा अध्वराणाम् यज्ञानां मध्ये राजन्तं भ्राजमानम्। शुभ्रप्रकाशस्य तिमिरापहत्वात् 'शुक्रेण शोचिषा' स्वर्गाध्वगामिनां अध्वरपदवाच्यानां यज्ञानां ईशानमित्यर्थः॥ महिकेरवः-मह पूजायां, महयो महान्तः, औणादिक इन्प्रत्ययः, केरवः, आकारस्य एकारादेशः छान्दसः, महयो कारवो येषां ते। अन्ये गताः॥

पञ्चमीमृचमाह—

घृताहवन सन्त्येमा उ षु श्रुधी गिरः।
याभिः कण्वस्य सूनवो हवन्तेऽवसे त्वा॥५॥

घृतऽआहवन सन्त्य इमाः ऊम् इति सु श्रुधि गिरः याभिः कण्वस्य सूनवः हवन्ते अवसे त्वा॥

घृताहवन घृतेन दीप्तिसेचनेन आहूयमान, (दीप्तया धिया आहूयते अग्निरन्तर्यजने १.१२.५) सन्त्य दातः, इमा उ गिरः अस्माभिः प्रयुज्यमानाः स्तुतीरपि सु श्रुधि सुष्ठु शृणु। याभिः गीर्भिः कण्वस्य ऋषेः सूनवः सुताः त्वा त्वां अवसे स्वीयवर्धनाय हवन्ते आह्वयन्ति॥ घृताहवन-घृतेन आहूयतेऽस्मिन्, अधिकरणे ल्युट्। सन्त्य-षणु दाने, गतः॥

इति प्रथमस्य तृतीय एकत्रिंशो वर्गः

षष्ठीमृचमाह—

त्वां चित्रश्रवस्तम हवन्ते विक्षु जन्तवः ।
शोचिष्केशं पुरुप्रियाग्ने हव्याय वोळ्हवे ॥६॥
त्वाम् चित्रश्रवःऽतम हवन्ते विक्षु जन्तवः शोचिःऽकेशम् पुरुऽप्रिय अग्ने हव्याय वोळ्हवे ॥

हे चित्रश्रवस्तम अतिशयेन विविधश्रुतियुक्त (व्याख्यातम् १.१.५) पुरुप्रिय पुरूणां बहूनां प्रिय प्रीतिकर, अग्ने, त्वाम् हव्याय हवनस्य प्राप्यत्वात् तदर्थं वोढवे वोढुं विक्षु प्रजासु जन्तवः उत्पन्नाः यजमानाः हवन्ते आह्वयन्ति । कीदृशम् ? शोचिष्केशम् शोचींषि केशा यस्य तं, ज्वाला एव ह्यग्नेः केशा उच्यन्ते ॥ सर्वे गताः ॥

सप्तमीमृचमाह—

नि त्वा होतारमृत्विजं दधिरे वसुवित्तमम् ।
श्रुत्कर्णं सप्रथस्तमं विप्रा अग्ने दिविष्टिषु ॥७॥
नि त्वा होतारम् ऋत्विजम् दधिरे वसुवित्ऽतमम् श्रुत्ऽकर्णम् सप्रथःऽतमं विप्राः अग्ने दिविष्टिषु ॥

हे अग्ने, विप्राः मेधाविनः दिविष्टिषु दिवः द्युलोकस्य इष्टयः एषणानि येषु तेषु यागेषु त्वा त्वां निदधिरे स्थापितवन्तः । कीदृशम् ? होतारम् ऋत्विजम् ऋतुषु यष्टारम्, वसुवित्तमम् अतिशयेन वसोः धनस्य सारभूतस्य द्रव्यस्य वेदितारं ज्ञातारं वेदयितारं लम्भयितारं वा, श्रुत्कर्णम् श्रवणसमर्थकर्णयुक्तं सप्रथस्तमम् अतिशयेन प्रथितम् ॥ दिविष्टिषु—अत्र दिव उत् इति उत्वं न क्रियते, छन्दसि विधयो विकल्प्यन्ते । अन्ये गताः ॥

अष्टमीमृचमाह—

आ त्वा विप्रा अचुच्यवुः सुतसोमा अभि प्रयः ।
बृहद्भा बिभ्रतो हविरग्ने मर्ताय दाशुषे ॥८॥

आ त्वा विप्राः अचुच्यवुः सुतऽसोमाः अभि प्रयः बृहत् भाः बिभ्रतः हविः अग्ने मर्ताय दाशुषे ॥

हे अग्ने, सुतसोमाः सोमाभिषवं कृतवन्तो यजमानाः विप्राः मेधाविनः प्रयः अभिप्रियं (वस्तु किमपि, व्याख्यातम् १.२.४) अभिलक्ष्य त्वा त्वां आ अचुच्यवुः आगमयन्ति। कीदृशम् त्वाम्? बृहत् महान्तं, लिङ्गव्यत्ययः, भाः भासमानं च। कीदृशा विप्राः? दाशुषे दत्तवते यजमानाय मर्ताय मनुष्याय हविः हव्यं बिभ्रतः धारयन्तः। यजमानस्य ऋषेः साहाय्यं कृत्वा महान्तं भान्तं अग्निं ये आगमयन्ति ते न साधारणमनुष्या ऋत्विजः, किं तु स्वयं सुतसोमाः विप्राः अत एव अन्तर्यजनरहस्यविदः सिद्धाः मर्त्यानामुपकुर्वते। गुरवः शिष्याणां भारं यथेदानीमपि वहन्तो तेषां कृत्यं निर्वहन्ति तथेति बोध्यम्॥ अचुच्यवुः--च्युङ् गतौ, अन्तर्भावितण्यर्थः, व्यत्ययेन परस्मैपदम्, लङ्, शपः श्लुः। अन्ये गताः॥

नवमीमृचमाह—

प्रातर्याव्णः सहस्कृत सोमपेयाय सन्त्य।
इहाद्य दैव्यं जनं बर्हिरा सादया वसो ॥९॥

प्रातःऽयाव्नः सहःऽकृत सोमऽपेयाय सन्त्य इह अद्य दैव्यम् जनम् बर्हिः आ सादय वसो इति ॥

हे सहस्कृत सहसा बलेन कृत मथित, (सहसः सूनुरग्निः वेदे विश्रुतः) सन्त्य दातः, वसो धनभूत, अग्ने, इह अस्मिन्नस्मदन्तर्यजनस्थाने अद्य इदानीं सोमपेयाय सोमपानार्थं प्रातर्याव्णः प्रातरागन्तॄन् देवान् दैव्यम् जनम् अन्यं देवताजनमपि बर्हिरासादय आस्तीर्णं प्रापय, सिद्धे आसने उपवेशयेत्यर्थः॥ सहस्कृत--तृतीया, अलुगभावश्छान्दसः। अन्ये गताः॥

दशमीमृचमाह—

अर्वाञ्चं दैव्यं जनमग्ने यक्ष्व सहूतिभिः।
अयं सोमः सुदानवस्तं पात तिरोअह्नयम् ॥१०॥

अर्वाञ्चम् दैव्यम् जनम् अग्ने यक्ष्व सहूतिऽभिः अयम् सोमः सुऽदानवः तम् पात तिरःऽअह्नयम् ॥

हे अग्ने, अर्वाञ्चम् समीपवर्तिनं (अभिमुखमिति सायणः) दैव्यम् जनम् देवसंबन्धिनं दिव्यभावमापन्नं वा जनम् सहूतिभिः समानाह्वानैः अन्यैर्देवैः सह, यक्ष्व यज। हे सुदानवः सुष्ठु दातारः देवाः, अयम् सोमः वर्तते, युष्माकं स्वीकाराय सुतः सिद्धो भवति। तम् पात पिबत। कीदृशम्? तिरोअह्नयम् पूर्वस्मिन्नहनि अभिषुतो यः सोमः उत्तरेऽहनि हूयते स तिरोअह्नय उच्यते यज्ञकर्मसु। अन्तर्यजने तु पूर्वं अभिषुतोऽपि यः सोमः सविलम्बं देवानामागमनं अनुपालयता यजमानेन हूयते स भवति ॥ अह्नयः-अह्नि भवः, भवे छन्दसीति यत्, तिरोहितः अह्नयः तिरोअह्नयः, प्रकृत्या अन्तःपादमिति प्रकृतिभावः ॥

इति प्रथमस्य तृतीये द्वात्रिंशो वर्गः

एषो उषेति पञ्चदशर्चं तृतीयं सूक्तं प्रस्कण्वस्यार्षं गायत्रीच्छन्दस्कम्, आश्विनम् ॥

तत्र प्रथमामृचमाह—

एषो उषा अपूर्व्या व्युच्छति प्रिया दिवः ।
स्तुषे वामश्विना बृहत् ॥१॥

एषो इति उषाः अपूर्व्या वि उच्छति प्रिया दिवः स्तुषे वाम् अश्विना बृहत् ॥

एषो एषैव इतो दृश्यमानास्माभिः अपूर्व्या इतः पूर्वमविद्यमाना इदानीमेव प्रादुर्भूता दिवः प्रिया द्युलोकस्य प्रीतिकरी उषाः व्युच्छति व्युष्टा, प्रभाता भवति। हे अश्विना अश्विनौ वाम् युवां बृहत् प्रभूतं यथा तथा स्तुषे स्तौमि ॥ उषसि अश्विनोः रतिः प्रसिद्धा, दिवो दुहिता ह्यश्विनोर्भार्या ॥ उच्छति-उच्छी विवासे, प्रभातप्रकाशार्थोऽयं धातुः, प्रायेण विपूर्वो वेदे प्रयुक्तः ॥

द्वितीयामृचमाह—

या दस्रा सिन्धुमातरा मनोतरा रयीणाम् ।
धिया देवा वसुऽविदा ॥२॥

या दस्रा सिन्धुऽमातरा मनोतरा रयीणाम् धिया देवा वसुऽविदा ॥

या देवा यावुभौ देवौ दस्रा कर्मनिष्पादकौ सिन्धुमातरौ समुद्रमातृकौ, अखण्डसत्त्वात् समुद्भूतौ हि क्रियादक्षविभवौ तौ देवौ रयीणाम् धनानां मनोतरा मनसा तारयितारौ, मनोऽतीतानां उत्तमानां धनानां दिव्यसंपद्रूपाणां मनोमयतां मनोगोचरतां च आपादयितारौ इत्यर्थः, तथाकर्तुं करणभूता काचिद्बीर्भवति, तदाह-धिया कीदृश्या ? वसुविदा वसोर्मूलद्रव्यस्य सर्वसत्त्वस्य वेदित्र्या लम्भयित्र्या वा । तादृश्या धारणात्मिकया बुद्ध्या 'रयीणां' उक्तलक्षणानां मनोगोचरतां आपादयन्तौ अश्विनौ 'स्तुपे' इति पूर्वेण संबन्धः । अश्विनावधिकृत्य प्राग्विचारितम्, विशेषतः प्रथमेऽनुवाके ॥ मनोतरा-मनसा तरत इति मनोतरौ, अन्तर्भावितण्यर्थः, तरतेः अप्, पूर्वपदान्तस्य सकारस्य रुत्वे सति उत्वं छान्दसम् ॥

तृतीयामृचमाह—

वच्यन्ते वां ककुहासो जूर्णायामधि विष्टपि ।
यद्वां रथो विभिष्पतात् ॥३॥

वच्यन्ते वाम् ककुहासः जूर्णायाम् अधि विष्टपि यत् वाम् रथः विऽभिः पतात् ॥

हे अश्विनौ, वाम् युवयोः रथः जूर्णायाम् स्तुतायां तच्चवेदिभिर्ऋषिभिरिति शेषः, अधिविष्टपि स्वर्लोके यत् यदा विभिः अश्वैः पतात् पतति गच्छति, तदा वाम् युवयोः ककुहासः ककुभः महिमानः वच्यन्ते उच्यन्ते उक्ताः स्तुता भवन्ति । स्तुत्ये द्युलोके यदा अश्विनोः रथो गच्छति तदैव अश्विनोरुत्कर्षाः स्पष्टाः लक्ष्यन्ते, ततः स्तुता भवन्ति । न चेत् स्तोत्रस्य वैयर्थ्यं, स्तोत्रस्य याथार्थ्यं तु अश्विरथस्य विष्टपादूर्ध्वयाने दृश्यमानेषु अश्विनोरुत्कर्षेषु उक्तं भवति ॥

वच्यन्ते-वचेः संप्रसारणाभावः छन्दसि विकल्पितः । ककुहासः-ककुहः महन्नाम, श्रैष्ठ्ये शृङ्गे उत्कर्षे वा प्रयुक्तो वेदे । ककुभं शृङ्गे विदुरिति सायणः, (अत्र लक्षणया स्तुतय इति व्याचष्टे) भस्य हः छान्दसः । जूर्णायाम्-स्तुत्यर्थात् जरतेः जूर्यतेर्वा 'अग्ने रेभो न जरत

ऋभूणां जूर्णिः' (१.१२७.१०) इत्यादौ प्रयोगः स्पष्टः । विभिः–विशब्दो वेदे पक्षिषु शरेषु अश्वेषु मरुत्सु च वर्तते, वियन्ति गच्छन्तीति वयः । पतात्–लेटि आडागमः ॥

चतुर्थीमृचमाह—

हविषा जारो अपां पिपर्ति पपुरिर्नरा ।
पिता कुटस्य चर्षणिः ॥४॥
हविषा जारः अपाम् पिपर्ति पपुरिः नरा पिता कुटस्य चर्षणिः ॥

हे नरा नरौ देवौ अश्विनौ, अपाम् विश्वसर्जनधारणादिसमर्थानां अप्छब्दलक्षितानां शक्तीनां जारः गूढोपभोक्ता, गुप्तरतिकामः अग्निः हविषा यजमानदत्तेन हव्येन पिपर्ति पूरयति देवानिति शेषः । अत्र जारो जरयिता जलानां आदित्य इति सायणः । हविषा पूरणं अग्नेः कृत्यं, न तु सूर्यस्य । जारो रहोरत इति युक्तः, 'जारः कनीनां' 'उषो न जारः' इत्यादौ युक्तिर्द्रष्टव्या । कीदृशोऽसौ अपां जारः ? पपुरिः उक्तप्रकारेण पूरणशीलः, पिता पालकः कुटस्य कृतस्य कर्मणः चर्षणिः द्रष्टा । कुटस्येति सकृदेव प्रयोगः ऋक्संहितायाम् । यास्क-मनुसृत्य सायणः 'कृतस्य' इति व्याचष्टे । कुटः कुटी इव वासस्थाने गृहे भवति । तर्हि गृहमपि कृतमेव भवति, एवं सङ्गच्छते कुटस्य पिता गृहस्य पालकः अग्निर्गृहपतिरिति, चर्षणिर्द्रष्टेति अन्यद्विशेषणं बोध्यम् । पिपर्ति–पॄ पूरणे, जुहोत्यादिः । पपुरिः–पॄधातोः किन् ॥

पञ्चमीमृचमाह—

आदारो वां मतीनां नासत्या मतवचसा ।
पातं सोमस्य धृष्णुया ॥५॥
आऽदारः वाम् मतीनाम् नासत्या मतऽवचसा पातम् सोमस्य धृष्णुऽया ॥

हे मतवचसा, मतं अभिमतं वचः स्तोत्रात्मकं ययोस्तौ, नासत्या नासत्यौ अश्विनौ, वाम् युवयोः मतीनाम् बुद्धीनां आदारः आदरप्रदः उत्तेजकः यः सोमो भवति, तस्य सोमस्य पातम् तं सोमं पिबतम् । कीदृशम् ? धृष्णुया धर्षणशीलं मदकरत्वात् तीव्रम् ॥ आदारः–

दृङ् आदरे, आदरयतीत्यादारः, दारजारौ कर्तरि, णिलुक्, घञ्। धृष्णुया-विभक्तेर्याजादेशः॥

इति प्रथमस्य तृतीये त्रयस्त्रिंशो वर्गः

षष्ठीमृचमाह—

या नः पीपरदश्विना ज्योतिष्मती तमस्तिरः।
तामस्मे रासाथामिषम् ॥६॥

या नः पीपरत् अश्विना ज्योतिष्मती तमः तिरः ताम् अस्मे इति रासाथाम् इषम् ॥

हे अश्विना अश्विनौ, ज्योतिष्मती सारसम्पन्नसत्यात्मकज्योतिर्युक्ता या इट् एषणा तमः अन्धकारं तिरः अन्तर्हितं कृत्वा नः अस्मान् पीपरत् पारयेत् गन्तव्यं प्रापयेदित्यर्थः, ताम् इषम् एषणात्मिकां प्रेरणाशक्तिं अस्मे अस्मभ्यं रासाथाम् युवां दत्तम्। अत्र 'इषं' अन्नमिति सायणः, तदनुसारेण 'तमः' दारिद्र्यरूपं अन्धकारं इति व्याख्यातव्यमनिवार्यमभवत्। अस्माकं तु, तमः प्रकाशप्रतिद्वन्द्वि, तत् तिरस्कृत्य गन्तुमावश्यकी प्रेरणाशक्तिर्ज्योतिष्मती, सा अश्विभ्यां लब्धव्या॥ पीपरदादयो गताः॥

सप्तमीमृचमाह—

आ नो नावा मतीनां यातं पाराय गन्तवे।
युञ्जाथामश्विना रथम् ॥७॥

आ नः नावा मतीनां यातम् पाराय गन्तवे युञ्जाथाम् अश्विना रथम् ॥

हे अश्विना अश्विनौ, मतीनाम् मनोमयीनां धीवृत्तीनां पाराय गन्तवे मनोमयं प्रपञ्च-मतीत्य वर्तमानं पारं गन्तुं नावा नौरूपेण यानसाधनेन नः अस्मदर्थं आयातम् आगच्छतम्। अश्विनौ सिन्धुमातरौ ह्युक्तौ, तद्युक्तं नौरूपं यात्रासाधनम्। रथम् भवदीयं युञ्जाथाम् अश्व-युक्तं कुरुताम्॥

अष्टमीमृचमाह—

अरित्रं॑ वां दि॒वस्पृ॒थु ती॒र्थे सिन्धू॑नां॒ रथः॑ ।
धि॒या यु॑युज्र॒ इन्द॑वः ॥८॥

अरित्रम् वाम् दिवः पृथु तीर्थे सिन्धूनाम् रथः धिया युयुज्रे इन्दवः ॥

हे अश्विनौ, वाम् युवयोः अरित्रम् नौरूपं साधनं दिवः द्युलोकादपि पृथु विस्तीर्णं भवति । किञ्च रथः भवदीयः सिन्धूनां समुद्राणां तीर्थे तीरे अवतरणप्रदेशे विद्यते । इन्दवः सोमाः धिया धारणसमर्थया बुद्ध्या युयुज्रे युक्ता भवन्ति ॥ अरित्रम्–ऋ गतौ, अर्तेः इत्रप्रत्ययः । तीर्थे–तरतेः थक् । युयुज्रे–लडर्थे लिट्, एचो रे आदेशः ॥

नवमीमृचमाह—

दि॒वस्कण्वास॒ इन्द॑वो॒ वसु॑ सिन्धू॑नां प॒दे ।
स्वं व॒व्रिं कु॒ह॑ धित्सथः ॥९॥

दिवः कण्वासः इन्दवः वसु सिन्धूनाम् पदे स्वम् वव्रिम् कुह धित्सथः ॥

हे कण्वासः कण्वा ऋषयः मेधाविनो वा, 'अश्विनावित्थं पृच्छतेति शेषः' इति सायणः । यद्यपि चिन्त्यमेवेदं, केनाप्यध्याहारेण विना दुर्घटमेव तात्पर्यमिति नव्याः । मैवम्, पुरस्तात् ब्रूमः । इन्दवः सोमाः दिवः द्युलोकात् प्रादुर्भूताः विद्यन्ते, वसु सत्त्वात्मकं धनं सिन्धूनाम् समुद्राणां पदे स्थाने विद्यते । हे अश्विनौ युवां स्वम् स्वीयं वव्रिम् रूपं कुह कुत्र धित्सथः धातुं स्थापयितुमिच्छथः ? द्युस्थानः सोमः प्रसिद्धः । 'उच्चा ते जातमन्धसः दिवि सत्' । (९.६१. १०) इत्यादयो मन्त्रवर्णाः प्रमाणम् । अखण्डसत्त्वसमृद्धः समुद्रः प्रथितः, तत्र वसु विद्यते । सिन्धुमातरौ अश्विनौ वसुविदौ, सोमस्य पातारौ च भवतः, अतः पृच्छति स्तोता यजमानः 'हे अश्विनौ युवां किं वसुस्थाने समुद्रे उत सोमजन्मस्थाने दिवि वा स्वीयं रूपं शरीरं आविष्कृत्य प्रतिष्ठापयथः' इत्यत्र, कण्वास इति अश्विनोरेव संबोधनं गृहीतं चेत् क्लेशः शिथिलितः स्यात्, अध्याहारोप्यनावश्यकः । कथमेवं संबोधनमश्विनोरुपपद्यते ? ऋषयः स्वनाम्ना देवता-

माह्वयन्ति, तत्र युक्तिश्चास्माभिः प्राक् प्रदर्शिता। पूजायां बहुवचनं कण्वास इति। कण्वासः कण्वपुत्राः। प्रस्कण्व ऋषिरपि कण्वपुत्र इति स्मार्यम्। इयमृषेर्विवक्षा-सिन्धुपदे युवयोरुद्भवस्थाने वसु सिद्धमेव भवति, दिवि सोमश्च भवदर्थं सिद्धो वर्तते। शीघ्रं प्रयातं, युवयोः रूपं च प्रकट्यताम् इति। पूर्वं अरित्रं सिन्धुपदे वर्तते प्रयाणायेत्युक्तम्, उत्तरासु ऋक्षु सोमस्य पानं उषस आगमश्च कीर्त्येते, तस्मादिदं तात्पर्यं सङ्गच्छते॥ वव्रिम्-वृञ् वरणे, आवरणार्थे वव्रिः, रूपमप्यावरकं भवति रूपिणः, तस्य प्रतिष्ठापकं आविष्कर्तृ च भवति॥

दशमीमृचमाह—

अभूदु भा उ अंशवे हिरण्यं प्रति सूर्यः।
व्यख्यज्जिह्वयासितः॥१०॥

अभूत् ऊम् इति भाः ऊम् इति अंशवे हिरण्यम् प्रति सूर्यः वि अख्यत् जिह्वया असितः॥

ऋतज्योतिष उदय आसन्नः, अतः अश्विनौ प्रयाणाय सन्नद्धौ पदं दधातामिति उदयं वर्णयति, भा उ दीप्तिस्तु अपरिच्छिन्ना एतावत्पर्यन्तं अनुदिता अगोचरा, इदानीं अंशवे अंशभूताय परिच्छिन्नाय दृग्गोचराय किरणाय सिद्धयर्थं अभूत् उ प्रादुर्भूतैव। सूर्यः सत्यज्योतिरात्मा हिरण्यम् प्रति हिरण्यसदृशः अभूत्। अग्निश्च असितः कृष्णो भूत्वा जिह्वया ज्वालया व्यख्यत् प्रकाशितवान्, सूर्यस्य पुरस्तात् ज्वलनस्य अग्नेः कृष्णत्वम्॥ हिरण्यं प्रति-प्रतिः प्रतिनिधौ, कर्मप्रवचनीयः, तद्युक्ते द्वितीया। अख्यत्-चक्षेर्लुङ्, चक्षेः ख्याञादेशः॥

इति प्रथमस्य तृतीये चतुस्त्रिंशो वर्गः

एकादशीमृचमाह—

अभूदु पारमेतवे पन्था ऋतस्य साधुया।
अदर्शि वि स्रुतिर्दिवः॥११॥

अभूत् ऊम् इति पारम् एतवे पन्थाः ऋतस्य साधुऽया अदर्शि वि स्रुतिः दिवः॥

ऋतस्य सत्यस्य ज्योतिषः पारम् एतवे तमसस्पारं गन्तुं साधुया समीचीनः पन्थाः मार्गः अभूत् उ निष्पन्न एव । दिवः द्युलोकात् स्तुतिः स्रवः, दीप्तिप्रसरः व्यदर्शि विशेषेण दृष्टो भवति । तस्मादश्विनोरागमनदशा प्रत्यासन्ना ॥ एतवे–एतेः तुमर्थे तवेन्प्रत्ययः । साधुया–सुपां सुलुक्, विभक्तेर्याच् आदेशः ॥ अदर्शि–कर्मणि लुङ् । स्तुतिः–स्तु गतौ, क्तिच् ॥

द्वादशीमृचमाह—

तत्तदिदश्विनोरवो जरिता प्रति भूषति ।
मदे सोमस्य पिप्रतोः ॥१२॥
तत्ऽतत् इत् अश्विनोः अवः जरिता प्रति भूषति मदे सोमस्य पिप्रतोः ॥

सोमस्य मदे सोमपानजन्ये हर्षे सति पिप्रतोः पूरयतोः यजमानमिति शेषः (सोमं पूरयतोरिति सायणः) अश्विनोः सम्बन्धि तत् तत् इत् तत्तत् कृतं सर्वं अपि, यजमानकृते अश्विनोः प्रसादात् विविधं यद्यद्वैभवं निष्पन्नं तत् सर्वमपि अवः वर्धनं प्रति भूषति प्रत्येकं तदा तदा अलङ्करोति, कृतज्ञतया वर्णयतीत्यर्थः, कः ? जरिता स्तोता यजमानः ॥ पिप्रतोः–पॄ पालनपूरणयोः, जुहोत्यादिः, लटः शतृ ॥

त्रयोदशीमृचमाह—

वावसाना विवस्वति सोमस्य पीत्या गिरा ।
मनुष्वच्छम्भू आ गतम् ॥१३॥
ववसाना विवस्वति सोमस्य पीत्या गिरा मनुष्वत् शम्ऽभू आ गतम् ॥

शम्भू सुखस्य भावयितारौ, विवस्वति प्रकाशवति ववसानौ निवासशीलौ हे अश्विनौ, मनुष्वत् मनौ इव मयि कृपया सोमस्य पीत्या सोमपानाय, चतुर्थ्यर्थे तृतीया, गिरा स्तुत्यै, विभक्तिव्यत्ययः, अस्मदीयस्तोत्राङ्गीकाराय आगतम् आगच्छतम् ॥ 'विवस्वति' परिचरणवति यजमाने 'मनुष्वत्' मनाविव 'ववसाना' निवासशीलौ इति सायणः ॥ ववसाना–वस निवासे,

ताच्छीलिकः चानश्, शपः श्लुः बहुलं छन्दसि, संहितायां अभ्यासस्य दीर्घत्वम्। मनुष्वत्-सप्तम्यर्थे वतिः ॥

चतुर्दशीमृचमाह—

युवोरुषा अनु श्रियं परिज्मनोरुपाचरत् ।
ऋता वनथो अक्तुभिः ॥१४॥

युवोः उषाः अनु श्रियम् परिऽज्मनोः उपऽआचरत् ऋता वनथः अक्तुऽभिः ॥

हे अश्विनौ, परिज्मनोः परितो गन्त्योः युवोः युवयोः श्रियम् शोभां अनु अनुसृत्य उषाः उषोदेवी उपाचरत् उपागता, प्रादुर्भूता युष्मदुपचारायेत्यर्थः। युवां ऋता ऋतानि सत्यानि सत्यसंबन्धीनि वैभवानि अक्तुभिः रात्रिभिः वनथः संभजेथे। कथं ऋतवननं रात्रिभिः उपपद्यते? अप्रकाशावस्थाः रात्रयः, तदीयानां रात्रिगर्भेऽवस्थितानां सर्वेषां वस्तूनां अनुभवानां च ऋतप्रकाशं प्रति प्रापणं आश्विनं कृत्यं भवति, तस्मात् अश्विनोः ऋतवैभवसंमदभरो तदन्तर्वर्तीभिः रात्रिभिर्भवति। तेन यजमानः कृतार्थो भवत्याश्विनेन ऋतवैभवसंभजनेनेति बोध्यम् ॥ परिज्मनोः–परितः अजतो गच्छत इति परिज्मानौ, अजतेर्मनिन्। युवोरित्यादयो गताः ॥

पञ्चदशीमृचमाह—

उभा पिबतमश्विनोभा नः शर्म यच्छतम् ।
अविद्रियाभिरूतिभिः ॥१५॥

उभा पिबतम् अश्विना उभा नः शर्म यच्छतम् अविद्रियाभिः ऊतिऽभिः ॥

हे अश्विना अश्विनौ, उभा उभौ युवां पिबतम् सोमं पिबतम्। ततः परं उभा उभौ युवां अविद्रियाभिः अविदार्याभिः अत एव दृढाभिः ऊतिभिः रक्षाभिः नः अस्मभ्यं शर्म सुखं शरणं वा यच्छतम् दत्तम् ॥ अविद्रियाभिः–द्रु विदारणे, इत्यस्मात् विपूर्वात् भावे किः, विद्रिः,

तद्विरोधिनी अविद्रिः अविदार्यता अभेद्यतेत्यर्थः, तां यान्तीति अविद्रियाः, ताभिरूतिभिः। द्रा कुत्सायां गतौ इत्यस्मान्निष्पादयति रूपं सायणः, प्रक्रिया तु समाना ॥

इति प्रथमस्य तृतीये पञ्चत्रिंशो वर्गः

तृतीयोऽध्यायः समाप्तः

अथ प्रथमाष्टके चतुर्थोऽध्याय आरभ्यते। प्रथमे मण्डले नवमेऽनुवाके त्रीणि सूक्तानि गतानि। 'अयं वाम्' इति दशर्चं चतुर्थं सूक्तम्। कण्वपुत्रः प्रस्कण्व ऋषिः अश्विनौ देवते प्रथमातृतीयाद्या अयुजो बृहत्यः द्वितीयाचतुर्थ्याद्याः सतोबृहत्यः।

तत्र प्रथमामृचमाह—

अयं वां मधुमत्तमः सुतः सोम ऋतावृधा।
तमश्विना पिबतं तिरोअह्न्यं धत्तं रत्नानि दाशुषे ॥१॥

अयम् वाम् मधुमत्ऽतमः सुतः सोमः ऋतऽवृधा तम् अश्विना पिबतम् तिरःऽअह्न्यम् धत्तम् रत्नानि दाशुषे ॥

हे ऋतावृधा ऋतस्य सत्यस्य वर्धयितारौ अश्विनौ, वाम् युवयोः अयम् पुरोवर्ती मधुमत्तमः अतिशयेन माधुर्यवान्, अत्यन्तमधुरः सोमः सुतः अभिषुतो भवति। हे अश्विना अश्विनौ, तिरोअह्न्यम् तिरोभूते पूर्वस्मिन्नहनि भवं अभिषुतं तम् पिबतम्। दाशुषे यथाभागं दत्तवते यजमानाय रत्नानि रमणीयानि हर्षाधायकानि रतिशब्दवाच्यानि धत्तम् धारयतम्॥ तिरोअह्न्यम्—पूर्वसूक्ते व्याख्यातम्। अन्ये गताः ॥

द्वितीयामृचमाह—

त्रिबन्धुरेण त्रिवृता सुपेशसा रथेना यातमश्विना।
कण्वासो वां ब्रह्म कृण्वन्त्यध्वरे तेषां सु शृणुतं हवम् ॥२॥

त्रिऽबन्धुरेण त्रिऽवृता सुपेशसा रथेन आ यातम् अश्विना कण्वासः वाम् ब्रह्म कृण्वन्ति अध्वरे तेषाम् सु शृणुतम् हवम् ॥

हे अश्विना अश्विनौ, त्रिबन्धुरेण त्रिविधबन्धनयुक्तेन त्रिवृता लोकत्रये अप्रतिहतगमनतया वर्तमानेन, सुपेशसा शोभनरूपयुक्तेन रथेन युष्मदीयेन यानसाधनेन आयातम् आगच्छतम्।

कण्वासः कण्वपुत्राः (मेधाविनः) अध्वरे यजने वाम् युष्मदर्थं ब्रह्म मन्त्रात्मकं स्तोत्रं कृण्वन्ति कुर्वन्ति। तेषाम् कण्वपुत्राणां हवम् आह्वानं सु शृणुतम् सुष्ठु आकर्णयतम्॥ त्रिबन्धुरेण-बन्धेरौणादिक उरन्प्रत्ययः। त्रिश्चिन्नो अद्येति (३४ सू.) सूक्तस्य व्याख्यायां त्रिकस्य विचारः कृतः। सुपेशसा-शोभनं पेशो रूपं (हिरण्यं वा) ययोस्तौ। अन्ये गताः॥

तृतीयामृचमाह—

अश्विना मधुमत्तमं पातं सोममृतावृधा।
अथाद्य दस्रा वसु बिभ्रता रथे दाश्वांसमुप गच्छतम्॥३॥

अश्विना मधुमत्ऽतमम् पातम् सोमम् ऋतऽवृधा अथ अद्य दस्रा वसु बिभ्रता रथे दाश्वांसम् उप गच्छतम्॥

हे ऋतावृधा सत्यस्य वर्धयितारौ, अश्विना अश्विनौ, मधुमत्तमम् अत्यन्तमाधुर्योपेतं सोमम्, पातम् पिबतम्। अथ सोमपानात्परं अद्य इदानीं हे दस्रा अश्विनौ, रथे स्वकीये वसु सत्त्वात्मकं धनं बिभ्रता बिभ्रतौ वहन्तौ सन्तौ दाश्वांसम् दत्तवन्तं यजमानं उप गच्छतम् समीपे प्राप्नुतम्॥ सर्वे शब्दा गताः॥

चतुर्थीमृचमाह—

त्रिषधस्थे बर्हिषि विश्ववेदसा मध्वा यज्ञं मिमिक्षतम्।
कण्वासो वां सुतसोमा अभिद्यवो युवां हवन्ते अश्विना॥४॥

त्रिऽसधस्थे बर्हिषि विश्वऽवेदसा मध्वा यज्ञम् मिमिक्षतम् कण्वासः वाम् सुतऽसोमाः अभिऽद्यवः युवाम् हवन्ते अश्विना॥

हे विश्ववेदसा विश्वस्य वेदितारौ सर्वज्ञौ, त्रिषधस्थे त्रिविधे स्थानत्रये सहावस्थिते, बहिस्त्रिलोक्यां अन्तः अन्नमयादिस्थानत्रये, बर्हिषि सिद्धे आसने (कक्षात्रयरूपेण आस्तीर्णे दर्भे इति याज्ञिकपक्षे बोध्यम्) स्थितौ सन्तौ युवां यज्ञम् अस्मदीयं मध्वा मधुना मधुरेण रसेन मिमिक्षतम् सेक्तुमिच्छतम्, इदं नो यजनं रसार्द्रं कुरुतम्। वाम् युष्मदर्थं सुतसोमाः सोमाभिषवं कृतवन्तः अभिद्यवः अभिगतदीप्तयः कण्वासः कण्वपुत्राः ऋषयः मेधाविनो वा हे अश्विना अश्विनौ युवाम् उभौ हवन्ते आह्वयन्ति॥ त्रिषधस्थे-त्रिषु स्थानेषु सह तिष्ठतीति त्रिषधस्थम्, छन्दसि सहशब्दस्य

सधादेशः । मघ्वा–नुमभावः छन्दसि । मिमिक्षतम्–मिह सेचने, सनि लोट्, मध्यमद्विवचनम् । अभिद्यवः–द्युरित्यहर्नाम, तेन प्रकाशो लक्ष्यते, अभिगता द्युं इति अभिद्यवः ॥

पञ्चमीमृचमाह—

याभिः कण्वमभिष्टिभिः प्रावतं युवमश्विना ।
ताभिः ष्व१ स्माँ अवतं शुभस्पती पातं सोममृतावृधा ॥५॥
याभिः कण्वम् अभिष्टिऽभिः प्र आवतम् युवम् अश्विना ताभिः सु अस्मान् अवतम् शुभः पती इति पातम् सोमम् ऋतऽवृधा ॥

हे अश्विना अश्विनौ, युवम् युवां उभौ याभिः अभिष्टिभिः आभिमुख्येन इष्टिभिः इच्छाभिः कण्वम् महर्षिं मेधाविप्रतिमानभूतं प्रावतम् प्रकर्षेण रक्षितवन्तौ, हे शुभस्पती (शोभनस्य कर्मणः पालकौ, इति सायणः) शोभमानायाः सर्वस्या दीप्तेः पालकौ ताभिः 'अभिष्टिभिः' अस्मान् सु सुष्ठु अवतम् रक्षतम् । हे ऋतवृधा सोमम् पातम्, स्पष्टमेतत् ॥ अभिष्टयः–अभिमुखं इष्यन्त इति अभिष्टयः, कर्मणि क्तिन्, एमन्नादिषु छन्दसि पररूपम् । शुभस्पती-त्यादयो गताः ॥

इति प्रथमस्य चतुर्थे प्रथमो वर्गः

षष्ठीमृचमाह—

सुदासे दस्रा वसु बिभ्रता रथे पृक्षो वहतमश्विना ।
रयिं समुद्रादुत वा दिवस्पर्यस्मे धत्तं पुरुस्पृहम् ॥६॥
सुऽदासे दस्रा वसु बिभ्रता रथे पृक्षः वहतम् अश्विना रयिम् समुद्रात् उत वा दिवः परि अस्मे इति धत्तम् पुरुऽस्पृहम् ॥

हे दस्रा कर्मनिष्पादनसमर्थौ अश्विना अश्विनौ, सु दासे शोभनदानयुक्ताय, एतन्नामकाय, राज्ञे वा, रथे वसु बिभ्रता युवां पृक्षः प्रीणनं, पूरयितृ सर्वं वहतम् प्रापितवन्तौ, तथा उदारौ युवां समुद्रात् सत्त्वसमृद्धादखण्डमूलस्थानात् उत वा अथवा दिवः द्युलोकात् परि पर्याहृत्य पुरुस्पृहम् बहुभिर्बहुधा वा स्पृहणीयं रयिम् धनं अस्मे धत्तम् अस्मासु धारयतम् ॥ सुदासे–

सुष्ठु ददातीति सुदाः, असुन्, तस्मै । पुरुस्पृहम्–पुरुभिः बहुभिः स्पृह्यते, कर्मणि घञ् । पृक्षः–पृ पालनपूरणयोः अस्मात् (पृची संपर्के प्रीणने वा इत्यस्मादित्येके) असुनि सुडागमः ॥

सप्तमीमृचमाह—

यन्नासत्या परावति यद्वा स्थो अधि तुर्वशे ।
अतो रथेन सुवृता न आ गतं साकं सूर्यस्य रश्मिभिः ॥७॥

यत् नासत्या पराऽवति यत् वा स्थः अधि तुर्वशे अतः रथेन सुऽवृता नः आ गतम् साकम् सूर्यस्य रश्मिभिः ॥

हे नासत्या अश्विनौ, यत् यदि युवां परावति परस्तात् परस्मिन् स्थाने अतिदूरे स्थः वर्तेथे यद्वा अथवा अधितुर्वशे अधिके समीपे स्थः अतः अस्माद्दूरात् समीपाद्वा सूर्यस्य रश्मिभिः साकम् ऋतज्योतिषोंऽशुभिः सह सुवृता शोभनवर्तनेन रथेन नः अस्मान् प्रति आगतम् आगच्छतम् ॥

अधितुर्वशे अधिके समीपे इति सायणीयम् । तुर्वशशब्दार्थो न कथितः, दूरे समीपे वेति तात्पर्यं तूपपन्नमेव । अत्र वयम्–ऋग्वेदे यदुना सह पठ्यते तुर्वशः एतत्संज्ञको यदोर्भ्राता तुर्वशः तुर्वसुर्वा । संज्ञाशब्दस्यापि अवयवार्थानुसारेणोपपत्तिर्गूढार्थविचार इति स्मारयामः । तर्हि तुर्वशः तुतोर्तेः हिंसार्थात् वष्टेः कान्त्यर्थाच्च निष्पन्नः, वीरः कान्तः कमनीयो वा । तस्मात् जित्वरो वीरः कमनीयो हि स पुरुषः यो देवभावकामः यज्वा अदैव्यान् अरीन् हिंसित्वा जयति, देवप्रियो भवति । अत एव "अधितुर्वशे" इत्यत्र वीरपुरुषस्य यजमानस्य अधिके समीपे वेति व्याख्येयम् ॥ सुवृता–सुष्ठु वर्तत इति सुवृत् तेन ॥

अष्टमीमृचमाह—

अर्वाञ्चा वां सप्तयोऽध्वरश्रियो वहन्तु सवनेदुप ।
इषं पृञ्चन्ता सुकृते सुदानव आ बर्हिः सीदतं नरा ॥८॥

अर्वाञ्चा वाम् सप्तयः अध्वरऽश्रियः वहन्तु सवना इत् उप इषम् पृञ्चन्ता सुऽकृते सुऽदानवे आ बर्हिः सीदतम् नरा ॥

हे अश्विनौ, अध्वरश्रियः अध्वरं श्रयन्ते, यज्ञसेविन इत्यर्थः, सप्तयः अश्वाः सवना इत् उप सवनानि अस्मदीयान्युपलक्ष्यैव अर्वाञ्चा अर्वाञ्चौ अभिमुखौ वाम् युवां वहन्तु प्रापयन्तु। हे नरा नरौ नेतारौ देवौ, सुकृते शोभनकर्मकारिणे सुदानवे शोभनदानयुक्ताय यजमानाय इषम् एषणां प्रेरणात्मिकां शक्तिं पृञ्चन्ता पृञ्चन्तौ संयोजयन्तौ युवां बर्हिः आस्तीर्णं सिद्धमासनं आसीदतम् प्राप्नुतम् ॥ अर्वाञ्चा--विभक्तेराकारः । पृञ्चन्ता--पृची संपर्के, शतरि रुधादित्वात् श्नम्। अन्ये गताः ॥

नवमीमृचमाह—

तेन नासत्या गतं रथेन सूर्यत्वचा ।
येन शश्वदूहथुर्दाशुषे वसु मध्वः सोमस्य पीतये ॥९॥

तेन नासत्या आ गतम् रथेन सूर्यऽत्वचा येन शश्वत् ऊहथुः दाशुषे वसु मध्वः सोमस्य पीतये ॥

हे नासत्या अश्विनौ, सूर्यत्वचा सूर्यः त्वक् चर्मसंवरणं यस्य तेन सूर्यप्रभासंवृतेन तेन प्रसिद्धेन रथेन आगतम् युवां आगच्छतम्। दाशुषे दत्तवते यजमानाय वसु सच्चात्मकं द्रव्यं शश्वत् सर्वदा येन रथेन ऊहथुः वोढवन्तौ प्रापितवन्तौ, तेन रथेनेति पूर्वेण संबन्धः। किमर्थमागमनम्? मध्वः मधुरस्य सोमस्य पीतये पानाय ॥

दशमीमृचमाह—

उक्थेभिरर्वागवसे पुरुवसू अर्कैश्च नि ह्वयामहे ।
शश्वत्कण्वानां सदसि प्रिये हि कं सोमं पपथुरश्विना ॥१०॥

उक्थेभिः अर्वाक् अवसे पुरुऽवसू इति पुरुऽवसू अर्कैः च नि ह्वयामहे शश्वत् कण्वानाम् सदसि प्रिये हि कम् सोमम् पपथुः अश्विना ॥

पुरुवसू बहुधनौ, अश्विनौ अवसे अस्मदभिवृद्ध्यर्थं उक्थेभिः शंसनात्मकैः शस्त्रैर्मन्त्रैः अर्कैश्च दीप्तैः ऋग्रूपैः स्तोत्रैश्च अर्वाक् अस्मदाभिमुख्येन निह्वयामहे नितरामाह्वयामः। हे अश्विना, कण्वानाम् कण्वपुत्राणां, मेधाविनां वा प्रिये सदसि इष्टे यजनस्थाने शश्वत् सर्वदा सोमम् पपथुः

हि कम् युवां सोमं पीतवन्तौ खलु ॥ उक्थेभिः–भिस एसादेशः । अर्कैः–ऋच स्तुतौ, पुंसि संज्ञायामिति करणे घः । निह्वयामहे–निपूर्वो ह्वयतिरात्मनेपदम् । पपथुः–पा पाने, लिटि मध्यमपुरुषद्विवचनम् ।

इति प्रथमस्य चतुर्थे द्वितीयो वर्गः

'सह वामेन' इति षोडशर्चं पञ्चमं सूक्तम् । प्रस्कण्व ऋषिः, अयुजो बृहत्यः युजः सतो-बृहत्यः, उषा देवता ॥

तत्र प्रथमामृचमाह—

सह वामेन न उषो व्युच्छा दुहितर्दिवः ।
सह द्युम्नेन बृहता विभावरि राया देवि दास्वती ॥१॥
सह वामेन नः उषः वि उच्छ दुहितः दिवः सह द्युम्नेन बृहता विभाऽवरि राया देवि दास्वती ॥

हे दिवो दुहितः, द्युलोकस्य पुत्रि, उषः उषोदेवि, वामेन सह वननीयेन सौभाग्येन सह नः अस्माकमर्थे व्युच्छ विभाहि, प्रभातं कुरु हे विभावरि उषः, बृहता बृहच्छब्दवाच्येन सत्यसंबन्धिना महता द्युम्नेन सह दिव्यप्रकाशेन सह व्युच्छ । हे देवि, दास्वती त्वं दानयुक्ता सती राया धनेन दिव्यलक्षणेन व्युच्छ ॥ उच्छ–उच्छी विवासे । विभावरि–भा दीप्तौ, आतो मनिन्निल्यादिना वनिप्, वनो र चेति ङीप्, नकारस्य रेफादेशः, संबोधने ह्रस्वः । दास्वती–डुदाञ् दाने, भावे असुन्, तदस्याः अस्तीति दास्वती ॥

द्वितीयामृचमाह—

अश्वावतीर्गोमतीर्विश्वसुविदो भूरि च्यवन्त वस्तवे ।
उदीरय प्रति मा सूनृता उषश्चोद राधो मघोनाम् ॥२॥
अश्वऽवतीः गोऽमतीः विश्वऽसुविदः भूरि च्यवन्त वस्तवे उत् ईरय प्रति मा सूनृताः उषः चोद राधः मघोनाम् ॥

अश्वावतीः भोगक्रियासमर्थप्राणबलस्य सङ्केतयितारः अश्वाः तद्वत्यः, गोमतीः चित्प्रकाश-मरीचयो गावः तद्वत्यः, उभयत्र मतुप् भूमार्थे, विश्वसुविदः विश्वस्य कृत्स्नस्य सुष्ठु वेदित्र्यः लम्भयित्र्यो वा उषसः वस्तवे अस्माकं भानाय, वासायेत्येके, तर्हि दिव्याय वासाय भूरि प्रभूतं यथा तथा च्यवन्त प्राप्ताः। हे उषः, उषोदेवि, मा प्रति मामुद्दिश्य सूनृताः शोभनाः सत्या वाचः उदीरय ब्रूहि, मघोनाम् धनवतां संबन्धि राधः साधकं धनं चोद अस्मदर्थं चोदय प्रेरय। 'सं चोदय चित्रं राधः विश्व प्रशु' (१.९.५) इत्यत्र यद्राधः चोदयेति प्राह ऋषिः तदेवेहापि राधसो लक्षणं बोध्यम्॥ अश्वावतीः-मन्त्रे सोमादेः मतौ पूर्वपददीर्घत्वं छन्दसि पाक्षिकम्। च्यवन्त-च्युङ् गतौ, लङि अडभावः। वस्तवे-वस विवासे उच्छत्यर्थे, तुमर्थे तवेन्। चोद-चुद सञ्चोदने, चुरादिः, छन्दसि शप्॥

तृतीयामृचमाह—

उवासोषा उच्छाच्च नु देवी जीरा रथानाम्।
ये अस्या आचरणेषु दध्रिरे समुद्रे न श्रवस्यवः॥३॥

उवास उषाः उच्छात् च नु देवी जीरा रथानाम् ये अस्याः आऽचरणेषु दध्रिरे समुद्रे न श्रवस्यवः॥

उषाः देवी उवास उष्टा अभवत्, प्रभातमकरोत्। च नु अद्यापि उच्छात् व्युच्छति प्रभातं करोति। कीदृशी? रथानाम् जीरा प्रेरयित्री। अस्याः उषसः आचरणेषु आगमनेषु ये रथाः दध्रिरे धृताः सज्जीकृता भवन्ति तेषां रथानामिति पूर्वेण संबन्धः। तत्र दृष्टान्तः-श्रवस्यवः समुद्रे न श्रवणकामाः दिव्यावेशश्रुतिं कामयमाना ऋषयः यथा अखण्डसच्चसमृद्धे अपां राशौ ध्रियन्ते, तथा धृताश्च ईप्सितार्थप्राप्तये श्रुतियोगायाधिकारितां लभन्ते, तथोषस आगतये रथाः धृत्या अवस्थिता भवन्ति। स्थूलपक्षीयास्तु, 'श्रवस्यवः धनकामाः समुद्रमध्ये नावं सज्जीकृत्य यथा प्रेरयन्ति तद्वत्' इति॥ उवास-वस उच्छत्यर्थे, लिट्। उच्छात्-लेटि आडागमः। भूते वर्तमाने च 'उवास उच्छात्' इति प्रयोगोऽवधातव्यः। जीरा-जु इति सौत्रो धातुः, जोः ई चेति रक। दध्रिरे-धृङ् अवस्थाने। श्रवस्यवः-श्रूयत इति श्रवः श्रवणं श्रुतिः क्वचित् यशो वा, असुन्, तदात्मन इच्छन्तीति श्रवस्यवः॥

चतुर्थीमृचमाह—

उषो ये ते प्र यामेषु युञ्जते मनो दानाय सूरयः ।
अत्राह तत्कण्व एषां कण्वतमो नाम गृणाति नृणाम् ॥४॥

उषः ये ते प्र यामेषु युञ्जते मनः दानाय सूरयः अत्र अह तत् कण्वः एषाम् कण्वऽतमः नाम गृणाति नृणाम् ॥

हे उषः, ते तव यामेषु गमनेषु सत्सु ये सूरयः विद्वांसः प्रेरणाबलयुक्ताः दानतत्त्वज्ञाः दानाय देवेभ्यो दानार्थं मनः स्वकीयं प्रयुञ्जते प्रेरयन्ति, एषां सूरीणां दानदक्षाणां कण्वतमः अतिशयेन कण्वः मेधावी कण्वः महर्षिः नृणाम् दानशीलानां यजमानानां लोके तत् प्रसिद्धं नाम अत्र अह अस्मिन्नेव काले स्थाने वा गृणाति उच्चारयति । देवभावं प्राप्तानां विदुषां दानक्रियाफलरहस्यविदां श्रेष्ठतमो मेधावी कण्वो महर्षिरेव उषसि प्रादुर्भूतायां दानग्रथितानां नामोच्चारयति, तथोच्चारणेन दाता यजमानश्च उद्दीपितदानप्रेरणाबलः दानफलभूतदिव्यप्रबोधशाली अनन्तरकरणीयाय सन्नद्धो भवति । उषसः प्रादुर्भावस्यायं स्तुत्या महिमा यदत्र देवेभ्यो दानप्रेरणा सूरिभिः कृता यजमानेषु सुफला भवति । अस्यामृचि 'एषां' सूरीणामिति व्याख्यातं, यत्तदोर्नित्यसंबधात् । 'ये सूरयः' इति पूर्वत्र स्थितेश्च । अन्यथा कथयन्ति पूर्वे 'यो दातुमिच्छति यश्च नामग्रहणेन दातारं प्रशंसति तावुभावप्युषःकाल एव तथा कुरुत' इति स्थूलः पक्षः ॥ अह–अवधारणार्थो निपातः । गृणाति–गृ शब्दे ॥

पञ्चमीमृचमाह—

आ घा योषेव सूनर्युषा याति प्रभुञ्जती ।
जरयन्ती वृजनं पद्वदीयत उत्पातयति पक्षिणः ॥५॥

आ घ योषाऽइव सूनरी उषाः याति प्रऽभुञ्जती जरयन्ती वृजनम् पत्ऽवत् ईयते उत् पातयति पक्षिणः ॥

उषाः देवी प्रभुञ्जती प्रकर्षेण पालयन्ती विश्वमिति शेषः, आयाति घ आगच्छति खलु । केव? सूनरी सुष्ठु नेत्री गृहकृत्यस्य योषेव गृहिणी इव । कीदृशी उषाः ? वृजनम् वर्ज्यं वर्जनीयं वा आवरकं तमःप्रदेशं जरयन्ती जरां प्रापयन्ती, क्षपयन्तीत्यर्थः । अत्र वृजनं प्राणिजातमिति सायणः, अन्यत्र (१.१६४.९) स एव 'वृजनीष्वन्तः मेघपङ्क्तिष्वन्तः' इति व्याचष्टे ।

वृजनं प्रावरणं दुर्गस्थानं वा भवति, तत्रापि वर्ज्यत्वाद्धेतोरिति धात्वर्थानुगमो बोध्यः । किञ्च पद्वत् पादयुक्तं प्राणिजातं गमनशीलं ईयते स्वकृत्यार्थं प्रबोधसम्पदा सह गच्छति । पक्षिणः उत्पातयति पतत्रिणः उत्पतनसमर्थान् करोति । अत्र प्रातःकाले प्राणिनः मनुष्याश्च सुप्तोत्थिताः स्वस्वकृत्ये प्रवर्तन्ते, तथा पक्षिणश्च उड्डयन्ते, अयं बाह्योऽर्थः । दिव्यज्ञानप्रभाते अन्तर्याजिनो जनस्य तीव्रा गतिः, ऊर्ध्वगतिसम्पन्नस्य लोकान्तरगतिरत्रस्थस्यैव देहिनः सिध्यतीति रहस्यम् ॥ घा–संहितायां दीर्घः । सूनरी–सुष्ठु नयति, नृ नये । प्रभुञ्जती–भुज पालनाभ्यवहरणयोः रुधादिः, लटः शतृ, उगितश्चेति ङीप् । वृजनम्–वृजी वर्जने, वर्ज्यत इति वृजनम्, कृपृवृजिग्रभृतिभ्यः क्युरिति क्युप्रत्ययः । पद्वत्–पद् पादः तद्वत्, मय इति मतुपो वत्वम् ॥

इति प्रथमस्य चतुर्थे तृतीयो वर्गः

षष्ठीमृचमाह—

वि या सृजति समनं व्य१र्थिनः पदं न वेत्योदती ।
वयो नकिष्टे पप्तिवांस आसते व्युष्टौ वाजिनीवति ॥६॥

वि या सृजति समनम् वि अर्थिनः पदम् न वेति ओदती वयः नकिः ते पप्तिऽवांसः आसते विऽउष्टौ वाजिनीऽवति ॥

या देवी समनम् सम्यक् अनिति चेष्टत इति समनः तं समीचीनचेष्टायुक्तं उद्योगिनं पुरुषं विसृजति विशेषेण प्रेरयति, किंच अर्थिनः मनुष्यान् उत्तममर्थं प्रार्थयतः महत्त्वकाङ्क्षिण इति यावत् वि सृजति प्रेरयति, प्रार्थनाशीलान् न त्वलसान् तमोऽभिभूतान् प्रेरयतीति बोध्यम् । सा ओदती उन्दनशीला, स्वांशुभिः क्लेदयन्ती सुखयन्ती उषोदेवी पदम् स्थानं न वेति न कामयते, न क्वापि स्थातुमिच्छति, सत्वरं गच्छत्येव । हे वाजिनीवति बहुविधसमृद्धियुक्ते उषोदेवते, ते तव व्युष्टौ प्रभाते पप्तिवांसः पतनयुक्ताः वयः पक्षिणः नकिरासते न तिष्ठन्ति, किंतु ऊर्ध्वं पतन्त्येव । वयः पक्षिण इति बाह्योऽर्थः । विशब्दो धीवृत्त्यादिषु अर्थेषु वर्तते, तथा प्रागुक्तम् (१.२५.४,७), तस्माद्वयः ज्ञानांशवः ऊर्ध्वं गच्छन्तीति ग्राह्यम् । ओदती–उन्दी क्लेदने, श्नम्विकरणो धातुः । शतरि व्यत्ययेन शप्, ङीप् । नकिष्टे–युष्मत्तत्ततक्षुष्वन्तः-पादमिति षत्वम् । पप्तिवांसः–पत्लृ गतौ, लिटः क्वसुः,' अन्यत् छान्दसम् । वाजिनीवति–व्याख्यातम् (१.३.१०) ॥

सप्तमीमृचमाह—

एषायुक्त परावतः सूर्यस्योदयनादधि ।
शतं रथेभिः सुऽभगोषा इयं वि यात्यभि मानुषान् ॥७॥

एषा अयुक्त पराऽवतः सूर्यस्य उत् अयनात् अधि शतम् रथेभिः सुऽभगा उषाः इयम् वि याति अभि मानुषान् ॥

एषा प्रस्तुता देवता अयुक्त योजितवती । किं अयुक्त ? शतम् स्वकीयरथानामिति शेषः । सुभगा शोभनो भग ऐश्वर्यं यस्याः सा सौभाग्यवती इयम् उषाः देवी परावतः दूरस्थात् सूर्यस्य उदयनात् अधि सूर्योदयस्थानादधिकादूर्ध्वप्रदेशात् मानुषान् अभि मनुष्यानभिलक्ष्य रथेभिः स्वीयैर्युक्तैः वि याति विशेषेण गच्छति । अयुक्त–युजिर् योगे, लुङ् । उदयनात्–उदेत्यत्रेति उदयनं, इण् गतौ, अधिकरणे ल्युट् । मानुषान्–मनोः पुत्राः मानुषाः, मनोर्जातौ अञ्यतौ षुक् चेति अञ् षुगागमश्च ॥

अष्टमीमृचमाह—

विश्वमस्या नानाम चक्षसे जगज्ज्योतिष्कृणोति सूनरी ।
अप द्वेषो मघोनी दुहिता दिव उषा उच्छदप स्रिधः ॥८॥

विश्वम् अस्याः ननाम चक्षसे जगत् ज्योतिः कृणोति सूनरी अप द्वेषः मघोनी दुहिता दिवः उषाः उच्छत् अप स्रिधः ॥

विश्वम् सर्वं जगत् जङ्गमं प्राणिजातं अस्याः उषसः चक्षसे दर्शनाय ननाम नतं भवति, भक्तिपुरःसरं प्रणतमित्यर्थः । कुत एवं प्रणतिरस्यै भक्तलोकेन क्रियते ? आह । एषा सूनरी सुष्ठु नेत्री, अभिमतं वस्तु स्थानं वा प्रापयति ह्युषोदेवी ज्योतिः कृणोति करोति, सूर्यात्मक-सत्यज्योतिः प्रादुर्भावयति । किंच मघोनी आढ्या दिव्यधनसम्पन्ना दिवः दुहिता द्युलोकस्य पुत्री उषाः देवी द्वेषः द्वेष्टॄन् ज्योतिर्द्वेषिणः तामसान् असुरादीन् वा अप उच्छत् अपवर्ज्य प्रभाति, तथा स्रिधः शोषयितॄन् रसस्य, शुष्णादीन् अप उच्छत् ॥ द्वेषः–द्विष अप्रीतौ, विच्, लघूपधगुणः । मघोनी–मघं वनति, मघवन्शब्दः कनिन्प्रत्ययान्तो निपातितः, श्वयुवमघोनां संप्रसारणं, स्त्रियां ङीप् । उच्छत्–उच्छी विवासे, छन्दसि वर्तमाने लङ् । स्रिधः–स्रिधु शोषणे, क्विप् ॥

नवमीमृचमाह—

उष आ भाहि भानुना चन्द्रेण दुहितर्दिवः ।
आवहन्ती भूर्यस्मभ्यं सौभगं व्युच्छन्ती दिविष्टिषु ॥९॥

उषः आ भाहि भानुना चन्द्रेण दुहितः दिवः आऽवहन्ती भूरि अस्मभ्यम् सौभगम् विऽउच्छन्ती दिविष्टिषु ॥

हे दिवो दुहितः, उषः उषोदेवि, चन्द्रेण आह्लादकेन भानुना उस्रेण आ भाहि सर्वतः प्रकाशस्व । किं कुर्वती ? दिविष्टिषु दिव्शब्दलक्षितस्य सूर्यस्य इष्टयः एषणानि येषु दिवसेषु अन्तर्यागेषु वा तेषु अस्मभ्यम् अस्मदर्थं भूरि प्रभूतं सौभगम् सौभाग्यं आवहन्ती संपादयन्ती, तथा व्युच्छन्ती व्युष्टा प्रभाता भवन्ती ॥ सौभगम्—सुभगस्य भावः, सुभगान्मन्त्रे इत्युद्गात्रादिषु पाठात् अञ्प्रत्ययः, हृद्भगादेः उभयपदवृद्धौ प्राप्तायां उत्तरपदवृद्धिर्न भवति, विधीनां छन्दसि विकल्पात् । अन्ये गताः ॥

दशमीमृचमाह—

विश्वस्य हि प्राणनं जीवनं त्वे वि यदुच्छसि सूनरि ।
सा नो रथेन बृहता विभावरि श्रुधि चित्रामघे हवम् ॥१०॥

विश्वस्य हि प्राणनम् जीवनम् त्वे इति वि यत् उच्छसि सूनरि
सा नः रथेन बृहता विभाऽवरि श्रुधि चित्रऽमघे हवम् ॥

हे सूनरि सुष्ठु नेत्रि उषोदेवि, विश्वस्य सर्वस्य प्राणिलोकस्य प्राणनम् चेष्टनं जीवनम् प्राणधारणं च त्वे हि त्वय्येव वर्तेते । यत् यस्मात् त्वं व्युच्छसि व्युष्टा भवसि । हे विभावरि विशिष्टभायुक्ते, सा तथाभूता त्वं नः अस्मान् प्रति बृहता रथेन महता रथेन आ याहि इति शेषः । हे चित्रमघे चित्रं विविधं मघं धनं यस्याः सा चित्रमघा, संहितायां दीर्घः, तस्याः संबुद्धिः, हवम् आह्वानं अस्मदीयं श्रुधि शृणु ॥ प्राणनम्—अन चेष्टायाम्, भावे ल्युट् ॥

इति प्रथमस्य चतुर्थे चतुर्थो वर्गः

एकादशीमृचमाह—

उषो वाजं हि वंस्व यश्चित्रो मानुषे जने ।
तेना वह सुकृतो अध्वराँ उप ये त्वा गृणन्ति वह्नयः ॥११॥

उषः वाजम् हि वंस्व यः चित्रः मानुषे जने तेन आ वह सुऽकृतः अध्वरान् उप ये त्वा गृणन्ति वह्नयः ॥

हे उषः, वाजम् हि समृद्धिप्रतिपादकं बलादिकं भोग्यं प्रसिद्धम् वंस्व वनुष्व, अर्थय, स्वीकुरु । यः वाजः मानुषे मनुष्ये जने जाते यजमाने चित्रः विविधः चायनीयो वा वर्तते तं 'वाजं वंस्व' इति संबन्धः । तेन तथा त्वया करणेन, यजमानगतवाजस्वीकरणेन सुकृतः सुष्ठु कृतवतो यजमानान् अध्वरान् स्वर्मार्गप्रदान् यज्ञान् उपावह प्रापय । ये यजमानाः वह्नयः वोढारः, त्वदीयमनुग्रहं बिभ्रतः (यज्ञनिर्वाहका इति सायणः) त्वा त्वां गृणन्ति स्तुवन्ति । यजमानदत्तं वाजं स्वीकृत्य तं दिव्यमार्गप्रदं अध्वरशब्दवाच्यं फलविशेषं प्रापयत्युषाः ॥ वंस्व—वनु याचने, विकरणस्य लुक् । सुकृतः—सुकर्मेत्यादिना करोतेः क्विप् । अन्ये गताः ॥

द्वादशीमृचमाह—

विश्वान्देवाँ आ वह सोमपीतयेऽन्तरिक्षादुषस्त्वम् ।
सास्मासु धा गोमदश्वावदुक्थ्य १ मुषो वाजं सुवीर्यम् ॥१२॥

विश्वान् देवान् आ वह सोमऽपीतये अन्तरिक्षात् उषः त्वम् सा अस्मासु धाः गोऽमत् अश्वऽवत् उक्थ्यम् उषः वाजम् सुऽवीर्यम् ॥

हे उषः, त्वम् सोमपीतये सोमपानाय अन्तरिक्षात् आकाशात्, ऊर्ध्वस्थानोपलक्षणं अन्तरिक्षं बोध्यम्, ऊर्ध्वस्थाना हि देवाः । विश्वान् देवान् आवह प्रापय अस्मद्यजनमिति शेषः । हे उषः, सा तादृशी त्वम् गोमत् गोभिः चिद्रश्मिभिर्युक्तं अश्वावत् अश्वैः उक्तलक्षणैः प्राणबलसङ्केतभूतैर्युक्तं उक्थ्यम् उक्थे स्तोत्रे भवं प्रशस्यं सुवीर्यम् शोभनवीर्योपेतं वाजम् समृद्धिसम्पन्नं भोग्यं वस्तु अस्मासु यजमानेषु धाः निधेहि, स्थापयेत्यर्थः ॥ गोमत्—गोमन्तं, विभक्तेर्लोपः, एवं अश्वावत्, संहितायां मतुपि दीर्घत्वम् ॥

त्रयोदशीमृचमाह—

यस्या॒ रुश॑न्तो अ॒र्चय॒: प्रति॑ भ॒द्रा अद॑क्षत ।
सा नो॑ र॒यिं वि॒श्ववा॑रं सुपेश॒समु॒षा द॑दातु सुग्म्य॑म् ॥१३॥

यस्याः रुशन्तः अर्चयः प्रति भद्राः अदक्षत सा नः रयिम् विश्वऽवारम् सुऽपेशसम् उषाः ददातु सुग्म्यम् ॥

यस्याः उषसः अर्चयः प्रकाशाः रुशन्तः दीप्यमानाः सन्तः भद्राः कल्याणाः प्रत्यदक्षत प्रतिदृश्यन्ते, सा तादृशी उषाः नः अस्मभ्यं रयिम् वक्ष्यमाणलक्षणं धनं ददातु । कीदृशं रयिम् ? विश्ववारम् विश्वैर्वरणीयं सर्वोत्तमं सुपेशसम् शोभनस्वरूपं सुग्म्यम् सुखनाम, सुखेन गन्तव्यम् ॥ रुशन्तः–दीप्त्यर्थो धातुः हिंसार्थे गृहीतः सायणीये । अदक्षत–दृशेः कर्मणि लुङ् । झस्यादादेशः, च्लेः सिच्, अन्यच्च छान्दसम् । विश्ववारम्–विश्वैर्व्रियत इति विश्ववारः, कर्मणि घञ् । सुग्म्यम्–सुष्ठु गन्तव्यः सुग्मः, गमेः घञर्थे कविधानं, उपधालोपः, तत्र भवं सुग्म्यं, भवे छन्दसि ॥

चतुर्दशीमृचमाह—

ये चि॒द्धि त्वामृष॑य॒: पूर्व॑ ऊ॒तये॑ जुहू॒रेऽव॑से महि ।
सा नः॒ स्तोमाँ॑ अ॒भि गृ॑णीहि॒ राध॒सोषः॒ शुक्रे॑ण शो॒चिषा॑ ॥१४॥

ये चित् हि त्वाम् ऋषयः पूर्वे ऊतये जुहूरे अवसे महि सा नः स्तोमान् अभि गृणीहि राधसा उषः शुक्रेण शोचिषा ॥

हे महि महिते, उषोदेवि, ये चिद्धि ये खलु विश्रुताः पूर्वे चिरन्तनाः ऋषयः मन्त्रद्रष्टारः त्वाम् ऊतये रक्षणाय अवसे स्वाभिवर्धनाय च जुहूरे जुह्विरे आहूतवन्तः मन्त्रात्मकैः स्तोत्रैरिति शेषः । हे उषः, सा तादृशी त्वं राधसा 'चित्रं राधो अमर्त्य' 'चित्रं राधो.....विभु प्रभु' इत्यादौ कीर्तितस्वरूपेण धनेन, शुक्रेण शोचिषा दीप्तेन तेजसा चोपलक्षिता सती, सहयोग-लक्षणा तृतीया, नः अस्माकं संबन्धिनः स्तोमान् स्तुतीः अभि गृणीहि अभिलक्ष्य शब्दय, प्रतिवचनं स्वीकृताः स्तोमा इति देहि ॥ जुहूरे–ह्वयतेर्लिट्, इरयो रे इति इरेचो रे आदेशः छन्दसि । महि–मह पूजायाम्, औणादिक इप्रत्ययः, ङीष्, संबुद्धौ ह्रस्वत्वम् । गृणीहि–गृणातेः लोट् । अन्ये गताः ॥

पञ्चदशीमृचमाह—

उषो यदद्य भानुना वि द्वारावृणवो दिवः ।
प्र नो यच्छतादवृकं पृथु छर्दिः प्र देवि गोमतीरिषः ॥१५॥

उषः यत् अद्य भानुना वि द्वारौ ऋणवः दिवः प्र नः यच्छतात् अवृकम् पृथु छर्दिः प्र देवि गोऽमतीः इषः ॥

हे उषः, त्वं यत् यस्मात् अद्य इदानीं भानुना प्रकाशेन दिवः द्युलोकस्य द्वारौ व्यृणवः विश्लिष्य प्रामोषि, तस्मात् त्वं नः अस्मभ्यं छर्दिः दिव्यं गृहं (छर्दिः छदिरिति गृहनामसु पाठात्) प्रयच्छतात् प्रदेहि । कीदृशं छर्दिः ? अवृकम् छेदकरहितं अच्छेद्यं पृथु विस्तीर्णं च । अपि च हे देवि देवनशीले, गोमतीः चिद्रश्मिसम्पन्नाः इषः प्रेरणाशक्तीः नः प्र प्रकर्षेण यच्छतात् देहि । 'द्वारौ' पूर्वापरदिगन्तौ अन्धकारेणाच्छादितौ इति बाह्योऽर्थः । अन्तर्यजने तु स्वर्लोकस्य बहिर्द्वारम्-अन्तर्द्वारमिति द्वारद्वयमपि उषसा उद्घाटितं भवतीति बोध्यम् ॥ ऋणवः—गत्यर्थात् ऋणोतेः तनादित्वादुप्रत्ययः, लङ्, छान्दसः अडभावादिः । छर्दिः—गृहनाम, उच्छृदिर् दीप्तिदेवनयोः ॥

षोडशीमृचमाह—

सं नो राया बृहता विश्वपेशसा मिमिक्ष्वा समिळाभिरा ।
सं द्युम्नेन विश्वतुरोषो महि सं वाजैर्वाजिनीवति ॥१६॥

सम् नः राया बृहता विश्वऽपेशसा मिमिक्ष्व सम् इळाभिः आ सम् द्युम्नेन विश्वऽतुरा उषः महि सम् वाजैः वाजिनीऽवति ॥

हे उषः, नः अस्मान् राया धनेन वक्ष्यमाणलक्षणेन संमिमिक्ष्व सम्यक् सिञ्च, संयोजयेत्यर्थः । कीदृशेन राया ? बृहता महता विश्वपेशसा विश्वानि विविधानि सर्वाणि पेशांसि यस्य तेन । तथा इळाभिः आ पश्यन्ती वाक् इळा इति प्रागुक्तम्, (गौः, अन्नं, वाक् इत्यादयः सायणीयः स्थूलोऽर्थः), आ समुच्चये, पश्यन्तीभिर्वाग्भिश्च सम् मिमिक्ष्व । किञ्च, हे महि महनीये, उषः, द्युम्नेन द्योतेन सम् मिमिक्ष्व । कीदृशेन द्युम्नेन ? विश्वतुरा विश्वं तुर्वति हिनस्ति जयतीति विश्वतूः तेन विश्वजयशीलेन । तथा हे वाजिनीवति समर्धनक्रियासम्पन्ने वाजैः

समृद्धिभिः तेजोबलैश्वर्यादीनामिति शेषः, नः सम् 'मिमिक्ष्व' ॥ मिमिक्ष्व-मिह सेचने, व्यत्ययेन आत्मनेपदम् । वाजिनीवति-गतम् ॥

इति प्रथमस्य चतुर्थे पञ्चमो वर्गः

'उषो भद्रेभि'रिति चतुर्ऋचं षष्ठं सूक्तम् उषस्यं आनुष्टुभं कण्वपुत्रस्य प्रस्कण्वस्यार्षम् ॥

तत्र प्रथमामृचमाह—

उषो भद्रेभिरा गहि दिवश्चिद्रोचनादधि ।
वहन्त्वरुणप्सव उप त्वा सोमिनो गृहम् ॥१॥

उषः भद्रेभिः आ गहि दिवः चित् रोचनात् अधि वहन्तु अरुणऽप्सवः उप त्वा सोमिनः गृहम् ॥

हे उषः, भद्रेभिः कल्याणैः पथिभिः दिवः द्युलोकात् चित् पूजितार्थे, पूजितात् रोचनात् रोचमानात् दीप्यमानात् अधि उपरि वर्तमानात् स्थानात् आगहि आगच्छ। हे उषः, अरुणप्सवः अरुणवर्णा गावः चित्प्रकाशरश्मयः सोमिनः सोमयुक्तस्य शरीरिणः अन्तर्याजिनो गृहम् यज्ञ-गृहभूतं शरीरं त्वा त्वां उपवहन्तु प्रापयन्तु । गवामरुणवर्णस्तु प्रज्ञानप्रभातकालयोग्यतां द्योतयेत् ॥ अरुणप्सवः-प्सा भक्षणे, प्सान्तीति प्सवः (औणादिकः कुप्रत्ययः) स्तनं पिबन्तो वत्साः, अरुणाः प्सवो वत्सा यासां ताः अरुणप्सवो गावः ।

द्वितीयामृचमाह—

सुपेशसं सुखं रथं यमध्यस्था उषस्त्वम् ।
तेना सुश्रवसं जनं प्रावाद्य दुहितर्दिवः ॥२॥

सुऽपेशसम् सुऽखम् रथम् यम् अधिऽअस्थाः उषः त्वम् तेन सुऽश्रवसम् जनम् प्र अव अद्य दुहितः दिवः ॥

हे उषः, त्वम् सुपेशसम् शोभनरूपयुक्तं सुखम् सुखहेतुभूतं, अथवा सुखं यथा तथेति क्रियाविशेषणं यम् रथम् अध्यस्थाः अधितिष्ठसि, तेन रथेन साधनेन अद्य इदानीं दिवो दुहितः

हे उषः, सुश्रवसम् शोभनश्रवणसंपन्नं जनम् यजमानं प्राव प्रकर्षेण वर्धय । यजमानस्य दिव्यश्रुतिसम्पन्नस्य शीघ्रमूर्ध्वयानसाधनभूत उषसो रथः, तथा सत्वरा दिव्यगतिरेव तस्य वर्धनं भवति ॥ प्राव–अवधातुर्वर्धनेऽपि वर्तते, प्राग्विचारितश्च प्रथमानुवाके ।

तृतीयामृचमाह—

वयश्चित्ते पतत्रिणो द्विपच्चतुष्पदर्जुनि ।
उषः प्रारन्नृतूँरनु दिवो अन्तेभ्यस्परि ॥३॥

वयः चित् ते पतत्रिणः द्विऽपत् चतुःऽपत् अर्जुनि उषः प्र आरन् ऋतून् अनु दिवः अन्तेभ्यः परि ॥

अस्या ऋचः बाह्योऽर्थः उषःकालीनप्राणिजातगतिवर्णनपरः स्पष्टः । रहस्यार्थस्तु–हे अर्जुनि शुभ्रवर्णे उषः, चित्प्रकाशोदयस्य नैर्मल्यद्योतकं संबोधनम्, ते तव ऋतून् अनु दिव्याः प्रादुर्भाववेलाः अनुलक्ष्य (बह्वीनां उषसां आगतिः अवश्या प्रागवस्था सूर्यात्मनः सत्यज्योतिषः प्रादुर्भावस्येति प्रपञ्चितं पूर्वम्), द्विपत् द्विपात् पदद्वयवान् यजमानः, अप्रकाशावस्था प्रकाशावस्था इति अवस्थाद्वयानुसारेण द्वे पदे स्थाने वर्तेते यस्य स द्विपात्, चतुष्पत् चतुष्पात् चत्वारि पदानि स्थानानि आविष्कृतानि यस्य स यजमानः भूः भुवः स्वः महः इति व्याहृतिपदवेदनीयेषु स्थानेषु पदं लब्धवान्, तथा पतत्रिणः पतत्रवन्तः उत्पतनशीलाः ऊर्ध्वगमनसमर्थाः वयः चित् प्रज्ञानवृत्तिविशेषाश्च दिवः अन्तेभ्यः द्युलोकप्रान्तेभ्यः परि उपरि प्रारन् प्रकर्षेण गच्छन्ति । एवं सर्वेऽपि द्विपात्प्रभृतयः चित्प्रभाते दिवं प्रति उद्यता भवन्ति ॥ द्विपत्–द्वौ पादौ अस्येति पादशब्दस्य अन्त्यलोपः समासान्तः, अयस्मयादित्वेन भत्वात् पादः पदिति पद्भावः । एवं चतुष्पत् । आरन्–ऋ गतौ, छन्दसि लुङ् लडर्थे । ऋतून्–ऋ गतौ असात् औणादिको भावे क्तप्रत्ययः ॥

चतुर्थीमृचमाह—

व्युच्छन्ती हि रश्मिभिर्विश्वमाभासि रोचनम् ।
तां त्वामुषर्वसूयवो गीर्भिः कण्वा अहूषत ॥४॥

विऽउच्छन्ती हि रश्मिऽभिः विश्वम् आऽभासि रोचनम् ताम् त्वाम् उषः वसुऽयवः गीःऽभिः कण्वाः अहूषत ॥

हे उषः, व्युच्छन्ती व्युष्टा भवन्ती त्वं रश्मिभिः तेजोभिः स्वकीयैः विश्वम् सर्वं जगत् भूतजातं वा रोचनम् रोचमानं यथा भवति तथा आ भासि सर्वतः प्रकाशसे। हि यस्मादेवं तस्मात् ताम् तथाभूतां त्वाम् वसूयवः वसु सत्त्वात्मकं धनं आत्मन इच्छन्तः कण्वाः मेधाविप्रतिमानभूताः महर्षयः गीर्भिः स्तुतिलक्षणैर्वचोभिः अहूषत आह्वयन्ति ॥ अहूषत–ह्वेञो लुङि ह्वः संप्रसारणं, परपूर्वत्वे हल इति दीर्घत्वं, संज्ञापूर्वकस्य विधेरनित्यत्वाद् गुणाभावः ॥

इति प्रथमस्य चतुर्थे षष्ठो वर्गः

'उदु त्य'मिति त्रयोदशर्चं सूर्यदेवत्यं सप्तमं सूक्तं प्रस्कण्वस्यार्षम्। प्रथमादिनवम्यन्ताः गायत्र्यः शिष्टाश्चतस्रोऽनुष्टुभः। सर्वेषां देवानामादिरन्तश्च सूर्यात्मना प्रतीकेन बहिर्मुखानामनुग्रहाय बहिरुपास्यतया चिरन्तनैर्मन्त्रद्रष्टृभिरुपदिश्यते। स परमः पुरुषः, तत् परं ज्योतिः, तमसः परस्तान्नित्य आत्मा जगतस्तस्थुषश्चेति श्रुतीनामुद्घोषः प्रसिद्धः। यद्यपि ऊर्ध्वमूलाद्विश्वस्मात् परस्तादेव तत्पदं भवति, तथापि परिपक्के यजमाने देवताप्रसादलाभस्यावकाशे सति, परस्य ज्योतिषः प्रादुर्भावः सम्पद्यते। स च सूर्योदयपदवेदनीयः साक्षात्कारो वैदिके योगे आरोहणरूपो यजमानमूर्ध्वं उत्तमं पदं नयतीति रहस्यम्, इतः अधःसमुद्रात् 'अप्रकेतात् सलिलात्' तमःशब्दवाच्य-अचित्प्रकाशावस्थायाः रात्रेरन्ते ऋतज्योतिषः उदयारोहादि मन्त्रवर्णेषु तथा वर्ण्यते यथा बहिः सूर्यस्योदयादावपि तात्पर्यं सङ्गच्छेत। अत एव वैदिकयोगनिष्ठारहस्यबाह्या मुह्यन्ति साधारणसूर्योदयादिवर्णनमात्रपरा मन्त्रा इति ॥

तत्र सूक्ते प्रथमामृचमाह—

उदु त्यं जातवेदसं देवं वहन्ति केतवः।
दृशे विश्वाय सूर्यम् ॥१॥

उत् उम् इति त्यम् जातऽवेदसम् देवम् वहन्ति केतवः दृशे विश्वाय सूर्यम् ॥

त्यम् तं प्रसिद्धं जातवेदसम् जातानि सर्वाणि वेत्तीति जातवेदाः तम्, देवम् सूर्यम् सर्वस्य प्रेरकं आदित्यं केतवः प्रज्ञापका रश्मयः सूर्याश्वस्थानीयाः चिदंशव इति यावत् उद्वहन्ति ऊर्ध्वं वहन्ति, उ पदपूरणः। किमर्थम्? विश्वाय विश्वस्मै भुवनाय दृशे द्रष्टुं, यथा विश्वं भुवनं सूर्यं पश्येत् तथा केतवस्तमुद्वहन्तीत्यर्थः॥ दृशे–दृशे विख्ये चेति तुमर्थे निपातितः। सूर्यम्–षू प्रेरणे, अस्मात् क्यप् निपातितः, रुडागमश्च॥

द्वितीयामृचमाह—

अप॒ त्ये ता॒यवो॑ यथा॒ नक्ष॑त्रा यन्त्य॒क्तुभिः॑।
सूर॑य वि॒श्वच॑क्षसे॥२॥

अप॑ त्ये ता॒यवः॒ य॒था॒ नक्ष॑त्रा य॒न्ति॒ अ॒क्तुऽभिः॑ सूर॑य वि॒श्वऽच॑क्षसे॥

विश्वचक्षसे विश्वं चष्टे प्रकाशयतीति विश्वचक्षाः (असुन्) तस्मै सूराय सूर्याय, विभक्तिव्यत्ययः, सूर्यस्यागमने इति शेषः, नक्षत्रा नक्षत्राणि रात्रौ दृश्यमानानि ज्योतींषि अक्तुभिः रात्रिभिः सह अपयन्ति अपगच्छन्ति, त्ये तायवः यथा यथा ते तस्कराः अन्यद्रव्यापहारिणः द्रव्यस्वामिनः पुरस्तान्न तिष्ठन्ति, तथा ज्योतिषां स्वामिनः पुरः यजमानस्य अप्रकाशदशासु अन्धकारस्वामिनीषु रात्रिषु अल्पप्रकाशविधायीनि ज्योतींषि पलायितानि भवन्ति॥

तृतीयामृचमाह—

अदृ॑श्रमस्य के॒तवो॒ वि र॒श्मयो॒ जना॒ँ अनु॑।
भ्राज॑न्तो अ॒ग्नयो॑ यथा॥३॥

अदृ॑श्रम् अ॒स्य॒ के॒तवः॑ वि र॒श्मयः॑ जना॑न् अनु॑ भ्राज॑न्तः अ॒ग्नयः॑ य॒था॒॥

अस्य सूर्यस्य केतवः प्रज्ञापका रश्मयः अंशवः जनान् जातान् सर्वान् अनु अनुक्रमेण तेषां परिपाकविशेषप्राप्तयोग्यतानुसारेण क्रमश इत्यर्थः व्यदृश्रम् प्रेक्षन्ते। तथा प्रेक्षणमेव प्रकाशनं भवति। तत्र दृष्टान्तः–यथा भ्राजन्तः अग्नयः दीप्यमानाः अग्नयो यथा प्रकाशयन्ति तद्वत्॥

अदश्रम्–दृशिर् प्रेक्षणे, वर्तमाने लुङ्, इरितः च्लेरङादेशः, रुडागमः, तिङां तिङो भवन्तीति प्रथमपुरुषबहुवचनस्य उत्तमपुरुषैकवचनादेशः। 'अदश्रन्' इति वाजसनेयिसंहितापाठः (८ अ०–४० म०)॥

चतुर्थीमृचमाह—

तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य।
विश्वमा भासि रोचनम् ॥४॥

तरणिः विश्वऽदर्शतः ज्योतिःऽकृत् असि सूर्य विश्वम् आ भासि रोचनम्॥

हे सूर्य सर्वस्य प्रेरक परमात्मन्, त्वं तरणिः तारयिता यजमानं तमसस्पारं इति शेषः (तरिता महतोऽध्वनो गन्ता इति स्थूलोऽर्थः) विश्वदर्शतः विश्वैः सर्वैर्द्रष्टव्यः, सर्वैर्यजमानैः साक्षात्कर्तव्यो हि स परमेश्वरः, ज्योतिष्कृत् ज्योतिषां कर्ता प्रकाशयिता च असि। 'आत्मा वा अरे द्रष्टव्यः', 'तमेव भान्तमनु भाति सर्वं तस्य भासा सर्वमिदं विभाति' इत्याद्युपनिषद्वाक्यानां मूलं एतादृशेषु मन्त्रेषु स्फुटं लक्ष्यते। किं च त्वं विश्वम् सर्वं रोचनम् रोचमानं यथा भवति तथा आ भासि सर्वतः प्रकाशसे, प्रकाशयसि इति अन्तर्भावितण्यर्थो वा॥ तॄ–प्लवनसंतरणयोः अस्मात् अनिप्रत्ययः। अन्ये गताः॥

पञ्चमीमृचमाह—

प्रत्यङ् देवानां विशः प्रत्यङ्ङुदेषि मानुषान्।
प्रत्यङ्विश्वं स्वर्दृशे ॥५॥

प्रत्यङ् देवानाम् विशः प्रत्यङ् उत् एषि मानुषान् प्रत्यङ् विश्वम् स्वः दृशे॥

हे सूर्य, देवानाम् विशः द्युलोकवासिनो जनान् दैवान् (मरुत इत्येके, तथा अन्यत्र श्रुतेरित्याहुः) प्रत्यङ् प्रतिगच्छन् उदेषि उदयं प्राप्नोषि, तथा मानुषान् मनुष्यान् प्रत्यङ् प्रतिगच्छन् उदेषि। तथा विश्वम् स्वः सर्वं स्वर्-आख्यं ज्योतिः, दृशे द्रष्टुं प्रत्यङ् प्रतिगच्छन्

उदेषि । इह मानुषो जनः यजमानः अमुत्र दैव्यो जनः ततश्च स्वर्लोकः तत्र सयुग्जनो वा, एवं सर्वोऽपि 'स्वाभिमुखो भगवान् प्रादुर्भवति ज्योतिषां पति'रिति यथा पश्येत् तथा त्वमुदेषीत्युक्तं भवति ॥ प्रत्यङ्-प्रतिपूर्वाद्गत्यर्थादञ्चतेः क्विन्, प्रत्ययस्य कुत्वम् ॥

इति प्रथमस्य चतुर्थे सप्तमो वर्गः

षष्ठीमृचमाह—

येना पावक चक्षसा भुरण्यन्तं जनाँ अनु ।
त्वं वरुण पश्यसि ॥६॥
येन पावक चक्षसा भुरण्यन्तम् जनान् अनु त्वम् वरुण पश्यसि ॥

हे पावक शोधक, वरुण वरुणात्मक सूर्य, त्वम् जनान् जन्मिनः भुरण्यन्तम् धारयन्तं पोषयन्तं वा लोकं येन चक्षसा येन चक्षुषा अनु पश्यसि अनुक्रमेण वीक्षसे, तेन व्येषि इति उत्तरस्यामृचि संबन्धः । पावकेति संबोधनात् वरुणस्य पारिशुद्ध्यप्रदत्वेन प्रसिद्धेश्च वरुणात्मकः सूर्य आमन्त्रित इति व्याख्यातम् । अनिष्टनिवारकेति सायणीयम् । अवयवार्थानुसारेणैवं गृहीतं चेत्, वृञ् वरणे इति निष्पन्नत्वात् सर्वमप्यावृत्य स्थितो वरुणो विपुलः सर्वव्यापीति साधीयानर्थः ॥ भुरण्यन्तम्-भुरण धारणपोषणयोः कण्ड्वादिः, तस्माद् यक् ॥

सप्तमीमृचमाह—

वि द्यामेषि रजस्पृथ्वहा मिमानो अक्तुभिः ।
पश्यञ्जन्मानि सूर्य ॥७॥
वि द्याम् एषि रजः पृथु अहा मिमानः अक्तुऽभिः पश्यन् जन्मानि सूर्य ॥

हे सूर्य, त्वं पृथु विस्तीर्णं रजः अन्तरिक्षम् द्याम् दिवं च व्येषि विशेषेण गच्छसि । किं कुर्वन् ? अक्तुभिः त्वदीयैरंशुभिः अहा अहानि मिमानः अह्नां मानं कुर्वन्, तथा जन्मानि जन्मवन्ति, दिव्ये प्रकाशे लब्धजन्मनोऽन्तर्याजिनो जनान् पश्यन् प्रेक्षमाणः । अत्र 'अक्तुभिः (सह) अहानि मिमानः उत्पादयन्' इति बाह्योऽर्थः सूर्यायत्तत्वात् अहोरात्रमानस्य । क्वचित्

अक्तवोऽशव इति प्रागुक्तमवधेयम्। सूर्यांशुभिरेव अहः संभवति। बह्वयः अन्तःप्रकाशदशाः अन्तर्याजिनो भवन्ति, इदं च तत्त्वं उषस्यविचारे प्रतिपादितम् ॥ मिमानः–माङ् माने जुहोत्यादिः, शानच्। जन्मानि–जनी प्रादुर्भावे, मनिन्, जन्मवन्ति इति अन्तर्भावितमतुबर्थः ॥

अष्टमीमृचमाह—

सप्त त्वा हरितो रथे वहन्ति देव सूर्य।
शोचिष्केशं विचक्षण ॥८॥
सप्त त्वा हरितः रथे वहन्ति देव सूर्य शोचिःऽकेशम् विऽचक्षण ॥

हे सूर्य, देव, विचक्षण विशेषेण द्रष्टः सर्वस्य, प्रकाशयितः इति सायणः। सप्त सप्तसंख्याकाः हरितः सूर्याश्वा रश्मयः, तत्त्वसप्तकावद्योतकं सप्तविधत्वं बोध्यम्, शोचिष्केशम् शोचींषि तेजांसि केशा इव यस्मिन् लक्ष्यन्ते तं त्वा त्वां रथे वहन्ति प्रापयन्ति ॥

नवमीमृचमाह—

अयुक्त सप्त शुन्ध्युवः सूरो रथस्य नप्त्यः।
ताभिर्याति स्वयुक्तिभिः ॥९॥
अयुक्त सप्त शुन्ध्युवः सूरः रथस्य नप्त्यः ताभिः याति स्वयुक्तिऽभिः ॥

सूरः सर्वस्य प्रेरकः सूर्यो देवः रथस्य स्वीयस्य नप्त्यः नप्त्रीः पुत्रिकाः रथादेव संभूता इत्यर्थः सप्त सप्तसंख्याकाः शुन्ध्युवः विशुद्धाः शोधिका वा अश्वस्त्रियः अयुक्त योजितवान् रथे। स्वयुक्तिभिः स्वकीयाः सूर्यसम्बन्धिन्यः युक्तयः योजनानि यासां अश्वस्त्रियां ताभिः अश्वाभिः याति गच्छति ॥ अयुक्त–युजिर् योगे, लुङ्। शुन्ध्युवः–शुन्ध विशुद्धौ, र्याजभनेत्यादिभ्यो युप्रत्ययः। शुन्ध्युवः नप्त्यः इति द्वितीयार्थे प्रथमाविभक्तिव्यत्ययः। नप्त्यः–रेफलोपः छान्दसः। न पातयतीति नप्तृशब्दनिर्वचनं चिन्त्यमेव। रेफलोपो न भवति शाखान्तरपाठे (तै. ब्रा. २.४.५) ॥

दशमीमृचमाह—

उद्वयं तमसस्परि ज्योतिष्पश्यन्त उत्तरम् ।
देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॥१०॥

उत् वयम् तमसः परि ज्योतिः पश्यन्तः उत्ऽतरम् देवम् देवऽत्रा सूर्यम् अगन्म ज्योतिः उत्ऽतमम् ॥

वयम् उपासकाः अन्तर्याजिनः तमसस्परि तमसः उपरि अचिन्मयान्धकारादुपरि उत् उद्गतं, ततः उत्तरम् उद्गततरं ज्योतिः तेजःपुञ्जं पश्यन्तः सन्तः, ततः उत्तमम् उद्गततमं अत एव सर्वोत्कृष्टं ज्योतिः ज्योतिःस्वरूपं सूर्यम् सर्वप्रेरकं परमात्मानं देवत्रा देवेषु मध्ये देवम् द्योतमानं अगन्म प्राप्ताः स्मः । अत्र प्रतिपादितः सूर्यो न लौकिक इति नव्या अपि प्रतियन्ति । सायणव्याख्याबलेनापि एवमेवेति निरूपयितुं भूमिकायामियमृगस्माभिरुदाहृता (पृ. ६८)॥ अगन्म–गमेः लङ्, छन्दसि शपो लुक्, धातोर्मकारस्य नकारः ॥

एकादशीमृचमाह—

उद्यन्नद्य मित्रमह आरोहन्नुत्तरां दिवम् ।
हृद्रोगं मम सूर्य हरिमाणं च नाशय ॥११॥

उत्ऽयन् अद्य मित्रऽमहः आऽरोहन् उत्ऽतराम् दिवम् हृत्ऽरोगम् मम सूर्य हरिमाणम् च नाशय ॥

हे सूर्य प्रेरक, मित्रमहः मित्रं सुहृत् अनुकूलं महस्तेजो यस्यासौ त्वं अद्य इदानीं उद्यन् उदितो भवन्, उत्तराम् उत्कृष्टतरां दिवम् बृहद्दिवमित्यर्थः आरोहन् आरूढः सन् मम हृद्रोगं मदीयं हृदयगतं अस्वस्थतारूपं अशान्त्यात्मकं रोगं हरिमाणम् हरिद्वर्णतां रक्तदोषाभिव्यञ्जिकां रुजं, तदुपलक्षितं सर्वं शारीरं रोगं च नाशय ध्वंसय । बहिरन्तश्च स्वस्थता बृहद्दिवं गच्छतः सूर्यस्य प्रसादाल्लभ्या । बाह्यशरीरस्यापि काचन सिद्धिरावश्यकीति मन्त्रद्रष्टृणां मतम् । भौतिकं पिण्डं हि प्रतिष्ठा भवत्यत्र देवकामस्य मनुष्यस्य । अत एव 'स्थिरैरङ्गैः...व्यशेम देवहितं यदायुः' 'शतं जीवेम शरदः सवीराः' इत्येवंजातीयकैः मन्त्रवर्णैर्देवान् ऋषय उपतिष्ठन्ते ॥ हरिमाणम्–हरित् वर्णवाची, तस्य भावे इमनिन्प्रत्ययः टेर्लोपश्च ॥

द्वादशीमृचमाह—

शुकेषु मे हरिमाणं रोपणाकासु दध्मसि ।
अथो हारिद्रवेषु मे हरिमाणं नि दध्मसि ॥१२॥

शुकेषु मे हरिमाणम् रोपणाकासु दध्मसि अथो इति हारिद्रवेषु मे हरिमाणम् नि दध्मसि ॥

मे मदीयं हरिमाणम् हरिद्वर्णस्य भावं शुकेषु तादृशवर्णयोग्येषु दध्मसि दध्मः निवेशयामः । तथा रोपणाकासु शारिकासु पक्षिविशेषेषु हरिमाणं दध्मः । अथो अपि च हारिद्रवेषु तादृग्वर्णयुक्तेषु वृक्षविशेषेषु मे मदीयं हरिमाणम् निदध्मसि निक्षिपामः । हरिमा मनुष्ये वैवर्ण्याय कल्पते, स एव शोभनो भवति तद्योग्येषु जङ्गमेषु पक्षिषु, स्थावरेषु वृक्षेषु । अनेन शरीरस्वस्थता प्रार्थ्यते ॥ दध्मसि—मस इकारागमः ॥

त्रयोदशीमृचमाह—

उदगादयमादित्यो विश्वेन सहसा सह ।
द्विषन्तं मह्यं रन्धयन्मो अहं द्विषते रधम् ॥१३॥

उत् अगात् अयम् आदित्यः विश्वेन सहसा सह द्विषन्तम् मह्यम् रन्धयन् मो इति अहम् द्विषते रधम् ॥

अयम् साक्षाद् दृश्यमानः आदित्यः सूर्यः विश्वेन सकलेन सहसा बलेन सह उदगात् उदयं गतः । किं कुर्वन्? मह्यम् मदर्थं द्विषन्तम् ममोपद्रवकारिणं शत्रुं रोगं वा रन्धयन् हिंसन् अहम् भक्तोऽहं भगवति न्यस्तसर्वभारः द्विषते मदनिष्टकारिणे अमानुषाय मानुषाय रोगरूपाय वा मा उ रधम् मैव कार्षं हिंसाम्, भगवानेव मह्यं कर्तव्यं करोतु द्विषद्विषये ॥ रन्धयत्—रध हिंसासंराद्धयोः, ण्यन्ताल्लटः शत्, रधेर्नुमागमः । मो—मा उ इति निपातद्वयसमुदायो मैवेत्यर्थे ॥

इति प्रथमस्य चतुर्थेऽष्टमो वर्गः
प्रथमे मण्डले नवमोऽनुवाकः समाप्तः

अथ दशमेऽनुवाके सप्त सूक्तानि। तत्र 'अभित्य'मिति पञ्चदशर्चं प्रथमं सूक्तम्। आङ्गिरसः सव्य ऋषिः, चतुर्दशीपञ्चदश्यौ त्रिष्टुभौ शिष्टास्त्रयोदशर्चो जगत्यः, इन्द्रो देवता। अत्रेदमाहुः। ऋषिरङ्गिरा इन्द्रसदृशं पुत्रमिच्छन् देवतोपास्तिं चक्रे। देवताप्रसादादिन्द्रः स्वयं सव्यनाम्ना पुत्ररूपेण जज्ञे इति। सव्येन्द्रयोरभेदभावोऽनेनाख्यानेन विवक्षितः। सर्वथा सव्यः इन्द्रप्रसादादिन्द्रसायुज्यं प्राप्तवान् महानृषिरिति बोध्यम्॥

तत्र प्रथमामृचमाह—

अभि त्यं मेषं पुरुहूतमृग्मियमिन्द्रं गीर्भिर्मदता वस्वो अर्णवम्।
यस्य द्यावो न विचरन्ति मानुषा भुजे मंहिष्ठमभि विप्रमर्चत॥१॥

अभि त्यम् मेषम् पुरुऽहूतम् ऋग्मियम् इन्द्रम् गीःऽभिः मदत वस्वः अर्णवम् यस्य द्यावः न विऽचरन्ति मानुषा भुजे मंहिष्ठम् अभि विप्रम् अर्चत॥

त्यम् तं प्रसिद्धं मेषम् नित्योन्मेषं अविच्छिन्नजागरणं इन्द्रम् गीर्भिः स्तुतिभिः अभिमदत आभिमुख्येन मादयत हर्षयत। कीदृशम्? पुरुहूतम् बहुभिराहूतं ऋग्मियम् ऋग्भिः स्तुत्यं वस्वः अर्णवम् वसुनः सर्वसत्त्वात्मकस्य धनस्य समुद्रम् अपरिमितं निधिम्। यस्य इन्द्रस्य मानुषा मानुषाणि मनुष्यत्वानि मनुष्याणां हितानि वैभवानि द्यावो न सूर्यरश्मय इव विचरन्ति विशेषेण प्रसरन्ति, तं भुजे भोगाय मंहिष्ठम् अतिशयेन प्रवृद्धं विप्रम् मेधाविनं इन्द्रं अभ्यर्चत अभिपूजयत॥ मेषम्—मिष स्पर्धायामिति धातोर्निष्पादयति सायणः, उन्मीलनार्थात् मिषतेर्निष्पन्न इति वयम्। मेषरूप इन्द्रो मेधातिथेः सोमं पपौ इति आख्यानमुदाहृत्य मेषं चतुष्पाद्रूपमिन्द्रमिति व्याचष्टे, इदं चाकिञ्चित्करं नः॥ ऋग्मियम्—गतम् (१.९.९)। मदत—मदी हर्षे, हेतुमति णिच्। वस्वः—ङसि नुमभावः, गुणाभावे यणादेशः। अर्णवम्—अर्णः उदकमस्मिन्नस्तीति अर्णवः, मत्वर्थीयः वप्रत्ययः। मंहिष्ठम्—महि वृद्धौ, तुश्छन्दसि इष्ठन्प्रत्ययः॥

द्वितीयामृचमाह—

अभीमवन्वन्स्वभिष्टिमूतयोऽन्तरिक्षप्रां तविषीभिरावृतम्।
इन्द्रं दक्षासः ऋभवो मदच्युतं शतक्रतुं जवनी सूनृतारुहत्॥२॥

अभि ईम् अवन्वन् सुऽअभिष्टिम् ऊतयः अन्तरिक्षऽप्राम् तविषीभिः आऽवृतम् इन्द्रम् दक्षासः ऋभवः मदऽच्युतम् शतऽक्रतुम् जवनी सूनृता आ अरुहत् ॥

ऊतयः प्रवर्धयितारः दक्षासः विवेचनकुशलाः ऋभवः एतन्नामकाः यजमानहिताय इन्द्रसाहाय्यकारिणो देवाः इन्द्रम् अभि ईम् अवन्वन् अभिमुखं यथा तथा खलु अभजन्त। कीदृशमिन्द्रम्? स्वभिष्टिम् शोभना अभिष्टयः अभ्येषणाः यस्य तं अन्तरिक्षप्राम् अन्तरिक्षं सर्वमाकाशं प्राति पूरयतीति अन्तरिक्षप्राः तं मदच्युतम् मदं हर्षं च्यावयतीति मदच्युत् तं सोमपानजन्यहर्षातिरेकविसारिणमित्यर्थः तविषीभिः आवृतम् बहुविधैर्बलैरावृतम् बलपरिपूर्णम् शतक्रतुम् बहुकर्माणम्। तथाभूतं इन्द्रं जवनी प्रेरयित्री इन्द्रं शत्रुवधं प्रति इति शेषः सूनृता शोभना सत्या वाक् आरुहत् आरूढवती, इन्द्रस्य प्रोत्साहनाय यजमानस्तुतिफलभूता ऋभूणां वा अप्रतिहतवीर्या दिव्या वाक् इन्द्रं आविवेशेत्यर्थः। अत्र ऋभवो मरुत इति व्याचष्टे सायणः, इदं च चिन्त्यम्, मरुतामप्रसक्तेः, ऋभूणां देवसाहाय्यकारित्वाच्च। ऋभवो विचारिताः (१.२० सू.)॥ अवन्वन्–वन षण संभक्तौ, व्यत्ययेन उप्रत्ययः। स्वभिष्टिम्–इषु गतौ, भावे क्तिन्, एमन्नादित्वात् पररूपत्वम्। दक्षासः–दक्षशब्दार्थो विचारितः (१.२.७,९)। मदच्युतम्–च्युङ् गतौ, अन्तर्भावितण्यर्थात् क्विप्। जवनी–जु इति सौत्रो धातुः, करणे ल्युट्॥

तृतीयामृचमाह—

त्वं गोत्रमङ्गिरोभ्योऽवृणोरपोतात्रये शतदुरेषु गातुवित्।
ससेनं चिद्विमदायावहो वस्वाजावद्रिं वावसानस्य नर्तयन् ॥३॥

त्वम् गोत्रम् अङ्गिरःऽभ्यः अवृणोः अप उत अत्रये शतऽदुरेषु गातुऽवित् ससेनं चित् विऽमदाय अवहः वसु आजौ अद्रिम् ववसानस्य नर्तयन् ॥

हे इन्द्र, त्वम् अङ्गिरोभ्यः ऋषिभ्यः गोत्रम् गवां समूहं, पणिभिरपहृत्य गुहासु निहितं अपावृणोः गुहाद्वारोद्घाटनेन प्रकाशितवान्। उत अपि च शतदुरेषु शतद्वारेषु यन्त्रेषु असुरैः प्रक्षिप्ताय अत्रये महर्षये गातुवित् मार्गस्य लम्भयिता बहिर्निर्गमनाय। तथा विमदाय महर्षये

ससेन चित् निद्रातुल्येन विगलितवेद्यान्तरेण सुखेनापि वसु सच्चात्मकं धनं अवहः प्रापितवान्। तथा आजौ संग्रामे ववसानस्य वसतो वर्तमानस्य कस्यापि स्तोतुस्त्वामाश्रितस्य अद्रिम् वज्रं नर्तयन् अभिनयेन प्रदर्शयन्, रक्षणं कृतवानसि करोषि शश्वदित्यर्थः ॥

अङ्गिरोभ्यः–अङ्गिरोविचारे वक्तव्यमुक्तम् (पृ.३२७)। अत्रये–ऋषिरत्रिरैतिहासिको मन्त्रद्रष्टा पुरुषः, तथा विमदश्च। तच्चार्थे तु अत्रिर्भक्षयिता भोक्ता देवताभिर्दत्तस्य, न त्वहंपूर्विकया धिया क्रियया वाऽर्जितस्य। एवं शुद्धः सिद्धो जीव आत्मा भोक्ता भवत्यत्रिः। तन्निदर्शनाय प्रतिष्ठा भवत्यत्रिः। विमदः–विशिष्टो मदो हर्षो यस्य सः। दैवप्रसादलभ्यमदवैशिष्ट्यस्य निदर्शनं भवति विमदः॥ गोत्रम्–समूहार्थे त्रप्रत्ययः। शतदुरेषु–शतं दुराः द्वाराणि येषाम्, छान्दसं संप्रसारणम्। गातुवित्–गाङ् गतौ, अस्मात् तुप्रत्ययः, गातुं वेदयति लम्भयतीति गातुवित्, विद्लृ लाभे, अन्तर्भावितण्यर्थात् क्विप्। ससेन–ससमित्यन्ननामसु पाठात् अन्नेनेति सायणः। आनन्दे सुखे मदे वा ससशब्दो वर्तत इति वयम्, "ऋतस्य योनिमासदः ससस्य योनिमासदः" (५.२१.४), सत्यस्य मूलस्थानं सुखस्य मूलस्थानमित्येवार्थः। अत्र सस ऋषेर्नामेति व्याख्यातं सायणीये, तेन धात्वर्थनिर्णये क्लेशो निवारितः। षस स्वप्ने इति धातोरेव निष्पन्नः स्यात्। एवमुपपन्नं स्यात् ससशब्दव्याख्यानं निद्रातुल्यमित्यादिकं, विशेषतः प्रयोगान्तरेष्वसत्सु। अद्रिम्–अत्ति भक्षयति वैरिणमिति वज्रः, क्रिन्प्रत्ययः। ववसानस्य–वस निवासे, ताच्छीलिकश्चानश्, शपः श्लुः॥

चतुर्थीमृचमाह—

त्वमपामपिधानावृणोरपाऽधारयः पर्वते दानुमद्वसु ।
वृत्रं यदिन्द्र शवसावधीरहिमादित्सूर्यं दिव्यारोहयो दृशे ॥४॥

त्वम् अपाम् अपिऽधानाः अवृणोः अप अधारयः पर्वते दानुऽमत् वसु वृत्रम् यत् इन्द्र शवसा अवधीः अहिम् आत् इत् सूर्यम् दिवि आ अरोहयः दृशे ॥

हिरण्यस्तूपस्य ऐन्द्रसूक्तार्थविचारे प्रतिपादितं तत्त्वमत्र स्मार्यम्। हे इन्द्र, त्वम् अपाम् उदकानां अपिधाना आच्छादकानि मेघशब्दलक्षितानि अपावृणोः अपावृतवानसि। तथा पर्वते पर्वभिर्युक्ते त्वदधीने स्थाने दानुमत् शोभनदानयुक्तं आश्रितेभ्यो यजमानेभ्यो दानयोग्यमित्यर्थः वसु धनं अधारयः निक्षिप्तवानसि, 'दानुमत् वसु' वृत्रादेर्वसु इति सायणीया वापक्षव्याख्या।

हे इन्द्र, यत् यदा वृत्रम् त्रैलोक्यस्य आवरीतारं अहिम् आहन्तारं असुरं तमोघनमधिशयानं शवसा दीप्तेन बलेन अवधीः हतवानसि, आत् इत् अनन्तरमेव सूर्यम् दिवि द्युलोके दृशे द्रष्टुं आरोहयः। वृत्रवधात्परं सूर्यं दिवि आरोहयदिन्द्र इत्येवमर्थकाः मन्त्राः सरहस्याः प्राग्व्याख्याताः 'वि गोभिरद्रिमैरयत्' इत्यादयः ॥ अपिधाना–अपिधीयन्ते, करणे ल्युट्, अन्ये गताः ॥

पञ्चमीमृचमाह—

त्वं मायाभिरप मायिनोऽधमः स्वधाभिर्ये अधि शुस्मावजुह्वत ।
त्वं पिप्रोर्नृमणः प्रारुजः पुरः प्र ऋजिश्वानं दस्युहत्येष्वाविथ ॥५॥

त्वम् मायाभिः अप मायिनः अधमः स्वधाभिः ये अधि शुस्मौ अजुह्वत त्वम् पिप्रोः नृऽमनः प्र अरुजः पुरः प्र ऋजिश्वानम् दस्युऽहत्येषु आविथ ॥

हे इन्द्र, त्वम् मायाभिः ज्ञानैः मायिनः कपटज्ञानोपेतान् असुरान् अपाधमः अपध्मातवान् अपसारितवानसि। ये असुराः स्वधाभिः स्वभावधारणसमर्थाभिः शक्तिभिः दृप्ताः (स्वधाभिः अन्नैरिति सायणः) शुस्मौ अधि स्वकीये (मुखे इति सायणः) अजुह्वत अहौषुः, अदत्त्वा देवेभ्यः स्वयं अजुह्वतेति ब्राह्मणवाक्यबलाद् व्याख्या पूर्वेषाम्। अन्यथा वा स्यात् तात्पर्यम्। अधिरुपपर्यर्थः, 'शुस्मौ' सकृदेव प्रयोग ऋक्संहितायाम्, अजुह्वत इति होमक्रियार्थकक्रियापदसाहचर्यात् शुस्मिर्मुखमिति सायणीयं न्याय्यं लक्ष्यते। आह्वानार्थश्चेत् अजुह्वतेति छान्दसः क्रियापदप्रयोगः, 'अधि शुस्मौ' भुजस्योपरि भूजादूर्ध्वं वा इति ग्रहणायावकाशो भवति। प्राचीनार्यभाषाशास्त्रीयः 'सुस्मि'शब्दः भुजार्थे वर्तते। तर्हि इदमुक्तं भवति–ये असुराः भुजोत्क्षेपेण इन्द्रं आजुहवुरिति, तान् अपाधम इति पूर्वेण संबन्धः। तथा हे नृमणः नृषु यजमानेषु मनः अनुग्रहबुद्धिर्यस्य स त्वम् पिप्रोः एतन्नामकस्य पूरयितुः असुरस्य पुरः पुराणि प्रारुजः प्राभाङ्क्षीः। अपि च, दस्युहत्येषु दस्यूनां उपक्षपयितॄणां देवद्वेषिणां असुराणां हत्या हननं येषु तेषु संग्रामेषु निमित्तभूतेषु ऋजिश्वानम् एतन्नामकं स्तोतारं, ऋजुगमनयुक्तं सर्वथा आर्जवसंपन्नं भक्तं, आविथ ररक्षिथ ॥ मायिनः–मत्वर्थीय इनिः। शुस्मौ–शुभ दीप्तौ, कर्मणि क्तिन् इति सायणः। अजुह्वत–जुहोतेर्लङ्, व्यत्ययेनात्मनेपदम्। पिप्रोः–पिपर्तेः कुप्रत्ययः, स्वीयमुदरं पूरयत्यसुरः

पिप्रुः । नृमणः–नृषु मनो यस्य, छन्दसि ऋदवग्रहात् इति णत्वम्। अरुजः–रुज भङ्गे । ऋजिश्वानम्–ऋजु अश्नुते, पृषोदरादिः ।

इति प्रथमस्य चतुर्थे नवमो वर्गः

षष्ठीमृचमाह—

त्वं कुत्सं शुष्णहत्येष्वाविथाऽरन्धयोऽतिथिग्वाय शम्बरम् ।
महान्तं चिदर्बुदं नि क्रमीः पदा सनादेव दस्युहत्याय जज्ञिषे ॥६॥

त्वम् कुत्सम् शुष्णऽहत्येषु आविथ अरन्धयः अतिथिऽग्वाय शम्बरम् महान्तम् चित् अर्बुदम् नि क्रमीः पदा सनात् एव दस्युऽहत्याय जज्ञिषे ॥

हे इन्द्र, त्वम् कुत्सम् प्रसिद्धमृषिं शुष्णहत्येषु शुष्णनामकासुरहननिमित्तभूतेषु संग्रामेषु आविथ ररक्षिथ । अतिथिग्वाय अतिथिभिर्गन्तव्याय एतत्संज्ञकाय भक्ताय तदनुग्रहार्थं शम्बरम् एतत्संज्ञकमसुरं अरन्धयः हिंसां प्रापितवान्। महान्तम् चित् प्रवृद्धमपि अर्बुदम् एतत्संज्ञकमसुरं पदा पादेन निक्रमीः नितरामाक्रमिताऽभूः । एवं सनात् एव बहोः कालादारभ्य दस्युहत्याय उपक्षपयितॄणां हननाय जज्ञिषे प्रादुर्भूतोऽसि । अत्र कुत्सशुष्णादीनां गूढोऽर्थः ज्ञेयः ॥ कुत्सः–उक्तः (१.३३.१४)। शुष्णः–गतः (१.११.७)। अतिथिग्वाय–गमेरौणादिको ड्वप्रत्ययः । अतिथीनां अग्निप्रभृतीनां देवानां स्वस्मिन् स्थानाशनादिसुखविधायकः पुरुषो यजमानः दिवो दास्ये वर्तत इति दिवोदास उच्यते, तत्संज्ञको वा ऐतिहासिकः पुरुषः । शम्बरम्–अतिथिग्वशत्रुरसुरः, शम् सुखं वृणोति, सुखस्य आवरक इति ऊहमात्रम् । अर्बुदः–अर्बतेर्हिंसार्थात्, काद्रवेयः कीर्त्यते । क्रमीः–क्रमु पादविक्षेपे, लुङ् । जज्ञिषे–जनी प्रादुर्भावे, लिट् ॥

सप्तमीमृचमाह—

त्वे विश्वा तविषी सध्र्यग्घिता तव राधः सोमपीथाय हर्षते ।
तव वज्रश्चिकिते बाह्वोर्हितो वृश्चा शत्रोरव विश्वानि वृष्ण्या ॥७॥

त्वे इति विश्वा तविषी सध्र्यक् हिता तव राधः सोमऽपीथाय हर्षते तव वज्रः चिकिते बाह्वोः हितः वृश्च शत्रोः अव विश्वानि वृष्ण्या ॥

हे इन्द्र, त्वे त्वयि विश्वा तविषी सर्वं बलं सध्र्यक् सध्रीचीनं सहगतं संभूय स्थितं यथा भवति तथा हिता निहितम्। तथा तव राधः समृद्धं मनः हृदयं वा सोमपीथाय सोमपानाय हर्षते हृष्यति। तव बाह्वोः हस्तयोः हितः निहितोऽवस्थितः वज्रः आयुधं चिकिते ज्ञायते, अस्माभिरिति शेषः। तस्मात् शत्रोः शातयितुर्विरोधिनः विश्वानि सर्वाणि वृष्ण्या वृष्ण्यानि वीर्याणि अववृश्च छिन्धि, छित्त्वा अधः पातय ॥ सध्र्यक्-सह अञ्चतीति सध्र्यक्, सहशब्दस्य सधिरादेशः। राधः-राध्नोति समृद्धो भवत्यनेन, अत्र राधसा हृदयं लक्ष्यते। सोमपीथाय-पा पाने, थक्प्रत्ययः। हर्षते-हृष तुष्टौ, श्यनः शप् व्यत्ययेन आत्मनेपदं च। चिकिते-कित ज्ञाने, कर्मणि लिट् लडर्थे। वृश्च-ओव्रश्चू छेदने, संहितायां दीर्घत्वम्। वृष्ण्या-वृष सेचने, औणादिको नक्प्रत्ययः, तत्र भवानि वृष्ण्यानि, छन्दसि यत्प्रत्ययः, शेलोपः ॥

अष्टमीमृचमाह—

वि जानीह्यार्यान्ये च दस्यवो बर्हिष्मते रन्धया शासदव्रतान्।
शाकी भव यजमानस्य चोदिता विश्वेत्ता ते सधमादेषु चाकन ॥८॥

वि जानीहि आर्यान् ये च दस्यवः बर्हिष्मते रन्धय शासत् अव्रतान् शाकी भव यजमानस्य चोदिता विश्वा इत् ता ते सधऽमादेषु चाकन ॥

हे इन्द्र, आर्यान् देवयाजिनः देवार्थं नित्योद्योगिनः विजानीहि विशेषेण बुध्यस्व, अनुगृहाणेत्यर्थः, ये च दस्यवः उपक्षपयितारः देवयाजिनामिति शेषः, देववैरिणस्तानपि विजानीहि, ज्ञात्वा च निगृहाणेति भावः। अपि च त्वं शासत् अनुशासनं कुर्वन्, दुष्टान् निगृह्णन् अव्रतान् व्रतशून्यान् देवाराधनविरोधिनोऽसुरान् दस्यून् बर्हिष्मते यज्ञयुक्ताय यजमानाय तदनुग्रहाय रन्धय हिंसां प्रापय। शाकी शक्तः सन् यजमानस्य चोदिता भव प्रेरयिता भव। अहमपि ते तव ता तानि विश्वा इत् सर्वाणि वैभवान्येव सधमादेषु सहमादनयुक्तेषु यज्ञेषु चाकन कामये कीर्तयितुमिति शेषः ॥ बर्हिष्मते-बर्हिर्यज्ञोऽस्यास्तीति बर्हिष्मान्, तसौ मत्वर्थे इति भत्वम्,

रुत्वजश्त्वे न भवतः। शासत्–शासु अनुशिष्टौ, अदादिः, शतृ। शाकी–शक्नोतेः घञ्, शाकः, ततो मत्वर्थीय इनिः। सधमादेषु–सह माद्यन्त्येषु इति सधमादा यज्ञाः। चाकन–कनी दीप्ति-कान्तिगतिषु, अत्र कान्त्यर्थः, छन्दसि वर्तमाने लिट्, तुजादित्वादीर्घोऽभ्यासस्य ॥

नवमीमृचमाह—

अनुव्रताय रन्धयन्नपव्रतानाभूभिरिन्द्रः श्नथयन्ननाभुवः।
वृद्धस्य चिद्वर्धतो द्यामिनक्षतः स्तवानो वम्रो वि जघान सन्दिहः ॥९॥

अनुऽव्रताय रन्धयन् अपऽव्रतान् आऽभूभिः इन्द्रः श्नथयन् अनाभुवः वृद्धस्य चित् वर्धतः द्याम् इनक्षतः स्तवानः वम्रः वि जघान सम्ऽदिहः ॥

य इन्द्रः अनुव्रताय अनुकूलकर्मणे यजमानाय अपव्रतान् अपगतकर्मणः यज्ञविरोधिनः रन्धयन् हिंसां प्रापयन्, तथा आ भूभिः आभिमुख्येन भवन्तीति आभुवः अनुकूला भक्ताः तैः अनाभुवः तद्विपरीतान् यज्ञप्रतिकूलान् देवद्विषः श्नथयन् हिंसयन् वर्तते, तस्येन्द्रस्येति संबन्धः। वृद्धस्य चित् देवतात्मत्वात् पूर्वमेव विश्वाधिकाराय प्रादुर्भूतात् वृद्धस्यापि वर्धतः पुनर्वर्धमानस्य, यजमाने पुनर्लब्धजन्मानो हि देवाः यजनेन स्तोत्रेण च वर्धन्ते, द्याम् द्युलोकम् इनक्षतः प्राप्नुवतः, यजमाने प्रादुर्भूय दिवमारोहत इत्यर्थः तथाभूतस्य इन्द्रस्य स्तवानः स्तुतिं कुर्वन् वम्रः स्तुत्युद्गिरणशीलः सिद्धः स्तोता, तस्य निदर्शनभूतो वम्रसंज्ञक ऋषिः संदिहः सम्यगुप-चितान् वम्रवदवस्थितानन्तरायान् विजघान विहतवान्॥ स्तोत्रोद्गारशीलो वम्रः स्तोता इन्द्रं स्तुवन् तत्प्रसादमहिम्ना क्षुद्रपर्वतवदवस्थितानन्तरायान् पर्यहार्षीदित्यर्थः। ऋचोऽस्यास्तात्पर्यं दुर्घटं मन्यन्ते नव्याः। तत्र मुख्यं कारणं सायणव्याख्यानम्, यत्र हि पङ्क्तिरियं दृश्यते "वम्रः संदिहो विजघान" 'स्तुत्युद्गिरणशीलः एतत्संज्ञक ऋषिः सम्यगुपचिता वल्मीकवपाः जघान, इन्द्रेण परिहृतान्तरायः सन् पृथिव्याः सारभूतं वल्मीकवपालक्षणं यज्ञसंभारमहार्षीदि-त्यर्थः', किमपि ब्राह्मणवाक्यं अस्य तात्पर्यस्याधारतयोदाहरति सायणः। अमूलं अप्रकृतं चेदं कथनं मन्त्रार्थविचारे व्याकुलतामेवाधत्त इति नात्र चित्रम्। सायणव्याख्यायामेवोपक्षिप्तानर्थान् कतिचनोपादाय तात्पर्यमुपपादितमस्माभिः ॥

अनुव्रताय–अनुकूलं व्रतं यस्य तस्मै। श्नथयन्–श्नथ हिंसायाम्। वर्धतः–व्यत्ययेन परस्मैपदम्। इनक्षतः–नक्ष गतौ, इकारोपजनः छान्दसः। संदिहः–दिह उपचये, कृत्यल्युटो बहुलमिति बहुलवचनात् कर्मणि क्विप्, संदिह्यन्ते समुपचीयन्ते इति संदिहः॥

दशमीमृचमाह—

तक्षद्यत्ते उशना सहसा सहो वि रोदसी मज्मना बाधते शवः।
आ त्वा वातस्य नृमणो मनोयुज आ पूर्यमाणमवहन्नभि श्रवः॥१०॥

तक्षत् यत् ते उशना सहसा सहः वि रोदसी इति मज्मना बाधते शवः आ त्वा वातस्य नृऽमनः मनःऽयुजः आ पूर्यमाणम् अवहन् अभि श्रवः॥

हे इन्द्र, यत् यदा उशना कामयमानः, कान्तः, काव्यः कवेः जातः उशनस्संज्ञक ऋषिः सहसा स्वीयेन बलेन ते तव सहः बलं तक्षत् तनूकृतवान् तीक्ष्णीकुर्यात् तदा त्वदीयं शवः दीप्तं बलं मज्मना शोधकेन ओजसा, रोदसी द्यावापृथिव्यौ विबाधते क्षोभयति, इन्द्रस्य बलं सर्वक्षोभणमिति बलोत्कर्षविवक्षा। हे नृमणः, नृषु अनुग्राह्येषु यजमानेषु अनुग्रहबुद्धियुक्त हे इन्द्र आपूर्यमाणम् समन्तात् पूर्यमाणं बलेनेति शेषः त्वा त्वाम् मनोयुजः मनसा युक्ताः त्वदीयेच्छामात्रेण प्रयुक्ताः गतिवेगोपलक्षणभूता अश्वाः वातस्य वायोः संबन्धिना बलवेगेन श्रवः श्रवणं, अन्तर्दिव्यां वा श्रुतिं अभि अभिलक्ष्य आवहन् वहन्तु, मनोयुजोऽश्वास्त्वां वातवेगेन अस्माकं श्रवणसम्पत्तये आवहन्त्वित्युक्तम्॥ उशना–उशनाः काव्य ऋषिः, अन्तर्यागे मन्त्रद्रष्टुः कवेः संजातः, देवान् अत्यन्तं कामयमानो यजमानः, तथाभूतस्य निदर्शनभूतस्तत्संज्ञक ऋषिः, वश कान्तौ, वशेः कनिस्, अनङादेशः। तक्षत्–तक्षू तनूकरणे, लङ्, अडभावः। मज्मना–टुमस्जो शुद्धौ, औणादिको मनिप्रत्ययः। नृमणः–गतम्। अवहन्–छन्दसि प्रार्थनायां लङ्॥

इति प्रथमस्य चतुर्थे दशमो वर्गः

एकादशीमृचमाह—

मन्दिष्ट यदुशने काव्ये सचाँ इन्द्रो वङ्कू वङ्कुतराधि तिष्ठति।
उग्रो ययिं निरपः स्रोतसास्रजद्वि शुष्णस्य दंहिता एरयत्पुरः॥११॥

मन्दिष्ट यत् उशने काव्ये सचा इन्द्रः वङ्कू इति वङ्कुतरा अधि तिष्ठति उग्रः ययिम् निः अपः स्रोतसा असृजत् वि शुष्णस्य दृंहिताः ऐरयत् पुरः ॥

यत् यदा इन्द्रः उशने काव्ये कामयमाने यजमाने, (कवेर्जाते ऋषौ काव्यसंज्ञके च समन्वेतव्यः) सचा सह मन्दिष्ट मुदितो भवति तदा वङ्कू वङ्कुतरा अतिशयेन कुटिलौ अश्वौ, अत्यन्तवेगेन गमनात् कौटिल्यमिन्द्राश्वयोः, न तु मार्गादपयानं गमनेऽनृजुता वा वक्रार्थकवङ्कुशब्देन ग्राह्या। तथा अन्यत्रापि 'वङ्कुं कविं यज्ञसाधम्' (१.११४.४) इत्यादौ अत्यन्तशीघ्रगतिको यज्ञसाधकः कविरिति विवक्षितः, न तु कुटिल इति। तथाभूतौ अश्वौ अधितिष्ठति अधिरोहति। उग्रः उद्गूर्णः तादृश ओजस्वी इन्द्रः ययिम् गमनयुक्तात् मेघात्, विभक्तिव्यत्ययः, स्रोतसा प्रवाहरूपेण अपः जलानि निरसृजत् निर्गमितवान्। तथा शुष्णस्य शोषयितुरसुरस्य दृंहिताः प्रवृद्धाः पुरः पुराणि व्यैरयत् विविधं प्रेरितवान्, विभिन्नानि खण्डशः करोतीत्यर्थः॥ इदमुक्तं भवति। कामयमाने यजमाने तेन सह यदा मुदितो भवतीन्द्रः तदा अत्यन्तशीघ्रगतिकौ स्वीयौ हरी अधिष्ठाय ज्योतिर्बलादिवाहिनीः अप्शब्दलक्षिताः शक्तीः तदावरकात् ययिशब्दवाच्यात् विमोचयति, रसानां शोषकस्यासुरविभवस्य दुर्गस्थानानि ध्वंसयति च। ययिपदप्रयोगेण अपां विमोचनाय प्रत्यासन्ना दशा सूच्यते, न तु घनीभूततमोरूपोऽद्रिभूतो भवति "ययिः"॥ मन्दिष्ट–मदि मोदार्थे, लुङ् लडर्थे। वङ्कू–वकि कौटिल्ये, औणादिकः उप्रत्ययः। ययिम्–या प्रापणे, किप्रत्ययः। दृंहिताः–दृहि वृद्धौ, इदित्वान्नुम्॥

द्वादशीमृचमाह—

आ स्मा रथं वृषपाणेषु तिष्ठसि शार्यातस्य प्रभृता येषु मन्दसे।
इन्द्र यथा सुतसोमेषु चाकनोऽनर्वाणं श्लोकमा रोहसे दिवि॥१२॥

आ स्म रथम् वृषऽपानेषु तिष्ठसि शार्यातस्य प्रऽभृताः येषु मन्दसे इन्द्र यथा सुतऽसोमेषु चाकनः अनर्वाणम् श्लोकम् आ रोहसे दिवि॥

हे इन्द्र, त्वं वृषपाणेषु वृष्णः सेचनशीलस्य सोमस्य पानेषु निमित्तभूतेषु रथम् आ तिष्ठसि स्म स्वयमेव रथारूढो गच्छसि, यत्र सोमः सुतो भवति तत्र स्वयमेवागत्य यजमान-

मनुगृह्णासि दिव्यारोहाय, यजमानस्य सोमाभिषवान्नान्यस्तव प्रवर्तयिता अपेक्ष्यत इत्यर्थः। येषु सोमेषु त्वं मन्दसे मोदसे तादृशाः शार्यातस्य योद्धुः मानवस्य यजमानस्य संबन्धिनः प्रभृताः प्रकर्षेण संपादिताः। तस्मात् सुतसोमेषु अभिषुतसोमसंपन्नेषु यज्ञेषु यथा येन प्रकारेण चाकनः सोमान् कामयसे तथा अत्रापि कामयस्व। तथा कृते सति, दिवि द्युलोके अनर्वाणम् 'गमनरहितं स्थिरं श्लोकम् स्तोत्रलक्षणं वचो यशो वा आरोहसे प्राप्नोषि' इति सायणः, यजमानं दिवि स्थिरं यशः प्रापयसीति वा ॥ अत्रेदमवधेयम्। अर्वा अश्वः वाहनभूतः, अनर्वेति श्लोकविशेषणं, बहुव्रीहिः, न विद्यते अर्वा यस्य सः, श्लोकः स्तोत्रेऽपि वर्तते। द्युलोकं प्रति प्रापणसाधनान्तरनिरपेक्षं स्तोत्रं यशो वा इन्द्रः यजमानमुपगतः स्वयं आरोहयति ॥ सा-निपातस्य दीर्घत्वं संहितायाम्। वृषपाणेषु-पा पाने, भावे ल्युट्, वा भावकरणयोरिति उत्तरपदस्थस्य नस्य णत्वम्। मन्दसे-मदि मोदार्थे। चाकनः-कनी कान्त्यर्थे, कान्तिश्चाभिलाषः, शपः श्लुः छन्दसि, अन्यदुक्तम्। श्लोकम्-श्लोक्यत इति श्लोकः, श्लोकृ संघाते। रोहसे-व्यत्ययेन आत्मनेपदम्, अन्तर्भावितण्यर्थश्च अर्थान्तरपक्षे ॥

शार्यातः राजर्षिरिति ब्राह्मणमुदाहृत्य व्याचष्टे सायणः, शर्यातेरपत्यं शार्यातो मनुसंततिरिति चैके। शरवत् शर्योऽपि बाणार्थे वेदे, शर्यो योद्धा च बाणैः। शर्यहा बाणैः शत्रूणां हन्ता इत्यन्यत्र सायणीयमवधेयम्। आर्यः अरणशीलः, नित्योद्योगी, यजमानः सर्वोऽपि यज्ञशत्रुभिः योद्धा भवति। ऐतिहासिकः शर्यातिः शार्यातो वा देवपक्षपाती योद्धृत्वनिदर्शनभूत इति बोध्यम् ॥

त्रयोदशीमृचमाह—

अदा॑ अभी॑ मह॒ते व॑चस्यवे क॒क्षीव॑ते वृ॒चया॑मिन्द्र सुन्व॒ते।
मेना॑भवो वृषण॒श्वस्य॑ सुक्र॒तो विश्वेत्ता ते॑ सव॑नेषु प्रवाच्या ॥१३॥

अदा॑ अभी॑म् मह॒ते व॒चस्यवे॑ क॒क्षीव॑ते वृ॒चया॑म् इ॒न्द्र॒ सु॒न्व॒ते मेना॑ अभवः वृषण॒श्वस्य॑ सुऽक्र॒तो इति॑ सुऽक्रतो विश्वा॑ इत् ता ते॑ सव॑नेषु प्रऽवाच्या ॥

हे इन्द्र, त्वं महते प्रवृद्धाय वचस्यवे स्तुतिलक्षणं वचः आत्मन इच्छते सुन्वते सोमाभिषवं कुर्वते कक्षीवते एतत्संज्ञकाय ऋषये, परदैवतरहस्यविज्ञानां निदर्शनभूताय (१.१८. अत्रोपपत्तिः

प्रदर्शिता) वृचयां एतदाख्यां, वर्चोविलासक्षेत्रभूतां अर्भाम् तन्वीं स्त्रियं अददाः दत्तवानसि, ददासीति लडर्थे। महते कक्षीवते 'अर्भा' तत्तेजोविलासाय क्षेत्रभूतां शक्तिमल्पां ददासि इति, कक्षीवान्ऋषिरधिकः पुरुषः, तत्प्रभावापेक्षया शक्तिरनधिका न्यूनैव भवति। तस्मान्नेह 'अर्भा अल्पे'ति निकृष्टार्थो विवक्षितः। तथा सुऽक्रतो शोभनकर्मन्, वृषणश्वस्य वृषणौः सेचनसमर्थैरश्वैः प्राणबलोपलक्षणभूतैर्युक्तस्य (एवमेव अन्यत्र सायणीयम् ८.२०.१०) यजमानस्य, (राज्ञ इति सायणः किमपि ब्राह्मणस्थमाख्यानमवलम्ब्य) मेना स्त्री, शक्तिविलासक्षेत्रभूता, अभवः, भवसीति लडर्थे। ते ता त्वदीयानि उक्तविधानि विश्वा इत् सर्वाण्येव वैभवानि सवनेषु यज्ञेषु प्रवाच्या प्रकर्षेण वक्तव्यानि स्तोतव्यानि॥ अत्र कक्षीवदादीनां नाम्नामन्तर्यागेऽर्थान्तराण्युपपादितानि व्याख्यायाम्, वृचयाशब्दस्य सकृदेव ऋक्संहितायां प्रयोगात् अत्र प्रतिपादितोऽर्थ ऊहमात्रम्। वर्चःसम्बन्धी वृचशब्द इति कृत्वा वृचं वर्चो याति वृचयाः तां वृचयामिति ब्रूमः। तथा नास्ति कष्टं मेनापदार्थनिर्णये 'मेना' स्त्री तन्नामसु पाठात्, मन ज्ञान इति धातोर्निष्पादयन्ति, 'मननीयां, मानयन्त्येनां' इत्यादि निर्वचनं पूर्वैरुक्तम्। यथा देवानां कारयितॄणां पुरुषाणां शक्तयः कार्यनिर्वाहिकाः कर्त्र्यः स्त्रियो भवन्ति ताश्च देवपत्न्य उच्यन्ते, एवं चिरन्तनार्षसम्प्रदाये यजमानस्य आवश्यक्यभूत् यजमानपत्नी। इदमेव रहस्यं मूलं भवति कर्मठव्यवहारप्रसिद्धस्य धर्मार्थं पत्नीति संप्रदायस्य। अर्वाक्तनेषु शक्तैर्वैशिष्ट्यमुद्भोपयत्सु शाक्तागमप्रामाणिकेषु इदमेव तत्त्वं मूर्धन्यभावेन मूर्छितं लक्ष्यते। इदमत्रावधेयम्। सर्वशक्तो भगवानिन्द्र एव 'कक्षीवते' समुचितां शक्तिभूतां 'वृचयां' अनुगृह्णाति। स शक्तः स्वयमेव शक्तिः स्त्री 'मेना' च भवति 'वृषणश्वस्य'। अन्यच्च तत्त्वानुसारेण धीमद्भिरनुसंधेयम्॥ प्रवाच्या—वच परिभाषणे, ण्यत्प्रत्ययः, यजयाचरुचप्रवचर्चश्चेति कुत्वाभावः। अन्ये गताः॥

चतुर्दशीमृचमाह—

इन्द्रो॑ अश्राय्यि सु॒ध्यो॑ निरेके॑ प॒ज्रेषु॒ स्तोमो॒ दुर्यो॑ न यू॒पः।
अ॒श्व॒युर्गव्यू॑ रथ॒युर्व॑सु॒युरिन्द्र॒ इद्रा॒यः क्षय॑ति प्रय॒न्ता॥१४॥
इन्द्रः॑ अश्रा॒यि॒ सुऽध्यः॑ नि॒रे॒के॑ प॒ज्रेषु॑ स्तोमः॑ दुर्यः॑ न यू॒पः॑ अ॒श्व॒ऽयुः॑ गव्युः॑ र॒थ॒ऽयुः॑ व॒सु॒ऽयुः॑ इन्द्रः॑ इत् रा॒यः क्ष॒य॒ति॒ प्र॒ऽय॒न्ता॥

इन्द्रः देवः सुध्यः सुधियः शोभनप्रज्ञान् निरेके नितरां रेचने, तेषां रिक्तदशायां अश्रायि असेविष्ट, साहाय्यकरणेन सेवत इत्यर्थः, येषु पज्रेषु बलवत्सु दृढेषु वा यजमानेषु स्तोमः मन्त्रात्मकं स्तोत्रं दुर्यो यूपो न द्वारस्थो यूपस्तम्भ इव, दृढो निश्चलस्तिष्ठति तान् सुध्य इति सम्बन्धः। येषां गृहद्वारस्थस्तम्भ इव दृढो भवति स्तोमः तेषां इन्द्र इत् इन्द्र एव अश्वयुः अश्वान् इच्छन् गव्युः गा इच्छन् रथयुः रथानिच्छन् वसूयुः अन्यद्वा धनमिच्छन्, स रायः प्रयन्ता समृद्धेः प्रदाता देवः क्षयति वर्तते ॥ रिक्तानां भक्तानां गवाश्वादिलाभैषणं नावश्यकं भवति। इन्द्रो भगवानेव तान् यजमानान् स्वयमेवाश्रित्य तेषामावश्यकानि विविधानि धनानि संपादयति। गवाश्वादिः चित्प्रकाशप्राणबलाद्यर्थको न विस्मार्यः ॥

पज्रेषु–पज्र इत्यङ्गिरसामाख्येति ब्राह्मणमुदाहरति सायणः, अन्यत्र च 'पज्रासः अङ्गिरोगोत्रोत्पन्ना' इत्युक्तम्। बलं दृढं इति पज्रशब्दार्थो ग्राह्यः। अङ्गिरसश्च पज्राः, बलिनो दृढा भवन्ति। आह च सायण एवान्यत्र 'पज्रः पाजसा बलेन' (१.१५८.३)। अश्रायि–श्रिञ् सेवायां, कर्तरि लुङ्। सुध्यः–शसि छन्दस्युभयथेति यणादेशः। निरेके–रिचिर् विरेचने, भावे घञ्। दुर्यः–दुरे भवः। यूपः–यु मिश्रणे, यूयते युज्यतेऽस्मिन्, पप्रत्ययः। अश्वयुः–छन्दसि परेच्छायां क्यच्। एवं गव्युः, विशेषस्तु वान्तो यि प्रत्यये इति अवादेशः। प्रयन्ता–यम उपरमे, तृच्। क्षयति–क्षि क्षये भौवादिकः ॥

पञ्चदशीमृचमाह—

इदं नमो वृषभाय स्वराजे सत्यशुष्माय तवसेऽवाचि ।
अस्मिन्निन्द्र वृजने सर्ववीराः स्मत्सूरिभिस्तव शर्मन्त्स्याम ॥१५॥
इदम् नमः वृषभाय स्वऽराजे सत्यऽशुष्माय तवसे अवाचि अस्मिन् इन्द्र वृजने सर्वऽवीराः स्मत् सूरिऽभिः तव शर्मन् स्याम ॥

हे इन्द्र, तुभ्यं इदं नमः इदानीं क्रियमाणं नमस्कारात्मकं स्तोत्रं अवाचि प्रायोजि, प्रयुक्तमस्माभिः। कीदृशाय तुभ्यम्? वृषभाय वर्षणशीलाय स्वराजे स्वेन तेजसा राजमानाय सत्यशुष्माय अवितथबलाय तवसे प्रवृद्धाय। हे इन्द्र, तस्मात् अस्मिन् उपस्थिते वृजने संग्रामे, अरातिभिः यज्ञविघातिभिः सह कर्तव्ये इत्यर्थः, वयं सर्ववीराः समस्तवीरबलयुक्ताः सन्तः, तव स्मत् शर्मन् तव संबन्धिनि शोभने शरणे, त्वदनुग्रहपात्रभूते, निवासस्थाने, स्मत् सुशब्दार्थो

निपातितः, सूरिभिः विद्वद्भिः देवैर्मानुषैर्वा सह स्याम वसेम॥ सत्यशुष्माय–सत्यं शुष्मं बलं यस्य तस्मै। तवसे–तवतिः सौत्रो धातुः, तस्मादौणादिकोऽसिप्रत्ययः। शर्मन्–सप्तम्या लुक्। अन्ये गताः॥

इति प्रथमस्य चतुर्थे एकादशो वर्गः

'त्यं सुमेष'मिति पञ्चदशर्चं द्वितीयं सूक्तं सव्यस्यार्षम् ऐन्द्रम्। त्रयोदशीपञ्चदश्यौ त्रिष्टुभौ, शिष्टा जगत्यः॥

तत्र प्रथमामृचमाह—

त्यं सु मेषं महया स्वर्विदं शतं यस्य सुभ्वः साकमीरते।
अत्यं न वाजं हवनस्यदं रथमेन्द्रं ववृत्यामवसे सुवृक्तिभिः॥१॥

त्यम् सु मेषम् महय स्वःऽविदम् शतम् यस्य सुऽभ्वः साकम् ईरते अत्यम् न वाजम् हवनऽस्यदम् रथम् आ इन्द्रम् ववृत्याम् अवसे सुवृक्तिऽभिः॥

त्यम् प्रसिद्धं मेषम् नित्यं मिषन्तं, नित्यजागरणं (अन्यत् प्रागुक्तम् १.५१.१) स्वर्विदम् स्वर्ज्योतिषो वेदितारं लम्भयितारं वा इन्द्रं, सु महय सम्यक् पूजय, अन्तरात्मनः संबोधनम्। यस्य इन्द्रस्य शतम् शतसंख्याकाः सुभ्वः सुभ्रुवः, स्तोतार इति सायणः दिविषदः सहकारिणः अनुचरा इति युक्तम्, तथा हि 'यं पृणन्ति दिवि सद्मबर्हिषः सुभ्वः' इति चतुर्थ्यामृचि स्पष्टं श्रूयते। साकम् सह युगपदेव ईरते गच्छन्ति, तं इन्द्रम्, अवसे अस्मद्वर्धनाय सुवृक्तिभिः सुष्ठु आवर्जकैः स्तोत्रैः रथम् रथं प्रति आववृत्याम् आवृत्तं करोमि। कीदृशं रथम्? हवनस्यदम् हवनं आह्वानं प्रति स्यन्दमानं वेगेन गच्छन्तम्। तत्र दृष्टान्तः–वाजम् बलसमृद्धियुक्तं अत्यम् न अश्वमिव स्थितं रथं प्रति। वाजम् वाजवन्तम्, अन्तर्भावितमतुबर्थः॥ महय–मह पूजायाम्। सुभ्वः–सुभ्रुवः, छन्दस्युभयथेति यणादेशः। ईरते–ईर गतौ, अदादिः। हवनस्यदम्–स्यन्दू प्रस्रवणे, स्यदो जवे घञन्तो निपातितः, अत एव नलोपः वृद्ध्यभावश्च। ववृत्याम्–वृतु वर्तने, लिङि व्यत्ययेन परस्मैपदं, शपः श्लुः॥

द्वितीयामृचमाह—

स पर्वतो न धरुणेष्वच्युतः सहस्रमूतिस्तविषीषु वावृधे।
इन्द्रो यद्वृत्रमवधीन्नदीवृतमुब्जन्नर्णांसि जर्हृषाणो अन्धसा॥२॥

सः पर्वतः न धरुणेषु अच्युतः सहस्रमूऽऊतिः तविषीषु ववृधे इन्द्रः यत् वृत्रम् अवधीत् नदीऽवृतम् उब्जन् अर्णांसि जर्हृषाणः अन्धसा ॥

अन्धसा अन्नभूतेन सोमेन जर्हृषाणः अत्यर्थं हृष्यन्, इन्द्रः यत् यदा वृत्रम् विश्वस्य आवरकं अवधीत् हतवान्। कीदृशं वृत्रम्? नदीवृतम् नदीनां अपां आवरीतारम्। किं कुर्वन्निन्द्रः? अर्णांसि जलानि उब्जन् हिंसन्, निःसारणाय तुदन्नित्यर्थः, (उब्जतिर्वधकर्मा)। यदा सोमेन प्रहृष्ट इन्द्रः तेजोबलादिवाहिनीः अपो निःसार्य पातयन् सर्वस्यावरीतारं वृत्रं हन्ति, तदा सः इन्द्रः पर्वतो न पर्ववान् बहुप्रस्थयुक्तः शिलोच्चय इव धरुणेषु सर्वस्य धारकेषु प्रवहत्सु उदकेषु मध्ये अच्युतः चलनराहित्येनावस्थितः सहस्रमूतिः बहुविधाभिवर्धनविधायकः तविषीषु बलेषु ववृधे प्रवृद्धो भवति। वृत्रवधात्परं तेजोबलादिषु शक्तिषु मध्ये स्वयमचलतयाऽवस्थितः। ताभिर्युक्तः अत एव बहुबलप्रवृद्धो भक्तस्य यजमानस्य बहुविधवृद्धिं कर्तुं क्षमः इत्युक्तं भवति॥

धरुणेषु—धारयतेर्णिलुक् चेत्युनप्रत्ययः। सहस्रमूतिः—सहस्रं ऊतयो यस्य सः, लुगभाव-श्छान्दसः। ववृधे—संहितायां अभ्यासस्य दीर्घत्वम्। नदीवृतम्—नदीं वृणोति, क्विप्, तुगा-गमः। जर्हृषाणः—हृष्यतेः यङ्लुगन्ताद् व्यत्ययेन शानच्। अन्धसा—अद्यत इत्यन्धः, अदेर्नुम् धश्चेत्यसुन्॥

तृतीयामृचमाह—

स हि द्वरो द्वरिषु वव्र ऊधनि चन्द्रबुभ्रो मदवृद्धो मनीषिभिः।
इन्द्रं तमह्वे स्वपस्यया धिया मंहिष्ठरातिं स हि पप्रिरन्धसः ॥३॥

सः हि द्वरः द्वरिषु वव्रः ऊधनि चन्द्रऽबुभ्रः मदऽवृद्धः मनीषिऽभिः इन्द्रम् तम् अह्वे सुऽअपस्यया धिया मंहिष्ठऽरातिम् सः हि पप्रिः अन्धसः ॥

सः उक्तलक्षण इन्द्रः द्वरिषु आवरीतृषु द्वरो हि आवरीता खलु, प्रकाशस्य शक्तिप्रवाहस्य वा आवरीतारः प्रतिरोद्धारो वृत्राः वृत्रबान्धवा असुराः, तेष्वपि महान् आवरीता इन्द्रः, कथम्? तेषां ऊर्ध्ववर्ति ऊधःशब्दवाच्यं विश्वसारनिधानं दिव्यसत्त्वस्थानं यथा न विदितं लभ्यं वा भवति तथा स आवृणोति आच्छादको भवति, तदाह ऊधनि सारवति सत्त्वस्थाने निमित्तभूते सति वव्रः

आवरीता, तद्यथा वृत्रादीनां न लभ्यं भवति तथा आच्छादयति, महानयं प्रतिरोद्धा "द्वरः द्वरिषु"। अत एव चन्द्रबुध्नः चन्द्रः आह्लादकः बुध्नः मूलाश्रयः यस्यासौ आनन्दमयोर्ध्वमूलः। मनीषिभिः मनस ईषितृभिः प्राज्ञैः मदवृद्धः मदैः मादयितृभिः सोमैः वर्धितः, मनीषिभिः प्रापितेन हर्षातिशयेन वृद्धिं प्रापितः। तम् तथाभूतं मंहिष्ठरातिम् प्रवृद्धदानं इन्द्रम् स्वपस्यया शोभनकर्मयोग्यया धिया बुद्धया अह्वे आह्वयामि। सः हि स खलु अन्धसः अन्नभूतस्य सर्वसारांशरसभूतस्य सोमस्य पप्रिः पूरयिता, स्वयं रसभरितः अस्मानपि रसेन पूरयितुं प्रभुरिन्द्रः॥

द्वरः—वृणोतेः, द्रु इत्येके, द्वरत्यावृणोति, पचाद्यच्। द्वरिषु—अचः इः इति इप्रत्ययः। वव्रः—वृञ् वरणे, घञर्थे कविधानम्, द्विर्भावश्छान्दसः। ऊधनि—उत् ऊर्ध्वं धियतेऽस्मिन् सारः सत्त्वं वा, समासे विधीयमानोऽनङादेशः छान्दसत्वात् केवलादपि भवति। स्वपस्यया—अपः कर्मनाम, शोभनं कर्म स्वपः, तदर्हतीति स्वपस्यः, छन्दसि चेति यप्रत्ययः। मंहिष्ठरातिम्—महि वृद्धौ, अतिशयेन मंहित्री मंहिष्ठा, सा रातिर्यस्य तम्। पप्रिः—पिपर्तेः॥

चतुर्थीमृचमाह—

आ यं पृणन्ति दिवि सद्मबर्हिषः समुद्रं न सुभ्वः स्वा अभिष्टयः।
तं वृत्रहत्ये अनु तस्थुरूतयः शुष्मा इन्द्रमवाता अह्रुतप्सवः॥४॥

आ यम् पृणन्ति दिवि सद्मऽबर्हिषः समुद्रम् न सुऽभ्वः स्वाः अभिष्टयः तम् वृत्रऽहत्ये अनु तस्थुः ऊतयः शुष्माः इन्द्रम् अवाताः अह्रुतऽप्सवः॥

सद्मबर्हिषः सद्म सदनं बर्हिरास्तीर्णं अन्तर्यजनवेद्यामासनं तदुपलक्षितोऽन्तर्यागप्रदेशः येषां ते सोमाः, यजने हि सोमा अभिषुता भवन्ति दिव्यस्येन्द्रस्य संमदाय। तथाभूताः यम् इन्द्रं दिवि द्युलोके आ पृणन्ति समन्तात् पूरयन्ति। तत्र दृष्टान्तः—सुभ्वः सुष्ठु भवन्तीति सुभ्वः स्वाः स्वीयाः अभिष्टयः आभिमुख्येन एषणानि यासां ताः आपः समुद्रं न समुद्रमिव, यथा समुद्रं प्रति एषणायुक्ताः शोभनजन्मानो नद्यः स्वयं प्रवहन्ति तं पूरयन्ति, तथा इन्द्रं प्रति यजनसदनाः सोमा अपि शोभनभवाः 'सुभ्वः' स्वयं एषणेरिताः क्षरन्ति समन्तात् पूरयन्ति। यमिन्द्रं दिवि सोमा एवं पूरयन्ति, तम् इन्द्रम् वृत्रहत्ये वृत्रवधे निमित्तभूते सति ऊतयः अवितारः (मरुत इति

सायणः, आख्यायिकामवलम्ब्य) प्रवर्धयितारः सहचरा इन्द्रप्रोत्साहनधुरीणा अनुतस्थुः अनुलक्ष्य तस्थुः। कीदृशास्ते? शुष्माः बलाढ्याः शोषयितारः शत्रूणाम् अवाताः चलनरहिताः, निष्कम्पाः अहुतप्सवः अकुटिलस्वरूपाः शोभनाकृतय इत्यर्थः ॥ पृणन्ति–क्र्यादिकः। वृत्रहत्ये–हन्तेर्भावे क्यप् तकारान्तादेशश्च। अहुतप्सवः–हृ कौटिल्ये, निष्ठायां ह्वरेः हु आदेशश्छन्दसि, प्सा भक्षणे, औणादिको डुप्रत्ययः, प्सु रूपवाचि, न हुतप्सवः अहुँतप्सवः ॥

पञ्चमीमृचमाह—

अभि स्ववृष्टिं मदे अस्य युध्यतो रघ्वीरिव प्रवणे सस्रुरूतयः।
इन्द्रो यद्वज्री धृषमाणो अन्धसा भिनद्वलस्य परिधींरिव त्रितः ॥५॥
अभि स्वऽवृष्टिम् मदे अस्य युध्यतः रघ्वीःऽइव प्रवणे सस्रुः ऊतयः
इन्द्रः यत् वज्री धृषमाणः अन्धसा भिनत् वलस्य परिधीन्ऽइव त्रितः ॥

ऊतयः अवितारः पूर्वोक्तलक्षणाः इन्द्रसहचराः मदे सोमजन्ये हर्षे सति अस्य इन्द्रस्य युध्यतः, वृत्रेण सह युध्यमानस्य पुरतः स्ववृष्टिम् स्वभूतवृष्टियुक्तं वृत्रं अभि आभिमुख्येन सस्रुः जग्मुः। दृष्टान्तः—रघ्वीरिव प्रवणे यथा गमनस्वभावा आपः निम्नदेशे गच्छन्ति, तद्वत्। यत् यदा अन्धसा अन्नभूतेन सोमेन पीतेन धृषमाणः धार्ष्ट्ययुक्तः वज्री वज्रवान् इन्द्रः वलस्य विभक्तिव्यत्ययः, वलं एतन्नामकमसुरं भिनत् अभिनत् विदारितवान् तदा ऊतयः सस्रुरिति संबन्धः। वलभेदने दृष्टान्तः—त्रितः परिधीनिव अपां पुत्रः आप्त्यः त्रितः त्रिवृत्कृतस्य अस्य जगतः जडीभूतांशे गुप्तां उदकोपलक्षितां शक्तिं उद्धर्तुं जडकूपेऽवतीर्णः पुनर्निर्गमनद्वारं असुरैरावृतं विज्ञाय देवानां स्तोत्रेण तदनुग्रहबलात् वलयीकृतानि परिधिवदवस्थितानि पिधानानि विदारितवान्। यथा त्रितः वलयाकृतीन्यावरणानि अभाङ्क्षीत् तथा इन्द्रः प्रकाशस्य वलयितारं संवरीतारं असुरं इति। त्रितस्य विचारः पुरस्तात् कुत्ससूक्ते (१.१०५) करिष्यते। पणिवृत्रवलादयः प्रागुक्ताः॥ स्ववृष्टिम्–स्वा वृष्टिर्यस्य तम्। युध्यतः–व्यत्ययेन शतृ। रघ्वीः–रघिर्गत्यर्थः। धृषमाणः–ञिधृषा प्रागल्भ्ये, व्यत्ययेन शः, आत्मनेपदं च। वलस्य–वल संवरणे। परिधीन्–परिधीयन्ते, कर्मणि किप्रत्ययः ॥

इति प्रथमस्य चतुर्थे द्वादशो वर्गः

षष्ठीमृचमाह—

परीं घृणा चरति तित्विषे शवोऽपो वृत्वी रजसो बुध्नमाशयत् ।
वृत्रस्य यत्प्रवणे दुर्गृभिश्वनो निजघन्थ हन्वोरिन्द्र तन्यतुम् ॥६॥

परि ईम् घृणा चरति तित्विषे शवः अपः वृत्वी रजसः बुध्नम् आ अशयत् वृत्रस्य यत् प्रवणे दुःऽगृभिश्वनः निऽजघन्थ हन्वोः इन्द्र तन्यतुम् ॥

यो वृत्रः अपः मध्यमस्थानाः तेजोबलादिशक्तिवाहिनीः वृत्वी वृत्वा आवृत्य रजसः मध्यमलोकस्य अन्तरिक्षस्य बुध्नम् मूलं उपरिप्रदेशमिति स्पष्टमाह सायणः आशयत् आश्रित्य अशेत, तस्य तथा ऊर्ध्वप्रदेशं बुध्नमाश्रित्य शयानस्य वृत्रस्य प्रवणे निम्नप्रदेशे नीचैरन्तरिक्षे दुर्गृभिश्वनः दुर्ग्रहव्यापनशीलस्य वृत्रस्य मध्यमस्थाने व्यापनं न केनापि ग्रहीतुं शक्यम् । हे इन्द्र, तादृशस्य वृत्रस्य हन्वोः मुखपार्श्वयोः तन्यतुम् तन्यतुना वज्रेण, तृतीयाविभक्तिव्यत्ययः, यत् यदा निजघन्थ नितरां प्रजहर्थ प्रहृतवानसि, तदानीं ईम् एनं त्वामिन्द्रं घृणा दीप्तिः वृत्रजयलक्षणा परि चरति परितो व्याप्नोति, त्वदीयं शवः बलं च तित्विषे प्रदिदीपे ॥ तित्विषे–त्विष दीप्तौ, लिट् । वृत्वी–वृञ् वरणे, स्नात्व्यादयश्चेति क्त्वाप्रत्ययस्य ईकारः । अशयत्–व्यत्ययेन परस्मैपदम् । दुर्गृभिश्वनः–ग्रह उपादाने, अशू व्याप्तौ इत्यनयोः दुःशब्दे उपपदे पृषोदरादित्वादिष्टरूपसिद्धिः । निजघन्थ–हन्तेः लिटि मध्यमपुरुषैकवचनम् । तन्यतुम्–तनु विस्तारे, अस्माद् यतुच् ॥

सप्तमीमृचमाह—

ह्रदं न हि त्वा न्यृषन्त्यूर्मयो ब्रह्माणीन्द्र तव यानि वर्धना ।
त्वष्टा चित्ते युज्यं वावृधे शवस्ततक्ष वज्रमभिभूत्योजसम् ॥७॥

ह्रदम् न हि त्वा निऽऋषन्ति ऊर्मयः ब्रह्माणि इन्द्र तव यानि वर्धना त्वष्टा चित् ते युज्यम् ववृधे शवः ततक्ष वज्रम् अभिभूतिऽओजसम् ॥

हे इन्द्र, यानि ब्रह्माणि मन्त्रजातानि तव वर्धना वर्धयितृणि तानि त्वा त्वां न्यृषन्ति नितरां प्राप्नुवन्ति । तत्र दृष्टान्तः—ऊर्मयो ह्रदम् न हि जलप्रवाहाः यथा जलाश्रयं प्राप्नुवन्ति तद्वत् ।

त्वष्टा चित् देवतक्षा त्वष्टैव ते तव युज्यम् योर्ज्यं योग्यं शवः बलं ववृधे वर्धितवान् । अपि च अभिभूत्योजसम् अभिभूति शत्रूणामभिभवितृ ओजो बलं यस्य तं वज्रम् आयुधं ततक्ष तीक्ष्णीकृतवान् ॥ न्यृषन्ति-ऋषी गतौ, तुदादिः । अभिभूत्योजसम्-अभिभूयतेऽनेनेति अभिभूति, करणे क्तिन् । अन्यत्सर्वं गतम् ॥

अष्टमीमृचमाह—

जघन्वाँ उ हरिभिः सम्भृतक्रतविन्द्र वृत्रं मनुषे गातुयन्नपः ।
अयच्छथा बाह्वोर्वज्रमायसमधारयो दिव्या सूर्यं दृशे ॥८॥

जघन्वान् ऊम् इति हरिऽभिः सम्भृतऽक्रतो इति सम्भृतऽक्रतो इन्द्र वृत्रम् मनुषे गातुऽयन् अपः अयच्छथाः बाह्वोः वज्रम् आयसम् अधारयः दिवि आ सूर्यम् दृशे ॥

हरिभिः अश्वैः त्वदीयवाहनैर्दिव्यप्राणबलोपलक्षणैः साधनभूतैः सम्भृतक्रतो सम्पादितकर्मन्, हे इन्द्र, बहूनि कर्माणि साधितानि इन्द्रेण, तदिदं संबोधनम् । तेषां कर्मणां कानिचिदाह । त्वं मनुषे मानुषाय जनाय अपः अपामिति विभक्तिव्यत्ययः गातुयन् मार्गमिच्छन् वृत्रम् आवरकं प्रतिरोधकं असुरं जघन्वान् उ हतवान् खलु । मनुष्यहिताय अपां प्रवाहस्य मार्गमिच्छन्निन्द्रः तत्प्रतिरोधकं वृत्रं हतवान् । 'मनुषे गातुयन् इन्द्रः वृत्रं जघन्वान्' इत्यन्वयं प्रतिपाद्य 'अपः प्रावर्तय इत्यध्याहारः' इति सायणः । अपि च बाह्वोः त्वदीययोः आयसम् अयोमयं, दार्ढ्योपलक्षणमिदं, वज्रम् अयच्छथाः अग्रहीः, आ समुच्चये, किं च दिवि स्वर्लोके दृशे द्रष्टुं, अस्माकं दर्शनाय सूर्यम् ज्योतिर्मयं देवमुत्तमं अधारयः स्थापितवानसि ॥ जघन्वान्-हन्तेर्लिटः क्वसुः । गातुयन्-छन्दसि परेच्छायामपि क्यच् ॥

नवमीमृचमाह—

बृहत्स्वश्चन्द्रममवद्युक्थ्य १ मकृण्वत भियसा रोहणं दिवः ।
यन्मानुषप्रधना इन्द्रमूतयः स्वर्नृषाचो मरुतोऽमदन्ननु ॥९॥

बृहत् स्वऽचन्द्रम् अमऽवत् यत् उक्थ्यम् अकृण्वत भियसा रोहणम् दिवः यत् मानुषऽप्रधनाः इन्द्रम् ऊतयः स्वः नृऽसाचः मरुतः अमदन् अनु ॥

यत् यदा स्तोतारः भियसा असुराद्भयेन उक्थ्यम् उक्थार्हं स्तोत्रयोग्यं बृहत् बृहन्नाम्ना विश्रुतं साम अकृण्वत अकुर्वन्। कीदृशं बृहत्साम? स्वश्चन्द्रम् स्वीयेन चन्द्रेण आह्लादकेन तेजसा युक्तं अमवत् बलयुक्तं दिवः रोहणम् द्युलोकस्यारोहणहेतुभूतं, एवंभूतेन स्तोत्रेण वृत्राद्भीता इन्द्रमस्तोषतेत्यर्थः। यत् यदा मानुषप्रधनाः मानुषहितानि प्रधनानि युद्धानि येषां ते, स्वः द्युलोकस्य ऊतयः अवितारः मरुतः नृषाचः नॄन् मनुष्यान् सेवमाना भूत्वा इन्द्रम् अन्वमदन् इन्द्रमनुसृत्य हर्षं प्रापयन्, तदानीं इन्द्रः वृत्रं जघन्वानिति पूर्वेण संबन्धः॥ स्वश्चन्द्रम्-ह्स्वाच्चन्द्रोत्तरपदे मन्त्रे, सुटः श्चुत्वेन शकारः। भियसा-भीशब्दस्य तृतीयैकवचने छान्दसः असुगागमः। नृषाचः-षच समवाये, अयं सेवनार्थः। अमदन्-मदी हर्षे, णिचि, णिलोपः॥

दशमीमृचमाह—

द्यौश्चिदस्यामवाँ अहेः स्वनादयोयवीद्भियसा वज्र इन्द्र ते।
वृत्रस्य यद्बद्बधानस्य रोदसी मदे सुतस्य शवसाभिनच्छिरः॥१०॥

द्यौः चित् अस्य अमऽवान् अहेः स्वनात् अयोयवीत् भियसा वज्रः इन्द्र ते वृत्रस्य यत् बद्बधानस्य रोदसी इति मदे सुतस्य शवसा अभिनत् शिरः॥

अमवान् बलवान् द्यौश्चित् द्युलोकोऽपि अस्य प्रकृतस्य अहेः वृत्रस्य स्वनात् घोषात् भियसा भयेन अयोयवीत् पृथग्भूत इव अकम्पतेत्यर्थः। हे इन्द्र, ते तव सुतस्य अभिषुतस्य सोमस्य पानेन मदे हर्षे जाते सति वज्रः त्वदीयः रोदसी द्यावापृथिव्यौ बद्बधानस्य बाधमानस्य बाधनशीलस्य वृत्रस्य शिरः यत् यदा शवसा दीप्तेन बलेन अभिनत् अच्छिनत्, तदानीं द्युलोको भयरहितोऽभूदिति शेषः॥ अयोयवीत्-यु मिश्रणामिश्रणयोः, यङ्लुगन्तात् लङ्। बद्बधानस्य-बाधृ विलोडने, ताच्छीलिकश्चानश्, शपः श्लुः छन्दसि॥

इति प्रथमस्य चतुर्थे त्रयोदशो वर्गः

एकादशीमृचमाह—

यदिन्नु इन्द्र पृथिवी दशभुजिरहानि विश्वा ततनन्त कृष्टयः ।
अत्राह ते मघवन्विश्रुतं सहो द्यामनु शवसा बर्हणा भुवत् ॥११॥
यत् इत् नु इन्द्र पृथिवी दशऽभुजिः अहानि विश्वा ततनन्त कृष्टयः
अत्र अह ते मघऽवन् विऽश्रुतम् सहः द्याम् अनु शवसा बर्हणा भुवत् ॥

यदिन्नु यद्येव पृथिवी दशभुजिः दशगुणिता भवेत्, यदि वा कृष्टयः मनुष्याः विश्वा सर्वाणि अहानि दिनानि ततनन्त विस्तारयेयुः स्वीयजनसंख्याम्, अहरहः प्रवृद्धा च भवेद्यदि मानुषजनसंख्या, हे मघवन् इन्द्र, तदा अत्राह अत्रैव पूर्वोक्तदेशकालकर्तृकेषु अवस्थाविशेषेष्वपि ते त्वदीयं सहः बलं विश्रुतं प्रख्यातं भवेत्। शवसा त्वदीयेन बलेन कृता बर्हणा अभिवृद्धिः द्यामनु द्युलोकमनुसृत्य भुवत् भवति, यथा दिवो वृद्धिर्महती अपरिमिता च तथा तव महिम्नो वृद्धिश्च भवति। पृथिवी दशगुणिता भवतु, मानवसंख्या च अनुदिनं वर्धमाना भवतु, तव विश्रुतो बलमहिमा तत्र सर्वत्र द्युलोक इवोज्ज्वलो भवेदित्यसंशयम् ॥ ततनन्त—तनु विस्तारे, छान्दसो द्विर्भावः, लिङर्थे लङ्, व्यत्ययेन शप्। बर्हणा—बृह वृद्धौ, औणादिकः क्युप्रत्ययः। भुवत्—भूधातोर्लेटि अडागमः उवङादेशश्च ॥

द्वादशीमृचमाह—

त्वमस्य पारे रजसो व्योमनः स्वभूत्योजा अवसे धृषन्मनः ।
चकृषे भूमिं प्रतिमानमोजसोऽपः स्वः परिभूरेष्या दिवम् ॥१२॥
त्वम् अस्य पारे रजसः विऽओमनः स्वभूतिऽओजाः अवसे
धृषत्ऽमनः चकृषे भूमिम् प्रतिऽमानम् ओजसः अपः स्व१रिति
स्वः परिऽभूः एषि आ दिवम् ॥

हे धृषन्मनः, धृषत् प्रगल्भं मनः यस्य सः तादृश प्रगल्भमनोयुक्तेन्द्र, अस्य रजसः लोकस्य अन्तरिक्षस्य, व्योमनः तदुपरि व्याप्तस्य आकाशस्य च पारे अन्ते, अवधौ वर्तमानः स्वभूत्योजाः स्वभूतबलः त्वम् अवसे सर्वरक्षार्थं इति पूर्वे, तव इन्द्रस्यैव वृद्ध्यर्थं इति वयम्, ओजसः त्वदीयस्य दिव्यस्य अनुगुणं प्रतिमानम् प्रतिमानभूतां प्रतिनिधिभूतां भूमिम् पृथिवीं चकृषे कृतवानसि,

भुवनस्य पारे तिष्ठन् तव ओजसः प्रतिमानतया पृथिवीमिमां कृतवानसि, तत्रापि तव साम्राज्यस्य संभवात् तव वर्धनायैव 'अवसे' भूमिं 'चकृषे'। प्रतिमीयतेऽस्मिन्निति प्रतिमानं, अधिकरणे ल्युट्, इन्द्रस्य ओजः अस्यां भूमौ प्रतिमीयते, तस्मात् तदोजसः प्रतिमानमिति बोध्यम्। अथ अपः मध्यमस्थाना जीवनधारणादिप्राणबलाद्याः शक्तीः स्वः द्युस्थानं ज्योतिश्च परिभूः परितो भूत्वा, परिग्रहीता सन् आ दिवम् द्युलोकं च एषि प्राप्नोषि ॥ व्योमनः-विपूर्वकात् अवतेर्गत्यर्थात् भावे मनिन् ॥

त्रयोदशीमृचमाह—

त्वं भुवः प्रतिमानं पृथिव्या ऋष्ववीरस्य बृहतः पतिर्भूः।
विश्वमाप्रा अन्तरिक्षं महित्वा सत्यमद्धा नकिरन्यस्त्वावान् ॥१३॥

त्वम् भुवः प्रतिऽमानम् पृथिव्याः ऋष्वऽवीरस्य बृहतः पतिः भूः विश्वम् आ अप्राः अन्तरिक्षम् महिऽत्वा सत्यम् अद्धा नकिः अन्यः त्वाऽवान् ॥

हे इन्द्र, त्वम् पृथिव्या विस्तीर्णायाः भूमेः प्रतिमानम् प्रतिमानभूतो भुवः भवसि। पूर्वस्यामृचि इन्द्रौजसः प्रतिमानं भूमिरित्युक्तं, अधुना भूमेः पृथिव्याः इन्द्र एव प्रतिमानमित्याह। अनेन भूलोकोऽचिन्त्यमहिमेति द्योतितम्। ऋष्ववीरस्य ऋष्वाः दर्शनीया इति सायणः, महान्तः उत्कृष्टा वीरा देवा यस्य तस्य बृहतः प्रवृद्धस्य द्युलोकस्य पतिर्भूः पालको भवसि। तथा अन्तरिक्षम् भुवो दिवश्च मध्ये स्थितं आकाशं विश्वम् सर्वमपि महित्वा तव महत्त्वेन सत्यं आप्राः निश्चयेन समन्तात् पूरितवानसि। त्वावान् त्वत्सदृशः अन्यः कश्चित् नकिः नास्ति, अद्धा सत्यम्॥ भुवः-भवतेर्लेटि सिप्यडागमः उवङादेशश्च। भूः-भवतेर्लुङ्, अडभावः। अप्राः-प्रा पूरणे। महित्वा-तृतीयाया डादेशः। त्वावान्-सादृश्यार्थे वतुप्॥

चतुर्दशीमृचमाह—

न यस्य द्यावापृथिवी अनु व्यचो न सिन्धवो रजसो अन्तमानशुः।
नोत स्ववृष्टिं मदे अस्य युध्यत एको अन्यच्चकृषे विश्वमानुषक् ॥१४॥

न यस्य द्यावापृथिवी इति अनु व्यचः न सिन्धवः रजसः अन्तम् आनशुः न उत स्वऽवृष्टिम् मदे अस्य युध्यतः एकः अन्यत् चकृषे विश्वम् आनुषक् ॥

यस्य इन्द्रस्य व्यचः व्यापनं द्यावापृथिवी द्यौश्च पृथिवी च न अनु न अन्वानशाते, प्राप्तुं न प्रभवत इत्यर्थः रोदसी अतीत्य वर्तते हि इन्द्रस्य 'व्यचः'। तथा रजसः अन्तरिक्षस्योपरि सिन्धवः स्यन्दमानाः आपः यस्येन्द्रस्य अन्तम् प्रभावस्य अवसानं न आनशुः न प्रापुः नाप्नुवन्तीत्यर्थः। उत अपि च मदे सोमपानजन्ये हर्षे सति, स्ववृष्टिम् इन्द्रस्वभूतवर्षणयुक्तं, स्वीकृतेन्द्रस्वं वृत्रं वृत्रेण, विभक्तिव्यत्ययः, युध्यतः युध्यमानस्य अस्य इन्द्रस्य तेजसोऽन्तं न प्रापुर्वृत्रादयः। हे इन्द्र एकः अद्वितीयस्त्वं अन्यत् विश्वम् त्वद्व्यतिरिक्तं सर्वं भूतजातं आनुषक् अनुक्रमेण सक्तं चकृषे कृतवानसि, सर्वस्यापि भूतजातस्य व्यवस्थां विधत्स इत्यर्थः॥ व्यचः-व्याप्त्यर्थाद् व्यचेरसुन्। आनशुः-व्यत्ययेन परस्मैपदम्। आनुषक्-अनुपूर्वात् षञ्ज सङ्गे इत्यस्मात् क्विप्, अनोरकारस्य आकारश्छान्दसः॥

पञ्चदशीमृचमाह—

आर्चन्नत्र मरुतः सस्मिन्नाजौ विश्वे देवासो अमदन्ननु त्वा।
वृत्रस्य यद्भृष्टिमता वधेन नि त्वमिन्द्र प्रत्यानं जघन्थ ॥१५॥
आर्चन् अत्र मरुतः सस्मिन् आजौ विश्वे देवासः अमदन् अनु त्वा
वृत्रस्य यत् भृष्टिऽमता वधेन नि त्वम् इन्द्र प्रति आनम् जघन्थ ॥

हे इन्द्र, अत्र अस्मिन् संग्रामे मरुतः त्वां आर्चन् अपूजयन्। सस्मिन् तस्मिन् आजौ संग्रामे विश्वे देवासः सर्वेऽपि देवाः त्वा अनु अमदन् हृष्टं त्वामनुसृत्य स्वयमपि अहृष्यन्। हे इन्द्र, त्वम् यत् यदा भृष्टिमता अग्निभिर्युक्तेन वधेन हननसाधनेन वज्रेण वृत्रस्य असुरस्य आनम् आननं प्रति निजघन्थ नितरां प्राहार्षीः, तदा मरुत आर्चन्निति संबन्धः॥ आर्चन्-अर्च पूजायां, भौवादिकः, लङ्। सस्मिन्-तदोः स इति विधीयमानं सत्वं सप्तम्यामपि व्यत्ययेन द्रष्टव्यम्। आनम्-आननम्, अन प्राणने, वर्णलोपश्छान्दसः। जघन्थ-हन्तेर्लिट्॥

इति प्रथमस्य चतुर्थे चतुर्दशो वर्गः

दशमेऽनुवाके तृतीयं 'न्यू ष्वि'ति एकादशर्चं सूक्तम्। दशम्येकादश्यौ त्रिष्टुभौ शिष्टाः जगत्यः। सव्य ऋषिरिन्द्रो देवता ॥

तत्र प्रथमामृचमाह—

न्यू३ षु वाचं प्र महे भरामहे गिर इन्द्राय सदने विवस्वतः।
नू चिद्धि रत्नं ससतामिवाविदन्न दुष्टुतिर्द्रविणोदेषु शस्यते ॥१॥
नि ऊम् इति सु वाचम् प्र महे भरामहे गिरः इन्द्राय सदने विवस्वतः
नु चित् हि रत्नम् ससताम्ऽइव अविदत् न दुःऽस्तुतिः द्रविणःऽदेषु शस्यते ॥

महे महते इन्द्राय सु वाचम् शोभनां स्तुतिं नि प्र भरामहे नितरां प्रयुञ्ज्महे। उ पादपूरणः। कथं शोभनस्तुतिः? आह—विवस्वतः प्रकाशमानस्य देवस्य सदने गृहे इन्द्राय गिरः स्तुतयः प्रादुर्भवन्ति, तस्मात् स्तुतीनां शोभनत्वं सम्पद्यते। विवस्वान् सूर्यो विश्रुतः। अत्र तु, मन्त्राणामाविर्भावः परमे व्योमनि तुरीये पदे प्रकाशमये स्थाने इति विवक्षा। 'विवस्वतः परिचरतो यजमानस्य सदने यज्ञगृहे' इति बाह्यपक्षीयाः। एवं स्तुतिभिः प्रबोधितो भगवानिन्द्रः नु चित् क्षिप्रं हि पादपूरणः रत्नम् रमणीयं रतिशब्दव्यवहार्यं हर्षविशेषं अविदत् विन्दति। तत्र दृष्टान्तः—ससतामिव यथा स्वपतां बाह्यचेष्टारहितानां पुरुषाणां अन्तरे 'रत्नं' रतिः सुगमा भवति, तथा यजमानस्तोत्रपरवशस्येन्द्रस्य रतिः सुलभेत्यर्थः॥ अत्र स्थूलार्थमाह सायणः 'रत्नं रमणीयं असुराणां धनं' इन्द्रः विन्दति 'यथा स्वपतां पुरुषाणां धनं चोरः क्षिप्रं लभते तद्वत्' इति। उभयोः पक्षयोरेवं भवति विशेषः। सुप्तानां यादृशी रतिः तादृशीं रतिं लभत इन्द्रः इति सूक्ष्मार्थः। सुप्तानां धनं चोर इवेन्द्रोऽसुराणां धनं लभत इति सायणीयोऽर्थः। तावान् सुष्ठु ते महिमा यावता रत्नपदवाच्यां रतिं लभत इन्द्रः, तां च रतिं दिव्यधनभूतां स यजमानाय धत्ते। स्तुतेर्दुष्टत्वे तथा न प्रीता भवन्ति दातारो देवाः, अत आह—दुःस्तुतिः दुष्टा असमीचीना स्तुतिः द्रविणोदेषु धनदातृषु न शस्यते नाभिधीयते। तस्मात् सुवाचं विवस्वतः सदने प्रादुर्भूतां प्रभरामहे॥ महे—मह पूजायां, क्विप्, अथवा महच्छब्दस्य अल्लोपः। ससतामिव—षस स्वप्ने, शतृ। अविदत्—विदॢ लाभे, वर्तमाने लुङ्। द्रविणोदेषु—गतम् (१.१५.७)॥

द्वितीयामृचमाह—

दुरो अश्वस्य दुर इन्द्र गोरसि दुरो यवस्य वसुन इनस्पतिः ।
शिक्षानरः प्रदिवो अकामकर्शनः सखा सखिभ्यस्तमिदं गृणीमसि ॥२॥

दुरः अश्वस्य दुरः इन्द्र गोः असि दुरः यवस्य वसुनः इनः पतिः शिक्षाऽनरः प्रऽदिवः अकामऽकर्शनः सखा सखिऽभ्यः तम् इदम् गृणीमसि ॥

हे इन्द्र, त्वं अश्वस्य भोगसमर्थप्राणबलाद्युपलक्षणभूतस्य दुरः द्वाराणां विघटयिताऽसि । दुरो दाता इति व्याचक्षाणः सायणः डुदाञ् दान इति धातोर्निष्पादयति महता क्लेशेन । अन्यत्र (६.३५.५) स एव "दुरो द्वाराणि विघटयन्" इति व्याचष्टे 'दुरो दारयतेः' निष्पादयति च । एवमिहापि भवति । न केवलं अश्वस्य लाभाय तस्य द्वारं विदारयसि, उद्घाटयसि, किं तु गोः रश्मेः ज्ञानोपलक्षणस्य दुरः असि, तथा यवस्य सर्वधान्योपलक्षणभूतायाः अन्नमयसम्पदः दुरः असि । अपि च वसुनः सर्वसत्त्वात्मकस्य धनस्य इनः स्वामी पतिः पालकश्च । पुनः कीदृशः इन्द्रः? शिक्षानरः शिक्षाया सर्वविद्योपादानस्य नरः नेता, प्रदिवः प्रगता दिवः दिवसा यस्य स प्रवृद्धः पुराणः, अकामकर्शनः कामान् कर्शयति नाशयतीति कामकर्शनः न कामकर्शनः अकाम-कर्शनः यजमानाभीष्टपूरकः सखिभ्यः सखा ये देवानां सख्यं भजन्ते यजनादिना तेभ्यः मित्रम् । एवंभूत इन्द्रः तम् प्रति इदम् स्तोत्रं गृणीमसि ब्रूमहे ॥ गृणीमसि—इदन्तो मसिरिति मसेरिकारः ॥

तृतीयामृचमाह—

शचीव इन्द्र पुरुकृद् द्युमत्तम तवेदिदमभितश्चेकिते वसु ।
अतः सङ्गृभ्याभिभूत आ भर मा त्वायतो जरितुः काममूनयीः ॥३॥

शचीऽवः इन्द्र पुरुऽकृत् द्युमत्ऽतम तव इत् इदम् अभितः चेकिते वसु अतः सम्ऽगृभ्य अभिऽभूते आ भर मा त्वाऽयतः जरितुः कामम् ऊनयीः ॥

शचीवः, शक्तिमन् हे इन्द्र, पुरुकृत् बहुकर्मकारिन्, द्युमत्तम अतिशयेन दीप्तिमन्, अभितः सर्वतः वर्तमानं वसुधनं सर्वसत्त्वात्मकं इदम् तवेत् तवैव तव स्वभूतमिति चेकिते ज्ञायतेऽस्माभि-

रिति शेषः। अतः 'कारणात्' इति पूर्वे, अस्माद्वसुनः संगृभ्य सम्यक् गृहीत्वा अस्मद्योग्यं वसु इति शेषः, आभर आहर। हे अभिभूते अभिभवितः शत्रूणां, त्वायतः त्वामात्मन इच्छतः, त्वत्कामस्य जरितुः स्तोतुः कामम् अभिलाषं मा ऊनयीः परिहीणं मा कार्षीः॥ चेकिते इत्यादयो गताः। ऊनयीः—औनयः, ऊन परिहाणे, चुरादिः, छान्दसः प्रयोगः॥

चतुर्थीमृचमाह—

एभिर्द्युभिः सुमना एभिरिन्दुभिर्निरुन्धानो अमतिं गोभिरश्विना।
इन्द्रेण दस्युं दरयन्त इन्दुभिर्युतद्वेषसः समिषा रभेमहि ॥४॥
एभिः द्युऽभिः सुऽमनाः एभिः इन्दुऽभिः निऽरुन्धानः अमतिम् गोभिः अश्विना इन्द्रेण दस्युम् दरयन्तः इन्दुऽभिः युतऽद्वेषसः सम् इषा रभेमहि ॥

हे इन्द्र, एभिः अस्माभिर्दत्तैर्द्युभिः दीप्तैर्हव्यैः एभिः अभिषुतैः इन्दुभिः सोमैश्च प्रीतस्त्वं, अस्माकं अमतिम् (मन्तव्या मतिः ऐश्वर्यं अमतिर्दारिद्र्यमिति स्थूलार्थसमर्थनाय) अज्ञानं निरुन्धानः निवर्तयन् सुमनाः शोभनमनाः भव। अमतिनिरोधने साधनान्याह। गोभिः ज्ञानोपलक्षणैः रश्मिभिः अश्विना च प्राणबलोपलक्षण-अश्वयुक्तेन धनेन। अत्र यजमानैः 'द्यवः' इन्दवश्च इन्द्रायार्प्यन्ते। यथाक्रमं इन्द्रस्य प्रतिदानं गावः अश्वात्मकं धनं च। यजमानकृतदानैरिन्द्रस्य सुमनस्त्वं, इन्द्रस्य प्रतिदानेन प्रकाशलक्षणगोधनेन भोगसमर्थप्राणक्रियोपलक्षणाश्वेन अज्ञानलक्षणदारिद्र्यनिवृत्तिश्च बोध्ये। अथ वयं इन्दुभिः सोमैः प्रीतेन इन्द्रेण सहायेन दस्युम् उपक्षपयितारमसुरं दरयन्तः हिंसन्तः युतद्वेषसः पृथग्भूतशत्रुकाः भूत्वा इषा एषणावेगशक्त्या संरभेमहि संरब्धा भवेम, संगच्छेमहि॥ सुमनाः—शोभनं मनो यस्यासौ। निरुन्धानः—रुधिर् आवरणे। अन्ये गताः॥

पञ्चमीमृचमाह—

समिन्द्र राया समिषा रभेमहि सं वाजेभिः पुरुश्चन्द्रैरभिद्युभिः।
सं देव्या प्रमत्या वीरशुष्मया गोअग्रयाश्वावत्या रभेमहि ॥५॥

सम् इन्द्र राया सम् इषा रभेमहि सम् वाजेभिः पुरुश्चन्द्रैः अभिद्युभिः
सम् देव्या प्रमत्या वीरशुष्मया गोअग्रया अश्वावत्या रभेमहि ॥

हे इन्द्र, राया धनेन वयं संरभेमहि संगच्छेमहि, तथा इषा एषणाशक्त्या सम् संरभेमहि । वाजेभिः बलसमृद्धिभिः सम् संरभेमहि । कीदृशैः वाजैः ? पुरुश्चन्द्रैः पुरूणां बहूनामाह्लादकैः अभिद्युभिः अभितो दीप्यमानैः । अपि च, देव्या द्योतमानया दिव्यया वा प्रमत्या प्रकृष्टया बुद्धया त्वदीयया सम् रभेमहि संगच्छेमहि । कीदृश्या प्रमत्या ? वीरशुष्मया वीरं विक्रान्तं शत्रुक्षेपणसमर्थं शुष्मं बलं यस्याः तया गोअग्रया गावः ज्ञानप्रकाशलक्षणा रश्मयः अग्रे प्रमुखतः यस्याः तया अश्वावत्या अश्वैः प्राणबलोपलक्षणैरुपेतया, एवंभूतया प्रमत्या सङ्गच्छेमहि ॥

अत्र विचित्रं सायणीयम् । स्तोतृभ्यो दानार्थं इन्द्रस्य प्रकृष्टायां मतौ गावः पशवः प्रमुखतः तिष्ठन्ति किल, सा पुनः अश्वोपेता ! ऐन्द्री प्रमतिर्दिव्या, सा ज्ञानरश्मिप्रमुखा, भोगक्रियासमर्थ-प्राणशक्तिसम्पन्ना चेति बोध्यम् । 'उत नो धियः गोअग्राः कर्त' (१.९०.५) अस्माकं धियः चिद्रश्मिप्रमुखाः कुरुतेति प्रार्थयते गोतमः । 'ये स्तोतृभ्यो गोअग्रामश्वपेशसमग्ने रातिमुपसृजन्ति सूरयः' (२.१.१६) इत्यादावपि अस्मदुक्तमर्थमन्तरा असंबद्धप्रलपितं स्यात् ॥ रायेत्यादयो गताः । अश्वावत्या—मन्त्रे सोमाश्वेन्द्रियेति मतुपि दीर्घत्वम् ॥

इति प्रथमस्य चतुर्थे पञ्चदशो वर्गः

षष्ठीमृचमाह—

ते त्वा मदा अमदन्तानि वृष्ण्या ते सोमासो वृत्रहत्येषु सत्पते ।
यत्कारवे दश वृत्राण्यप्रति बर्हिष्मते नि सहस्राणि बर्हयः ॥६॥
ते त्वा मदाः अमदन् तानि वृष्ण्या ते सोमासः वृत्रऽहत्येषु सत्ऽपते
यत् कारवे दश वृत्राणि अप्रति बर्हिष्मते नि सहस्राणि बर्हयः ॥

हे सत्पते सतः सर्वस्य पालक इन्द्र, वृत्रहत्येषु वृत्रवधेषु निमित्तभूतेषु ते पूर्वोक्ताः मदाः मादकाः हर्षयितारस्तव सहचरा मरुतो वा त्वा त्वाम् अमदन् अमदयन् हर्षं प्रापयन् । तानि प्रसिद्धानि वृष्ण्या वृष्ण्यानि वृष्णः सेचनसमर्थस्य तव योग्यानि स्तोत्राणि त्वा'ममदन्' । ते प्रसिद्धाः सोमासः सोमाश्च त्वा'ममदन्' । यत् यदा कारवे स्तुतिकर्त्रे बर्हिष्मते यज्ञवते यज-

मानाय दश सहस्राणि अपरिमितानि वृत्राणि आवरकाणि प्रतिरोधकानि उपद्रवजातानि अप्रति अप्रतिहतशक्ति यथा भवति तथा निबर्हयः न्यवधीः ॥ बर्हयः—बर्हयति हिंसाकर्मा, लङ्, अडभावश्छन्दसि ॥

सप्तमीमृचमाह—

युधा युधमुप घेदेषि धृष्णुया पुरा पुरं समिदं हंस्योजसा ।
नम्या यदिन्द्र सख्या परावति निबर्हयो नमुचिं नाम मायिनम् ॥७॥

युधा युधम् उप घ इत् एषि धृष्णुऽया पुरा पुरम् सम् इदम् हंसि ओजसा नम्या यत् इन्द्र सख्या पराऽवति निऽबर्हयः नमुचिम् नाम मायिनम् ॥

हे इन्द्र, धृष्णुया धर्षकः शत्रूणां, त्वं युधा युद्धेन संबद्धं युधम् युद्धं उप घेदेषि उपगच्छस्येव, घ पादपूरणः, युद्धाद्युद्धमुपैष्येव, सर्वदा युद्धशीलोऽसि । पुरा पुरेण संबद्धं इदं पुरोवर्तिं पुरम् शत्रूणां नगरं ओजसा बलेन संहंसि सम्यक् भिनत्सि विनाशयसि । हे इन्द्र, यत् यदा नम्या नमनशीलेन शत्रोरुपरि पाते निमित्ते सति इति बोध्यं, सख्या सहायभूतेन वज्रेण परावति दूरदेशे वर्तमानं नमुचिम् नाम नमुचिसंज्ञया प्रसिद्धं मायिनम् कपटप्रज्ञायुक्तं असुरं निबर्हयः नितरां अहिंसीः ॥ नमुचिः—वृत्रबन्धुरसुरः, न मुञ्चत्यप इति नमुचिर्वृत्र इवापां रोधक इति उच्यते । इन्द्रेण सह युद्धं न मुञ्चतीति नमुचिरिति सायणः । नञ्राप्नपादित्यादिना नञः प्रकृतिभावः, औणादिकः किप्रत्ययः । नम्या—णम प्रह्वत्वे, औणादिक इन्प्रत्ययः, तृतीयाया ड्यादेशः टिलोपश्च । युधा—युध सम्प्रहारे, संपदादिलक्षणो भावे क्विप् । अन्ये गताः ॥

अष्टमीमृचमाह—

त्वं करञ्जमुत पर्णयं वधीस्तेजिष्ठयातिथिग्वस्य वर्तनी ।
त्वं शता वङ्र्यदस्याभिनत्पुरोऽनानुदः परिषूता ऋजिश्वना ॥८॥

त्वम् करञ्जम् उत पर्णयम् वधीः तेजिष्ठया अतिथिऽग्वस्य वर्तनी त्वम् शता वङ्र्यदस्य अभिनत् पुरः अननुऽदः परिऽसूताः ऋजिश्वना ॥

अस्यामृचि करञ्जः पर्णयः वङ्गृद इति असुरनामानि श्रूयन्ते, एषां अवयवार्थानुसारेण अर्थो निर्णेतुं न शक्यते प्रयोगबलन्यूनतायाः। अन्यत्र (१०.४८.८) सकृत् 'पर्णयघ्ने' 'करञ्जघ्ने' इति इन्द्रविशेषणतया प्रयुक्तम्, वङ्गृदनाम अत्रैव भवति। तस्मादेतेषां वैशिष्ट्यमनिर्णीयैव ऋग्व्याख्यातव्या। अतिथिग्व-ऋजिश्वानौ व्याख्यातौ (१.५१.५) द्रष्टव्यौ॥ हे इन्द्र, त्वं करञ्जम् असुरं उत अपि च पर्णयम् असुरं च अतिथिग्वस्य अतिथिभिर्गन्तव्यस्य यजमानस्य एतत्संज्ञकस्य वा तेजिष्ठया अतिशयेन तेजस्विन्या वर्तनी वर्तन्या वर्तयित्र्या प्रेरयित्र्या शक्त्या वधीः अवधीः हतवानसि। अननुदः अनु पश्चात् द्यति खण्डयति शत्रूनिति अनुदः अनुचरः नास्ति अनुदोऽस्येति अननुदः अनुचररहितः एक एव त्वम् ऋजिश्वना एतत्संज्ञकेन, प्रागुक्तलक्षणेन भक्तेन परिधूताः परितः प्रेरिताः परिभूताः वङ्गृदस्य असुरस्य शता शतानि बहूनि पुरः पुराणि अभिनत् अभिनः व्यत्ययेन प्रथमपुरुषः॥ तेजिष्ठया—तेजःशब्दान्मत्वर्थीयो विनिः, आतिशयनिके इष्ठनि विन्मतोर्लुक् इति विनो लोपः टेर्लोपश्च। वर्तनी—वृत्यन्ते प्रेर्यन्तेऽनयेति वर्तनी, करणे ल्युट्, विभक्तेः पूर्वसवर्णदीर्घत्वम्। अननुदः—दो अवखण्डने। परिधूताः—धू प्रेरणे॥

नवमीमृचमाह—

त्वमेताञ्जनराज्ञो द्विर्दशाबन्धुना सुश्रवसोपजग्मुषः।
षष्टिं सहस्रा नवतिं नव श्रुतो नि चक्रेण रथ्या दुष्पदावृणक्॥९॥
त्वम् एतान् जनऽराज्ञः द्विः दश अबन्धुना सुऽश्रवसा उपऽजग्मुषः
षष्टिम् सहस्रा नवतिम् नव श्रुतः नि चक्रेण रथ्या दुःऽपदा अवृणक्॥

हे इन्द्र, श्रुतः प्रसिद्धः त्वम् एतान् द्विर्दश विंशतिसंख्याकान् अबन्धुना बन्धुरहितेन असहायेन सुश्रवसा शोभनदिव्यावेशश्रवणयुक्तेन भक्तेन यजमानेन युद्धार्थं उपजग्मुषः उपगतवतः जनराज्ञः अप्रतीतदेवसत्ताकानां सामान्यपामरजनानां अधिपतीन् असुरप्रायान् असुरविभूतिभूतान् न्यवृणक् न्यवर्जयः। न केवलं तान्, तेषामनुचरानपीति तत्संख्यामाह। षष्टिम् सहस्रा सहस्राणां षष्टिं नवतिम् नव नवसंख्योत्तरां नवतिं ईदृक्संख्याकाननुचरांश्च अजैषीः। केन साधनेन? दुष्पदा दुष्प्रपदनेन दुर्गमेन रथ्या रथसंबन्धिना चक्रेण रथगतिसाधनभूतेन मुख्येनाङ्गेन॥

इदमत्र अवधातव्यम्। ईदृश्य ऋच आपाततो वृत्तान्तान्वाख्यानानीव लक्ष्येरन्। तथापि रहस्यार्थलाभायोपयुक्तं सुश्रवःशब्दश्रवणम्। तथा षष्टि-नवनवतिसंख्योदीरणेऽपि रहस्यमुप-

क्षिप्तम्। सुश्रवसमधिकृत्य प्रागुक्तम् (१.४९.२), दश-शत-सहस्रादिसंख्यानां किमपि पूर्णता-द्योतकत्वं बोध्यम्। पूर्णतायाः किञ्चिदूनत्वं नवनवत्यादेः, एवं षट्संख्याया अपि सप्तोनत्वं, सप्त-संख्या च विश्वसत्ताकक्ष्याविभागमूलभूततत्त्वबोधिनी। एवं द्विर्दशेत्यत्र द्विः द्विकृत्वः, सकृत् इत ऊर्ध्वमारोहणे सकृदवरोहणे च विघ्नकरा आसुरविभवभूता दिव्यावेशसम्पन्नं पुरुषं यजमानं 'सुश्रवसं' बाधन्ते। अन्यच्च षष्टिनवतिसंख्याविवरणं आर्षरहस्यज्ञानायत्तं इह दुरूहमिति एताव-देवालम्॥ जनराज्ञः–छन्दसि सभासान्तविधिरनित्यः, अतो न टच्। रथ्या–रथ्येन, विभक्ते-राकारः। दुष्पदा–दुष्पदेन, दुःखेन पत्तुं शक्यं दुष्पदं तेन, विभक्तेराकारः, पद गतौ, ईषद्-दुःसुष्विति खल्। अवृणक्–वृजी वर्जने, लङ्मध्यमैकवचनम्, सिचो लोपः, कुत्वम्॥

दशमीमृचमाह—

त्वमविथ सुश्रवसं तवोतिभिस्तव त्रामभिरिन्द्र तूर्वयाणम्।
त्वमस्मै कुत्समतिथिग्वमायुं महे राज्ञे यूने अरन्धनायः॥१०॥

त्वम् आविथ सुऽश्रवसम् तव ऊतिऽभिः तव त्रामऽभिः इन्द्र तूर्वयाणम्
त्वम् अस्मै कुत्सम् अतिथिऽग्वम् आयुम् महे राज्ञे यूने अरन्धनायः॥

हे इन्द्र, त्वम् तव ऊतिभिः त्वदीयाभिः रक्षाभिः सुश्रवसम् पूर्वोक्तं आविथ ररक्षिथ। तथा तूर्वयाणम् जित्वरगमनं देवार्थं योद्धारं एतत्संज्ञकं च तव त्रामभिः त्वदीयैस्त्रायकैर्बलैः आविथ। त्वम् महे महते यूने तरुणाय यौवनसंपन्नाय अस्मै सुश्रवसे राज्ञे राजमानाय नृपाय वा, कुत्सम् अतिथिग्वम् आयुम् एतान् उक्तस्वरूपलक्षणान् (१.३३, १.५१.६, १.५३.८, १.१०.११, १.३१.२) अरन्धनायः वशमानयः, रध्यतिर्वशगमन इति यास्कः। कुत्सादीनधिकृत्य प्रागुक्त-मवधेयम्॥ त्रामभिः–त्रैङ् पालने, आदेच इत्यात्वं, आतो मनिन्। अरन्धनायः–रन्धनं वशी-करणं, तत्करोतीति णिच्॥

एकादशीमृचमाह—

य उदृचीन्द्र देवगोपाः सखायस्ते शिवतमा असाम।
त्वां स्तोषाम त्वया सुवीरा द्राघीय आयुः प्रतरं दधानाः॥११॥

ये उत्ऽऋचि इन्द्र देवऽगोपाः सखायः ते शिवऽतमाः असाम त्वाम् स्तोषाम त्वया सुऽवीराः द्राघीयः आयुः प्रऽतरम् दधानाः ॥

हे इन्द्र, उदृचि उद्गता ऋक् स्तुतिलक्षणा यस्मिन् तस्मिन् उदर्के यज्ञस्यान्ते ये वयं देवगोपाः देवाः गोपाः पालयितारो येषां ते, ते सखायः त्वदीयसखिवदत्यन्तं प्रियाः शिवतमाः अतिशयेन कल्याणाः असाम अभूम । अथ, त्वया अस्मासु प्रीतेन त्वया सुवीराः शोभनवीरपुरुषलालित-वीर्योपेताः द्राघीयः दीर्घतरं प्रतरम् प्रकृष्टतरं च आयुः जीवितं दधानाः धारयमाणाः सन्तः त्वाम् भगवन्तं स्तोषाम स्तवाम ॥ अन्तर्यागस्यावसाने तत्परमपि देवरक्षिता देवसखाः कल्याणतमाश्च वयं वीर्यवत्तरा दीर्घतरोत्कृष्टायुषः सन्तः हे भगवन्निन्द्र, तव भजकाः स्यामेत्युक्तम् ॥ असाम—अस भुवि, लुङर्थे लोट् । स्तोषाम—स्तौतेर्लोट्, छान्दसम् ॥

इति प्रथमस्य चतुर्थे षोडशो वर्गः

दशमेऽनुवाके 'मा न' इत्येकादशर्चं चतुर्थं सूक्तम् । षष्ठ्यष्टमीनवम्येकादश्यस्त्रिष्टुभः शिष्टाः सप्त जगत्यः । सव्य ऋषिरिन्द्रो देवता ॥

तत्र प्रथमामृचमाह—

मा नो अस्मिन्मघवन्पृत्स्वंहसि नहि ते अन्तः शवसः परीणशे ।
अक्रन्दयो नद्यो ३ रोरुवद्वना कथा न क्षोणीर्भियसा समारत ॥१॥
मा नः अस्मिन् मघऽवन् पृत्ऽसु अंहसि नहि ते अन्तः शवसः परिऽनशे
अक्रन्दयः नद्यः रोरुवत् वना कथा न क्षोणीः भियसा सम् आरत ॥

हे मघवन् इन्द्र, अस्मिन् उपस्थिते अंहसि दुरिते पृत्सु पृतनासु दुरितविजृम्भितेषु संग्रामेषु नः अस्मान् मा 'प्रक्षैप्सीरिति शेषः' इति सायणः, प्रक्षिप्य प्रचोद्य वा मा कृथा उपेक्षामिति भावः । देववैरिभिः पापैः सह युद्धायास्मानप्रवर्तयन्नेव त्वं महाबलः सर्वान् जेतुं प्रभुरसीत्यर्थः । अतो बलं वर्णयति । ते तव शवसः दीप्तस्य बलस्य अन्तः अवसानं परिणशे परितो व्याप्तुं नहि न शक्यते, सर्वोऽपि शत्रुलोकः संभूय तव बलमतिक्रमितुं न प्रभवतीत्यर्थः । त्वं रोरुवत् अत्यर्थं शब्दं कुर्वन् नद्यः नदीः वना वनानि च अक्रन्दयः शब्दयसि, क्षोणीः पृथिव्यस्तिस्रः, त्रयो लोका भियसा त्वद्भयेन कथा कथं न समारत न सङ्गच्छन्ते, त्रयो लोकाश्च भिया संगताः,

बिभ्यत्येवेत्यर्थः। अत्र 'नद्यो वना' इत्यादीनां रहस्यसङ्केतत्वं न भवति, इन्द्रबलमहिम्नो विवक्षितत्वात्। भीषासाद्वातः पवत इत्याद्युपनिषद्वाक्यानामेवज्ञातीयको वेदमन्त्रो मूलमिति ज्ञेयम्॥ परीणशे–नशतिर्व्याप्तिकर्मा, कृत्यार्थे केन्प्रत्ययः, संहितायां पूर्वपदस्य दीर्घत्वम्। रोरुवत्–रु शब्दे, यङ्लुगन्तः, लटः शतृ, शपो लुक्, अभ्यस्तात् शतुः नुम्प्रतिषेधः। अन्ये गताः॥

द्वितीयामृचमाह—

अर्चा शक्राय शाकिने शचीवते शृण्वन्तमिन्द्रं महयन्नभि ष्टुहि।
यो धृष्णुना शवसा रोदसी उभे वृषा वृषत्वा वृषभो न्यृञ्जते॥२॥

अर्च शक्राय शाकिने शचीऽवते शृण्वन्तम् इन्द्रम् महयन् अभि स्तुहि यः धृष्णुना शवसा रोदसी इति उभे इति वृषा वृषऽत्वा वृषभः निऽऋञ्जते॥

अन्तरात्मन आमन्त्रणम्, अन्यस्य सख्युर्यजमानस्य वा। शाकिने शक्ताय शचीवते शक्तियुक्ताय, प्रज्ञावते वा, शक्राय इन्द्राय अर्च पूजां कुरु। शृण्वन्तम् स्तुतिमाकर्णयन्तं इन्द्रम् महयन् पूजयन् अभिष्टुहि आभिमुख्येन स्तुहि। यः इन्द्रः धृष्णुना धर्षकेण शत्रूणां, शवसा बलेन उभे रोदसी द्यावापृथिव्यौ न्यृञ्जते नितरां प्रसाधयति स इन्द्रः वृषा वर्षिता अभीष्टानां ज्योतिर्बलैश्वर्यादीनां, वृषत्वा वृषत्वेन वर्षितृभावेन यथोक्तवर्षणसामर्थ्येन वृषभः कीर्त्यते॥ शाकिने–शक्तिः शाकः, शक्लृ शक्तौ, भावे घञ्, मत्वर्थीय इनिः। अन्ये गताः॥

तृतीयामृचमाह—

अर्चा दिवे बृहते शूष्यं १ वचः स्वक्षत्रं यस्य धृषतो धृषन्मनः।
बृहच्छ्रवा असुरो बर्हणा कृतः पुरो हरिभ्यां वृषभो रथो हि षः॥३॥

अर्च दिवे बृहते शूष्यम् वचः स्वऽक्षत्रम् यस्य धृषतः धृषत् मनः बृहत्ऽश्रवाः असुरः बर्हणा कृतः पुरः हरिऽभ्याम् वृषभः रथः हि सः॥

अत्रापि पूर्ववदामन्त्रणम्। बृहते दिवे महते दीप्ताय, बृहच्छब्दवाच्यद्युपदार्थभूताय वा इन्द्राय शूष्यम् शूषं सुखं तत्र साधु, सुखकरमित्यर्थः तादृशं वचः स्तोत्रलक्षणं अर्च उच्चारय।

यस्य इन्द्रस्य धृषतः धर्षयतः असुरान्, मनः स्वक्षत्रम् स्वभूतबलवत् धृषत् धृष्टं भवति। सः हि स हि स खल्विन्द्रः बृहच्छ्रवाः बृहत् महत् श्रवः श्रवणं यशो वा यस्य सः, असुरः बलवान्, निरसिता शत्रूणां, बर्हणा बर्हणः, निबर्हयिता शत्रूणां, हरिभ्याम् प्रसिद्धाभ्यां अश्वाभ्यां पुरस्कृतः पूजितः वृषभः वर्षिता रथः रंहणशीलः वेगवान्॥ धृषतः—व्यत्ययेन शः। बर्हणा—सुपां सुलुगिति विभक्तेराकारः॥

चतुर्थीमृचमाह—

त्वं दिवो बृहतः सानु कोपयोऽव त्मना धृषता शम्बरं भिनत्।
यन्मायिनो व्रन्दिनो मन्दिना धृषच्छितां गभस्तिमशनिं पृतन्यसि॥४॥
त्वम् दिवः बृहतः सानु कोपयः अव त्मना धृषता शम्बरम् भिनत् यत्
मायिनः व्रन्दिनः मन्दिना धृषत् शिताम् गभस्तिम् अशनिम् पृतन्यसि॥

हे इन्द्र, त्वम् बृहतः महतः दिवः द्युलोकस्य सानु उन्नतं स्थानं कोपयः अकम्पयः। धृषता धर्षयित्रा शत्रूणां, त्मना आत्मना स्वयमेव शम्बरम् असुरम् (उक्तम् १.५१.६) अवाभिनत् अवधीः। यत् यदा व्रन्दिनः वृन्दवतः समूहभूत-असुरसंघयुक्तान् मायिनः मायाविनः असुरान् प्रति, तान् जेतुमित्यर्थः, मन्दिना मदयित्रा सोमेन धृषत् प्रागल्भ्यं प्राप्तस्त्वं शिताम् निशितां तीक्ष्णीकृतां गभस्तिम् घृणिं रश्मिं तद्वतीमित्यर्थः अशनिम् वज्रं पृतन्यसि पृतनारूपेणेच्छसि, मायिनो जेतुं निशितकिरणधारायुक्तं वज्रं प्रेरयसीत्यर्थः॥ कोपयः—कुप कोपे, ण्यन्ताल्लङ्, अडभावः। त्मना—मन्त्रेषु आकारलोपः। धृषत्—अन्तर्भावितण्यर्थः, व्यत्ययेन शः, शतरि नुमभावश्छान्दसः। शिताम्—शो तनूकरणे, अस्मान्निष्ठा। पृतन्यसि—पृतनामात्मन इच्छसीति क्यच्। व्रन्दिनः—अनवगतो धातुः, मृदुभावार्थको धातुरिति यास्कः, सायणस्तु समूहपर्यायवृन्दशब्द एव व्रन्दशब्द इति व्याचष्टे। तत्कालोपयुक्तोऽयमेवार्थोऽत्र गृहीतः। वृन्दं वृन्दं इति उभयथाप्युच्चारणे साधुत्वं वयोरभेदादिति बोध्यम्॥

पञ्चमीमृचमाह—

नि यद्वृणक्षि श्वसनस्य मूर्धनि शुष्णस्य चिद्व्रन्दिनो रोरुवद्वना।
प्राचीनेन मनसा बर्हणावता यदद्या चित्कृणवः कस्त्वा परि॥५॥

नि यत् वृणक्षि श्वसनस्य मूर्धनि शुष्णस्य चित् व्रन्दिनः रोरुवत् वना प्राचीनेन मनसा बर्हणावता यत् अद्य चित् कृणवः कः त्वा परि ॥

हे इन्द्र, त्वं रोरुवत् शब्दयन् श्वसनस्य वायोः मध्यमस्थानस्य सर्वजीवनधारणादिक्रियाधारभूतस्य जगत्प्राणस्य (पिण्डाण्डे च समन्वयो बोध्यः) मूर्धनि शिरसि ऊर्ध्वदेशे वना वननीयानि संभजनीयानि उदकानि सुखमयीरप इत्यर्थः यत् यस्मात् निवृणक्षि आवर्जयसि। तथा व्रन्दिनः समूहवतः सहायभूतबन्धुवृन्दयुक्तस्य शुष्णस्य चित् सर्वानन्दरसशोषणशीलस्य तापयितुरसुरस्यापि 'मूर्धनि नि वृणक्षि'। प्राणवायोरूर्ध्वस्थाने मूले वनशब्दवाच्यरसावर्जनेन दिव्यभोगक्रियादिशक्तिसम्पन्नो भवति प्राणवान् यजमानलोकः। शुष्णस्योपरि तथा आवर्जनात् स शुष्णत्वमेवोज्झति शमितः शान्तः शून्य एव भवति, रसार्द्रतया यजमानलोक आनन्दीभवति। ईदृशं महत् कृत्यं बहोः कालात्करोति भगवानिन्द्रः, अद्यापि करोत्येव। तस्मादस्मिन् कर्मणि तस्योपरि न कोऽपि वर्तत इत्याह। हे इन्द्र, प्राचीनेन प्रकर्षेण अञ्चता गच्छता, प्रकृष्टगमनेन, बहोः कालात् स्थितेन पुराणेन वा, बर्हणावता समृद्धियुक्तेन मनसा अनुग्रहधियेत्यर्थः, यत् यस्मात् त्वं अद्य चित् इदानीमपि कृणवः कुरुषे उक्तप्रकारेण, तस्मात् कः त्वा त्वां परि तवोपरि वर्तते, न कोपीत्यर्थः ॥ बर्हणावता—बर्हणा हिंसायामपि वर्तते, अत्र तु न, बृह वृद्धौ इत्यस्य भावे औणादिको युप्रत्ययः, तस्मान्मत्वर्थीयः वतुप्। 'बर्हणावत्' (३.३९.८) इत्यत्र सायण एवैवम् ॥

इति प्रथमस्य चतुर्थे सप्तदशो वर्गः

षष्ठीमृचमाह—

त्वमाविथ नर्यं तुर्वशं यदुं त्वं तुर्वीतिं वय्यं शतक्रतो।
त्वं रथमेतशं कृत्व्ये धने त्वं पुरो नवतिं दम्भयो नव ॥६॥

त्वम् आविथ नर्यम् तुर्वशम् यदुम् त्वम् तुर्वीतिम् वय्यम् शतक्रतो इति शतऽक्रतो त्वम् रथम् एतशम् कृत्व्ये धने त्वम् पुरः नवतिम् दम्भयः नव ॥

हे इन्द्र, त्वम् नर्यादीन् तत्त्वविशेषनिदर्शनप्रतिष्ठाभूतान् पुरुषान्, नर्यम् तुर्वशम् यदुम्

त्रीन् एतान् आविथ ररक्षिथ। तथा त्वम् तुर्वीतिम् एतत्संज्ञया प्रतिष्ठितं वय्यम् च आविथ। हे शतक्रतो बहुकर्मन् त्वम् रथम् कृत्व्ये कर्तव्ये सम्पादयितव्ये धने निमित्तभूते सति, रथसंज्ञकं एतशम् एतशसंज्ञकं च आविथ। उक्तानां राज्ञां रथं 'एतशं' अश्वं च आविथेति सायणः। त्वम् नवतिं नव नवोत्तरनवतिसंख्याकाः पुरः पुराणि असुराणामिति शेषः, शम्बरस्येति सायणः, दम्भयः व्यनाशयः॥ कृत्व्ये–कर्तव्ये इति शब्दस्यास्य वर्णविकारः पृषोदरादित्वात्॥ अथ नर्यादयो व्याख्यातव्याः। नर्यः नराणां हितः। तुर्वश-तुर्वीतिशब्दौ तूर्वयाणवत् जयशीलताद्योतकौ। वय्यः ततस्य यजनस्य अङ्गभूततन्तुसन्तानकुशलः। रथः रंहणशीलः। एतशः एतेर्गच्छत्यर्थात् तशन्प्रत्ययः। यदुः दुरूहो भवति॥

सप्तमीमृचमाह—

स घा राजा सत्पतिः शूशुवज्जनो रातऽहव्यः प्रति यः शासमिन्वति।
उक्था वा यो अभिगृणाति राधसा दानुरस्मा उपरा पिन्वते दिवः॥७॥
सः घ राजा सत्ऽपतिः शूशुवत् जनः रातऽहव्यः प्रति यः शासम् इन्वति
उक्था वा यः अभिऽगृणाति राधसा दानुः अस्मै उपरा पिन्वते दिवः॥

स घ जनः स खलु जातः यजमानः राजा राजमानः सन् सत्पतिः सतां सृष्टौ प्राप्तसत्ताकानां सर्वेषां भूतानां पतिः पालयिता भूत्वा शूशुवत् वर्धते, आत्मानं वर्धयतीति वा। यः इन्द्रं प्रति रातहव्यः दत्तहव्यः सन् शासम् अनुशासनं इन्द्रकर्तृकं इन्वति व्याप्नोति, यः इन्द्राय स्वयं स्वीयं च दत्त्वा तस्य शासने स्थितः सर्वथा तदनुशासनान्नान्यदाचरति, सर्वदा सर्वत्र च तदनुशासनमेव व्याप्य जीवति, स भक्तो यजमानः सुकृती स्वात्मानं वर्धयन् स्वयं वर्धमानो वा राजा सत्पतिश्च भवति, इन्द्रस्य अनुग्रहात् आज्ञाकारित्वात् अत एव तेन सह युक्तत्वाच्चेति भावः। इन्द्रशासनानुष्ठानफलमुक्त्वा इन्द्रस्तुतिफलमाह। यः स्तोता राधसा धनभूतेन साधनसामर्थ्येन करणेन उक्था वा उक्थानि स्तोत्राणि वा अभिगृणाति इन्द्रस्याभिमुखीकरणाय शंसति, अस्मै स्तोत्रे दानुः दाता इन्द्रः उपरा (उपरान् मेघान् उपरो मेघनामेति बाह्यपक्षीयाः) उपरि वर्तमानानि तेजोबलभोगैश्वर्यादीनि दिवः द्युलोकात् पिन्वते पिन्वति वर्षति, अत्र स्तुतिशंसनं न केवलं वाचा निरुह्यते, 'राधसेति' करणस्योक्तिरवधेया॥ घ–संहितायां दीर्घः। शूशुवत्–ट्वोश्वि गतिवृद्ध्योः, ण्यन्ताद्वर्तमाने लुङ्, अन्यच्च छान्दसम्। शासम्–शासु अनुशिष्टौ, भावे घञ्।

इन्वति–इवि व्याप्तौ। उपरा–सुपां सुलुगिति शसः पूर्वसवर्णदीर्घत्वम्। पिन्वते–पिवि सेचने, व्यत्ययेनात्मनेपदम्॥

अष्टमीमृचमाह—

असमं क्षत्रमसमा मनीषा प्र सोमपा अपसा सन्तु नेमे।
ये त इन्द्र ददुषो वर्धयन्ति महि क्षत्रं स्थविरं वृष्ण्यं च ॥८॥

असमम् क्षत्रम् असमा मनीषा प्र सोमऽपाः अपसा सन्तु नेमे ये ते इन्द्र ददुषः वर्धयन्ति महि क्षत्रम् स्थविरम् वृष्ण्यम् च॥

क्षत्रम् इन्द्रस्य बलं असमम् न केनापि तुल्यं, मनीषा तस्य बुद्धिः असमा न कस्यापि बुद्धया समाना, बलं सर्वाधिकं बुद्धिश्च सर्वाधिका। नेमे 'नेम इति सर्वनामशब्द एतच्छब्द-समानार्थ' इति सायणः, संदिग्धोऽयमर्थः। नेम इत्यर्धवाची, तथा 'नेमे देवा नेमेऽसुराः' (निरुक्तम् ३.२०) इत्यत्र 'अर्धतो देवा अर्धतोऽसुरा आसन्नि'ति दुर्गव्याख्या। एवमत्रापि अर्धतः सोमपाः प्रकृष्टाः पूर्णाः सोमपा भवन्त्वित्यर्थः। तस्मान्नेमे सोमपाः असमग्रसोमपायिनो यजमानाः अपसा कर्मणा प्र सन्तु प्रकृष्टाः प्रवृद्धा वा भवन्तु संपूर्णसोमपानेनेति भावः। हे इन्द्र, ये ददुषः ददिवांसः दत्तवन्तो यजमानाः ते तव महि महत् क्षत्रम् बलं स्थविरम् स्थूलं प्रवृद्धं वृष्ण्यम् वृषत्वम् च अभीष्टतेजोबलादिवर्षणलक्षणं वर्धयन्ति ते नेमे सोमपाः प्र सन्तु इति संबन्धः॥ नेमे–सर्वनामत्वात् जसः शीभावे गुणः। ददुषः–ददातेर्लिटः क्वसुः, जसो व्यत्ययेन शसादेशः। स्थविरम्–तिष्ठतेः किरच्प्रत्ययान्तनिपातः॥

नवमीमृचमाह—

तुभ्येदेते बहुला अद्रिदुग्धाश्चमूषदश्चमसा इन्द्रपानाः।
व्यश्नुहि तर्पया काममेषामथा मनो वसुदेयाय कृष्व ॥९॥

तुभ्य इत् एते बहुलाः अद्रिऽदुग्धाः चमूऽसदः चमसाः इन्द्रऽपानाः वि अश्नुहि तर्पय कामम् एषाम् अथ मनः वसुऽदेयाय कृष्व॥

तुभ्य इत् तुभ्यमेव एते चमसाः सोमाः सम्पादिताः। कीदृशाः? बहुलाः प्रभूताः अद्रि-दुग्धाः ग्रावभिरभिषुताः बहिर्यागे ग्रावा पाषाणो भवति, तथा तात्पर्यनिष्कर्षणाय अवकाशप्रदाः

शब्दाः मन्त्रदृष्टिषु अवस्थिताः, ऋषीणां बहिरन्तश्च उभयथाप्यभिमतार्था एते बोध्याः, प्रधानो भावस्तु रहस्यार्थगम्यः, स च सङ्केतविवरणायत्त इति स्मारयामः। 'यत्र ग्रावे'ति (१.२७) सूक्ते सोमाभिषवपाषाणादिस्वरूपं प्रतिपादितम्, अतो नेह विस्तर इष्यते। अद्रिः पर्वतः सर्वोऽपि जडः तत्र निलीनोऽन्तर्भूतः सोमः दुग्धोऽभिषुतो भवति। पुनः कीदृशाः? चमूपदः चमूषु भक्षणपात्रेषु चमसेषु सीदन्तीति चमूषदः, इन्द्रपानाः इन्द्रस्य पानार्थाः। हे इन्द्र, त्वं तान् व्यश्नुहि व्याप्नुहि, स्वीकुरु, ततः, एषाम् त्वदीयानां कामम् अभिलाषं तर्पय पूरय, अथ अनन्तरं वसुदेयाय अस्मभ्यं अभिमतधनदानाय मनः कृष्व कुरुष्व। तुभ्य–छान्दसो मलोपः। चमसाः–चम्यन्ते भक्ष्यन्त इति चमसाः सोमाः। इन्द्रपानाः–पिबतेः कर्मणि ल्युट्। वसुदेयाय–ददातेर्भावे यत्। कृष्व–डुकृञ् करणे, बहुलं छन्दसीति विकरणस्य लुक्॥

दशमीमृचमाह—

अपामतिष्ठद्धरुणह्वरं तमोऽन्तर्वृत्रस्य जठरेषु पर्वतः।
अभीमिन्द्रो नद्यो वव्रिणा हिता विश्वा अनुष्ठाः प्रवणेषु जिघ्नते॥१०॥

अपाम् अतिष्ठत् धरुणऽह्वरम् तमः अन्तः वृत्रस्य जठरेषु पर्वतः अभि ईम् इन्द्रः नद्यः वव्रिणा हिताः विश्वाः अनुऽस्थाः प्रवणेषु जिघ्नते॥

अपाम् धरुणह्वरम् धारानिरोधकं तमः अन्धकारं अतिष्ठत् स्थितमभूत्। कथं अपां धाराः तमसा निरोद्धुं शक्याः? तेजसः प्रतिद्वन्द्वि हि तमः अद्रव्यम्। तत् द्रव्यभूतानां आप्यधाराणां निरोधकं चेत्, किमपि घनं द्रव्यं स्यात् तमः, अपां धाराश्च तमःप्रतिद्वन्द्विभूतास्तेजोवाहिन्यः स्युः। अत एव अपां सङ्केतरूपत्वानभ्युपगमे तात्पर्यं नोपपद्यत इति ब्रूमः। उक्तोऽर्थः स्पष्टीक्रियते। वृत्रस्य आवरीतुः त्रैलोक्यस्य जठरेषु उदरेषु अन्तरेषु अन्तः मध्ये पर्वतः मेघाख्यः अपामावरकः, जडघनं तमः स्थितमित्यर्थः। ईम् इमाः नद्यः अपः वव्रिणा हिताः आवरकेण वृत्रेण निहिताः पिहिता वा विश्वाः सर्वाश्च अनुष्ठाः अनुक्रमेण तिष्ठन्तीः, पर्वतः पर्ववान् उपर्युपरि बहुसानुयुक्तः, तदनुरोधेन आपश्च अनुक्रमवत्यः तस्मादनुष्ठा इत्युक्तम्। एवंभूताः अपः इन्द्रः वृत्रहा प्रवणेषु निम्नप्रदेशेषु अभि जिघ्नते अभिगमयति। तस्मादस्माभिः प्रतिपादितलक्षणानां अपां वृष्टिः॥ अनुष्ठाः–आतश्चोपसर्गे इति तिष्ठतेः कप्रत्ययः, उपसर्गात् सुनोतीति षत्वम्। जिघ्नते–हन्तेर्गत्यर्थात् व्यत्ययेनात्मनेपदम्, शपः श्लुः अभ्यासस्य इत्वं च छान्दसे॥

एकादशीमृचमाह—

स शेवृधमधि धा द्युम्नमस्मे महि क्षत्रं जनाषाळिन्द्र तव्यम् ।
रक्षा च नो मघोनः पाहि सूरीन्राये च नः स्वपत्या इषे धाः ॥११॥
सः शेऽवृधम् अधि धाः द्युम्नम् अस्मे इति महि क्षत्रम् जनाषाद् इन्द्र तव्यम् रक्ष च नः मघोनः पाहि सूरीन् राये च नः सुऽअपत्यै इषे धाः ॥

हे इन्द्र, सः स त्वं अस्मे अस्मासु द्युम्नम् दीप्तिं प्रकाशं, यश इत्येके अधि धाः अधिनिधेहि कीदृशम्? शेवृधम् शम् शान्त्यात्मकं सुखं शे तत्र वर्धमानम्, शान्तिसुखे सति यद्वर्धते तद् द्युम्नं निधेहीति भावः । तथा महि महत् जनाषाट् जनानां शत्रूणां साहयित्, अभिभवित् तव्यम् प्रवृद्धं क्षत्रम् बलं अधिधाः । किञ्च, हे इन्द्र, नः अस्मान् मघोनः धनवतः कृत्वा रक्ष च पालय च । अस्मान् सूरीन् विदुषः कृत्वा पाहि रक्ष । राये च धनाय च स्वपत्यै स्वपत्याये शोभन कर्मरूपसन्ततियुक्तायै इषे एषणायै, प्रेरणाशक्त्यै, नः अस्मान् धाः धारय ॥ तव्यम्—तवति र्वृद्ध्यर्थः, सौत्रो धातुः, अचो यदिति यत्प्रत्ययः । स्वपत्यै—स्वपत्यायै, याडागमाभावः छान्दसः ।

इति प्रथमस्य चतुर्थेऽष्टादशो वर्गः

दशमेऽनुवाके दिवश्चिदस्येति पञ्चमं अष्टर्चं सूक्तम् । सव्य ऋषिः इन्द्रो देवता जगती छन्दः ।

तत्र प्रथमामृचमाह—

दिवश्चिदस्य वरिमा वि पप्रथ इन्द्रं न मह्ना पृथिवी चन प्रति ।
भीमस्तुविष्माञ्चर्षणिभ्य आतपः शिशीते वज्रं तेजसे न वंसगः ॥१॥
दिवः चित् अस्य वरिमा वि पप्रथे इन्द्रम् न मह्ना पृथिवी चन प्रति भीमः तुविष्मान् चर्षणिऽभ्यः आऽतपः शिशीते वज्रम् तेजसे न वंसगः ॥

अस्य इन्द्रस्य वरिमा उरुत्वं विपुलता दिवश्चित् द्युलोकादपि वि पप्रथे विशेषेण विस्तीर्णो भवति । पृथिवी चन पृथिव्यपि मह्ना महिम्ना इन्द्रम् न प्रति इन्द्रस्य प्रतिः प्रतिनिधिर्न भवति, दिवो गरीयान् पृथिव्याश्चाधिक इत्यर्थः । भीमः भयंकरः शत्रूणां तुविष्मान् बलवान् चर्षणिभ्यः द्रष्टृणां मनुष्याणां स्तोतृणामिति यावत्, तेषां अनुग्रहाय आतपः आ समन्तात् शत्रून् तपति, तापकारी । तेजसे तैक्ष्ण्याय वज्रम् आयुधं शिशीते तीक्ष्णीकरोति । दृष्टान्तः—वंसगो न यथा

वृषभः युद्धाय स्वभृङ्गे तीक्ष्णीकरोति तद्वत् ॥ पप्रथे–प्रथ प्रख्याने । मह्ना–महिम्ना, वर्णलोप-श्छान्दसः । प्रति–प्रतिः प्रतिनिधौ, कर्मप्रवचनीयत्वम् । भीमः–भियः पुग्वेति मक्प्रत्ययः । शिशीते–शो तनूकरणे, व्यत्ययेन विकरणस्य श्लुः, आत्मनेपदं च । वंसगः–वन षण संभक्तौ, अस्मादौणादिकः सप्रत्ययः, वंसं वननीयं गच्छतीति वंसगः ॥

द्वितीयामृचमाह—

सो अर्णवो न नद्यः समुद्रियः प्रति गृभ्णाति विश्रिता वरीमभिः ।
इन्द्रः सोमस्य पीतये वृषायते सनात्स युध्म ओजसा पनस्यते ॥२॥

सः अर्णवः न नद्यः समुद्रियः प्रति गृभ्णाति विऽश्रिताः वरीमऽभिः
इन्द्रः सोमस्य पीतये वृषऽयते सनात् सः युध्मः ओजसा पनस्यते ॥

सः इन्द्रः, समुद्रियः समुद्रे अखण्ड-अनवधिकसत्त्वनिधौ भवः, तस्मात् वरीमभिः उरुत्वैः विस्तीर्णैः स्वविभवैः विश्रिताः वितत्य गताः, व्याप्ताः अप्छब्दलक्षिताः तेजोबलादिवाहिनीः शक्तीः प्रति गृभ्णाति स्वीकरोति । तत्र दृष्टान्तः–अर्णवो न नद्यः समुद्रः अपां राशिः यथा नदीरपः स्वीकरोति तद्वत् । दृष्टान्तद्योतितोऽर्थविशेषः सर्वोऽपि धीमद्भिरूह्यः, विस्तर इह मा भूत् । इन्द्रः सोमस्य पीतये सोमपानाय वृषायते वृष इवाचरति, हर्षयुक्तो वर्षतीति भावः । उक्त-लक्षणानामपां परिग्रहीता अपां राशिरिवेन्द्रः ताः शक्तीर्वर्षति यजमानाय सोमकामः । तेन शक्तो भूत्वा भक्तो यजमानः सोमं सुनोति । सोमस्वीकरणादिन्द्र ओजस्वी योद्धा यजमानस्तुत्यर्हः स्तुतिमिच्छति, स्तुत्या हि देवता वर्धते । तदाह, सः इन्द्रः सनात् चिरात् युध्मः योद्धा ओजसा बलेन स्तोत्राहतालक्षणेन पनस्यते पनस्यति स्तोत्रमिच्छति ॥ पनधातुः स्तुत्यर्थे प्रसिद्ध इति न संशयः । अपि तु कर्मसामर्थ्ये, बलिष्ठक्रियायां वा वर्तते । प्राचीनभाषान्तरीयक्रियार्थक-शब्दानां परीक्षणेनेदमुच्यते । अरविन्दश्रीचरणानामाशयोऽयम् । तथा 'पनिष्टम्' 'पनीयसी' (३.१.१३, ५.६.४) इत्यादिस्थलेषु उपपत्तिं च पश्यामः । एवं चेत् 'ओजसा पनस्यते' बलेन महत्कर्म कर्तुमिच्छतीति तात्पर्यमुपपन्नम् भवति ॥

अर्णवः–अर्णसो लोपश्चेति मत्वर्थीयो वप्रत्ययः सलोपश्च । समुद्रियः–भवार्थे घप्रत्ययः । गृभ्णाति–हृग्रहोर्भ इति भत्वम् । वृषायते–कर्तुः क्यङ् सलोपश्च, अकृत्सार्वधातुकयोरिति दीर्घः । युध्मः–युध संप्रहारे, अस्मात् मक् । पनस्यते–व्यत्ययेनात्मनेपदम् ॥

तृतीयामृचमाह—

त्वं तमिन्द्र पर्वतं न भोजसे महो नृम्णस्य धर्मणामिरज्यसि ।
प्र वीर्येण देवताति चेकिते विश्वस्मा उग्रः कर्मणे पुरोहितः ॥३॥
त्वम् तम् इन्द्र पर्वतम् न भोजसे महः नृम्णस्य धर्मणाम् इरज्यसि
प्र वीर्येण देवता अति चेकिते विश्वस्मै उग्रः कर्मणे पुरःऽहितः ॥

हे इन्द्र, त्वम् भोजसे भोजनाय, त्वदीयभोगाय तम् पूर्वोक्तं पर्वतम् न पर्ववन्तं अपामावरकं मेघशब्दप्रतीतं नाक्षार्षीः, यजमानलोकस्योपभोगाय हि अपां वृष्टिः, अपामाश्रयः पर्वतश्च भवति। तथा महः महतः नृम्णस्य बलस्य धर्मणां धारयितृणां देवानां यजमानानां वा इरज्यसि ईशिषे। स इन्द्रः देवता देवः वीर्येण अति अतिशयितः प्रचेकिते प्रकर्षेण ज्ञातो भवत्यस्माभिः। स च उग्रः उद्गूर्णः इन्द्रः विश्वस्मै कर्मणे सर्वविधाय यजमानलोकस्य विपन्निवृत्तिसंपत्प्राप्तिसाधनभूताय वृत्रवधादिरूपाय कर्मणे पुरोहितः देवेभिः स्वेषां पुरस्तात् प्रामुख्येन स्थापितः॥ धर्मणाम्—धृञ् धारणे, कर्तरि मनिन्। इरज्यसि—ऐश्वर्यकर्मा। देवता—देव एव देवता, स्वार्थे तल्॥

चतुर्थीमृचमाह—

स इद्वने नमस्युभिर्वचस्यते चारु जनेषु प्रब्रुवाण इन्द्रियम् ।
वृषा छन्दुर्भवति हर्यतो वृषा क्षेमेण धेनां मघवा यदिन्वति ॥४॥
सः इत् वने नमस्युऽभिः वचस्यते चारु जनेषु प्रऽब्रुवाणः इन्द्रियं
वृषा छन्दुः भवति हर्यतः वृषा क्षेमेण धेनाम् मघऽवा यत् इन्वति ॥

स इत् स एवेन्द्रः वने वननीये संभजनीये, सुखे आनन्दमये स्थाने इति यावत्, रहस्यार्थसरणौ वनशब्दो भूरुहे अरण्ये वा क्वचिद्वर्तमानोऽपि भोग्यं भजनीयं सुखं आनन्दं प्रतिपादयति, अयमर्थ उपनिषत्सु च 'तद्वन'मित्यादौ लक्ष्यते। नमस्युभिः पूजयितृभिः स्तोतृभिः वचस्यते वचस्यति वच इच्छति, वननीये एकान्ते सुख इन्द्र ऋषिभिः सह संभाषते, नैष्ठिकानामन्तर्यागपराणां पूर्वेषां देवताभिः सह रहसि व्यवहारः प्रसिद्धः। अपि च स स्पष्टीक्रियते। स इन्द्रः जनेषु आत्मीयेषु यजमानेषु इन्द्रियम् स्वीयं लिङ्गादिकं रहस्यं तत्त्वं प्रब्रुवाणः प्रकाशयन् चारु

रमणीयं यथा तथा वर्तते । चार्विति प्रत्युविक्रियाविशेषणं वा । किं च, स वृषा कामानां वर्षकः हर्यतः देवान् कामयमानस्य, हर्यतिः कान्त्यर्थः, यजमानस्येत्यर्थः छन्दुः उपच्छन्दयिता प्रीणयिता भवति, यत् यदा मघवा धनवान् वृषा वर्षक इन्द्रः क्षेमेण कल्याणेन मनसा युक्तां धेनाम् वाचं इन्वति प्रेरयति, यदा इन्द्र एव यजमाने वाचं स्तोत्रलक्षणां प्रेरयति, तदा स छन्दुर्हर्यत इति संबन्धः । सायणस्त्वेवम्–यत् यदा क्षेमेण रक्षणेनेन्द्रकृतेन युक्तां धेनां वाचं वृषा हविषां वर्षकः मघवा आढ्यो यजमानः इन्वति प्रेरयतीति व्याचष्टे ॥ नमस्युभिः–नमो वरिव इति पूजार्थे क्यच् । वचस्यते–वच इच्छति, व्यत्ययेनात्मनेपदम् । इन्द्रियम्–इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमित्यादिषु, इन्द्रशब्दात् घच्प्रत्ययः ॥

पञ्चमीमृचमाह—

स इन्महानि समिथानि मज्मना कृणोति युध्म ओजसा जनेभ्यः ।
अधा चन श्रद्दधति त्विषीमत इन्द्राय वज्रं निघनिघ्नते वधम् ॥५॥
सः इत् महानि समिथानि मज्मना कृणोति युध्मः ओजसा जनेभ्यः
अध चन श्रत् दधति त्विषिमते इन्द्राय वज्रम् निघनिघ्नते वधम् ॥

स इत् स एवेन्द्रः युध्मः योद्धा जनेभ्यः स्तोतृलोकार्थं महानि समिथानि महतः संग्रामान् मज्मना शोधकेन बलेन ओजसा उग्रेण बलेन कृणोति करोति । यत् यदा स इन्द्रः वधम् हनन-साधनं वज्रं प्रयुज्य निघनिघ्नते निहन्ति वृत्रमिति शेषः, अधा चन अनन्तरमेव त्विषीमते दीप्तिमते इन्द्राय जनाः श्रत् सत्यं दधति इन्द्रोऽस्ति भगवान् बलिष्ठ इति सत्यं प्रतिपद्यन्ते । देवतास्तित्वबुद्ध्या विनाऽपि कामपि योगनिष्ठामास्थातुं शक्नोत्येव योगी जनः, यदि तत्र साधने तेजोबलाद्यमृतांशवर्षं प्रत्यक्षमनुभवेत्, तदा नायमनुभवः मया निष्पादितः, मत्तोऽन्यस्मादायातीति दृढं जानीयात् प्रथमं, ततो देवतां च साक्षात्करोति । यदि देवता 'अस्ती'ति सत्यधारणा बुद्धिरादित एव प्रवर्तेत, सुलभो भवति मार्गः । श्रद्धाशब्दो वैदिकः, नायं विश्वासपर्यायः । अहमस्मीति सत्यमात्मानं यथा लोको जानाति, तथा तस्य देवताऽस्तीति दृढः स्यात् प्रत्ययः, सा च सहजा भवति केषांचित् । इतरेषां तु फलदर्शनाज्जायते । इदमेवोक्तमत्रेत्यलम् । 'श्रदस्मै धत्त स जनास इन्द्रः' (२.१२) इत्याद्यवधेयम् ॥ महानि–महान्ति, तकारलोपश्छान्दसः । समिथानि–इण् गतौ, संयन्ति अस्मिन् वीरा इति समिथं संग्रामः, समिण इति थक्प्रत्ययः ।

अधा–अथ, छान्दसं धत्वं, दीर्घः संहितायाम्। त्विषीमते–त्विषिमते, सांहितिको दीर्घः, त्विष दीप्तौ, इन्प्रत्यत्यः, ततो मतुप्। निघनिघ्नते–हन्तेर्व्यत्ययेनात्मनेपदम् बहुवचनं च, शपः स्लुः छान्दसः॥

इति प्रथमस्य चतुर्थ एकोनविंशो वर्गः

षष्ठीमृचमाह—

स हि श्रवस्युः सदनानि कृत्रिमा क्ष्मया वृधान ओजसा विनाशयन्।
ज्योतींषि कृण्वन्नवृकाणि यज्यवेऽव सुक्रतुः सर्तवा अपः सृजत्॥६॥
सः हि श्रवस्युः सदनानि कृत्रिमा क्ष्मया वृधानः ओजसा विऽनाशयन्
ज्योतींषि कृण्वन् अवृकाणि यज्यवे अव सुऽक्रतुः सर्तवै अपः सृजत्॥

श्रवस्युः श्रवणमिच्छन् कृत्रिमा क्रियानिर्वृत्तानि सदनानि वासगृहाणि, मायाविभिरसुरैर्मायया निर्मितानि पुराणि, ओजसा स्वकीयेन बलेन विनाशयन् प्रध्वंसयन्, क्ष्मया भूम्या समानं वृधानः वर्धमानः यावती पृथुला पृथ्वी तावान् स्वयमपि पृथुलो वृद्धिं प्राप्नुवन्, इन्द्रे एवंवर्धनपरे सति असुरपुराणि तद्बलेन विनाशितानि भवन्ति खलु। अपि च किं कुर्वन्? ज्योतींषि दिव्यानि चित्प्रकाशलक्षणानि अवृकाणि वृकपदवेदनीय-च्छेदनशील-असुरविरहितानि, निर्बाधकानि कृण्वन् कुर्वन्, एवंविधः सुक्रतुः शोभनकर्मा सः इन्द्रः यज्यवे यजमानाय तदनुग्रहार्थं सर्तवै सरणाय अपः जीवनधारणप्रकाशनादिसमर्थाः ज्योतिर्वाहिनीः शक्तीः अव सृजत् हि अवसृष्टवान् वर्षितवान् खलु॥ कृत्रिमा–डुकृञ् करणे, ड्वितः क्त्रिरिति भावे क्त्रिप्रत्ययः, ततो मप्, शेलोपश्छन्दसि। वृधानः–ताच्छीलिकश्चानश्, शपो लोपः॥

सप्तमीमृचमाह—

दानाय मनः सोमपावन्नस्तु तेऽर्वाञ्चा हरी वन्दनश्रुदा कृधि।
यमिष्टासः सारथयो य इन्द्र ते न त्वा केता आ दभ्नुवन्ति भूर्णयः॥७॥
दानाय मनः सोमऽपावन् अस्तु ते अर्वाञ्चा हरी इति वन्दनऽश्रुत् आ
कृधि यमिष्टासः सारथयः ये इन्द्र ते न त्वा केताः आ दभ्नुवन्ति
भूर्णयः॥

हे सोमपावन् सोमस्य पातः, ते मनः त्वदीयं मनः दानाय अस्मदभीष्टफलदानाय अस्तु भवतु। हे वन्दनश्रुत् वन्दनानां स्तोत्राणां श्रोतः, हरी त्वदीयावश्वौ अर्वाञ्चा अर्वाञ्चौ अस्मदभिमुखौ आ कृधि समीपे कुरु, सन्निहितौ कुरु। हे इन्द्र, ये तव स्वभूताः सारथयः सन्ति ते यमिष्ठासः अतिशयेन यन्तारः नियमनकुशलाः। अपि च भूर्णयः त्वदीयसाधनानां भर्तारः केताः प्रज्ञापकरश्मयः, प्राज्ञचक्षुषोऽश्वः त्वा त्वां न आ दभ्नुवन्ति न वञ्चयन्ति, अपथं न प्रापयन्ति॥ सोमपावन्-पिबतेः, आतो मनिन्निति वनिप्। यमिष्ठासः-यन्तृशब्दात् तुरुछन्दसीति इष्ठन्-प्रत्ययः। केताः-कित ज्ञाने, केतन्ति जानन्तीति केताः, पचाद्यच्। दभ्नुवन्ति-दभु दम्भे, स्वादित्वात् श्नुः। भूर्णयः-भृञ् भरणे, अस्मात् निप्रत्ययान्तो निपातितः, ऋत उत्वं दीर्घश्च॥

अष्टमीमृचमाह—

अप्रक्षितं वसु बिभर्षि हस्तयोरषाळ्हं सहस्तन्वि श्रुतो दधे।
आवृतासोऽवतासो न कर्तृभिस्तनूषु ते क्रतव इन्द्र भूरयः॥८॥
अप्रऽक्षितम् वसु बिभर्षि हस्तयोः अषाळ्हम् सहः तन्वि श्रुतः दधे
आऽवृतासः अवतासः न कर्तृऽभिः तनूषु ते क्रतवः इन्द्र भूरयः॥

हे इन्द्र, त्वं अप्रक्षितम् प्रक्षयरहितं अनश्वरं वसु धनं हस्तयोः त्वद्बाहौ बिभर्षि धारयसि। अत्र धनमिदमलौकिकं स्पष्टमुक्तमवधेयम्। श्रुतः प्रख्यातो भवान् अषाळ्हम् शत्रुभिः अनभिभूतं सहः बलं तन्वि शरीरे दधे धारयति। ते तव तनूषु शरीरावयवेषु कर्तृभिः यजनकर्तृभिः यजमानैः, अथवा त्वद्विभूतिभूतैः वृत्रवधादित्वत्कृत्यनिर्वाहिभिः निष्पाद्यमाना निष्पादिताश्च क्रतवः प्राज्ञकर्मबलानि भूरयः बहूनि अवतिष्ठन्ते। तत्र दृष्टान्तः-आवृतासः अवतासो न यथा कूपाः जलोद्धरणाय जनैः आवृताः, तद्वत् तवावयवानावृत्य प्रभूतकर्मक्षमाणि प्राज्ञानि बलान्यवस्थितानीति भावः॥ अप्रक्षितम्-क्षि क्षये, भावे निष्ठा। अषाळ्हम्-षह अभिभवे इत्यस्माद्भिष्ठायां तकारादौ प्रत्यये, विकल्पितत्वात् इट्प्रतिषेधः, सहेरोत्वे प्राप्ते साढ्यै साढ्वा साढेति निगमे निपातितः। तन्वि-जसादिषु छन्दसीति लोपे, अचि घेरित्यौत्वोत्वयोरभावे यणादेशः॥

इति प्रथमस्य चतुर्थे विंशो वर्गः

दशमेऽनुवाके 'एष प्र पूर्वी'रिति षड्ऋचं षष्ठं सूक्तम्, ऐन्द्रं जागतं सव्यस्यार्षम् ॥

तत्र प्रथमामृचमाह—

एष प्र पूर्वीरव तस्य चम्रिषोऽत्यो न योषामुदयंस्त भुर्वणिः ।
दक्षं महे पाययते हिरण्ययं रथमावृत्या हरियोगमृभ्वसम् ॥१॥
एषः प्र पूर्वीः अव तस्य चम्रिषः अत्यः न योषाम् उत् अयंस्त भुर्वणिः
दक्षम् महे पाययते हिरण्ययम् रथम् आऽवृत्य हरिऽयोगम् ऋभ्वसम् ॥

भुर्वणिः अत्ता भोक्तेत्यर्थः एषः इन्द्रः तस्य स्वीयस्य यजमानस्य पूर्वीः भूरीः चम्रिषः चमूषु चमसेषु अवस्थिताः इषः एषणाः प्र अव उदयंस्त प्रकर्षेण स्वयं अवनम्य उद्धरति, इन्द्रः स्वस्थानादवतीर्य यजमानस्वभूतान्नमयादिशरीरेषु चमसपदवेदनीयेषु अवस्थिताः 'इषः' प्रेरणाशक्तीः ऊर्ध्वं नयतीति भावः। आर्भवसूक्ते (१.२०) चमसो विचारितः। तत्र दृष्टान्तः—अत्यो न योषाम् अश्वः यथा वडवामुपगच्छति रतये तद्वत्। स चेन्द्रः हिरण्ययम् सुवर्णमयं हरियोगम् हरिभ्यामश्वाभ्यां योगो योजनं यस्मिन् रथे तम् ऋभ्वसम् महान्तम्, उरु भासमानमिति सायणः, स एव ऋभ्वा महन्नामेत्युदाहरन् ऋभ्वसं प्रवृद्धं महान्तमिति व्याचष्टे (९.८६.५, ५.५२.८)। एवंभूतं रथम् आवृत्य आवर्त्य यजमानस्याभिमुख्येन आवृत्तं कृत्वा महे महते कर्मणे असुरवधादये, दक्षम् विवेचनकुशलमात्मानं आ पाययते पानं कारयति ॥ पूर्वीः—पॄ पालनपूरणयोः, पॄभिदिव्यधीत्यादिना कुप्रत्ययः, पुरुशब्दात् गुणवचनात् ङीष्। चम्रिषः—चमूषु वर्तमाना इषः, तर्हि चम्विषः, वकारस्य रेफादेशश्छान्दसः। चमसेषु सोमा एवावतिष्ठन्ते, अत एव सोमलक्षणा इषः अन्नानीति बाह्योऽर्थ उपपद्यते। कथं तर्हि अन्तर्यागे तात्पर्योपपत्तिरिति चेत्, तत्रापि इषां सोमलक्षणत्वं, प्रेरणाशक्तीनां रसभरितत्वं बोध्यम्, अथवा सोमानां सम्मदरसानां एषणाभरितत्वमिति साधीयानर्थः, एवं 'पाययते' इति क्रियापदार्थसङ्गतिः ॥ भुर्वणिः—भर्व हिंसायामिति धातुपाठे वर्तमानेऽपि भर्वतिरत्तिकर्मेति यास्कमनुसृत्य सायणीयव्याख्यानं भवति, तदिह युक्तम् ॥

द्वितीयामृचमाह—

तं गूर्तयो नेमन्निषः परीणसः समुद्रं न सञ्चरणे सनिष्यवः ।
पतिं दक्षस्य विदथस्य नू सहो गिरिं न वेना अधि रोह तेजसा ॥२॥

तम् गूर्तयः नेमन्निषः परीणसः समुद्रम् न सम्ऽचरणे सनिष्यवः
पतिम् दक्षस्य विदथस्य नु सहः गिरिम् न वेनाः अधि रोह तेजसा ॥

गूर्तयः स्तोतारः नेमन्निषः नमन्त इष्यन्तः, नमस्कारपूर्वकं प्रेरणाबलेन गच्छन्तः, परीणसः परितो व्याप्नुवन्तः, एवंभूता यजमानाः तमिन्द्रम् स्तुतिभिरधिरोहन्तीति शेषः। तत्र दृष्टान्तः- सनिष्यवः सनिं धनमात्मन इच्छन्तो वणिजः सञ्चरणे सञ्चारे निमित्तभूते सति समुद्रम् न यथा नावा समुद्रमधिरोहन्ति तद्वत्। हे यजमान, त्वं च दक्षस्य विवेचनक्रियाकुशलस्य विदथस्य ज्ञानगम्यस्य अन्तर्यागस्य पतिम् पालयितारं सहः सहस्वन्तं इन्द्रं तेजसा प्रकाशकेन स्तोत्रप्रभावेण अधिरोह नु क्षिप्रं अधिरोह, इन्द्रपदप्राप्तिः पर्वतारोहेणोपमिता 'यत्सानोः सानुमारुहत्' इत्यत्र (१.१०.२)। अत्र दृष्टान्तः-वेनाः गिरिम् न कान्ताः कामयमाना वा अभीष्टं भोगमिति शेषः, यथा पर्वतमारोहन्ति तद्वत्॥ गूर्तयः-गृ शब्दे, गृणन्ति स्तुवन्तीति गूर्तयः, क्तिच्, छन्दसि उत्वं दीर्घश्च। नेमन्निषः-णम प्रह्वत्वे, अस्मात् शतरि व्यत्ययेन एत्वम्, इष गतौ, अस्मात् क्विप्, इष्यन्तीति इषः, अन्यदुक्तं व्याख्यायाम्। परीणसः-नसतिर्गत्यर्थः, उपसर्गादसमासेऽपि णत्वं, निपातस्य चेति पूर्वपदस्य दीर्घत्वम्। सहः-सहस्वन्तं, मतुपो लोपश्छान्दसः॥

तृतीयामृचमाह—

स तुर्वणिर्महाँ अरेणु पौंस्ये गिरेर्भृष्टिर्न भ्राजते तुजा शवः।
येन शुष्णं मायिनमायसो मदे दुध्र आभूषु रामयन्नि दामनि ॥३॥
सः तुर्वणिः महान् अरेणु पौंस्ये गिरेः भृष्टिः न भ्राजते तुजा शवः
येन शुष्णम् मायिनम् आयसः मदे दुध्रः आभूषु रमयत् नि दामनि ॥

सः इन्द्रः तुर्वणिः जयशीलः क्षिप्रकारी वा, महान् प्रवृद्धश्च। तस्य शवः बलं पौंस्ये पुंस्त्वे तल्लक्षिते सङ्ग्रामे अरेणु रेणुरहितं अनवद्यं स्वच्छमिति यावत् तुजा चोदनाशक्त्या भ्राजते दीप्यते। तत्र दृष्टान्तः-गिरेः भृष्टिः न पर्वतस्य शृङ्गमिव, सर्वोन्नतं इन्द्रस्य दीप्तं बलं लक्ष्यते। आयसः अयोमयः अभेद्य इति दार्ढ्यद्योतनार्थः शब्दः, आयसकवचयुक्त इति सायणः। दुध्रः दुष्टानां धर्ता अवस्थापयिता, दुष्टान् दमयित्वा यथास्थानं अवस्थापयतीन्द्रः, एवंभूतः मदे सोमपानजन्ये हर्षे सति, येन (पूर्ववाक्योक्तेन 'शवसा') बलेन मायिनम् मायाविनम् शुष्णम् असुरं

एतन्नामकं आभूषु कारागृहेषु दामनि निगडे नि रमयत् नितरां अरमयत् व्यवासयत् बन्धनालये रन्तुमित्यर्थः। येनेति प्रक्रान्तं तत् शवः इति संबध्यते ॥ तुर्वणिः–तुर्वतेः औणादिको निप्रत्ययः। तुजा–तुजतेः इगुपधलक्षणः कप्रत्ययः, विभक्तेराकारः। दुध्रः–दुर्ध्रः, धृञ् अवस्थाने, अस्मात् अन्तर्भावितण्यर्थात् कप्रत्ययः, रेफलोपश्छान्दसः। रमयत्–अरमयत्, अडभावः छान्दसः, दीर्घः संहितायाम् ॥

चतुर्थीमृचमाह—

देवी यदि तविषी त्वावृधोतय इन्द्रं सिषक्त्युषसं न सूर्यः।
यो धृष्णुना शवसा बाधते तम इयर्ति रेणुं बृहदर्हरिष्वणिः ॥४॥
देवी यदि तविषी त्वाऽवृधा ऊतये इन्द्रम् सिसक्ति उषसम् न सूर्यः
यः धृष्णुना शवसा बाधते तमः इयर्ति रेणुम् बृहत् अर्हरिऽस्वनिः ॥

यदि यदा त्वावृधा त्वया स्तोत्रा वर्धमाना, स्तोत्रेण वर्धिता देवी तविषी दिव्या बलात्मिका शक्तिः ऊतये तव वृद्धये तं इन्द्रम् देवं सिषक्ति समवैति, तत्र दृष्टान्तः–सूर्यः उषसम् न सूर्यः यथा उषसं सेवते, तथा सेवमानस्तत्संबन्धी तदात्मकश्च भवति, तथा इन्द्रेण समवेता स्तोत्रवर्धिता दिव्या शक्तिरपि इन्द्रात्मकतां भजते। यः यश्चेन्द्रः तदा धृष्णुना धर्षकेण शवसा दीप्तेन बलेन तमः शोकमोहादिरूपं अचिन्मयमन्धकारं बाधते ध्वंसयति। किं च स इन्द्रः अर्हरिष्वणिः गच्छन्तो हरन्ति अपहरन्तीति अर्हयः शत्रवः तान् स्वनयति हिंसनेन आक्रन्दयतीति अर्हरिष्वणिः, शत्रून् रेणुम् रेषणं हिंसनं बृहत् प्रभूतं इयर्ति प्रापयति ॥ त्वावृधा–त्वया वर्धत इति त्वावृत्, क्विप् चेति क्विप्, आकारश्छान्दसः, अथवा तृतीयाविभक्तिव्यत्ययः। सिषक्त्यादयो गताः। रेणुम्–री गतिरेषणयोः, औणादिको नुप्रत्ययः। अर्हरिष्वणिः–हृधातोः छान्दसोऽभ्यासः, ततो विच्, 'अर्तेः अरः, अरो गच्छन्तश्चेमे हरयश्च अर्हयः तेषां स्वनयिता, स्वन शब्दे, अस्मादौणादिक इन्प्रत्ययः' इति सायणः ॥

पञ्चमीमृचमाह—

वि यत्तिरो धरुणमच्युतं रजोऽतिष्ठिपो दिव आतासु बर्हणा।
स्वर्मीळ्हे यन्मद इन्द्र हर्ष्याहन्वृत्रं निरपामौब्जो अर्णवम् ॥५॥

वि यत् तिरः धरुणम् अच्युतम् रजः अतिष्ठिपः दिवः आतासु बर्हणा स्वःऽमीळ्हे यत् मदे इन्द्र हर्ष्या अहन् वृत्रम् निः अपाम् औब्जः अर्णवम् ॥

हे इन्द्र, बर्हणा बर्हयिता, निषूदनस्त्वं यत् यदा तिरः तिरोहितं घनेन तमसाच्छादितम्, धरुणम् धारकं विश्वस्य, अच्युतम् च्युतिरहितम्, अनश्वरं रजः अन्तरिक्षं तेजोबलादिवर्षसामग्रीभूतानां दिव्यानामपां आधारभूतं लोकं दिवः द्युलोकात् आतासु आततासु विस्तृतासु दिक्षु, आता इति दिङ्नाम, व्यतिष्ठिपः व्यवस्थापितवानसि, अपि च, हे इन्द्र, यत् यदा स्वर्मीळ्हे स्वः दिव्यं तेजः, मीळ्हं सेचनं, तेजसो वर्षणं यस्मिन् तस्मिन् मदे सोमपानजन्ये हर्षे सति, हर्ष्या हृष्टया शक्त्या वृत्रम् असुरं अहन् अवधीः, तदानीं अपाम् उक्तलक्षणानां अर्णवम् अमितराशिभूतं निधिं न्यौब्जः वर्षणाय अधोमुखमकार्षीः ॥ अतिष्ठिपः-तिष्ठतेर्ण्यन्ताल्लुङ् । बर्हणा-सुपां सुलुगिति सोः आकारः । स्वर्मीळ्हे-मिह सेचने, निष्ठा, हो ढ इति ढत्वम् । अत्र सायणः सुष्ठु गन्तव्यं स्वर् मीढं धनं यस्मिन् तस्मिन् संग्रामे इति व्याचष्टे। इदं मदविशेषणमित्यस्माभिर्व्याख्यातं बोध्यम् । अन्ये गताः ॥

षष्ठीमृचमाह—

त्वं दिवो धरुणं धिष ओजसा पृथिव्या इन्द्र सदनेषु माहिनः ।
त्वं सुतस्य मदे अरिणा अपो वि वृत्रस्य समया पाष्यारुजः ॥६॥
त्वम् दिवः धरुणम् धिषे ओजसा पृथिव्याः इन्द्र सदनेषु माहिनः
त्वम् सुतस्य मदे अरिणाः अपः वि वृत्रस्य समया पाष्या अरुजः ॥

हे इन्द्र, माहिनः पूज्यो महान् त्वम् दिवः द्युलोकात् पृथिव्याः सदनेषु प्रदेशेषु वासगृहेषु यजमानस्य ऋषेः सान्तरङ्गबहिरङ्गेषु अन्नमयादिषु शरीरेषु ओजसा बलेन धरुणम् धारकं सर्वस्य जगत इति शेषः प्राणादिबलवर्षकं आप्यं सत्त्वं धिषे दधिषे स्थापयसि। त्वम् सुतस्य अभिषुतस्य सोमस्य पानेन मदे हर्षे सति, अपः आप्यानि सत्त्वानि अरिणाः निर्गमितवानसि। किञ्च वृत्रस्य द्वितीयार्थे षष्ठी, अथवा वृत्रस्य आवरकं वृत्रं चेति सायणः, समया संपूर्णया हृष्टया पाष्या शिलया व्यरुजः विशेषेणाभाङ्क्षीः ॥ धिषे-दधातेः छान्दसो वर्तमाने लिट् । माहिनः-महेः

इनण्, मह पूजायामित्यस्मात् औणादिकः प्रत्ययः, उपधाया वृद्धिः। अरिणाः—री गतिरेषणयोः क्रैयादिकः। समया—सम ष्टम वैक्लव्ये, समतीति समा। पाय्या—पिनष्टेः औणादिक इन्, उपधायाः आकारः ॥

इति प्रथमस्य चतुर्थ एकविंशो वर्गः

दशमेऽनुवाके 'प्र मंहिष्ठाये'ति षडृचं सप्तमं सूक्तम् सव्यस्यार्षम् ऐन्द्रं जागतम् ॥

तत्र प्रथमामृचमाह—

प्र मंहिष्ठाय बृहते बृहद्रये सत्यशुष्माय तवसे मतिं भरे ।
अपामिव प्रवणे यस्य दुर्धरं राधो विश्वायु शवसे अपावृतम् ॥१॥
प्र मंहिष्ठाय बृहते बृहद्रये सत्यऽशुष्माय तवसे मतिम् भरे अपामऽइव
प्रवणे यस्य दुःऽधरम् राधः विश्वऽआयु शवसे अपऽवृतम् ॥

मंहिष्ठाय मंहतिर्दानकर्मा, दातृतमायेति सायणः, महि वृद्धौ इत्यस्मादस्माभिर्निष्पाद्यते, प्रभूततमाय बृहते महते प्रभावतः, बृहद्रये महाधनाय सत्यशुष्माय अवितथबलाय, न त्वासुरं बलमिव मायिकं इन्द्रस्य बलं, तवसे प्रवृद्धाय इन्द्राय मतिम् स्तुतिलक्षणां मनीषां प्र भरे प्रकर्षेण बिभर्मि। यस्य इन्द्रस्य राधः तत् चित्रं धनं, दुर्धरम् अन्यैर्धर्तुमशक्यं विश्वायु सर्वत्र व्याप्तं शवसे यजमानानां बलाय अपावृतम् अपगतावरणं क्रियत इन्द्रेणेति शेषः। तत्र दृष्टान्तः—प्रवणे अपामिव यथा निम्नप्रदेशे जलानां वेगः न केनाप्यवस्थापयितुं शक्यते, तथा ऊर्ध्वं इन्द्रस्य विचित्रं धनं यदा निर्मुक्तं तेन विसृष्टं सत् वर्षति तदा तन्न केनापि निम्ने अत्रस्थेन वारयितुमवस्थापयितुं शक्यते, तादृशी ज्योतिर्बलादिवृष्टिधारा भवति यजमानस्य उज्ज्वलबलानुग्रहाय ॥ विश्वायु—विश्वस्मिन् सर्वस्मिन् आयु गमनं यस्य तत्, आयु—एतेः छन्दसि उण्। अन्ये गताः ॥

द्वितीयामृचमाह—

अध ते विश्वमनु हासदिष्टय आपो निम्नेव सवना हविष्मतः ।
यत्पर्वते न समशीत हर्यत इन्द्रस्य वज्रः श्नथिता हिरण्ययः ॥२॥
अध ते विश्वम् अनु ह असत् इष्टये आपः निम्नाऽइव सवना हविष्मतः
यत् पर्वते न समऽअशीत हर्यतः इन्द्रस्य वज्रः श्नथिता हिरण्ययः ॥

अध ह अनन्तरमेव हे इन्द्र, विश्वम् सर्वं जगत् ते तव इष्टये यजनाय, त्वां यष्टुं पूजयितुमित्यर्थः अन्वसत् अनुरुध्य अभवत्, त्वदनुरोधेन त्वां यष्टुं प्रभवतीत्यर्थः। तथा हविष्मतः यजमानस्य सतः यजनानि आपः निम्नेव यथा जलानि निम्नानि भूस्थलानि गच्छन्ति तथा अनायासेन स्वभावसिद्धया गत्या त्वां संभजन्ते। यत् यदा हर्यतः शत्रुवधं कामयमानस्य, हर्यतिः कान्त्यर्थः, इन्द्रस्य हिरण्ययः सुवर्णमयः शर्थितः हिंसितः वज्रः पर्वते भेद्ये तमोघनभूते शिलोच्चये न समशीत न सुप्तोऽभवत्, जागरित एव पर्वतं भिनत्तीत्यर्थः, एवं वज्रेण पर्वतभेदानन्तरमेव विश्वमित्यादिना संबन्धः॥ अध-अथ, धत्वं छान्दसम्। असत्-अस्तेर्लङ् वर्तमाने, छन्दसि शपो लुगभावः। इष्टये-यजतेः। समशीत-शीङ् स्वप्ने, लङ्, गुणाभावः॥

तृतीयामृचमाह—

अस्मै भीमाय नमसा समध्वर उषो न शुभ्र आ भरा पनीयसे।
यस्य धाम श्रवसे नामेन्द्रियं ज्योतिरकारि हरितो नायसे॥३॥

अस्मै भीमाय नमसा सम् अध्वरे उषः न शुभ्रे आ भर पनीयसे यस्य धाम श्रवसे नाम इन्द्रियम् ज्योतिः अकारि हरितः न अयसे॥

उषसि प्रादुर्भूतायां यद्यजमानस्य कर्तव्यं भवति तदुषस्यारोप्यामन्त्रणपूर्वमुच्यते, हे उषः उषोदेवि, शुभ्रे शोभने, त्वं अस्मै भीमाय भयङ्कराय पनीयसे अतिशयेन स्तुत्याय इन्द्राय अध्वरे दिव्ययज्ञात्मके यज्ञेऽस्मिन् न इदानीं, 'न संप्रत्यर्थे प्रयोगः' नमसा नमस्कारेण सर्वथा प्रह्वत्वेन प्रपत्त्येति यावत् समाभर दातव्यं सर्वं सम्यक् सम्पादय। धाम सर्वस्य धारकं, नाम स्तोतॄणां अनुग्रहाय तेषु नमनशीलं, प्रसिद्धं, इन्द्रियम् इन्द्रत्वस्य परमैश्वर्यस्य लिङ्गं लक्षणभूतं एवंविधं यस्य ज्योतिः यस्येन्द्रस्य ज्योतिः श्रवसे श्रुतये, यजमानस्तोत्रश्रवणाय, यजमानाय दिव्यादेशश्रुतिमनुग्रहीतुं वा अकारि कृतं भवति। तत्र दृष्टान्तः-हरितः न अयसे यथा अश्वाः गमनाय भवन्ति, यथा सादिनः अश्वान् स्वाभिलषितं देशं गमयन्ति तथा स्वाभिमतान् यजमानान् प्रति स्वकीयं ज्योतिर्गमयति "श्रवसे"॥ भर-हस्य भः। पनीयसे-पन स्तुतौ, असात् पनः, कर्मण्यसुन्, तस्मादीयसुन्, अतिशायनिके टेर्लोपः। अकारि-कर्मणि लुङ् वर्तमाने। अयसे-अय गतौ, अस्माद्भावे असुन्॥

चतुर्थीमृचमाह—

इमे त इन्द्र ते वयं पुरुष्टुत ये त्वारभ्य चरामसि प्रभूवसो ।
नहि त्वदन्यो गिर्वणो गिरः सघत्क्षोणीरिव प्रति नो हर्य तद्वचः ॥४॥

इमे ते इन्द्र ते वयम् पुरुऽस्तुत ये त्वा आऽरभ्य चरामसि प्रभुऽवसो इति प्रभुऽवसो नहि त्वत् अन्यः गिर्वणः गिरः सघत् क्षोणीःऽइव प्रति नः हर्य तत् वचः ॥

हे इन्द्र, प्रभुवसो ऐन्द्रं धनं 'चित्रं...प्रभु विभु' च वर्तत इति प्राग्वर्णितमर्थमेयम् (१.९.५) प्रभु प्रकर्षेण भवतीति प्रभु प्रकृष्टवर्ति वसु धनं यस्यासौ तथाभूत पुरुस्तुत पुरुभिः बहुभिः स्तुत, ये वयम् त्वा त्वां आरभ्य आश्रयत्वेन अवलम्ब्य चरामसि चरामः अन्तर्यजनमाचरामः ते त इमे वयं त तव स्वभूताः । हे गिर्वणः गीर्भिर्वननीयेन्द्र त्वत् अन्यः त्वत्तोऽन्यः कोऽपि गिरः स्तुताः नहि सघत् न हि प्राप्तुमर्हति । अतः नः अस्माकं तत् स्तुतिलक्षणं वचः प्रतिहर्य कामयस्व, क्षोणीरिव क्षोणी इव यथा क्षोणी पृथिवी स्वामाश्रितानि स्वभूतानि भूतजातानि कामयते, तथा नः स्तुतिं त्वामाश्रित्य प्रवृत्तां तव स्वभूतां कामयस्व स्वीकुरु ॥ चरामसि–इदन्तो मसिः । सघत्–धातुपाठे षघ हिंसायामिति पठ्यते, सघ्नोतिः प्राप्त्यर्थ इति सायणः, सहतेरुपज्ञिकोऽयं धातुः, 'सघत्' इति सकृदेव प्रयोगः । क्षोणीरिव–क्षोणीव, सुलोपाभावश्छान्दसः ॥

पञ्चमीमृचमाह—

भूरि त इन्द्र वीर्यं त्वं स्मस्यस्य स्तोतुर्मघवन्कामुमा पृण ।
अनु ते द्यौर्बृहती वीर्यं मम इयं च ते पृथिवी नेम ओजसे ॥५॥

भूरि ते इन्द्र वीर्यम् त्वं स्मसि अस्य स्तोतुः मघऽवन् कामम् आ पृण अनु ते द्यौः बृहती वीर्यम् ममे इयम् च ते पृथिवी नेमे ओजसे ॥

हे इन्द्र, ते तव वीर्यम् वीरत्वं भूरि बहु, अनवच्छेद्यस्तव पराक्रम इत्यर्थः । तव स्मसि तादृशस्य तव स्वभूता वयं स्मः । हे मघवन्, इन्द्र, अस्य स्तोतुः त्वां स्तुवतोऽस्य यजमानस्य कामम् अभिलाषं आ पृण आपूरय, बृहती द्यौः महान् द्युलोकोऽपि ते वीर्यम् त्वदीयं वीर्यं अनु

ममे 'अन्वमंस्त' इति सायणः, अनुसृत्य मानं करोति, स्वीयमवच्छेदं करोति, इन्द्रस्य माहात्म्यं द्युलोकस्य प्रतिमानं भवति। तस्मादिन्द्रवीर्यानुसारेणैव बृहतो द्युलोकस्य अवच्छेदो भवति। इयम् पृथिवी च इयमपि भूमिः ते तव ओजसे बलाय नेमे प्रह्वीभवति ॥ ममे–माङ् माने। नेमे–णम प्रह्वत्वे, लिटि एत्वं अभ्यासलोपश्च ॥

षष्ठीमृचमाह—

त्वं तमिन्द्र पर्वतं महामुरुं वज्रेण वज्रिन्पर्वशश्चकर्तिथ।
अवास्रृजो निवृताः सर्तवा अपः सत्रा विश्वं दधिषे केवलं सहः ॥६॥
त्वम् तम् इन्द्र पर्वतम् महाम् उरुम् वज्रेण वज्रिन् पर्वशः चकर्तिथ
अव अस्रृजः निऽवृताः सर्तवै अपः सत्रा विश्वम् दधिषे केवलम् सहः ॥

हे वज्रिन् वज्रवन् इन्द्र, त्वम् तम् प्रसिद्धं प्रतिपादितलक्षणं महाम् महान्तं आयामतः, उरुम् विस्तीर्णं पर्वतम् पर्वान्तं मेघशब्दलक्षितं तमोघनं वज्रेण आयुधेन पर्वशः पर्वणि पर्वणि अवयवसंधिषु चकर्तिथ प्रहृत्य खण्डशः कृतवानसि। तथा कृत्वा निवृताः प्रागावृताः अपः सर्तवै सरणाय अवास्रृजः नीचैर्गमनाय अस्राक्षीः। एवं त्वमेव केवलम् विश्वम् सहः अद्वितीयं सर्वं बलं दधिषे धारयसि। सत्रा तत् सत्यम् ॥ महाम्–नकारतकारलोपश्छान्दसः। चकर्तिथ–कृती छेदने, लिट्। सर्तवै–कृत्यार्थे तवैकेनिति भावे तवैप्रत्ययः। दधिषे–लिटि ऋादिनियमादिट् ॥

इति प्रथमस्य चतुर्थे द्वाविंशो वर्गः
प्रथमे मण्डले दशमोऽनुवाकः समाप्तः

एकादशेऽनुवाके सप्त सूक्तानि। तत्र 'नू चि'दिति नवर्चं प्रथमं सूक्तम् आग्नेयम् गौतमस्य नोधस आर्षम्। आद्याः पञ्च जगत्यः शिष्टाश्चतस्रस्त्रिष्टुभः ॥

तत्र प्रथमामृचमाह—

नू चित्सहोजा अमृतो नि तुन्दते होता यद्दूतो अभवद्विवस्वतः।
वि साधिष्ठेभिः पथिभी रजो मम आ देवताता हविषा विवासति ॥१॥
नु चित् सहःऽजाः अमृतः नि तुन्दते होता यत् दूतः अभवत् विवस्वतः
वि साधिष्ठेभिः पथिऽभिः रजः ममे आ देवऽताता हविषा विवासति ॥

सहोजाः सहसा बलेन जातः, सहसः सूनुर्हि प्रथितोऽग्निः, अमृतः मृतिरहितः नु चित् नि तुन्दते क्षिप्रं निर्गच्छति। यत् यदा होता देवानामाह्वाता अयमग्निः विवस्वतः भास्वतः उत्तमस्य ज्योतिषः दूतः अभवत् दूतो भवति। अग्निर्देवानां दूतः यजने तेषां आह्वाता यजमानार्थम्। विवस्वतः परिचरतः यजमानस्य दूत इति सायणः। अथ यदा विवस्वतो ज्योतिषोऽयं दूतः आह्वाता देवानां भूत्वा सहसः सूनुः क्षिप्रं निर्गच्छति, तदानीं स क्षिप्रकारी किं करोति? आह। साधिष्ठेभिः समीचीनैः पथिभिः मार्गैः रजः अन्तरिक्षं लोकं विममे निर्माति, पूर्वं ब्रह्माण्डे वर्तमानमपि पिण्डाण्डे यजमानाय भूमेरूर्ध्वं भुवर्लोकपदवेदनीयं अन्तरिक्षं द्यावापृथिव्योरन्तरे विशालं प्राणायतनं अपां निधानस्थानं उत्पादयति। इदं रहस्यम् देवानामिव लोकानामपि यजमानापेक्षया पुनः सृष्टिरिति बोध्यम्। कर्मठास्तु 'पूर्वं विद्यमानमप्यन्तरिक्षं असत्कल्पमभूत्, इदानीं तस्य (अग्नेः) तेजसा प्रकाशमानं सत् उत्पन्नमिव दृश्यते' इत्याहुः। किञ्च, देवताता देवतातौ देवानां रूपनिष्पादने, निमित्तसप्तमी, हविषा हव्येन यजमानीयार्पणद्रव्येण आविवासति प्रकाशयति देवान्, परिचरतीति वा सायणीयानुसारतः॥ तुन्दते-तुन्दतिर्गत्यर्थः नेह व्यथनार्थः। साधिष्ठेभिः-बाढशब्दात् आतिशायनिके इष्ठनि साधादेशः, भिस एसभावः। देवताता-सर्वदेवात्तातिल् इति स्वार्थिकः प्रत्यय इति वदन् देवतातिर्यज्ञनाम इति व्याचष्टे सायणः, कर्मपरार्थस्य युक्तो भवत्वयमर्थः, अन्यत्र स एव विस्तारार्थात् तनोतेर्धातोः तातिशब्दं अवतारयति 'देवतातये देवानां विस्तारयुक्ताय यागाय तदर्थं' (१.१२७.९) इत्याह। अस्माभिः एवं सायणमेवानुसृत्य तनोतेरिति प्रक्रिया दत्ता, तात्पर्यं तु अन्यथा भवत्येव॥

द्वितीयामृचमाह—

आ स्वमद्म युवमानो अजरस्तृष्वविष्यन्नतसेषु तिष्ठति।
अत्यो न पृष्ठं प्रुषितस्य रोचते दिवो न सानु स्तनयन्नचिक्रदत् ॥२॥

आ स्वम् अद्म युवमानः अजरः तृषु अविष्यन् अतसेषु तिष्ठति अत्यः न पृष्ठम् प्रुषितस्य रोचते दिवः न सानु स्तनयन् अचिक्रदत्॥

अजरः जरारहितः अग्निः स्वम् स्वकीयं अद्म अदनीयं यजमानेन हुतं युवमानः मिश्रयन् ज्वलितेन आत्मनेति शेषः तृषु क्षिप्रं अविष्यन् वर्धिष्यमाणः, अवतिर्वर्धनार्थः, क्वचिद्रक्षणार्थश्च,

अक्तिकर्मेति सायणः, हुतेन ज्वलति ज्वालया वर्धतेऽग्निः। एवं वृद्धिं गमिष्यन् आसेषु शुष्केषु काष्ठेषु आतिष्ठति आरोहति। अन्नमयादिशरीरयुक्ते यजमाने ये परिपाकमन्तोऽशाः ज्वालामयीं प्राप्तुं सिद्धा भवन्ति ते काष्ठशब्दलक्षिताः भवन्ति। तथा अग्नौ परिपक्वांशेषु यजमानं आरोहति सति, प्रुषितस्य तस्य दग्धकाष्ठस्य, प्रुषितासस्य प्रुषितस्येत्युक्तं पीतोदका गावः पीताः भुक्तोदका ब्राह्मणाः भुक्ता इतिवत् पृष्ठम् पश्चाद्भागः अत्यो न सन्ततगमनशीलः अश्व इव रोचते शोभते। तदानीं दिवः सानु द्युलोकस्य समुच्छ्रितं स्थानं स्तनयन् न शब्दयन्निव अचेक्रदत् गम्भीरं शब्दमात्मानमकारयत्। अग्नौ ऊर्ध्वमारोहति सति, अन्तर्यजने चलति, बह्वेधविधं दैवतवृत्तं प्रकाशं भवतीति बोध्यम्। युयमानः—यु मिश्रणे, व्यत्ययेनात्मनेपदम्। अचेक्रदत्—क्रदि क्रदि क्लदि आह्वाने रोदने च, अस्मात् ण्यन्तात् लुङ्॥

तृतीयामृचमाह—

क्राणा रुद्रेभिर्वसुभिः पुरोहितो होता निषत्तो रयिषाळमर्त्यः।
रथो न विक्ष्वृञ्जसान आयुषु व्यानुषग्वार्या देव ऋण्वति ॥३॥

क्राणा रुद्रेभिः वसुऽभिः पुरःऽहितः होता निऽसत्तः रयिषाट् अमर्त्यः
रथः न विक्षु ऋञ्जसानः आयुषु वि आनुषक् वार्या देवः ऋण्वति॥

क्राणा कुर्वाणः स्वकृत्यं हव्यवहनादिकमिति शेषः, रुद्रेभिः वसुभिः रुद्रसंज्ञकैः वसुसंज्ञकैः स्थानव्यापारादिभेदापेक्षया उभयविधैः देवैः पुरोहितः पुरस्तान्निहितः, पुरस्कृतः पूजितो वा होता देवानामाह्वाता निषत्तः निषण्णः अन्तर्यजनस्थाने, रयिषाट् रयीणां धनानां जेता यजमानार्थम् अमर्त्यः मरणरहितः, एवंभूतः देवः अग्निः विक्षु प्रजासु रथो न रथ इव आयुषु यजनाध्वनि गन्तृषु यजमानेषु ऋञ्जसानः प्रसाध्यमानः स्तुतिभिरिति शेषः आनुषक् अनुषक्तं यथा भवति तथा वार्या वार्याणि वरणीयानि यानि यजमानेषु वर्तन्ते देवेभ्यो दानाय तानि व्यृण्वति विशेषेण स्वयं प्राप्नोति, देवान् प्रति प्रापयितुम्॥ क्राणा—करोतेः शानच्, छन्दसि विकरणस्य लुक्, सोः लोपः पूर्वसवर्णदीर्घश्च। निषत्तः—सीदतेः कर्मणि निष्ठा, निष्ठानत्वाभावो निपातितः। रयिषाट्—सह अभिभवे, अस्मात् ण्विः, सस्य षत्वम्। ऋञ्जसानः—ऋञ्जतिः प्रसाधनकर्मा, कर्मणि असानच्प्रत्ययः। अन्ये गताः॥

चतुर्थीमृचमाह—

वि वातजूतो अतसेषु तिष्ठते वृथा जुहूभिः सृण्या तुविष्वणिः ।
तृषु यदग्ने वनिनो वृषायसे कृष्णं त एम रुशदूर्मे अजर ॥४॥
वि वातऽजूतः अतसेषु तिष्ठते वृथा जुहूभिः सृण्या तुविऽस्वनिः तृषु
यत् अग्ने वनिनः वृषऽयसे कृष्णम् ते एमं रुशत्ऽऊर्मे अजर ॥

वातजूतः वायुना प्रेरितः तुविष्वणिः प्रबलस्वनः अग्निः जुहूभिः जिह्वाभिः स्वकीयाभिर्ज्वालाभिः सृण्या सरणशीलेन अङ्कुशेन, तत्स्थानीयेन युक्तः वृथा अनायासवचनः, अनायासेन अतसेषु काष्ठेषु मध्ये वितिष्ठते व्याप्य तिष्ठति । हे अग्ने, यत् यदा वनिनः वनसंबद्धात् भूरुहात् प्रति तृषु अतिलिप्सया तृषु क्षिप्रनाम वृषायसे वृष इवाचरसि, वृक्षेषु मध्ये गच्छन् वृषभ इव भवसि तदा हे रुशदूर्मे दीप्तज्वाल अजर जरारहित, ते तव एम गमनमार्गः कृष्णम् कृष्णवर्णो भवति । निबिडे वनमध्ये गच्छतो वृषभस्य मार्गः कृष्ण एव भवति, अन्धकारमयत्वात् । वाग्वार्थे वनदहनदक्षोऽयमग्निर्भौतिक एव वर्ण्यते, नायं याज्ञिकोऽग्निः । वस्तुतस्तु योऽग्निरन्तर्यजने प्रादुर्भूय स्वीयं दिव्यं कर्म निर्वहति तस्यैवाभिवर्णनमत्र बोध्यम् ॥ सारं ब्रूमः । वायुलक्षितेन प्राणबलेन प्रेरितः 'वातजूतः' प्रागुक्तलक्षणेषु काष्ठेषु ज्वलितः तमोपहेन तेजसा स्वबलाविष्कारलक्षणवाग्युक्तः 'तुविष्वणिः' व्याप्य स्थितः । तादृशोऽग्निः वननीयस्य सुखस्य भजकान् यजमानान् प्रति यदा स्वकीयं पौरुषं बलं प्रकटयति 'वृषयसे', तदा विशेषतः स्वयं दीप्तज्वालो भवति तेषामर्थे, तस्य मार्गस्तु तमोमयत्वात् कृष्णवर्णः, नूतनस्य मार्गस्य सृष्टव्यत्वात् स कृष्णो भवतीति ग्राह्यम् ॥ वातजूतादयो गताः । सृण्या—सृ गतौ, अस्मात् निपात्ययः । एम-एत्यनेनेति एम मार्गः, इण्धातोः करणे मनिन् ॥

पञ्चमीमृचमाह—

तपुर्जम्भो वन आ वातचोदितो यूथे न साह्वाँ अव वाति वंसगः ।
अभिव्रजन्नाक्षितं पाजसा रजः स्थातुश्चरथं भयते पतत्रिणः ॥५॥
तपुःऽजम्भः वने आ वातऽचोदितः यूथे न सह्वान् अव वाति वंसगः
अभिऽव्रजन् अक्षितम् पाजसा रजः स्थातुः चरथम् भयते पतत्रिणः ॥

तपुर्जम्भः तपूंषि ज्वालाः जम्भा मुखानि यस्यासौ वातचोदितः वायुना प्रेरितः अग्निः, वंसगः यूथे न गवां समूहे वननीयगतिः वृषभ इव वने वननीये सुखे साह्वान् प्रतिबन्धकान् सर्वान् अभिभवन् आ अव वाति आभिमुख्येन व्याप्नोति। पुनः किं कुर्वन्? अक्षितम् अक्षीणं रजः अन्तरिक्षं लोकं पाजसा बलेन अभिव्रजन् आभिमुख्येन गच्छन्। यस्मादेवं स्वबलं प्रदर्शयति तस्मात् पतत्रिणः पतनवतः, पक्षिवद्वेगेनोत्पततोऽग्नेः सकाशात् स्थातुः स्थावरं चरथम् जङ्गमं च भयते बिभेति, स्वस्य अल्पबलत्वं अग्नेः प्रबलत्वं च वीक्ष्य कम्पते उभयविधापि सृष्टिः। साह्वान्–दाश्वान्साह्वानिति क्वसुप्रत्ययान्तो निपातितः। स्थातुः–तिष्ठतेः कमिमनीत्यादिना तुप्रत्ययः। चरथम्–चरतेः अथप्रत्ययः। भयते–जिभी भये, श्लोरभावः, व्यत्ययेनात्मनेपदम्।

इति प्रथमस्य चतुर्थे त्रयोविंशो वर्गः

षष्ठीमृचमाह—

दधुष्ट्वा भृगवो मानुषेष्वा रयिं न चारुं सुहवं जनेभ्यः।
होतारमग्ने अतिथिं वरेण्यं मित्रं न शेवं दिव्याय जन्मने ॥६॥

दधुः त्वा भृगवः मानुषेषु आ रयिम् न चारुम् सुऽहवम् जनेभ्यः होतारम् अग्ने अतिथिम् वरेण्यम् मित्रम् न शेवम् दिव्याय जन्मने ॥

हे अग्ने, त्वा त्वाम् मानुषेषु मनुष्येषु मध्ये भृगवः भृगुसंज्ञकाः महर्षयः आ दधुः स्थापयामासुः। अङ्गिरसामिव भृगूणामपि मानुषत्वं देवत्वं च बोध्यम्। अङ्गिरसो देवत्वे अग्निज्वाला विभवाः, भृगवस्तु भरणशीलाः सूर्यरश्मयः। उभयेषां अग्निसंबन्धित्वं निहितं मानुषे यजमाने तथा वर्णितम्। किमर्थं दधुः? दिव्याय जन्मने देवत्वप्राप्तये चारुम् रयिम् न रमणीयं धनमिव सौरसम्पत्तिं प्राप्ता महर्षयः, उत्तमस्य ज्योतिषः सत्यान्वेषिद्रश्मयो वा भृगवः मर्त्येषु अमर्त्यमग्निं देवत्वाधानाय अमूल्यं धनमिव निदधुः। जनेभ्यः सुहवम् यजमानार्थं आह्वातुं सुशकं, होतारम् अतिथिम् अतिथिवत् सत्कार्यम् वरेण्यम् मित्रम् न शेवम् वरणीयं सखायमिव सुखकरम्। सुहवम्–ह्वयतेः, ईषद्दुःसुष्विति खल् ॥

सप्तमीमृचमाह—

होतारं सप्त जुह्वो ३ यजिष्ठं यं वाघतो वृणते अध्वरेषु।
अग्निं विश्वेषामरतिं वसूनां सपर्यामि प्रयसा यामि रत्नम् ॥७॥

होतारम् सप्त जुह्वः यजिष्ठम् यम् वाघतः वृणते अध्वरेषु अग्निम् विश्वेषाम् अरतिम् वसूनाम् सपर्यामि प्रयसा यामि रत्नम् ॥

सप्त सप्तसंख्याका जुह्वः होतारः वाघतः स्तोतारो देवाः यजिष्ठम् यष्टृतमं होतारम् देवानामाह्वातारं यम् अग्निं अध्वरेषु दिव्याध्वयात्रावर्तिषु यज्ञेषु वृणते संभजन्ते । यदि देवोऽग्निरेव यजमानः 'यष्टृतमः' भवति तदा 'वाघतः' ऋत्विजोऽपि देवा एव भवन्ति । सप्त होतारस्तु सप्ततत्त्वाभिमानिनः सप्तलोकाधिष्ठाना देवाः । जुह्वः जिह्वाः ज्वालाः रश्मय इति तत्र तत्र यथासंभवं कर्मपरं व्याख्यानम् । अत्र तु होतार इति सायणः, उपपद्यते च । यं वृणत इत्युक्तं, तं विश्वेषाम् वसूनाम् सर्वेषां धनानां अरतिम् गन्तारं, सर्वविधसत्त्वात्मकानि धनान्युद्दिश्य यातारमित्यथः, अग्निम् प्रयसा प्रीत्या सपर्यामि परिचरामि । रत्नम् रतिं च यामि प्राप्नोमि ॥ अरतिम्–ऋ गतिप्रापणयोः, असादतिप्रत्ययः । सपर्यामि–परिचरतिकर्मा, सपर पूजायामिति कण्ड्वादिर्धातुः ॥

अष्टमीमृचमाह—

अच्छिद्रा सूनो सहसो नो अद्य स्तोतृभ्यो मित्रमहः शर्म यच्छ ।
अग्ने गृणन्तमंहस उरुष्योर्जो नपात्पूर्भिरायसीभिः ॥८॥

अच्छिद्रा सूनो इति सहसः नः अद्य स्तोतृऽभ्यः मित्रऽमहः शर्म यच्छ अग्ने गृणन्तम् अंहसः उरुष्य ऊर्जः नपात् पूःऽभिः आयसीभिः ॥

हे सहसः सूनो बलस्य पुत्र, मित्रमहः मित्रं सखिभूतं अनुकूलं महः तेजः यस्यासौ तादृश अनुकूलदीप्तियुक्त अग्ने नः अस्मभ्यं स्तोतृभ्यः अद्य इदानीं अच्छिद्रा छिद्ररहितानि, अविच्छेद्यानि शर्म शर्माणि सुखानि यच्छ देहि । किञ्च ऊर्जो नपात् ऊर्जितस्य दृढस्य बलस्य पुत्र अग्ने, गृणन्तम् त्वां स्तुवन्तं आयसीभिः अयो लोहः तद्वद्दृढतरैः पूर्भिः पालनैः अंहसः पापात् उरुष्य रक्ष, उरुष्यतिः रक्षाकर्मा ॥ अच्छिद्रा–शेर्लोपः । शर्म–शर्माणि, विभक्तेर्लुक् । पूर्भिः–पॄ पालनपूरणयोः, असात् सम्पदादिलक्षणः क्विप् ॥

नवमीमृचमाह—

भवा वरूथं गृणते विभावो भवा मघवन्मघवद्भ्यः शर्म ।
उरुष्याग्ने अंहसो गृणन्तं प्रातर्मक्षू धियावसुर्जगम्यात् ॥९॥
भव वरूथम् गृणते विभाऽवः भव मघऽवन् मघवत्ऽभ्यः शर्म उरुष्य अग्ने अंहसः गृणन्तम् प्रातः मक्षु धियाऽवसुः जगम्यात् ॥

हे विभावः विशिष्टदीप्तियुक्त अग्ने, त्वं गृणते स्तुवते वरूथम् आवरणं अनिष्टनिवारणं गृहं भव। हे मघवन् धनवन्, मघवद्भ्यः धनवद्भ्यो यजमानेभ्यः शर्म सुखं यथा भवति तथा भव। हे अग्ने गृणन्तम् त्वां स्तुवन्तं अंहसः पापात् उरुष्य रक्ष। प्रातः इदानीं मक्षु शीघ्रं धियावसुः बुद्ध्या वसुमान् धनवान् अग्निः गृणन्तं प्रति जगम्यात् गच्छतु, आगच्छतु ॥ विभावः—विशिष्टा भाः विभा, अतो मनिन्निति विच्, तदस्यास्तीति मतुप्, तस्य वत्वम्, नकारस्य रुत्वम्। धियावसुः—छान्दसः अलुक्समासः। जगम्यात्—गम्लृ गतौ, लिङि बहुलं छन्दसीति शपः श्लुः ॥

इति प्रथमस्य चतुर्थे चतुर्विंशो वर्गः

एकादशेऽनुवाके 'वया' इति सप्तर्चं द्वितीयं सूक्तं नोधस आर्षं त्रैष्टुभम्। वैश्वानरगुणकोऽग्निर्देवता।

तत्र प्रथमामृचमाह—

वया इदग्ने अग्नयस्ते अन्ये त्वे विश्वे अमृता मादयन्ते ।
वैश्वानर नाभिरसि क्षितीनां स्थूणेव जनाँ उपमिद्ययन्थ ॥१॥
वयाः इत् अग्ने अग्नयः ते अन्ये त्वे इति विश्वे अमृताः मादयन्ते वैश्वानर नाभिः असि क्षितीनाम् स्थूणाऽइव जनान् उपऽमित् ययन्थ ॥

हे अग्ने, अन्ये अग्नयः, स्थानभेदेन व्यापारभेदेन च ये बहवोऽग्नय उच्यन्ते ते सर्वेऽपि ते तव वया इत् शाखा एव, न त्वत्तो भिन्नाः। त्वे इत् त्वय्येव विश्वे अमृताः सर्वे देवाः मादयन्ते हृष्यन्ति। हे वैश्वानर विश्वेषां नराणां देवानां मनुष्याणां च रूपेण वर्तमानाग्ने, क्षितीनाम्

मनुष्याणां नाभिः असि मध्यभूतो मुख्यः सन्नद्धो भवसि, अवस्थापकोऽसीत्यर्थः । त्वं उपमित् अवस्थापयिता सन् जनान् ययन्थ अधारयः । तत्र दृष्टान्तः—उपमित् स्थूणेव अवस्थापकः स्तम्भ इव, स्तम्भो यथा गृहोपरिभागं धारयति तद्वत् ॥ नाभिः—नह्यो भश्चेति इञ् भवाश्च । उपमित्—डुमिञ् प्रक्षेपणे, कर्मणि क्विप् तुगागमश्च । ययन्थ—यम उपरमे, लिट् ॥

द्वितीयामृचमाह—

मूर्धा दिवो नाभिरग्निः पृथिव्या अथाभवदरती रोदस्योः ।
तं त्वा देवासोऽजनयन्त देवं वैश्वानर ज्योतिरिदार्याय ॥२॥
मूर्धा दिवः नाभिः अग्निः पृथिव्याः अथ अभवत् अरतिः रोदस्योः
तम् त्वा देवासः अजनयन्त देवम् वैश्वानर ज्योतिः इत् आर्याय ॥

अग्निः, दिवः द्युलोकस्य मूर्धा शिरोभूतः, पृथिव्याः भूमेः नाभिः मध्यभूतः सन्नाहकश्च अभवत् भवति । अथ एवमुभयोर्लोकयोरग्नेः प्राधान्ये सति, अथ रोदस्योः द्यावापृथिव्योः अरतिः गन्ता, द्युलोकात् पृथिवीं पृथिव्याः दिवं च गच्छन् यात्रिको भवति, यजमानस्यारोहणायोर्ध्वं दिव्यं पदं प्रति, इति रहस्यम् । हे वैश्वानर, विश्वेषु नरेषु विद्यमानाग्ने, तम् तथाभूतं त्वा त्वां देवम् देवासः देवाः सर्वे आर्याय अर्तुं योग्याय यजमानाय ज्योतिः इत् ज्योतिःस्वरूपमेव अजनयन्त प्रादुर्भूतमकुर्वत ॥ मूर्धा—मूर्तमस्मिन् धीयत इति मूर्धा, श्वन्नुक्षन्निति कर्मादौ निपातितः ॥

तृतीयामृचमाह—

आ सूर्ये न रश्मयो ध्रुवासो वैश्वानरे दधिरेऽग्ना वसूनि ।
या पर्वतेष्वोषधीष्वप्सु या मानुषेष्वसि तस्य राजा ॥३॥
आ सूर्ये न रश्मयः ध्रुवासः वैश्वानरे दधिरे अग्ना वसूनि या पर्वतेषु
ओषधीषु अप्सु या मानुषेषु असि तस्य राजा ॥

सूर्ये आदित्ये ध्रुवासः नित्याः स्थिराः सूर्यादविभेद्याः रश्मयः न किरणा इव, अग्ना अग्नौ वैश्वानरे वसूनि सर्वाणि सच्चात्मकानि धनानि आदधिरे आहितानि भवन्ति । सूर्ये किरणा इव अग्नौ सारभूतानि सर्वाणि द्रव्याणि वसुशब्दप्रतिपादितानि निहितानि भवन्तीत्युक्तम् । इदमेव

विशेषोदाहरणेन स्पष्टीक्रियते। या यानि वसूनि द्रव्यसारांशभूतानि सन्त्यानि पर्वतेषु ओषधीषु अप्सु विद्यन्ते या यानि च मानुषेषु विद्यन्ते तस्य सर्वस्य वसुजातस्य राजा असि ईश्वरो भवसि त्वमग्ने। स्वाहितरश्मिः सूर्यः स्वामी च भवति रश्मीनाम्, दार्ष्टान्तिकोऽग्निरपि वसूनाम् ॥

चतुर्थीमृचमाह—

बृहती इव सूनवे रोदसी गिरो होता मनुष्यो न दक्षः।
स्वर्वते सत्यशुष्माय पूर्वीर्वैश्वानराय नृतमाय यह्वीः ॥४॥

बृहती इवेति बृहतीऽइव सूनवे रोदसी इति गिरः होता मनुष्यः न दक्षः स्वःऽवते सत्यऽशुष्माय पूर्वीः वैश्वानराय नृऽतमाय यह्वीः ॥

रोदसी द्यावापृथिव्यौ सूनवे स्वपुत्राय बृहती इव प्रभूते विततेइवाभूताम्, बृहतो वैश्वानरस्यास्थानाय द्यौः पृथिवी च विस्तृते जाते। द्यौः शुद्धसत्त्वप्रधाना मनोमयक्षेत्रभूता चितिरिति स्मार्यम्, तथा पृथिवी जागरितस्थाना स्थूला अन्नमयक्षेत्रभूता चितिरिति च बोध्यम्। यजमाने उभे अपि विस्तृते भवतः, यदा तयोरुभयोर्जातोऽग्निः प्रादुर्भवति वैश्वानरात्मा। सः मनुष्यो न मनुष्य इव दक्षः विवेचनधीकुशलः होता आह्वाता सन् गिरः स्तुतीः करोतीति शेषः। यजमानकृत्यं सर्वं स हि निर्वहति। अथ ज्योतिर्बलादिबहुविभवसम्पन्नोऽग्निर्वैश्वानर इत्याह। स्वर्वते स्वरिति ज्योतिः तद्वते सत्यशुष्माय सत्याधारकबलयुक्ताय नृतमाय अतिशयेन नेत्रे वैश्वानराय अग्नये पूर्वीः बह्व्यः यह्वीः युवतयः ज्वालाः शक्तयः सन्तीति शेषः। इमामृचं अन्यथा व्याचष्टे सायणः, अनुपयोगाद्विस्तरभयाच्च नेह तत्परीक्षा भवति ॥

पञ्चमीमृचमाह—

दिवश्चित्ते बृहतो जातवेदो वैश्वानर प्र रिरिचे महित्वम्।
राजा कृष्टीनामसि मानुषीणां युधा देवेभ्यो वरिवश्चकर्थ ॥५॥

दिवः चित् ते बृहतः जातऽवेदः वैश्वानर प्र रिरिचे महिऽत्वम् राजा कृष्टीनाम् असि मानुषीणाम् युधा देवेभ्यः वरिवः चकर्थ ॥

हे जातवेदः जातानां वेदितः, वैश्वानर अग्ने, ते तव महित्वम् माहात्म्यं बृहतो दिवश्चित्

महतो द्युलोकादपि प्र रिरिचे प्रकर्षेण अतिरिक्तोऽधिको भवति। किं च, त्वं मानुषीणाम् मनोर्जातानां कृष्टीनाम् प्रयज्वतीनां प्रजानां राजा असि ईश्वरो भवसि। तथा युधा युद्धेन, असुरैः सह कृतेन युद्धेन साधनेन देवेभ्यः वरिवः स्थानं अवकाशं सुखं वा चकर्थ कृतवानसि। असुरैराक्रान्ते लोके, तान् जित्वा देवेभ्यस्तत्र स्थानं ददासि, तदेव सुखं भवति देवानां, परिचर्या वा॥ सायणस्तु वरिवः धनमिति व्याचष्टे, नैतदुपपद्यते। असदुक्तार्थ एव अवकाशसुखपरिचरणादीनामन्यतमो वा वरिवः-शब्दप्रयोगस्थलेषु युक्तो भवति॥ वरिवः-वृञ् वरणे, व्रियते सर्वैरिति वरिवः, धातोर्यङ्लुकि ऋतश्चेत्यभ्यासस्य रिगागमः, तदन्तादसुन्, टिलोपः॥

षष्ठीमृचमाह—

प्र नू महित्वं वृषभस्य वोचं यं पूरवो वृत्रहणं सचन्ते।
वैश्वानरो दस्युमग्निर्जघन्वाँ अधूनोत्काष्ठा अव शम्बरं भेत्॥६॥

प्र नु महिऽत्वम् वृषभस्य वोचम् यम् पूरवः वृत्रऽहनम् सचन्ते वैश्वानरः दस्युम् अग्निः जघन्वान् अधूनोत् काष्ठाः अव शम्बरम् भेत्॥

वैश्वानरस्य सर्वदेवात्मकत्वादयमग्निः इन्द्रात्मना वर्णितो भवत्यस्यामृचि। वृषभस्य अभीष्टानां वर्षकस्य महित्वम् महत्त्वं प्र वोचम् नु क्षिप्रं प्रब्रवीमि। यम् वृषभं पूरवः मनुष्याः बहवो वा, मनुष्यनामेदम्, वृत्रहणम् वृत्रस्य हन्तारं, विधेयविशेषणं, सचन्ते सेवन्ते। किं तस्य महत्त्वम्? तदुच्यते। स वैश्वानरः अग्निः इन्द्रात्मना दस्युम् उपक्षपयितारं असुरं राक्षसादिकं वा जघन्वान् हतवान्, काष्ठाः अपः अधूनोत् अधोमुखतया अपातयत् (प्राग्विवृतम् १.३२) शम्बरम् तन्निरोधकं च अव भेत् अवाभिनत्॥ वोचम्-वर्तमाने लुङ्, अडभावः। जघन्वान्-हन्तेः लिटः क्वसुः। भेत्-भिदिर् विदारणे, लङि छन्दसि विकरणस्य लुक्॥

सप्तमीमृचमाह—

वैश्वानरो महिम्ना विश्वकृष्टिर्भरद्वाजेषु यजतो विभावा।
शातवनेये शतिनीभिरग्निः पुरुणीथे जरते सूनृतावान्॥७॥

वैश्वानरः महिम्ना विश्वऽकृष्टिः भरत्ऽवाजेषु यजतः विभाऽवा शातऽवनेये शतिनीभिः अग्निः पुरुऽनीथे जरते सूनृताऽवान्॥

वैश्वानरः महिम्ना स्वीयमाहात्म्येन विश्वकृष्टिः विश्वे सर्वे कृष्टयः मनुष्या यस्य स्वभूताः स तथोक्तः भरद्वाजेषु भरन्तो राजाः येषु तेषु पौष्टिकस्मृद्धियुक्तेषु यजनेषु यजतः यष्टव्यः विभावा विशेषेण प्रकाशयिता सूनृतावान् शोभनसत्यादियुक्तः अग्निः शातवनेये शतसंख्यावान् क्रतुर्वनति संभजत इति शतवनिः, तस्यापत्यं सन्ततिः शातवनेयः तस्मिन् पुरुणीथे पुरूणां बहूनामेतरि यजमाने शतिनीभिः बह्वर्थकशतसंख्यावतीभिः स्तुतिभिः जरते स्तौति, अत्र शतवनिः शतक्रतुः बहुकर्मा बलाढ्यः, तस्माज्जातो विशिष्टो नेता भवतीति युक्तम्। शतवनि-पुरुणीथ-संज्ञकौ तु उक्तलक्षणसामर्थ्यनिदर्शनभूतौ ऐतिहासिकौ इति ग्राह्यम्। तथाविधे 'पुरुणीथे' भगवानेव स्तोत्रकर्म करोतीति कर्तर्यर्थे गृहीतभस्त्राभिः। जरते–स्तूयते, व्यत्ययेन कर्मणि कर्तृप्रत्यय इति सायणीयम्। सर्वे गताः॥

इति प्रथमस्य चतुर्थे पञ्चविंशो वर्गः

वह्निमिति पञ्चर्चं तृतीयं सूक्तम्। नोधा ऋषिः त्रिष्टुप् छन्दः अग्निर्देवता।

तत्र प्रथमामृचमाह—

वह्निं यशसं विदथस्य केतुं सुप्राव्यं दूतं सद्योअर्थम्।
द्विजन्मानं रयिमिव प्रशस्तं रातिं भरद्भृगवे मातरिश्वा ॥१॥

वह्निम् यशसम् विदथस्य केतुम् सुप्रऽअव्यम् दूतम् सद्यःऽअर्थम् द्विऽजन्मानम् रयिम्ऽइव प्रऽशस्तम् रातिम् भरत् भृगवे मातरिश्वा॥

वह्निम् वोढारं प्रापयितारं हव्यस्य, यशसम् यशस्विनं विदथस्य ज्ञानाधिगम्यस्य, ज्ञानगम्यस्य यज्ञस्य वा केतुम् प्रज्ञापकं सुप्राव्यम् सुष्ठु प्रकर्षेण अवति रक्षतीति सुप्रावीः तं दूतम् देवैर्दूत्ये नियुक्तं सद्योअर्थम् सद्यः अरणं गमनं यस्य तं द्विजन्मानम् द्वे जन्मनी यस्य तं विश्वस्मिन् आद्यं जन्म, द्वितीयं तु यजमाने, अथवा द्यावापृथिव्योः प्रागुक्तलक्षणयोर्जायमानं रयिमिव धनमिव प्रशस्तम् प्रख्यातं एवंभूतमग्निं मातरिश्वा वायुर्जगत्प्राणः भृगवे ज्वलते मन्त्रद्रष्ट्रे यजमानाय, तन्निदर्शनभूताय एतत्संज्ञकाय महर्षये रातिम् भरत् 'मित्रमहरत् अकरोत्' इति सायणः, रातेः पुत्र इत्येके, 'रातिं भृगूणामुशिजं कविक्रतुम्' इत्यत्र 'भृगूणामभिलषितार्थप्रदातारम्' इति दात्रर्थे रातिशब्दः प्रयुक्तः सायणीयव्याख्यानुसारेण। इहापि भृगवे यजमानाय अग्निं दातारं अकरोत् इति व्याख्येयम्॥ सुप्राव्यम्–सु प्र इति उपसर्गद्वयोपसृष्टादवतेः

अवित्रादिभ्य ईरिति ईकारप्रत्ययः, वा छन्दसीति अमे पूर्व इत्यस्य विकल्पे यणादेशः। सद्यो-अर्थम्-अहः कर्तरि थन्प्रत्ययः। मातरिश्वा-मातरि अन्तरिक्षे श्वसिति, श्वन्नुक्षन्नित्यादौ निपातनादूपसिद्धिः॥

द्वितीयामृचमाह—

अस्य शासुरुभयासः सचन्ते हविष्मन्त उशिजो ये च मर्ताः।
दिवश्चित्पूर्वो न्यसादि होतापृच्छ्यो विश्पतिर्विक्षु वेधाः॥२॥

अस्य शासुः उभयासः सचन्ते हविष्मन्तः उशिजः ये च मर्ताः दिवः चित् पूर्वः नि असादि होता आऽपृच्छ्यः विश्पतिः विक्षु वेधाः॥

शासुः शासितुः अस्य अग्नेः, शासितारमग्निमिति विभक्तिव्यत्ययः उभयासः सचन्ते देवाः मनुष्याश्च सेवन्ते। देवाः उशिजः कामयमानाः, कान्तिमन्तो वा हविष्मन्तः स्वीकृतैर्हविर्भिर्युक्ताः। ये च मर्ताः यजमानाः, ते उभयासः सचन्त इति संबन्धः। अयं होता अग्निः दिवश्चित् द्युलोकादपि पूर्वः, प्राक्तनः, त्रैलोक्यादुपरि तुरीयं पदं तस्य स्वं गृहम्, द्युलोको द्विधा भवति, त्रैलोक्ये दिवोऽन्तर्भावो बोध्यः। तदुपरि या द्यौः सा बृहती, स्वःशब्दप्रतिपादिता च क्वचित्। कीदृशो होता? आपृच्छ्यः आमन्त्रणीयः पूज्यः विश्पतिः विशां प्रजानां पालकः, वेधाः विधाता, तथाभूतः विक्षु प्रजासु यजमानेषु न्यसादि न्यधायि, स्थापितो भवति॥ शासुः-शास्तेः, तृन्, इडागमाभावः षष्ठ्येकवचने तकारलोपः। उशिजः-वष्टेः इजिप्रत्ययः। आपृच्छ्यः-प्रच्छ ज्ञीप्सायां, क्यप्प्रत्ययः॥

तृतीयामृचमाह—

तं नव्यसी हृद आ जायमानमस्मत्सुकीर्तिर्मधुजिह्वमश्याः।
यमृत्विजो वृजने मानुषासः प्रयस्वन्त आयवो जीजनन्त॥३॥

तम् नव्यसी हृदः आ जायमानम् अस्मत् सुऽकीर्तिः मधुऽजिह्वम् अश्याः यम् ऋत्विजः वृजने मानुषासः प्रयस्वन्तः आयवः जीजनन्त॥

नव्यसी नवीयसी नवतरा सुकीर्तिः सुष्ठु कीर्तयित्री स्तुतिः अस्मत् अस्माकं हृदः हृदयात्

अन्तःकरणवृत्तीनां मूलस्थानात् अन्तरात्मनिलयभूतात् जायमानम् उत्पद्यमानं तम् मधुजिह्वम् मादयितृज्वालं अग्निं आ आश्याः अभिमुखं व्याप्नोतु। वृजने यज्ञशत्रुभिः सह संग्रामे प्राप्ते यम् अग्निं आयवः यजनाध्वनि गन्तारः मनुष्याः जीजनन्त उदपादयन्, उत्पादयन्तीत्यर्थः। कीदृशाः आयवः? ऋत्विजः ऋतौ युक्ते काले यष्टारः मानुषासः मनोर्जाताः प्रयस्वन्तः प्रीतियुक्ताः॥ नव्यसी-नवीयसीत्यत्र ईकारलोपश्छान्दसः। अश्याः-अशू व्याप्तौ, लिङि विकरणस्य लुक्, व्यत्ययेन परस्मैपदं मध्यमपुरुषश्च। जीजनन्त-जनी प्रादुर्भावे, ण्यन्ताल्लङ्, अडभावः॥

चतुर्थीमृचमाह—

उशिक्पावको वसुर्मानुषेषु वरेण्यो होताधायि विक्षु।
दमूना गृहपतिर्दम आँ अग्निर्भुवद्रयिपती रयीणाम्॥४॥

उशिक् पावकः वसुः मानुषेषु वरेण्यः होता अधायि विक्षु दमूनाः गृहऽपतिः दमे आ अग्निः भुवत् रयिऽपतिः रयीणाम्॥

उशिक् कामयमानः कान्तिमान् वा, पावकः शोधकः वसुः सर्वस्यापि धनभूतः मानुषेषु मनुष्येषु वरेण्यः वरणीयः, मनुष्येषु अन्तःस्थितः स श्रेष्ठो वरणीयो भवति। एवंभूतः सोऽग्निः होता आह्वाता विक्षु यजमानेषु अधायि निहितः स्थापितो भवति। किञ्च सः दमूनाः गृहसुहृत्, दानमनस्क इति यास्कमनुसृत्य सायणः, गृहवाचिनो दमशब्दान्निष्पन्नोऽयं बोध्यः। गृहपतिः गृहस्य पालयिता दमे गृहे अयं अग्निः रयीणाम् बहुविधानां धनानां मध्ये रयिपतिः उत्कृष्टस्य धनस्य पालकः आ भुवत् समन्ताद्भवति॥ अधायि-छन्दसि वर्तमाने कर्मणि लुङ्। दमूनाः-दमेरूनसिः इति औणादिकः प्रत्ययः। भुवत्-लेटि अडागमः॥

पञ्चमीमृचमाह—

तं त्वा वयं पतिमग्ने रयीणां प्र शंसामो मतिभिर्गोतमासः।
आशुं न वाजम्भरं मर्जयन्तः प्रातर्मक्षू धियावसुर्जगम्यात्॥५॥

तम् त्वा वयम् पतिम् अग्ने रयीणाम् प्र शंसामः मतिऽभिः गोतमासः आशुम् न वाजम्ऽभरम् मर्जयन्तः प्रातः मक्षु धियाऽवसुः जगम्यात्॥

गोतमासः अतिशयेन गोमन्तः इन्द्रस्य रश्मियुक्ताः (अन्तर्भावितमत्वर्थः), गोतमगोत्रोद्भवा वयं नोधसः, हे अग्ने रयीणाम् धनानाम् पतिम् पालयितारं तम् तादृशं त्वा त्वाम् मतिभिः मनसीयैः स्तोत्रैः प्रशंसामः प्रकर्षेण स्तुमः। किं कुर्वन्तः? वाजम्भरम् वाजस्य बलादिसमृद्धेर्भर्तारं त्वां मर्जयन्तः मार्जयन्तः, तत्र दृष्टान्तः—आशुम् न अश्वमिव, यथा पुरुषा अश्विनः अश्वं निर्धूलिकरणेन मार्जनेन कुर्वन्ति, तथा वयमप्यग्नेर्वहनप्रदेशं यजनस्थानं शोधयामः। प्रातः इदानीं मन्तु शीघ्रं धियावसुः धिया धनवान् जगम्यात् आगच्छतु॥ वाजम्भरम्—अग्नेरेषा वैदिकी संज्ञा, संज्ञायां भृतृवृजीति वाजशब्दे कर्मण्युपपदे खच्प्रत्ययः, मुमागमः। मर्जयन्तः—मृजेर्वृद्ध्यभावः। अन्ये गताः॥

इति प्रथमस्य चतुर्थे षड्विंशो वर्गः

'अस्मा इदु प्रावस' इति षोडशर्चं चतुर्थं सूक्तम्। नोधा ऋषिः त्रिष्टुप् छन्दः इन्द्रो देवता॥

तत्र प्रथमामृचमाह—

अस्मा इदु प्र तवसे तुराय प्रयो न हर्मि स्तोमं माहिनाय।
ऋचीषमायाधिगव ओहमिन्द्राय ब्रह्माणि राततमा॥१॥

अस्मै इत् ऊम् इति प्र तवसे तुराय प्रयः न हर्मि स्तोमम् माहिनाय ऋचीषमाय अधिऽगवे ओहम् इन्द्राय ब्रह्माणि रातऽततमा॥

इदु पादपूरणः, तवसे प्रवृद्धाय तुराय त्वरमाणाय, सत्वरं कार्यं कुर्वते इत्यर्थः इन्द्राय प्रयो न प्रियं वस्तु इव स्तोमम् स्तोत्रं प्रहर्मि प्रकर्षेण हरामि करोमि। कीदृशाय? माहिनाय महते ऋचीषमाय ऋचा समाय यादृशी ऋक् दीप्ता स्तुतिः क्रियते तस्यास्तुल्याय योग्याय अधिगवे अधृता अन्येनानिवारिताः गावः रश्मयः यस्य सः अस्मै अप्रतिहतचिद्रश्मिप्रसराय तस्मै इन्द्रायेति संबन्धः। कीदृशं स्तोमं प्रहर्मि? ओहम् वहनीयं प्रापणीयमुत्कृष्टत्वात्, किञ्च राततमा अतिशयेन दत्तानि ब्रह्माणि मन्त्रात्मकानि स्तोत्राणि पूर्वैः ऋषिभिः स्तोत्राय प्रयुक्तान् मन्त्रानपि इन्द्राय ब्रवीमि न केवलं मयेदानीं गीयमानं स्तोमम्॥ तुराय—तुर त्वरणे। हर्मि—हृञ् हरणे, शपो लुक्। माहिनाय—गतम्। ऋचीषमाय—ऋचा समाय, तृतीयाया ईकारः अलुक्समासश्च छान्दसः। अधिगवः—गौः गमनमिति सायणः, अधृतगमनः, पृषोदरादित्वाद्रूपसिद्धिः। ओहम्—वहतेः कर्मणि घञ्, सम्प्रसारणं छान्दसम्। राततमा—रा दाने, शेर्लोपः॥

द्वितीयामृचमाह—

अस्मा इदु प्रय इव प्र यंसि भराम्याङ्गूषं बाधे सुवृक्ति ।
इन्द्राय हृदा मनसा मनीषा प्रत्नाय पत्ये धियो मर्जयन्त ॥२॥

अस्मै इत् ऊम् इति प्रयःऽइव प्र यंसि भरामि आङ्गूषम् बाधे सुऽवृक्ति इन्द्राय हृदा मनसा मनीषा प्रत्नाय पत्ये धियः मर्जयन्त ॥

अस्मा इदु अस्मै इन्द्रायैव प्रय इव प्रियं वस्त्विव प्र यंसि प्रयच्छामि । बाधे बाधनाय यज्ञशत्रूणामिति शेषः सुवृक्ति सुष्ठु आवर्जकं आङ्गूषम् आघोषं स्तोत्रात्मकं भरामि हरामि संपादयामि । प्रत्नाय पुराणाय पत्ये स्वामिने इन्द्राय धियः बुद्धीः धारणासमर्थान् प्रज्ञाविशेषान् तल्लक्षिताः स्तुतीर्वा हृदा हृदयेन, प्राक्तनलक्षणेन मनसा अन्तःकरणवृत्त्या मनीषा मनीषया मनस ईषयित्र्या प्रज्ञया च मर्जयन्त मार्जयन्ति शोधयन्ति संस्कुर्वन्ति स्तोतार ऋषय इति शेषः ॥ प्रयंसि—यम उपरमे, लटि पुरुषव्यत्ययः, शपो लुक् । आङ्गूषम्—आङ्पूर्वाद् घुषेर्घञ्, पृषोदरादित्वाद् घो इत्यस्य गू आदेशः । बाधे—बाधृ विलोडने, कृत्यार्थे भावे केन्प्रत्ययः, एजन्तत्वात् अव्ययत्वेन सुपो लुक् ॥

तृतीयामृचमाह—

अस्मा इदु त्यमुपमं स्वर्षां भराम्याङ्गूषमास्येन ।
मंहिष्ठमच्छोक्तिभिर्मतीनां सुवृक्तिभिः सूरिं वावृधध्यै ॥३॥

अस्मै इत् ऊम् इति त्यम् उपऽमम् स्वःऽसाम् भरामि आङ्गूषम् आस्येन मंहिष्ठम् अच्छोक्तिऽभिः मतीनाम् सुवृक्तिऽभिः सूरिम् ववृधध्यै ॥

अस्मा इदु अस्मै इन्द्रायैव त्यम् तं प्रसिद्धं उपमम् उपमानहेतुभूतं स्वर्षाम् स्वःसां, स्वरिति ज्योतिः तस्य सनितारं दातारं आङ्गूषम् स्तोत्ररूपं घोषं आस्येन मुखेन भरामि करोमि । कीदृशमाङ्गूषम्? वक्ष्यमाणप्रकारम्—सूरिम् वावृधध्यै विपश्चितमिन्द्रं वर्धयितुं सुवृक्तिभिः सुष्ठु आवर्जकैः मतीनाम् अच्छोक्तिभिः मतिलक्षितस्तुतीनां स्वच्छैर्वचोभिः मंहिष्ठम् अतिशयेन प्रवृद्धं एवंविधमाङ्गूषं भरामीति संबन्धः ॥ उपमम्—उपमीयतेऽनेनेति उपमः, घञर्थे कविधानम् ।

स्वःसाम्–स्वः सनोति जनसनादिभ्यो विट्, विड्वनोः अनुनासिकस्य आत्वम्, सनोतेरन इति षत्वम्। ववृधध्यै–वर्धतेः ण्यर्थात् तुमर्थे कध्यैप्रत्ययः, द्विर्भावश्छान्दसः॥

चतुर्थीमृचमाह—

अस्मा इदु स्तोमं सं हिनोमि रथं न तष्टेव तत्सिनाय।
गिरश्च गिर्वाहसे सुवृक्तीन्द्राय विश्वमिन्वं मेधिराय ॥४॥

अस्मै इत् उम् इति स्तोमम् सम् हिनोमि रथम् न तष्टाऽइव तत्ऽसिनाय गिरः च गिर्वाहसे सुऽवृक्ति इन्द्राय विश्वम्ऽइन्वम् मेधिराय॥

अस्मा इदु अस्मा एवेन्द्राय स्तोमम् स्तोत्रं संहिनोमि प्रेरयामि। तत्र दृष्टान्तः–तत्सिनाय सिनं अन्नमिति यास्कमनुसृत्य सायणः, संदिग्धः शब्दार्थः। सिनः ग्रासः सितो बन्धनार्थ इति पातञ्जलमहाभाष्ये निर्णीतः "सिनो ग्रासः स्वयमेव भवति, सिता पाशेन सूकरी" (पा. ८.२.४६)। अतिचिरन्तनत्वान्मन्त्राणां बन्धनार्थोऽप्यार्षादिति केषाञ्चिद्दृहः, तर्हि तेन रथेन सिनं अन्नं यस्य सः, अथवा तेन रथेन सिनं बन्धः संबन्धः यस्य सः, उभयथापि रथस्वामी भवति, तस्मै रथम् न तष्टा इव यथा तष्टा तक्षको रथं प्रेरयति तद्वत्, इवेत्येतत् नकारो वा पदपूरणः। तथा गिर्वाहसे गीर्भिः स्तुतिभिरुह्यमानाय गिरश्च ऋग्रूपाः केवलाः स्तुतीश्च सुवृक्ति सुष्ठु शोभमानं यथा भवति तथा प्रेरयामि, पूर्वं स्तोमः शस्त्रात्मकः, इदानीं तत्संबन्धिन्य ऋच उक्ताः। तथा मेधिराय मेधाविने इन्द्राय विश्वमिन्वम् विश्वं सर्वं इन्वति व्याप्नोतीति विश्वमिन्वं सर्वगं सर्वचालकं वा वचः प्रेरयामि॥ विश्वमिन्वम्–इन्वति, पचाद्यच्, लुगभावश्छान्दसः। मेधिरः–मत्वर्थीय इरन्प्रत्ययः॥

पञ्चमीमृचमाह—

अस्मा इदु सप्तिमिव श्रवस्येन्द्रायार्कं जुह्वा ३ समञ्जे।
वीरं दानौकसं वन्दध्यै पुरां गूर्तश्रवसं दर्माणम् ॥५॥

अस्मै इत् उम् इति सप्तिम्ऽइव श्रवस्या इन्द्राय अर्कम् जुह्वा सम् अञ्जे वीरम् दानऽओकसम् वन्दध्यै पुराम् गूर्तऽश्रवसम् दर्माणम्॥

अस्मा इदु अस्मा एव इन्द्राय अर्कम् मन्त्रं स्तोत्रात्मकं श्रवस्या श्रवणेच्छया जुह्वा जिह्वया वाचा समञ्जे समक्तं प्रक्षितामिव करोमि, मन्त्रस्य वाग्योगात् दिव्यादेशश्रवणं संपद्यत इति आर्षं रहस्यम्। तत्र दृष्टान्तः–सप्तिमिव अश्वमिव, यथा रथयुक्तोऽश्वः अभीष्टस्थानं प्रापयति प्राप्नोति च तथा वाग्युक्तो मन्त्रः दिव्यं श्रवणं सम्पादयतीति बोध्यम्। तथा जिह्वया अर्कमक्तं कृत्वा च वीरम् विक्रान्तं शूरं दानौकसम् दानानां मुख्यनिलयं गूर्तश्रवसम् गूर्तं स्तुतं प्रशस्तं श्रवः श्रवणं यशो वा यस्य तं पुरां दर्माणम् असुरपुराणां दारयितारं इन्द्रं वन्दध्यै वन्दितुं प्रवृत्तोऽस्मीति शेषः॥ सप्तिमिव–षप समवाये, समवैति रथेन युक्तो भवति, तिप्प्रत्ययः। अञ्जे–अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु, व्यत्ययेनात्मनेपदम्। दर्माणम्–दृ विदारणे, अस्मात् मनिन्॥

इति प्रथमस्य चतुर्थे सप्तविंशो वर्गः

षष्ठीमृचमाह—

अस्मा इदु त्वष्टा तक्षद्वज्रं स्वपस्तमं स्वर्यं रणाय।
वृत्रस्य चिद्विदद्येन मर्म तुजन्नीशानस्तुजता कियेधाः ॥६॥

अस्मै इत् ऊम् इति त्वष्टा तक्षत् वज्रम् स्वपःऽतमम् स्वर्यम् रणाय वृत्रस्य चित् विदत् येन मर्म तुजन् ईशानः तुजता कियेधाः ॥

अस्मा इदु अस्मा इन्द्रायैव त्वष्टा तक्षको विश्वकर्मा वज्रम् आयुधं रणाय युद्धार्थं तक्षत् तीक्ष्णं अकरोत्। कीदृशं वज्रम्? स्वपस्तमम् अतिशयेन शोभनकर्माणं स्वर्यम् सुष्ठु प्रेर्यं शत्रुषु इति सायणः, अथवा घोषयुक्तम्। तुजन् हिंसन् शत्रून् ईशानः ईश्वरः कियेधाः बलवान् इन्द्रः वृत्रस्य चित् असुरस्य मर्म मर्मस्थानं तुजता हिंसता येन वज्रेण विदत् अलभत शत्रोः प्राणान्, प्राहार्षीदित्यर्थः॥ स्वपस्तमः–शोभनं अपः कर्म यस्यासौ स्वपाः, अतिशयेन स्वपाः स्वपस्तमः। विदत्–विदॢ लाभे, अडभावः। तुजन्–तुज हिंसायां, शतृ। कियेधाः–कियद्बलं दधाति धारयति कियद्धाः, 'अस्य बलस्य इयत्तां न कोपि जानातीत्यर्थः' इति सायणः, सर्वधातुभ्योऽसुनादित्वादभिमतरूपसिद्धिः॥

सप्तमीमृचमाह—

अस्येदु मातुः सवनेषु सद्यो महः पितुं पपिवाञ्चार्वन्ना।
मुषायद्विष्णुः पचतं सहीयान्विध्यद्वराहं तिरो अद्रिमस्ता ॥७॥

अस्य इत् ऊम् इति मातुः सवनेषु सद्यः महः पितुम् पपिऽवान् चारु अन्ना मुषायत् विष्णुः पचतम् सहीयान् विध्यत् वराहम् तिरः अद्रिम् अस्ता ॥

इत् उ इति पादपूरणम्। मातुः निर्मातुः स्रष्टुः महः महतः अस्य यजनस्य सवनेषु अङ्गभूतेषु यजनकर्मसु पितुम् अन्नभूतं सोमं पपिवान् पीतवान्, तथा चारु शोभनानि अन्ना अन्नानि अन्नानि सद्यः स्वीकृतवान्, विष्णुः व्यापकः पचतम् परिपक्वं देवहस्तप्राप्तिक्षमं, किं तु असुरवशंगतं ज्योतिर्बलैश्वर्यादिकं मुषायत् चोरयन् अपहृतवानित्यर्थः। सहीयान् अतिशयेन शत्रूणां सोढयिता अभिभविता अद्रिम् अस्ता वज्रस्य क्षेपकः एवंभूत इन्द्रः तिरः प्राप्तः सन् वराहम् 'वरमुदकं आहारो यस्य' इति सायणः तर्हि मेघं अपां आवरकं ज्योतिषां निरोधकं विध्यत् अताडयत् अभिनत्॥ शब्दार्थो दत्तः। किं तात्पर्यम्। अस्यामृचि त्रीणि वाक्यखण्डाने भवन्ति। 'सवनेषु पितुं पपिवान्' इत्येकम्, 'विष्णुः पचतं मुषायत्' इत्यन्यत्, 'अस्ता वराहं विध्यत्' इति तृतीयम्। अत्र संशयः—कः पपिवान्? को मुषायत्? अद्रिमस्तेति लिङ्गदर्शनात् स इन्द्र एवेत्यसंशयम्। तैत्तिरीयश्रुत्युदाहरणपूर्वकं पक्षान्तरव्याख्यानं दत्तं सायणीये। तत्र विष्णुर्यज्ञः, स एतदसुरधनं अपाहरत् स एव वराहोऽभवत्, तत इन्द्रस्तं अविध्यत् इत्यादिकथामुदाहृत्य गभीरार्थस्य मन्त्रस्य स्थूलपक्षानुसारेणापि अर्थावबोधाय न कल्पते। सायणमनुसृत्यैव साधिष्ठं स्थूलार्थं ब्रूमः प्रथमं, अनन्तरं स्पष्टीकुर्मः। सर्वस्य जगतो निर्माता महान् यज्ञः, तस्याङ्गभूतानि यजनानि भवन्ति। तेषु सोमं पिबति अन्यानि हव्यानि च स्वीकरोति इन्द्रः, ततः सोमबलेन स सर्वव्यापी 'विष्णुः' भवन् परिपक्वमपि असुरवशंगतं धनं असुराननविदितमेवापहरति, एवं अपहृते धने, शत्रोर्दौर्बल्ये सति शत्रुजित्वरः वज्रेण अस्त्रेण लक्ष्यं 'वराहं' मेघमविध्यत् विद्ध्वा जितवान्। अथ रहस्यमेवं भवति—यज्ञस्य निर्मातृत्वं नाम यजमाने सुप्तप्रायाणां गुप्तानां ऊर्ध्वलोकाधारकाणां चिद्भूमिकानां अन्नमयप्राणमयमनोमयवपुषां च पृथग्भावेन प्रकाशनं उत्पादनं अवस्थापनं इति बोध्यम्। अथ सोमपानमहिम्ना व्यापको भवन्निन्द्रः यजमाने यजमानशरीरेषु येऽंशाः देवाधीनताप्राप्तिक्षमाः अत एव परिपक्वा अपि देवविरोधिभूतासुरादिविभववशंगदा भवन्ति, तान् रहस्येवापहृत्य दिव्ये स्वीये पदे स्थापयति, तदानीमूर्ध्वं सर्वौजोबलादिरोधकं लक्ष्यं भित्त्वा यजमाने चिन्मयज्योतिर्बलादिवृष्टिक्षेत्रभूते अभीष्टं सर्वं दिव्यममृतमादधाति॥ मह इत्यादयो गताः। मुषायत्—मुष स्तेये,

घञर्थे कविधिर्भावे, सुषः, सुप आत्मनः क्यच्, तस्मात् शतृ, नुमभावः। पचतम्-पचतेः अतच्प्रत्ययः। विध्यत्-व्यध ताडने, लङ्। वराहम्-वरं श्रेष्ठं अहः दिनं, उत्कृष्टो दिवसः इति कर्मधारयः, समासान्तः टच्प्रत्ययः। तद्वानपि मत्वर्थलक्षणया वराहशब्दवाच्यः, एवं अन्तर्यागार्थेऽस्य समन्वयः स्यात्। अस्ता-अस्यतेः क्षेपणार्थात् तृन्, इडभावश्छान्दसः॥

अष्टमीमृचमाह—

अस्मा इदु ग्नाश्चिद्देवपत्नीरिन्द्रायार्कमहिहत्य ऊवुः।
परि द्यावापृथिवी जभ्र उर्वी नास्य ते महिमानं परि ष्टः॥८॥

अस्मै इत् ऊम् इति ग्नाः चित् देवऽपत्नीः इन्द्राय अर्कम् अहिऽहत्ये ऊवुरित्यूवुः परि द्यावापृथिवी इति जभ्रे उर्वी इति न अस्य ते इति महिमानम् परि स्त इति स्तः॥

अस्मा इदु अस्मा एवेन्द्राय अहिहत्ये वृत्रवधे निमित्ते सति, ग्नाश्चित् स्त्रियः सत्योऽपि देवपत्नीः इन्द्राण्याद्याः देवतापुरुषकार्यनिर्वाहिण्यः शक्तयः इन्द्राय देवाय अर्कम् अर्चनार्थं स्तोत्रं ऊवुः समतन्वत। स चेन्द्रः उर्वी विस्तृते द्यावापृथिवी दिवं पृथिवीं च परिजभ्रे परिजहार स्वतेजसा। अस्य इन्द्रस्य महिमानम् महत्त्वं ते द्यावापृथिव्यौ न परि स्तः नातिक्रामतः॥ ऊवुः-वेञ् तन्तुसन्ताने, लिट्। जभ्रे-हृञ् हरणे, लिट्, हस्य भः॥

नवमीमृचमाह—

अस्येदेव प्र रिरिचे महित्वं दिवस्पृथिव्याः पर्यन्तरिक्षात्।
स्वराळिन्द्रो दम आ विश्वगूर्तः स्वरिरमत्रो ववक्षे रणाय॥९॥

अस्येदेव इत् पदपूरणः अस्यैवेन्द्रस्य महित्वम् महत्त्वं दिवः द्युलोकात् पृथिव्याः भूलोकात् अन्तरिक्षात् उभयोर्मध्यमाल्लोकात् एवं त्रिलोक्याः परि उपरि प्ररिरिचे अतिरिक्तं भवति। त्रिलोकाधिक इन्द्रस्य महिमा। दमे स्वे गृहे स्वराट् स्वेन तेजसा राजमानः विश्वगूर्तः विश्वैः

प्रशस्तः स्वरिः शोभनो गन्ता अमत्रः बलेन महान् इन्द्रः रणाय देवशत्रुभिः सह युद्धाय आ ववक्षे आवहति प्रापयति स्वकीयं बलमिति शेषः ॥ अमत्रः–अम गत्यादिषु, अस्मादौणादिकः त्रन्-प्रत्ययः । ववक्षे–वहेर्लेटि सिप्, शपः श्लुः अन्यच्च छान्दसम् ॥

दशमीमृचमाह—

अस्येदेव शवसा शुषन्तं वि वृश्चद्वज्रेण वृत्रमिन्द्रः ।
गा न व्राणा अवनीरमुञ्चदभि श्रवो दावने सचेताः ॥१०॥
अस्य इत् एव शवसा शुषन्तम् वि वृश्चत् वज्रेण वृत्रम् इन्द्रः गाः न व्राणाः अवनीः अमुञ्चत् अभि श्रवः दावने सऽचेताः ॥

इत् पादपूरणः । अस्यैव इन्द्रस्य शवसा बलेन शुषन्तम् शुष्यन्तं वृत्रम्, इन्द्रः वज्रेण आयुधेन विवृश्चत् व्यवाच्छिनत् । तथा गाः न चोरैरपहृता गाः यथा अन्विष्य लब्ध्वा मुञ्चन्ति, तथा व्राणाः वृत्रेण आवृता निरुद्धा वा अवनीः अवनहेतुभूताः अपः तेजांसि वा अमुञ्चत् विसृष्टवानिन्द्रः । तथा दावने दात्रे यजमानाय सचेताः यजमानेन समानचित्तः सन् श्रवः श्रवणं, दिव्याद्देशश्रुतिं अभि अभिमुखं यथा भवति तथा ददाति । यजमानस्य चेतसा स्वचेतः संयोज्य एकीकृत्य दिव्यश्रवणाद्देशं तस्मिन् दधाति भगवानिन्द्रः ॥ शुषन्तम्–शुष्यन्तं, श्यनः व्यत्ययेन शः । व्राणाः–वृञ् वरणे, कर्मणि लटः शानच्, छन्दसि यको लुक्, गुणाभावे यणादेशः । अवनीः–अवतेः करणे अनिप्रत्ययः । दावने–ददातेः आतो मनिन्निति वनिप्, चतुर्थ्येकवचने अल्लोपाभावश्छान्दसः ॥

इति प्रथमस्य चतुर्थेऽष्टाविंशो वर्गः

तत्र एकादशीमृचमाह—

अस्येदु त्वेषसा रन्त सिन्धवः परि यद्वज्रेण सीमयच्छत् ।
ईशानकृद्दाशुषे दशस्यन्तुर्वीतये गाधं तुर्वणिः कः ॥११॥
अस्य इत् ऊम् इति त्वेषसा रन्त सिन्धवः परि यत् वज्रेण सीम् अयच्छत् ईशानऽकृत् दाशुषे दशस्यन् तुर्वीतये गाधम् तुर्वणिः करिति कः ॥

अस्येदु अस्यैवेन्द्रस्य त्वेषसा ज्वलता बलेन सिन्धवः स्यन्दमाना आपः रन्त रमन्ते यथास्वम्, यत् यस्मात् सीम् एनान् सिन्धून् एता अपः वज्रेण पर्ययच्छत् परितो नियमितवानिन्द्रः, किञ्च ईशानकृत् अभीष्टं जनं ईशानं ऐश्वर्यवन्तं करोतीति ईशानकृत् दाशुषे दत्तवते यजमानाय दशस्यन् अभीष्टं प्रयच्छन् तुर्वणिः तूर्णसंभजनः जयशीलः तुर्वीतये जित्वरगमनाय क्षिप्रगतये वा यजमानाय, तदभिदर्शनभूत-तत्संज्ञकाय वा गाधम् अवस्थानयोग्यं धिष्ण्यं कः अकार्षीत्, पूर्वं तुर्वीतिसंज्ञकाय असुशक्तिवाहिनीषु निमग्नाय, करोत्येव सर्वदा तादृशाय जित्वरगमनाय यजमानाय ॥ रन्त–रमु क्रीडायाम्, शपो लुक्, धातोरुत्यलोपश्छान्दसः। अयच्छत्–यम उपरमे। कः–करोतेः लुङ्, च्लेर्लुक् छन्दसि ॥

द्वादशीमृचमाह—

अस्मा इदु प्र भरा तूतुजानो वृत्राय वज्रमीशानः कियेधाः।
गोर्न पर्व वि रदा तिरश्चेष्यन्नर्णांस्यपां चरध्यै ॥१२॥

अस्मै इत् उम् इति प्र भर तूतुजानः वृत्राय वज्रम् ईशानः कियेधाः
गोः न पर्व वि रद तिरश्चा इष्यन् अर्णांसि अपाम् चरध्यै ॥

हे इन्द्र, तूतुजानः त्वरमाणः ईशानः ईश्वरः कियेधाः कियतः अनवधृतप्रमाणस्य बलस्य धाता, एवंभूतस्त्वं अस्मा इदु वृत्राय वज्रम् प्रभर इमं एव वृत्रं वज्रेण प्रहर। अथ अर्णांसि निरुद्धान्युदकानि इष्यन् एषयन् वृत्रात् निर्गमय्य प्रेरयन् अपाम् चरध्यै चरणाय भुवं प्रति गमनाय तिरश्चा तिर्यगवस्थितेन वज्रेण विरद विलिख छिन्धि वृत्रस्य पर्वाण्यवयवसन्धीनिति शेषः। तत्र दृष्टान्तः–गोः न पर्व यथा गोः पशोः पर्वाणि अवयवसन्धीन् लोके विशसन्ति तद्वत् ॥ भर–हरतेः, हस्य भः। तूतुजानः–तुजतिर्हिंसायां त्वरणे वा। कियेधाः–गतः। तिरश्चा–तिरोऽञ्चतीति तिर्यक्, ऋत्विगित्यादिना क्विन्। इष्यन्–इष्यतेः अन्तर्भावितण्यर्थात् शतृ। चरध्यै–चरतेः तुमर्थे अध्यैप्रत्ययः ॥

त्रयोदशीमृचमाह—

अस्येदु प्र ब्रूहि पूर्व्याणि तुरस्य कर्माणि नव्य उक्थैः।
युधे यदिष्णान आयुधान्यघायमानो निरिणाति शत्रून् ॥१३॥

अस्य इत् ऊम् इति प्र ब्रूहि पूर्व्याणि तुरस्य कर्माणि नव्यः उक्थैः युधे यत् इष्णानः आयुधानि ऋघायमाणः निरिणाति शत्रून् ॥

उक्थैः शस्त्रात्मकैः स्तोत्रैः नव्यः स्तुत्यः य इन्द्रः अस्येदु अस्यैव तुरस्य त्वरमाणस्य इन्द्रस्य पूर्व्याणि कर्माणि पुराणानि शस्त्राणि अतिपुराणमन्त्रदृष्टृभिः कृतानि स्तोत्राणीत्यर्थः प्र ब्रूहि प्रकर्षेण शंस। यत् यदा युधे योधनाय आयुधानि वज्रादीनि इष्णानः प्रेरयन् ऋघायमाणः शत्रुवधं कुर्वन् (विवृतम् १.१०.८) इन्द्रः शत्रून् निरिणाति अभिमुखं गच्छति, तदा प्रब्रूहीति संबन्धः ॥ तुरस्य-तुर त्वरणे। नव्यः-नु स्तुतौ, यत्प्रत्ययः। इष्णानः-इष आभीक्ष्ण्ये क्र्यादिकः, व्यत्ययेनात्मनेपदम् ॥

चतुर्दशीमृचमाह—

अस्येदु भिया गिरयश्च दृळ्हा द्यावा च भूमा जनुषस्तुजेते ।
उपो वेनस्य जोगुवान ओणिं सद्यो भुवद्वीर्याय नोधाः ॥१४॥
अस्य इत् ऊम् इति भिया गिरयः च दृळ्हाः द्यावा च भूमा जनुषः तुजेते
इति उपो इति वेनस्य जोगुवानः ओणिम् सद्यः भुवत् वीर्याय नोधाः ॥

अस्येदु अस्यैवेन्द्रस्य भिया भयेन गिरयश्च पर्वता अपि दृळ्हाः अचलाः स्तब्धाः निष्कम्पमवतिष्ठन्ते, जनुषः प्रादुर्भावादस्येन्द्रस्येति शेषः द्यावा भूमा च द्यावापृथिव्यौ अपि तुजेते कम्पेते। किञ्च वेनस्य कान्तस्यास्य ओणिम् रक्षणं उपो जोगुवानः पुनः पुनरुच्चारयन् अनवरतं स्तुवन् नोधाः एतत्संज्ञक ऋषिः सद्यः सपदि वीर्याय भुवत् वीर्यवानभवत् ॥ नोधाः सूक्तद्रष्टा ऐतिहासिकः पुरुषः। कस्य तच्चस्य निदर्शनभूतः प्रतिष्ठा च भवत्यसौ? अस्योत्तरं अन्यथार्थादवगम्यते। नोधाः नवनं दधातीति यास्कः, मन्त्रात्मकस्तोत्रधारणात् वीर्यवत्त्वं यजमानस्य सम्पद्यते। तस्मात्स्तुतिधारणसम्पत्तेर्निदर्शनं नोधाः ॥ नोधाः-नवशब्दस्य नोभावः, धाञः असुन्। द्यावा भूमेत्युभयोर्मध्ये चशब्दस्य पाठश्छान्दसः, दिवशब्दस्य द्यावादेशः ॥ जनुषः-जनी प्रादुर्भावे, अस्मादौणादिक उसिप्रत्ययः। जोगुवानः-गुङ् अव्यक्ते शब्दे, अस्माद्यङ्लुगन्ताद् व्यत्ययेन शानच्, शपो लुक्, उपधादेशः। भुवत्-भवतेर्लेव्यडागमः ॥

पञ्चदशीमृचमाह—

अस्मा इदु त्यदनु दाय्येषामेको यद्वन्ने भूरेरीशानः ।
प्रैतशं सूर्यं पस्पृधानं सौवश्व्ये सुष्विमावदिन्द्रः ॥१५॥

अस्मै इत् ऊम् इति त्यत् अनु दायि एषाम् एकः यत् वन्ने भूरेः ईशानः प्र एतशम् सूर्यं पस्पृधानम् सौवश्व्ये सुष्विम् आवत् इन्द्रः ॥

एकः अद्वितीयः असमानप्रभावः भूरेः अनल्पस्य महतो वसुनः ईशानः ईश्वरः यत् स्तोत्रं सर्वात्मसमर्पणरूपभक्तिलक्षणमिति वक्तव्यं, न चेत् भूरेः ईशानस्य याच्ञा नोपपद्यते, वन्ने याचने, एषाम् स्तोतॄणां संबन्धि त्यत् तत् स्तोत्रं अस्मा इदु अस्मै इन्द्रायैव अनुदायि अनुपूर्वकदानं विच्छेदरहितं निरन्तरभक्तिलक्षणं बोध्यं, एवं अदायि, दत्तं, यद्वाचितं तद् दत्तं, स्तोत्रं कृतमिति वा । उत्तरार्धस्य भावः कामप्याख्यायिकामाश्रित्याविष्कृतः सायणीये । स्वश्वो नाम राजा, तस्य सूर्य एव स्वयं पुत्रोऽजायत, तेन सह एतशो नाम ऋषिः स्पर्धां चक्रे, तदानीमेतशं इन्द्रो ररक्ष इति । अत्रोच्यते । स्वश्वः शोभनाश्वः क्षत्रिये संज्ञात्वेन वर्तते, प्रवृद्धप्राणबलाज्ञाः सूर्यः सर्वप्रेरकः सत्यज्योतिर्मयः पुरुषः, यजमाने तस्याविर्भावे सति, प्राणबलात्मा अश्वः 'एतशः' तस्य सूर्यस्य सदृशं चेष्टितुं प्रयतते, एषैव चेष्टा स्पर्धा भवति, इन्द्रानुग्रहं विना न संभवति अभिमतसिद्धिरेतशस्य ॥ तदाह—सौवश्व्ये स्वश्वपुत्रे सूर्ये भगवति पस्पृधानम् स्पर्धमानं तेन समाचरितुं प्रयतमानं सुष्विम् सोमानामभिषोतारं, अश्वलक्षितेन प्राणबलेन हि साधनेन अभिषवः क्रियते एतशम् अश्वं उक्तलक्षणं प्र आवत् अवर्धयत्, वर्धयति इन्द्रः, अवधातुर्वृद्ध्यर्थः, नेह रक्षार्थः ॥ वन्ने—वनु याचने, लिट्, व्यत्ययेनोपधालोपः । पस्पृधानम्—स्पर्ध संघर्षे, अभ्यासाल्लिटः कानच्, अन्यत् सर्वं पृषोदरादित्वात् सिद्धम् । सुष्विम्—षुञ् अभिषवे, अस्मात् किन्प्रत्ययः, लिङ्वद्भावाद् द्विर्भावः, अन्यत् सर्वं छान्दसम् ॥

षोडशीमृचमाह—

एवा ते हारियोजना सुवृक्तीन्द्र ब्रह्माणि गोतमासो अक्रन् ।
एषु विश्वपेशसं धियं धाः प्रातर्मक्षू धियावसुर्जगम्यात् ॥१६॥

एव ते हारिऽयोजना सुऽवृक्ति इन्द्र ब्रह्माणि गोतमासः अक्रन् आ एषु विश्वऽपेशसम् धियम् धाः प्रातः मक्षु धियाऽवसुः जगम्यात् ॥

हे हारियोजन, हर्योः अश्वयोः योजनं स्वामित्वेन संबन्धो यस्यासौ हारियोजनः, तस्य संबोधनम्, हे इन्द्र, गोतमासः गोतमाः ऋषयः सुवृक्ति सुष्ठु आवर्जकानि ब्रह्माणि मन्त्रजातानि ते एव तवैव अक्रन् अकृषत। एषु गोतमेषु विश्वपेशसम् विश्वानि सर्वाणि पेशांसि रूपाणि तल्लक्षितानि सौन्दर्याणि वा गोचराणि यस्याः तां धियम् बुद्धिं आ धाः धेहि, धारय अस्मदर्थं, देहि वा नः। शिष्टं व्याख्यातम्॥ एवा-संहितायां दीर्घः। अक्रन्-करोतेर्लुङ्, छान्दसमन्यत्। धाः-दधातेर्लुङ्, सर्वमन्यत् छान्दसम्॥

इति प्रथमस्य चतुर्थ एकोनत्रिंशो वर्गः

प्रथमाष्टके चतुर्थोऽध्यायः समाप्तः

अथ पञ्चमोऽध्यायः प्रारभ्यते। प्रथमे मण्डले एकादशानुवाके चत्वारि सूक्तानि गतानि। 'प्र मन्महे' इति त्रयोदशर्चं पञ्चमं सूक्तं नोधस आर्षम् त्रैष्टुभम् ऐन्द्रम् च॥

तत्र प्रथमामृचमाह—

प्र मंन्महे शवसानाय शूषमाङ्गूषं गिर्वणसे अङ्गिरस्वत्।
सुवृक्तिभिः स्तुवत ऋग्मियायार्चामार्कं नरे विश्रुताय॥१॥

प्र मन्महे शवसानाय शूषम् आङ्गूषम् गिर्वणसे अङ्गिरस्वत्
सुवृक्तिऽभिः स्तुवते ऋग्मियाय अर्चाम अर्कम् नरे विऽश्रुताय॥

शवसानाय शवस्यमानाय बलमिवाचरते, अनुरवधादौ कार्ये सति स्वयमेव बलभूतायेत्यर्थः गिर्वणसे गीर्भिः स्तुतिभिर्वननीयाय संभजनीयाय इन्द्राय शूषम् सुखं सुखहेतुभूतं आङ्गूषम् स्तोमात्मकं आघोषं अङ्गिरस्वत् अङ्गिरस इव वयं प्र प्रकर्षेण मन्महे अवगच्छामः, ध्यायाम इत्यर्थः। तथा ध्यात्वा सुवृक्तिभिः सुष्ठु आवर्जकैः अभिमुखीकरणसमर्थैः स्तोत्रैः स्तुवते स्तुतिं कुर्वते यजमानाय ऋषये ऋग्मियाय अर्चना ऋक् ऋचं मिमीत इति ऋग्मीः, तस्मै, अथवा स्तोतारं मन्त्रद्रष्टारं अनुग्रहीतुं स्वयं ऋग्भूताय, ऋगात्मने नरे नेत्रे, बलिष्ठाय विश्रुताय विख्याताय इन्द्राय अर्कम् मन्त्रात्मकं उज्ज्वलं स्तोत्रं अर्चाम पूजयाम उच्चारयामेत्यर्थः॥ मन्महे-मनु अवबोधने, तनादिः। शवसानाय-शव इवाचरति शवस्यते, अस्मात्क्विप्, अल्लोपो यलोपश्च छान्दसौ। ऋग्मियाय-बहुधा निर्वचनम् (१.९.९, १.५१.१)॥

द्वितीयामृचमाह—

प्र वो महे महि नमो भरध्वमाङ्गूष्यं शवसानाय साम ।
येना नः पूर्वे पितरः पदज्ञा अर्चन्तो अङ्गिरसो गा अविन्दन् ॥२॥

प्र वः महे महि नमः भरध्वम् आङ्गूष्यम् शवसानाय साम येन नः पूर्वे पितरः पदज्ञाः अर्चन्तः अङ्गिरसः गाः अविन्दन् ॥

हे सखायः, वः यूयं, विभक्तिव्यत्ययः, महे महते शवसानाय बलाभिमानाय अतिबलायेत्यर्थः तस्मै (इत्यध्याहार्यः उत्तरत्र यच्छब्दश्रवणात्) इन्द्राय महि महत् नमः नमःशब्दोपलक्षितं स्तोत्रं प्रभरध्वम् प्रकर्षेण संपादयत। किं तत् स्तोत्रम्? आङ्गूष्यम् साम आघोषयोग्यं बृहद्रथन्तरादि गीतिशब्दसमाख्यं साम। येन सामगानेन नः अस्माकं पूर्वे पितरः पूर्वपुरुषाः पितृविशेषा अङ्गिरसः ऋषयः पदज्ञाः मार्गज्ञाः, पणिभिरपहृतानां गवां पदानि जानन्तः, अर्चन्तः इन्द्रं पूजयन्तः गाः अविन्दन् अलभन्त ॥ अङ्गिरस्तत्त्वविचारे विवरणं कृतमस्य पणिगोवृत्तान्तस्य (१.३३ सू.) ॥

तृतीयामृचमाह—

इन्द्रस्याङ्गिरसां चेष्टौ विदत्सरमा तनयाय धासिम् ।
बृहस्पतिर्भिनदद्रिं विदद्गाः समुस्रियाभिर्वावशन्त नरः ॥३॥

इन्द्रस्य अङ्गिरसाम् च इष्टौ विदत् सरमा तनयाय धासिम् बृहस्पतिः भिनत् अद्रिम् विदत् गाः सम् उस्रियाभिः वावशन्त नरः ॥

अस्यामृचि अङ्गिरःसरमाबृहस्पतयो निर्दिष्टाः। हिरण्यस्तूपस्य ऐन्द्रबृहत्कार्थविचारे (३२ सू., ३३ सू.) अङ्गिरस्तत्त्वप्रतिपादने च गोलाभरहस्यं उक्तम्। तत् सर्वमनुसंधेयम्। सरमा देवशुनी सहजावबोधचक्षुर्लक्षणा गोगुप्तिस्थानं गत्वा दृष्ट्वा च इन्द्राय प्रथमं दर्शयति। अत्र अङ्गिरसो मन्त्रमुच्चारयन्तो बलभेदने इन्द्राय साहाय्यमाचरन्ति। ततो बलमसुरं हत्वा ता गाः स इन्द्रो लभते। इदं सर्वं प्रागेव सरहस्यं व्याख्यातम्। अत्रैक एव विषयो वक्तव्यः। 'सरमा तनयाय धासिं विदत्' इति मन्त्रभागस्य स्थूलार्थं उपपादयितुमित्थमाहुः—यथा लोके व्याधः वनान्तर्गत-मृगान्वेषणाय श्वानं विसृजति तथेन्द्रः सरमां व्यसृजद्गा अन्वेष्टुम्। तदा सरमैवमवोचत्

'हे इन्द्र अरुदीयशेशवे तद्दोक्षीराद्यकं यदि प्रयच्छसि तर्हि गमिष्यामि' इति। इदं त्वत्र ग्राह्यं तत्त्वम्। इन्द्रो दिव्यः शुद्धसत्त्वात्मकमनोमयधामाधिराजः। तस्य सरमा देवशुनी तत्त्वान्वेषणसमर्था यजमाने सहजाबोधचक्षुःस्वरूपिणी गोपदवेदनीयचिद्रश्मिगुप्तिस्थानं पर्वगुहापदवाच्यं अजागरिताचित्कं अधिगम्य दिव्यसत्त्वमनःप्रेशाय मार्गं दृष्ट्वा प्रदर्शयति। अनेन सहजाबोधदृष्टेः सन्ततिः प्रतिष्ठां लभते, इन्द्रस्य गोलाभात्परं एषा सहजा दृष्टिः प्रतिष्ठिता भवति। तस्मात् 'तनयः सन्ततिः धासिं धारकं प्रतिष्ठाभूतं जागरितस्थाने पदं अविन्दत्' इति रहस्यम्। अथ ऋगर्थः स्पष्टो भवति। इन्द्रस्य अङ्गिरसां च इष्टौ एषणे, सरमायाः प्रेषणे सरमा उक्तलक्षणा देवशुनी तनयाय स्वीयजननाय सन्तानाय, स्थूलपक्षे पुत्राय, धासिम् धारकं आधारं प्रतिष्ठामिति यास्कात्, अन्नमिति स्थूलं, विदत् अविन्दत्। सरमया गोषु निर्दिशासु बृहस्पतिः अङ्गिरसां मुख्यः, इन्द्र एवेति सायणः, अद्रिम् अत्तारमसुरं वलं भिनत् अभिनत् हतवान्। गाः विदत् अलभत च वलेनापहृताः गाः। नरः नेतारो देवाः उस्रियाभिः प्राप्ताभिर्गोभिः सह संवावशन्त अत्यन्तं हर्षेण शब्दमकुर्वन्॥

इष्टौ–इष गतौ। विदत्–विदॢ लाभे। सरमा–सरतेरौणादिकोऽमप्रत्ययः। धासिम्–दधातेरिति यम्, धेट् पाने इत्यसादिति स्थूलपक्षीयाः। उस्रियाभिः–उस्राशब्दात् पृषोदरादित्वात् घप्रत्ययः। वावशन्त–वाशृ शब्दे, अस्माद्यङन्ताल्लुङ्, यलोपादिकं सर्वं छान्दसम्॥

चतुर्थीमृचमाह—

स सुष्टुभा स स्तुभा सप्त विप्रैः स्वरेणाद्रिं स्वर्यो३ नवग्वैः।
सरण्युभिः फलिगमिन्द्र शक्र वलं रवेण दरयो दशग्वैः॥४॥
सः सुऽस्तुभा सः स्तुभा सप्त विप्रैः स्वरेण अद्रिम् स्वर्यः नवऽग्वैः
सरण्युऽभिः फलिऽगम् इन्द्र शक्र वलम् रवेण दरयः दशऽग्वैः॥

नवग्वा दशग्वा इति अङ्गिरसो द्विविधा इति (१.३३.६) प्रागुक्तम् नवसंख्याक-गोशब्दलक्षित-चिद्रश्मियुक्तैः 'नवग्वैः' अङ्गिरोभिः तथा दशसंख्याकरश्मियुक्तैः 'दशग्वैश्च सहायभूतैः वलं विदारितवानिन्द्र इत्यादि कीर्त्यते। सः सरण्युभिः सरणं गमनमिच्छद्भिः सप्त सप्तभिः, विभक्तिलोपः, विप्रैः मेधाविभिः नवग्वैः दशग्वैः अङ्गिरोभिः सुष्टुभा शोभनस्तोमयुक्तेन स्वरेण स्तोत्रदागर्यानुरूपेण नादेन, उदात्तादिनेति वा, स्तुभा स्तुत्या स्वर्यः शब्दनीयः स्तुत्यः, सः एवंभूतः

स त्वं हे शक्र इन्द्र, शक्तिमन्निन्द्र, अद्रिम् अत्तारमसुरं पर्वतं वा फलिगम् फलं गवात्मकं अन्नात्मकं वा अस्मिन्नस्तीति फलि आवरणस्थानं तद्गच्छतीति फलिगः तं वलम् गवां वलयितारं पूर्वोक्तं असुरं रवेण शब्देन दरयः अदारयः, विदारितवानसि ॥ अत्र अद्रि-फलिग-वलानां सामानाधिकरण्यं गृहीतम् । अद्रिः पर्वतः, फलिगो मेघः, वलः असुरः इति पृथगेते त्रय इति गृहीत्वा पदान्तरव्याख्यानमाह सायणः । रहस्यार्थपरेऽस्मिन् व्याख्याने त्रयाणां भेदोऽयमकिञ्चित्करः ॥ सुष्टुभा-स्तोभतिः स्तुतिकर्मा, स्तुप्, सम्पदादिलक्षणः क्विप्, शोभना स्तुप् स्तोभो यस्य तेन । अन्ये गताः । दरयः-दृ विदारणे, मितां ह्रस्व इति ह्रस्वत्वम् ॥

पञ्चमीमृचमाह—

गृणानो अङ्गिरोभिर्दस्म वि वरुषसा सूर्येण गोभिरन्धः ।
वि भूम्या अप्रथय इन्द्र सानु दिवो रज उपरमस्तभायः ॥५॥
गृणानः अङ्गिरःऽभिः दस्म वि वः उषसा सूर्येण गोभिः अन्धः वि भूम्याः अप्रथयः इन्द्र सानु दिवः रजः उपरम् अस्तभायः ॥

हे दस्म शत्रूणामुपक्षपयितः, बलवन् इन्द्र, त्वं अङ्गिरोभिः ऋषिभिः गृणानः स्तूयमानः सन् उषसा सूर्येण गोभिः च सह, प्रज्ञाप्रभातऋतज्योतिःसंबन्धिचिद्रश्मिभिः अन्धः अन्धकारं चिदावरकं तमः वि वः व्यवृणोः व्यनाशयः । तथा भूम्याः पृथिव्याः स्थूलायाः जागरितस्थानप्रज्ञाक्षेत्रभूतायाः सानु समुच्छ्रितं प्रदेशं, शिखरं व्यप्रथयः विशेषेण प्रथितवानसि, जागरितप्रज्ञाक्षेत्रं विशेषेण विस्तीर्णमकरोः । तथा दिवः अन्तरिक्षस्य रजः रजसः मध्यमलोकस्य उपरम् उपरि मूलप्रदेशं, मध्यमस्थानप्रज्ञाक्षेत्रं अस्तभायः तस्य ऊर्ध्वं मूलं यथा दृढं भवति तथा अकरोः ॥ गृणानः-कर्मणि लटः शानचि यकि प्राप्ते व्यत्ययेन श्ना । दस्म-दसु उपक्षये, मक् । वः-वृञ् वरणे, लुङ्, च्लेर्लुक् । अन्धः-तमोऽप्यन्ध उच्यत इति यास्कः । रजः-लोकवचनः, षष्ठ्या लुक् । अस्तभायः-स्तभ्नोः लङि व्यत्ययेन शायजादेशः, नलोपः अडागमश्च ॥

इति प्रथमस्य पञ्चमे प्रथमो वर्गः

षष्ठीमृचमाह—

तदु प्रयक्षतममस्य कर्म दस्मस्य चारुतममस्ति दंसः ।
उपह्वरे यदुपरा अपिन्वन्मध्वर्णसो नद्यश्चतस्रः ॥६॥

तत् कुम् इति प्रयक्षऽतमम् अस्य कर्म दस्मस्य चारुऽतमम् अस्ति दंसः उपऽह्वरे यत् उपराः अपिन्वत् मधुऽअर्णसः नद्यः चतस्रः ॥

दस्मस्य प्रबलकर्मणः अस्य इन्द्रस्य तदु तदेव प्रयक्षतमम् अतिशयेन पूज्यतमं दंसः कर्म, तदेव चारुतमम् कर्म अस्ति अतिशयेन शोभनं कर्म च भवति। किं तत्? आह। अयमिन्द्रः उपह्वरे उपह्वर्तव्ये कौटिल्येन गन्तव्ये पृथिव्याः संबन्धिनि विषमप्रदेशे उपराः उपरि उत्कृष्टे स्थापिताः मधुरोदकाः चतस्रो नद्यः चतुःसंख्याकाः नदीः अपिन्वत् असिञ्चत् इति यत् तदेतत्कर्म प्रयक्षतममिति संबन्धः ॥ का इमाश्चतस्रो नद्यः? गङ्गाद्या इति सायणः। पुराणेष्वपि प्रसिद्धा एतस्रो नद्यः गङ्गाद्याः उपरि स्थापिताः, ता इन्द्रः प्रापयति इति तु न कथ्यते तेन। भूरादितत्त्वसप्तके अवरार्धभूतं त्रैलोक्यं वर्जयित्वा, अवशिष्टतत्त्वचतुष्टयसंबन्धिन्यः सत्यचिन्मय-ज्योतिरानन्दबलामृतताहेन्यः चतस्रः स्यन्दमानाः आपः न केनापि इन्द्राद्यन्येन पृथिवीं जागरितस्थानां स्थूलप्रज्ञाभुवं प्रापयितुं शक्याः। अत एव अद्भुततमं महनीयं ऐन्द्रं कर्म। उपराशब्दः उपरमन्तेऽत्रेति व्युत्पाद्यते सायणीये, अन्यत्र 'उपरि उत्कृष्टे स्थापिताः' इति सायण एवाचष्टे। प्रयक्षतमम्-यक्षयत इति यक्षः, यक्ष पूजायाम्। उपह्वरे-ह्वृ कौटिल्ये, उपह्वरन्ति अस्मिन्। अपिन्वत्-पिवि सेचने ॥

सप्तमीमृचमाह—

द्विता वि वव्रे सनजा सनीळे अयास्यः स्तवमानेभिरर्कैः।
भगो न मेने परमे व्योमन्नधारयद्रोदसी सुदंसाः ॥७॥

द्विता वि वव्रे सनऽजा सनीळे इति सऽनीळे अयास्यः स्तवमानेभिः अर्कैः भगः न मेने इति परमे विऽओमन् अधारयत् रोदसी इति सुऽदंसाः ॥

अयास्यो मुख्यः प्राग इति औपनिषदबलात् प्राहुः। आङ्गिरसो बृहस्पतिरयास्य इति इन्द्र एवोपचर्यते साहचर्यादिति च कथ्यते। उभयविधोक्तेरनुपयोग एवात्र मन्त्रार्थपरिग्रहे। अया-स्यशब्दं प्रति सायणस्य प्रथमोक्तिर्वक्ष्यमाणप्रकारा साधीयसीति तामेवावलम्ब्य व्याचक्ष्महे। अयास्यः यासः प्रयत्नः तत्साध्यः यास्यः न यास्यः न प्रयत्नसाध्यः, कृच्छ्रेण तपसा अन्यथा

वा मानुषेण बलेन न साध्य इन्द्रः, तस्य प्रसादादेव लभ्यः, तदर्थमेव ऋषयः स्तुतिभिः नमः-शब्दप्रतिपादितसर्वस्वदानलक्षणया भक्त्या प्रीत्या रत्या प्रसादयन्ति। ईदृश्य ऋच एव बीजं भवति 'नायमात्मा प्रवचनेन लभ्यः' इत्युपनिषत्सिद्धान्तस्य। यदा स्तोत्रैरिन्द्रः स्तोतरि प्रीतो भवति, तदा तदीयं कर्म कीर्त्यते पुरस्तात्। एवमुक्तलक्षण इन्द्रः स्तूयमानेभिः स्तोतृभिः वृद्धैः ऋषिभिः अर्कैः उज्ज्वलस्तोत्रात्मकैः मन्त्रैः स्तूयमानः, अत एव प्राप्तबलः प्रीतः किं करोति स्तोत्रे यजमानाय? सनजा सनेति निपातो नित्यार्थः, नित्यजाते सर्वदा सिद्धसङ्घो इत्यर्थः, द्विता द्विधा सनीळे समानजातस्थाने रोदसी द्यावापृथिव्यौ विष्टभ्रे विवृते अकरोत्। ऊर्ध्वा दिव्या मानसी चितिः द्यौः, अधरा पार्थिवा चितिः पृथिवी। अपरिपक्वदशायां पुरुषस्य यथा-जातावस्थायां उभयोरेकरूपत्वात् व्यामिश्रतया भवति। यज्ञाध्वनि प्रवृत्तस्य परिपाके सति, उभे अपि पूर्वोक्ते विवेचिते, पृथक्कृते भवतः, अनभिव्यक्तदशामुज्झित्वा स्वाभिव्यक्तिं भजते द्यौः, तथा पृथिवी चोक्तलक्षणचित्का। 'सनजा सनीळे' इति विशेषणमेवमर्थकं बोध्यम्। तथा उभे अपि पृथगवस्थाय, मेने मननीये परमे उत्कृष्टे व्योमनि आकाशे, न भौतिके नभसि, किं तु सर्वोत्कृष्टे चिन्मयाकाशे वर्तमानः भगो न सूर्य इव सुदंसाः शोभनकर्मेन्द्रः ते रोदसी अधारयत् अपोषयत्, ऊर्ध्वामधरामुभयीमपि मानुषीं चितिमपूपुषत्॥ अत्र सुदंसाः शोभनदर्शनः दर्शनीय इत्यपि युक्तोऽर्थः। कृतकृत्यस्य कर्मणः परं दर्शनीयत्वमुचितम्, एवं भग इवेति शोभाद्योतनायोक्तम्॥ द्विता-द्विधा, छन्दसः। सनजा-सना नित्यं जः जननं ययोस्ते सनजे, पूर्वपदह्रस्वः, विभक्तेराकारश्छान्दसः। मेने-मन्यतेः, छान्दसम्॥

अष्टमीमृचमाह—

सनाद्दिवं परि भूमा विरूपे पुनर्भुवा युवती स्वेभिरेवैः।
कृष्णेभिरक्तोषा रुशद्भिर्वपुर्भिरा चरतो अन्यान्या॥८॥

सनात् दिवम् परि भूम विरूपे इति विऽरूपे पुनःऽभुवा युवती इति स्वेभिः एवैः कृष्णेभिः अक्ता उषाः रुशत्ऽभिः वपुःऽभिः आ चरतः अन्याऽअन्या॥

अन्तर्यागमार्गे सर्वदा एकरूपा चित्प्रकाशस्थितिर्न भवति, अहोरात्रयोर्गतिरिव पर्यायतो वर्तते दशाविशेषः, प्रभातमपि बहुकृत्वो भवतीति बहुधा गतेषु सूक्तव्याख्यानेषु रहस्यं प्रति-

पादितम्। तदिहावधेयम्। अस्यामृचि दिनमेव लक्षितं उषःशब्देनेति बोध्यम्। द्यौर्भूमिश्च स्थूलपक्षानुसारेण अहोरात्राविषयभूते एव वर्तेताम्। रहस्यं तु रात्रिति शब्दार्थत्वेनैव ग्राह्यम्। पूर्वं द्यावापृथिव्यौ विवृत्य अवस्थाप्य धारितवानिन्द्र इत्युक्तम्। अधुना तयोः पर्यायेण अहोरात्रैः परिचरणं वर्धनाय भवतीत्युच्यते॥ विरूपे विभिन्नवर्णतया पृथग्ग्राह्यरूपयुक्ते पुनर्भुवा पुनः पुनर्जायमाने पर्यायेणावर्तमाने युवती तरुण्यौ, अश्रान्तपोषकत्वद्योतनार्थमिदं विशेषणम्, एवंभूते रात्र्युषसौ दिवम् द्युलोकं भूम भूमिं च सनात् बहोः कालादारभ्य स्वेभिः स्वकीयैः एवैः गमनैः पर्याचरतः पर्यावर्तेते। तदेवाह-अक्ता रात्रिः कृष्णेभिः अन्धकारलक्षणैर्वर्णैरुपलक्षिता उषाः रुशद्भिः दीप्यमानैः वपुर्भिः शरीरभूतैः तेजोभिर्युक्ता अन्यान्या परस्परव्यतिहारेण आचरतः आवर्तेते। अहोरात्राभ्यां द्यावापृथिव्योः क्रियमाणा परिचर्या इन्द्रकृत्यस्यैव पोषयित्री पूरयित्री वेति इन्द्रस्तुताविदमुक्तम्॥

भूम-द्वितीयायाः डादेशः, हस्वश्छान्दसः। एवैः-इण् गतौ, इण्शीभ्यां वन्निति वन्-प्रत्ययः। अक्ता-नक्ता रात्रिनाम, नलोपश्छान्दसः। अन्यान्या-कर्मव्यतिहारे सर्वनाम्नो द्वे भवतः, समासवच्च बहुलमिति द्विर्भावः॥

नवमीमृचमाह—

सनेमि सख्यं स्वपस्यमानः सूनुर्दाधार शवसा सुदंसाः।
आमासु चिद्दधिषे पक्वमन्तः पयः कृष्णासु रुशद्रोहिणीषु॥९॥

सनेमि सख्यम् सुऽअपस्यमानः सूनुः दाधार शवसा सुऽदंसाः आमासु चित् दधिषे पक्वम् अन्तरिति पयः कृष्णासु रुशत् रोहिणीषु॥

अस्यामृचि किमपि रहस्यमेव परोक्षवचनेनावेदितमिति सुधियां स्पष्टं स्यात्। किं तत्? यजमाने सख्यं दधानो जात इन्द्रोऽतिबलः सुकर्मा अपरिपक्वेष्वपि गोशब्दसंकेतदेषु चिद्रश्मिषु अन्तःपक्वं अमृतं धत्ते। ताश्च चिद्रश्मिप्रतिपादिकाः गावः 'कृष्णासु' रात्रिषु दशाविशेषेषु, 'रोहिणीषु' प्रभातावद्योतकलोहितवर्णासु उषःसु दशाभेदेषु च, अन्तः 'पयः' अमृतं धरन्त्येव। तथा अपक्वास्वप्याधारभूतासु गोषु वर्तमानं अमृतं पक्वं यथा भवति तथा धत्ते भगवानिन्द्रः। स्थूलार्थानुसारेण तात्पर्ये भाववैशिष्ट्यं मृग्यमिति किमु वक्तव्यम्? अथ शब्दार्थो भवति। स्वपस्यमानः स्वपः शोभनं कर्म तदिच्छन्, सूनुः पुत्रः, यजमानार्थं जातः शवसा दीप्तेन बलेन

सुदंसाः शोभनकर्मा सनेमि पुराणं सख्यम् यजमाने सखित्वं दाधार दधार धारयति, पोषयति। आमासु चित् आर्द्रासु अपरिपक्वासु अपि गोषु अन्तः मध्ये पक्वम् परिपक्वं पयः दुग्धं अमृतं दधिषे धारयसि। तथा कृष्णासु कृष्णवर्णासु रोहिणीषु लोहितवर्णासु गोषु च रुशत् दीप्यमानं पयः धारयसि हे इन्द्र ॥ पक्वम्-पचो वः इति निष्ठातकारस्य वत्वम् ॥

दशमीमृचमाह—

सनात्सनीळा अवनीरवाता व्रता रक्षन्ते अमृताः सहोभिः।
पुरू सहस्रा जनयो न पत्नीर्दुवस्यन्ति स्वसारो अह्रयाणम् ॥१०॥

सनात् सऽनीळाः अवनीः अवाताः व्रता रक्षन्ते अमृताः सहःऽभिः
पुरु सहस्रा जनयः न पत्नीः दुवस्यन्ति स्वसारः अह्रयाणम् ॥

सनात् चिरकालादारभ्य सनीळाः समानवासस्थानाः, अपामेव स्रसृगां जामीनां सनाभित्वं उद्घोषितं सर्वत्र वेदे। अवनयः अङ्गुलय इति कर्मपरार्थसाधनाय यास्कमुदाहरति सायणः, अङ्गुलीनां एकपाण्यवस्थानात् 'सनीळा' इत्युपपादयति। अवाताः वातं गमनं तद्रहिताः निष्कम्पाः दृढा इत्यर्थः, अवनीः अवनयः रक्षणहेतुभूताः अमृताः मृतेरहिताः अक्षय्या इत्यर्थः एवंभूताः स्वसारः सहजन्मानः दिव्याः शक्तयः सहोभिः स्वकीयैर्बलैः पुरु सहस्रा असंख्यातानि व्रता व्रतानि कर्माणि, इन्द्रेण यजमानाय कृतानि क्रियमाणानि च रक्षन्ते पालयन्ति, अपि च ताः पत्नीः पत्न्यः पालयित्र्यः अह्रयाणम् अह्रीयानं प्रगल्भगतिकं इन्द्रं जनयो न देवपत्न्य इव दुवस्यन्ति परिचरन्ति ॥ अवनीः-अवतेः, करणे अनिप्रत्ययः। दुवस्यन्ति-परिचरणकर्मा दुवस्यतिः। अह्रयाणम्-ह्री लज्जायां, श्लोरभावश्छान्दसः, व्यत्ययेन शानच् इत्येकः पक्षः। अहं इति ह्रीरहितमित्यर्थे छान्दसः प्रयोगः, तथाभूतं यानं गमनं यस्य तम्। अह्रयाणोऽह्रीयान इति यास्कः ॥

इति प्रथमस्य पञ्चमे द्वितीयो वर्गः

एकादशीमृचमाह—

सनायुवो नमसा नव्यो अर्कैर्वसूयवो मतयो दस्म ददुः।
पतिं न पत्नीरुशतीरुशन्तं स्पृशन्ति त्वा शवसावन्मनीषाः ॥११॥

सनाऽयुवः नमसा नव्यः अर्कैः वसुऽयवः मतयः दस्म ददुः पतिम् न पत्नीः उशतीः उशन्तम् स्पृशन्ति त्वा शवसाऽवन् मनीषाः ॥

हे दस्म दर्शनीयेन्द्र, उचितोऽत्र सौन्दर्यार्थः, उक्तार्थे उशतीरुशन्तमिति श्रवणात् । अर्कैः मन्त्रैः नमसा नमस्कारेण, सर्वथा प्रपदनेन यस्त्वं नव्यः स्तुत्यो भवसि, तं त्वां सनायः सनेत्यव्ययं नित्यत्वार्थे, नित्यं वस्तु नित्यत्वं वा आत्मन इच्छन्तः वसूयवः वसु सच्चात्मकं धनमात्मन इच्छन्तः मतयः मन्तारो ध्यातारो मेधाविनः ददुः प्रयासेन जग्मुः, त्वयि सक्ता भवन्तीत्यर्थः, द्रापिर्गत्यर्थः । हे शवसावन् बलवन्निन्द्र, मनीषाः मनस ईषयित्र्यः बुद्धयः, तल्लक्षिताः स्तुतयो वा त्वा त्वां स्पृशन्ति, त्वयि लगन्तीत्यर्थः । अत्र दृष्टान्तः-उशतीः उशत्यः कामयमानाः पत्नीः पत्न्यः उशन्तम् कामयमानं पतिम् न यथा भर्तारं संभजन्ते तद्वत् ॥ सनायुवः-सना सनातनं वस्तु कर्म ज्ञानं वा आत्मन इच्छन्ति, क्याच्छन्दसीत्युप्रत्ययः, जसि वर्णव्यत्ययेन उत्वम् । मतयः-मन ज्ञाने, क्तिच् । ददुः-ददातिर्गत्यर्थः, लिट् । उशतीः-वश कान्तौ, लटः शतृ । शवसावन्-मतुपि आत्मोपजनश्छान्दसः ॥

द्वादशीमृचमाह—

सनादेव तव रायो गभस्तौ न क्षीयन्ते नोप दस्यन्ति दस्म ।
द्युमाँ असि क्रतुमाँ इन्द्र धीरः शिक्षा शचीवस्तव नः शचीभिः ॥१२॥
सनात् एव तव रायः गभस्तौ न क्षीयन्ते न उप दस्यन्ति दस्म
द्युऽमान् असि क्रतुऽमान् इन्द्र धीरः शिक्ष शचीऽवः तव नः शचीभिः ॥

हे दस्म, दर्शनीयेन्द्र, तव गभस्तौ तव हस्ते सनादेव चिरकालादेव स्थितानि रायः धनानि न क्षीयन्ते न क्षयमाप्नुवन्ति अक्षयाणि हि इन्द्रधनान्यलौकिकानि । नोपदस्यन्ति नोपक्षयं गच्छन्ति, भक्तेभ्यो दत्तेष्वपि तेषु धनेषु नोपक्षयं प्राप्नुवन्ति, न ह्रासं गच्छन्ति । हे इन्द्र, धीरः धीमान् त्वं द्युमान् असि दीप्तिमान् भवसि, तथा क्रतुमान् प्राज्ञदृढसंकल्पयुक्तो भवसि । हे शचीवः, शचीयुक्त, शक्तिमन् तव शचीभिः त्वदीयाभिः शक्तिभिः नः अस्मान् शिक्ष शिक्षय ग्राहय वेदितव्यानिति शेषः । शिक्ष-शिक्ष विद्योपादाने, अन्तर्भावितण्यर्थः, शिक्ष धनं देहीति सायणः ॥

त्रयोदशीमृचमाह—

सनायते गोतम इन्द्र नव्यमतक्षद् ब्रह्म हरियोजनाय ।
सुनीथाय नः शवसान नोधाः प्रातर्मक्षू धियावसुर्जगम्यात् ॥१३॥
सनाऽयते गोतमः इन्द्र नव्यम् अतक्षत् ब्रह्म हरिऽयोजनाय सुऽनीथाय नः शवसान नोधाः प्रातः मक्षु धियाऽवसुः जगम्यात् ॥

सनायते सनायमानाय नित्य इवाचरते, सनेति निपातो नित्यशब्दसमानार्थः, क्यङि व्यत्ययेन शतृ, हरियोजनाय हर्योः अश्वयोः योजनं योगो यस्य तस्मै हरिनामकाश्वयुक्ताय सुनीथाय सुष्ठु नेत्रे, एवंभूताय तुभ्यं हे इन्द्र, शवसान बलवन्, गोतमः गोमत्तमः, गोतमस्यर्षेः पुत्रो वा नोधाः नवनं स्तोत्रं दधानः, नोधःसंज्ञक ऋषिः नव्यम् नूतनं ब्रह्म मन्त्रात्मकं एतत् सूक्तं नः यजमानलोकायेत्यर्थः अतक्षत् अकरोत् । प्रातर्मक्षू इत्यादि व्याख्यातम् ॥ सुनीथाय—नयतेः औणादिकः थक् ॥

इति प्रथमस्य पञ्चमे तृतीयो वर्गः

एकादशेऽनुवाके 'त्वं महाँ' इति नवर्चं षष्ठं सूक्तम् । नोधस आर्षं त्रैष्टुभमैन्द्रम् ॥

तत्र प्रथमामृचमाह—

त्वं महाँ इन्द्र यो ह शुष्मैर्द्यावा जज्ञानः पृथिवी अमे धाः ।
यद्ध ते विश्वा गिरयश्चिदभ्वा भिया दृळ्हासः किरणा नैजन् ॥१॥
त्वम् महान् इन्द्र यः ह शुष्मैः द्यावा जज्ञानः पृथिवी इति अमे धाः यत् ह ते विश्वा गिरयः चित् अभ्वा भिया दृळ्हासः किरणाः न ऐजन् ॥

हे इन्द्र, त्वम् महान् प्रभावेण सर्वाधिकोऽसि । यो ह यः खलु शुष्मैः स्वकीयैः बलैः जज्ञानः प्रादुर्भूतः सन् द्यावा पृथिवी द्यावापृथिव्यौ अमे स्वीये बले धाः अधारयः । ऊर्ध्वाधरचित्कक्ष्याभूमी द्यावापृथिव्यौ सुप्रतिष्ठे विधत्ते यजमानाय प्रादुर्भावमात्रेणेन्द्र इति तत्त्वम् । किञ्च, यत् ह ते यस्य खलु तव संबन्धिन्या भिया भीत्या विश्वा सर्वाणि भूतजातानि गिरयश्चित् शिलोच्चयाश्च अभ्वा बलेन महान्ति यान्यन्यानि सन्ति तानि च दृळ्हासः उक्ताः सर्वे दृढा अपि

ऐजन् अकम्पन्त, कम्पन्ते इति सार्वकालिकं तत्त्वम्। तत्र दृष्टान्तः-किरणाः न कीर्यमाणाः विक्षेप्यमाणा रश्मयो यथा कम्पन्ते तद्वत्, रेणव इव कम्पन्ते दृढान्यपि वस्तूनीत्यर्थः। इन्द्रबलेन भयात् रोदस्योः कम्पः पृथिव्याः दृढीकरणं दिवः स्तम्भनमित्येवंजातीयकं इन्द्रमहिमानुवर्णनं विशेषतो योजयतीयमुक्ते द्रष्टव्यम् (२.१२)॥ जज्ञानः-जनी प्रादुर्भावे, लिटः कानच्। द्यावापृथिवी-समासमध्ये पाठश्छान्दसः। अम्भा-महन्नाम, बलमहत्त्वे प्रयोगः। किरणाः-कृ विक्षेपे, क्युप्रत्ययः। ऐजन्-एजृ कम्पने, लङ्॥

द्वितीयामृचमाह—

आ यद्धरी इन्द्र विव्रता वेरा ते वज्रं जरिता बाह्वोर्धात्।
येनाविहर्यतक्रतो अमित्रान्पुर इष्णासि पुरुहूत पूर्वीः॥२॥

आ यत् हरी इति इन्द्र विऽव्रता वेः आ ते वज्रम् जरिता बाह्वोः धात् येन अविहर्यतऽक्रतो इत्यविहर्यतऽक्रतो अमित्रान् पुरः इष्णासि पुरुऽहूत पूर्वीः॥

हे इन्द्र, यत् यदा विव्रता विशिष्टकर्माणौ हरी अश्वौ त्वदीयौ आवेः आगमयसि रथे योजनाय, तदा जरिता स्तोता ते तव बाह्वोः हस्तयोः वज्रम् आयुधम्, अद्रिभिदं शत्रुच्छिदं आ धात् अधात्, स्तोतुः स्तोत्रेण वज्रं ते हस्तगतं कर्मणे सिद्धं भवति। तादृशः स्तोत्रप्रभाव इन्द्रप्रोत्साहनपटुः। हे अविहर्यतक्रतो, अभिलषितकर्मन्, हर्यतिः प्रेप्साकर्मेति यास्कः, हर्य गतिकान्त्योः, कान्तिरभिलाषः विहर्यतः अनभिलषितः अविहर्यतः अभिलषितः इति सायणः, एवं उभयथापि प्रेप्सितकर्मा अभिलषितकर्मा वा एकार्थ एव भवति शब्दः। अविहर्यत इत्यत्र हर्यतिक्रियायाः प्रतिषेधद्वयेन क्रूरमपि शत्रुवधादिकर्म प्रेप्सितं एवेत्यवधार्यते। अत्रैके नञर्थ एक एव भवति, वि इत्युपसर्गो विशिष्टार्थे ग्राह्य इति कृत्वा अनभिलषितकर्मा इन्द्रः, शत्रूणामिन्द्रस्य कर्म नेष्टमित्याहुः। सकृदेव प्रयोगोऽस्य, तस्माद् दुर्निर्णेयार्थः। तथाभूतेन्द्र, अमित्रान् शत्रून् येन वज्रेण इष्णासि अभिगच्छसि, हे पुरुहूत बहुभिराहूत, पूर्वीः बह्वीः पुरः पुर्यः, असुरपुराणि भेत्तुं अभिगच्छसि, तद्वज्रं जरिता बाह्वोरधादिति संबन्धः॥ विव्रता-विशिष्टं व्रतं कर्म ययोस्तौ विव्रतौ। वेः-वी गत्यादिषु, अदादिः, लङ्। धात्-दधातेः लुङ्। इष्णासि-आभीक्ष्ण्ये आविकरणी इषधातुः, अत्र गत्यर्थः॥

तृतीयामृचमाह—

त्वं सत्य इन्द्र धृष्णुरेतान्त्वमृभुक्षा नर्यस्त्वं षाट् ।
त्वं शुष्णं वृजने पृक्ष आणौ यूने कुत्साय द्युमते सचाहन् ॥३॥
त्वम् सत्यः इन्द्र धृष्णुः एतान् त्वम् ऋभुक्षाः नर्यः त्वम् षाट् त्वम् शुष्णम् वृजने पृक्षे आणौ यूने कुत्साय द्युऽमते सचा अहन् ॥

हे इन्द्र, त्वम् सत्यः ध्रुवः, अव्यभिचरितकर्मेत्यर्थः, 'सत्सु भवः सर्वोत्कृष्टः' इति सायणः। एतान् एतेषां शत्रूणां, विभक्तिव्यत्ययः, त्वम् धृष्णुः धर्षयिता ऋभुक्षाः ऋभूणां अधिपतिः, ऋभुषु दिव्यशिल्पिषु इन्द्रसहकारिषु कृतनिवासो वा, नर्यः नृभ्यो हितः त्वम् षाट् साहयिता, शत्रूणामभिभविता असि। किञ्च, वृजने वर्जनयुक्ते हिंसनयुक्ते पृक्षे संपर्चनीये वीर्यैः प्राप्तव्ये आणौ संग्रामे, द्युमते दीप्तिमते यूने तरुणाय कुत्साय एतत्संज्ञकाय ऋषये, प्रागुक्तलक्षण-प्रतिमानभूताय ऋषये सचा त्वं सहायो भूत्वा शुष्णम् शोषयितारमसुरम् अहन् अवधीः ॥ ऋभुक्षाः—ऋभवो विचारिताः (१.२०), क्षयतिरैश्वर्यकर्मा, तेषामीष्टे इति ऋभुक्षाः, क्षि निवासे, ऋभुषु क्षियति निवसतीति वा। षाट्—सह अभिभवे, छन्दसि सह इति केवलादपि ण्विः, षत्वं छान्दसम् ॥

चतुर्थीमृचमाह—

त्वं ह त्यदिन्द्र चोदीः सखा वृत्रं यद्वज्रिन्वृषकर्मन्नुभ्नाः ।
यद्ध शूर वृषमणः पराचैर्वि दस्युँर्योनावकृतो वृथाषाट् ॥४॥
त्वम् ह त्यत् इन्द्र चोदीः सखा वृत्रम् यत् वज्रिन् वृषऽकर्मन् उभ्नाः
यत् ह शूर वृषऽमनः पराचैः वि दस्यून् योनौ अकृतः वृथाषाट् ॥

हे इन्द्र, त्वम् ह त्वं खलु सखा सहायः सन् कुत्सस्य, त्यत् तत् प्रसिद्धं अनिर्वाच्यं दिव्यं धनं चोदीः प्रेरितवान्सि। हे वृषकर्मन् तेजोबलादिसेचनकर्मयुक्त, वज्रिन् वज्रवन्, वृत्रम् आवरीतारं सर्वस्या ज्योतिरादेर्दिव्यस्य धनस्य, अत एव यज्ञमान प्रतिमानभूतकुत्सस्य शत्रु यत् यदा उभ्नाः अहिंसीः, अपि च हे शूर, वृषमनः दिव्यधनाभिवर्षकमनोयुक्तेन्द्र, वृथाषाट् अनायासेन अभिभविता शत्रूणां, त्वं यत ह यदा खलु योनौ स्वावासमूलस्थाने दस्यून्

उपक्षपयितॄन् वृत्रबान्धवान् परावैः परागमनैः व्यकृतः पराङ्मुखा यथा भवन्ति तथा व्यच्छिनः, तदानीं कुत्सः प्राप्तव्यं सर्वं प्राप्नोदित्यर्थः ॥ चोदीः—चुद प्रेरणे, लुङ् । उभाः—तुभ हिंसायां क्रैयादिकः, तलोपश्छान्दसः । परावैः—अव्ययं नीचैरर्थे चैरिति दिते भट्टभास्करमुदाहरति सायणः, परावैः परागमनैरिति यास्कः । अकृतः—कृती छेदने, लङ्, नुमागमाभावश्छान्दसः ॥

पञ्चमीमृचमाह—

त्वं ह त्यदिन्द्रारिषण्यन्दृळहस्य चिन्मर्तानामजुष्टौ ।
व्य१स्मदा काष्ठा अर्वते वर्घनेव वज्रिञ्छ्नथिह्यमित्रान् ॥५॥
त्वम् ह त्यत् इन्द्र अरिषण्यन् दृळहस्य चित् मर्तानाम् अजुष्टौ वि अस्मत् आ काष्ठाः अर्वते वः घनाऽइव वज्रिन् श्नथिहि अमित्रान् ॥

हे इन्द्र, त्वम् ह त्वं खलु मर्तानाम् मनुष्याणां मध्ये यस्मिन् कस्मिन् वा अजुष्टौ अप्रीतौ सत्यां, त्यत् तस्य, विभक्तिव्यत्ययः, दृढस्य चित् अप्रह्वस्यापि तदाप्रियकारिणः शत्रुवत् स्थितस्यापीत्यर्थः अरिषण्यन् रेषणं हिंसनमिच्छन्नसि । सर्वानुग्रहवाक्यस्य देवराजस्य तवैष स्वभावः । तथापि ऋषीणां कुत्सादीनां तु साहाय्यं करोष्येव, तस्मात्, अस्मत् तव प्रियाणां यजमानानां कुत्स्यमानानामस्माकं, न तु 'मर्तानां' केवलानां, अर्वते अध्वाय गन्तुं काष्ठाः दिशः आ विवः समन्ताद् विवृताः कुरु, यथा सर्वासु दिक्षु अस्मदीया आपः भोगक्रियासमर्थ-प्राणबलात्मानः निःप्रतिरोधं गच्छन्ति व्याप्नुवन्ति तथा कुरु । अपि च हे वज्रिन् वज्रवन्, अमित्रान् तत्र दिक्षु व्यावृतान् शत्रून् घना इव घनेन कठिनेन दण्डादेनेव वज्रेण श्नथिहि श्नथय जहि ॥ रिषण्यन्—रिष्टशब्दात् क्यच्, रिषण्भावो निपातितः ॥

इति प्रथमस्य पञ्चमे चतुर्थो वर्गः

षष्ठीमृचमाह—

त्वां ह त्यदिन्द्रार्णीसातौ स्वर्मीळ्हे नर आजा हवन्ते ।
तव स्वधाव इयमा समर्य ऊतिर्वाजेष्वतसाय्या भूत् ॥६॥
त्वाम् ह त्यत् इन्द्र अर्णीऽसातौ स्वःऽमीळ्हे नरः आजा हवन्ते तव स्वधाऽवः इयम् आ सऽमर्ये ऊतिः वाजेषु अतसाय्या भूत् ॥

हे इन्द्र, अर्णसातौ अर्णसां अपां सातिर्लाभो यस्मिन्, स्वर्मीळ्हे स्वः आदित्यलक्षितं तेजः तस्य मीळ्हं सेचनं वर्षणं यस्मिन् तस्मिन् आजा आजौ युद्धे त्यत् तं प्रसिद्धं त्वा इ ह त्वामेव नरः नेतारः पुरुषाः हवन्ते आह्वयन्ति। हे स्वधावः स्वधाशब्दवाच्यस्वधारणसहजसामर्थ्ययुक्त, समर्ये सम्यगरणीये प्रयत्नेन गन्तव्ये सङ्ग्रामे तव इयम् ऊतिः त्वदीयेयं रक्षा आ भूत् अस्मदाभिमुख्येन भवतु, यैषा रक्षा वाजेषु समृद्धिषु लब्धव्यासु अतसाय्या प्राप्तव्या भवति॥ अर्णसातौ-अर्णेरसुन्प्रत्ययो नुडागमश्च, छन्दसि सलोपः। स्वधावः-मतुवसो रुः इति मतुपो रुत्वम्। अतसाय्या-अत सातत्यगमने, औणादिकः साय्यप्रत्ययः॥

सप्तमीमृचमाह—

त्वं ह त्यदिन्द्र सप्त युध्यन्पुरो वज्रिन्पुरुकुत्साय दर्दः।
बर्हिर्न यत्सुदासे वृथा वर्गंहो राजन्वरिवः पूरवे कः॥७॥

त्वम् ह त्यत् इन्द्र सप्त युध्यन् पुरः वज्रिन् पुरुऽकुत्साय दर्दरितिं दर्दः
बर्हिः न यत् सुऽदासे वृथा वर्क् अंहोः राजन् वरिवः पूरवे करितिं कः॥

हे वज्रिन् वज्रवन्, इन्द्र, पुरुकुत्साय एतत्संज्ञकाय ऋषये युध्यन् तच्छत्रुभिः सह युद्धं कुर्वन् त्वम् ह त्वमेव त्यत् ताः सप्त पुरः सप्त असुरपुराणि दर्दः व्यदारयः॥ ऐतिहासिकः पुरुकुत्स ऋषिः। रहस्यं तु, कुत्सवत् पुरुकुत्सोऽपि इन्द्रसख्यास्पदम्, प्रतिमानभूतो बहुलभागः कुत्स एव, पुरुशब्दो बह्वर्थकः स्मार्यः। तादृशस्य यजमानस्यैषः शत्रवः असुरा एव। तेषां पुराणि सप्त अभैत्सीदिन्द्रः। अत्रेदमवधेयम्। यद्यपि सप्ततन्त्रानुसारेण अपरार्धगतत्रिलोक्यामेव असुराणां पुराणि भवन्ति, देवैः सह तेषां युद्धानि संभवन्ति, तथापि अपरार्धे एकैकस्मिन् लोके सप्त उपकक्ष्याः वर्तन्ते, ताश्च भूरादिसत्यलोकान्तर्गतमहाकक्ष्यांशभूता अपि, अंशभूयस्त्वन्यायेन अत्रप्रागमनःसंबन्धिन्यस्तत्तद्भूमिकागताः ज्ञेयाः, असुराणां पुराणि एवं सप्त कथितानि मध्यमस्थाने प्राणमये लोके इति बोध्यम्, यद्यपि त्रैलोक्याक्रमणपटवः भवन्ति वृत्रादयः, तेषां वृत्तिवैशिष्ट्यं मध्यमस्थाने॥ अथ यत् सुदासे एतत्संज्ञकाय, रहस्यं तु शोभनदानप्रतीताय प्रतिमानभूताय यजमानाय, अंहोः एतत्संज्ञकस्य असुरस्य, पापात्मनः संबन्धि यद्बलमस्ति तत् वृथा अनायासेन बर्हिर्न वर्क् बर्हिरिव अवृणक् अच्छिनः। अपि च हे राजन् इन्द्र, पूरवे दानेन पूरयित्रे सुदासे वरिवः विशालाकाशदानात्मकं सुखं कः अकार्षीः॥ दर्दः-दृ विदारणे, यङ्लुगन्ताल्लङ्, अन्यत् छान्दसम्। वर्क्-वृजी वर्जने, लङ्, विकरणस्य लुक्। अन्ये गताः॥

अष्टमीमृचमाह—

त्वं त्यां न इन्द्र देव चित्रामिषमापो न पीपयः परिज्मन् ।
यया शूर प्रत्यस्मभ्यं यंसि त्मनमूर्जं न विश्वध क्षरध्यै ॥८॥
त्वम् त्याम् नः इन्द्र देव चित्राम् इषम् आपः न पीपयः परिऽज्मन्
यया शूर प्रति अस्मभ्यम् यंसि त्मनम् ऊर्जम् न विश्वध क्षरध्यै ॥

हे देव द्योतमान, इन्द्र, त्वम् नः अस्माकं चित्राम् नानाविधां त्याम् तां प्रसिद्धां त्वदीयां दिव्यां इषम् एषणाशक्तिं प्रेरणाबलमित्यर्थः परिज्मन् परितो व्याप्ते प्रदेशे पीपयः प्रावर्धयः । तत्र दृष्टान्तः—आपो न जलानि यथा सर्वतः प्रयासवर्जं व्याप्नुवन्ति करोषि, तथा अस्माकं एषणाशक्तिमपि अनुगृह्य अस्मत्तः सर्वतःप्रसारां विहितवानसि, तथा सर्वदा विधेर्हीत्यर्थः । तामेव चित्रां इषं उत्तरवाक्येन विशिनष्टि । हे शूर इन्द्र, यया इषा त्मनम् आत्मानं जीवं अस्मभ्यम् प्रति यंसि प्रयच्छसि । तत्र दृष्टान्तः—विश्वध विश्वतः क्षरध्यै क्षरितुं ऊर्जम् न शक्तिप्रवाहमिव, ऊर्जमुदकनामेति पक्षोऽपि न बाधते तात्त्विकं तात्पर्यम् । शक्तिप्रवाहं उदकाने वा सर्वत्र क्षरणाय सृजसि, तथा एषणाबलेनास्मभ्यं जीवमात्मानं धत्से इति भावः ॥ आपः—अपः, दीर्घश्छान्दसः । पीपयः—स्फायी ओप्यायी वृद्धौ, ण्यन्तात् छान्दसे लुङि प्यायः पीभावः । परिज्मन्—परिपूर्वात् जमतेर्गत्यर्थात्, सप्तम्या लुक् । विश्वध—तसिलः सलोपो धत्वं च पृषोदरादित्वात् । क्षरध्यै—क्षर सञ्चलने, तुमर्थे अध्यैन्प्रत्ययः । अन्ये गताः ॥

नवमीमृचमाह—

अकारि त इन्द्र गोतमेभिर्ब्रह्माण्योक्ता नमसा हरिभ्याम् ।
सुपेशसं वाजमा भरा नः प्रातर्मक्षू धियावसुर्जगम्यात् ॥९॥
अकारि ते इन्द्र गोतमेभिः ब्रह्माणि आऽउक्ता नमसा हरिऽभ्याम्
सुऽपेशसम् वाजम् आ भर नः प्रातः मक्षु धियाऽवसुः जगम्यात् ॥

हे इन्द्र, ते तुभ्यं गोतमेभिः ऋषिभिः एतत्संज्ञकैः अस्माभिः गोमत्तमैः, गन्तृतमैरिति सायणः, अकारि कृतं स्तोत्रम् । ब्रह्माणि मन्त्रजातानि नमसा नमःशब्दवाच्यप्रपदनेन सह हरिभ्याम् अश्वाभ्यां युक्ताय तुभ्यं आऽउक्ता आकारो मर्यादायां, यथाविधि प्रयुक्तानि भवन्ति ।

इदानीं त्वं नः अस्मभ्यं सुपेशसम् नानाशोभनरूपयुक्तां वाजम् समृद्धिं आ भर आहर, प्रयच्छ। प्रातरादि शिष्टं व्याख्यातम् ॥

इति प्रथमस्य पञ्चमे पञ्चमो वर्गः

एकादशेऽनुवाके सप्तमं 'वृष्णे शर्धाये'ति पञ्चदशर्चं सूक्तम् नोधस आर्षम् मारुतम्। अन्त्या त्रिष्टुप्, शिष्टाश्चतुर्दश जगत्यः ॥

तत्र प्रथमामृचमाह—

वृष्णे शर्धाय सुमखाय वेधसे नोधः सुवृक्तिं प्र भरा मरुद्भ्यः।
अपो न धीरो मनसा सुहस्त्यो गिरः समञ्जे विदथेष्वाभुवः ॥१॥
वृष्णे शर्धाय सुऽमखाय वेधसे नोधः सुऽवृक्तिम् प्र भर मरुत्ऽभ्यः
अपः न धीरः मनसा सुऽहस्त्यः गिरः सम् अञ्जे विदथेषु आऽभुवः ॥

अत्र पूर्वार्धेन स्वात्मन एव नोधसः संबोधनम्। उत्तरार्धेन नोधाः स्तौति। हे नोधः, नवनं दधान, स्तोतः, वृष्णे वर्षित्रे सुमखाय शोभनयजनाय वेधसे विधात्रे मरुद्भ्यः शर्धाय मरुतां गणाय, मरुद्भ्य इति विभक्तिव्यत्ययः, सुवृक्तिम् सुष्ठु आवर्जकं स्तोत्रं प्र भर प्रकर्षेण हर, प्रेरय। एवं प्रेरितो नोधाः स्तौति, धीरः धीमान् सुहस्त्यः शोभनाङ्गुलियुक्तः कृताञ्जलिबन्धः सर्वथा प्रह्व इति यावत्, एवंभूतोऽहं मनसा मत्या अन्तःकरणेन गिरः स्तोत्रात्मिकाः वाचः समञ्जे सम्यग्व्यक्ताः करोमि, स्तोत्रात्मिकाः स्तोतुर्धियः वाग्रूपाविष्कारे हि पूर्णतां यान्ति। याः गिरः विदथेषु ज्ञानैकगम्येषु यजनसदनेषु आ भुवः आभिमुख्येन भवन्ति, देवताभिमुखीकरणाय कल्पन्ते। तत्र दृष्टान्तः—अपो न यथा आपः निरर्गलं क्षरन्ति तथा मे स्तुतयोऽपि प्रवर्तमानाः प्रयुक्ता भवन्ति ॥ शर्धाय—शृधु प्रसहने, शर्ध्यते प्रसह्यते पर्वतादिकमनेनेति शर्धः मरुत्समूहः, करणे घञ्। सुहस्त्यः—हस्ते भवा हस्त्याः, शोभना हस्त्या यस्यासौ ॥

द्वितीयामृचमाह—

ते जज्ञिरे दिव ऋष्वास उक्षणो रुद्रस्य मर्या असुरा अरेपसः।
पावकासः शुचयः सूर्या इव सत्वानो न द्रप्सिनो घोरवर्पसः ॥२॥
ते जज्ञिरे दिवः ऋष्वासः उक्षणः रुद्रस्य मर्याः असुराः अरेपसः पावकासः
शुचयः सूर्याःऽइव सत्वानः न द्रप्सिनः घोरऽवर्पसः ॥

ते मरुतः दिवः अन्तरिक्षात्, मध्यमस्थानात् जज्ञिरे प्रादुर्भूताः। मरुतोऽधिकृत्य, 'मरुतः पृश्निमातरः' इत्यत्रोपन्यस्तम्, अन्यत्र च (१.२३.१०)। कीदृशाः? ऋष्वासः उत्कृष्टाः उक्षणः सेक्तारः वर्षितारः रुद्रस्य मर्याः मर्यो मनुष्यवाची, अत्र पुत्रोपलक्षणं, रुद्रसूनवः, असुराः निरसितारः शत्रूणाम्, अरेपसः पापवर्जिताः पावकासः शोधकाः सूर्या इव सुष्ठु प्रेरकाः सूर्यरश्मय इव शुचयः दीप्ताः सत्वानः न अतिशयेन बलपराक्रमोपेताः भूतगणा इव द्रप्सिनः द्रप्सो बिन्दुः, ध्वजे च वर्तते (१.१४.४) धीप्राणशक्तिवर्षबिन्दुयुक्ताः घोरवर्पसः भयङ्कररूपाः॥ सत्वानः-अवसादनार्थात् सीदतेः तुट् विधीयते, सत्वन्शब्दस्य प्रथमाबहुवचनम्। अन्ये गताः॥

तृतीयामृचमाह—

युवानो रुद्रा अजरा अभोग्घनो ववक्षुरध्रिगावः पर्वता इव।
दृळ्हा चिद्विश्वा भुवनानि पार्थिवा प्र च्यावयन्ति दिव्यानि मज्मना॥३॥
युवानः रुद्राः अजराः अभोक्ऽहनः ववक्षुः अध्रिऽगावः पर्वताःऽइव दृळ्हा चित् विश्वा भुवनानि पार्थिवा प्र च्यवयन्ति दिव्यानि मज्मना॥

युवानः यौवनसम्पन्नाः रुद्राः उग्राः, रुद्रविभूतयो वा अजराः जरारहिताः अभोग्घनः ये देवान् न भोजयन्ति तेषां यज्ञशत्रूणां अयज्वनां हन्तारः अध्रिगावः अधृतगमनाः, येषां गतयो न केनापि निवारिता भवन्ति त इत्यर्थः पर्वता इव स्थिराः स्वयं क्षोभरहिताः ववक्षुः स्तोतॄणाममीष्टं वोढुं प्रापयितुमिच्छन्ति। किञ्च, विश्वा भुवनानि सर्वाणि सद्भावं प्राप्तानि पार्थिवा पृथिव्यां भवानि दिव्यानि दिवि भवानि वा वस्तूनि दृळ्हा चित् दृढान्यपि मज्मना शोधकेन स्वीयबलेन प्रच्यावयन्ति प्रचालयन्ति, एतावान् मारुतबलमहिमा॥ अभोग्घनः-भोजयन्तीति भोजः, न भोजः अभोजः, अभोजां हन्तारः अभोग्घनः, बहुलं छन्दसि, हन्तेः क्विप्। ववक्षुः-वह प्रापणे, अस्मात् सनि लिट्, द्विर्भावः, अन्यत् छान्दसम्॥

चतुर्थीमृचमाह—

चित्रैरञ्जिभिर्वपुषे व्यञ्जते वक्षःसु रुक्माँ अधि येतिरे शुभे।
अंसेष्वेषां नि मिमृक्षुरृष्टयः साकं जज्ञिरे स्वधया दिवो नरः॥४॥
चित्रैः अञ्जिऽभिः वपुषे वि अञ्जते वक्षःऽसु रुक्मान् अधि येतिरे शुभे

अंसेषु एषाम् नि मिमृक्षुः ऋष्टयः साकम् जज्ञिरे स्वधया दिवः नरः ॥

वपुषे शरीराय, मरुतः चित्रैः विविधैः अञ्जिभिः रूपाभिव्यञ्जकैरलङ्कारैः व्यञ्जते स्वीयरूपाणि व्यक्तानि कुर्वन्ति। वक्षःसु भुजान्तरेषु रुक्मान् रोचमानान् हारान् अधि येतिरे उपरि चक्रिरे, किमर्थम्? शुभे, शोभार्थम्, अथ च एषां मरुतां अंसेषु स्कन्धेषु ऋष्टयः आयुधानि नि मिमृक्षुः निमृष्टाः परिष्कृताः तस्थुः। साकम् तैरायुधैः सहिताः नरः नेतारो बलिनो मरुतः दिवः अन्तरिक्षलोकात् स्वधया स्वभावसिद्धया शक्त्या जज्ञिरे प्रादुर्बभूवुः ॥ अत्रेदमवधेयम्। यद्यपि अत्रोक्ताः प्रचण्डकर्मणामलङ्कारा विद्युदादय इत्यधुनातनानां मतं सायणीयव्याख्याबलमीषदवलम्ब्य ऊहमात्रमवतिष्ठते, मन्त्रद्रष्टारस्त्वन्यथा गायन्ति। एतानि रहस्यानि धीरस्यैव विदितानीति, न कोऽपि मरुतां जन्मरहस्यं वेदेत्यादि, विशेषतो वसिष्ठसूक्ते (७.५६) 'नकिर्ह्येषां जनूंषि वेद' 'एतानि धीरो निण्या चिकेत' इत्यादि ॥ येतिरे-यती प्रयत्ने, लिट्। शुभे-शुभ दीप्तौ, सम्पदादिलक्षणः क्विप्। मिमृक्षुः-मृजू शुद्धौ, सनि लिट्। जज्ञिरे-जनी प्रादुर्भावे, लिट्॥

पञ्चमीमृचमाह—

ईशानकृतो धुनयो रिशादसो वातान्विद्युतस्तविषीभिरक्रत।
दुहन्त्यूधर्दिव्यानि धूतयो भूमिं पिन्वन्ति पयसा परिज्रयः ॥५॥
ईशानऽकृतः धुनयः रिशादसः वातान् विऽद्युतः तविषीभिः अक्रत
दुहन्ति ऊधः दिव्यानि धूतयः भूमिम् पिन्वन्ति पयसा परिऽज्रयः ॥

ईशानकृतः स्तोतारं स्वामिनं कुर्वन्तः धुनयः कम्पयितारः रिशादसः हिंसकानां अत्तारः एवंभूता मरुतः तविषीभिः स्वकीयैर्बलैः विद्युतः विद्योतमानान् वातान् वायून् प्राणशक्तिविसरान् अक्रत कुर्वन्ति। तथा कृत्वा परिज्रयः परितो गन्तारः धूतयः कम्पयितारः दिव्यानि दिवि भवानि ऊधः प्राणबलादिभूयिष्ठानि मध्यमस्थानगतानि साराधारभूतानि ऊधांसि दुहन्ति रिक्तीकुर्वन्ति। तथाकरणेन भूमिम् अन्नमयक्षेत्रं पयसा जीवनाधारभूतेन प्राणमयेन रसेन पिन्वन्ति सिञ्चन्ति ॥ मारुतसूक्तेषु बाह्यार्थस्यापाततो बलीयस्त्वदर्शनात् अन्तरर्थः क्लेशेनैव साध्य इति मा भूद् भ्रमः। अत एव स्थूलवर्णनात् मारुतं रहस्यं दुर्विज्ञेयमिति मन्त्रद्रष्टार एव प्रमाणं पूर्वं अस्माभिः स्मारितम्। रिशादसादयः सर्वे गताः ॥

इति प्रथमस्य पञ्चमे षष्ठो वर्गः

षष्ठीमृचमाह—

पिन्वन्त्यपो मरुतः सुदानवः पयो घृतवद्विदथेष्वाभुवः ।
अत्यं न मिहे वि नयन्ति वाजिनमुत्सं दुहन्ति स्तनयन्तमक्षितं ॥६॥
पिन्वन्ति अपः मरुतः सुऽदानवः पयः घृतऽवत् विदथेषु आऽभुवः अत्यम् न मिहे वि नयन्ति वाजिनम् उत्सम् दुहन्ति स्तनयन्तम् अक्षितम् ॥

सुदानवः शोभनदानयुक्ताः मरुतः, विदथेषु ज्ञानगम्ययजनसदनेषु आ भुवः आभिमुख्येन भवन्तः वर्तमानाः सन्तः घृतवत् दीप्तियुक्तं पयः क्षीरं सारोपलक्षणं तद्युक्ताः अपः मध्यमस्थानीयतेजोबलादिसंपद्वाहिनीः शक्तीः पिन्वन्ति पूरयन्ति, प्रवाहयन्ति वा । अत्रेदं वक्तव्यम् । विदथः ज्ञानागमो भवति, ज्ञानागमस्थानं ज्ञानगम्यं वा यजनमपि विदथशब्दवाच्यम्, अयमन्तर्याग एव ग्राह्यः । तत्र अन्तरिक्षस्थाना प्राणमयभूरेव यागशाला भवति, मरुतस्तत्र दीप्तियुक्ताः सारवतीरुक्तलक्षणाः अपः प्रवाहयन्ति, पूरयन्ति, पिन्वतिर्धातुः सेचने सेवने पूरणे च वर्तते । किमर्थमेवं कुर्वन्ति? आह–अत्यम् न अश्वं यथा सादिनः विनयन्ति समीचीनसुनियतगत्यर्थं शिक्षयन्ति तथा मरुतः वाजिनम् बलवेगसमृद्धियुक्तं उत्सम् तेजोबलादिप्रस्रवणाधारभूतं अन्तरिक्षालयं महान्तं विश्वप्राणं, मिहे वर्षणाय विनयन्ति, दुहन्ति रिक्तीकुर्वन्ति । कीदृशम्? स्तनयन्तम् गर्जन्तं, अक्षितम् अक्षीणम् ॥ मेघपरतया व्याख्यानायास्त्येवावकाशः । अपि तु भावैशिष्ट्यं विचेयमेव । अत्र विदथेषु यज्ञेषु आभुवः ऋत्विजः घृतवत् घृतं यथा सिञ्चन्ति एवं मरुतोऽपि वृष्टिं कुर्वन्तीति सायणः । इदं च अमूलम् । "घृतवत्" इत्यत्र मतुबर्थो ग्राह्यः । नेह उपमार्थीयो वतिः । सायण एव 'घृतवत्' प्रयोगस्थलेषु सर्वत्र घृतयुक्तं पयः हव्यं वेति व्याचष्टे । 'घृतवत् पयः सारोपेतम्' (१.२२.१४) 'घृतवत् दीप्तिमत्' (३.५.६) 'घृतवत् पयो मधुमत्' (१०.६४.९) 'घृतवत् पयः' क्षरणवत् (१०.६५.८), एवमन्यत्र च ॥ सुदानवः–ददातेः नुप्रत्ययान्तो दानुशब्दः । मिहे–संपदादिलक्षणः क्विप् । स्तनयन्तम्–स्तनयशब्दश्चुरादिरदन्तः ॥

सप्तमीमृचमाह—

मह्विषासो मायिनश्चित्रभानवो गिरयो न स्वतवसो रघुष्यदः ।
मृगा इव हस्तिनः खादथा वना यदारुणीषु तविषीरयुग्ध्वम् ॥७॥

महिषासः मायिनः चित्रऽभानवः गिरयः न स्वऽतवसः रघुऽस्यदः
मृगाःऽइव हस्तिनः खादथ वना यत् आरुणीषु तविषीः अयुग्ध्वम् ॥

महिषासः महान्तः, महिष इति महन्नाम, मायिनः ज्ञानवन्तः, मायेति ज्ञाननाम, चित्रभानवः बहुविधदीप्तयः, गिरयो न पर्वता इव स्वतवसः स्वीयेन बलेन युक्ताः रघुष्यदः रघु शीघ्रं स्यन्दन्ते गच्छन्तीति रघुष्यदः शीघ्रगमनाः, हे मरुतः, एवंभूता यूयं हस्तिनः मृगा इव हस्तवन्तो गजा इव वना वनानि वृक्षादीनि खादथ भक्षयथ इति बाह्ये पक्षे, सुखानि भजथ, पार्थिवशरीरोपभोगक्षमाः भवथ इति रहस्यार्थः। यत् यस्मात् आरुणीषु अरुणवर्णासु सामर्थ्यात् बडवासु भोगक्षमासु, अन्यत्र गावोऽपि भवन्ति, इह तु भोगक्रियासामर्थ्यं विवक्षितम्, तविषीः युष्मदीयानि बलानि अयुग्ध्वम् यूयं संयोजितवन्तः, तस्मात् युष्मद्बलयुक्तवाहनसहिता यूयं वना खादथेति संबन्धः ॥ रघुष्यदः-स्यन्दू प्रस्रवणे, क्विप्, अनिदितामिति नलोपः। खादथ-खाद भक्षणे। अयुग्ध्वम्-युजिर् योगे, लुङ् ॥

अष्टमीमृचमाह—

सिंहा इव नानदति प्रचेतसः पिशा इव सुपिशो विश्ववेदसः।
क्षपो जिन्वन्तः पृषतीभिर्ऋष्टिभिः समित्सबाधः शवसाहिमन्यवः ॥८॥
सिंहाःऽइव नानदति प्रऽचेतसः पिशाःऽइव सुऽपिशः विश्वऽवेदसः
क्षपः जिन्वन्तः पृषतीभिः ऋष्टिऽभिः सम्ऽइत् सऽबाधः शवसा अहिंऽमन्यवः ॥

प्रचेतसः प्रकृष्टचेतोयुक्ताः मरुतः सिंहा इव नानदति वचनव्यत्ययः, अधिकं शब्दं कुर्वन्ति। सिंहानामिव मरुतामागमने गम्भीरः शब्द उत्पद्यते, इदं च रहस्यं अन्तर्याजिनां विदितम्। तथा सुपिशः शोभनावयवाः पिशा इव पिशाख्याः मृगविशेषाः रुरवः यथा श्वेतबिन्दुभिरलङ्कृतशरीराः सन्ति तथाभूताः विश्ववेदसः सर्वज्ञानिनः, क्षपः रात्रीः जिन्वन्तः उल्लासयन्तः रात्रिषु यज्ञशत्रूणां प्राबल्ये सति मरुतां कृत्यानि तमसः प्रध्वंसमापाद्य निर्निद्रतां विदधते, तस्मात् रात्रीणां जिन्वनं उल्लासनं प्रीणनं वा भवति, 'क्षपः शत्रूणां क्षपयितारः' इति मरुद्विशेषणं प्राह सायणः, 'जिन्वन्तः स्तोतॄन् प्रीणयन्तः' इति च। अपि च शवसा बलेन

अहिमन्यवः अहेः सर्पस्य मन्युरिव क्रोध इव येषां मन्युः ते सर्पवत्क्रुद्धाः, आहननशीला मन्युयुक्ता इत्येके, एवंभूता मरुतः पृषतीभिः चित्रवर्णबिन्दुयुक्ताभिः मरुद्वाहाः पृषत्यः विचारिताः (१.३९.६, १.३७.२) ऋष्टिभिः आयुधैश्च सहिताः सबाधः बाधासहितान् शत्रुभिर्बाधितान् यजमानान् सम् इत् संभूयैव गणश आगच्छन्ति रक्षितुमिति शेषः ॥ नानदति–नदतेर्यङ्लुगन्तात् लट्। सुपिशः–सुपूर्वात् पिश अवयवे इत्यस्मात् क्विप् ॥

नवमीमृचमाह—

रोदसी आ वदता गणश्रियो नृषाचः शूराः शवसाहिमन्यवः ।
आ वन्धुरेष्वमतिर्न दर्शता विद्युन्न तस्थौ मरुतो रथेषु वः ॥९॥
रोदसी इति आ वदत गणऽश्रियः नृऽसाचः शूराः शवसा अहिऽमन्यवः
आ वन्धुरेषु अमतिः न दर्शता विऽद्युत् न तस्थौ मरुतः रथेषु वः ॥

हे गणश्रियः गणशः श्रयन्ते अवतिष्ठन्ते इति गणश्रियः, नृषाचः नॄन् मनुष्यान् यजमानान् सचन्ते सेवन्ते इति नृषाचः, शूराः शौर्ययुक्ताः एवंभूताः हे मरुतः शवसा बलेन अहिमन्यवः सर्पवत् क्रुद्धाः सन्तः रोदसी द्यावापृथिव्यौ आ वदत समन्तात् शब्दयत। अपि च हे मरुतः, वः युष्माकं रूपं तेजो वा रथेषु वन्धुरेषु सारथेः स्थानेषु आ तस्थौ आतिष्ठति अवस्थितं भवति। तच्च सम्यग्लक्ष्यते। तत्र दृष्टान्तः–अमतिर्न रूपमिव तेज इव वा, अमतिः रूपनाम तेजसि बले च वर्तते। अपि च दर्शता दर्शनीया सुभगा विद्युत् न विद्योतमाना तडिदिव लक्ष्यते ॥ वदत–दीर्घः संहितायां छान्दसः। अमतिः–अम गत्यादिषु, अमेरौणादिकोऽतिप्रत्ययः। दर्शता–दृशिर् प्रेक्षणे, अतच्प्रत्ययः ॥

दशमीमृचमाह—

विश्ववेदसो रयिभिः समोकसः संमिश्लासस्तविषीभिर्विरप्शिनः ।
अस्तार इषुं दधिरे गभस्त्योरनन्तशुष्मा वृषखादयो नरः ॥१०॥
विश्वऽवेदसः रयिऽभिः सम्ऽओकसः सम्ऽमिश्लासः तविषीभिः
विऽरप्शिनः अस्तारः इषुं दधिरे गभस्त्योः अनन्तऽशुष्माः वृषऽखादयः
नरः ॥

विश्ववेदसः सर्वज्ञाः रयिभिः धनैः समोकसः समाननिवासाः समवेतानां मरुतां धनं ओकश्च समाने इत्यर्थः । तथा तविषीभिः बलैः संमिश्लासः संमिश्राः संयुक्ताः इतरेतरबलभाज इत्यर्थः विरप्शिनः महान्तः महत्त्वमेतत्, विविधरपणशीला इत्यन्यत्र (१.८.८) सायणः, तर्हि नानाविधघोषकारिणः, अस्तारः निरसितारः शत्रूणां, अनन्तशुष्माः अवच्छेदरहितबलाः वृषखादयः सकृदेवायं प्रयोगः, अतः कष्टं वर्तत एव, खादिशब्दो हस्तत्राणार्थः 'हस्तेषु खादिश्च कृतिश्च संदधे' (१.१६८.३) इत्यत्र खादिः हस्तत्राणकः कृतिः कर्तनी... । खादिर्भक्ष्ये वर्ततेऽन्यत्र (१.१६६.९) 'प्रपथेषु खादयः' खादयः खाद्यानि भक्ष्याणीति सायणः । अत एव अत्र द्विधा व्याचष्टे–'वृषा इन्द्रः खादिः आयुधं येषां ते, वृषा सोमः खादिः खाद्यः पेयो येषां ते' इति । सर्वथा वृषशब्दस्यावयवार्थ एवात्र निर्णये द्वारं दद्यात् । तर्हि वृषपदेन बलं लक्ष्यते तदेव खाद्यं भवति मरुतामित्यस्माकमूहः ॥ अपि च नरः नेतारः बलिनः एवंभूताः मरुतः गभस्त्योः बाह्वोः इषुम् बाणं, दधिरे धारयन्ति ॥ समोकसः–उच समवाये, असुन् । संमिश्लासः–कपिलकादित्वात् लत्वम् । विरप्शिनः–रप लप व्यक्तायां वाचि । अस्तारः–ताच्छीलिकस्तृन्, इडभावश्छान्दसः । अनन्तशुष्माः–अनन्तः शुष्मो येषां ते ॥

इति प्रथमस्य पञ्चमे सप्तमो वर्गः

एकादशीमृचमाह—

हिरण्ययेभिः पविभिः पयोवृध उज्जिघ्नन्त आपथ्यो३ न पर्वतान् ।
मखा अयासः स्वसृतो ध्रुवच्युतो दुधक्रतो मरुतो भ्राजदृष्टयः ॥११॥
हिरण्ययेभिः पविऽभिः पयःऽवृधः उत् जिघ्नन्ते आऽपथ्यः न पर्वतान्
मखाः अयासः स्वऽसृतः ध्रुवऽच्युतः दुधऽकृतः मरुतः भ्राजत्ऽऋष्टयः ॥

मरुतः, हिरण्ययेभिः हिरण्मयैः पविभिः रथचक्रैः पर्वतान् शिलोच्चयान् उज्जिघ्नन्ते ऊर्ध्वं गमयन्ति, तादृशो मारुतवेगप्रभावः । तत्र दृष्टान्तः–आ पथ्यो न समन्तात् पथि मार्गे गच्छन् रथः यथा वेगातिशयात् मार्गस्थान् वृक्षादीन् भङ्क्त्वा ऊर्ध्वं नयति तद्वत् । कीदृशा मरुतः? पयोवृधः पयसः सारवतीनां उत्तलक्षणानां अपां वर्धयितारः, मखाः मखो यज्ञः तद्वन्तः अन्तर्भावितमत्वर्थः अयासः गन्तारः, यजमानस्य यजनं प्रति, स्वसृतः स्वयमेव सरन्तो गच्छन्तः शत्रून् प्रति ध्रुवच्युतः ध्रुवाणां निश्चलानां जडभूतानां पर्वतादीनां वा च्यावयितारः, दुधक्रतः

दुध्रं अन्यैर्धर्तुमशक्यमात्मानं कुर्वाणाः, स्तोतारं दुर्धरं कुर्वाणा वा भ्राजदृष्टयः दीप्यमानायुधाः ॥ उज्जिघ्नन्ते–हन्तेर्व्यत्ययेनात्मनेपदम् । पथ्यः–पथि भवः, छन्दसि यत् । अयासः–अय पय गतौ, अयन्त इत्ययासः, आज्जसेरसुक् । दुध्रकृत्–ईषदूदुःसुष्विति दुःशब्दे उपपदे कर्मणि खल्, गुणाभावश्छान्दसः, तथा रेफलोपश्च, दुध्रः, तं कुर्वन्तीति दुध्रकृतः, करोतेः क्विप् ॥

द्वादशीमृचमाह—

घृषुं पावकं वनिनं विचर्षणिं रुद्रस्य सूनुं हवसा गृणीमसि ।
रजस्तुरं तवसं मारुतं गणमृजीषिणं वृषणं सश्चत श्रिये ॥१२॥
घृषुम् पावकम् वनिनम् विऽचर्षणिम् रुद्रस्य सूनुम् हवसा गृणीमसि
रजःऽतुरम् तवसम् मारुतम् गणम् ऋजीषिणम् वृषणम् सश्चत श्रिये ॥

घृषुम् घर्षकं शत्रुबलस्य, पावकम् शोधकं सर्वेषां, वनिनम् वनवन्तं, उदके सुखे च वनं, सुखवन्तं, विचर्षणिम् विशेषेण सर्वस्य द्रष्टारं, रुद्रस्य सूनुम् रुद्रपुत्रम् मरुद्गणस्य रुद्रपुत्रत्वं विश्रुतं वेदे, एवंभूतं मरुद्गणं हवसा हवेन आह्वानेन, स्तोत्रस्योपलक्षणमिदं, गृणीमसि स्तुमः । भोः सखायो यजमानाः, यूयमपि श्रिये सम्पत्तये मारुतम् गणम् मरुतां समूहं सश्चत प्राप्नुत, आश्रयत । कीदृशम्? रजस्तुरम् रजसः अन्तरिक्षस्य जगत्प्राणायतनस्य त्वरयितारं, यजमाने प्राणबलातिशयस्यानार्थं इति शेषः तवसम् बलवृद्धम् ऋजीषिणम् ऋजीषं शत्रूणां अपार्जकं बलं तद्वन्तं (१.३२.६) वृषणम् वर्षितारम् वीर्यवन्तमित्यर्थः ॥ हवसा–ह्वेञः असिप्रत्यये संप्रसारणं छन्दसि । गृणीमसि–गृ शब्दे, इदन्तो मसिः । रजस्तुरम्–रजः तुतोर्ति इति रजस्तूः, तुर त्वरणे, क्विप् । वृषणम्–दीर्घाभावः छन्दसि । सश्चत–सश्चतिर्गतिकर्मा ॥

त्रयोदशीमृचमाह—

प्र नू स मर्तः शवसा जनाँ अति तस्थौ व ऊती मरुतो यमावत ।
अर्वन्निर्वाजं भरते धना नृभिरापृच्छ्यं क्रतुमा क्षेति पुष्यति ॥१३॥
प्र नु सः मर्तः शवसा जनान् अति तस्थौ वः ऊती मरुतः यम् आवत
अर्वत्ऽभिः वाजम् भरते धना नृऽभिः आऽपृच्छ्यम् क्रतुम् आ क्षेति
पुष्यति ॥

सः मर्तः स मनुष्यः जनान् अन्यान् पुरुषान् शवसा बलेन नु क्षिप्रं अति अतीत्य प्र तस्थौ प्रतिष्ठितो भवति, हे मरुतः, यूयं यम् पुरुषं वः युष्माकं ऊती ऊत्या रक्षया आवत अरक्षत, किञ्च सः अर्वद्भिः अश्वैः प्राणबलभोगात्मभिः साधनभूतैः वाजम् सर्वां बलसमृद्धिं नृभिः स्वकीयैर्नेतृत्वलक्षणैर्बलविशेषैः धना धनानि विविधानि च भरते संपादयति। आपृच्छ्यम् आप्रष्टव्यं सर्वतः माननीयतया जनैः प्रष्टव्यम् महनीयमित्यर्थः क्रतुम् प्राज्ञं इच्छाबलं आ क्षेति प्राप्नोति पुष्यति पुष्टो भवति च ॥ ऊती-तृतीयायाः पूर्वसवर्णदीर्घत्वम्। आपृच्छ्यम्-आङ्-पूर्वात् पृच्छतेः क्यच्प्रत्ययान्तो निपात्यते। क्षेति-क्षि निवासगत्योः, विकरणस्य लुक् छन्दसि ॥

चतुर्दशीमृचमाह—

चर्कृत्यं मरुतः पृत्सु दुष्टरं द्युमन्तं शुष्मं मघवत्सु धत्तन।
धनस्पृतमुक्थ्यं विश्वचर्षणिं तोकं पुष्येम तनयं शतं हिमाः ॥१४॥

चर्कृत्यम् मरुतः पृत्ऽसु दुस्तरम् द्युऽमन्तम् शुष्मम् मघवत्ऽसु धत्तन धनऽस्पृतम् उक्थ्यम् विश्वऽचर्षणिम् तोकम् पुष्येम तनयम् शतम् हिमाः ॥

हे मरुतः, मघवत्सु धनवत्सु यजमानेषु शुष्मम् बलं धत्तन स्थापयत। कीदृशं शुष्मम्? चर्कृत्यम् पुनः पुनः पुरस्कर्तव्यं, सर्वकर्मकुशलं पृत्सु संग्रामेषु दुष्टरम् दुःखेन तरितव्यं, अजेयं, द्युमन्तम् दीप्तिमन्तं धनस्पृतम् धनैः प्रीतं उक्थ्यम् उक्थं स्तोत्रं तदर्हं, प्रशस्यं विश्वचर्षणिम् विशेषेण द्रष्टारम्, ईदृशं 'शुष्मं धत्तन'। अथ च वयं शतम् हिमाः शतसंख्याकान् हिम-प्रधानहेमन्त-ऋतूपलक्षितान् संवत्सरान् तोकम् पुत्रं, तल्लक्षितां अन्तर्यागविद्यासन्ततिं, तनयम् तदीयसन्ततिं च पुष्येम पोषयेम। उत्तरोत्तराभिवृद्धिरस्त्वस्माकमिति प्रार्थना ॥ चर्कृत्यम्-करोतेः यङ्लुगन्तात् क्यप्, तुगागमः, प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणमिति न्यायेनैवम्। दुष्टरम्-दुस्तरं, सुषामादेराकृतिगणत्वात् षत्वम्। धत्तन-तप्तनप्तनथनाश्चेति तस्य तनादेशः ॥ हिमाः-हन्तेर्हिं चेति मक्प्रत्ययः ॥

पञ्चदशीमृचमाह—

नू ष्टिरं मरुतो वीरवन्तमृतीषाहं रयिमस्मासु धत्त।
सहस्रिणं शतिनं शूशुवांसं प्रातर्मक्षू धियावसुर्जगम्यात् ॥१५॥

नु स्थिरम् मरुतः वीरऽवन्तम् ऋतिऽसहम् रयिम् अस्मासु धत्त सहस्त्रिणम् शतिनम् शुशुऽवांसम् प्रातः मक्षु धियाऽवसुः जगम्यात् ॥

हे मरुतः, स्थिरम् स्थास्नुम्, चिरस्थायिनं वीरवन्तम् वीर्योपेतं ऋतीषाहम् ऋतिसहं ऋतीनां गन्तॄणां शत्रूणां साहयितारं एवंविधसामर्थ्ययुक्तं रयिम् धनं अस्मासु धत्त नु स्थापयत क्षिप्रम्। नेदं सामान्यं लौकिकं धनं, विशिष्टं विचित्रं किमपि दिव्यं मारुतं धनमिति विशेषणैः प्रतिपादितम्। किञ्च तमेव रयिं विशिनष्टि। सहस्त्रिणम् सहस्रसंख्याकं शतिनम् शतसंख्याकं, विविधं अधिकाधिकं शुशुवांसम् प्रवृद्धम् धत्तेति संबन्धः। प्रातरित्यादि शिष्टं गतम्॥ नू ष्ठिरम्–नु, संहितायां दीर्घः, पूर्वपदादिति षत्वम्। ऋतीषाहम्–ऋ गतौ, कर्तरि क्तिच्, षह अभिभवे, छन्दसि सह इति ण्विप्रत्ययः, पूर्वपदस्य दीर्घत्वम्। शुशुवांसम्–श्वयतेर्वृद्ध्यर्थात् लिटः क्वसुः, विभाषा श्वेः इति संप्रसारणम्॥

इति प्रथमस्य पञ्चमे अष्टमो वर्गः
प्रथमे मण्डल एकादशोऽनुवाकः समाप्तः

द्वादशेऽनुवाके नव सूक्तानि। तत्र पश्वेत्यादीनि षट् सूक्तानि द्वैपदानि। 'तेष्वध्ययनसमये द्वे द्वे ऋचौ चतुःपदां एकैकामृचं कृत्वा समाम्नायेते। अयुक्संख्या या अन्त्या अतिरिच्यते सा तथैवाम्नायते' इति सायणः। न केवलमध्ययने, अर्थोऽपि द्वयोः द्विपदयोरेक एव भवति। प्रयोगे तु पृथक् शंसनीयाः द्विपदा ऋचः। तस्मात् प्रयोगवशाद् दशर्चम्, अर्थवशादध्ययनवशाच्च पञ्चर्चमेव भवति 'पश्वा न तायु'मित्यादि सूक्तम्। शाक्त्यः पराशर ऋषिः विराट् छन्दः अग्निर्देवता॥

तत्र सूक्ते प्रथमामृचमाह—

पश्वा न तायुं गुहा चतन्तं नमो युजानं नमो वहन्तम्।
सजोषा धीराः पदैरनु ग्मन्नुप त्वा सीदन्विश्वे यजत्राः ॥१॥
पश्वा न तायुम् गुहा चतन्तम् नमः युजानम् नमः वहन्तम् सऽजोषाः
धीराः पदैः अनु ग्मन् उप त्वा सीदन् विश्वे यजत्राः ॥

हे अग्ने, सजोषाः त्वयि समानप्रीतयः धीराः मेधाविनः पश्वा पशुना सह गुहा गुहायां रहस्यस्थले चतन्तं निगूढं वर्तमानं तायुम् न स्तेनमिव स्थितम्, पश्वा पश्यतीति पशुः तेन

पशुना गवात्मनाऽवस्थितेन अन्तश्चक्षुषा दिव्यचक्षुषा वा सह गुहा गुहायां निगूढेऽन्तर्हृदये 'आपोमये प्राणे' वा चतन्तम् निलीय वर्तमानं, नमः नमस्कारं उपासकैरर्च्यमाणं शरणागतिलक्षणं प्रणामं युजानम् आत्मना योजयन्तं, स्वीकुर्वाणमित्यर्थः, नमः उक्तलक्षणं नमस्कारं वहन्तम् बिभ्रतम्, प्रापयन्तमित्यर्थः, एवंभूतं त्वां पदैः पादकृतलक्ष्मभिर्मार्गैः अनु ग्मन् अनुगच्छन्ति। अथ विश्वे सर्वे यजत्राः यजनीयाः देवाः त्वा त्वां उप सीदन् समीपे प्राप्नुवन्ति, रहसि त्वामुपयन्ति ॥

पशुपदं गां लक्षयति, अवयवार्थानुगमात् पशुपदोपलक्षितगोपदस्य दृष्टिरर्थोऽवधेयः। गोरूपा दृष्टिः, सा च दिव्या अन्तर्बोधरूपा वा। अयं भावः—यथा गोधनं हृत्वा चोरः गुहायां रहसि निलीय वर्तते तथा गोरूपामन्तर्दृष्टिं हृत्वा तद्युक्तः भगवानग्निः अन्तर्गुहायां निलीनो भवति। अपि च उपासकैरर्च्यमाणं नमःशब्दलक्षितं आराधनसर्वस्वमङ्गीकृत्य तेन सह रहसि स्थानेऽवतिष्ठते। यथा पदपङ्क्तिभिश्चोरमनुसरन्ति धीमन्तः तथा पदकृतलक्ष्मभिः अग्निमनुयान्ति धीराः द्रष्टारः। एवमग्निलाभे सति सर्वेऽपि देवाः आगत्य अग्निमुपासते। अयमर्थः किञ्चिद्भेदेन अन्यत्रापि संहितायां लक्ष्यते। पदपङ्क्तिभिर्नष्टं पशुमिव गुहायां निलीनं अग्निं धीराः कवयो देवाश्च अविन्दन्निति भालन्दनस्य वत्सप्रेर्मन्त्रदृष्टिर्भवति "इमं विधन्तो अपां सधस्थे पशुं न नष्टं पदैरनुग्मन्। गुहा चतन्तमुशिजो नमोभिरिच्छन्तो धीरा भृगवो अविन्दन्" (१०.६२.२)। यद्यपि चततिर्गतिकर्मेति व्याहरति सायणः, तथापि 'चतन्तं निलीनं' इति स एव सुष्ठु व्याचष्टे। इदं च सूक्तं रहस्यार्थपरमिति आपातत एव स्फुरेद्धीमताम्। संपूर्णोऽयं पाराशर्योऽनुवाकः तत्त्वगर्भितः। अत्र दृष्टान्तोदाहरणाय लोकप्रसिद्धाः गवाश्वादयः प्रयुक्ता एव भवन्ति। तादृशान् प्रयोगान् वर्जयित्वा, सर्वत्र गौः अश्वः आपः अद्रिः इत्यादयः सर्वेऽपि शब्दाः साङ्केतिका ग्राह्याः। तस्मात् पुरस्तादुव्याख्याने 'आपः' इत्यादेः विस्तृतं सङ्केतार्थमनुक्त्वा 'साङ्केतिकः' इत्युल्लिख्य चलिष्यति मन्त्रार्थविवृतिः। एवं अवकाशलाभाय विस्तरो वर्ज्यते ॥ पश्चा—तृतीयैकवचने छन्दसि नाभावाभावः। गुहा—सप्तम्या लुक्। युजानम्—शानचि विकरणस्य लुक्। यजत्राः—अमिनक्षीत्यादिना त्रन्प्रत्ययः ॥

द्वितीयामृचमाह—

ऋतस्य देवा अनु व्रता गुर्भुवत्परिष्टिर्द्यौर्न भूम।
वर्धन्तीमापः पन्वा सुशिश्विमृतस्य योना गर्भे सुजातम् ॥२॥

ऋतस्य देवाः अनु व्रता गुः भुवत् परिष्टिः द्यौः न भूम वर्धन्ति ईम् आपः पन्वा सुऽशिश्विम् ऋतस्य योना गर्भे सुऽजातम् ॥

देवाः अग्नेरन्वेषणार्थं तमनुगच्छन्तो देवाः, ऋतस्य सत्यस्य व्रता व्रतानि नियतानि कर्माणि नियताः पद्याश्च अनु गुः अनुगच्छन्ति । अथ सोऽग्निः भूम भूमिं परिष्टिः परित इच्छन् सर्वत आवृण्वन् द्यौर्न द्युलोक इव भुवत् भवति, तिष्ठति । सर्वेऽपि देवाः अग्निमन्विष्य यदा प्राप्नुवन्ति तदा स प्रवृद्धः विशालोन्नतो द्युलोक इव भुवमाक्रामन् दीप्यत इत्यर्थः । ईम् एनं आपः (साङ्केतिक्यः) तेजोगर्भिताः प्राणशक्तिवाहिन्यः वर्धन्ति वर्धयन्ति पोषयन्ति । कीदृशम् ? पन्वा कर्मणा परिश्रमेण सुशिश्विम् आकारेण सुष्ठु वर्धमानं, ऋतस्य योना सत्यस्य मूलस्थाने स्वावासे गर्भे सुजातम् अपां स्वीये गर्भे सुष्ठु प्रादुर्भूतम् ॥ व्रता–शेर्लोपः । गुः–इण् गतौ, इणो गादेशः, लुङि अडागमाभावः । परिष्टिः–इष इच्छायां, क्तिन्, शकन्ध्वादित्वात् पररूपत्वम् । भूम–सोर्डादेशः, ह्रस्वश्छान्दसः । वर्धन्ति–छन्दसि णिलोपः । पन्वा–पनधातुः स्तुत्यर्थे प्रसिद्धः परिश्रमात्मके कर्मणि चेति प्रागुक्तम् (१.५५.२) । सुशिश्विम्–श्वयतेः सूपपदात् किप्रत्ययः, वचिस्वपि इत्यादिना संप्रसारणम् ॥

तृतीयामृचमाह—

पुष्टिर्न रण्वा क्षितिर्न पृथ्वी गिरिर्न भुज्म क्षोदो न शम्भु ।
अत्यो नाज्मन्त्सर्गप्रतक्तः सिन्धुर्न क्षोदः क ईं वराते ॥३॥
पुष्टिः न रण्वा क्षितिः न पृथ्वी गिरिः न भुज्म क्षोदः न शम्ऽभु अत्यः न अज्मन् सर्गऽप्रतक्तः सिन्धुः न क्षोदः कः ईम् वराते ॥

अयमग्निः रण्वा रमणीया पुष्टिर्न वृद्धिरिव लक्ष्यते । पृथ्वी विस्तीर्णा क्षितिर्न भूमिरिव अस्माकं वासभूरित्यर्थः । गिरिर्न पर्वत इव भुज्म भोगयोग्यः । क्षोदो न स्रोत इव शंभु सुखकरं वस्तु, सुखस्य भावयिता । अज्मन् सङ्ग्रामे सर्गप्रतक्तः सर्गेण विसर्जनेन प्रचोदनेन प्रतक्तः प्रगमितः प्रेषितः अत्यो न जात्यश्व इव, स्तोतॄणां शत्रून् अभिगच्छतीत्यर्थः । सिन्धुः स्यन्दमानं क्षोदो न उदकमिव शीघ्रगामी, यथा निम्नदेशाभिमुखो जलप्रवाहो दुर्निवारः तथायमग्निरपीत्यर्थः । तस्मात् ईम् एनं कः वराते वारयेत? न कोऽपि वारयितास्तीत्यर्थः ॥ अग्नेः प्रादुर्भावे, तदधिगमे तद्वर्धने च तदीयप्रभावो वर्णितः, उत्तरत्रापि स एव आग्नेयो महिमा एवं

लोकोत्तरकाव्यशोभातिशायिभिः मन्त्रवर्णैर्वर्ण्यते ॥ रण्वा-रविर्गत्यर्थः, रण्व्यते इति रण्वः । भुज्म-भुज पालनाभ्यवहरणयोः, मक्, सोर्लुक् । अज्मन्-अजतेः मनिन्, सप्तम्या लुक् । सर्गप्रतक्तः-सृज विसर्गे, घञ्, तञ्चु गतौ, अन्तर्भावितण्यर्थः, निष्ठायां क्तः । वराते-वृञ् वरणे, अन्तर्भावितण्यर्थः, लेट्, व्यत्ययेन शप् ॥

चतुर्थीमृचमाह—

जामिः सिन्धूनां भ्रातेव स्वस्रामिभ्यान्न राजा वनान्यत्ति ।
यद्वातजूतो वना व्यस्थादग्निर्ह दाति रोमा पृथिव्याः ॥४॥
जामिः सिन्धूनाम् भ्राताऽइव स्वस्राम् इभ्यान् न राजा वनानि अत्ति
यत् वातऽजूतः वना वि अस्थात् अग्निः ह दाति रोम पृथिव्याः ॥

अयमग्निः स्वस्राम् स्वसॄणां भ्रातेव यथा सोदर्यो भवति तथा सिन्धूनाम् (सङ्केतशब्दः) स्यन्दमानानां अपां जामिः सहजन्मा बन्धुः । राजा भूपतिः इभ्यान न शत्रून् यथा निवारयति तथा वनानि भूरुहजातानि अत्ति भक्षयति । यत् यदा वातजूतः वायुना प्रेरितः सन् वना वनानि व्यस्थात् व्याप्य तिष्ठति तदा सः अग्निर्ह अग्निरेव पृथिव्याः भूमेः रोमा तनूरुहजातानि छेत्तव्यानि दाति छिनत्ति । अन्नमयादुद्भूतानि यानि रोमाणीव निवारयितव्यानि अनिष्टानि भवन्ति क्वचित् तानि शोधितानि भवन्ति वातेरितेन अग्निना ॥ स्वस्राम्-आमो नुडभावः छान्दसः । अस्थात्-तिष्ठतेर्लुङ् । दाति-दाप् लवने ॥

पञ्चमीमृचमाह—

श्वसित्यप्सु हंसो न सीदन् क्रत्वा चेतिष्ठो विशामुषर्भुत् ।
सोमो न वेधा ऋतप्रजातः पशुर्न शिश्वा विभुर्दूरेभाः ॥५॥
श्वसितीति अप्ऽसु हंसः न सीदन् क्रत्वा चेतिष्ठः विशाम् उषःऽभुत्
सोमः न वेधाः ऋतऽप्रजातः पशुः न शिश्वा विऽभुः दूरेऽभाः ॥

अप्सु उदकमध्ये सीदन् निषण्णः हंसो न हंस इव अग्निः अप्सु मध्ये (सङ्केतपदम्) उपविशन् श्वसिति प्राणिति । कीदृशः ? उषर्भुत् उषसि (सङ्केतः) प्रबुद्धः क्रत्वा क्रतुना प्राज्ञकर्मबलेन विशाम् जनानां चेतिष्ठः अतिशयेन चेतयिता, सत्यप्रभाते प्रबुद्धोऽयमग्निः मानुषेभ्यः

स्वेच्छबालेन ज्ञानं दातुं समर्थः। सोमो न रसात्मा सोम इव वेधाः विधाता, स्रष्टा, ऋतप्रजातः सत्यजन्मा च, सत्याद्धि अस्य उद्भवः। सः शिश्वा शिशुना सह पशुर्न पशुरिव, सवत्सा गौरिव लक्ष्यते। विभुः विततो भवन्, व्यापनशीलः, दूरेभाः दूरेऽपि भाः अस्य, दूरप्रसाराऽस्य दीप्तिर्दृश्यते। एवंभूतोऽग्निरप्सु श्वसितीति संबन्धः॥ श्वसिते-श्वस प्राणने। क्त्वा-तृतीयाया नाभावाभावः। उषर्भुत्-उषसि बुध्यते, बुध अवगमने, क्विप्। शिश्वा-पूर्ववत् नाभावाभावः। दूरेभाः-बहुव्रीहिः, अलुक् बहुलवचनात्॥

इति प्रथमस्य पञ्चमे नवमो वर्गः

द्वादशेऽनुवाके रयिरिति दशर्चं प्रयोगतः, अध्ययनतः पञ्चर्चं सूक्तम्। पराशरस्यार्षम् आग्नेयम्। विराट् छन्दः॥

तत्र प्रथमामृचमाह—

रयिर्न चित्रा सूरो न सन्दृगायुर्न प्राणो नित्यो न सूनुः।
तक्का न भूर्णिर्वना सिषक्ति पयो न धेनुः शुचिर्विभावा॥१॥
रयिः न चित्रा सूरः न सम्ऽदृक् आयुः न प्राणः नित्यः न सूनुः तक्का न भूर्णिः वना सिसक्ति पयः न धेनुः शुचिः विभाऽवा॥

अयमग्निः चित्रा रयिर्न विचित्ररूपं विविधं धनमिव भवति। सूरो न सूर्य इव सन्दृक् सम्यक् दर्शयिता सर्वेषां पदार्थानाम्, आयुर्न प्राणः जीवितमिव, प्रश्वसन् वायुरिव प्रियतम इत्यर्थः। नित्यो न सूनुः ध्रुवः अस्माकं पुत्र इव विश्वसनीयः प्रियबन्धुः। तक्का न जवनोऽश्व इव भूर्णिः भर्ता अस्माकम्। सः वना वनानि सिषक्ति समवैति, वनेषु सक्तो भवति। धेनुः गौः पयो न स्वीयं क्षीरं सत्त्वमिव ददाति नः। शुचिः शुभ्रः विभावा सुविशालप्रकाशयुक्तः॥ नित्यः-नेर्ध्रुव इत्यप्प्रत्ययः। तक्का-तक हसने, गतिकर्मसु पठितः, तकतेर्वनिप्। भूर्णिः-भरते-र्निप्रत्ययो निपातितः॥

द्वितीयामृचमाह—

दाधार क्षेममोको न रण्वो यवो न पक्को जेता जनानाम्।
ऋषिर्न स्तुभ्वा विक्षु प्रशस्तो वाजी न प्रीतो वयो दधाति॥२॥

दाधार क्षेमम् ओकः न रण्वः यवः न पक्वः जेता जनानाम् ऋषिः न स्तुभ्वा विक्षु प्रऽशस्तः वाजी न प्रीतः वयः दधाति ॥

अयमग्निः रण्वः रमणीयः ओको न रमणीयं वासगृहमिव क्षेमम् कुशलं सर्वमस्माकं दाधार बिभर्ति। पक्वो यवो न परिपाकवान् धान्यविशेष इव उपभोगयोग्य इत्यर्थः। जनानाम् जेता जनेषु मध्ये सर्वोत्कृष्टो जयशालितयेत्यर्थः। ऋषिर्न ऋषिरिव स्तुभ्वा स्तोभकृत्, स्तोता देवानामित्यर्थः। विक्षु प्रजासु प्रशस्तः प्रकर्षेण कथितः ख्यातः, विश्रुत इत्यर्थः। प्रीतः संतुष्टः वाजी न अश्व इव अस्मासु वर्तते। वयः वृद्धिं अस्माकं दधाति धारयते ॥ दाधार-तुजादीनामित्यभ्यासस्य दीर्घत्वम्। स्तुभ्वा-स्तोभतेः क्वनिप् ॥

तृतीयामृचमाह—

दुरोकशोचिः क्रतुर्न नित्यो जायेव योनावरं विश्वस्मै।
चित्रो यदभ्राट् श्वेतो न विक्षु रथो न रुक्मी त्वेषः समत्सु ॥३॥
दुरोकऽशोचिः क्रतुः न नित्यः जायाऽइव योनौ अरम् विश्वस्मै चित्रः यत् अभ्राट् श्वेतः न विक्षु रथः न रुक्मी त्वेषः समत्ऽसु ॥

अयमग्निः दुरोकशोचिः दुरोके दुःखावासे गृहे शोचिस्तेजः, यद्वा दुरोकं दुःखेनोत्पाद्यं शोचिः, दुरोकं दुष्प्रापं शोचिस्तेजो यस्यासौ इति सायणः। नित्यः क्रतुर्न ध्रुवः क्रियापरोऽध्यवसाय इव अस्मासु व्यापृत इत्यर्थः। योनौ गृहे जाया इव पत्नीव विश्वस्मै सर्वस्मै जनाय अरम् अलं पर्याप्तो भवति, यद्वा अलं भूषणम्, यथा सर्वस्यापि जनस्य स्वगृहे जाया अलङ्काराय भवति, तथाऽयमग्निरलङ्कुरुते गृहम्। यत् यदा चित्रः अद्भुतः सन् अभ्राट् भ्राजते, यदा विचित्रज्वालः विविधं भासते, तदा स विक्षु प्रजासु श्वेतो न शुभ्र इव शुभ्रवर्णः पुरुष इव लक्ष्यते। रुक्मी रथो न हिरण्मयो रथ इव भवति। समत्सु युद्धेषु त्वेषः तेजोविशेष एव सः ॥ दुरोकशोचिः-उच समवाये, कृच्छ्रार्थे खल्, बहुलवचनात् कुत्वम्, दुरोकं, अन्यद् व्याख्यातम्। अभ्राट्-भ्राजृ दीप्तौ, लङ्, व्यत्ययेन परस्मैपदं, शपो लुक्। समत्सु-समानं माद्यन्त्येष्विति समदः संग्रामाः, औणादिकोऽधिकरणे क्विप्, संपूर्वात् भक्षणार्थात् अत्तेर्वा ॥

चतुर्थीमृचमाह—

सेनेव सृष्टामं दधात्यस्तुर्न दिद्युत्त्वेषप्रतीका ।
यमो ह जातो यमो जनित्वं जारः कनीनां पतिर्जनीनाम् ॥४॥
सेनाऽइव सृष्टा अमम् दधाति अस्तुः न दिद्युत् त्वेषऽप्रतीका यमः
ह जातः यमः जनिऽत्वम् जारः कनीनां पतिः जनीनाम् ॥

सृष्टा प्रेरिता सेना इव अमम् बलं दधाति अस्मासु धत्ते, शत्रूणामभिभवनाय प्रेरिता सेना यथा शत्रुपराजयविधायकं बलं अस्मासु धत्ते तथा अग्निः बलमस्मासु धारयति। अस्तुः क्षेप्तुः धानुष्कस्य दिद्युत् न दीप्यमानो बाण इव, कीदृशी दिद्युत्? त्वेषप्रतीका त्वेषं भ्राजमानं प्रतीकं मुखं अग्रं यस्याः सा। सोऽग्निः यमः ह द्वन्द्व एव जातः प्रादुर्भूतः, जातं सर्वं द्वन्द्वात्मनाऽवस्थितम्, स एव तथा द्वन्द्वात्मनाऽवस्थितः। न केवलं जातं सर्वं प्रति द्वन्द्वात्मकता, जनितव्यमपि सर्वं द्वन्द्वं स एवेत्याह। यमः द्वन्द्वः जनित्वम् जनितव्यं च भवति। भूतं भव्यं च सर्वं द्वन्द्वं अग्निरेवेत्यर्थः। कनीनाम् कन्यकानां जारः जरयिता रहोरतिप्रदः, अनभिव्यक्तभावानां व्यञ्जयिता परिपाकविधानेनेति गौणः प्रयोगः। तथा जनीनाम् जनयित्रीणां मातॄणां पतिः पालको भर्ता, भावानां उत्पादयित्रीणां शक्तीनां अयमग्निरेव पतिर्भवति॥ जनित्वम्—कृत्यार्थे तवैकेनिति कर्मणि त्वन्प्रत्ययः। जारः—जारयति, कर्तरि णिलुक् निपातितः। कनीनाम्—कन्याशब्दात् षष्ठीबहुवचने छन्दसि संप्रसारणम्। जनीनाम्—जन्यन्ते आसु, जनयः स्त्रियः, इन्प्रत्ययः॥

पञ्चमीमृचमाह—

तं वश्चराथा वयं वसत्यास्तं न गावो नक्षन्त इद्धम् ।
सिन्धुर्न क्षोदः प्र नीचीरैनोन्नवन्त गावः स्वर्दृशीके ॥५॥
तम् वः चराथा वयम् वसत्या अस्तम् न गावः नक्षन्ते इद्धम् सिन्धुः
न क्षोदः प्र नीचीः ऐनोत् नवन्त गावः स्वः दृशीके ॥

वयम्, तम् तथाभूतं त्वां इद्धम् दीप्तम् वः तव, वचनव्यत्ययः, चराथा चरणेन गमनेन वसत्या वासेन, स्थानेन, उभयथा गत्या स्थित्या च गावः पशवः अस्तम् न गृहमिव नक्षन्ते

प्राप्नुमः, पुरुषव्यत्ययः । अग्नेः स्थितिगत्यनुसारेण दीप्तं तं प्राप्नुमः, गावो गोष्ठमिव । सः सिन्धुः स्यन्दमाना क्षोदो न नदी इव, नीचीः निम्नप्रदेशं गच्छन्तीः अपः प्रैणोत् प्रेरयति । स्वर्दृशीके सूर्यस्य दर्शने आविर्भावे सति गावः रश्मयः नवन्त तं प्रति गच्छन्ति, नवतिर्गतिकर्मा । अत्र स्वः सूर्यः ऋतं ज्योतिः, गावः चिद्रश्मयः । अन्यदनुसंधेयम् ॥ चराथा–चरेरौणादिकः अथक्प्रत्ययः । वसत्या–वसेः अतिप्रत्ययः । अस्तम्–अस्यतेऽस्मिन् सर्वं, तन्प्रत्ययः । नक्षन्ते–नक्षतिः व्याप्तिकर्मा, व्यत्ययेनात्मनेपदम् । नीचीः–निपूर्वादञ्चतेः ङीप् । ऐनोत्–इण् गतौ, अन्तर्भावितण्यर्थात् वर्तमाने लङ्, व्यत्ययेन श्लुः । दृशीके–दृशिर् प्रेक्षणे, अनिदृशिभ्यां चेति कीकन्प्रत्ययः ॥

इति प्रथमस्य पञ्चमे दशमो वर्गः

वनेष्विति अध्ययनतोऽर्थवशाच्च पञ्चर्चं सूक्तम् । ऋषिच्छन्दोदेवताः पूर्ववत् ॥

तत्र प्रथमामृचमाह—

वनेषु जायुर्मर्तेषु मित्रो वृणीते श्रुष्टिं राजेवाजुर्यम् ।
क्षेमो न साधुः क्रतुर्न भद्रो भुवत्स्वाधीर्होता हव्यवाट् ॥१॥
वनेषु जायुः मर्तेषु मित्रः वृणीते श्रुष्टिम् राजाऽइव अजुर्यम् क्षेमः न
साधुः क्रतुः न भद्रः भुवत् सुऽआधीः होता हव्यऽवाट् ॥

वनेषु जायुः जेता । मर्तेषु मनुष्येषु मित्रः सुहृत् । राजा इव यथा नृपतिः अजुर्यम् जरावर्जितं सचिवं वृणीते संभजते मन्त्राय, तथाऽयमग्निः श्रुष्टिम् श्रवणं दिव्यं आवेशलभ्यं अन्तर्वा श्रवणं वृणीते । साधुः साधयितृ सिद्धं वा क्षेमो न कल्याणमिव भवति । स्वाधीः शोभनाध्यानपरः भद्रः क्रतुर्न शुभः क्रियाध्यवसाय इव भवति । होता आह्वाता देवानाम् हव्यवाट् हव्यानामस्माभिरर्प्यमाणानां वोढा भुवत् भवति, लडर्थे लेट् । जायुः–कृवापाजीत्युण् । अजुर्यम्–जॄष् वयोहानौ, जरा नास्त्यस्येति बहुव्रीहिः । भुवत्–भवतेर्लेट् ॥

द्वितीयामृचमाह—

हस्ते दधानो नृम्णा विश्वान्यमे देवान्धाद् गुहा निषीदन् ।
विदन्तीमत्र नरो धियन्धा हृदा यत्तष्टान्मन्त्राँ अशंसन् ॥२॥

हस्ते दधानः नृम्णा विश्वानि अमे देवान् धात् गुहा निऽसीदन् विदन्ति ईम् अत्र नरः धियम्ऽधाः हृदा यत् तष्टान् मन्त्रान् अशंसन् ॥

विश्वानि सर्वाणि नृम्णा बलानि हस्ते स्वकीये बाहौ दधानः धारयमाणः गुहा गुहायां अन्तरे गूढे स्थाने निसीदन् निषण्णः उपविष्टः अग्निः अमे स्वीये बले देवान् धात् सर्वान् देवान् धत्ते धारयति। अन्तर्गुहायां निविष्टस्य सर्वदेवबलभृतोऽग्नेर्बलं सर्वदेवधारकमित्युक्तम्। तथाभूतेऽस्मिन्नग्नौ मनुष्यैः हार्दवाग्भिर्मन्त्राख्याभिः व्याहृते स्तुते सति, अयं विदितो लब्धो भवति नृणामित्युत्तरार्धेनाह। अत्र गुहायां धियंधाः धीवृत्तीनां धारयितारः नरः नेतारो मनुष्याः ईम् एनमग्निं विदन्ति जानन्ति, अधिगच्छन्ति, यत् यदा हृदा हृदयेन तष्टान् तक्षकर्मणा निष्पादितान् मन्त्रान् नित्यवाक्परिणामान् वेदमन्त्रवर्णान् अशंसन् अवोचन्॥ अत्र मन्त्रदृष्टिरहस्यं सूचितं अवधेयम्, तथा अग्नेरस्मदन्तर्निगूढवासः सर्वदेवबलभर्तृत्वं च॥ धियंधाः—द्वितीयाया अलुक् तत्पुरुषे कृति बहुलवचनात्, आतोऽनुपसर्ग इति कः। तष्टान्—तक्षू त्वक्षू तनूकरणे, निष्ठा॥

तृतीयामृचमाह—

अजो न क्षां दाधार पृथिवीं तस्तम्भ द्यां मन्त्रेभिः सत्यैः।
प्रिया पदानि पश्वो नि पाहि विश्वायुरग्ने गुहा गुहं गाः ॥३॥
अजः न क्षाम् दाधार पृथिवीम् तस्तम्भ द्याम् मन्त्रेभिः सत्यैः प्रिया पदानि पश्वः नि पाहि विश्वऽआयुः अग्ने गुहा गुहम् गाः ॥

अजो न जन्मरहितः स्वयंभूरिव, सः पृथिवीम् पृथुलां विस्तीर्णां क्षाम् भूमिं दाधार धारयति, सत्यैः सत्यसम्बन्धिभिः सत्यपूर्णैः सत्याविष्कारकैरिति यावत् मन्त्रेभिः नित्यवाग्भेदैः द्याम् द्युलोकं तस्तम्भ उत्तम्भितवान्, स्तम्भनेन दृढं बिभर्ति। अत्र द्यावापृथिव्योः स्तम्भनधारणे अग्निना निरुद्धे। ब्रह्माण्डे पिण्डाण्डे वा रोदस्योः पूर्वमेव वर्तमानयोरपि, तल्लक्षितचित्कक्ष्याद्वयस्य स्तम्भनं धारणं च रहोयागरते मनुष्ये साधयितव्ये। इदमेवेह अग्निकृत्यमुक्तम्। अथ ऋषिरग्निं प्रार्थयते—हे भगवन्, पश्वः दर्शनात्मकपशुपदवेदनीयाया गोः प्रिया प्रियाणि अस्माभिर्लालितानि पदानि पादन्यासलक्ष्माणि नि पाहि नितरां रक्ष। पदेषु रक्षितेषु तैर्मार्गसूचकैर्लक्षणैरन्तर्दृष्टिं लब्ध्वा गुहा अग्निवासभूः सुप्रवेशा भवतीति इयं प्रार्थना। पश्वा न तायुमिति प्रथमसूक्तर्चि यद्रहस्यं कथितं तदपेक्षया इदं च स्पष्टतरं भवति। हे अग्ने, त्वं

विश्वायुः सर्वमप्यायुः, विश्वस्य एकमायुस्त्वमसीति वा। गुहा गुहायां गुहम् यद्गहस्यं वर्तते तत् गाः गच्छ प्रविश ॥ पश्वः—जसादिषु छन्दसि वेर्ङिति इति गुणाभावे यणादेशः। गाः—छान्दसो लुङ् ॥

चतुर्थीमृचमाह—

य ईं चिकेत गुहा भवन्तमा यः ससाद धारामृतस्य।
वि ये चृतन्त्यृता सपन्त आदिद्वसूनि प्र ववाचास्मै ॥४॥
यः ईम् चिकेत गुहा भवन्तम् आ यः ससाद धाराम् ऋतस्य वि ये चृतन्ति ऋता सपन्तः आत् इत् वसूनि प्र ववाच अस्मै ॥

यः यः पुरुषः ईम् एनं गुहा गुहायां भवन्तम् वर्तमानं चिकेत जानाति, साक्षात्पश्यति, यः यश्च ऋतस्य सत्यस्य धाराम् प्रवहन्तीं प्रवृत्तिं आ ससाद प्राप्तवान् भवति, ये ये च पुरुषाः ऋता सत्यानि सपन्तः स्पृशन्तः वि चृतन्ति तं अग्निं इद्धं कुर्वन्ति, आत् इत् अनन्तरमेव अस्मै तादृशे जनाय वसूनि रहस्यानि धनानि दिव्यसम्पद्धरां वाचमित्यर्थः प्रववाच प्रब्रवीति, प्रकाशयतीत्यर्थः। भगवतोऽग्नेः भक्तस्यान्तर्याजिनश्च आत्यन्तिकसंबन्धसम्पादनसाधनं रहस्यमुपदिष्टम् ॥ चृतन्ति—चृती हिंसाग्रथनयोः तुदादिः, दीप्त्यर्थेपि वर्तते, अन्तर्भावितण्यर्थः सामर्थ्यात्। ववाच—छान्दसः, उवाच, लडर्थे ॥

पञ्चमीमृचमाह—

वि यो वीरुत्सु रोधन्महित्वोत प्रजा उत प्रसूष्वन्तः।
चित्तिरपां दमे विश्वायुः सद्मेव धीराः समायं चक्रुः ॥५॥
वि यः वीरुत्ऽसु रोधत् महिऽत्वा उत प्रऽजाः उत प्रऽसूषु अन्तरिति चित्तिः अपाम् दमे विश्वऽआयुः सद्मऽइव धीराः सम्ऽमायं चक्रुः ॥

यः अग्निः वीरुत्सु महीरुहेषु वनतरुलतादिषु महित्वा स्वीयानि महत्त्वानि वि रोधत् विशेषेण रुणद्धि, नावशेषयति, पुरस्तादाविष्काराय बिभर्तीत्यर्थः, उत अपि च प्रजाः जातानि प्रसूषु प्रसवित्रीषु अन्तः अन्तरे या निवर्तन्ते तान्यपि बिभर्तीति शेषः। पूर्वं "यमो ह जातः" इत्यत्र स एव 'जातः जनित्वं' चेत्युक्तम्। अधुना 'जातं जनित्वं' च स स्वमहिम्ना

बिभर्तीत्युच्यते। द्वितीय उतशब्दः पदपूरणः। सः अपाम् (सङ्केतः) दमे गृहे चित्तिः चित् प्रज्ञा भवति। स विश्वायुः विश्वस्यैकमायुः, विश्वमायुः, स एव वा। तं धीराः मेधाविनः ऋषयः सधेव गृहमिव संमाय सम्यङ्ज्ञात्वा यथायोग्यपरिच्छेदानुरोधेन चक्रुः कुर्वन्ति, निर्मान्ति। यथा गृहनिर्माणे यथास्थानं मानेन परिच्छेदान् निर्णीय गृहं निर्मिमते, तथा अग्निं आत्मनि निर्मान्ति धीराः॥ वीरुत्सु-विपूर्वाद्रोहतेः क्विप्, उपसर्गस्य दीर्घः, धकारश्चान्तादेशः। रोधत्-रुधिर् आवरणे, लेट्। संमाय-माङ् माने, ल्यप्॥

इति प्रथमस्य पञ्चम एकादशो वर्गः

द्वादशेऽनुवाके चतुर्थं 'श्रीण'न्निति द्वैपदं दशर्चं, अध्ययनतः पञ्चर्चं सूक्तम्। ऋषिच्छन्दो-देवताः पूर्ववत्॥

तत्र प्रथमामृचमाह—

श्रीणन्नुप स्थाद्दिवं भुरण्युः स्थातुश्चरथमक्तून्व्यूर्णोत्।
परि यदेषामेको विश्वेषां भुवद्देवो देवानां महित्वा॥१॥
श्रीणन् उप स्थात् दिवम् भुरण्युः स्थातुः चरथम् अक्तून् वि ऊर्णोत्
परि यत् एषाम् एकः विश्वेषाम् भुवत् देवः देवानाम् महित्वा॥

सः भुरण्युः भर्ता, यजमानैरर्च्यमाणस्य सर्वस्य वोढा अग्निः, श्रीणन् ज्वलन्, दिवम् द्युलोकं उपस्थात् उपतिष्ठति, प्राप्नोति। स्थातुः अचरं चरथम् जङ्गमं च व्यूर्णोत् विविच्य निराच्छादनानि करोति, तथा अक्तून् रात्रीश्च तमोवृताः (अन्तरे अन्धकारदशोपलक्षणमिदम्) निरावरणाः करोति। यत् यतः अयं एको देवः एषाम् विश्वेषाम् देवानाम् महित्वा महत्त्वानि परि भुवत् परितो व्याप्य वर्तते, आत्मना सर्वदेवमहत्त्वानि आवृणन् ज्वलत्यग्निः॥ श्रीणन्-श्रीञ् पाके इति धातोः शतरि रूपं, क्र्यादिः, पक्वोऽग्निर्ज्वलन् भवति। ऊर्णोत्-ऊर्णुञ् आच्छादने, ऊर्णोतेः विभाषेति वृद्धेर्विकल्पः॥

द्वितीयामृचमाह—

आदित्ते विश्वे क्रतुं जुषन्त शुष्काद्यद्देव जीवो जनिष्ठाः।
भजन्त विश्वे देवत्वं नाम ऋतं सपन्तो अमृतमेवैः॥२॥

आत् इत् ते विश्वे क्रतुम् जुषन्त शुष्कात् यत् देव जीवः जनिष्ठाः भजन्त विश्वे देवऽत्वम् नाम ऋतम् सपन्तः अमृतम् एवैः ॥

आदित् अनन्तरमेव तदैवेत्यर्थः यदेति उत्तरत्र यच्छब्दश्रुतेः। ते विश्वे ते सर्वेऽपि पुरुषाः क्रतुम् त्वदीयमिच्छाबलात्मकं अध्यवसायं जुषन्त सेवन्ते, यत् यदा हे देव, त्वं शुष्कात् नीरसाद्वस्तुनः जीवः जीवनरसयुक्तः जीवभूतः सन् जनिष्ठाः जायसे, नीरसप्राये जडे शरीरे त्वं रसवान् यदा प्रादुर्भवसि, तत्परमेव तवेच्छां अनुवर्तन्ते मनुष्याः, अन्यथा स्वेच्छामेवेत्यनुक्तसिद्धम्। तदा विश्वे सर्वेऽपि देवत्वम् देवभावात्मकं नाम नमनसाधनं दिव्यं नामधेयं भजन्त प्रीत्या सेवन्ते, तव एवैः गमनैः ऋतम् सत्यं अमृतम् च सपन्तः स्पृशन्ति, शत्रन्तोपि वर्तमानार्थः ॥ जुषन्त जनिष्ठाः भजन्त इत्येतानि वर्तमाने। एवैः-इण्शीङ्भ्यां वन्, यन्ति गच्छन्तीति एवानि, तैः ॥

तृतीयामृचमाह—

ऋतस्य प्रेषा ऋतस्य धीतिर्विश्वायुर्विश्वे अपांसि चक्रुः।
यस्तुभ्यं दाशाद्यो वा ते शिक्षात्तस्मै चिकित्वान्रयिं दयस्व ॥३॥
ऋतस्य प्रेषाः ऋतस्य धीतिः विश्वऽआयुः विश्वे अपांसि चक्रुः यः तुभ्यम् दाशात् यः वा ते शिक्षात् तस्मै चिकित्वान् रयिम् दयस्व ॥

अयमग्निः ऋतस्य सत्यस्य प्रेषाः प्रकर्षेणेष्यमाणाः प्रेरणाः, सत्यप्रेरणात्मक इत्यर्थः। ऋतस्य धीतिः सत्यस्य धारणात्मिका बुद्धिः, सत्यसंबद्धबुद्ध्यात्मकः। स विश्वायुः विश्वगतं आयुश्च। येन विश्वे सर्वेऽपि अपांसि कर्माणि चक्रुः कुर्वन्ति। आयुः प्राणबलं, तदन्तरा न किमपि कर्तुं शक्यम्। हे अग्ने, यः पुरुषः तुभ्यम् दाशात् ददाति, यो वा पुरुषः ते त्वत्तः शिक्षात् विद्यां लभते, सर्वथा लाभवान् भवति वा, तस्मै त्वदीयशिक्षायुक्ताय पुरुषाय रयिम् धनं दयस्व देहि, चिकित्वान् त्वं ज्ञातवान् दातव्यं वेत्सि ॥ दाशात्-दाशृ दाने, लेट्। शिक्षात्-शिक्ष विद्योपादाने, लेट्। चिकित्वान्-कित ज्ञाने, लिटः क्वसुः। दयस्व-दयतिर्दानार्थः ॥

चतुर्थीमृचमाह—

होता निषत्तो मनोरपत्ये स चिन्नो सां पतीं रयीणाम्।
इच्छन्त रेतो मिथस्तनूषु सं जानत स्वैर्दक्षैरमूराः ॥४॥

होता निऽसत्तः मनोः अपत्ये सः चित् नु आसाम् पतिः रयीणाम् इच्छन्त रेतः मिथः तनूषु सम् जानत स्वैः दक्षैः अमूराः ॥

सः मनोः अपत्ये मानवे जने यजमाने निषत्तः निषण्णः अन्तर्निहितः होता आह्वाता ऋत्विक् । स चिन्नु स एव हि आसाम् रयीणां सर्वेषामेषां धनानां पतिः पालकः स्वामी । तनूषु स्वकीयशरीरेषु मिथः परस्परं रेतः बीजं तैजसं इच्छन्त इच्छन्ति । अत्र इच्छतिक्रियायाः कर्तृपदं मूले नास्ति । तस्मात् स्वस्वपक्षानुसारेण व्याख्यातारो विभिद्यन्ते । 'अमूराः' इति कर्तृपदं भवति, अमूराः अमूढाः मेधाविनः स्वैः दक्षैः स्वकीयैः विवेचनकुशलज्ञानैः सम् जानत सम्यक् तमग्निं अवबुध्यन्ते । त एवामूराः स्वशरीरेषु परस्परं आग्नेयं "रेतः" बीजं इच्छन्ति इत्युक्तिरुपपद्यते । कथम्? अत्रेदं तत्त्वम् । अन्तर्यागरतानां एकैकस्मिन्नपि रेतः आग्नेयं बीजं उष्णं भवति । तादृशां एकैकस्यापि अग्निसंबन्धः स्थिर इत्यसंशयम् । सर्वेषु तेषु प्रत्येकं तुल्यं च प्रादुर्भूतेन अग्निना द्वारेण तेषां आन्तरं परस्परमिलनं तेषु प्रत्येकमग्नेर्वर्धनाय, अत एव तेषामपि दिव्याभ्युदयाय कल्पते । अत एव परस्परं आग्नेयं बीजं दिव्यं तेज इच्छन्तो मेधाविनः अग्निं सम्यग् जानते ॥ इच्छन्त–व्यत्ययेनात्मनेपदम् । जानत–लङ् छान्दसः । अमूराः–ढकारस्य रेफः ॥

पञ्चमीमृचमाह—

पितुर्न पुत्राः क्रतुं जुषन्त श्रोषन्ये अस्य शासं तुरासः ।
वि रायऽऔर्णोद् दुरः पुरुक्षुः पिपेश नाकं स्तृभिर्दमूनाः ॥५॥
पितुः न पुत्राः क्रतुम् जुषन्त श्रोषन् ये अस्य शासम् तुरासः वि रायः और्णोत् दुरः पुरुऽक्षुः पिपेश नाकम् स्तृऽभिः दमूनाः ॥

ये जनाः अस्य अग्नेः शासम् शासनं शिक्षां उपदेशमिति यावत् श्रोषन् शृण्वन्ति ये च तुरासः दिव्याध्वनि यागाय त्वरमाणाः भवन्ति, ते पुत्राः पितुः क्रतुम् न पितुरिच्छां यथा पुत्राः कुर्वन्ति तथाऽस्य क्रतुं जुषन्त प्रीत्या सेवन्ते । तेषां पुण्यवतां लभ्यं विभवं ध्वनयत्युत्तरार्धम् । सः पुरुक्षुः बहुनिधिनिलयभूतः रायः सम्पन्निधेः दुरः द्वाराणि व्यौर्णोत् विवृणोति । सः दमूनाः अन्तर्गृहवासी स्तृभिः नक्षत्रैः स्तीर्णैः शोभावहैस्तेजोविशेषैः नाकम् द्युलोकं पिपेश रूपसंपन्नं करोति ॥ श्रोषन्–श्रु श्रवणे, लेट् । पिपेश–पिश अवयवे ॥

इति प्रथमस्य पञ्चमे द्वादशो वर्गः

द्वादशेऽनुवाके पञ्चमं 'शुक्रः शुशुक्वाँ' इति पञ्चर्चं सूक्तम्। ऋषिच्छन्दोदेवताः पूर्ववत्॥

तत्र प्रथमामृचमाह—

शुक्रः शुशुकाँ उषो न जारः पप्रा समीची दिवो न ज्योतिः।
परि प्रजातः क्रत्वा बभूथ भुवो देवानां पिता पुत्रः सन्॥१॥
शुक्रः शुशुकान् उषः न जारः पप्रा समीची इति सम्ऽईची दिवः न ज्योतिः परि प्रऽजातः क्रत्वा बभूथ भुवः देवानां पिता पुत्रः सन्॥

उषो न जारः उषसो जरयिता कामयिता प्रियः इव शुक्रः शुभ्रवर्णः शुशुकान् दीप्ततरं प्रज्वलन्, दिवो न ज्योतिः द्युलोकस्य दीपभूतः सूर्य इव समीची संगते समाने वा द्यावापृथिव्यौ पप्रा पूरयिता स्वतेजसेति शेषः, त्वं क्रत्वा अस्माकमध्यवसायेन प्रजातः प्रकर्षेण प्रादुर्भूतः परि बभूथ अस्मान् परितः वर्तसे। त्वं पुत्रः सन् पुत्रो भवन्नपि देवानां पिता पालको भुवः भवसि॥ सर्वदेवप्रतिनिधिर्भगवानग्निः यजमाने जातः देवपुत्र इत्युपपद्यते। स एव सर्वदेवाधिकारपरिपालकश्च भवति, तस्मात् पिता॥ शुशुकान्—शुच दीप्तौ, लिटः क्वसुः। पप्रा—पॄ पालनपूरणयोः, किप्रत्ययः, सोर्डादेशः। समीची—संपूर्वात् अञ्चतेः क्विन्। बभूथ—बभूथ ततन्थ इति निपातनात् इडभावः॥

द्वितीयामृचमाह—

वेधा अदृप्तो अग्निर्विजानन्नूधर्न गोनां स्वाद्मा पितूनाम्।
जने न शेव आहूर्यः सन्मध्ये निषत्तो रण्वो दुरोणे॥२॥
वेधाः अदृप्तः अग्निः विऽजानन् ऊधः न गोनाम् स्वाद्म पितूनाम् जने न शेवः आऽहूर्यः सन् मध्ये निऽसत्तः रण्वः दुरोणे॥

विजानन् विशेषेण ज्ञानवान् अग्निः अदृप्तः दर्परहितो वेधाः विधाता स्रष्टा भवति। अग्निर्जानाति यथाकालं कर्तव्यं, यजमाने यद् व्यवस्थाप्यं स्रष्टव्यं वा, तस्मात् न साहसी, दर्पश्च साहसोपलक्षणं बोध्यम्। सः गोनाम् गवां ऊधर्न आपीनमिव, भवति पितूनाम् सोमानाम् स्वाद्म स्वादुङ्कारः, आस्वादयिता वा। जने मानुषे शेवो न सुखमय इव वर्तते। आहूर्यः अस्माभिराह्वातव्यः दुरोणे गृहे मध्ये मुख्यस्थाने रण्वः सन् रमणीयो भवन्, रममाणो वा

निषत्तः निषण्णो भवति ॥ गोनाम्–अपादान्तेऽपि नुट् । स्वाद्म–स्वाद आस्वादने, अन्तर्भावितण्यर्थः, मनिन्, सोर्लुक् । आहूर्यः–आङ्पूर्वात् ह्वयतेः संप्रसारणं, रेफोपजनश्छान्दसः ॥

तृतीयामृचमाह—

पुत्रो न जातो रण्वो दुरोणे वाजी न प्रीतो विशो वि तारीत् ।
विशो यदह्वे नृभिः सनीळा अग्निर्देवत्वा विश्वान्यश्याः ॥३॥
पुत्रः न जातः रण्वः दुरोणे वाजी न प्रीतः विशः वि तारीत् विशः यत्
अह्वे नृऽभिः सऽनीळाः अग्निः देवऽत्वा विश्वानि अश्याः ॥

दुरोणे गृहे रण्वः रममाणः पुत्रो न अस्माकं पुत्र इव जातः अजायत । प्रीतः संतुष्टः वाजी न जवनः अश्व इव विशः जनान् वितारीत् सुरक्षितान् तारयति संग्रामेषु । यत् यदा नृभिः देवैः सनीळाः समानवासस्थानाः विशः प्रजाः, दिव्यान् जनान् इत्यर्थः मानुषान् वा अह्वे आह्वयामि, तदा अग्निः विश्वानि सर्वाणि देवत्वा देवत्वानि अश्याः प्राप्नोति । अग्नेः सर्वदेवात्मकत्वात् देवतासहवासिनि वृन्दे आहूते अग्निः सर्वदेवमयत्वं प्रकटयति ॥ अश्याः–अशू व्याप्तौ, लिङ्, व्यत्ययेन परस्मैपदं मध्यमपुरुषश्च ॥

चतुर्थीमृचमाह—

नकिष्ट एता व्रता मिनन्ति नृभ्यो यदेभ्यः श्रुष्टिं चकर्थ ।
तत्तु ते दंसो यदहन्त्समानैर्नृभिर्यद्युक्तो विवे रपांसि ॥४॥
नकिः ते एता व्रता मिनन्ति नृऽभ्यः यत् एभ्यः श्रुष्टिम् चकर्थ तत्
तु ते दंसः यत् अहन् समानैः नृऽभिः यत् युक्तः विवेः रपांसि ॥

यत् यदा एभ्यः पूर्वोक्तेभ्यः नृभ्यः देवेभ्यः, मनुष्येभ्यो वा श्रुष्टिम् श्रुतिं, दिव्यश्रवणजन्यं ज्ञानं चकर्थ करोषि, तदा नकिः न कोऽपि ते तव संबन्धीनि एता व्रता इमानि कर्माणि मिनन्ति बाधन्ते, वचनव्यत्ययः, बाधते, नकिरिति कर्तृपदं एकवचनम् । अग्निविहितकर्मविशेषाणां न कुतश्चिद्राक्षसादिभ्यो विघातः संभवति । हे अग्ने, तत्तु तदेव ते तव दंसः कर्म यत्, समानैः त्वत्समैः नृभिः देवैः युक्तः संयुक्तः सन् त्वं अहन् हंसि, यत्, रपांसि बाधकानि

रक्षांसि पापानि वा विवेः विक्षिपसि अपसारयसीत्यर्थः । अत्र यच्छब्दद्वयं वर्तते, 'अहन्' इति यत्, 'विवे'रिति यत्, तत् ते दंसः इति संबन्धः ॥ मिनन्ति–मीञ् हिंसायाम्, क्र्यादिः । विवेः–वी गत्यादिषु, छन्दसि वर्तमाने लङ् ॥

पञ्चमीमृचमाह—

उषो न जारो विभावोस्रः संज्ञातरूपश्चिकेतदस्मै ।
त्मना वहन्तो दुरो व्यृण्वन्नवन्त विश्वे स्व१र्दृशीके ॥५॥

उषः न जारः विभाऽवा उस्रः संज्ञातऽरूपः चिकेतत् अस्मै त्मना वहन्तः दुरः वि ऋण्वन् नवन्त विश्वे स्वः दृशीके ॥

उषो न जारः उषसो जरयिता प्रिय इव, सोऽग्निः विभावा विशिष्टप्रभायुक्तः उस्रः कान्तिमान् । अस्मै जनाय संज्ञातरूपः संज्ञातं सम्यग्विदितं रूपं स्वरूपं यस्यासौ, तथाभूतो भवतु । चिकेतत् जानातु, उपासकाय जनाय प्रदर्शितस्वरूपः अग्निः स्वयं तस्य ज्ञाने प्रादुर्भवत्वित्याशयः । विश्वे सर्वेऽपि त्मना स्वयमेव वहन्तः तमग्निं बिभ्रतः सन्तः दुरः द्वाराणि व्यृण्वन् विवृत्य गच्छन्तु, गत्वा च स्वः स्वर्लोकस्य ज्योतिरात्मनः सूर्यस्य दृशीके दर्शने नवन्त चलन्तु ॥ 'विश्वे' के? रश्मय इति सायणः, सर्वे देवा इति वयं पूर्वप्रकृतापेक्षया । स्वर्गद्वारापावरणेन ज्योतिर्दर्शने गतिः संभवति ॥ ऋण्वन्–रुवेर्गत्यर्थात् लुङ्, छान्दसः, व्यत्ययेन रेफस्य संप्रसारणम् इति सायणः, अथवा ऋणु गतौ इत्यस्मात् ॥

इति प्रथमस्य पञ्चमे त्रयोदशो वर्गः

द्वादशेऽनुवाके षष्ठं सूक्तं, 'वनेमे'ति अध्ययनतः षड्ऋचम् । ऋषिच्छन्दोदेवताः पूर्ववत् ॥

तत्र प्रथमामृचमाह—

वनेमं पूर्वीरर्यो मनीषा अग्निः सुशोको विश्वान्यश्याः ।
आ दैव्यानि व्रता चिकित्वाना मानुषस्य जनस्य जन्म ॥१॥

वनेमं पूर्वीः अर्यः मनीषा अग्निः सुऽशोकः विश्वानि अश्याः आ दैव्यानि व्रता चिकित्वान् आ मानुषस्य जनस्य जन्म ॥

वयं पूर्वीः बह्वीः सम्पदः वनेम संभजेमहि, प्राप्नुयाम। मनीषा मनीषया बुद्ध्या अर्यः स्वामी, बुद्धिसम्पन्नत्वात् स्वामित्वमग्नेः, मनीषया अर्यः प्राप्तव्य इत्येके, सुशोकः सुतरामुज्ज्वलन् अग्निः, विश्वानि सर्वाणि सन्ति वस्तूनि अश्याः प्राप्नुयात्, स्वामी सर्वस्यापि स्वाम्यं लभतां, सर्वं स्वाधीनं करोतु। सः दैव्यानि देवसंबन्धीनि व्रता व्रतानि कर्मविधानानि आ चिकित्वान् समन्तात् सार्वात्म्येनेत्यर्थः ज्ञातवान्। तथा सः मानुषस्य जनस्य मनुष्यस्य जन्म उत्पत्तिं आ चिकित्वान्, मानुषस्योत्पत्त्यादिरहस्यं च जानाति॥ पूर्वीः-पुरुशब्दात् ङीष्। मनीषा-ईषाअक्षादित्वात् प्रकृतिभावः। सुशोकः-शुच दीप्तौ, भावे घञ्। अश्याः-अशू व्याप्तौ, व्यत्ययेन परस्मैपदम्। चिकित्वान्-कित ज्ञाने, लिटः क्वसुः॥

द्वितीयामृचमाह—

गर्भो यो अपां गर्भो वनानां गर्भश्च स्थातां गर्भश्चरथाम्।
अद्रौ चिदस्मा अन्तर्दुरोणे विशां न विश्वो अमृतः स्वाधीः॥२॥

गर्भः यः अपाम् गर्भः वनानाम् गर्भः च स्थाताम् गर्भः चरथाम्
अद्रौ चित् अस्मै अन्तः दुरोणे विशाम् न विश्वः अमृतः सुऽआधीः॥

यः योऽसावग्निः अपाम् गर्भः अपां शिशुः, अप्सु जातत्वात् वनानाम् गर्भः भूतनूरुहाणां शिशुः, यद्यपि 'आपः वनं' इति सङ्केतशब्दौ क्रमशः शक्तीनां पुत्रः आनन्दानां पुत्र इति च प्रतिपादयतः, तथापि सर्वान्तर्यामी भगवानग्निः चराचरात्मकाज्जगतः यथाकालं यथाविधि यथास्वीयदैवरहस्यं प्रादुर्भवतीति बोध्यम्। तदेव स्पष्टीक्रियते। स्थाताम् च गर्भः स्थावराणां च शिशुः चरथाम् गर्भः तथा जङ्गमानां शिशुः। अद्रौ चित् अश्मन्यपि अस्मै मानुषाय वर्तते, दुरोणे गृहे अन्तः मध्ये, गृहमध्ये वर्तते। विशाम् जनानां सर्वेषां विश्वो न समष्टिभूत एको विश्वात्मेव भवति। सः अमृतः मरणरहितः नित्यः, स्वाधीः सुष्ठु आध्याता साधिष्ठो ध्यानी॥ स्थाताम्-तिष्ठतेः क्विप्, छान्दसस्तुक्, आमि अन्त्यलोपश्छान्दसः। चरथाम्-चरतेरथप्रत्ययः, आमो नुडभावः। विश्वः-विश प्रवेशने, अस्मादन्तर्भावितण्यर्थात् क्वनिप्रत्ययः॥

तृतीयामृचमाह—

स हि क्षपावाँ अग्नी रयीणां दाशद्यो अस्मा अरं सूक्तैः।
एता चिकित्वो भूमा नि पाहि देवानां जन्म मर्तांश्च विद्वान्॥३॥

सः हि क्षपाऽवान् अग्निः रयीणाम् दाशत् यः अस्मै अरम् सुऽउक्तैः एता चिकित्वः भूम नि पाहि देवानाम् जन्म मर्तान् च विद्वान् ॥

सः हि स खलु अग्निः, क्षपावान् रात्रीणां प्रभुः, यजमानस्य अप्रकाशदशासु तस्य कर्तव्यं करोति जाग्रत् प्रभुरग्निः, यः मनुजः अस्मै अग्नये सूक्तैः सुष्ठु निष्पन्नैः मन्त्रात्मकैर्वचनैः अरम् अलं पर्याप्तं यज्ञं तनोति, स्तोत्रं करोति वा तस्मै जनाय रयीणां सम्पदां, विभक्तिव्यत्ययः, सम्पदः अथवा सम्पदां यथेष्टभागं दाशत् ददाति। हे चिकित्वः ज्ञानवन्, त्वं एता एतानि भूमा भुवनानि देवानाम् जन्म देववृन्दप्रादुर्भावं मर्तान् च मर्त्यान् मानुषांश्च विद्वान् जानन् असि, तस्मात् सर्वाण्येतानि नि पाहि नितरां रक्ष ॥ दाशत्-दाशृ दाने, लेट्। चिकित्वः-मतुवसोरिति नकारस्य रुत्वम्। भूम-भूमिशब्दादुत्तरस्या द्वितीयाया डादेशः, पदपाठे ह्रस्वश्छान्दसः ॥

चतुर्थीमृचमाह—

वर्धान्यं पूर्वीः क्षपो विरूपाः स्थातुश्च रथमृतप्रवीतम् ।
अराधि होता स्वर्निषत्तः कृण्वन्विश्वान्यपांसि सत्या ॥४॥

वर्धान् यम् पूर्वीः क्षपः विऽरूपाः स्थातुः च रथम् ऋतऽप्रवीतम् अराधि होता स्वः निऽसत्तः कृण्वन् विश्वानि अपांसि सत्या ॥

पूर्वीः बह्वीः विरूपाः विविधाकाराः क्षपः रात्रयः यम् यमग्निं वर्धान् वर्धयन्ति, अप्रकाशदशासु रात्रिपदवेदनीयासु अग्नेर्वर्धनं भवत्येव, न तस्य तमोवृतत्वम्, एकैकापि तादृशी दशा अन्यादृशी, एवं स्वस्यवैलक्षण्यं द्योतयितुं रात्रीणां बहुवचनम्। स्थातुः स्थावरं रथम् च रंहणशीलं जङ्गमं च, चराचरात्मकमित्यर्थः ऋतप्रवीतम् ऋतेन सत्येन प्रवीतं प्रकर्षेण आविर्भावितं, सत्यात् प्रादुर्भूयागतमित्यर्थः, एवंभूतं यमग्निं वर्धयन्ति होता आह्वाता सोऽग्निः अराधि असाधि अस्मदर्थं साधितः, निष्पादितो भवतीत्यर्थः। कथंभूतः? स्वः ज्योतिर्मये स्वर्लोके निषत्तः निषण्णः आसीनः, विश्वानि सर्वाणि अपांसि कर्माणि अस्मदीयानि सत्या सत्यानि कृण्वन् कुर्वन्, एवंभूतः अराधि ॥ वर्धान्-वृधेर्ण्यन्ताल्लेट्, णिलोपः। अराधि-राध साध संसिद्धौ, लुङ् ॥

पञ्चमीमृचमाह—

गोषु प्रशस्तिं वनेषु धिषे भरन्त विश्वे बलिं स्वर्णः ।
वि त्वा नरः पुरुत्रा सपर्यन्पितुर्न जित्रेर्वि वेदो भरन्त ॥५॥
गोषु प्रऽशस्तिम् वनेषु धिषे भरन्त विश्वे बलिम् स्वः नः वि त्वा नरः पुरुऽत्रा सपर्यन् पितुः न जित्रेः वि वेदः भरन्त ॥

हे अग्ने, त्वं गोषु गवात्मना वर्ण्यमानेषु सौरेषु रश्मिषु चिन्मयेषु, तथा वनेषु वननीयेषु सुखमयेषु भूजातेषु पार्थिवतनुसंभूतेषु च प्रशस्तिम् प्रशंसां त्वदीयां उक्तिं धिषे धारयसि, प्रतिष्ठापयसि, यजमानस्य ऋषेः ज्ञानप्रकाशवृत्तिषु सुखानुभूतिषु च अग्निप्रशंसा प्रतिष्ठिता भवतीत्यर्थः। विश्वे सर्वेऽपि देवाः नः अस्मदर्थं स्वः स्वर्लोकं बलिम् उपहारं भरन्त आहरन्ति। यस्यान्तर्याजिनः पुण्यपुरुषस्य भगवानग्निः स्वर्निषत्त इत्याद्युक्तलक्षणसंपन्नः 'अराधि', तस्मै विश्वेऽपि देवाः स्वः उपायनं आहरन्ति। अस्य वाक्यस्य प्रतिध्वनिस्तैत्तिरीयश्रुतौ श्रूयते 'सर्वेऽस्मै देवा बलिमावहन्ति' इति। हे अग्ने, त्वा त्वां नरः मनुष्याः पुरुत्रा बहुषु स्थानेषु वि सपर्यन् विशेषेण पूजयन्ति, तथा सपर्यया जित्रेः वृद्धात् पितुर्न पितुः सकाशादिव वेदो ज्ञानं धनं वा वि भरन्त विशिष्य आहरन्ति, पितुर्धनं इव अग्नेर्ज्ञानं इति बोध्यम्॥ धिषे–छान्दसो वर्तमाने लिट्। भरन्त–हृञ् हरणे, केवलोऽपि सोपसर्गार्थः। पुरुत्रा–सप्तम्यर्थे त्राप्रत्ययः। जित्रेः–जॄष् वयोहानौ, अस्मात् किन्, ऋत इद्धातोरिति इत्वं, रेफवकारयोर्विपर्ययः, एवं जिव्रिः॥

द्विपदां षष्ठीमृचमाह—

साधुर्न गृध्नुरस्तेव शूरो यातेव भीमस्त्वेषः समत्सु ॥६॥
साधुः न गृध्नुः अस्ताऽइव शूरः याताऽइव भीमः त्वेषः समत्ऽसु ॥

सः साधुर्न साधयिता इव, कर्मणामिति शेषः, गृध्नुः अत्यन्तस्पृहयालुः अभिमतं ग्रहीतुमिति शेषः। अस्तेव इष्वस्त्रक्षेप्ता इव शूरः शौर्योपेतः। यातेव समरे अभियोद्धेव भीमः भयङ्करः। समत्सु सङ्ग्रामेषु त्वेषः जाज्वल्यमाना प्रभा च भवति॥ गृध्नुः–गृधु अभिकाङ्क्षायाम्, अस्मात् क्नुः॥ शूरः–शु गतौ, अन्तर्भावितण्यर्थादस्मात् क्रन्॥

इति प्रथमस्य पञ्चमे चतुर्दशो वर्गः

द्वादशेऽनुवाके 'उप प्रे'ति सप्तमं दशर्चं सूक्तम् पराशरस्यार्षं त्रैष्टुभं आग्नेयम् ॥

तत्र प्रथमामृचमाह—

उप॒ प्र जि॑न्वन्नुश॒तीरु॒शन्त॑ं पति॑ं न नित्यं॑ जन॑यः सनी॑ळाः ।
स्वसा॑रः श्याव्यी॒मरु॑षीमजु॒ष्रञ्चि॒त्रमु॒च्छन्ती॑मु॒षस॑ं न गाव॑ः ॥१॥

उप॑ प्र जि॒न्व॒न् उ॒श॒तीः उ॒शन्त॑म् पति॑म् न नित्य॑म् जन॑यः सऽनी॑ळाः स्वसा॑रः श्याव्यी॑म् अरु॑षीम् अ॒जु॒ष्रन्॒ चि॒त्रम् उ॒च्छन्ती॑म् उ॒षस॑म् न गाव॑ः ॥

सनीळाः समानवासस्थानाः जनयः मातरः उशन्तम् कामयमानं (अग्निं) उशतीः कामयमानाः सत्यः नित्यम् पतिम् न शाश्वतं भर्तारमिव उप उपेत्य प्र जिन्वन् प्रकर्षेण अतोषयन् । उषसम् गावः न उषःकालं रश्मयः यथा प्रीत्या सेवन्ते, उषसि यथा रताः सन्तुष्टा भवन्तीत्यर्थः, तथा स्वसारः सहोदर्यः तमग्निं अजुष्रन् असेवन्त तस्मिन्नग्नौ तुष्टा अभवन् । अत्र 'उषसं गावो न' इति नेदमुपमामात्रम् । अत्र सङ्केतार्थो बोध्यः । ऋतज्योतिःप्रादुर्भावात् प्राक् प्रज्ञाप्रभाते उषःशब्दप्रतिपादिते 'गावः' चिद्रश्मयः यथा तुष्टा भवन्ति तथा 'मातरः' अग्निं प्रीणयन्ति, 'स्वसार'स्तं जुषन्ते ॥ सङ्केतशब्दाः आपः सिन्धवः धेनवो वा मातरो भवन्ति । पोषकत्वान्मातरः, साहचर्यात् स्वसारः इति बोध्यम् । भूमिकायां वैश्वामित्रस्य आग्नेयसूक्तस्योदाहरणे रहस्यार्थः प्रत्यपादि (पृ. ७६-७७) । अथ कीदृशं उषसम्? श्यावीम् श्यामवर्णां सांध्यं तेजो बिभ्रतीं अरुषीम् आरोचमानां चित्रं उच्छन्तीम् विविधवर्णसम्पदा प्रकाशमानाम्, उषसं इति संबन्धः ॥ अत्रेदमवधार्यम् । उषःकाले यथा क्रमशः प्रथमं रात्रिसंबन्धात् श्यावो वर्णः, ततः अरुणः, ततः चित्रोज्ज्वलश्च भवति, तथा उषसि चित्प्रभातेऽपि अनुक्षणं विविधं प्रकाशवैशिष्ट्यं लक्षणीयम् ॥ जिन्वन्—जिवि प्रीणने, लेट् । उशतीः—वष्टेः शतरि ङीप् । श्यावीम्—शु गतौ, अस्माद्वन्, शार्ङ्गरवादित्वात् ङीन् । अजुष्रन्—जुषतेः लङ्, व्यत्ययेन परस्मैपदम्, अन्तादेशस्य रुडागमः ॥

द्वितीयामृचमाह—

वी॒ळु चि॑द् दृ॒ळ्हा पि॒तरो॑ न उ॒क्थैरद्रिं॑ रुजन्नङ्गिरसो॒ रवे॑ण ।
च॒क्रुर्दि॒वो बृ॑ह॒तो गा॒तुम॒स्मे अह्नः॑ स्व॒र्विविदुः॑ के॒तुमु॒स्राः ॥२॥

वीळु चित् दृळ्हा पितरः नः उक्थैः अद्रिम् रुजन् अङ्गिरसः रवेण
चक्रुः दिवः बृहतः गातुम् अस्मे इति अहरिति स्वः विविदुः केतुम् उस्राः ॥

नः अस्माकं पितरः ऋषयः पूर्वे उक्थैः शस्त्रशब्दवाच्यैः मन्त्रवचनैः वीळु चित् वीळूनि बलवन्ति अपि दृळ्हा दृढानि स्थानानि रुजन् अरुजन्, अभञ्जन्। ते अङ्गिरसः पूर्वोक्ता ऋषयः रवेण मन्त्रध्वनिना, हुङ्कारमात्रेण वा अद्रिम् दुर्भिदं शिलोच्चयं अरुजन्। अथ च ते अस्मे अस्मदर्थं अस्मासु बृहतः महतः दिवः द्युलोकस्य गातुम् मार्गं चक्रुः अकुर्वन्। अपि च, अहः नित्यप्रकाशोपलक्षणं दिवसं स्वः स्वर्लोकं केतुम् केतयितारं प्रज्ञापयितारं चिद्रश्मिविशेषं उस्राः भ्राजमानाः गोपदवेदनीयाः भासः विविदुः अजानन्, ज्ञात्वा लेभिर इत्यर्थः ॥ अङ्गिरसः सरमापुरःसरेण इन्द्रेण सह पणीनां पर्वतं गत्वा भित्त्वा च तं अलभन्त गाः इति आङ्गिरसतत्त्वविचारे रहस्यं प्रतिपादितम्। इदमत्र विशेषतोऽवधेयम्। तेन कर्मणा नः पूर्वे 'सत्यं ऋतं बृहत्' इति वेदोद्घोषितस्य तुरीयस्य धाम्नः मार्गं प्रथमं दृष्ट्वा मानुषाय तं आवेद्य प्रकाशयामासुः। स्वः इति तृतीयव्याहृतेः परस्तात् तुरीयेयं व्याहृतिः मह इति प्रथिता। अस्याः मार्गमात्रं चक्रुः, स्वर्लोकादिकं तु विविदुः, अयं विशेषो बोद्धव्यः॥ वीळु–विभक्तेर्लुक्। दृळ्हा–दृढः स्थूले बले च, सुपां सुलुगिति डादेशः। रुजन्–रुज भङ्गे, लङ्। विविदुः–विद ज्ञाने विद्लृ लाभे वा, लिट्॥

तृतीयामृचमाह—

दधन्नृतं धनयन्नस्य धीतिमादिदर्यो दिधिष्वो३ विभृत्राः।
अतृष्यन्तीरपसो यन्त्यच्छा देवाञ्जन्म प्रयसा वर्धयन्तीः ॥३॥

दधन् ऋतम् धनयन् अस्य धीतिम् आत् इत् अर्यः दिधिष्वः विऽभृत्राः
अतृष्यन्तीः अपसः यन्ति अच्छ देवान् जन्म प्रयसा वर्धयन्तीः ॥

ते अङ्गिरसः ऋतम् सत्यं दधन् अधारयन्। अस्य मनुष्यस्य धीतिम् धियं, ध्यानशक्तिं वा धनयन् समृद्धां अकुर्वन्। आत् इत् अनन्तरमेव अर्यः स्वामिनः, स्वाम्यं प्राप्ताः दिधिष्वः धारणधीसम्पन्नाः विभृत्राः विशालं यथा तथा अग्निं भर्तुं समर्थाश्च अभवन्। अतृष्यन्तीः विषयान्तरतृष्णारहिताः अपसः क्रियापराः शक्तयः देवान् देवान् प्रति अच्छा अभिमुखीभूय

जन्म नव्यं दिव्यं जननं प्रयसा प्रियेण आनन्देन वर्धयन्तीः वर्धयन्त्यः सत्यः यन्ति गच्छन्ति॥ यदा अङ्गिरसः सत्यं दधानाः मानुषीं धियं च समर्धयन्ति, तदैव ते अग्निं विशिष्य विततं वा भर्तुं स्वामिनो भवन्ति। तस्य फलं तु-शक्तयः क्रियापराः देवान् प्रति गच्छन्ति, येन नव्यस्य दिव्यस्य जन्मन आनन्देन वर्धनं भवति॥ दिधिष्वः-दधातिः स्यतिरिति धातुभ्यां द्वाभ्यां कूप्रत्ययान्तो निपातितः। विभृत्राः-औणादिकः त्रन्प्रत्ययः। अतृष्यन्तीः-जितृषा पिपासायाम्, शतरि, विभक्तिव्यत्ययः। अपसः-अपस्शब्दान्मत्वर्थीयस्य विनः लुक्॥

चतुर्थीमृचमाह—

मथीद्यदीं विभृतो मातरिश्वा गृहेगृहे श्येतो जेन्यो भूत्।
आदीं राज्ञे न सहीयसे सचा सन्ना दूत्यं भृगवाणो विवाय॥४॥

मथीत् यत् ईम् विऽभृतः मातरिश्वा गृहेऽगृहे श्येतः जेन्यः भूत्
आत् ईम् राज्ञे न सहीयसे सचा सन् आ दूत्यम् भृगवाणः विवाय॥

यत् यदा गृहे गृहे प्रतिगृहं प्रतिशरीरं विभृतः व्याप्य अन्तर्धारितः मातरिश्वा वायुः मुख्यः प्राणः ईम् एनं अग्निं मथीत् अमथ्नात् मथनेनोत्पादितवान् भवति, तदा सः अग्निः श्येतः श्वेतः शुभ्रः जेन्यः जेता भूत् भवति। आत् अनन्तरं भृगवाणः भृगुरिवाचरन् जाज्वल्यमानो द्रष्टा भूत्वेत्यर्थः सचा सन् अस्माकं सखा भवन् सहीयसे बलीयसे राज्ञे न नृपायेव ईम् एनत् दूत्यम् दूतकर्म आविवाय प्राप्नोति, दूत्यमनुतिष्ठति-सत्यज्योतिष इत्यर्थः॥ अत्रेदमवधेयम्। अन्तर्धारितः पूरितो व्याप्तः प्राणः योगाग्निं मथित्वा प्रकटयतीत्यधुनातनयोगविद्यातत्त्वं चिरन्तनार्षरहस्यैकदेशभूतमिति बोध्यम्। प्रतिशरीरं इत्यत्र बहूनां शरीराणि ग्राह्याणि सामाजिकः चेद्योगः, अन्यथा एकस्यैवान्तर्याजिनः नैकानि स्थूलादीनि शरीराणीति ग्राह्यम्। अग्निः श्वेतः स्वच्छ इति वृद्धिं सत्त्वसमृद्धिं द्योतयति, अत एव जेता तमःप्रभवाणां अरातीनाम्। स 'भृगवाणः', भृगुर्ज्वलन् द्रष्टा, सौरो रश्मिः, अग्नेः यजमानाश्रयस्य यदा सौरांशुरूपत्वं सम्पद्यते तदा तस्य महते राज्ञे सूर्याय सत्यज्योतिषे सर्वदेवात्मने दूत्याधिकारः सिध्यति। 'भृगवे मातरिश्वा रातिं भरत् अग्निं दूत'मित्यन्यत्र मातरिश्वकृत्यमुक्तं स्मार्यम् (१.६०.१)। भृगूणां सौरांशुत्वप्रतिपादको मन्त्रवर्णोऽन्यत्र भवति॥ "यदि भृगुभ्यः परि मातरिश्वा गुहा सन्तं हव्यवाहं समीधे" (३.५.१०) 'भृगुभ्यः आदित्यरश्मिभ्यः' इति सायणः॥ मथीत्-मथि विलोडने, लुङ्। जेन्यः-जि जये, अस्मात् कृत्यल्युटः यत् नुडागमश्च। विवाय-वी गत्यादिषु, लिट्॥

पञ्चमीमृचमाह—

महे यत्पित्र ईं रसं दिवे करव त्सरत्पृशन्यश्चिकित्वान् ।
सृजदस्ता धृषता दिद्युमस्मै स्वायां देवो दुहितरि त्विषिं धात् ॥५॥

महे यत् पित्रे ईम् रसम् दिवे कः अव त्सरत् पृशन्यः चिकित्वान् सृजत् अस्ता धृषता दिद्युम् अस्मै स्वायाम् देवः दुहितरि त्विषिम् धात् ॥

महे महते पित्रे दिवे पितृभूताय द्युलोकाय ईम् एनम् रसम् सारभूतं द्रव्यं यत् यदा कः अकरोत् तदा पृशन्यः संस्पृष्टवान् चिकित्वान् ज्ञानवांश्च सः अव त्सरत् अधस्तात् च्यवमान आगतः । अस्ता क्षेप्ता बाणस्य, धानुष्कः अस्मै एनं लक्ष्यीकृत्य धृषता धार्ष्ट्येन, प्रचण्डं यथा तथेत्यर्थः दिद्युम् विद्युद्रूपं बाणं सृजत् असृजत् अक्षिपत् । देवः स देवस्तु स्वायाम् आत्मीयायां दुहितरि समनन्तरभाविन्यामुषसि त्विषिम् दीप्तां प्रभां धात् अधात् स्थापयामास ॥ दुर्बोधं ऋचोऽस्यास्तात्पर्यम् । कः रसं अकरोत् ? किं यजमानाय अग्निः, उत यजमान एव महते पित्रे रसमकरोत् ? यजमानकृत्यनिर्वाही अग्निरेव रसं यजमानान्निष्पाद्य महते पित्रेऽर्पयति । कः स्पर्शवान् ज्ञानवांश्च अधश्च्यवमान आगतः ? तथा रसार्पणे कृते अग्निरेव महतः पितुः स्वर्लोकस्य स्पर्शवान् ज्ञानवांश्च संपद्यते । तदा द्युलोकादुत्तमचिद्भूमेः अधश्च्युतो भवति यजमानाय । मार्गे मध्यमस्थाने दैव्यकर्मविघातको राक्षसादिकः दूरादेवास्त्रं क्षिपति अग्निमभिलक्ष्य, स्वयमलक्षितः । तत्रान्तरे भगवानग्निः पित्र्यं बलं तेजो ज्ञानं च लब्धवान् पृथिवीं प्राप्नोत्येव, यजमाने चित्प्रभाताय ज्वलितां वीर्यवतीं शक्तिं स्थापयति । अत एव "दुहितरि त्विषिं धात्" इत्युक्तम् । उषा हि दुहिता दिवः, अग्नेः प्रादुर्भावः चिद्विभाताय कल्पते ॥ कः—करोतेर्लुङ्, मन्त्रे च्लेर्लुक् । त्सरत्—त्सर छद्मगतौ, लेट्यडागमः । पृशन्यः—स्पृश संस्पर्शने, सलोपश्छान्दसः । दिद्युम्—दिद्युत् वज्रनाम, अन्त्यलोपश्छान्दसः । धात्—छान्दसो वर्तमाने लुङ् ॥

षष्ठीमृचमाह—

स्व आ यस्तुभ्यं दम आ विभाति नमो वा दाशादुशतो अनु द्यून् ।
वर्धीं अग्ने वयो अस्य द्विबर्हा यासद्राया सरथं यं जुनासि ॥६॥

स्वे आ यः तुभ्यम् दमे आ विऽभाति नमः वा दाशात् उशतः अनु द्यून् वर्धो इति अग्ने वयः अस्य द्विऽबर्हाः यासत् राया सऽरथम् यम् जुनासि ॥

यः यजमानः तुभ्यम् त्वामुद्दिश्य स्वे दमे तव स्वकीये गृहे आ विभाति प्रज्वलयति, अत्र "आ" द्वयं वर्तते, एक आकारो मर्यादायामिति सायणः, उशतः यं च जनं कामयमानाय ते, विभक्तिव्यत्ययः, अनु द्यून् अनुदिनं नमो वा शरणागतिलक्षणं नमस्कारं वा दाशात् ददाति। अस्य तादृशस्य यजमानस्य वयः वर्धनं द्विबर्हाः द्वयोः स्थानयोः, इह मानुषे परत्र दैव्ये च पदे, बृंहितः वर्धितस्त्वं वर्धः पोषय, तं सुतरामभिवर्धय उभयत्रेत्यर्थः। हे अग्ने, यम् यादृशं जनं त्वं सरथम् समानरथं, त्वया सहैकरथं स्थापयित्वा जुनासि सत्वरं प्रेरयसि, सः राया सम्पदा युक्तः सन् यासत् प्रयाणं करोतु॥ दाशात्-दाशृ दाने, लेट्। उशतः-वष्टेः शतृ। अनुद्यून्-द्युरित्यहर्नाम, लक्षणे अनोः कर्मप्रवचनीयत्वं, तद्युक्ते द्वितीया। वर्धः-वृधेर्ण्यन्ताल्लोट्, णिलोपः। यासत्-या प्रापणे, लेट्। जुनासि-सौत्रो धातुः, व्यत्ययेन श्ना॥

सप्तमीमृचमाह—

अग्निं विश्वा अभि पृक्षः सचन्ते समुद्रं न स्रवतः सप्त यह्वीः।
न जामिभिर्वि चिकिते वयो नो विदा देवेषु प्रमतिं चिकित्वान् ॥७॥

अग्निम् विश्वाः अभि पृक्षः सचन्ते समुद्रम् न स्रवतः सप्त यह्वीः न जामिऽभिः वि चिकिते वयः नः विदाः देवेषु प्रऽमतिम् चिकित्वान्॥

विश्वाः सर्वाः पृक्षः प्रीणयित्र्यः, प्रीतयः, अग्निम्, अभि सचन्ते अभिमुखीभूय सञ्जन्ते, तस्मिन् सक्ता भवन्ति। तत्र दृष्टान्तः-यह्वीः बलेन महत्यः सप्त सप्तसंख्याकाः स्रवतः स्रवन्त्यः नद्यः समुद्रम् न समुद्रं यथा गच्छन्ति तद्वत्। नः अस्माकं वयः अभिवृद्धिः जामिभिः तव ज्ञातिभिः सखिभिः न विचिकिते न ज्ञायते, देवैर्नालक्षि। चिकित्वान् ज्ञातवान् त्वं देवेषु मध्ये प्रमतिम् तत् प्रकृष्टं ज्ञानं विदा लम्भय, ज्ञापय वा। अस्मदीयाभिवृद्धिर्देवैर्न लक्षिता, तव तु विदिता, तस्मात् देवसदसि ज्ञापय, अथवा देवेषु विषये अस्माकं ज्ञानं सम्पादय इति वा॥ पृक्षः-पृणक्तेः औणादिकः क्विप्, धातोः षुगागमः, यद्वा असुनि जसो लुक्। अन्ये गताः॥

अष्टमीमृचमाह—

आ यदिषे नृपतिं तेज आनट् शुचि रेतो निषिक्तं द्यौरभीके।
अग्निः शर्धमनवद्यं युवानं स्वाध्यं जनयत्सूदयच्च ॥८॥

आ यत् इषे नृऽपतिम् तेजः आनट् शुचि रेतः निऽसिक्तम् द्यौः अभीके

अग्निः शर्धम् अनवद्यम् युवानम् सुऽआध्यम् जनयत् सुदयत् च ॥

यत् यदा नृपतिम् मनुष्याणां पतिं एनमग्निं आ समन्तात् इषे प्रेरणाशक्तये तेजः दीप्तिबलविशेषः आनट् व्याप्नोत्, यदा च अभीके आभिमुख्येन समागमे, सामर्थ्याद् दिवः अग्नेश्च समागमे, द्यौः द्युलोकः स्वर्लोक एव शुचि शुभ्रं रेतः बीजभूतं तेजः निषिक्तम् तस्मिन्नग्नौ आहितं अभूत्, तदा अयं अग्निः, शर्धम् महद्बलं, मारुतं गणं वा, जनयत् अजनयत् सुदयच्च प्रैरयच्च । कीदृशं शर्धम्? अनवद्यम् दोषरहितं, युवानम् यौवनसंपन्नं, इदं मदबलोपलक्षणं स्वाध्यम् साधिष्ठतम-आध्यानपरम् । आनट्-अशू व्याप्तौ, लङ्, व्यत्ययेन परस्मैपदं श्नम् च, आडागमः । निषिक्तम्-षिचिर् क्षरणे, कर्मणि निष्ठा । अभीके-अभिपूर्वात् अञ्चतेः पृषोदरादित्वाद्रूपसिद्धिः, अथवा इण्गताविरयस्मात् कक्प्रत्ययः । जनयत्, सुदयत्-जनी प्रादुर्भावे, षूद क्षरणे, लेट् ॥

नवमीमृचमाह—

मनो न योऽध्वनः सद्य एत्येकः सत्रा सूरो वस्व ईशे ।
राजाना मित्रावरुणा सुपाणी गोषु प्रियममृतं रक्षमाणा ॥९॥

मनः न यः अध्वनः सद्यः एति एकः सत्रा सूरः वस्वः ईशे राजाना मित्रावरुणा सुपाणी इति सुऽपाणी गोषु प्रियम् अमृतम् रक्षमाणा ॥

यः एकः असहायः सन् एकाकी मनो न मन इव सद्यः क्षणात् युगपद् वा अध्वनः मार्गान् सर्वान् एति गच्छति, सः सूरः सूर्यः वस्वः सर्वस्यापि सत्त्वात्मकस्य धनस्य सत्रा सहैव ईशे ईश्वरो भवति । मित्रावरुणा मित्रो वरुणश्च उभौ राजाना सुपाणी चारुहस्तौ गोषु गोशब्दवाच्येषु सौरेषु चिन्मयेषु रश्मिषु प्रियम् आनन्दं अमृतम् मरणरहितं नित्यं वस्तु च रक्षमाणा रक्षन्तौ भवतः । यजमानस्य सर्वज्ञानशक्तिसम्पन्नेनाग्निना नीयमानस्य यजनं यात्रा वा उत्तमे सौरे पदे पर्यवस्यति, तस्मात्सूर्यो वर्णितः ॥ ईशे-ईश ऐश्वर्ये, लोपस्त आत्मनेपदेष्विति तलोपः ॥

दशमीमृचमाह—

मा नो अग्ने सख्या पित्र्याणि प्र मर्षिष्ठा अभि विदुष्कविः सन् ।
नभो न रूपं जरिमा मिनाति पुरा तस्या अभिशस्तेरधीहि ॥१०॥

मा नः अग्ने सख्या पित्र्याणि प्र मर्षिष्ठाः अभि विदुः कविः सन्
नभः न रूपम् जरिमा मिनाति पुरा तस्याः अभिऽशस्तेः अधि इहि ॥

हे अग्ने, पित्र्याणि पितृपरम्परागतानि पूर्व्याणि नः अस्माकं सख्या सख्यानि मा प्रमर्षिष्ठाः मा विस्मार्षीः, मा तिरस्कार्षीः, मा निर्धर्षितानि कुरु वा। त्वं विदुः विद्वान् कविः द्रष्टा च सन् अभि अस्मानभिमुखीभूय वर्तसे। नभः तुषारावृतं नभः अन्तरिक्षं रूपं न दृश्यं वस्तु यथा मिनाति हिनस्ति मन्दायमानं करोति, तथा जरिमा जरा अस्मान् मिनाति क्षपयति। तस्याः जरायाः अभिशस्तेः अभिघातात् पुरा प्रागेव अधीहि अधिगच्छ एहि बुध्यस्व, जरागतेः पूर्वमेव प्रसन्नो भूत्वा कर्तव्यं कुरु ॥ अनेन ऋषीणामाद्यानां अतिचिरन्तनमविच्छिन्नं किमपि अग्निसंबन्धि रहस्यं सख्यमासीदिति स्पष्टम्। नेदं भौतिकाग्निसंबन्धीति किमु वक्तव्यम्? मर्षिष्ठाः—मृष तितिक्षायां, छान्दसो लुङ्। विदुः—विद ज्ञाने, बहुलमन्यत्रापि इति उसिप्रत्ययः। जरिमा—जॄष् वयोहानौ, औणादिको भावे इमनिच्प्रत्ययः। अधीहि—इक् स्मरणे, अधिपूर्वो धातुः ॥

इति प्रथमस्य पञ्चमे षोडशो वर्गः

द्वादशेऽनुवाके 'नि काव्ये'ति दशर्चं अष्टमं सूक्तं त्रैष्टुभं आग्नेयं पराशरस्यार्षम् ॥

तत्र प्रथमामृचमाह—

नि काव्या वेधसः शश्वतस्कर्हस्ते दधानो नर्या पुरूणि।
अग्निर्भुवद्रयिपती रयीणां सत्रा चक्राणो अमृतानि विश्वा ॥१॥
नि काव्या वेधसः शश्वतः कः हस्ते दधानः नर्या पुरूणि अग्निः
भुवत् रयिऽपतिः रयीणाम् सत्रा चक्राणः अमृतानि विश्वा ॥

सोऽग्निः शश्वतः शाश्वतस्य, नित्यस्य वेधसः विधातुः, स्रष्टुः पुरूणि बहूनि नर्या नर्याणि नृषु देवेषु साधूनि बलानि, देवतावैभवानीति यावत् हस्ते स्वीये हस्ते दधानः धारयमाणः सन् काव्या काव्यानि कविकर्माणि द्रष्टृप्रज्ञात्मकानि मन्त्ररूपस्तोत्राणि नि कः नितरां अस्माखन्तः करोति, प्रादुर्भावयति। सोऽयं अग्निः रयीणाम् धनानां रयिपतिः निधिपतिः, वीणायां प्रवीण इतिवत् बोध्यम्, विश्वा सर्वाणि अमृतानि अमृतसंबन्धीनि वस्तूनि सत्रा युगपत् चक्राणः रूपयन् सुनिष्पन्नरूपाणि कुर्वन्, अथवा सर्वाण्यमृतानि एकत्र निष्पन्नरूपाणि कुर्वन्, भुवत्

भवतु ॥ कः—करोतेश्छान्दसो लुङ् । नर्या—नरशब्दात् तत्र साधुरिति यत् । चक्राणः—करोतेर्लटः शानच्, विकरणस्य श्लुः ॥

द्वितीयामृचमाह—

अस्मे वत्सं परि षन्तं न विन्दन्निच्छन्तो विश्वे अमृता अमूराः ।
श्रमयुवः पदव्यो धियन्धास्तस्थुः पदे परमे चार्वग्नेः ॥२॥
अस्मे इति वत्सम् परि सन्तम् न विन्दन् इच्छन्तः विश्वे अमृताः अमूराः श्रमऽयुवः पदऽव्यः धियम्ऽधाः तस्थुः पदे परमे चारु अग्नेः ॥

अमूराः अमूढाः मोहरहिताः प्राज्ञाः विश्वे अमृताः सर्वे देवाः परि परितः सर्वतः सन्तम् विद्यमानं वत्सम् शिशुं जातं एनमग्निं इच्छन्तः कामयमानाः अस्मे अस्मासु न विन्दन् नालभन्त । तथा अग्नेरलाभात् श्रमयुवः श्रमेण यूयन्ते इति श्रमयुवः तदन्वेषणपरिश्रमयुक्ताः पदव्यः पदैः तद्गमनपदलक्ष्मभिः वियन्तः गच्छन्तः धियन्धाः तदेकबुद्धिं धारयन्तः, एवंभूताः सन्तः परमे पदे उत्तमे स्थाने, उत्कृष्टे परस्मिन् धामनि तस्थुः स्थिताः । तत्र अग्नेः चारु रमणीयं रूपं, चारुतां रामणीयकं वा अधिजग्मुः इति शेषः ॥ श्रमयुवः—यु मिश्रणे, अस्मात् क्विप्, तन्वादित्वात् उवङ् । पदव्यः—वी गत्यादिषु, क्विप् । चारु—अत्र सायणः 'अग्नेः चारुणि परमे पदे तस्थुः' इति मत्वा 'चारुणि सप्तम्या लुक्' इति व्याचष्टे । अत्र व्याख्यायां चारु विशेषणं, विशेष्यं अध्याहृतं, यद्वा भावतलो लोपः ॥

तृतीयामृचमाह—

तिस्रो यदग्ने शरदस्त्वामिच्छुचिं घृतेन शुचयः सपर्यान् ।
नामानि चिद्दधिरे यज्ञियान्यसूदयन्त तन्वः सुजाताः ॥३॥
तिस्रः यत् अग्ने शरदः त्वाम् इत् शुचिम् घृतेन शुचयः सपर्यान् नामानि चित् दधिरे यज्ञियानि असूदयन्त तन्वः सुऽजाताः ॥

हे अग्ने, यत् यदा शुचयः शुद्धास्ते अमृताः पूर्वप्रकृताः मरुत्प्रभृतयो वा (सायणस्तु ब्राह्मणाधारेण मरुत इत्याह) शुचिम् शुद्धं त्वाम् इत् त्वामेव तिस्रः शरदः त्रीन् वत्सरान् घृतेन प्रसन्नेन तेजसा सपर्यान् अपूजयन्, तदा यज्ञियानि यज्ञयोग्यानि नामानि चित् नमनसाधनानि,

रहस्यानि स्तोत्राणि वा दधिरे धृतवन्तः आसन्। तेन तेषां तन्वः शरीराणि सुजाताः साधु-निष्पन्नजन्मानि अभवन्। तानि शरीराणि अस्रदयन्त मार्गे त्वरयितुं प्रैरयन्॥ यजमाने अग्नेः सुष्ठु निष्पादनात्परं तद्बलादेव इतरेषां देवानां जन्म संभवति। तदर्थं देवानां स्वशरीरनिष्पत्तिः अग्निसपर्यया साध्या भवति। यज्ञियनामधारणं तु तेषां अग्निपरध्यानलक्षणम्। संवत्सरत्रयं, त्रैलोक्यापेक्षया त्रित्वं, संवत्सरस्तु परिपाकस्य आवश्यकः कश्चन कालावधिः। नेह मानुष-संवत्सरमानं विवक्षितम्॥ सपर्यान्-सपर पूजायां, कण्ड्वादिः, लेट्। यज्ञियानि-अर्हार्थे घप्रत्ययः॥

चतुर्थीमृचमाह—

आ रोदसी बृहती वेविदानाः प्र रुद्रिया जभ्रिरे यज्ञियासः।
विदन्मर्तो नेमधिता चिकित्वानग्निं पदे परमे तस्थिवांसम्॥४॥
आ रोदसी इति बृहती इति वेविदानाः प्र रुद्रिया जभ्रिरे यज्ञियासः
विदत् मर्तः नेमऽधिता चिकित्वान् अग्निम् पदे परमे तस्थिऽवांसम्॥

यज्ञियासः यज्ञार्हाः, यज्ञस्य पतयः, अमृताः बृहती बृहत्यौ रोदसी द्यावापृथिव्यौ आ वेविदानाः अत्यर्थं अधिगम्य विदितवन्तः रुद्रियाः उग्रबलाः प्र जभ्रिरे प्रकर्षेण बभ्रुः, ते उभे अपि दिवं पृथिवीं च धारयामासुः। ततः परं मर्तः मनुष्यः विदत् अजानात्, यज्ञियैर्धारिते द्यावापृथिव्यौ उभयकक्ष्यागते चिद्भूमी ज्ञातवान् मनुष्य इत्यर्थः। अथ नेमधिता नेमशब्दः अर्धवाची तस्य धारणेन, इदं च अर्धं सामर्थ्यात् परमं परार्धं बोध्यम्, अवमं अर्धं तु अपरार्धं त्रैलोक्यम्। पूर्वोक्तो विद्वान् मनुष्यः परार्धधारणसमर्थो भवति, तथा धारणेन अग्निम् परमे सर्वोत्कृष्टे पदे धामनि तस्थिवांसम् स्थितं चिकित्वान् साक्षात्कृतवान्॥ वेविदानाः-ज्ञानार्थाद् विदेर्लाभार्थाद्वा यङन्ताल्लटः शानच्। विदत्-विद ज्ञाने, लुङ्, छान्दसः। नेमधिता-दधातेः भावे क्तः, धितं सुधितेत्यादिना धिभावो निपातितः, नेमस्य धितं धारणं, तेन नेमधितेन, तृतीयाया आकारः। तस्थिवांसम्-तिष्ठतेर्लिटः क्वसुः॥

पञ्चमीमृचमाह—

सञ्जानाना उप सीदन्नभिज्ञु पत्नीवन्तो नमस्यं नमस्यन्।
रिरिक्वांसस्तन्वः कृण्वत स्वाः सखा सख्युर्निमिषि रक्षमाणाः॥५॥

समञ्जानानाः उप सीदन् अभिज्ञु पत्नीवन्तः नमस्यम् नमस्यन्निति नमस्यन् रिरिक्वांसः तन्वः कृण्वत स्वाः सखा सख्युः निमिषि रक्षमाणाः ॥

संजानानाः तमग्निं सम्यग् जानन्तः ते देवाः पत्नीवन्तः सपत्नीकाः सन्तः उप सीदन् उपागमन्। उपगम्य च अभिज्ञु अभिमुखं जान्वोरवस्थानं कृत्वा नमस्यम् नमस्कारार्हं पूज्यं तं नमस्यन् नमस्कारेण अपूजयन्। अथ रिरिक्वांसः स्वात्मानं रिक्तीकुर्वन्तः स्वाः तन्वः स्वशरीराणि कृण्वत सुनिष्पन्नान्यकुर्वन्, नव्यशरीरनिष्पत्तेः प्राक् रिक्तीकरणं अवश्यमिति रहस्यमत्र बोध्यम्। कीदृशास्ते? "सखा सख्युर्निमिषि रक्षमाणाः" सखा देवानामेकैकोऽपि सख्युः सखिभूतस्याग्नेः निमिषि दृष्टौ रक्ष्यमाण इत्यर्थः। एवं सर्वेऽपि रक्षमाणाः रक्ष्यमाणाः नमस्यन्निति पूर्वेणान्वयः। देवाः सर्वेऽपि प्रत्येकं अग्नेः सखाय एव। एकैकोऽपि अग्नेः सख्युर्दृष्टौ स्थितो रक्षितः ॥ नमस्यन्–नमोवरिवश्चित्रङ इति पूजार्थे क्यच्, लङ्, अडभावः। रिरिक्वांसः–रिचिर् विरेचने, लिटः क्वसुः। निमिषि–निपूर्वात् मिषेः संपदादिलक्षणः क्विप्। रक्षमाणाः–कर्मणि लटः शानच्, यकि प्राप्ते व्यत्ययेन शप् ॥

इति प्रथमस्य पञ्चमे सप्तदशो वर्गः

षष्ठीमृचमाह—

त्रिः सप्त यद् गुह्यानि त्वे इत्पदाविदन्निहिता यज्ञियासः।
तेभी रक्षन्ते अमृतं सजोषाः पशूश्च स्थातृश्चरथं च पाहि ॥६॥

त्रिः सप्त यत् गुह्यानि त्वे इति इत् पदा अविदन् निऽहिता यज्ञियासः
तेभिः रक्षन्ते अमृतम् सऽजोषाः पशून् च स्थातॄन् चरथम् च पाहि ॥

यत् यदा यज्ञियासः यज्ञार्हाः देवाः गुह्यानि रहस्यानि त्रिः सप्त त्रिधा सप्त पदा पदानि स्थानानि, त्रिगुणितं चिद्भूमिकासप्तकमित्यर्थः त्वे इत् त्वय्येव निहिता अविदन् त्वयि निगूढं भूमिकानां त्रिसप्तकं अविन्दन्, अजानन्वा, तदा ते देवाः सजोषाः समनस्काः समानप्रीतयः सन्तः तेभिः त्रिगुणितैः सप्तभिः त्वयि निहितैः पदैः अमृतम् मरणरहितं नित्यं त्वां रक्षन्ते रक्षन्ति। हे अग्ने, पशून् च पश्यन्तीर्गाश्च दृष्टिरश्मीन् स्थातॄन् स्थावराणि चरथम् च जङ्गमं च पाहि रक्ष ॥ गुह्यानि–गुहायां भवानि, भवे यत्। त्वे–त्वयि, सप्तम्याः शे आदेशः ॥

सप्तमीमृचमाह—

विद्वाँ अग्ने वयुनानि क्षितीनां व्यानुषक् शुरुधो जीवसे धाः ।
अन्तर्विद्वाँ अध्वनो देवयानानतन्द्रो दूतो अभवो हविर्वाट् ॥७॥
विद्वान् अग्ने वयुनानि क्षितीनाम् वि आनुषक् शुरुधः जीवसे धाः
अन्तःऽविद्वान् अध्वनः देवऽयानान् अतन्द्रः दूतः अभवः हविःऽवाट् ॥

हे अग्ने, त्वं वयुनानि अस्मदीयानि ज्ञानानि विद्वान् अवगतवानसि । क्षितीनाम् विशां जीवसे जीवनाय आनुषक् अनुषक्तानि, अविच्छिन्नपारम्पर्याणि यथा भवन्ति तथा शुरुधः बलानि वि धाः विधेहि । देवयानान् देवानां यानं गमनं यैर्मार्गैः भवति तान् अध्वनः मार्गान् अन्तर्विद्वान् अन्तरेव गूढं वर्तमानस्त्वं जानन्नसि । हविर्वाट् हव्यानां अस्माभिरर्प्यमाणानां वोढाऽसि, अतन्द्रः अनलसः दूतः अभवः भवसि ॥ शुरुधः—शुचं रुन्धन्तीति शुरुधः, क्विप् चेति क्विप्, पूर्वपदस्य अन्त्यलोपः पृषोदरादित्वात् ॥

अष्टमीमृचमाह—

स्वाध्यो दिव आ सप्त यह्वी रायो दुरो व्यृतज्ञा अजानन् ।
विदद्गव्यं सरमा दृळ्हमूर्वं येना नु कं मानुषी भोजते विट् ॥८॥
सुऽआध्यः दिवः आ सप्त यह्वीः रायः दुरः वि ऋतऽज्ञाः अजानन्
विदत् गव्यम् सरमा दृळ्हम् ऊर्वम् येन नु कम् मानुषी भोजते विट् ॥

स्वाध्यः सुदूरालोचनपराः गाढाध्यानपरा वा, ऋतज्ञाः सत्यस्य वेदितारः, दिवः द्युलोकात् स्यन्दमानान् सप्त यह्वीः सप्तसंख्याकान् महाबलान् सिन्धून्, अद्भिर्लक्षिताः तेजोवाहिनीः, रायः सम्पन्निधेः दुरः द्वाराणि वा आ समन्तात् व्यजानन् विशेषेण अवागमन् । सरमा देवशुनी सहजा-क्बोधरूपिणी अन्तर्दृष्टिः गव्यम् गोसमूहम् सौरचिद्रश्मिजालमित्यर्थः दृढम् बलिष्ठं ऊर्वम् विस्तीर्णं च स्थानं विदत् अवेदीत् । येन नु सरमासाधित-गोसमूहगूढदृढस्थानाधिगमेन हेतुना अद्य मानुषी विट् मानुषो जन्मी कम् सुखम् भोजते भुङ्क्ते । सरमातत्त्वं प्रागुक्तम् ॥ स्वाध्यः—सु-आङ्पूर्वाद्धीशब्दात् जसि यणादेशः । गव्यम्—भवार्थे यत् । ऊर्वम्—उरुशब्दानुषङ्गी, 'ऊर्वे समुद्रे', 'ऊर्वं गव्यम्' इत्यादौ द्रष्टव्यः । भोजते—भुज परिपालनाभ्यवहरणयोः, व्यत्ययेन शप् ॥

नवमीमृचमाह—

आ ये विश्वा स्वपत्यानि तस्थुः कृण्वानासो अमृतत्वाय गातुम् ।
महा महद्भिः पृथिवी वि तस्थे माता पुत्रैरदितिर्धायसे वेः ॥९॥
आ ये विश्वा सुऽअपत्यानि तस्थुः कृण्वानासः अमृतऽत्वाय गातुम् महा महत्ऽभिः पृथिवी वि तस्थे माता पुत्रैः अदितिः धायसे वेरिति वेः ॥

ये, अमृतत्वाय अमरणधर्माय गातुम् मार्गं कृण्वानासः कुर्वन्तः विश्वा सर्वाणि स्वपत्यानि शोभनसन्ततियुक्तानि आ तस्थुः अध्यक्षयामासुः अधिष्ठितवन्त इत्यर्थः, तैः महद्भिः माहात्म्यवद्भिर्देवैः तेषां प्रभावेणेत्यर्थः पृथिवी भूमिः महा महिम्ना वि तस्थे वितत्य स्थिता, महत्त्वेन विस्तृता विशालातिष्ठदित्यर्थः। माता जननी देवानां अदितिः अखण्डस्वरूपिणी पुत्रैरमृतैरादित्यैः सह धायसे धारणाय धातुं, तां पृथिवीं भर्तुं वेः आगच्छत् ॥ महा—महिम्ना, वर्णलोपश्छान्दसः। धायसे—दधातेः भावेऽसुन्, आतो युक् । वेः—वेतेः गत्यर्थात् लङ्, पुरुषव्यत्ययः ॥

दशमीमृचमाह—

अधि श्रियं नि दधुश्चारुमस्मिन्दिवो यदक्षी अमृता अकृण्वन् ।
अध क्षरन्ति सिन्धवो न सृष्टाः प्र नीचीरग्ने अरुषीरजानन् ॥१०॥
अधि श्रियम् नि दधुः चारुम् अस्मिन् दिवः यत् अक्षी इति अमृताः अकृण्वन् अध क्षरन्ति सिन्धवः न सृष्टाः प्र नीचीः अग्ने अरुषीः अजानन् ॥

यत् यदा अमृताः अमरणधर्माणो देवाः दिवः द्युलोकस्य अक्षी नेत्रद्वयं अकृण्वन् अकुर्वन्, तदा अस्मिन् अग्नौ अधि श्रियम् शोभां प्रभां चारुम् सौन्दर्यं च नि दधुः निचिक्षिपुः । तेजः सौन्दर्यं च दिव्यमक्षिद्वयमग्नौ देवैः स्थापितमित्युक्तम् । अध अथ क्षरन्ति प्रवहन्ति, कर्तृपदं चारुश्रिय इति अध्याहार्यम् । अथवा 'अरुषीः' आरोचमानाः शक्तयः प्रवहन्ति । तत्र दृष्टान्तः—सृष्टाः संप्रेर्य विसृष्टाः सिन्धवो न नद्य इव, सिन्धूनां प्रवाह इव चारूणां श्रियां प्रवाह इत्यर्थः । प्र नीचीः नीचैः प्रवहन्त्यः ताः अरुषीः आरोचमानाः रक्तवर्णाः प्राणबलोद्रेकलक्षणाः अश्वाः भोगार्थाः क्रियापराः शक्तय इति बोध्यम् । ताः अजानन् कर्मपदं अग्निं त्वां इत्यध्याहार्यं, हे अग्ने!

उक्तलक्षणमक्षिद्वयमग्नौ निक्षिप्तम्। ततः सिन्धवः नीचैः प्रवहन्त्य इव अश्वाः महत्यः भोगसमर्थाः क्रियाशक्तयः क्षरन्त्यः अग्निं जानन्त्य उपासत इति सारांशः॥ नीचीः-निपूर्वादञ्चतेः। सर्वे गताः॥

इति प्रथमस्य पञ्चमेऽष्टावशो वर्गः

द्वादशेऽनुवाके 'रयि'नेति नवर्चं सूक्तं पराशरस्यार्षं त्रैष्टुभम् आग्नेयम्॥

तत्र प्रथमामृचमाह—

रयिर्न यः पितृवित्तो वयोधाः सुप्रणीतिश्चिकितुषो न शासुः।
स्योनशीरतिथिर्न प्रीणानो होतेव सद्म विधतो वि तारीत्॥१॥

रयिः न यः पितृऽवित्तः वयःऽधाः सुऽप्रनीतिः चिकितुषः न शासुः स्योनऽशीः अतिथिः न प्रीणानः होताऽइव सद्म विधतः वि तारीत्॥

यः योऽसावग्निः वयोधाः बलस्य धारकः, अस्मदीयबलप्रतिष्ठापकः पितृवित्तः पितुः सकाशाल्लब्धः रयिर्न रा इव धनमिव भवति। चिकितुषः विदुषः शासुर्न शासनं आज्ञेव, शिक्षणमिव वा सुप्रणीतिः साधिष्ठप्रणयनः, अग्नेः प्रकृष्टं नेतृत्वं विदुषः शासनमिव साधिष्ठमित्यर्थः। स्योनशीः स्योनं सुखनाम, सुखं शयानः प्रीणानः सुप्रीतः अतिथिर्न भोज्य उपचाराहोऽतिथिरिव भवति। होता इव आह्वाता पुरोहित इव विधतः परिचर्यापरस्य पूजकस्य सद्म गृहं वितारीत् प्रवर्धयति, ददाति वेति सायणः॥ पितृवित्तः-विद्लृ लाभे, कर्मणि निष्ठा, निष्ठानत्वाभावो निपातितः। वयोधाः-दधातेः विच्। शासुः-शासु अनुशिष्टौ, अस्मादुप्रत्ययः। स्योनशीः-स्योने सुखकरे स्थाने शेते, क्विप्। प्रीणानः-शानचि व्यत्ययेन श्ना। विधतः-विध विधाने, विधतिः परिचरणकर्मा, शतरि षष्ठ्येकवचनम्॥

द्वितीयामृचमाह—

देवो न यः सविता सत्यमन्मा क्रत्वा निपाति वृजनानि विश्वा।
पुरुप्रशस्तो अमतिर्न सत्य आत्मेव शेवो दिधिषाय्यो भूत्॥२॥

देवः न यः सविता सत्यऽमन्मा क्रत्वा निऽपाति वृजनानि विश्वा
पुरुऽप्रशस्तः अमतिः न सत्यः आत्माऽइव शेवः दिधिषाय्यः भूत्॥

स देवः सविता न दिव्यः सर्वप्रेरकः सूर्य इव यः योऽग्निः सत्यमन्मा सत्यमतिः सत्यानि मननानि अस्येत्यर्थः, क्रत्वा क्रतुना अध्यवसायबलेन इच्छामात्रेण विश्वा सर्वाणि वृजनानि अस्माकं दृढानि स्थानानि नि पाति नितरां रक्षति। पुरुप्रशस्तः बहुधा प्रोक्तः, आविष्कृतः अमतिर्न तेज इव उज्ज्वलभा इत्यर्थः सत्यः सत्यस्वरूपः। आत्मेव स्वात्मा यथा शेवः सुखमयः तथाभूतः सन् दिधिषाय्यः भूत् अस्माकं आधारो भवति, ध्येयो, धिया धारणीयो वा भवति॥ अमतिः-अम गत्यादिषु, अमेः अतिः। दिधिषाय्यः-दधातेः षाय्यप्रत्ययान्तो निपात्यते॥

तृतीयामृचमाह—

देवो न यः पृथिवीं विश्वधाया उपक्षेति हितमित्रो न राजा।
पुरःसदः शर्मसदो न वीरा अनवद्या पतिजुष्टेव नारी॥३॥
देवः न यः पृथिवीम् विश्वऽधायाः उपऽक्षेति हितऽमित्रः न राजा
पुरःऽसदः शर्मऽसदः न वीराः अनवद्या पतिजुष्टाऽइव नारी॥

यः योऽसावग्निः विश्वधायाः विश्वस्य धारकः देवो न देव इव, हितमित्रः अनुकूलः सुहृत् राजा न राजा इव पृथिवीम् उपक्षेति पृथिव्यां वसति। सः पुरःसदः अग्रे निषण्णाः शर्मसदः गृहवासिनः वीराः न वीरपुरुषा इव, एकोऽपि भगवानग्निर्वीरगण इव लक्ष्यते। किं च अनवद्या निर्दुष्टा पतिजुष्टा इव पतिप्रिया यथा नारी पत्नी तथायं वर्तते॥ विश्वधायाः-दधातेरसुन्, आतो युक्। उपक्षेति-क्षि निवासगत्योः, विकरणस्य लुक्॥

चतुर्थीमृचमाह—

तं त्वा नरो दम आ नित्यमिद्धमग्ने सचन्त क्षितिषु ध्रुवासु।
अधि द्युम्नं नि दधुर्भूर्यस्मिन्भवा विश्वायुर्धरुणो रयीणाम्॥४॥
तम् त्वा नरः दमे आ नित्यम् इद्धम् अग्ने सचन्त क्षितिषु ध्रुवासु
अधि द्युम्नम् नि दधुः भूरि अस्मिन् भव विश्वऽआयुः धरुणः रयीणाम्॥

तम् तथाभूतं त्वा हे अग्ने, ध्रुवासु स्थैर्येण ध्रियमाणासु चलनरहितासु क्षितिषु तवावास-भूतेषु लोकेषु दमे गृहे नित्यम् अनवरतं शाश्वतं वा इद्धम् ज्वलितं, नित्यप्रज्वलितमित्यर्थः

एवंभूतं नरः मनुष्याः आसचन्त आश्रित्य समवेता भवन्ति, त्वयि सक्ता इत्यर्थः। अस्मिन् त्वयि भूरि प्रभूतं द्युम्नम् ज्योतिः अधि नि दधुः प्रतिष्ठापयामासुः। त्वं रयीणाम् धननिधीनां धरुणः धारयिता, विश्वायुः विश्वस्यैकमायुः भवा भव, यजमानव्यष्टौ समष्टिभूतस्त्वं एकं विश्वमायुर्भवेत्यभ्यर्थना ॥ धरुणः-धारेः णिलुक् चेति उनप्रत्ययः ॥

पञ्चमीमृचमाह—

वि पृक्षो अग्ने मघवानो अश्युर्वि सूरयो ददतो विश्वमायुः।
सनेम वाजं समिथेष्वर्यो भागं देवेषु श्रवसे दधानाः ॥५॥
वि पृक्षः अग्ने मघऽवानः अश्युः वि सूरयः ददतः विश्वम् आयुः
सनेम वाजम् सम्ऽइथेषु अर्यः भागम् देवेषु श्रवसे दधानाः ॥

हे अग्ने, मघवानः धनेश्वराः पृक्षः तव प्रीतीः, संतृप्तीः व्यश्युः प्राप्नुयुः उपभुञ्जता-मित्यर्थः, कीदृशा मघवानः? विश्वम् संपूर्णं निरवशेषं आयुः जीवितं ददतः देवेभ्यो अर्पयन्तः सूरयः विपश्चितः वि अश्युः प्राप्नुवन्ति तादृशाः सूरयो मघवानः अग्निसंतर्पणपराः अग्निप्रीतिभुजो भवन्तीत्यर्थः। वयं तु श्रवसे श्रवणाय, दिव्यश्रुतिजन्यज्ञानाय देवेषु मध्ये भागम् भजनीयं अस्मदीयं अंशं दधानाः धारयमाणाः, समिथेषु संग्रामेषु अर्यः शत्रोः सकाशात् वाजम् समृद्धिं सनेम लभेमहि। शत्रुभिः असुरादिभिरपहृतं धनं दिव्यं भवति तज्जयाय देवेषु भागः धारयितव्यः श्रुतिजन्यं ज्ञानं चावश्यम् ॥ अश्युरित्यादयो गताः। अर्यः-अरेः पञ्चम्येकवचने जसादिषु छन्दसि वा वचनमिति गुणाभावे यणादेशः ॥

इति प्रथमस्य पञ्चम एकोनविंशो वर्गः

षष्ठीमृचमाह—

ऋतस्य हि धेनवो वावशानाः स्मदूधीः पीपयन्त द्युभक्ताः।
परावतः सुमतिं भिक्षमाणा वि सिन्धवः समया सस्रुरद्रिम् ॥६॥
ऋतस्य हि धेनवः वावशानाः स्मत्ऽऊधीः पीपयन्त द्युऽभक्ताः
पराऽवतः सुऽमतिम् भिक्षमाणाः वि सिन्धवः समया सस्रुः अद्रिम् ॥

ऋतस्य सत्यस्य धेनवः दोग्ध्र्यः द्युभक्ताः द्युलोके संभक्ताः प्रीत्या उपभुक्ता इत्यर्थः,

यद्वा द्युलोकेन भक्ता आत्तभागाः द्युलोकभागहरा इमाः इत्यर्थः । हि पदपूरणः । स्मदूध्नीः स्मत् नित्यवचनः नित्यानि ऊधांसि यासां ताः नित्यपयस्विन्यः पूर्णोध्न्यो वा, वावशानाः अस्मान् कामयमानाः पीपयन्त अपाययन् स्वीयं दुग्धममृतम्, ऋतस्य दोग्ध्र्यो हि ता उक्ताः। परावतः सर्वस्मादपि परस्तात् बृहद्दिवः स्थानात् सिन्धवः स्यन्दमाना आपः सुमतिम् साध्वीं चिन्तनां भिक्षमाणाः प्रार्थयमानाः अद्रिम् समया पर्वतस्य समीपे वि सस्रुः विततं यथा तथा प्रावहन् ॥ अद्रिः पर्वतः विश्वसत्त्वोपलक्षणम्, यजमानीयां अन्नमयादिकां सर्वां भूमिं अभितः प्रावहन् 'आपः' तेजोवाहिन्यः दिव्याः शक्तयः । ऋतस्य धेनवस्तु मातरः पोषयित्र्यः । अन्यत् प्रागुक्तमनुसंधेयम् ॥ वावशानाः–वश कान्तौ, यङन्तात् शानच् । स्मदूध्नीः–ऊधसोऽनङ् इत्यनङादेशः समासान्तः । पीपयन्त–पा पाने, हेतुमण्णिच्, लुङि व्यत्ययेन परस्मैपदम् ॥

सप्तमीमृचमाह—

त्वे अग्ने सुमतिं भिक्षमाणा दिवि श्रवो दधिरे यज्ञियासः ।
नक्ता च चक्रुरुषसा विरूपे कृष्णं च वर्णमरुणं च सं धुः ॥७॥

त्वे इति अग्ने सुऽमतिम् भिक्षमाणाः दिवि श्रवः दधिरे यज्ञियासः नक्ता च चक्रुः उषसा विरूपे इति विऽरूपे कृष्णम् च वर्णम् अरुणम् च सम् धुरिति धुः ॥

हे अग्ने, त्वे त्वयि सुमतिम् साध्वीं चिन्तनां भिक्षमाणाः प्रार्थयमानाः यज्ञियासः यज्ञार्हा देवाः दिवि द्युलोके श्रवः श्रुतिजन्यं ज्ञानं दधिरे स्थापितवन्तः । अथ नक्ता च नक्तं रात्रिं च उषसा उषःशब्दलक्षितं अहश्च विरूपे विभिन्नरूपे चक्रुः । तदेव स्पष्टयति कृष्णं च वर्णम् श्यामलं रात्रेः वर्णं अरुणम् च अहर्मुखवर्णं च संधुः संयोजयामासुः ॥ प्रकाशाप्रकाशदशाप्रतिपादके अहोरात्रे । अरुणवर्णं उषसं अधिकृत्य । रात्रौ उषसि च अग्निकृत्यं विविधं वर्तते । तच्च दिव्येन श्रवसा साधनेन निरुह्यते भगवताऽग्निनेति बोध्यम् ॥ त्वे–सप्तम्याः शे आदेशः । नक्ता–द्वितीयाया डादेशः । उषसा–विभक्तेराकारः ॥

अष्टमीमृचमाह—

यान्राये मर्तान्त्सुषूदो अग्ने ते स्याम मघवानो वयं च ।
छायेव विश्वं भुवनं सिसक्ष्यापप्रिवान्रोदसी अन्तरिक्षम् ॥८॥

यान् राये मर्तान् सुषूदः अग्ने ते स्याम मघऽवानः वयम् च छायाऽइव विश्वम् भुवनम् सिसक्षि आपप्रिऽवान् रोदसी इति अन्तरिक्षम् ॥

हे अग्ने, यान् मर्तान् मनुष्यान् राये निधिसम्पदे सुषूदः सुतरां क्षदयसि, त्वरयसि, वयम् च वयमपि ते मघवानः स्याम भवेम । सम्पदे यान् त्वं त्वरयसि, ते सम्पन्ना भवन्ति, तेषु मध्ये वयमपि स्याम संपन्नाः । रोदसी द्यावापृथिव्यौ अन्तरिक्षम् मध्यमं लोकं, एवं त्रैलोक्यं च आपप्रिवान् आपूरितवान् त्वं विश्वम् भुवनम् समस्तं जगत् छाया इव सिसक्षि छाया यथा अवियोज्यतया सचते, तथा सचसे, विश्वस्मिन् भुवने छायेव सक्तो भवसि ॥ सुषूदः-षूद प्रेरणे, लेट् । सिसक्षि-षच समवाये, शपः श्लुः । आपप्रिवान्-प्रा पूरणे, लिटः क्वसुः ॥

नवमीमृचमाह—

अर्वद्भिरग्ने अर्वतो नृभिर्नृन्वीरैर्वीरान्वनुयामा त्वोताः ।
ईशानासः पितृवित्तस्य रायो वि सूरयः शतहिमा नो अश्युः ॥९॥

अर्वत्ऽभिः अग्ने अर्वतः नृऽभिः नृन् वीरैः वीरान् वनुयाम त्वाऽऊताः ईशानासः पितृऽवित्तस्य रायः वि सूरयः शतऽहिमाः नः अश्युः ॥

हे अग्ने, त्वोताः त्वा ऊताः त्वया रक्षिताः वयं अर्वद्भिः अस्माकं युद्धाश्वैः अर्वतः युद्धाश्वान् वनुयाम जयेम । तथा नृभिः बलिभिर्मनुष्यैः नृन् बलिनो मनुष्यान् वीरैः वीरपुरुषैः वीरान् वीरपुरुषांश्च वनुयाम । नः अस्मत्संबन्धिनः सूरयः विपश्चितः पितृवित्तस्य पितृभ्यः पूर्वेभ्यः सकाशाल्लब्धस्य रायः निधेः ईशानासः ईश्वराः स्वामिनो भूत्वा शतहिमाः शतवर्षजीविताः व्यश्युः विशेषेण भुञ्जताम् ॥ त्वोताः-त्वया ऊताः, मपर्यन्तस्य त्वादेशः, व्यत्ययेन आत्वम् । शतहिमाः-शतं हिमा हिमशब्दलक्षिता हेमन्ताः येषां ते ॥

दशमीमृचमाह—

एता ते अग्न उचथानि वेधो जुष्टानि सन्तु मनसे हृदे च ।
शकेम रायः सुधुरो यमं ते ऽधि श्रवो देवभक्तं दधानाः ॥१०॥

एता ते अग्ने उचथानि वेधः जुष्टानि सन्तु मनसे हृदे च शकेम रायः सुऽधुरः यमम् ते अधि श्रवः देवऽभक्तम् दधानाः ॥

वेधः, विधातः वस्तूनां, हे अग्ने, एता उचथानि एतानि सूक्तानि ते तुभ्यं तवात्मने मनसे चित्ताय हृदे हृदयाय च जुष्टानि संतुष्टिकराणि सन्तु भवन्तु। देवभक्तम् देवैरुपभुक्तं, विभक्तं वा श्रवः श्रवणजन्यं ज्ञानं अधि आधारभूतेऽग्नौ त्वयि दधानाः धारयन्तः वयं ते तव सुधुरः शोभना दृढा धूः योक्त्रं यस्य तस्य रायः धनस्य यमम् नियमनं स्ववशीकर्तुमित्यर्थः शकेम शक्ताः स्याम ॥ त्वदीयसम्पद्धुरं वोढुं शक्नुयाम। उचथान्यादयः सर्वे गताः ॥

इति प्रथमस्य पञ्चमे विंशो वर्गः

प्रथमे मण्डले द्वादशोऽनुवाकः समाप्तः

त्रयोदशानुवाके सूक्तान्येकादश। तत्र 'उप प्रयन्त' इति नवर्चं प्रथमं सूक्तम्। रहूगणपुत्रो गोतम ऋषिः गायत्री छन्दः अग्निर्देवता ॥

तत्र प्रथमामृचमाह—

उपप्रयन्तो अध्वरं मन्त्रं वोचेमाग्नये। आरे अस्मे च शृण्वते ॥१॥

उपऽप्रयन्तः अध्वरम् मन्त्रम् वोचेम अग्नये आरे अस्मे इति च शृण्वते ॥

अध्वरम् यजनं उप प्रयन्तः उपेत्य प्रकर्षेण गच्छन्तः द्युलोकाध्वगमनशीलं अध्वरपदवेदनीयं यज्ञं उपगम्य तत्र विच्छेदराहित्येन यान्त इत्यर्थः। तथाभूता वयं अग्नये भगवते मन्त्रम् नित्यवाक्परिणामभूतं स्तोत्रं वोचेम उच्चास्म वक्तारो भूयास्म। कीदृशायाग्नये? अस्मे अस्मत्संबन्धिनि स्तोत्रे निमित्ते आरे च दूरेऽपि शृण्वते आकर्णयते। अस्मदीयस्तोत्रवाचं दूरादपि शृणोत्यग्निः भक्तानुग्रहदक्षः ॥ वोचेम–ब्रुवो वचिः, लिङ्याशिष्यङ्, वच उमित्युमागमः ॥

द्वितीयामृचमाह—

यः स्नीहितीषु पूर्व्यः संजग्मानासु कृष्टिषु। अरक्षद्दाशुषे गयम् ॥२॥

यः स्नीहितीषु पूर्व्यः सम्ऽजग्मानासु कृष्टिषु अरक्षत् दाशुषे गयम् ॥

यः पूर्व्यः पुरातनः अग्निः स्नीहितीषु हिंसिकासु कृष्टिषु प्रजासु सञ्जग्मानासु सङ्गतासु सतीषु दाशुषे हविर्दत्तवते यजमानाय गयम् गृहं अरक्षत् रक्षति तस्मै मन्त्रं वोचेमेति पूर्वेण संबन्धः। शत्रुभूतासु प्रजासु संगतासु सतीषु यजमानाय 'गयं' धनं रक्षतीति सायणीयम्, अन्तर्यागे बधकारिण्यः कृष्टयः यज्ञविघातकाः रक्षःप्रभृतय इति बोध्यम्। गयं गमनं गमनमार्गं वा यजमानाय रक्षत्यग्निः। गयो गृहेऽपि वर्तते, तर्हि यजमानस्य गृहं शरीरं रक्षतीति ज्ञेयम् ॥

स्नीहितीषु-स्नेहयतिर्वधकर्मा, स्नेह्यन्ते हिंस्यन्ते आभिः प्रजाः इति स्नेहितयः, एकारस्य ईकारादेशः, क्तिनो दीर्घश्च ॥

तृतीयामृचमाह—

उत ब्रुवन्तु जन्तव उदग्निर्वृत्रहाजनि । धनञ्जयो रणेरणे ॥३॥
उत ब्रुवन्तु जन्तवः उत् अग्निः वृत्रऽहा अजनि धनम्ऽजयः रणेऽरणे ॥

अग्निः देवः उत् अजनि उद्भूतः अन्तर्निर्मथितस्तपसा हृदयादुद्गतः प्रादुर्भूत इति यावत् । कीदृशः ? वृत्रहा वृत्राणां आवरकाणां ज्योतिरादिदिव्यप्रवाहप्रतिरोधकानां हन्ता । पुनः कीदृशः ? रणेरणे सर्वत्र सङ्ग्रामे देवशत्रुभिः सह धनञ्जयः जेता धनस्य, शत्रुभिः रक्षःप्रभृतिभिरपहृतस्य दिव्यस्य धनस्य पुनराहर्ता । एवंभूतोऽग्निरुद्गतः । उत अथ जन्तवः जन्मिनः ब्रुवन्तु तमिदानीं स्तुवन्तु । बाह्ये कर्मणि अरण्योर्निर्मथितोऽग्निरिति स्पष्टम् ॥ रणेरणे—रणन्ति दुन्दुभयोऽस्मिन्निति रणः संग्रामः ॥

चतुर्थीमृचमाह—

यस्य दूतो असि क्षये वेषि हव्यानि वीतये । दस्मत्कृणोष्यध्वरम् ॥४॥
यस्य दूतः असि क्षये वेषि हव्यानि वीतये दस्मत् कृणोषि अध्वरम् ॥

यस्य अन्तर्याजिनः क्षये गृहे वासस्थाने शरीर इति यावत् दूतः देवान् प्रति दौत्यं कुर्वन् देवस्त्वं असि भवसि वासं करोषीत्यर्थः, वीतये देवानामागतये हव्यानि यस्य यजमानस्य हवींषि समर्पणीयद्रव्याणि वेषि देवान् गमयसि, यस्य अध्वरम् दिव्याध्वगमनशीलं यज्ञं दस्मत् क्रियानिष्पादकं कृणोषि करोषि "तं इत्" इत्युत्तरयर्चा संबन्धः । दस्रदंसादिपदार्थविवरणे दस्मशब्दो व्याख्यातः (१.३.३ पु. ११३) दस्मत् दर्शनीयमिति सायणीयम् ॥ वेषि—वी गत्यादिषु, अन्तर्भावितण्यर्थः ॥

पञ्चमीमृचमाह—

तमित्सुहव्यमङ्गिरः सुदेवं सहसो यहो । जना आहुः सुबर्हिषम् ॥५॥
तम् इत् सुऽहव्यम् अङ्गिरः सुऽदेवम् सहसः यहो इति जनाः आहुः सुऽबर्हिषम् ॥

हे सहसो यहो बलस्य पुत्र, अङ्गिरः अङ्गिरश्शब्दवाच्य अग्ने तमित् तमेव यजमानं पूर्वोक्तविधं सुहव्यम् शोभनहव्ययुक्तं सुदेवम् शोभनदैवतसंपन्नम् सुबर्हिषम् शोभनयज्ञम् जनाः आहुः सर्वे कथयन्ति ॥ बर्हिः अन्तर्यागे देवानामागमनस्थानसन्नहनं, बहिर्यागे तु दर्भाणां आस्तरणम्। बर्हिर्यज्ञेऽपि वर्तते, तथा व्याख्यानं अन्तरर्थस्य न बाधकं भवति ॥

इति प्रथमस्य पञ्चम एकविंशो वर्गः

षष्ठीमृचमाह—

आ च वहासि ताँ इह देवाँ उप प्रशस्तये। हव्या सुश्चन्द्र वीतये ॥६॥
आ च वहासि तान् इह देवान् उप प्रऽशस्तये हव्या सुऽचन्द्र वीतये ॥

हे सुश्चन्द्र सुचन्द्र शोभनाह्लादन अग्ने, तान् देवान् इन्द्रादीन् इह अस्मिन् यजने उप अस्मत्समीपं प्रशस्तये प्रकृष्टस्तुतये आवहासि च आगमय च। वीतये तेषां आगतये हव्या हव्यानि अस्मदीयार्पणद्रव्याणि प्रापय च ॥ वहासि—लेटि आडागमः। प्रशस्तये—शंसु स्तुतौ, भावे क्तिन्। सुश्चन्द्र—ह्लादाचन्द्रोत्तरपदे मन्त्रे इति सुट् ॥

सप्तमीमृचमाह—

न योरुपब्दिरश्व्यः शृण्वे रथस्य कच्चन। यदग्ने यासि दूत्यम् ॥७॥
न योः उपब्दिः अश्व्यः शृण्वे रथस्य कत् चन यत् अग्ने यासि दूत्यम् ॥

हे अग्ने, यत् यदा दूत्यम् दूतत्वं यासि गच्छसि, देवानां दूतकर्मणि प्रवृत्तो भवसि तदा कच्चन कदाचन सर्वदा योः गच्छतः तव रथस्य अश्व्यः रथाश्वैर्जनितः उपब्दिः शब्दः श्रवणयोग्यः न शृण्वे न श्रूयते, अत्यन्तशीघ्रगमनात् श्रवणगोचरो न भवति शब्दः ॥ उपब्दिः—श्रोतुमर्हः शब्दः "सशब्दमुपब्दिमदि"ति तैत्तिरीयप्रातिशाख्यम्। शृण्वे—श्रु श्रवणे, कर्मणि लट्, व्यत्ययेन श्नुः ॥

अष्टमीमृचमाह—

त्वोतो वाज्यह्वयोऽभि पूर्वस्मादपरः। प्र दाश्वाँ अग्ने अस्थात् ॥८॥
त्वाऽऊतः वाजी अह्वयः अभि पूर्वस्मात् अपरः प्र दाश्वान् अग्ने अस्थात् ॥

हे अग्ने, यः दाश्वान् तुभ्यं दत्तवान् स पुरुषः त्वोतः त्वया ऊतो रक्षितः वाजी समृद्धिमान्

अह्रयः लज्जाशून्यः सङ्कोचरहितः निर्भय इति यावत्, तथाविधो भूत्वा पूर्वस्मात् अपरः पूर्वं यादृशोऽभूत् तादृशादन्यः सन् अभि प्रास्थात् अभिमुखं यथा तथा प्रतिष्ठते गन्तव्यं दिव्यं धाम प्रति ॥ अग्नये स्वीयं सर्वं अर्पितवान् पुरुषः समृद्धिमान् निस्सङ्कोचश्च भूत्वा पूर्वावस्थामुज्झित्वा अपरावस्थां गतः अत एव अन्यादृशो लक्ष्यते, तथा स प्रस्थानं कुरुते गन्तव्यमुद्दिश्य। "पूर्वस्मात् अपरः" इत्यत्र सायणः "पूर्वस्मादधिकारात् निकृष्टः" पुरुषः अग्नये हविर्दानेन ऐश्वर्यं प्राप्य प्रतितिष्ठतीत्यादि व्याचष्टे ॥ अह्रयः-जिह्रेतीति ह्रयः, न ह्रयः अह्रयः। दाश्वान्-दाशृ दाने, क्वसुप्रत्ययान्तो निपातितः ॥

नवमीमृचमाह—

उत द्युमत्सुवीर्यं बृहदग्ने विवाससि। देवेभ्यो देव दाशुषे ॥९॥
उत द्युऽमत् सुऽवीर्यम् बृहत् अग्ने विवाससि देवेभ्यः देव दाशुषे ॥

हे अग्ने, देव, उत अपि च देवेभ्यः इन्द्रादिभ्यः दाशुषे दत्तवते यजमानाय द्युमत् दीप्तिमत् सुवीर्यम् शोभनवीर्ययुक्तं बृहत् प्रभूतं ऋतसत्यज्योतिरादिपदवेदनीयं वस्तु विवाससि प्रकाशयसि, उत्तमं ज्योतिरेव महद्धनं, तत् ज्ञापयसि, विवृणोषीत्यर्थः। "बृहत् प्रौढं धनं प्रापयसि" इति सायणीयम् ॥ विवाससि-विवासतिः प्रकाशने परिचरणकर्मणि वा, गतम् (१.३१.१)। अत्र सायणस्तु 'वा गतिगन्धनयोः, सनि द्विर्भावे सन्यत इतीत्वम्' इति गत्यर्थकं मन्यते स्म ॥

इति प्रथमस्य पञ्चमे द्वाविंशो वर्गः

अथ त्रयोदशेऽनुवाके 'जुषस्वे'ति पञ्चर्चं द्वितीयं सूक्तम्। ऋषिच्छन्दोदेवताः पूर्ववत् ॥

तत्र प्रथमामृचमाह—

जुषस्व सप्रथस्तमं वचो देवप्सरस्तमम्। हव्या जुह्वान आसनि ॥१॥
जुषस्व सप्रथःऽतमम् वचः देवप्सरःऽतमम् हव्या जुह्वानः आसनि ॥

हे अग्ने, सप्रथस्तमम् अतिशयेन पृथुलं अतिविस्तीर्णं वचः वचनं स्तोत्ररूपं अस्मदीयं जुषस्व सेवस्व, कीदृशं वचनम्? देवप्सरस्तमम् देवानां प्रीणयितृतमम्। किं कुर्वन्? आसनि आस्ये हव्या हव्यानि जुह्वानः प्रक्षिपन्। स्तोत्रं हि देवान् पोषयति, स्तोत्रेण पोषिता देवता यजमाने पुष्टिमती वर्धते। देवानां भोजनेन प्रीणनं भवति। तथा देवानां प्रीणयिता अग्निः।

यजमानेनार्प्यमाणं भोज्यं (बाह्यपक्षे) भोग्यं (आन्तरपक्षे) स्वमुखे धारयमाणोऽग्निर्देवान् प्रापय्य प्रीणयति ॥ देवप्सरस्तमम्–प्सरश्शब्दो व्याख्यातः 'महि प्सरो वरुणस्य' (१.४१.७) इत्यत्र। जुह्वानः–जुहोतेर्व्यत्ययेन शानच्। आसनि–आस्यशब्दस्य आसन्नादेशः ॥

द्वितीयामृचमाह—

अथा ते अङ्गिरस्तमाग्ने वेधस्तम प्रियम्। वोचेम ब्रह्म सानसि ॥२॥
अथ ते अङ्गिरःऽतम अग्ने वेधःऽतम प्रियम् वोचेम ब्रह्म सानसि ॥

हे अग्ने, अङ्गिरस्तम अतिशयेन अङ्गिरः, अङ्गिरःश्रेष्ठ, वेधस्तम विधातृश्रेष्ठ अथ अनन्तरं ते तुभ्यं सानसि संभजनीयं प्रियम् प्रीतिप्रदं ब्रह्म मन्त्रलक्षणं स्तोत्रं वोचेम उच्यास्म। पूर्वर्चि स्तोत्रलक्षणं वचः अग्नेः सेवनीयत्वेनोक्तम्। अस्यामृचि ततः परं मन्त्रलक्षणं विशिष्टं स्तोत्रं अग्नेः स्वीकारायोच्यते॥ वोचेम–लिङि आशिष्यङ्। सानसि–वन षण संभक्तौ, सानसिर्घर्णसिः इत्यादौ असिच्प्रत्ययनिपातः ॥

तृतीयामृचमाह—

कस्ते जामिर्जनानामग्ने को दाश्वध्वरः। को ह कस्मिन्नसि श्रितः ॥३॥
कः ते जामिः जनानाम् अग्ने कः दाशुऽअध्वरः कः ह कस्मिन् असि श्रितः ॥

हे अग्ने, जनानाम् मनुष्याणां मध्ये ते तव कः जामिः को बन्धुः कः दाश्वध्वरः दाशुर्दत्तः अध्वरः यज्ञः येन सः, त्वां यष्टुं कः समर्थः? कः ह को वा भवसि त्वम्? कस्मिन् श्रितः असि? किं तव आश्रयस्थानं भवति? एवं चतुर्भिः प्रश्नैरिदं क्रमश उक्तं भवति। अग्निबन्धुत्वं न सुलभम्, अग्निं यष्टुं न सर्वोऽपि समर्थः, अग्निस्वरूपं चर्मचक्षुषां मर्त्यानां दुर्विज्ञेयम्, अग्नेराश्रयस्थानमपि बहिर्मुखमनसां न विदितं भवति। यद्यग्नेः जामित्वस्वरूपाश्रयस्थानादि यजमानयज्ञशालादि चेत्, ईदृशस्य प्रश्नजालस्य नैव स्यात् प्रयोजनम्। अन्तर्मुख ऋषिरेवं सूचयति अग्नेर्यथार्थस्वरूपादिकम्॥ दाश्वध्वरः–दाशुः, उणादयो बहुलमिति बहुलवचनात् कर्मणि उण्प्रत्ययः॥

चतुर्थीमृचमाह—

त्वं जामिर्जनानामग्ने मित्रो असि प्रियः। सखा सख्यिभ्य ईड्यः ॥४॥

स्वम् जामिः जनानाम् अग्ने मित्रः असि प्रियः सखा सखिऽभ्यः ईड्यः ॥

यद्यपि पूर्वोक्तप्रकारेण दुर्बोधस्वरूपादिको भवत्यग्निः, तथापि प्रियो बन्धुरेव भवति युक्तस्य मनुष्यस्येत्याह । हे अग्ने, जनानाम् मनुष्याणां जामिः बन्धुः असि भवसि, तथा प्रियः प्रीणयिता मित्रः सुहृत् असि । ईड्यः अध्येषणीयः त्वं सखिभ्यः समानाख्यानेभ्यः देवकामेभ्यः सखा सखा भवसि ॥

पञ्चमीमृचमाह—

यजा नो मित्रावरुणा यजा देवाँ ऋतं बृहत् । अग्ने यक्षि स्वं दमम् ॥५॥

यज नः मित्रावरुणा यज देवान् ऋतम् बृहत् अग्ने यक्षि स्वम् दमम् ॥

हे अग्ने, नः अस्मदर्थं मित्रावरुणा मित्रं वरुणं च देवौ यज पूजय तथा देवान् इन्द्रादीन् यज पूजय तथा ऋतम् सत्यं बृहत् महत् प्रौढं स्वम् दमम् च तव स्वीयं गृहं, सहजसिद्धं आवासस्थानं उत्तमं धाम 'सत्यं ऋतं बृहत्' इति श्रुत्यन्तरे गीतं च यक्षि यज पूजय। "गोपामृतस्य दीदिविम्" (१.१.८) इत्यत्र व्याख्यातमवधेयम् ॥ यज-संहितायां दीर्घः । यक्षि—यजेर्बहुलं छन्दसीति शपो लुक् ॥

इति प्रथमस्य पञ्चमे त्रयोविंशो वर्गः

'का त' इति पञ्चर्चं तृतीयं सूक्तम् । राहूगणो गोतम ऋषिः त्रिष्टुप् छन्दः अग्निर्देवता ॥

तत्र प्रथमामृचमाह—

का त उपेतिर्मनसो वराय भुवदग्ने शन्तमा का मनीषा ।
को वा यज्ञैः परि दक्षं त आप केन वा ते मनसा दाशेम ॥१॥

का ते उपऽइतिः मनसः वराय भुवत् अग्ने शम्ऽतमा का मनीषा
कः वा यज्ञैः परि दक्षम् ते आप केन वा ते मनसा दाशेम ॥

हे अग्ने, ते तव मनसः कर्मणि षष्ठी वराय वरणाय वरीतुं, तव मनः समावर्जयितुमित्यर्थः का उपेतिः ? कीदृशं उपगमनं भुवत् भवेत् ? कथं त्वामुपगच्छेम तव मनस्समावर्जनाय ? अस्मद्विषये तव मनस्समाकृष्टये क उपाय इति भावः । सायणस्तु "वराय निवारणाय अस्मास्ववस्थापनाय 'का उपेतिर्भुवत्' कीदृशमुपगमनं भवेत्, न काप्यस्ति, तवोचितमुपगमनं वयं कर्तुं न शक्नुम इति भावः" इत्याचष्टे, का मनीषा कीदृशी बुद्धिः तदुपलक्षिता स्तुतिः शन्तमा

तवातिशयेन सुखकरी भवेत्? तादृशीं स्तुतिमस्मान् कारयेति भावः "तवोचिता स्तुतिरपि नास्तीत्यर्थः" इति सायणः। कः को वा यजमानः यज्ञैः यजनैः ते तव दक्षम् विवेचनात्मक-धीकौशलरूपं बलं पर्याप पर्याप्नोति, कीदृशः योग्यताविशिष्टः यजमानः त्वदीयं 'दक्षं' लभत इति प्रश्नेन तादृशं योग्यतावैशिष्ट्यं अस्मासु धेहि इति प्रार्थना। सायणस्तु "न कोऽपि यजमानः तवोचितान्यागाननुष्ठाय तैः फलं प्राप्यते" इत्याह। केन वा मनसा कीदृशेन मनसा ते तुभ्यं दाशेम अर्पणीयं सर्वं प्रयच्छेम? तवोपगमनाद्यनुरूपं मनश्च अस्मासु धेहि, येन युक्तेन वयं 'दाशेम' इति भावः। तादृशं मनोऽपि नोत्पद्यते इति सायणीयं तात्पर्यम्॥ वराय-वृञ् वरणे, तुमुन्नर्थे चतुर्थी। श्रुवत्-लेटि अडागमः, शपो लुक्। दक्षम्-दक्षशब्दो विचारितः (१.२.७, ९)॥

द्वितीयामृचमाह—

एह्यग्न इह होता नि षीदादब्धः सु पुरएता भवा नः।
अवतां त्वा रोदसी विश्वमिन्वे यजा महे सौमनसाय देवान्॥२॥

आ इहि अग्ने इह होता नि सीद अदब्धः सु पुरःऽएता भव नः अवताम् त्वा रोदसी इति विश्वमिन्वे इति विश्वम्ऽइन्वे यज महे सौमनसाय देवान्॥

हे अग्ने, एहि आगच्छ इह अस्मिन् यजने होता आह्वाता सन् नि षीद उपविश। अदब्धः अहिंसितः यज्ञविरोधिभिः दब्धुं दमयितुमशक्यस्त्वं नः अस्माकं पुरएता पुरस्तात् गन्ता सु भव सुष्ठु भव। विश्वमिन्वे विश्वं व्याप्नुवन्त्यौ सर्वव्यापिन्यौ रोदसी द्यावापृथिव्यौ त्वा त्वाम् अवताम् रक्षताम् ऊर्ध्वा द्युस्थाना चितिः अधरा पृथिवीस्थाना चितिः इति उभाभ्यां विश्व-व्यापिनीभ्यां यज्ञविघातकेभ्यः राक्षसादिभ्यः रक्षितः सन् देवान् इन्द्रादीन् महे महते सौमनसाय सौमनस्याय अस्माकं देवानां प्रसादनाय यज पूजय॥ सौमनसाय-युवादिभ्योऽण् इति भावे अण्॥

तृतीयामृचमाह—

प्र सु विश्वान्रक्षसो धक्ष्यग्ने भवा यज्ञानामभिशस्तिपावा।
अथा वह सोमपतिं हरिभ्यामातिथ्यमस्मै चकृमा सुदाने॥३॥

प्र सु विश्वान् रक्षसः धक्षि अग्ने भव यज्ञानाम् अभिशस्तिऽपावा अथ आ वह सोमऽपतिम् हरिऽभ्याम् आतिथ्यम् अस्मै चकृम सुऽदात्रे ॥

हे अग्ने, विश्वान् रक्षसः सर्वान् राक्षसान् प्र सु धक्षि प्रकर्षेण सुष्ठु दह। यज्ञानाम् अस्माभिरनुष्ठीयमानानां यजनानां अभिशस्तिपावा हिंसायाः पाता, विघातादरक्षिता भव। अथ अनन्तरं सोमपतिम् सोमानां राजानं इन्द्रं हरिभ्यां तदश्वाभ्यां आ वह अस्मद्यज्ञं प्रापय। सुदात्रे शोभनदात्रे अस्मै आगतायेन्द्राय आतिथ्यम् अतिथिसत्कारं चकृम कुर्मः ॥ धक्षि–दह भस्मीकरणे, बहुलं छन्दसीति शपो लुक्। अभिशस्तिपावा–शसु हिंसायामिति धातोः अभिपूर्वकात् भावे क्तिन्, अभिशस्तेः पातीत्यभिशस्तिपावा, पा रक्षणे, आतो मनिन्निति वनिप्। सुदात्रे–पूर्ववद्दातेर्वनिप् ॥

चतुर्थीमृचमाह—

प्रजावता वचसा वह्निरासा च हुवे नि च सत्सीह देवैः।
वेषि होत्रमुत पोत्रं यजत्र बोधि प्रयन्तर्जनितर्वसूनाम् ॥४॥

प्रजाऽवता वचसा वह्निः आसा आ च हुवे नि च सत्सि इह देवैः वेषि होत्रम् उत पोत्रम् यजत्र बोधि प्रऽयन्तः जनितः वसूनाम् ॥

प्रजावता तेजोबलादिसन्तानफलोपेतेन वचसा स्तोत्रेण स्तुतः यः आसा आस्येन ज्वालात्मकेन, वह्निः वोढा, देवेभ्यो हव्यानि प्रापयिता भवति तमग्निं त्वां आ च हुवे आह्वयामि। आहूतस्त्वं देवैः इन्द्रादिभिः सह इह अस्मिन्यजने नि सत्सि च निषीदसि च, निषण्णो भवेति लोडर्थः। तथा निषण्णः त्वं हे यजत्र यजनीय होत्रम् होतृकर्म आह्वानकर्म उत अपि च पोत्रम् पोतृकर्म शोधनकर्म च वेषि कामयस्व, स्वयमेव कुरु इत्यर्थः। वसूनाम् धनानां दिव्यानां प्रयन्तः प्रकर्षेण यन्तः नियामक, तथा जनितः उत्पादयितः, वसूनि अस्मासु आधातः अग्ने, बोधि बोधय, अस्मान् दिव्यवसुविषये प्रबोधवतः कुर्विति भावः॥ आसा–आस्यशब्दस्य आसन्नादेशः, तृतीयाया डादेशः। हुवे–ह्वेञो लटि छन्दसि संप्रसारणम्। बोधि–बुध अवगमने, अस्मात् ण्यन्तात् छन्दस्युभयथेति हेरार्धधातुकत्वात् णेरनिटीति णिलोपः ॥

पञ्चमीमृचमाह—

यथा विप्रस्य मनुषो हविर्भिर्देवाँ अयजः कविभिः कविः सन् ।
एवा होतः सत्यतर त्वमद्याग्ने मन्द्रया जुह्वा यजस्व ॥५॥
यथा विप्रस्य मनुषः हविःऽभिः देवान् अयजः कविऽभिः कविः सन्
एव होतरिति सत्यऽतर त्वम् अद्य अग्ने मन्द्रया जुह्वा यजस्व ॥

कविः सन् स्वयं क्रान्तदर्शी सन् कविभिः द्रष्टृभिः सह विप्रस्य विपश्चितः मनुषः मनोः मनुष्याणां प्रथमस्य मनोमयस्य पितुः हविर्भिः हव्यैः आह्वानसाधनभूतैरर्पणैः देवान् इन्द्रादीन् यथा येन प्रकारेण अयजः पूजितवानसि, एव तथैव हे अग्ने, होतः आह्वातः, सत्यतर अतिशयेन सत्य सत्यस्वरूपेत्यर्थः त्वम् अद्य इदानीं मन्द्रया मादयित्र्या हर्षयित्र्या जुह्वा जिह्वया ज्वालया, होमसाधनभूतया स्रुचा इति बाह्यार्थः यजस्व पूजय ॥ मनुषा—मन ज्ञाने, मनेरुसिन् ॥

इति प्रथमस्य पञ्चमे चतुर्विंशो वर्गः

कथेति पञ्चर्चं चतुर्थं सूक्तं त्रैष्टुभं गोतमस्यार्षं आग्नेयम् ॥

तत्र प्रथमामृचमाह—

कथा दाशेमाग्नये कास्मै देवजुष्टोच्यते भामिने गीः ।
यो मर्त्येष्वमृत ऋतावा होता यजिष्ठ इत्कृणोति देवान् ॥१॥
कथा दाशेम अग्नये का अस्मै देवऽजुष्टा उच्यते भामिने गीः यः
मर्त्येषु अमृतः ऋतऽवा होता यजिष्ठः इत् कृणोति देवान् ॥

अस्मै प्रस्तुताय अग्नये देवाय कथा कथं, केन प्रकारेण दाशेम यथाभागं दद्याम, यथोचित-भागपरिकल्पनापूर्वकं दानं दाशतेर्धातोरर्थः, देवानां मुख्यतमायास्मै कथं भागकल्पना कार्या, युक्तो भागश्च दीयेत? अस्मै भामिने तेजस्विने अग्नये देवजुष्टा देवैः सेविता, देवानां प्रीतिकरी सेवितव्या का गीः कीदृशी स्तुतिरूपा वाक् उच्यते कीर्त्यते? अग्निमुद्दिश्य या वागुच्यते सा इतरेषां देवानां सेवनीया स्यात्, यतस्ते च देवाः प्रीताः यजमानस्यर्षेः यजनमुपेत्य तेन दीयमानान् स्वीयभागान् अङ्गीकृत्य तस्मिन् प्रसन्ना भवेयुः। तस्मात् अग्निमुपेयुषी वाक् तादृशी भवति यादृशी देवानां अग्निना आनेतव्यानां सम्मतिं प्रीतिं च सम्पादयतीत्युक्तं भवति । अथ

द्रष्टारमृषिं वागाविशति, यदनुग्रहेण अग्नेर्गोप्यं तत्त्वं कृत्यं च उत्तरेणार्धर्चेनाह। यः देवः अग्निः मर्त्येषु मरणधर्मसु मनुष्येषु अमृतः मरणरहितः नित्यः ऋतावा ऋतवान् सत्यवान्, अनृतपरिप्लुतेषु मनुष्येषु नश्वरेषु स्वयमनश्वरः सत्योज्ज्वलो भवतीत्यर्थः। एवं स्वरूपमुक्तम्। अथ कृत्यं ब्रूते। होता आह्वाता देवानाम्, किं च यजिष्ठः अतिशयेन यष्टा, यजमानस्य कार्यं स्वयं निर्वहत्यग्निः, अत एवोत्तमयाजी, न केवलं यजति देवान् आह्वयति च, आहूयानीतान् देवान् यजमाने व्यवस्थापयति च, देवान् इत् कृणोति इन्द्रादीन् करोत्येव॥ कथा—छन्दसि थाप्रत्ययः। भामिने—भा दीप्तौ, मन्प्रत्ययः, ततो मत्वर्थीय इनिः। ऋतावा—मत्वर्थीयो वनिप्, अन्येषामपि दृश्यत इति दीर्घत्वम्॥

द्वितीयामृचमाह—

यो अध्वरेषु शन्तम ऋतावा होता तमू नमोभिरा कृणुध्वम्।
अग्निर्यद्वेर्मर्ताय देवान्त्स चा बोधाति मनसा यजाति॥२॥

यः अध्वरेषु शम्ऽतमः ऋतऽवा होता तम् ऊम् इति नमःऽभिः आ कृणुध्वम् अग्निः यत् वेः मर्ताय देवान् सः च बोधाति मनसा यजाति॥

यः योऽग्निः अध्वरेषु यागेषु दिव्याध्वयात्रात्मकेषु शन्तमः सुखकृत्तमः अध्वगमनायासवर्जं सुखकारीत्यर्थः ऋतावा सत्यवान् परमार्थदर्शी अनृतपरिहारक इत्यर्थः, होता आह्वाता देवानाम् तम् उ तमेव देवं नमोभिः नमस्करणैः अन्तर्बहिश्च सर्वैरङ्गैः प्रपदनैः प्रपत्तिभिरित्यर्थः, हे यजमानाः यूयं आकृणुध्वम् आकृतिमन्तं कुरुत, अग्नेरमृतस्य गुप्तस्य युष्मासु व्यक्तिं निष्पादयतेति यावत्। यत् यदा आकृतिनिष्पत्तौ सत्यां अग्निः मर्ताय मनुष्याय यजमानकृते देवान् इन्द्रादीन् वेः वेति प्रविशति आविष्करोति वा, तदा सः अग्निः बोधाति च जानाति च मनसा मत्या यजाति पूजयति च देवानिति शेषः॥ मर्त्ये यजमाने अमृतोऽग्निः प्रबुद्धो व्यक्तित्वमापन्नः स्वयं यजननिर्वाही भवति, होता देवानां यजमानस्य जागरितप्रज्ञायां निर्माता च सम्पद्यते। 'मनसा बोधाति यजाति' इत्युक्त्या यजमाने बहिःप्रज्ञो भूत्वा देवबोधवान् देवयाजी च भवतीत्युक्तम्। अत्र 'मनसा नमसा' इति नकारमकारयोः स्थानविपर्ययं मन्यते सायणः, अर्थस्तु नमसा हविर्भिरित्याह॥ वेः—वी गत्यादिषु, वर्तमाने लङ्, प्रथमपुरुषैकवचनस्य मध्यमपुरुषैकवचनादेशः। बोधाति, यजाति—लेटि आडागमः॥

तृतीयामृचमाह—

स हि क्रतुः स मर्यः स साधुर्मित्रो न भूदद्भुतस्य रथीः ।
तं मेधेषु प्रथमं देवयन्तीर्विश उप ब्रुवते दस्ममारीः ॥३॥

सः हि क्रतुः सः मर्यः सः साधुः मित्रः न भूत् अद्भुतस्य रथीः
तम् मेधेषु प्रथमम् देवऽयन्तीः विशः उप ब्रुवते दस्मम् आरीः ॥

सः हि स ह्यग्निः क्रतुः अध्यवसायबलः, अत एव कर्मणां कर्ता, सः मर्यः स बलाढ्यः, सः साधुः साधयिता, निष्पादयितापि स एव, मित्रः न मित्र इव, सौरविभूतिरादित्यो यथा सुहृत् उपकारी भवति तथा अद्भुतस्य रथीः अद्भुतपदवेदनीयस्य परमस्य ज्योतिषः सारथिः भूत् भवति । अद्भुतशब्दः सविस्तरं विचारितो भूमिकायां चतुर्थे खण्डे (पृष्ट ८०, ८१) । तम् एवंभूतं अग्निं मेधेषु यज्ञेषु देवयन्तीः देवयन्त्यः देवानात्मन इच्छन्त्यः देवकामा इत्यर्थः विशः प्रजाः प्रथमम् उप ब्रुवते आदौ उपेत्य हृद्गतां मन्त्ररूपां वाचं उच्चारयन्ति । कीदृश्यो विशः? दस्मम् आरीः कर्मणां निष्पादकं तमग्निं प्रति अरणशीलाः उद्योगिनः आर्याः । एवमनवरतमुद्योगिनो भवन्ति ये मर्त्यास्ते प्रथमं अग्निमेवोपासते । तन्मुखेन देवकामास्ते सफलोद्योगा भवन्ति ॥ मर्यः—सविस्तरं विचारितः (१.६.३) । देवयन्तीः—वा छन्दसीति पूर्वसवर्णदीर्घत्वम् । आरीः—ऋ गतौ, जनिघसिभ्यामिण् इति इण्प्रत्ययः, ततो ङीष्, पूर्ववत् पूर्वसवर्णदीर्घत्वम् ॥

चतुर्थीमृचमाह—

स नो नृणां नृतमो रिशादा अग्निर्गिरोऽवसा वेतु धीतिम् ।
तना च ये मघवानः शविष्ठा वाजप्रसूता इषयन्त मन्म ॥४॥

सः नः नृणाम् नृऽतमः रिशादाः अग्निः गिरः अवसा वेतु धीतिम्
तना च ये मघऽवानः शविष्ठाः वाजऽप्रसूताः इषयन्त मन्म ॥

नृणाम् नेतॄणां बलवतां देवानां मध्ये नृतमः अतिशयेन बलवान् रिशादाः हिंसकानां अत्ता भक्षयिता सः अग्निः उक्तगुणविशिष्टः अग्निः अवसा स्वीयेन सान्निध्यात्मना साहाय्येन साधनेन नः अस्माकं गिरः स्तुतिवाचः धीतिम् धारणावतीं प्रज्ञां च वेतु आविष्करोतु प्रविशतु वा ।

ये च ये पुनरन्ये देवाः इन्द्रादयः तना वितत्या स्वकैशान्येनेत्यर्थः मघवानः दिव्यधनाः शविष्ठाः दीप्तबलाः सन्ति, तेऽपि वाजप्रसूताः वाजैः स्वीयसमृद्धिभिः प्रसूताः प्रेरिताः भूत्वा मन्म मननं मतिं इषयन्त एषयन्ति, मतेरेषणाबलं अनुगृह्णन्तीत्यर्थः ॥ तना–तनु विस्तारे, पचाद्यच्, तृतीयैकवचनस्य आकारः । शविष्ठाः–शवः दीप्तं बलं, मत्वर्थीयो विनिः, तत अतिशायनिक इष्ठन्, विन्मतोर्लुगिति विनो लुक् । इषयन्त–इष इच्छायाम्, अस्माण्ण्यन्तात् छान्दसो लङ् लोडर्थे ॥

पञ्चमीमृचमाह—

एवाग्निर्गोतमेभिर्ऋतावा विप्रेभिरस्तोष्ट जातवेदाः ।
स एषु द्युम्नं पीपयत्स वाजं स पुष्टिं याति जोषमा चिकित्वान् ॥५॥
एव अग्निः गोतमेभिः ऋतऽवा विप्रेभिः अस्तोष्ट जातऽवेदाः सः
एषु द्युम्नम् पीपयत् सः वाजम् सः पुष्टिम् याति जोषम् आ चिकित्वान् ॥

ऋतावा सत्यवान् जातवेदाः जातप्रज्ञः, मनुष्ये प्रबोधलाभात् अधुना जातवेदस्त्वविशेषणमुपपन्नम् अग्निः देवः विप्रेभिः विपश्चिद्भिः गोतमेभिः एतन्नामकैर्ऋषिभिः, चित्प्रकाशसम्पन्नैरिति ध्वनितं गोः किरणवाचित्वात् ज्ञानप्रकाशसङ्केतकत्वाच्च एव एवं अस्तोष्ट स्तुतः । सः स्तुतश्चासावग्निः एषु गोतमेषु द्युम्नम् द्योतमानं बलं पीपयत् आप्याययति, पोषयति, पाययतीति सायणः। तर्हि मुख्यार्थस्य बाधात् लक्षणया पोषणमेवाभिप्रेतं ग्राह्यम् । सः एषु वाजम् समृद्धिं तथा सः पुष्टिम् पुनर्वर्धयति। आ चिकित्वान् सर्वतः प्रत्यक्षदर्शी ज्ञानवान् सोऽग्निः जोषम् प्रीतिं याति प्राप्नोति ॥ गोतमेभिः–ऋष्यन्धकादिभ्यश्चेति अण्विधेः अत्रिभृग्वादिभ्यश्चेति बहुषु लुक् । अस्तोष्ट–स्तौतेः कर्मणि लुङ्, चिणभावश्छान्दसः । पीपयत्–प्यायतेः णिचि छान्दसः पीभावः, एवं सायण एवान्यत्र प्यायतेर्निष्पादयति (१५३.६, १५३.४, १८१.५, ६) । जोषम्–जुषी प्रीतिसेवनयोः, भावे घञ् ॥ अरविन्दश्रीचरणैर्वेदरहस्यार्थप्रतिपादनाय सविस्तरव्याख्यामुदाहृतानां सूक्तानामिदमेकम् । यद्यपि विस्तरभिया नेह तत्सर्वमुक्तम्, तथापि तत्तात्पर्यानुसारेणेदं पञ्चर्चं व्याख्यातम् ॥

इति प्रथमस्य पञ्चमे पञ्चविंशो वर्गः

'अभि त्वे'ति पञ्चर्चं पञ्चमं सूक्तं गोतमस्यार्षं आग्नेयं गायत्रम् ॥

तत्र प्रथमामृचमाह—

अभि त्वा गोतमा गिरा जातवेदो विचर्षणे । द्युम्नैरभि प्र णोनुमः ॥१॥
अभि त्वा गोतमाः गिरा जातऽवेदः विऽचर्षणे द्युम्नैः अभि प्र नोनुमः ॥

हे जातवेदः जातानां वेदितः, विचर्षणे विशेषेण सर्वस्य द्रष्टः, अग्ने, गोतमाः एतदाख्या वयं ऋषयः त्वा त्वाम् गिरा स्तुत्या अभि आभिमुख्येन स्तुमः । न केवलं 'गिरा' वाचा स्तुमः, किं तु द्युम्नैः द्योतमानैः बलैः त्वत्प्रसादाल्लब्धैः तुभ्यमेवाधुना समर्प्यमाणैः अभि प्रणोनुमः ॥ पूर्वसूक्तस्य अन्तिमर्चि "जातवेदाः आ चिकित्वान् एषु द्युम्नं वाजं पीपयत्" इति पठितं अत्रावधेयम् । तान्येव पदानि तदर्थानि वा प्रयुक्तान्यत्र । तत्र आचिकित्वान् अत्र विचर्षणे इति । अग्निना आप्यायितं द्युम्नं अग्नये समर्प्य बहुशः स्तौति मन्त्रद्रष्टा । "वाजं पीपयत्" इति पूर्वमुक्तम् । अत्र तृतीयर्चि 'वाजसातमम्' इति विशेषणं साकूतं बोध्यम् ॥ नोनुमः—णु स्तुतौ, अस्माद् यङ्लुगन्ताल्लट् ॥

द्वितीयामृचमाह—

तमु त्वा गोतमो गिरा रायस्कामो दुवस्यति । द्युम्नैरभि प्र णोनुमः ॥२॥
तम् ऊम् इति त्वा गोतमः गिरा रायःऽकामः दुवस्यति द्युम्नैः अभि प्र नोनुमः ॥

रायस्कामः धनकामः दिव्यसंपत्काम इति रहस्यार्थः गोतमः ऋषिरयं तमु त्वा तथाभूतं पूर्वोक्तविधानुग्रहकारिणं त्वां गिरा दुवस्यति परिचरति। शिष्टं गतम् ॥ रायस्कामः—रायो धनानि कामयते, तत्पुरुषे कृति बहुलमिति लुक्, विसर्जनीयस्य सत्वम् । दुवस्यति—परिचरणार्थकः कण्ड्वादिः ॥

तृतीयामृचमाह—

तमु त्वा वाजसातममङ्गिरस्वद्धवामहे । द्युम्नैरभि प्र णोनुमः ॥३॥
तम् ऊम् इति त्वा वाजऽसातमम् अङ्गिरस्वत् हवामहे द्युम्नैः अभि प्र नोनुमः ॥

हे अग्ने, वाजसातमम् वाजानां समृद्धीनां अतिशयेन सनितारं दातारं तमु त्वा तमेव त्वां

अङ्गिरस्वत् अङ्गिरसः पूर्वे पितरः प्रसिद्धा ऋषय इव हवामहे आह्वयामः। शिष्टं गतम्॥ अङ्गिरस्वत्-तेन तुल्यं क्रिया चेदिति वतिः॥

चतुर्थीमृचमाह—

तमु त्वा वृत्रहन्तमं यो दस्यूँरवधूनुषे। द्युम्नैरभि प्र णोनुमः॥४॥
तम् ऊम् इति त्वा वृत्रहन्ऽतमम् यः दस्यून् अवऽधूनुषे द्युम्नैः अभि प्र नोनुमः॥

हे अग्ने, दस्यून् उपक्षपयितॄन् राक्षसादीन् यः यस्त्वं अवधूनुषे अवचालयसि अधः पातयसि, वृत्रहन्तमम् अतिशयेन वृत्राणां तमसां पाप्मनां हन्तारं तमु त्वा तमेव त्वां नोनुम इति संबन्धः। शिष्टं गतम्॥

पञ्चमीमृचमाह—

अवोचाम रहूगणा अग्नये मधुमद्वचः। द्युम्नैरभि प्र णोनुमः॥५॥
अवोचाम रहूगणाः अग्नये मधुऽमत् वचः द्युम्नैः अभि प्र नोनुमः॥

रहूगणाः रहूगणस्य पुत्रा वयं गोतमाः अग्नये देवाय मधुमत् माधुर्ययुक्तं वचः स्तोत्रं अवोचाम अवादिष्म। शिष्टं गतम्॥

इति प्रथमस्य पञ्चमे षड्विंशो वर्गः

'हिरण्यकेश' इति द्वादशर्चं षष्ठं सूक्तम्। प्रथमतृचस्त्रैष्टुभः, द्वितीय औष्णिहः, शिष्टानां षण्णामृचां गायत्री छन्दः। अग्निर्देवता। प्रथमतृचस्य शुद्धाग्निर्मध्यमस्थानो वैद्युताग्निर्वा देवतेति पूर्वे। शुद्धाग्निरिति चेदलमस्माकं, स न केवलं भौतिकः वैद्युतो वा, तस्य सर्वदेवात्मकत्वात्, अमृतस्य तस्य मर्त्ये प्रथमं क्रतुरूपेणाविर्भावात्, आद्ये तृचे भुवि दिवि मध्यमेऽन्तरिक्षे च तस्य त्रिधा वर्णनात्॥

तत्र प्रथमामृचमाह—

हिरण्यकेशो रजसो विसारेऽहिर्धुनिर्वात इव ध्रजीमान्।
शुचिभ्राजा उषसो नवेदा यशस्वतीरप्स्युभो न सत्याः॥१॥

हिरण्यऽकेशः रजसः विऽसारे अहिः धुनिः वातःऽइव ध्रजीमान् शुचिऽभ्राजाः उषसः नवेदाः यशस्वतीः अपस्युवः न सत्याः ॥

रजसः अन्तरिक्षस्य विसारे विस्तारे, नभोवितानें, हिरण्यकेशः हिरण्यवर्णाः सुवर्णवद्रोचमानाः केशाः केशस्थानीयाः ज्वालाः यस्य सः । अग्नेर्ज्वालानां आदित्यवर्णत्ववर्णनेन तस्य तृतीयस्थानगतं दिव्यं वैभवं द्योतितम् । अथ मध्यमस्थाने स कीदृशः? अहिः मेघः तदुपलक्षितसर्पाकारविद्युद्रूपः धुनिः कम्पयिता मेघानामिति शेषः वात इव वायुरिव ध्रजीमान् शीघ्रगतियुक्तः, उत्तरार्धेन प्रथमस्थानसंबन्धिनमाह । शुचिभ्राजाः शोभनदीप्तियुक्तः उषसः उषोवेलाः नवेदाः ज्ञाता, कविर्मनीषीत्यादिषु पठितः, विचारितश्च (१.३४.१) उषसां वेदिता प्रभातसमयज्ञानवान् । कीदृशीरुषसः? यशस्वतीः ख्यातिमतीः अपस्युवः न अपः कर्म आत्मन इच्छन्तीः कर्मकारिणीरिव सत्याः सत्यधर्मानुसारिणीः 'ऋतस्य पन्थामन्वेति साधु' इत्युक्तविधया ऋतपथमप्रमादेन अनुवर्तमानाः हि उषसः । अत एव तथा ख्यातिमत्यः यथोचितकालं कर्मकारिण्य इव प्रभान्ति उषसः । ऊर्ध्वगतौ हिरण्यज्वालोऽपि मध्यस्थितौ 'वात इव ध्रजीमान्' 'धुनिरपि' प्रथमस्थाने भुवि "शुचिभ्राजाः" उषसां प्रादुर्भावसमयं जानाति "नवेदाः" अग्निः ॥ अयं बाह्यपक्षानुसारेणार्थः प्रोक्तः । अथेदमस्य रहस्यं भवति । मर्त्ये क्रतुरग्निरमृतो यदा प्रबुद्धो ज्वलन्नूर्ध्वं गच्छति तदा तस्य ज्वाला दिवं शुद्धमानसचैतन्यभुवं स्पृशन्ती आदित्यवर्णा भवति, सत्यस्य ज्योतिषो विसारं स्वीकृत्य भ्राजते । प्राणलोकविभवभूयिष्ठे मध्यमस्थाने सोऽग्निरन्तर्ज्वलन्नेव ज्योतिर्बलादीनामावरकं वृत्रं मेघं दर्षणाय कम्पयन् क्रियावेगवान् विद्योतते । अथ जागरितस्थानेऽत्र बहिःप्रज्ञे पुरुषे चिन्मयारुणोदयसमयानां ज्ञाता जागरूको जागर्ति । एवं त्रिधा वर्तनमग्नेः प्रकाशितमस्यामृचि । अस्य तृचस्य द्वितीय-तृतीयऋग्भ्यां अयमर्थः संगच्छते ॥

स्थूलार्थोऽपि अस्माभिरेव प्रथममुक्तः, तत्र सायणव्याख्यानस्य दुर्घटत्वात् । चिन्तकानां निरीक्षणायेह सायणभाष्यपङ्क्तीरुदाहरिष्यामः । "हिरण्यकेशः...अहिः आगत्य हन्ता मेघानां धुनिः...वात इव ध्रजीमान्...एवंभूतो वैद्युतोऽग्निः रजस उदकस्य विसारे विसरणे मेघान्निस्सरणे निमित्तभूते सति शुचिभ्राजाः...सन् मेघाज्जलानि निर्गमयितुं जानाति । उषसः उषोदेवताः नवेदाः न विदन्तीति नवेदाः । मेघादुदकस्य निस्सरणं अग्निरेव जानाति उषसस्तु न जानन्तीत्यर्थः । अज्ञाने दृष्टान्तः—यशस्वतीः अन्नयुक्ताः अन्नवत्यः अपस्युवः...सत्याः अवितथा-

रम्भाः न एवंभूताः प्रजा इव। अत्रोक्तसामज्ञानेनाग्निः प्रशस्यते न तु ता निन्द्यन्ते, न हि निन्दा निन्द्यं निन्दितुं अपि तु स्तुत्यं स्तोतुमिति न्यायात्" ॥ प्रसङ्गवशादिदमत्र वक्तव्यं यदस्मत्पूर्वाचार्यैर्वासिष्ठपादैरभिहितम् "अयं मन्त्रो व्याख्यानस्याग्न्यगोचरोऽभूत्, यथा कथञ्चित् अध्याहारैरपार्थैश्च वाक्यं पूरितम् (सायणीये)" इति ॥ ध्रजीमान्—ध्रज गतौ, इन् सर्वधातुभ्य इति भावे इन्प्रत्ययः। नवेदाः—गतम्। अपस्युवः—अपस्-शब्दात् सुप आत्मनः क्यच्, क्याच्छन्दसीत्युप्रत्ययः, तन्वादीनां छन्दसि बहुलमुपसंख्यानमिति उवङ् ॥

द्वितीयामृचमाह—

आ ते सुपर्णा अमिनन्तँ एवैः कृष्णो नोनाव वृषभो यदीदम्।
शिवाभिर्न स्मयमानाभिरागात्पतन्ति मिहः स्तनयन्त्यभ्रा ॥२॥

आ ते सुऽपर्णाः अमिनन्त एवैः कृष्णः नोनाव वृषभः यदि इदम्
शिवाभिः न स्मयमानाभिः आ अगात् पतन्ति मिहः स्तनयन्ति अभ्रा ॥

हे अग्ने, ते तव सुपर्णाः शोभनपतना ज्वालारश्मयः एवैः गमनवेगप्रकारैः आमिनन्त प्रबला भवन्ति, कृष्णः कृष्णवर्णः वृषभः वर्षिता नोनाव भृशं शब्दं अकरोत् यदि इदम् यदा इदं कर्म चलति, तदा शिवाभिः क्षेमकारिणीभिः स्मयमानाभिर्न हसनवतीभिरिव विद्युद्भिः सहेत्यध्याहार्यं विशेष्यं, मूले नास्ति। आगात् आगच्छति कर्तृपदं वर्षितेत्यध्याहार्यम्। ततः मिहः आपः पतन्ति वृष्टा भवन्ति, अभ्रा अभ्राणि अद्भिः पूर्णानि, अपामाधारका मेघाः स्तनयन्ति गर्जितं कुर्वन्ति। अयं स्थूलोऽर्थः। अत्र रहस्यार्थकथनात् प्रागिदं वक्तव्यम्। वेदे प्राचीन-आर्यभाषासु च सर्वत्र बलार्थकाः शब्दाः हिंसार्थकधातुमूलकाः ग्राह्याः। अत एव मर्यः मारयितृत्वात् बलार्थे रूढो वेदे। दस्रदस्मदक्षादयश्च कर्मनिष्पादकबलार्थे प्रयुक्ता लक्ष्यन्ते। अथ "एवैः" गमनप्रकारैरित्यस्माभिरुक्तम्। अत्रापि प्राचीन-आर्यभाषाप्रयोगाः अवधेयाः। धात्वर्थानुगमादेव "एवैः" गन्तृभिः मरुद्भिरित्यत्र सायणो व्याचष्टे। अन्यत्र "अश्वैः" इति प्रसक्तिवशादाह। अस्मत्पक्षे केवलगमनार्थ एवेह अलम् ॥

अथेदं पारमार्थिकं तात्पर्यं भवति। क्रतूज्ज्वलोऽग्निरधुना मध्यमस्थाने प्राणधामनि उच्चरति। उत्पतनवेगभङ्ग्या प्रबले भवति सति, चित्प्रकाशबलादीनां अप्सङ्केतितानां वर्षकः इन्द्रविभूतिदेवः आसन्नवृष्टिं सूचयति स्वीयनादविभवेन। अस्मिन् समये चित्प्रकाशशक्तिविशेषाः

ज्वलन्तीभिर्विद्युद्भिरिव शुभ्राभिः सुखकारिणीभिः ज्योतिर्बलादिभिः सह शरीरक्षेत्रे विन्दुशः पतितुं आरभन्ते। अनन्तरं वृष्टिरेव भवति। एवं सङ्केतरहस्ये विज्ञाते सर्वोऽपि मन्त्रः स्पष्टो भवति। इदं चावधेयम्। "एवैः" कैः? "स्मयमानाभिः" काभिः? "आगात्" कः? सूक्ष्मपक्षं स्थूलपक्षं वा अवलम्ब्य व्याख्यातुमपकाशदानाय मन्त्रवर्ण एवं व्यवस्थितो भवति॥ अभिनन्त-मीञ् हिंसायाम्, क्रैयादिकः, व्यत्ययेनान्तादेशः। नोनाद-नौतेर्यङ्लुगन्तात् लिट्। स्मयमानाभिः-ष्मिङ् ईषद्धसने, ततः शानच्। स्तनयन्ति-स्तन शब्दे चुरादिः॥

तृती । ऋचमाह—

यदीमृतस्य पयसा पियानो नयन्नृतस्य पथिभी रजिष्ठैः।
अर्यमा मित्रो वरुणः परिज्मा त्वचं पृञ्चन्त्युपरस्य योनौ ॥३॥

यत् ईम् ऋतस्य पयसा पियानः नयन् ऋतस्य पथिऽभिः रजिष्ठैः अर्यमा मित्रः वरुणः परिऽज्मा त्वचम् पृञ्चन्ति उपरस्य योनौ ॥

एवं उक्तविधया मध्यमस्थो प्राणमयभूमनि चित्रवासादिवर्षारम्भात्परं पुनश्च समुज्ज्वलोऽग्निः ऋतस्य ज्योतिषः सारभूतेन रसेन यजमानं सर्वात्मना आप्याययन् ऋतस्य प्रापकैः ऋजुतमैर्मार्गैरूर्ध्वं नयन् प्रवर्तते। ईदृश्यां दशायां आदित्याः मित्रादयः ऋतज्योतिर्विभवाः पूर्वोक्तज्योतिरादिवर्षोत्पत्तिस्थाने आच्छादकवत् गोपनकवचवत् स्थितं दिव्यप्रदेशं अनेनाग्निनीतेन यजमानात्मना संयोजयन्ति-इत्येवमर्थकं वैदिकयोगरहस्यं वर्णयति तृचस्यास्य तृतीयर्क्॥ यत् ईम् यदाग्निः ऋतस्य सत्यस्य पयसा सारेण अमृतरसेन पियानः यजमानस्य आप्यायनं कुर्वन्, स्थूलपक्षे जगदाप्यायनं ऋतस्य सत्यस्य संबन्धिभिः रजिष्ठैः ऋजुतमैः पथिभिः मार्गैः नयन् प्रापयन् वर्तते, तदा अर्यमा मित्रः वरुणः एते देवाः परिज्मा परितो गन्ता, इन्द्रश्च "अतः परिज्मन्ना गहि" अत्रेन्द्र एवोक्तः॥ तस्य त्रैलोक्येश्वरत्वात् अत्रापि स एव बोध्यः उपपत्तेः, मरुद्गण इति सायणीये, उपरस्य ऊर्ध्वस्य उत्कृष्टस्य ज्योतिर्बलादिवर्षणस्य योनौ मूलस्थाने त्वचम् गोपनकवचवत् स्थितां दिव्यप्राकारभुवं पृञ्चन्ति संपृक्तां कुर्वन्ति, शरीरत्वा यजमानेन संयोजयन्तीत्यर्थः। सायणीये उपरशब्दार्थः नैकविधः, विभिद्यते। तथा तन्निर्वचनं च नोपपद्यते। 'उपरान् उत्कृष्टे स्थाने वर्तमानान्' (२.४.९) इति सायण एव ऋज्वर्थमाह॥ पियानः-स्फायी ओप्यायी वृद्धौ, छन्दसि शपो लुक्, व्यत्ययेन पीभावः। रजिष्ठैः-ऋजुशब्दात् इष्ठन्, ऋकारस्य रत्वम्। पृञ्चन्ति-पृची संपर्के रौधादिकः॥

चतुर्थीमृचमाह—

अग्ने वाजस्य गोमत ईशानः सहसो यहो ।
अस्मे धेहि जातवेदो महि श्रवः ॥४॥

अग्ने वाजस्य गोऽमतः ईशानः सहसः यहो इति अस्मे इति धेहि जातऽवेदः महि श्रवः ॥

हे सहसो यहो बलस्य पुत्र अग्ने, त्वं गोमतः चिद्रूपरश्मियुक्तस्य वाजस्य समृद्धिराशेः ईशानः ईश्वरः असि । तस्मात् हे जातवेदः जातानां वेदितः, अस्मे अस्मासु महि महत्, भूरि श्रवः दिव्यं श्रवणं धेहि धारय स्थापयेत्यर्थः ॥ यहो—यहुः अपत्यनामसु पठितम् । अस्मे—सप्तम्याः शे आदेशः ॥

पञ्चमीमृचमाह—

स इधानो वसुष्कविरग्निरीळेन्यो गिरा ।
रेवदस्मभ्यं पुर्वणीक दीदिहि ॥५॥

सः इधानः वसुः कविः अग्निः ईळेन्यः गिरा रेवत् अस्मभ्यम् पुरुऽअनीक दीदिहि ॥

सः अग्निः इधानः दीप्यमानः वसुः वस्तुनि वसतीति वसुः, वस्तुनः सर्वस्य वासयिता, निवासहेतुः कविः मेधावी, अतीन्द्रियार्थदर्शी गिरा वाचा, स्तुत्या, ईळेन्यः अध्येषणीयः भवति। हे पुर्वणीक, पुरूणि बहूनि अनीकानि मुखानि ज्वालात्मकानि यस्य सः, तथाभूताग्ने, अस्मभ्यं अस्मानुद्दिश्य रेवत् दिव्यधनोपेतं यथा भवति तथा दीदिहि दीप्यस्व, ज्वलितो भव ॥ इधानः—ञि-इन्धी दीप्तौ, ताच्छीलिकश्चानश् । रेवत्—रयेर्मतौ छन्दसि संप्रसारणम्, मतुपो वत्वम् । दीदिहि—दीङ् इतिः दीप्तिकर्मा छान्दसः ॥

षष्ठीमृचमाह—

क्षपो राजन्नुत त्मनाग्ने वस्तोरुतोषसः ।
स तिग्मजम्भ रक्षसो दह प्रति ॥६॥

क्षपः राजन् उत त्मना अग्ने वस्तोः उत उषसः सः तिग्मऽजम्भ रक्षसः दह प्रति ॥

उत अपि च हे राजन्, राजनशील अग्ने, त्मना आत्मना स्वयमेव क्षपः क्षपाः रात्रीः सर्वाः वस्तोः सर्वाण्यहानि उत अपि च उषसः प्रभातवेलाश्च, अत्यन्तसंयोगे द्वितीया, सर्वासु रात्रिषु उषस्सु दिवा च सः स त्वं तिग्मजम्भ तीक्ष्णमुख, रक्षसः राक्षसान् प्रति प्रतिघटय्य दह दग्धान् कुरु ॥

इति प्रथमस्य पञ्चमे सप्तविंशो वर्गः

सप्तमीमृचमाह—

अवा नो अग्न ऊतिभिर्गायत्रस्य प्रभर्मणि । विश्वासु धीषु वन्द्य ॥७॥
अव नः अग्ने ऊतिऽभिः गायत्रस्य प्रऽभर्मणि विश्वासु धीषु वन्द्य ॥

विश्वासु सर्वासु धीषु प्रज्ञावृत्तिषु वन्द्य स्तुत्य हे अग्ने गायत्रस्य गायत्रीच्छन्दस्कस्य मन्त्रस्य सूक्तस्य गायत्रस्य साम्नो वा प्रभर्मणि प्रभरणे सम्पादने निमित्ते नः अस्मान् ऊतिभिः त्वत्कर्तृकवर्धनैः अव वर्धय ॥ अवधातुः प्रायशो वर्धनार्थः अस्मत्पक्षे, क्वचित् पालनार्थ उपपद्येत ॥

अष्टमीमृचमाह—

आ नो अग्ने रयिं भर सत्रासाहं वरेण्यम् । विश्वासु पृत्सु दुष्टरम् ॥८॥
आ नः अग्ने रयिम् भर सत्राऽसहम् वरेण्यम् विश्वासु पृत्ऽसु दुस्तरम् ॥

हे अग्ने, नः अस्मभ्यं रयिम् धनं दिव्यं आ भर आहर। कीदृशं रयिम्? सत्रासहम् सत्रा सह युगपदेव अभिभवितारं विघ्नानां यज्ञविरोधिनां वा। वरेण्यम् वरणीयं श्रेष्ठम् विश्वासु पृत्सु सर्वेषु संग्रामेषु दुस्तरम् विरोधिभिस्तरीतुमशक्यम्। तादृशं ज्योतिर्बलादिकं दिव्यं धनं देहि ॥ सत्रासहम्—छन्दसि सह इति ण्विः। वरेण्यम्—वृञ एण्यः ॥

नवमीमृचमाह—

आ नो अग्ने सुचेतुना रयिं विश्वायुपोषसम् । मार्डीकं धेहि जीवसे ॥९॥
आ नः अग्ने सुऽचेतुना रयिम् विश्वायुऽपोषसम् मार्डीकम् धेहि जीवसे ॥

रयिर्वसु वा दिव्यं धनं ज्योतिर्बलादिकमिति व्याख्यायतेऽस्माभिः सर्वत्र। अस्यां ऋचि विस्पष्टमुच्यते रयिस्वरूपं तद्विशेषणलक्षणेन, हे अग्ने, नः अस्माकं जीवसे जीवनाय उत्तमाय दिव्याय वेति शेषः, सुचेतुना शोभनज्ञानेन सहितं रयिम् धनं आ धेहि आस्थापय। कीदृशम्? मार्डीकम् मृडीकं सुखमयं विश्वायुपोषसम् विश्वस्य सर्वस्य आयोः पुरुषायुषस्य पोषसं पोषकं यावज्जीवं देहादिषु सर्वात्मना पुरुषं पोषयितुं पर्याप्तमित्यर्थः चिन्मयं सुखमयं बलात्मकं धनं उक्तं भवति॥ सुचेतुना-चिती संज्ञाने, औणादिक उप्रत्ययः। विश्वायुपोषसम्-विश्वायुरित्यत्र सकारलोपश्छान्दसः, विश्वायुः पुष्णातीति विश्वायुपोषाः, असुन् छन्दसि॥

दशमीमृचमाह—

प्र पूतास्तिग्मशोचिषे वाचो गोतमाग्नये। भरस्व सुम्नयुर्गिरः॥१०॥

प्र पूताः तिग्मऽशोचिषे वाचः गोतम अग्नये भरस्व सुम्नऽयुः गिरः॥

हे गोतम चिन्मयकिरणयुक्ततम, ऋषेरन्तरात्मनः संबोधनम्। सुम्नयुः सुम्नं सुखं आत्मन इच्छन् त्वं तिग्मशोचिषे तीव्रज्वालाय अग्नये पूताः पवित्राः गिरः वाचः स्तोत्रवाचः प्रभरस्व प्रकर्षेण सम्पादय॥ तिग्मशोचिषे-तिज निशाने, तिग्मानि शोचींषि यस्य तस्मै। सुम्नयुः-सुम्नशब्दात् क्यच्, क्याच्छन्दसीत्युप्रत्ययः॥

एकादशीमृचमाह—

यो नो अग्नेऽभिदासत्यन्ति दूरे पदीष्ट सः। अस्माकमिद्वृधे भव॥११॥

यः नः अग्ने अभिऽदासति अन्ति दूरे पदीष्ट सः अस्माकम् इत् वृधे भव॥

हे अग्ने, यः विरोधी अमानुषो मानुषो वा नः अस्मान् अन्ति अन्तिके समीपे दूरे विप्रकृष्टस्थाने वा वर्तमानः सन् अभिदासति अभिदुत्योपक्षपयति, सः शत्रुः पदीष्ट पततु नश्यतु। अस्माकम् इत् अस्माकमेव वृधे वर्धनाय भव॥ अभिदासति-दसु उपक्षये। अन्ति-अन्तिकशब्दस्य ककारलोपश्छान्दसः। वृधे-वृधु वृद्धौ, संपदादिलक्षणो भावे क्विप्॥

द्वादशीमृचमाह—

सहस्राक्षो विचर्षणिरग्नी रक्षाँसि सेधति। होता गृणीत उक्थ्यः॥१२॥

सहस्रऽअक्षः विऽचर्षणिः अग्निः रक्षाँसि सेधति होता गृणीते उक्थ्यः॥

सहस्राक्षः सहस्रं अक्षीणि यस्य सः सर्वतोमुखी सामान्येन दृष्टिरस्येत्यर्थः विचर्षणिः विशेषेण द्रष्टा प्रत्येकं सर्वस्य। अग्निः रक्षांसि राक्षसान् यज्ञविघातकान् सेधति प्रतिषेधति। सः उक्थ्यः उक्थैः शस्त्रैः स्तोत्रैः स्वयं स्तुत्यः अस्माभिः स्तुतः सन् होता देवानामाह्वाता भूत्वा तान् गृणीते स्तौति, यजमानकृत्यं देवानामाराधनं स्वयं निर्वहति यजमानस्वात्मसमर्पणाद्धेतोः॥ गृणीते–गृ शब्दे, प्वादीनां ह्रस्व इति ह्रस्वत्वम्॥

इति प्रथमस्य पञ्चम अष्टाविंशो वर्गः

'इत्थे'ति षोडशर्चं सप्तमं सूक्तं गोतमस्यार्षम्। इन्द्रो देवता पङ्क्तिश्छन्दः॥

तत्र प्रथमामृचमाह—

इत्था हि सोम इन्मदे ब्रह्मा चकार वर्धनम्।
शविष्ठ वज्रिन्नोजसा पृथिव्या निः शशा अहिमर्चन्ननु स्वराज्यम्॥१॥

इत्था हि सोमे इत् मदे ब्रह्मा चकार वर्धनम् शविष्ठ वज्रिन् ओजसा पृथिव्याः निः शशाः अहिम् अर्चन् अनु स्वऽराज्यम्॥

हे शविष्ठ अत्यन्तदीप्तबलोपेत, वज्रिन् वज्रवन् इन्द्र, इत्था हि साध्वेवेदं (सत्यनामैतत्) यत् त्वया मदे मदकरे सोमे यजमानार्पितसर्वानुभूतिरसे स्वीकृते सति ब्रह्मा मन्त्रः वर्धनम् यजमानात्मनि तवाभिवर्धनं चकार करोति, लडर्थे लिट्। इत् पादपूरणे। तस्मात् त्वं ओजसा वीर्यबलेन पृथिव्याः अन्नमयात् जगतः शरीरात् जागरितस्थानात् अहिम् वृत्रं निः शशाः निर्गमितवान्, निश्शेषेण शासनं कृतवानसि निर्गमनाय। किं कुर्वन्? स्वराज्यम् स्वस्य राज्यं राजत्वं अनु अनुलक्ष्य अर्चन् पूजयन्, स्वीयस्वामित्वं प्रकटयन्॥ शशाः–शासु अनुशिष्टौ, यङ्लुकि शपः श्लुः छन्दसि। स्वराज्यम्–राज्ञो भावः कर्म वा, पत्यन्तपुरोहितादिभ्यो यक्॥

द्वितीयामृचमाह—

स त्वामदद्वृषा मदः सोमः श्येनाभृतः सुतः।
येना वृत्रं निरुद्रयो जघन्थ वज्रिन्नोजसार्चन्ननु स्वराज्यम्॥२॥

सः त्वा अमदत् वृषा मदः सोमः श्येनऽआभृतः सुतः येन वृत्रम् निः अतऽभ्यः जघन्थ वज्रिन् ओजसा अर्चन् अनु स्वऽराज्यम्॥

हे इन्द्र, त्वा त्वां सः सोमः त्वया परिगृह्य पीतः सोमरसः अमदत् अमदयत्, हर्षितवान्। कीदृशः सोमः? वृषा वर्षिता स्वरसस्य मदः मदकारी श्येनाभृतः श्येनेन पक्षिणा आभृतः आहृतः आनीतः, यजमानस्य हृदयादन्तरात्मन उद्गता मन्त्रात्मिका वाक् उत्पतनप्रख्यातो वेगवान् पक्षी इति बोध्यम्। तस्मान्मन्त्रवाग्बलेन दिवः उत्तमप्रज्ञाभूमेः सकाशात् संपादितः सोम इति आर्षं रहस्यम्। गायत्रीमन्त्रं पक्षिरूपं गृहीत्वा स्वर्गलोकं गत्वा सोमलतां आनिनायेति कर्मठानां पक्षे तात्पर्यं विवेकवर्जितमिति दूरापास्तम्। अत एव मन्त्रेण इन्द्रो वर्धते "ब्रह्मा चकार वर्धनम्" इति पूर्वस्यामृचि गीतम्। पुनः कीदृशः सोमः? सुतः अभिषुतः, संस्कृतः। वज्रिन् वज्रवन्निन्द्र येन सोमेन पीतेन ओजसा वीर्यबलेन अद्भ्यः अद्भिर्लक्षितमन्तरिक्षं मध्यमस्थानं स्वस्मिन्नन्तर्हितज्योतिर्बलादिकं प्राणमयप्रज्ञाक्षेत्रं, तस्मात् वृत्रम् आवरकं असुरं निर्जघन्थ निर्गमय्य हतवानसि॥ पूर्वं पृथिव्याः, अत्र अन्तरिक्षात् इत्युक्तमवधेयम्। अन्यद्गतम्॥ अमदत्-मदी हर्षे, अन्तर्भावितण्यर्थः। जघन्थ-हन्तेर्लिट्॥

तृतीयामृचमाह—

प्रेह्यभीहि धृष्णुहि न ते वज्रो नि यंसते।
इन्द्र नृम्णं हि ते शवो हनो वृत्रं जया अपोऽर्चन्ननु स्वराज्यम्॥३॥

प्र इहि अभि इहि धृष्णुहि न ते वज्रः नि यंसते इन्द्र नृम्णम् हि ते शवः हनः वृत्रम् जयाः अपः अर्चन् अनु स्वऽराज्यम्॥

हे इन्द्र, प्रेहि प्रकर्षेण गच्छ शत्रूनुद्दिश्य, अभीहि आभिमुख्येन गच्छ, धृष्णुहि अभिभव तान् शत्रून्। ते तव वज्रः आयुधं न नियंसते न नियम्यते केनापि अनिरुद्धगतित्वात्। ते तव शवः दीप्तं बलं नृम्णम् हि पौरुषप्रचुरं हि। तस्मात् वृत्रम् आवरकं निरोधकं वा असुरं चित्प्रकाशादिविरोधिनं हनः जहि, अपः वृत्राक्रान्ताः उक्तलक्षणा अपः जयाः जय लभस्व। अन्यत् पूर्ववत्॥ यंसते-यमेः कर्मणि लेटि सिप् बहुलमिति सिप्, लेटः अडागमः। हनः-लोडर्थे लङ्। जयाः-जयतेर्लेट्याडागमः॥

चतुर्थीमृचमाह—

निरिन्द्र भूम्या अधि वृत्रं जघन्थ निर्दिवः।
सृजा मरुत्वतीरव जीवधन्या इमा अपोऽर्चन्ननु स्वराज्यम्॥४॥

निः इन्द्र भूम्याः अधि वृत्रम् जघन्थ निः दिवः सृज मरुत्वतीः अव जीवऽधन्याः इमाः अपः अर्चन् अनु स्वऽराज्यम् ॥

हे इन्द्र, भूम्याः अधि पृथिव्या उपरि तं आवृतवन्तं वृत्रम् उक्तस्वरूपं निर्जघन्थ निःशेषेण हतवानसि, तथा दिवः अन्तरिक्षात् तं निः जघन्थ। अधुना इमाः अस्माभिः प्रतीक्ष्यमाणाः प्रत्यासन्नाः अपः यथोक्तलक्षणाः अवसृज अधोगमय, वर्षय। कीदृशीरपः? मरुत्वतीः मरुद्भिर्युक्ताः, मरुतः प्राणमयान्तरिक्षधामन्न उद्भूताः प्रचण्डवेगाः, शुद्धमनोमयभुवं दिवं प्राप्य धीवृत्तिबलात्मका भूत्वा दिवस्पतेरिन्द्रस्य भ्रातरो भवन्तीति प्रागुक्तमाशयं स्मारयामः। अत एव तादृशमरुत्साहचर्यात् जीवधन्याः जीवाः प्राणवन्तः धन्याः भाग्यशालिनः याभिस्ताः। अन्यत् पूर्ववत् ॥

पञ्चमीमृचमाह—

इन्द्रो वृत्रस्य दोधतः सानुं वज्रेण हीळितः।
अभिक्रम्याव जिघ्नतेऽपः सर्माय चोदयन्नर्चन्ननु स्वराज्यम् ॥५॥

इन्द्रः वृत्रस्य दोधतः सानुम् वज्रेण हीळितः अभिऽक्रम्य अव जिघ्नते अपः सर्माय चोदयन् अर्चन् अनु स्वऽराज्यम् ॥

हीळितः अनादृतः वृत्रेण, अत एव क्रुद्धस्तस्मै इन्द्रः, अभिक्रम्य आभिमुख्येन गत्वा दोधतः कम्पयमानस्य वृत्रस्य शत्रोः सानुम् समुच्छ्रितं प्रदेशं अन्तरिक्षगतं वज्रेण अवजिघ्नते प्रहरति। किं कुर्वन्? अपः चोदयन् अपां प्रेरणं कुर्वन्। किमर्थम्? सर्माय सरणाय निर्गमनाय। अन्यत् समानम् ॥ हीळितः—हेडृ होडृ अनादरे, ईकारश्छान्दसः, हेळते क्रुध्यतिकर्मेति पठितम्। जिघ्नते—हन्तेर्लिटि व्यत्ययेनात्मनेपदं बहुवचनं च। सर्माय—सृ गतौ, अर्तिस्तुस्वित्यादिना भावे मन्प्रत्ययः ॥

इति प्रथमस्य पञ्चम एकोनत्रिंशो वर्गः

षष्ठीमृचमाह—

अधि सानौ नि जिघ्नते वज्रेण शतपर्वणा।
मन्दान इन्द्रो अन्धसः सखिभ्यो गातुमिच्छत्यर्चन्ननु स्वराज्यम् ॥६॥

अधि सानौ नि जिघ्नते वज्रेण शतऽपर्वणा मन्दानः इन्द्रः अन्धसः सखिऽभ्यः गातुम् इच्छति अर्चन् अनु स्वऽराज्यम् ॥

इन्द्रः शतपर्वणा बह्वर्थः शतशब्दः बहुपर्वधाराभिर्युक्तेन वज्रेण स्वायुधेन सानौ अधि सप्तम्यर्थानुवादी अधिः, वृत्रावासस्य समुच्छ्रिते अन्तरिक्षप्रदेशे तं निजिघ्नते नितरां प्रहरति। ततश्च सः अन्धसः पीतात् सोमाद्धेतोः मन्दानः मन्दमानः मोदमानः सखिभ्यः यजनाद् देवसख्यं प्राप्नुवद्भ्य ऋषिभ्यः गातुम् मार्गं ऊर्ध्वं स्वसन्निधिं गन्तुं इति शेषः इच्छति। अन्यत् समानम् ॥ "मन्दानः स्तूयमानः...अन्धसो गातुं अन्नस्य मार्गं" इति सायणः ॥ मन्दानः—मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु ॥

सप्तमीमृचमाह—

इन्द्र तुभ्यमिदद्रिवोऽनुत्तं वज्रिन्वीर्यम् ।
यद्ध त्यं मायिनं मृगं तमु त्वं माययावधीरर्चन्ननु स्वराज्यम् ॥७॥

इन्द्र तुभ्यम् इत् अद्रिऽवः अनुत्तम् वज्रिन् वीर्यम् यत् ह त्यम् मायिनम् मृगम् तम् ऊम् इति त्वम् मायया अवधीः अर्चन् अनु स्वऽराज्यम् ॥

अद्रिवः पर्वतवन् इन्द्र, गावः यत्र गूढा आसन् स पर्वत इन्द्रस्य वशं गतः वज्रबलेन, पर्वतो मेघः यत्र आपो निरुद्धाः, तद्वान् इन्द्रः। विचारितः पूर्वम् (१.१०.७) "कृणुष्व राधो अद्रिवः" इत्यत्र। वज्रिन् वज्रवन्, तुभ्यं इत् तवैव वीर्यम् सामर्थ्यं अनुत्तम् अनुनं अप्रेरितं शत्रुभिर्न स्पृष्टमभिभूतमिति यावत्। यत् ह यस्मात् वीर्यात् खलु मायिनम् मायाविनं वञ्चकं मृगम् पलायनपटुर्यथा दुर्ग्रहस्तथावस्थितं त्यम् तम् प्रसिद्धं वृत्रं त्वमु त्वमपि मायया कपटयुक्त्यैव अवधीः हतवानसि। अन्यत्समानम् ॥ अनुत्तम्—नुदते क्तः, निष्ठानत्वाभावः नसत्तनिषत्तेतिनिपातनात्। अवधीत्—हन्तेर्लुङि वधादेशः ॥

अष्टमीमृचमाह—

वि ते वज्रासो अस्थिरन्नवतिं नाव्या अनु ।
महत्ते इन्द्र वीर्यं बाह्वोस्ते बलं हितमर्चन्ननु स्वराज्यम् ॥८॥

वि ते वज्रासः अस्थिरन् नवतिम् नाव्याः अनु महत् ते इन्द्र वीर्यम् बाह्वोः ते बलम् हितम् अर्चन् अनु स्वऽराज्यम् ॥

हे इन्द्र, ते तव वज्रासः वज्राः एकोऽपि वज्रः बहुधा भवति प्रयोगस्थलभेदबाहुल्यात् नवतिम् नवतिसंख्याकाः नाव्याः नावा तार्याः नदीः, पूर्वं निरुद्धा अधुना विसृष्टा विपुलाः प्रवाहिणीः अनु अनुलक्ष्य वि अस्थिरन् विविधमस्थिपत। हे इन्द्र, तथाविधं ते तव वीर्यम् बलं महत् प्रभूतम्। ते तव बाह्वोः भुजयोः बलम् हितम् निहितम्। शिष्टं समानम्॥ अस्थिरन्–तिष्ठतेर्लुङ्, समवप्रविभ्यः स्थ इत्यात्मनेपदम्, व्यत्ययेन झस्य रन्नादेशः॥

नवमीमृचमाह—

सहस्रं साकमर्चत परि ष्टोभत विंशतिः।
शतैनमन्वनोनवुरिन्द्राय ब्रह्मोद्यतमर्चन्ननु स्वराज्यम् ॥९॥

सहस्रम् साकम् अर्चत परि स्तोभत विंशतिः शता एनम् अनु अनोनवुः इन्द्राय ब्रह्म उत्ऽयतम् अर्चन् अनु स्वऽराज्यम् ॥

सहस्रम् बहुसंख्याकाः मनुष्याः साकम् संघीभूय युगपत् एनम् इन्द्रं अर्चत अपूजयन्। तथा विंशतिः अल्पसंख्याकसंघः, षोडशर्त्विग्यजमानतत्पत्नीसदस्यशमितार इति बाह्ये कर्मपक्षे, तेषां संख्या परिष्टोभत सर्वतोऽस्तौत्। तथा शता शतसंख्याकाः स्तोतार ऋषयः इन्द्राय इन्द्रार्थं उद्यतम् उद्गतम् स्वात्मन इति शेषः ब्रह्म मन्त्रं उच्चारयन्तः अनु अनोनवुः निरन्तरं अस्तुवन्। 'अर्चत' ऋग्भिः, 'स्तोभत' सामभिः, 'अनोनवुः' स्तुतिसामान्येन इति द्योतितमवधेयम्। अन्यत् समानम्॥ परिष्टोभत–स्तोभतिः स्तुतिकर्मा, उपसर्गात् षकारः सस्य। अनोनवुः–णु स्तुतौ, यङ्लुगन्ताल्लङि झेरुसादेशः। उद्यतम्–यम उपरमे, कर्मणि निष्ठा॥

दशमीमृचमाह—

इन्द्रो वृत्रस्य तविषीं निरहन्त्सहसा सहः।
महत्तदस्य पौंस्यं वृत्रं जघन्वाँ असृजदर्चन्ननु स्वराज्यम् ॥१०॥

इन्द्रः वृत्रस्य तविषीम् निः अहन् सहसा सहः महत् तत् अस्य पौंस्यम् वृत्रम् जघन्वान् असृजत् अर्चन् अनु स्वऽराज्यम् ॥

इन्द्रः वृत्रस्य तेजोबलादिशत्रोरसुरस्य तविषीम् बलं निरहन् हतवान्। केनोपायेन? सहसा स्वीयेन सहनेन अन्याभिभवसाधनेन। वृत्रस्य बलमपि सहः सहनं अभिभवसमर्थम्। अस्य इन्द्रस्य तत् पौंस्यम् पुरुषलक्षणं बलं महत् भूरि। यस्मादयं वृत्रम् असुरं जघन्वान् हतवान् भूत्वा असृजत् निरगमयत् वृत्रात् तन्निरुद्धाः अपः। अन्यत् समानम्॥ पौंस्यम्-पुंस अभिवर्धने चुरादिः, अचो यदिति यत्। जघन्वान्-हन्तेर्लिटि क्वसुः॥

इति प्रथमस्य पञ्चमे त्रिंशो वर्गः

एकादशीमृचमाह—

इमे चित्तव मन्यवे वेपेते भियसा मही।
यदिन्द्र वज्रिन्नोजसा वृत्रं मरुत्वाँ अवधीरर्चन्ननु स्वराज्यम्॥११॥

इमे इति चित् तव मन्यवे वेपेते इति भियसा मही इति यत् इन्द्र वज्रिन् ओजसा वृत्रम् मरुत्वान् अवधीः अर्चन् अनु स्वऽराज्यम्॥

मही महत्यौ इमे चित् द्यौः पृथिवी चोभे अपि हे इन्द्र, तव मन्यवे त्वदीयक्रोधात्, पञ्चम्यर्थे चतुर्थी, भियसा भयेन वेपेते कम्पेते। हे वज्रिन् वज्रवन्निन्द्र मरुत्वान् मरुद्युक्तस्त्वं ओजसा बलेन यत् यदा वृत्रम् असुरं अवधीः तदा द्यावापृथिव्यावकम्पिषातामिति पूर्वेण योजनीयम्। अन्यत्समानम्॥ वेपेते-टुवेपृ कम्पने। भियसा-जिभी भये, औणादिकः कसिप्रत्ययः।

द्वादशीमृचमाह—

न वेपसा न तन्यतेन्द्रं वृत्रो वि बीभयत्।
अभ्येनं वज्र आयसः सहस्रभृष्टिरायतार्चन्ननु स्वराज्यम्॥१२॥

न वेपसा न तन्यता इन्द्रम् वृत्रः वि बीभयत् अभि एनम् वज्रः आयसः सहस्रऽभृष्टिः आयत अर्चन् अनु स्वऽराज्यम्॥

वृत्रः असुरः इन्द्रम् दिवस्पतिं वेपसा कम्पनेन न विबीभयत् भीतं नाकरोत्, तथा न तन्यता गर्जितेन न 'विबीभयत्'। किं तु आयसः अयोमयः सहस्रभृष्टिः बहुधाराभिर्युक्तः वज्रः इन्द्रविसृष्टः एनम् वृत्रं अभ्यायत आभिमुख्येनागच्छत् हन्तुम्। शिष्टं समानम्॥ तन्यतास्तन शब्दे, सलोपः, तृतीयाया डादेशः। बीभयत्-बिभेतेः ण्यन्ताल्लुङ्। आयत-अय मय गतौ, लङ्, आत्मनेपदी॥

त्रयोदशीमृचमाह—

यद्वृत्रं तव चाशनिं वज्रेण समयोधयः ।
अहिमिन्द्र जिघांसतो दिवि ते बद्बधे शवोऽर्चन्ननु स्वराज्यम् ॥१३॥

यत् वृत्रम् तव च अशनिम् वज्रेण सम्ऽअयोधयः अहिम् इन्द्र जिघांसतः दिवि ते बद्बधे शवः अर्चन् अनु स्वऽराज्यम् ॥

हे इन्द्र यत् यदा वृत्रम् अशनिम् च तदीयं वज्रं च, वज्रोपमं तन्मायया सृष्टमायुधं च तव त्वदीयेन वज्रेण विश्रुतेनायुधेन समयोधयः सम्यक् प्राहार्षीः, तदा अहिम् वृत्रं जिघांसतः हन्तुमिच्छतः ते तव शवः ज्वलितं बलं दिवि द्युलोके बद्बधे बद्धं स्थैर्येणावस्थितं बभूव, निष्प्रकम्पं ध्रुवमतिष्ठदित्यर्थः। शिष्टं पूर्ववत् ॥ बद्बधे—बध बन्धने, कर्मणि लिट्, व्यत्ययेन हलादिशेषाभावः ॥

चतुर्दशीमृचमाह—

अभिष्टने ते अद्रिवो यत्स्था जगच्च रेजते ।
त्वष्टा चित्तव मन्यव इन्द्र वेविज्यते भिया अर्चन्ननु स्वराज्यम् ॥१४॥

अभिऽस्तने ते अद्रिऽवः यत् स्थाः जगत् च रेजते त्वष्टा चित् तव मन्यवे इन्द्र वेविज्यते भिया अर्चन् अनु स्वऽराज्यम् ॥

हे अद्रिवः, वज्रवन् ते तव अभिष्टने सिंहगर्जितनादे वर्तमाने, स्थाः स्थावरं जगत् च यत् चराचरमुभयमपि रेजते कम्पते । हे इन्द्र त्वष्टा चित् विश्वकर्मापि वज्रायुधस्यापि निर्माता सोऽपि तव मन्यवे कोपात् भिया भीत्या वेविज्यते अतितरां कम्पते । शिष्टं पूर्ववत् ॥ स्थाः—तिष्ठतेः क्विप् । वेविज्यते—ओविजी भयचलनयोः, अस्मात् क्रियासममिहारे यङ्, सन्यङोरिति द्विर्भावः ॥

पञ्चदशीमृचमाह—

नहि नु यादधीमसीन्द्रं को वीर्या परः ।
तस्मिन्नृम्णमुत क्रतुं देवा ओजांसि सन्दधुरर्चन्ननु स्वराज्यम् ॥१५॥

नहि नु यात् अधिऽइमसि इन्द्रम् कः वीर्या परः तस्मिन् नृम्णम्

उत क्रतुम् देवाः ओजांसि सम् दधुः अर्चन् अनु स्वऽराज्यम् ॥

यातु यान्तं सर्वत्र गच्छन्तं व्यापकं इन्द्रम् नहि नु अधीमसि नह्यवगच्छामः । तत्र हेतुमाह! वीर्या वीर्येण पराक्रमेण परः परस्तादतिदूरे (परस् इति सकारान्तमव्ययम्) वर्तमानं तं कः को वा जानीयात् । अथ च तस्मिन् इन्द्रे देवाः सर्वेऽपि नृम्णम् नेतृत्वबलं उत क्रतुम् क्रियादक्षमध्यवसायबलं च ओजांसि वीर्यबलानि च सन्दधुः स्थापयामासुः । शिष्टं समानम् ॥ यातु–या प्रापणे, अस्माल्लटः शतृ, द्वितीयाया लुक् । अधीमसि–इण् गतौ, इदन्तो मसिः । वीर्या–सुपां सुलुगिति तृतीयाया आकारः ॥

षोडशीमृचमाह—

यामथर्वा मनुष्पिता दध्यङ् धियमतनत ।
तस्मिन्ब्रह्माणि पूर्वथेन्द्र उक्था समग्मतार्चन्ननु स्वराज्यम् ॥१६॥

याम् अथर्वा मनुः पिता दध्यङ् धियम् अतनत तस्मिन् ब्रह्माणि पूर्वऽथा इन्द्रे उक्था सम् अग्मत अर्चन् अनु स्वऽराज्यम् ॥

अथर्वा एतत्संज्ञक आङ्गिरस ऋषिः येनादौ पुष्करादग्निर्निर्मथ्य सम्पादित इत्यन्यो मन्त्रवर्णो वर्णयति । अस्य रहस्यं तत्त्वं पुरस्तादन्यत्र विचार्यते । पिता सर्वासां प्रजानां पूर्वः पितृभूतः मनुः, दध्यङ् अयमाथर्वणः पूर्वः, अस्यापि तत्त्वं पुरस्ताद्विचार्यते । एते पूर्वे याम् धियम् धारणात्मिकां इन्द्राराधनविषयिकां याज्ञिकीं प्रज्ञां अतनत अतन्वत विस्तारितवन्तः आपन्नविस्तारामकुर्वन्नित्यर्थः । तया धिया, तयेति अध्याहार्यं यत्तदोर्नित्यसंबन्धात् । तस्मिन् इन्द्रे दिवस्पतौ ब्रह्माणि अस्माकं मन्त्रात्मकस्तोत्राणि उक्था उक्थानि शस्त्ररूपस्तोत्राणि सर्वाणि पूर्वथा पूर्वमेव पूर्वेषां ऋषीणां ब्रह्माणीव अधुनापि समग्मत समगच्छन्त, इन्द्रेण सर्वाणि ब्रह्माणि उक्थानि च सङ्गच्छन्ते । अर्चन्ननु स्वराज्यम् पूर्ववत् ॥ अतनत–तनु विस्तारे, विकरणस्य लुक्, उपधालोपश्छन्दसि । पूर्वथा–इवार्थे पूर्वशब्दात् थाल्प्रत्ययः । समग्मत–समो गम्यृच्छीत्यात्मनेपदम्, लुङ्, गमहनेत्यादिना उपधालोपः ॥

इति प्रथमस्य पञ्चम एकत्रिंशो वर्गः
प्रथमाष्टके पञ्चमोऽध्यायः समाप्तः

अथ प्रथमाष्टके षष्ठोऽध्याय आरभ्यते। प्रथमे मण्डले त्रयोदशानुवाके सप्त सूक्तानि व्याख्यातानि। इन्द्रो मदायेति नवर्चमष्टमं सूक्तम्। रहूगणपुत्रस्य गोतमस्यार्षं पङ्क्तिश्छन्दस्कम्, इन्द्रो देवता॥

तत्र प्रथमामृचमाह—

इन्द्रो मदाय वावृधे शवसे वृत्रहा नृभिः।
तमिन्महत्स्वाजिषूतेमर्भे हवामहे स वाजेषु प्र नोऽविषत्॥१॥
इन्द्रः मदाय ववृधे शवसे वृत्रऽहा नृऽभिः तम् इत् महत्ऽसु आजिषु उत ईम् अर्भे हवामहे स वाजेषु प्र नः अविषत्॥

वृत्रहा आवरकस्यासुरस्य वृत्रस्य हन्ता इन्द्रः, मदाय हर्षाय शवसे ज्वलते बलाय च नृभिः बलिभिः पुरुषैः ववृधे वर्धितः। बलाढ्यैः यजमानैः अर्प्यमाणैः सोमैः गीयमानैः स्तोत्रैः इन्द्रो वर्धते, यजमाने देवतायाः प्रवेशः प्रवर्धनं च रहस्यार्थपक्षे बोद्धव्ये। तम् इत् तमेव इन्द्रं महत्सु प्रभूतेषु आजिषु सङ्ग्रामेषु हवामहे आह्वयामः। यात्रात्मको यज्ञोऽध्वर इति भूमिकायां सूक्तव्याख्यानेषु च प्रागवोचाम, भुवः प्रस्थाय यावद्दिवं उत्तमस्थानं ज्योतिरुद्दिश्य यज्ञप्रयाणे चलति सति, अध्वनि विघ्नकराः राक्षसा असुरा अन्ये च तद्राजानुचराः तमसस्पुत्राः प्रत्यवतिष्ठन्ते। तैः सह संग्रामे यजमानस्य साहाय्यं देवेभ्यो लब्धव्यं, नालं तत्र पुरुषकारः। इदमन्तर्यागे संग्रामरहस्यम्। उत अपि च ईम् एनं अर्भे अल्पे संग्रामेऽपि 'हवामहे', महत्यल्पे वा कार्ये इन्द्र एव शरणं, तमेवाह्वयामः। सः स चाहूतः वाजेषु आजिषु जित्वा वैरिभ्यः प्राप्तव्यासु समृद्धिषु दिव्यासु निमित्तभूतासु नः अस्मान् प्राविषत् प्रावतु प्रकर्षेण वर्धयतु॥ ववृधे—वृधेः कर्मणि लिट्, संहितायामभ्यासस्य दीर्घत्वम्। अविषत्—अवतेः लेटि अडागमः, सिप् बहुलमिति सिप्॥

द्वितीयामृचमाह—

असि हि वीर सेन्योऽसि भूरि पराददिः।
असि दभ्रस्य चिद्वृधो यजमानाय शिक्षसि सुन्वते भूरि ते वसु॥२॥
असि हि वीर सेन्यः असि भूरि पराऽददिः असि दभ्रस्य चित् वृधः

यजमानाय शिक्षसि सुन्वते भूरि ते वसु ॥

हे वीर, विक्रान्त पराक्रमशालिन्, सेन्योऽसि त्वं सेनार्हो भवसि, एकोऽपि सैन्यभूत इत्यर्थः। हि यस्मादेवं तस्मात् यज्ञवैरिभ्योऽपहृत्य जितं भूरि प्रभूतं दिव्यं धनं पराददिः असि परादाता तेषां पराङ्मुखं यथा तथा आदातासि। दभ्रस्य चित् अल्पस्यापि त्वामाश्रितस्य वृधः असि त्वं वर्धयिता भवसि। यजमानाय यजनं कुर्वते सुन्वते सोमाभिषवं कुर्वते भक्ताय शिक्षसि ददासि अपेक्षितं आवश्यकं च। यतः ते तव वसु धनं भूरि प्रभूतम् ॥ पराददिः-आङ्गमहनजन इति किप्रत्ययः। वृधः-वृधेरन्तर्भावितण्यर्थात् इगुपधलक्षणः कप्रत्ययः ॥

तृतीयामृचमाह—

यदुदीरत आजयो धृष्णवे धीयते धना।
युक्ष्वा मदच्युता हरी कं हनः कं वसौ दधोऽस्माँ इन्द्र वसौ दधः ॥३॥
यत् उत्ऽईरते आजयः धृष्णवे धीयते धना युक्ष्व मदऽच्युता हरी इति
कम् हनः कम् वसौ दधः अस्मान् इन्द्र वसौ दधः ॥

यत् यदा आजयः संग्रामाः उदीरते उद्गच्छन्ति, प्रारभन्ते, तदा धृष्णवे यो धर्षयिता तस्मै शत्रुजिते धना धनानि, धनं, वचनव्यत्ययः, धीयते निहितं भवति, जेतृवशंवदं भवति जितस्य धनमित्यर्थः। अत्र जयापजययोर्विधाता त्वमेवेति प्राह। हे इन्द्र, त्वं तथाविधेषु संग्रामेषु प्रवृत्तेषु मदच्युता शत्रुदर्पस्य च्यावयितारौ हरी तवाश्वौ युक्ष्व योजय, योजयसीत्यर्थः। इन्द्राश्वयोः स्वरूपं सङ्केतात्मतया स्थितं प्राग्विचारितम् (१.१६. १-२, १.६.२, १.७.२, १.२०.२)। तथा योजनात्परं कम् हनः कञ्चिदयुक्तपक्षपातिनं ध्वंसयसीत्यर्थः कम् कंचन युक्तं त्वदधीनं वसौ धने दधः स्थापयसि। त्वदायत्तौ जयपराजयौ। हे इन्द्र, अस्मान् त्वदेकशरणान् वसौ त्वदीये धने दधः स्थापय ॥ उदीरते-ईर गतौ, अदादिः। धना-सुपां सुलुगिति डादेशः युक्ष्व-युजिर् योगे, अन्तर्भावितण्यर्थः। हनः-हन्तेर्लेटि सिपि अडागमः। दधः-दध धारणे, लेटि व्यत्ययेन परस्मैपदम् ॥

चतुर्थीमृचमाह—

क्रत्वा महाँ अनुष्वधं भीम आ वावृधे शवः।
श्रिय ऋष्व उपाकयोर्नि शिप्री हरिर्वान्दधे हस्तयोर्वज्रमायसम् ॥४॥

क्रत्वा महान् अनुऽस्वधम् भीमः आ ववृधे शवः श्रिये ऋष्वः उपाकयोः नि शिप्री हरिऽवान् दधे हस्तयोः वज्रम् आयसम् ॥

क्रत्वा क्रतुना प्राज्ञेन कर्मणा महान् सर्वाधिकः भीमः भयंकरो वैरिवर्गस्य, इन्द्रः अनुस्वधम् स्वधया, विभक्त्यर्थे अव्ययीभावः, स्वधा स्वधारणसामर्थ्यं, स्वधर्मः स्वभाव इति यावत्, तेन सामर्थ्येन शवः स्वीयं ज्वलद्बलं आववृधे आवर्धयत् स्वाभिमुखं प्रवर्धितवान् । अथ ऋष्वः उत्कृष्टः महन्नामैतत्, शिप्री शिप्रे हनू नासिके वा, मुखोपलक्षणमेतत् दृढाध्यवसाय-बलद्योतके शिप्रे हनू तद्युक्तः हरिवान् अश्वोपेतः उपाकयोः समीपवर्तिनोः हस्तयोः बाह्वोः आयसम् अयोमयं वज्रम् । आयुधं श्रिये संपदे नि दधे निदधाति स्थापयति, युद्धे शत्रुजयेन संपल्लाभाय सर्वं सत्काहं करोति ॥ क्रत्वा-छन्दसि नामावस्य विकल्पः ॥

पञ्चमीमृचमाह—

आ पप्रौ पार्थिवं रजो बद्बधे रोचना दिवि ।
न त्वावाँ इन्द्र कश्चन न जातो न जनिष्यतेऽति विश्वं ववक्षिथ ॥५॥

आ पप्रौ पार्थिवम् रजः बद्बधे रोचना दिवि न त्वाऽवान् इन्द्र कः चन न जातः न जनिष्यते अति विश्वम् ववक्षिथ ॥

इन्द्रः स्वविभवेन पार्थिवम् पृथिव्याः संबन्धि सर्वं रजः अन्तरिक्षं च आ पप्रौ आपूरयति। दिवि द्युलोके रोचना रोचमानानि ज्योतींषि बद्बधे बबन्ध स्थापितवान्। अतः हे इन्द्र, त्वावान् त्वत्सदृशः कश्चन न न कोऽप्यस्ति न जातः न कोऽप्युत्पन्नोऽस्ति, न जनिष्यते इतः परं उत्पत्स्य-मानोऽपि नास्ति । तादृशस्त्वं विश्वम् सर्वं जगत् अति ववक्षिथ अत्यन्तं वोढुमिच्छसि, सर्व-जगन्निर्वाही त्वमित्यर्थः॥ पप्रौ-प्रा पूरणे, लिट्। बद्बधे-बध बन्धने, गतम्। त्वावान्-छन्दसि वतुप् सादृश्ये। ववक्षिथ-वह प्रापणे, अस्मादिच्छासनि इत्वस्य छन्दसि विकल्पितत्वात् अभावः॥

इति प्रथमस्य षष्ठे प्रथमो वर्गः

षष्ठीमृचमाह—

यो अर्यो मर्तभोजनं परादर्दाति दाशुषे ।
इन्द्रो अस्मभ्यं शिक्षतु वि भजा भूरिं ते वसु भक्षीय तव राधसः ॥६॥

यः अर्यः मर्तऽभोजनम् पराऽददाति दाशुषे इन्द्रः अस्मभ्यं शिक्षतु वि भज भूरि ते वसु भक्षीय तव राधसः ॥

यः अर्यः स्वामी य इन्द्रः मर्तभोजनम् मर्त्यैरुपभोज्यं, दिव्यमपि मनुष्योपभोगक्षमं धनं दाशुषे दत्तवते यजमानाय परादददाति यज्ञविरोधिभ्योऽपहृत्य तेषां पराङ्मुखं यथा भवति तथा प्रयच्छति, स इन्द्रः अस्मभ्यम् शिक्षतु ददातु अस्मदर्हं धनम्। शिक्षं प्रत्यक्षकृतम्। हे इन्द्र, विभज विभागं कुरु यद्यपि सर्वं धनं त्वदीयमेव, तथापि मानुषोपभोगक्षमो भागः दीयतां नः। ते तव वसु धनं भूरि अत्यधिकं भवति। तव राधसः दिव्यस्य धनस्य एकदेशं कमप्यंशं भक्षीय भजेय लभेयेत्यर्थः॥ दाशुषे-दाशृ दाने। भक्षीय-भज सेवायाम्, प्रार्थनायां लिङ्, आर्धधातुकत्वात् छन्दसि शबभावः सलोपाभावश्च ॥

सप्तमीमृचमाह—

मदेमदे हि नो ददिर्यूथा गवामृजुक्रतुः।
सं गृभाय पुरू शतोभयाहस्त्या वसु शिशीहि राय आ भर ॥७॥

मदेऽमदे हि नः ददिः यूथा गवाम् ऋजुऽक्रतुः सम् गृभाय पुरु शता उभयाहस्त्या वसु शिशीहि रायः आ भर ॥

मदेऽमदे पुनः पुनः हर्षे प्रवर्तमाने सति सोमस्वीकरणाद्धेतोः, ऋजुक्रतुः ऋजुकर्मा अकुटिलक्रियासम्पन्नः स इन्द्रः नः अस्मभ्यं गवाम् यूथा गोयूथानि चित्किरणसमूहानित्यर्थः। ददिः हि तेषां दाता खलु। हे इन्द्र, पुरू पुरूणि बहूनि शता शतानि वसु वसूनि उभयाहस्त्या उभाभ्यां हस्ताभ्यां संगृभाय सम्यक् गृहाण अस्मभ्यं दातुम्। शिशीहि तीक्ष्णीकुरु "निशितबुद्धियुक्तान् कुरु" इति साधूक्तं सायणीये। गवां चिद्रश्मिरूपत्वात्, वसुनश्च दिव्यसत्त्वरूपत्वात्, तस्य सर्वस्यादातुं धारयितुं च निशिता बुद्धिरुपयुक्ता आवश्यकी च। साधारणगोधनादेरादानाय निशिता बुद्धिर्नावश्यकी, लोभो दारिद्र्यं वा अलम्। रायः धनानि आभर आहर अस्मदर्थम्॥

ददिः-डुदाञ् दाने, किप्रत्ययः। यूथा-शेर्लोपश्छन्दसि। गृभाय-ग्रह उपादाने, लोट्, श्नाप्रत्ययस्य शायजादेशः छन्दसि, ह्यग्रहोर्भ इति भत्वम्। उभयाहस्त्या-उभयहस्तशब्दात् तृतीयाद्विवचनस्य सुपां सुलुगिति ड्यादेशः, पूर्वपदस्य दीर्घत्वम्। शिशीहि-शो तनूकरणे, विकरणस्य श्लुः ॥

अष्टमीमृचमाह—

मादयस्व सुते सचा शवसे शूर राधसे ।
विद्मा हि त्वा पुरूवसुमुप कामान्त्ससृज्महेऽथा नोऽविता भव ॥८॥
मादयस्व सुते सचा शवसे शूर राधसे विद्म हि त्वा पुरुऽवसुम् उप कामान् ससृज्महे अथ नः अविता भव ॥

हे शूर शौर्योपेत इन्द्र, सुते सोमे अभिषुते सति सचा सह, अस्माभिः संगतः सन् मादयस्व तर्पय, स्वयं मोदस्व हर्षय च नः । किमर्थम्? शवसे बलाय राधसे धनाय च, सोमस्वीकारेण इन्द्रस्तुष्टः स्वीयं बलं धनं च प्रकटयति । त्वा त्वाम् पुरुवसुम् बहुधनशालिनं विद्म हि जानीमः खलु वयम् । तस्मात् कामान् अस्मदीयान् कामान् उप ससृज्महे त्वया खल्वेकीकुर्मः, त्वदेकायनाः वयमस्मत्कामान् त्वदधीनान् कुर्मः । अथ ततः परं नः अस्माकं अविता भव रक्षिता भव त्वम् ॥ मादयस्व—मद तृप्तियोगे, चुरादिरात्मनेपदी । ससृज्महे—सृज विसर्गे, विकरणस्य श्लुः ॥

नवमीमृचमाह—

एते त इन्द्र जन्तवो विश्वं पुष्यन्ति वार्यम् ।
अन्तर्हि ख्यो जनानामर्यो वेदो अदाशुषां तेषां नो वेद आ भर ॥९॥
एते ते इन्द्र जन्तवः विश्वम् पुष्यन्ति वार्यम् अन्तः हि ख्यः जनानाम् अर्यः वेदः अदाशुषाम् तेषाम् नः वेदः आ भर ॥

हे इन्द्र, ते तव एते जन्तवः इमे जन्मिनः यजमानाः विश्वम् सर्वं (उद्देश्यम्) वार्यम् वरणीयं (विधेयम्) संभजनीयं तव भोग्यं यथा भवति तथा पुष्यन्ति वर्धयन्ति । अर्यः स्वामी, ईशः सर्वेषां त्वं जनानाम् सर्वेषां जन्मिनां अन्तः अन्तरं ख्यो हि पश्यसि हि जानास्येव । अतः अदाशुषाम् अदातॄणां, यजनमकुर्वतां तेषाम् अदैव्यानां देवस्वं देवेभ्योऽददतां वेदः ज्ञानं कीदृशमिति वेत्सि । नः अस्मभ्यं वेदः ज्ञानं आभर आहर, देहि । स्थूलपक्षे वेदो धनं भवति । अस्मत्पक्षेऽपि धनार्थेऽत्र नानुपपत्तिः । किं तु, तद्धनं न लौकिकं मानुषं धनम्, यागशत्रुगतं दिव्यं धनम् तत्रापि, देवेभ्योऽर्पणायैव याच्यते, सर्वस्यापि देवस्वत्वात्, 'कामान् उपससृज्महे'

इति हि पूर्वमुक्तम्। तस्मात् न कामचोदनया शत्रुधनप्रार्थना ॥ ख्यः—ख्या प्रकथने, दर्शनार्थेऽपि प्रसिद्धः, वर्तमाने छान्दसो लुङ्, अडभावः ॥

इति प्रथमस्य षष्ठे द्वितीयो वर्गः

'उपो ष्वि'ति षड्ऋचं नवमं सूक्तं गोतमस्यार्षं ऐन्द्रम्। पङ्क्तिश्छन्दः पञ्चानाम्, अन्त्यायाः जगती ॥

तत्र प्रथमामृचमाह—

उपो षु शृणुही गिरो मघवन्मातथा इव।
यदा नः सूनृतावतः कर आदर्थयासस इद्योजा न्विन्द्र ते हरी ॥१॥

उपोऽइति सु शृणुहि गिरः मघऽवन् मा अतथाःऽइव यदा नः सूनृताऽवतः करः आत् अर्थयासे इत् योज नु इन्द्र ते हरी इति ॥

हे मघवन् धनवन्निन्द्र, गिरः स्तुतिवाचः अस्मदीयाः उपो सु शृणुहि उपगत्य सम्यक् शृणु। अतथाः इव अन्यथाभूतः मा मा भूः, पूर्वविध एव अस्मासु प्रसन्नो वर्तस्व। अपि च नः अस्मान् सूनृतावतः शुभसत्यवाग्युक्तान् यदा करः यदा करोषि आत् अनन्तरमेव अर्थयासे इत् याचस एव अस्मदीयान्यर्पणानि स्तोत्राणि च प्रतीक्ष्य स्वीकुरुषे। शुभसत्यवागात्मको मन्त्रवर्णः देवतानुग्रहादधौ प्रादुर्भवति, इन्द्रादीनां प्रार्थनीयश्च। तस्मात् हे इन्द्र, ते तव हरी अश्वौ नु क्षिप्रं योज रथे योजय॥ अतथाःऽइव—अत्र सायणः "तथेव आचरति तथाति, सर्वप्रातिपदिकेभ्य इति क्विप्, तथोरप्रत्ययः, न तथाः इव अतथा इव"। करः—डुकृञ् करणे, लुङि च्लेरडादेशः। अर्थयासे—अर्थ याच्ञायां, चुरादिरात्मनेपदी, लेट्यडागमः। योज—युजिर् योगे, ण्यन्तात् लोटि णिलोपः छन्दसि ॥

द्वितीयामृचमाह—

अक्षन्नमीमदन्त ह्यव प्रिया अधूषत।
अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजा न्विन्द्र ते हरी ॥२॥

अक्षन् अमीमदन्त हि अव प्रियाः अधूषत अस्तोषत स्वऽभानवः विप्राः नविष्ठया मती योज नु इन्द्र ते हरी इति ॥

हे इन्द्र, प्रियाः देवानां प्रीतिप्रदाः ऋषयः अक्षन् भुक्तवन्तः, त्वया प्रसन्नेन अनुगृहीतं दिव्यमन्नं स्वीकृतवन्त इत्यर्थः, अथ अमीमदन्त हि तृप्ताश्चाभवन् हि। तृप्ताश्च ते अवाधूषत अकम्पयन्, हर्षोद्रेकात् परिष्पन्दयुक्तात्मान आसन्। अथ च ते स्वभानवः स्वे स्वीया भानवः रश्मयः येषां ते स्वप्रकाशाः (इदं दिव्यान्नभोजनं इन्द्रदत्तं, न साधारणान्नभोजनं इति बोद्धुं इदमेकं विप्रविशेषणं अलम्) विप्राः विपश्चितः नविष्ठया नवितृतमया मती मत्या अस्तोषत अस्तुवन्। अन्यत् पूर्ववत्॥ अक्षन्–अद भक्षणे, लुङि घस्लादेशः, मन्त्रे घसेत्यादिना च्लेर्लुक्, गमहनेत्यादिनोपधालोपः। अमीमदन्त–मद तृप्तियोगे चुरादिरात्मनेपदी। अधूषत–धूञ् कम्पने, लुङ्। नविष्ठया–णु स्तुतौ, ततस्तृच्, तुश्छन्दसीति इष्ठन्। मती–सुपां सुलुगिति तृतीयायाः पूर्वसवर्णदीर्घत्वम्॥

तृतीयामृचमाह—

सुसन्दृशं त्वा वयं मघवन्वन्दिषीमहि।
प्र नूनं पूर्णवन्धुरः स्तुतो याहि वशाँ अनु योजा न्विन्द्र ते हरी ॥३॥
सुऽसन्दृशम् त्वा वयम् मघऽवन् वन्दिषीमहि प्र नूनम् पूर्णऽवन्धुरः स्तुतः याहि वशान् अनु योज नु इन्द्र ते हरी इति॥

हे मघवन् इन्द्र, सुसंदृशम् सुष्ठु सर्वस्य द्रष्टारं त्वा त्वाम् वयम् वन्दिषीमहि स्तुतवन्तो भूयास्म। स्तुतः तथाऽस्माभिः स्तुतस्त्वं पूर्णवन्धुरः संपत्पूर्णेन रथेन युक्तो भूत्वा वशान् अनु त्वां कामयमानान् ऋषीनन्यान्वा भक्ताननुलक्ष्य नूनं अवश्यम् प्र याहि प्रस्थानं कुरु। अस्मादृश-स्तुतिभिरभिवर्धितज्योतिर्बलादिसंपत्कः सन् अन्यान् त्वत्कामाननुग्रहीतुं प्रभवसीत्यर्थः। अन्यत् पूर्ववत्॥ वन्दिषीमहि–वदि अभिवादनस्तुत्योः, आशीर्लिङ्॥

चतुर्थीमृचमाह—

स घा तं वृषणं रथमधि तिष्ठाति गोविदम्।
यः पात्रं हारियोजनं पूर्णमिन्द्र चिकेतति योजा न्विन्द्र ते हरी ॥४॥
सः घ तम् वृषणम् रथम् अधि तिष्ठाति गोऽविदम् यः पात्रम् हारिऽयोजनम् पूर्णम् इन्द्र चिकेतति योज नु इन्द्र ते हरी इति॥

रथो हरी चेन्द्रस्य माधुच्छन्दसे युञ्जन्तीति सूक्ते विचारिताः। "रथो गतिविशेष" इत्यारभ्य "इन्द्राधिष्ठानभूते रथे युक्तौ भवतः। अत एव बहुषु मन्त्रवर्णेषु ब्रह्मयुजौ हरी इन्द्रस्य गीतौ" इत्यन्तैर्वाक्यैः मन्त्रवर्णोदाहरणपूर्वकं इन्द्राश्वस्वरूपं उपपादितम्। तत्सर्वमवधेयमत्र रथाश्वप्रसङ्गात्। विशेषतो द्रष्टव्यानि (१.५.४, १०.३, १६.२, २०.२) आसां ऋचां व्याख्यानानि इन्द्राश्वस्वरूपं विवृण्वन्ति॥ स घ स खल्विन्द्रः वृषणम् वर्षितारं अभीष्टतेजोबलादेः गोविदम् गवां चिद्रश्मिसमूहानां लम्भयितारं तम् तथाविधं रथम् गतिविशेषसाधनं स्थिरासनस्थेन्द्रस्य अधितिष्ठाति अधितिष्ठतु अधिरूढो भवतु। हे इन्द्र, यः यो रथः हारियोजनम् हारि कान्तं योजनं युक्ततया ऐन्द्रविभवानां संमिश्रणं यस्मिन् पात्रे तत् पूर्णम् अनूनं पात्रम् ऐन्द्रस्य ऐश्वर्यस्य भोग्यस्य निधानभूतं आधारपात्रं चिकेतति ज्ञापयति, तं रथमधितिष्ठातीति पूर्वेणान्वयः। अधिष्ठाय क्षिप्रं तवाश्वौ योजय। इन्द्ररथः ऐन्द्रस्य विभवजालस्य निधानं आवहन् द्रष्टॄन् इतरान् ज्ञापयति, रथदर्शनमात्रेण ऐन्द्रविभवनिधानपूर्णं पात्रमित आगतं भवतीति जायते ज्ञानमृषेर्द्रष्टुः। "हारियोजनम्" क्वचिदेव प्रयुक्तोऽयं शब्द ऋक्संहितायाम्। विविधानां इन्द्रस्यैश्वर्याणां संयोजने तेषां साङ्गत्यं इतरेतराविरोधेन निष्पन्नं अत एव 'हारि' तत् कमनीयं (हर्यतिः कान्तिकर्मा)। सायणीयाशयस्तु इन्द्ररथो यजमानस्य गोलाभायागच्छति, तस्मिन् रथे धानामिश्रितं सोमेन पूर्णं पात्रं वर्तते। हारियोजनमिति संज्ञा उक्तलक्षणस्य भोज्यस्येति॥

अत्रेदं वक्तव्यम्। 'अक्षन्नमीमदन्त' इत्यत्र-इन्द्रदत्तमन्नं भुक्तवन्तो यजमानाः संतृप्तिभरेण शरीराण्यकम्पयन् 'अधूषत, अस्तोषत' किल सायणव्याख्यानुसारेण। तदनुसारेण पुनरिन्द्रो रथमारुह्य ब्राह्मणानां समाराधनाय 'हारियोजनं पात्रं' आहरति इति कर्मठव्याख्याधोरणी। स्थूलधियामपि दुर्ग्रहेयं स्थूलता॥ घ-ऋचि तु-नु-घेति दीर्घः। चिकेतति-कित ज्ञाने, लेट्याडागमः॥

पञ्चमीमृचमाह—

युक्तस्ते अस्तु दक्षिण उत सव्यः शतक्रतो।
तेन जायामुप प्रियां मन्दानो याह्यन्धसो योजा न्विन्द्र ते हरी॥५॥

युक्तः ते अस्तु दक्षिणः उत सव्यः शतक्रतो इति शतऽक्रतो तेन जायाम् उप प्रियाम् मन्दानः याहि अन्धसः योज नु इन्द्र ते हरी इति॥

हे शतक्रतो बहुकर्मकारिन्निन्द्र, ते तव दक्षिणः दक्षिणपक्षः युक्तः अस्तु रथाश्वयोगवान् भवतु। उत अपि च सव्यः वामभागोऽपि तथा रथाश्वयुक्तो भवतु, प्रयाणाय सन्नद्धो भवेत्यर्थः। तेन रथेन अन्धसः सोमस्य पानेन मन्दानः मोदमानः सन् प्रियाम् प्रीणयित्रीं जायां उप याहि उपेत्य गच्छ। इन्द्रस्य शक्तिरिन्द्राणीति प्रसिद्धा वेदे। तथा वरुणस्य वरुणानी अग्नेरग्नायीति च। एताः स्त्रियः पृथगात्मतया निर्दिष्टाः क्वचित् (१.२२.१२), सर्वत्रेमाः स्वभर्तृकार्यनिर्वाहिण्य इति बोध्यम्। अत्र स्वशक्त्या रन्तुं युक्तो भवेतीन्द्रमाह ऋषिः। अन्यत् पूर्ववत्॥ मन्दानः—मदि स्तुतिमोदेत्यादिषु, लिटः कानच्। अन्धसः—अद भक्षणे, अदेर्नुम् धश्चेत्यसुन्॥

षष्ठीमृचमाह—

युनज्मि ते ब्रह्मणा केशिना हरी उप प्र याहि दधिषे गभस्त्योः।
उत्त्वा सुतासो रभसा अमन्दिषुः पूषण्वान्वज्रिन्त्समु पत्न्यामदः॥६॥
युनज्मि ते ब्रह्मणा केशिना हरी इति उप प्र याहि दधिषे गभस्त्योः
उत् त्वा सुतासः रभसाः अमन्दिषुः पूषण्ऽवान् वज्रिन् सम् ऊम् इति
पत्न्या अमदः॥

हे इन्द्र, केशिना केशवन्तौ शिखावन्तौ ज्वलितौ, अन्यत्र स्थूलकृत्यापेक्षया एवं व्याख्यातम्—"केशिनौ केशैः मशकमक्षिकादयः तामस्यः शक्तयो विधूयन्ते" इति। अत्रापि ज्वलितैस्तामस्यश्शक्तयो विधूयन्त इति उपपद्यते। ते हरी तवाश्वौ ब्रह्मणा मन्त्रेण हार्दवागात्मना स्तोत्रेण युनज्मि योजयामि, ऋषिभिः मन्त्रवाचा रथाश्वयोगो निरुक्त इति मन्त्रवर्णाः प्रथयन्ति। ते च प्रागुदाहृताः, तथा आर्भवसूक्ते (१.२०.२) "वचोयुजा ततक्षुर्मनसा हरी" इत्यत्र व्याख्याऽवधेया। गभस्त्योः बाह्वोः दधिषे धारयस्व, अत्र कर्मपदं नोक्तं स्थूलार्थस्यावकाशाय। अतः "अश्वबन्धकान् रश्मीन्" इति सायणः ज्योतिर्मयस्येन्द्रस्य बाहू अपि तैजसौ, गभस्तिः रश्मिवाचकोऽपि भवति वेदे भाषायामिव। उप प्र याहि उपेत्य प्रस्थानं कुरु तव प्रियां प्रति। त्वा त्वाम् सुतासः अभिषुताः सोमाः रभसाः वेगेन तीव्रा इत्यर्थः उत् अमन्दिषुः मदयुक्तमकार्षुः। हे वज्रिन् वज्रवन्निन्द्र, पूषण्वान् पूषा पुष्टिः पुष्टया सोमस्वीकारेण जनितया युक्तः सन् पत्न्या तव प्रियया शच्या शक्त्या सह सम् उ अमदः सम्यगेव तृप्तो भव॥ रभसाः—अर्श-आदित्वादच्। अमन्दिषुः—व्यत्ययेन परस्मैपदम्। पूषण्वान्—पूषात्र भावसाधनं, पुष पुष्टौ,

धन्नुश्चन्पूषन् इति निपात्यते, तद्वान्। अमदः—मदी हर्षे, लङ् प्रार्थनायां छन्दसि, श्यनि प्राप्ते शप् ॥

इति प्रथमस्य षष्ठे तृतीयो वर्गः

'अश्वावती'ति षड्चं दशमं सूक्तम्, गोतमस्यार्षं ऐन्द्रं जागतम् ॥

तत्र प्रथमामृचमाह—

अश्वावति प्रथमो गोषु गच्छति सुप्रावीरिन्द्र मर्त्यस्तवोतिभिः।
तमित्पृणक्षि वसुना भवीयसा सिन्धुमापो यथाभितो विचेतसः ॥१॥

अश्वऽवति प्रथमः गोषु गच्छति सुप्रऽअवीः इन्द्र मर्त्यः तव ऊतिऽभिः
तम् इत् पृणक्षि वसुना भवीयसा सिन्धुम् आपः यथा अभितः
विऽचेतसः ॥

हे इन्द्र, यो मर्त्यः मनुष्यः तव ऊतिभिः त्वदीयैर्वर्धनैः सुप्रावीः सुष्ठु प्रवर्धितो भवति स अश्वावति बह्वश्वयुक्ते स्थाने प्राणबलभूयिष्ठे पदे वर्तमानः सन् गोषु प्रथमो गच्छति चिद्रश्मिसंपन्नानामग्रेसरो भवतीत्यर्थः। अश्वः प्राणबलक्रियावेगभोगादिकं सङ्केतयति, गौः ज्ञानकिरणम्। यस्य शरीरे प्राणबलसमृद्धिः तस्य विशिष्टा योग्यता ज्ञानकिरणादानाय। तमित् तमेव क्रियाबलज्ञानबलसम्पन्नं पुरुषं भवीयसा बहुतरेण (बहोर्भूभावः) वसुना धनेन दिव्येन पृणक्षि पूरयसि, संपृक्तं करोषीति सायणः, तादृशे पुरुषे त्वदीयधनवृष्टिं कुरुषे। तत्र दृष्टान्तः—यथा आपः अभितः सर्वतः सिन्धुम् नदीं पूरयन्ति तद्वत्। कीदृश्य आपः? विचेतसः विशिष्टज्ञानहेतुभूता इति सायणः। अत्र सङ्केतार्थो दृष्टान्ते नोपपद्यते, अयं साङ्केतिकश्चेत् अप्छन्दःप्रयोगः संमतः स्यादस्माकमयमर्थः। कथं भौतिकोदकानां ज्ञानहेतुभूतत्वमुच्यते? विस्पष्टं ज्ञाताः, प्रत्यक्षं दृश्यमाना आपः इति कस्यचिदूहः। कथं कर्मण्यर्थे शब्दरूपनिष्पत्तिरिति कष्टम्। अत्रैके नव्याः 'विचेतसः' ज्ञानशून्याः विगतचेतस्त्वात् इति व्याचक्षते। तर्हि यथा कथंचित् समर्थयितव्यमेवम्—यथा 'विचेतसः' जडा अपि सिंधुमभितः पूरयन्ति, तथा अजडानि प्रज्ञाविशेषशालीनि ऐन्द्राणि वसूनि इन्द्रः उपयुज्य तैर्मर्त्यं पृणक्ति इति। एवं 'विचेतसः' इति विशेषणस्य प्रयोजनमुन्नेयमित्यस्माकमूहमात्रम् ॥ अश्वावति—मन्त्रे सोमाश्वेति मतौ दीर्घत्वम्। सुप्रावीः—अवितृस्तृतन्त्रिभ्य ईरिति अवतेरीकारप्रत्ययः। भवीयसा—बहुशब्दादीयसुनि बहुशब्दस्य भूभावः, ईयसुन ईकारलोपाभावः छान्दसः ॥

द्वितीयामृचमाह—

आपो न देवीरुप यन्ति होत्रियमवः पश्यन्ति वितंतं यथा रजः ।
प्राचैर्देवासः प्र णयन्ति देवयुं ब्रह्मप्रियं जोषयन्ते वरा इव ॥२॥

आपः न देवीः उप यन्ति होत्रियम् अवः पश्यन्ति विऽततम् यथा रजः प्राचैः देवासः प्र नयन्ति देवऽयुम् ब्रह्मऽप्रियम् जोषयन्ते वराःऽइव ॥

अस्यामृचि, विशेषत उत्तरस्यामृचि च विशेष्यमनुक्त्वा विशेषणमात्रं उक्तं तत्र तत्र । रहस्यरक्षणाय कथंचित् स्थूलार्थोपपादनाय च ऋषिभिरेवं बहुषु मन्त्रेषु सूक्तेष्वपि गीतम् । होत्रियम् होतृसंबन्धि स्थानं, चमसमिति स्थूलं, तर्हि शरीरमेव सङ्केतितम् । देवीः देव्यः दिव्याः शक्तयः उप यन्ति उपगच्छन्ति । का इव? आपो न यथा निम्नदेशं आप उन्नतप्रदेशादुपगच्छन्ति तद्वत् देव्यः शक्तयो होतुः आह्वातुरन्तर्याजिनः शरीरमुपयन्ति । यथा विततम् रजः यथा विस्तृतं अन्तरिक्षं ऊर्ध्वं निरन्तरं अधस्तात् पृथिवीं पश्यति, तथा ता देव्यः होत्रियं निरन्तरं अवः पश्यन्ति अधस्तात् अवलोकयन्ति । देवासः देवाः देवयुम् देवान् कामयमानं यजमानं प्राचैः प्रथमं, यद्वा प्रकृष्टगमनैः प्रणयन्ति प्रकर्षेण प्राप्तव्यं दिव्यं स्थानं प्रापयन्ति । कीदृशम् देवयुम्? ब्रह्मप्रियम् मन्त्रात्मकस्तोत्रप्रियं, मन्त्रप्रयुक्ते देवतास्तोत्रे नित्या हि प्रीतिर्देवकामस्य पुरुषस्य । अपि च देवास्तं वराःऽइव जोषयन्ते वराः पुरुषाः यथा कन्यकाः वरयित्वा सेवन्ते तथा देवास्तं ब्रह्मप्रियं जनं सेवन्ते ॥ प्राचैः—उच्चैः नीचैरितिवदव्ययं प्रथममित्यर्थे, अन्यथा प्रपूर्वादञ्चतेः घञर्थे कविधानम् । जोषयन्ते—जुषी प्रीतिसेवनयोः, स्वात्मनः प्रयोज्यत्वात् हेतुमति णिच् ॥

तृतीयामृचमाह—

अधि द्वयोरदधा उक्थ्यं१ वचो यतस्रुचा मिथुना या सपर्यतः ।
असंयत्तो व्रते ते क्षेति पुष्यति भद्रा शक्तिर्यजमानाय सुन्वते ॥३॥

अधि द्वयोः अदधाः उक्थ्यम् वचः यतऽस्रुचा मिथुना या सपर्यतः असम्ऽयत्तः व्रते ते क्षेति पुष्यति भद्रा शक्तिः यजमानाय सुन्वते ॥

हे इन्द्र, द्वयोः कयोरिति नोक्तं, हविर्धानयोरिति कर्मठाः । द्यौः पृथिवी च मिथुनं

द्वन्द्वम्। एका शुद्धभास्वरमनोभूमिष्ठा द्युस्थाना प्रज्ञा, द्वितीया पृथिवीस्थाना जागरितप्रज्ञा स्थूला। उभे च मिथुनं भवतः। एवं उभयोः प्रज्ञयोः उक्थ्यम् उक्थं शस्त्रं तद्योग्यं वचः स्तोत्रात्मकं वचनं अधि अदधाः निहितवानसि त्वम्, देवानुग्रहादेव हि ऋषेः उभयोरुक्तलक्षणयोः प्रज्ञास्थानयोः मन्त्रवाक् स्थितिपदं लभते। स्रुक् यज्ञपात्रविशेषः दर्विवत् भवति, सा सङ्केतो भवति तीव्रकाङ्क्षायाः, दिव्यभावमभिमुखं आप्तुं इच्छा भवति सा। तस्मात् 'अभीप्सा' इति तामुत्काङ्क्षां ब्रूमः। अथ पूर्वोक्तस्य द्वन्द्वस्य विशेषणं 'यतस्रुचा' इति भवति। यतस्रुचा यता उद्यता मुहुर्मुहुरुद्यता स्रुक् तल्लक्षितोत्काङ्क्षा ययोरुभयस्थानप्रज्ञयोः ते, तथाभूते या ये मिथुना युगलरूपेण वर्तमाने द्वन्द्वभूते सपर्यतः पूजयतस्त्वाम्। अथ तादृशप्रज्ञासंपन्नस्य ऋषेर्माहाभाग्यमाह। असंयत्तः विरोधिभिर्योद्धुमनभिगतः स यजमानः ते तव व्रते ध्रुवे कर्मणि, तव धर्मे क्षेति निवसति पुष्यति पुष्टो भवति सर्वथा। सुन्वते सोमाभिषवं कुर्वते यजमानाय तस्य पुण्यपुरुषस्येति षष्ठ्यर्थः भद्रा शक्तिः कल्याणी शक्तिः उत्कृष्टं बलं भवति॥ यतस्रुचा-यम उपरमे। सपर्यतः-सपर पूजायाम्, कण्ड्वादिभ्यो यक्। क्षेति-क्षि निवासगत्योः॥

चतुर्थीमृचमाह—

आदङ्गिराः प्रथमं दधिरे वय इद्धाग्नयः शम्या ये सुकृत्यया।
सर्वं पणेः समविन्दन्त भोजनमश्वावन्तं गोमन्तमा पशुं नरः॥४॥

आत् अङ्गिराः प्रथमम् दधिरे वयः इद्धऽअग्नयः शम्या ये सुऽकृत्यया। सर्वम् पणेः सम् अविन्दन्त भोजनम् अश्वऽवन्तम् गोऽमन्तम् आ पशुम् नरः॥

अस्यामुत्तरस्यां च अङ्गिरोवृत्तमनुस्मृत्य मन्त्रवर्णः प्रवर्तते। अङ्गिरसां स्वरूपं द्वात्रिंशसूक्तान्ते यद्विचारितं तदवधेयम् (पु० ३२७-९)। पूर्वोक्तप्रकारेण यदा यजमान ऋषिः इन्द्रस्य व्रते 'क्षेति' निवसति, तदनन्तरमेव अङ्गिरसां कर्मणा तस्य सर्वं धनं गवाश्वादिकं प्राप्यं भवतीत्याह। आत् अनन्तरं अङ्गिराः अङ्गिरसः प्रथमं पूर्वं वयः बलं दधिरे धारयन्ते प्रथमं तस्मिन् बलं प्रतिष्ठापयन्तीत्यर्थः। कीदृशः? इद्धाग्नयः प्रज्वलिताग्नयः, ये अङ्गिरसः नरः नेतारो बलिनः सन्तः सुकृत्यया शोभनकरणोपेतया शम्या कर्मणा पणेः व्यवहारिणः कृत्रिमादेतन्नामकासुरात् सर्वम् समस्तं भोजनम् भोगयोग्यं वस्तु समविन्दन्त समलभन्त। कीदृशम्? अश्वावन्तम्

अश्वयुक्तं प्राणबलोपलक्षणमेतत् गोमन्तम् ज्ञानकिरणोपेतम् पशुम् अन्यत् पशुजातं, भोग्यसामान्यस्य सङ्केतोऽयम्। आ इति 'समुच्चये' इति सायणः। अथवा 'आ' सर्वतः पणिवशं गतं यद्यद्भोग्यं वर्तते तत्सर्वमिति ग्राह्यम्॥ अङ्गिराः-अत्र अकारान्तबहुवचनम्, सकारान्तश्चेत् सुपां सुलुगिति जसः सुः। शम्या-शमीति कर्मनाम। सुकृत्यया-शोभनं कृत्यं करणं यस्यां सा, तया॥

पञ्चमीमृचमाह—

यज्ञैरथर्वा प्रथमः पथस्ततेे ततः सूर्यो व्रतपा वेन आजनि।
आ गा आजदुशना काव्यः सचा यमस्य जातममृतं यजामहे ॥५॥

यज्ञैः अथर्वा प्रथमः पथः ततेे ततः सूर्यः व्रतऽपाः वेनः आ अजनि आ गाः आजत् उशना काव्यः सचा यमस्य जातम् अमृतम् यजामहे॥

आङ्गिरसप्रस्तावे वृत्रवधादपां निर्मोचनं गवां लाभः सूर्यस्योद्गम इत्यादीनां युगपत्संभवस्य रहस्यमुक्तम्, तदत्र स्मार्यम्। अथर्वणः स्वरूपं रहस्यार्थविचारे पुरस्तात् काक्षीवते आश्विने सूक्ते दध्यङ्शब्दे विचार्यमाणे प्रोच्यते (१.११६.१२)॥ अथर्वा अङ्गिरसां मुख्यः, अग्नेर्दैव्यो विभवः मनुष्यभावं प्राप्त एतत्संज्ञक ऋषिर्वा यज्ञैः यजनैः पथः मार्गान्, गोशब्दसङ्केतितदिव्यरश्मिप्रापकान् प्रथमः सर्वेभ्यः पूर्वं ततेे ततनुते, यागैः साधनैः कृतवानध्वनः। ततः अनन्तरं व्रतपाः व्रतानां नियतानां कर्मणां पाता पालयिता वेनः कान्तः सूर्यः सत्यज्योतिषो लक्षकः सूर्यः आजनि आविरभूत्। ततः परमेव उशना शुक्र इति प्रसिद्धिः, सोऽत्र भृगुर्भवति, कुतः? काव्यः कवेः पुत्रः, द्रष्टुः दृष्टिसंपत्तेः सौरज्योतिष्किरणानां लाभः। भृगवः सौरकिरणानां अङ्गिरसः आग्नेयरोचिषां द्रष्टार आहर्तारश्च पूर्वे ऋषय इति प्रागुक्तमवधेयम्। अत एव इद्धाग्नीनां अङ्गिरसां प्रथमेन अथर्वणा मार्गतननात्परं उशना कान्तिमान् काव्यो भृगुः सचा सह अन्यैः ऋषिभिः, देवैश्च ताः गाः आ आजत् आभिमुख्येन प्राप्नोत्। एवंप्रकारेण जातम् आविर्भूतं यमस्य सर्वनियामकस्य व्रतपतेः सूर्यस्य, इन्द्रात्मना स्थितस्य सत्यज्योतिषः अमृतम् मरणरहितं नित्यं वस्तु यजामहे पूजयामः॥ ततेे-तनु विस्तारे, विकरणस्य लुक्। आजत्-अज गतिक्षेपणयोः॥

षष्ठीमृचमाह—

बर्हिर्वा यत्स्वपत्याय वृज्यतेऽर्को वा श्लोकमाघोषते दिवि ।
ग्रावा यत्र वदति कारुरुक्थ्य स्तस्येदिन्द्रो अभिपित्वेषु रण्यति ॥६॥

बर्हिः वा यत् सुऽअपत्याय वृज्यते अर्कः वा श्लोकम् आऽघोषते दिवि ग्रावा यत्र वदति कारुः उक्थ्यः तस्य इत् इन्द्रः अभिऽपित्वेषु रण्यति ॥

स्वपत्याय शोभनाय सन्तानाय विस्ताराय, यजमानस्यान्तर्वेद्यां देवानामागमने आसनं विस्तीर्णं स्यात् तदर्थं यत् यदा बर्हिर्वा आस्तीर्णं वा वृज्यते वृक्तं भवति शुद्धं मृदुलं परिष्कृतं भवति । अर्को वा दीप्तो मन्त्रो वा तन्निष्पादकः स्तोता दिवि द्योतमाने ऊर्ध्वमानसप्रज्ञास्थाने श्लोकम् स्तोत्रं आघोषते उच्चारयति। यत्र यस्मिन् देशे काले वा ग्रावा सोमाभिषवणार्थक उपलः इति बहिर्यागे, रहस्यं तु विचारितम् (१.२८) प्रज्वलितवागात्मकः सर्वानुभूतिरसनिष्पादक तादृशो यजमानहृदयोद्गत वाग्रूपः उक्थ्यः उक्थस्य शस्त्रस्य शंसिता कारुः स्तोता वदति नादं करोति, तस्य इत् पूर्वोक्तस्य सर्वस्य अभिपित्वेषु आभिमुख्येन प्राप्तिषु इन्द्रः रण्यति रमते । वृज्यते—वृजी वर्जने । अभिपित्वेषु—अभिपित्वशब्दः आसत्तिवाची प्रपित्वशब्दवत्, प्रपित्वं अभीक इत्यासन्नस्येति यास्कः, उपसर्गभेदेऽप्यर्थाभेद इति सायणः । आघोषते—घुषिर् विशब्दने रण्यति—रमु क्रीडायाम् ॥

इति प्रथमस्य षष्ठे चतुर्थो वर्गः

'असावी'ति विंशत्यृचं एकादशं सूक्तम् । आदितः षडनुष्टुभः, सप्तम्याद्यास्तिस्र उष्णिहः दशम्याद्यास्तिस्रः पङ्क्तयः, त्रयोदश्याद्यास्तिस्रो गायत्र्यः षोडश्याद्यास्तिस्रस्त्रिष्टुभः, एकोनविंशी बृहती विंशी सतोबृहती । अनुवर्तनाद्यषिर्गोतमः इन्द्रो देवता ॥

तत्र प्रथमामृचमाह—

असावि सोम इन्द्र ते शविष्ठ धृष्णवा गहि ।
आ त्वा पृणक्त्विन्द्रियं रजः सूर्यो न रश्मिभिः ॥१॥

असावि सोमः इन्द्र ते शविष्ठ धृष्णो इति आ गहि आ त्वा पृणक्तु इन्द्रियं रजः सूर्यः न रश्मिऽभिः ॥

हे इन्द्र, ते तुभ्यं सोमः असावि अभिषुतो भवति। हे शविष्ठ ज्वलद्बल, धृष्णो, धर्षयितः शत्रूणां, आ गहि आगच्छ। त्वा त्वां इन्द्रियम् इन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमित्यादिना पाणिनिसूत्रेण इन्द्रसंबन्धि सर्वं तव सामर्थ्यादिलक्षणं आपृणक्तु आपूरयतु। रजः अन्तरिक्षं रश्मिभिः किरणैः सूर्यो न सूर्यो यथा पूरयति तद्वत् ॥

द्वितीयामृचमाह—

इन्द्रमिद्धरी वहतोऽप्रतिधृष्टशवसम्।
ऋषीणां च स्तुतीरुप यज्ञं च मानुषाणाम् ॥२॥

इन्द्रम् इत् हरी इति वहतः अप्रतिधृष्टऽशवसम् ऋषीणाम् च स्तुतीः उप यज्ञम् च मानुषाणाम् ॥

अप्रतिधृष्टशवसम् अप्रतिधर्षितबलं इन्द्रमित् इन्द्रमेव ऋषीणाम् मधुच्छन्दःप्रभृतीनां दृष्टिसम्पन्नानां मानुषाणाम् च इतरेषां मनुष्याणां च स्तुतीः स्तोत्राणि यज्ञम् च देवेभ्यः सर्वसमर्पणात्मकं यागं च हरी इन्द्राश्वौ उप वहतः समीपं प्रापयतः ॥

तृतीयामृचमाह—

आ तिष्ठ वृत्रहन्रथं युक्ता ते ब्रह्मणा हरी।
अर्वाचीनं सु ते मनो ग्रावा कृणोतु वग्नुना ॥३॥

आ तिष्ठ वृत्रऽहन् रथम् युक्ता ते ब्रह्मणा हरी इति अर्वाचीनम् सु ते मनः ग्रावा कृणोतु वग्नुना ॥

हे वृत्रहन् इन्द्र, रथम् आतिष्ठ रथमारोह। ते तव हरी अश्वौ ब्रह्मणा अस्मत्प्रयुक्तेन मन्त्रेण युक्ता योजितौ रथ इति शेषः। ते मनः त्वदीयं मनश्च ग्रावा अयं पूर्वोक्तः सङ्केतः, रसाविष्कारहेतुभूतः हार्दयागात्मा वग्नुना वचनशब्देन अर्वाचीनम् अस्मदभिमुखं सु कृणोतु सुष्ठु करोतु ॥ वग्नुना—वचेश्चेति नुप्रत्ययः गकारश्चान्तादेशः ॥

चतुर्थीमृचमाह—

इममिन्द्र सुतं पिब ज्येष्ठममर्त्यं मदम्।
शुक्रस्य त्वाभ्यक्षरन्धारा ऋतस्य सादने ॥४॥

इमम् इन्द्र सुतम् पिब ज्येष्ठम् अमर्त्यम् मदम् शुक्रस्य त्वा अभि अक्षरन् धाराः ऋतस्य सदने ॥

हे इन्द्र, सुतम् अभिषुतं इमं सोमं पिब। कीदृशम्? ज्येष्ठम् अत्यन्तं प्रशस्यं मदम् मदकरं अमर्त्यम् मृतिरहितनित्यवस्तूपहितत्वात् अमृतम्। ऋतस्य सदने सत्यस्य गृहे शुक्रस्य दीप्तस्यास्य सोमस्य धाराः त्वा त्वां अभि अक्षरन् आभिमुख्येन संचलन्ति ॥ 'ऋतस्य सदनं' उत्तमे स्थाने परं ज्योतिः। तस्मात् तपस्यया भक्त्या संपादितस्य ज्वलत आनन्दस्य धाराः देवानां पत्युः स्वीकाराय तस्मै समर्प्यन्ते महर्षिभिः ॥ ज्येष्ठम्-प्रशस्यशब्दात् इष्ठनि ज्यादेशः। अक्षरन्-छान्दसो लङ् लङर्थे ॥

पञ्चमीमृचमाह—

इन्द्राय नूनमर्चतोक्थानि च ब्रवीतन।
सुता अमत्सुरिन्दवो ज्येष्ठं नमस्यता सहः ॥५॥

इन्द्राय नूनम् अर्चत उक्थानि च ब्रवीतन सुताः अमत्सुः इन्दवः ज्येष्ठम् नमस्यत सहः ॥

देवयजने प्रवृत्तानन्यान् सखीन् प्रति संबोधनम्। हे सखायः, इन्द्राय नूनम् क्षिप्रं अर्चत पूजनं कुरुत। उक्थाने च शस्त्रस्तोत्राणे च ब्रवीतन ब्रूत। सुताः अभिषुताः इन्दवः सोमाश्च अमत्सुः मत्तं मदयुक्तं संहृष्टं कुर्वन्तु। ततः ज्येष्ठम् प्रशस्यतमं सहः सहस्विनं बलिनं नमस्यत नमस्कुरुत ॥ ब्रवीतन-ब्रूटि तनबादेशः। अमत्सुः-मदी हर्षे, छान्दसः प्रार्थनायां लुङ्। नमस्यत-नमोवरिवश्चित्रङ इति क्यच्। सहः-मत्वर्थीयस्य लुक् ॥

इति प्रथमस्य षष्ठे पञ्चमो वर्गः

षष्ठीमृचमाह—

नकिष्ट्वद्रथीतरो हरी यदिन्द्र यच्छसे।
नकिष्ट्वानु मज्मना नकिः स्वश्व आनशे ॥६॥

नकिः त्वत् रथिऽतरः हरी इति यत् इन्द्र यच्छसे नकिः त्वा अनु मज्मना नकिः सुऽअश्वः आनशे ॥

हे इन्द्र, हरी प्रसिद्धौ अश्वौ यच्छसे नियामयसि रथे योजयित्वा। यत् यस्मात् त्वत् त्वत्तोऽन्यः कश्चित् रथीतरः अतिशयेन रथवान् नकिः नास्ति, तस्मात् प्रबलाश्वरथयुक्तोऽसि हि त्वम्, त्वा अनु त्वामनुलक्ष्य मज्मना बलेन तुल्योऽपि नकिः नास्ति। स्वश्वः शोभनाश्वोऽन्योऽपि त्वां नकिः आनशे न प्राप ॥ नकिष्ट्वत्-युष्मत्तत्ततक्षुषु अन्तःपादमिति षत्वम्। रथीतरः-अतिशयेन रथी, तरपि ईद्रथिन इति ईकारान्तादेशः, अवग्रहसमये छान्दसो ह्रस्वः। यच्छसे-यमेः व्यत्ययेन परस्मैपदम्। आनशे-अश्नोतेर्लिट् ॥

सप्तमीमृचमाह—

य एक इद्विदयते वसु मर्ताय दाशुषे।
ईशानो अप्रतिष्कुत इन्द्रो अङ्ग ॥७॥

यः एकः इत् विऽदयते वसु मर्ताय दाशुषे ईशानः अप्रतिऽस्कुतः इन्द्रः अङ्ग ॥

यः एक इत् एक एव, अद्वितीयः दाशुषे दत्तवते मर्ताय मनुष्याय यजमानाय वसु धनं विदयते विशेषेण ददाति, सः इन्द्रः देवराट् ईशानः स्वामी सर्वस्य जगतः, अप्रतिष्कुतः न केनापि छादयितुं शक्यः, निराच्छादनः नित्यप्रकाश इति यावत् (१.७.६, ८) तत्र प्राग्विवृतोऽयम् ॥ अङ्ग! भो इति संबोधनम्, बाढं साधु इति वा वक्तव्ये अयं प्रयोगः। क्षिप्रार्थकोऽयमिति मन्यते सायणः, नैतद्युक्तं दृश्यते ॥ विदयते-दय दानगत्यादिषु ॥

अष्टमीमृचमाह—

कदा मर्तमराधसं पदा क्षुम्पमिव स्फुरत्।
कदा नः शुश्रवद्गिर इन्द्रो अङ्ग ॥८॥

कदा मर्तम् अराधसम् पदा क्षुम्पम्ऽइव स्फुरत् कदा नः शुश्रवत् गिरः इन्द्रः अङ्ग ॥

अराधसम् अनाराधकं मर्तम् मनुष्यं इन्द्रः पदा पादेन क्षुम्पम् इव क्षुद्राल्पं अल्पजीविनं क्षुद्रभूरुहमिव कदा स्फुरत् वधिष्यति। नः अस्माकं गिरः स्तुतीः कदा सः शुश्रवत् श्रोष्यति। अङ्ग भो ॥ अराधसम्-अत्र धनरहितमिति सायणः, नैतत्साधु। अन्यत्र स एव अनाराधकाः

अयजमाना इति व्याचष्टे । तदेवाऽनुपपद्यते "उत्तरार्धर्चस्यैकदेशः 'अप श्वानं अराधसं हत' राधककर्मरहितं तं श्वानं अपहत" (९.१०१.१३) "'नि अक्रमीः अभि विश्वान् अराधसः' सर्वान् अनाराधयतः अयजमानान् पणीन् वणिजो लुब्धकान् निकृष्टं अभिभव" (१०.६०.६) इति । क्षुम्पम्-मण्डलाकारेण शयानमिति सायणः । क्षुप एव क्षुम्पः, स च ह्रस्वशाखाशिफः क्षुद्रः क्षणविध्वंसी वनस्पतिविशेषः छत्राख्यः । स्फुरत्-स्फुर संचलने, छन्दसि लडर्थे लङ् । शुश्रुवत्-श्रु श्रवणे, लेटि अडभावः ॥

नवमीमृचमाह—

यश्चिद्धि त्वा बहुभ्य आ सुतावाँ आविवासति ।
उग्रं तत्पत्यते शव इन्द्रो अङ्ग ॥९॥

यः चित् हि त्वा बहुऽभ्यः आ सुतऽवान् आऽविवासति उग्रम् तत् पत्यते शवः इन्द्रः अङ्ग ॥

यश्चिद्धि य एव खलु यजमान एकः आ सर्वतः सुतवान् अभिषुतसोमयुक्तः सन् त्वा त्वां बहुभ्यः बहुमनुष्यकृते आविवासति सर्वतः प्रकाशयति, तत् तस्मै बहूनां उपकारिणे यजमानाय उग्रम् उद्गूर्णं शवः बलं इन्द्रः पत्यते पातयति प्रापयति अङ्ग ! आविवासति-यद्यपि परिचरणकर्मा प्रसिद्धः, प्रकाशार्थोऽयं प्रायशः, विचारितश्च प्राक् । पत्यते-पत्लृ गतौ, अन्तर्भावितण्यर्थात् व्यत्ययेन श्यन् ॥

दशमीमृचमाह—

स्वादोरित्था विषूवतो मध्वः पिबन्ति गौर्यः ।
या इन्द्रेण सयावरीर्वृष्णा मदन्ति शोभसे वस्वीरनु स्वराज्यम् ॥१०॥

स्वादोः इत्था विषुऽवतः मध्वः पिबन्ति गौर्यः याः इन्द्रेण सऽयावरीः वृष्णा मदन्ति शोभसे वस्वीः अनु स्वऽराज्यम् ॥

स्वादोः स्वादुभूतस्य रसोपेतस्य इत्था इत्थं विषूवतः व्याप्तिमतः मध्वः मधुरस्य सोमस्य, कर्मण्यर्थे षष्ठी, एवंविधं सोमं गौर्यः गौरवर्णाः गावः पिबन्ति । गौरवर्णः सौवर्णत्वद्योतनाय । गावश्चिद्रश्मयः उत्तमज्योतिर्विभवं प्रकटयन्ति इन्द्रेण सह, तस्मात् हिरण्मयप्रभास्ताः सोमरसं

इन्द्रायार्पितं आददते, तेन तुष्टाः पुष्टाश्च इन्द्रेण युक्ता अतस्य यजमाने सर्वाधिकारप्रतिष्ठां अनुलक्ष्य अवतेष्ठन्त इति प्राह। याः गावः शोभसे शोभार्थं वृष्णा वर्षकेण ज्योतिर्बलादीनां, इन्द्रेण सयावरीः सह यान्त्यः गच्छन्त्यः सत्यः मदन्ति हृष्यन्ति। कीदृश्यस्ताः? वस्वीः वासकारिण्यः, स्वराज्यम् अनु स्वस्य इन्द्रस्य राज्यं राजत्वं अनुलक्ष्य तेन सह वासं कुर्वाणा अवतिष्ठन्त इत्यर्थः॥ विषूवतः-विष्लृ व्याप्तौ, औणादिकः कुप्रत्ययः, ततो मतुप्, व्यत्ययेन मतोर्वत्वम्। सयावरीः-या प्रापणे, आतो मनिन्निति वनिप्, वनो र चेति ङीब्रेफौ। मदन्ति-मदी हर्षे, श्यनः व्यत्ययेन शप्। वस्वीः-वस निवासे, वसेरुप्रत्ययः, वसुशब्दाद् गुणवचनात् ङीप्, ङीपि यणादेशः, जसि वा छन्दसीति पूर्वसवर्णदीर्घत्वम्॥

इति प्रथमस्य षष्ठे षष्ठो वर्गः

एकादशीमृचमाह—

ता अस्य पृशनायुवः सोमं श्रीणन्ति पृश्नयः।
प्रिया इन्द्रस्य धेनवो वज्रं हिन्वन्ति सायकं वस्वीरनु स्वराज्यम्॥११॥
ताः अस्य पृशनऽयुवः सोमम् श्रीणन्ति पृश्नयः प्रियाः इन्द्रस्य धेनवः
वज्रम् हिन्वन्ति सायकम् वस्वीः अनु स्वऽराज्यम्॥

ताः पूर्वोक्ताः अस्य इन्द्रस्य पृशनयुवः स्पर्शनकामाः पृश्नयः चित्रवर्णाः गावः, पूर्वं गौर्य इत्युक्ताः, अधुना चित्रवर्णत्वं तासामुक्तम्। अनेन तृतीयात् इन्द्रस्थानादुपरि परमज्योतिषः आगत्य इन्द्रेण संपृक्ता अवस्थातुं प्रारभन्त इति ग्राह्यम्। ताः सोमम् इन्द्रपेयं श्रीणन्ति मिश्रीकुर्वन्ति स्वीयेन पयसा सारेण चिद्बलामृतेन। इन्द्रस्य प्रियाः प्रीतिकारिण्यः धेनवः ता गावः सायकम् देवद्वेषिणां अवसायकं अन्तकारकं वज्रम् आयुधं हिन्वन्ति प्रेरयन्ति। शत्रुप्रध्वंसनं मदं इन्द्रस्योत्पादयन्ति। अन्यत् पूर्ववत्॥ हिन्वन्ति-हिविः प्रेरणार्थः। सायकम्-षो अन्तकर्मणि॥

द्वादशीमृचमाह—

ता अस्य नमसा सहः सपर्यन्ति प्रचेतसः।
व्रतान्यस्य सश्चिरे पुरूणि पूर्वचित्तये वस्वीरनु स्वराज्यम्॥१२॥
ताः अस्य नमसा सहः सपर्यन्ति प्रऽचेतसः व्रतानि अस्य सश्चिरे

पुरूणि पूर्वऽचित्तये वस्वीः अनु स्वऽराज्यम् ॥

अस्य तृचस्यान्तेऽस्मिन् मन्त्रे गवां स्वरूपं संकेतभाषया संदृब्धं 'प्रचेतसः' 'पूर्वचित्तये' इति प्रयोगेण किञ्चिद्वा विवृतं भवति, प्रचेतसः प्रकृष्टज्ञानाः ऋतज्योतिस्संभूतत्वात्, ताः गावः चिद्रश्मयः अस्य इन्द्रस्य सहः बलं नमसा प्रपदनेन, सर्वथा प्रह्वीभूय स्वात्मनां इन्द्रायत्तीकरणेनेत्यर्थः सपर्यन्ति परिचरन्ति। अस्य इन्द्रस्य पुरूणि बहूनि व्रतानि नियतानि कर्मविधानानि सश्चिरे सिषेविरे। नियतं कर्मविधानं तु धर्म एव भवति। इन्द्रस्य स्वभावकृत्यानि सर्वाणि तद्धर्मा एव भवन्ति। गोभिः कृतं तेषां सेवनं किमर्थम्? पूर्वचित्तये पूर्वबोधाय, यजमानस्य ऋषेः इन्द्रव्रतानुसारेण किमतः परमागच्छति तस्यानुभवप्रपञ्च इति बोधनाय, ते चिद्रश्मयः इन्द्रकर्मज्ञापितान् तद्धर्मान् प्रथमं भजन्ते। तेन ऋषेः पूर्वदृष्टिरागामिविषयिका संपद्यते। अन्यत्पूर्ववत्॥ सश्चिरे-सश्च गतौ, व्यत्ययेनात्मनेपदम्। पूर्वचित्तये-चिती संज्ञाने, भावे क्तिन्॥

त्रयोदशीमृचमाह—

इन्द्रो दधीचो अस्थभिर्वृत्राण्यप्रतिष्कुतः। जघान नवतीर्नव ॥१३॥
इन्द्रः दधीचः अस्थऽभिः वृत्राणि अप्रतिऽस्कुतः जघान नवतीः नव ॥

अप्रतिष्कुतः अनाच्छादितः अनावृतः अनिरुद्धस्वप्रकाशः सन् इन्द्रः वृत्राणि आवरकाणि मायारूपाणि असुरजातानि जघान हतवान्। कति वृत्राणि? नव नवतीः दशोत्तराष्टशतसंख्याकानि। कालत्रयभेदेन दशदिग्भेदेन च गुणत्रयगुणितेन एतां संख्यां निष्पादयति सायणः। भवत्वेवं, मा वा। नवेति नवतिरिति वा संख्यया विवक्षितं तु ग्राह्यम्। प्रायशः पूर्णं न तु संपूर्णमिति द्योतयति नव नवतिर्वा संख्या, संपूर्णं चेत् दश वा शतं वा उच्यते। अत्र न सर्वाणि वृत्राणि हतानि, हतशेषाणि क्वचित् निलीनानि पुनरुद्भवनसंभवानि स्युरिति आवेदितं अपूर्णसंख्योल्लेखनेन। केन साधनेन जघान? दधीचः अस्थिभिः दध्यङ्नामकस्य आथर्वणस्यर्षेः अस्थिभिः इति पूर्वे व्याख्यातारः। अत्र ब्राह्मणोपाख्यानानि पुराणकथाश्चोदाहरन्ति। ईदृश ऐतिहासिकः पक्षो नोपपद्यते मन्त्रवर्णव्याख्यानेषु। अपि च स प्रत्युक्तः शबरस्वामिभिः 'गुणवादस्तु' इति सूत्रस्य भाष्ये। रहस्यार्थपक्षे-दध्यङ् इत्यत्र दधि अञ्चति गच्छति प्राप्नोतीति दध्यङ्। पयसा तत्प्रकृतिभूता गावो लक्ष्यन्ते। ताश्च चिद्रश्मयः प्रज्ञाप्रकाशाः। तत्परिणामेन दध्ना धारणात्मिका सूक्ष्मा बुद्धिः सङ्केतिता भवति। तथाविधं दधि अञ्चतीति

दध्यङ्, तस्य स्थिराधारभूताः मूलधातवः अस्थीनि भवन्ति । अस्य दधीचः प्रस्तावः पुनरपि काक्षीवते सूक्ते सरहस्यं विचार्यते ॥ अस्थभिः-अस्थिशब्दस्य छन्दसि अनङादेशः ॥

चतुर्दशीमृचमाह—

इच्छन्नश्वस्य यच्छिरः पर्वतेष्वपश्रितम् । तद्विदच्छर्यणावति ॥१४॥
इच्छन् अश्वस्य यत् शिरः पर्वतेषु अपऽश्रितम् तत् विदत् शर्यणाऽवति ॥

पर्वतेषु पर्वतत्सु गिरिषु, विश्वमत्ता बहुग्रस्तोपेतेन पर्वतेन सङ्केत्यते । तादृशेषु उपर्युपरि अन्नमयप्राणमयादिसानुमत्सु अपश्रितम् अपगत्य आश्रितं अश्वस्य सर्वभोगसमर्थस्य प्राणस्य यत् शिरः यदुत्तमाङ्गं ऊर्ध्वं अवस्थितं इच्छन् अन्विच्छन्निन्द्रो वर्तते तत् तच्छिरः विदत् अवेदीत् अज्ञासीत् । कुत्र? शर्यणावति शर्यणावत् इति संज्ञके कुरुक्षेत्रप्रान्ते इति सायणः । अन्यत्र शर्यणावच्छब्दप्रयोगस्थलपरीक्षणेन सोमरसादानपात्रं इति ज्ञायते । तर्हि रहस्यं पुरुषस्यान्तर्हृदयस्थानमेव तत् । अथवा किमपि दिव्यं सूक्ष्मं स्थानम् तदेव ऋतयुक्तं रसयुक्तं रसग्रहणयोग्यं च भवति 'आर्जीकीये शर्यणावति' इति प्रयोगात् ॥ "अयं ते शर्यणावति सुषोमायां अधि प्रियः । आर्जीकीये मदिन्तमः ॥" (८.५३.११) "सुषोमे शर्यणावति आर्जीकीये पस्त्यावति" (८.७.२९) "मन्दस्व स्वर्णरे शर्यणावति विवस्वतः" (८.६.३९) "ये सोमासः परावति ये अर्वावति सुन्विरे ये वा अदः शर्यणावति" (९.६५.२९) । अथ च सर्वसंशयच्छेदकं अन्यत्सूक्तं नवमे मण्डले वर्तते, तत्र 'यत्र ज्योतिरजस्रं यस्मिन् लोके स्वर्हितम्' इति विस्पष्टं नित्यसत्यज्योतिः प्रस्तुतम् । अत्र 'शर्यणावति सोममिन्द्रः पिबतु वृत्रहा' (९.११३.१) इत्येवं प्रारम्भः । कथमिदं कुरुक्षेत्रं इति व्याख्या असङ्गता न भवति? पूजनीयबहुजनभोजनपङ्क्तौ अपरिज्ञातः अनाहूतः स्वयमुपविष्टः पश्चादभिज्ञातः कथं न लज्जादौर्मनस्यानौचित्यानि आदधीत? एवमेव भवति व्याख्यातः कुरुक्षेत्रदेशः मन्त्रवर्णेषु मध्ये पातितः ॥

पञ्चदशीमृचमाह—

अत्राह गोरमन्वत नाम त्वष्टुरपीच्यम् । इत्था चन्द्रमसो गृहे ॥१५॥
अत्र अह गोः अमन्वत नाम त्वष्टुः अपीच्यम् इत्था चन्द्रमसः गृहे ॥

अत्र अह अस्मिन्नेव स्थाने पूर्वोक्ते "आर्जीकीये पस्त्यावति सुषोमे शर्यणावति" इति

बोध्यम्। तदेव विस्पष्टमाह प्रकारान्तरेण इत्था सत्यमिदं, चन्द्रमसः आह्लादकस्य रसमयस्य सोमस्य गृहे स्वस्थाने 'गन्धर्वस्य ध्रुवे पदे' (१.२२.१४) इति वर्णिते ध्रुवे स्थाने त्वष्टुः विश्वकर्मणः आदित्यस्य ऋतजातस्य सौरज्योतिषः गोः रश्मेः विश्वप्रकाशकस्य अर्पीच्यम् अन्तर्हितं गुप्तं नाम विशिष्टलक्षणज्ञापकं नमनसाधनं च तत्त्वं अमन्वत अजानन् विपश्चित इति शेषः। जानन्तीति लडर्थे लङ् छन्दसि॥ अपीच्यम्—अपिपूर्वादञ्चतेः क्विन्, भवे छन्दसीति यत्। चन्द्रमसः—चन्द्रं आह्लादनं मिमीते निर्मिमीत इति चन्द्रमाः॥

इति प्रथमस्य षष्ठे सप्तमो वर्गः

षोडशीमृचमाह—

को अद्य युङ्क्ते धुरि गा ऋतस्य शिमीवतो भामिनो दुर्हृणायून्।
आसन्निषून्हृत्सु मयोभून्य एषां भृत्यामृणधत्स जीवात्॥१६॥

कः अद्य युङ्क्ते धुरि गाः ऋतस्य शिमीऽवतः भामिनः दुःऽहृणायून् आसन्ऽइषून् हृत्सुऽअसः मयःऽभून् यः एषाम् भृत्याम् ऋणधत् सः जीवात्॥

अद्य इदानीं ऋतस्य सत्यस्य ज्योतिष इन्द्रात्मनावस्थितस्य, इन्द्रस्यैवात्र प्रस्तुतत्वात्, धुरि अग्रे गाः वाचः मन्त्रात्मिकाः कः युङ्क्ते संयोजयति। इतः प्रत्यक्षं भगवति इन्द्रे प्रसन्ने को वा धन्यः तस्य पुरः मन्त्रानुच्चारयतीत्यर्थः। अत्र 'युङ्क्ते' इति श्रवणात् 'गाः अश्वान्' इति "ऋतस्य ऐन्द्रस्य रथस्ये"ति च उपपादनार्थं व्याचक्षते व्याख्यातारः। गौरत्र न रश्मिपर्यायः, वाक्पर्यायो ग्राह्यः 'गौरीर्मिमाय...सहस्राक्षरा परमे व्योमन्' इत्यादाविव। अथ गवां वाग्विशेषाणां विशेषणानि। शिमीवतः वीर्यवत्कर्मयुक्तान् भामिनः तेजस्विनः प्रभावशालिन इत्यर्थः दुर्हृणायून् परैर्दुस्सहेन क्रोधेन युक्तान्, आसन्निषून् आसन् आस्ये मुखे इषवः एषणानि येषां तान्, इषुर्बाणवाचकोऽपि एषणार्थादेव निष्पन्नः। एषणा च प्रेरणायां पर्यवस्यति, मन्त्रात्मकवाग्विशेषाणां अग्रे दुष्टनिवृत्ति-शिष्टप्रवृत्तिसाधिका एषणा वर्तते, तादृशं हि मन्त्रवाग्वीर्यम्। हृत्सुऽअसः हृदयेषु दीप्यमानान्, अस गतिदीप्त्यादानेषु, अथवा अस्यन्ति क्षिपन्ति प्रहरन्ति शत्रून् मयोभून् मयसः सुखस्य भावयितॄन्। यः यो यजमानः एषाम् उक्तलक्षणानां वाग्विशेषाणां भृत्याम् भरणक्रियां ऋणधत् समर्धयति, ऋद्धिमतीं करोतीत्यर्थः सः तादृशः पुण्यपुरुषः जीवात् जीवेत्, अन्यस्तु जीवन्मृत एव॥ शिमीवतः—शिमीति कर्मनाम। दुर्हृणायुः—हृणिः

कुध्यतिकर्मा। आसन्निषून्—आस्यशब्दस्य आसन्नादेशः, इषुः—इष गताविति अस्मादिषेः किच्चेत्युप्रत्ययः। हृत्सवसः—तत्पुरुषे कृति बहुलमिति अलुक्। भृत्याम्—भृञ् भरणे, क्यप्। ऋणधत्—ऋधु वृद्धौ, लेटि अडागमः, व्यत्ययेन श्नम्। जीवात्—जीव प्राणधारणे, लेट्याडागमः॥

सप्तदशीमृचमाह—

क ईषते तुज्यते को बिभाय को मंसते सन्तमिन्द्रं को अन्ति।
कस्तोकाय क इभायोत रायेऽधि ब्रवत्तन्वे३ को जनाय ॥१७॥

कः ईषते तुज्यते कः बिभाय कः मंसते सन्तम् इन्द्रम् कः अन्ति कः तोकाय कः इभाय उत राये अधि ब्रवत् तन्वे कः जनाय॥

पूर्वोक्तविधया इन्द्रे प्रसन्ने सति, कः ईषते गच्छति, सङ्कटे समुपस्थिते को भीतोऽपगच्छति? कः तुज्यते को वा हिंस्यते? को बिभाय को वा बिभेति? अन्ति अन्तिके समीपे सन्तम् वर्तमानं, सर्वस्य भक्तस्य यजमानस्य सन्निहितो हि सः, तथाभूतं इन्द्रम् कः मंसते को जानाति? इन्द्रे सन्निहिते प्रत्यक्षे सति, कः को वा मनीषी भक्तः तोकाय पुत्रार्थं अधि ब्रवत् अधिवचनं ब्रूयात्? "भगवन्निन्द्र मह्यं पुत्ररक्षां देहि गजादिकं धनं देहि शरीररक्षां परिजनं वा देहि" इति प्रार्थनां न कोऽपि भक्तः कुरुते। तादृशं वचनं अधिकवचनं भवति। इन्द्रः स्वयं करोति कर्तव्यं, यद्युक्तमिष्टं वा तत्प्रापयति, यदयुक्तमनिष्टं तत्परिहरति। तस्मादधिवचनं परमार्थभक्तियुक्तो यजमानो न ब्रूते, स भजमानो यजत एव। तदाह। कः इभाय गजाय 'अधि ब्रवत्'? उत अपि च राये धनाय, तन्वे शरीराय कः जनाय परिजनाय 'अधिब्रवत्'। एकः 'कः' पूरकः॥ ईषते—ईष गतिर्हिंसादर्शनेषु। तुज्यते—तुज हिंसायाम्। मंसते—लेट्यडागमः, सिप् बहुलं लेटीति सिप्। ब्रवत्—ब्रवीतेर्लेट्। तन्वे—तनुशब्दाच्चतुर्थ्येकवचनं, घेर्ङितीति छन्दसि गुणाभावे यणादेशः॥

अष्टादशीमृचमाह—

को अग्निमीट्टे हविषा घृतेन स्रुचा यजाता ऋतुभिर्ध्रुवेभिः।
कस्मै देवा आ वहानाशु होम को मंसते वीतिहोत्रः सुदेवः ॥१८॥

कः अग्निम् ईट्टे हविषा घृतेन स्रुचा यजाते ऋतुऽभिः ध्रुवेभिः कस्मै

देवाः आ वहान् आशु होमं कः मंसते वीतिऽहोत्रः सुऽदेवः ॥

अस्यामृचि हविर्घृतस्रुचः कर्मानुष्ठानसामग्र्यः रहस्यपक्षे सङ्केताः बोध्याः। हविरर्पणद्रव्यं, यद्यत् कर्म क्रियमाणं देवार्थमर्प्यते, तत्सर्वम्। घृतम् दीप्तिः, प्रसन्नता। स्रुक् यजनपात्रविशेषो दर्विः, तीव्रेच्छा मुहुर्मुहुरुद्रता उज्ज्वलाभीप्सा सर्वार्पणरूपे सूक्ष्मकर्मणि वैदिके योगे मुख्योपकरणं भवति। कः को यजमानः अग्निम् ईट्टे सर्वदेवहोतारं प्रमुखं देवानां इन्द्रादीनां, स्तौति? इन्द्रस्य आगमनाय तदाराधनाय तत्प्रसादप्राप्तये च अग्निरेव प्रथमं पूजयितव्यः। तदाह, हविषा हविर्निरूपणेन घृतेन ज्वलनसाधनेन दीपनेन स्रुचा उद्दीपनसाधनेन जुह्वाख्येन, ध्रुवेभिः स्थिरैः नित्यैरप्रमत्तैः ऋतुभिः नियतदैव्यविधिक्रमानुसारिभिः कालविशेषैः, दैव्येषु नियतकालेष्वित्यर्थः यजातै यजेत्। कस्मै यजमानाय देवाः इन्द्रादयः होम आह्वातव्यं प्रशस्यं बलं सामर्थ्यमिति यावत् आशु शीघ्रं आ वहान् आवहन्ति प्रापयन्ति? वीतिहोत्रः वीतये आगतये देवानामाविष्कृतये होत्रं होतृकर्म आह्वानं यस्य सः सुदेवः शोभनदेवताकः कः को यजमानः मंसते जानातीन्द्रम्? बहुविधेनोपासनेन देवतासान्निध्यं लभ्यते, इन्द्रः प्रत्यक्षो भवति, नान्यथेति तात्पर्यम्॥ ईट्टे-ईड स्तुतौ। यजातै-यजतेः लेटि आडागमः, वैतोऽन्यत्रेति ऐकारः। वहान्-वहतेर्लेटि आडागमः। होम-ह्वयतेः, नामन्सीमन् इत्यादौ होमन्शब्दो मनिन्प्रत्ययान्तो निपात्यते। मंसते-मन ज्ञाने, लेट्यडागमः, सिप् छन्दसि बहुलम्। अन्यत् गतम्॥

एकोनविंशीमृचमाह—

त्वमङ्ग प्र शंसिषो देवः शविष्ठ मर्त्यम्।
न त्वदन्यो मघवन्नस्ति मर्डितेन्द्र ब्रवीमि ते वचः ॥१९॥

त्वम् अङ्ग प्र शंसिषः देवः शविष्ठ मर्त्यम् न त्वत् अन्यः मघऽवन् अस्ति मर्डिता इन्द्र ब्रवीमि ते वचः ॥

अङ्ग अभिमुखीकरणे अङ्गेतिवचनं शविष्ठ भो बलवत्तम, देवः द्योतमानः त्वं मर्त्यम् मरणधर्माणं पुरुषं त्वां स्तुतवन्तं मादृशं प्रशंसिषः प्रशंस, साधु साधु त्वद्वचनमिति प्रशंस। हे मघवन् इन्द्र धनवन्निन्द्र, त्वदन्यः त्वत्तोऽन्यः मर्डिता सुखयिता न अस्ति न वर्तते। तस्मात् इदम् स्तोत्रलक्षणं वचः वचनं ते तुभ्यं ब्रवीमि उच्चारयामि॥ प्रशंसिषः-शंसु स्तुतौ, लेटि सिप्यडागमः। मर्डिता-मृड सुखने, तृच इडागमः॥

विंशीमृचमाह—

मा ते॒ राधां॑सि॒ मा त॑ ऊ॒तयो॑ वसोऽस्मान्कदा॑ च॒ना द॑भन् ।
विश्वा॑ च न उपमिमीहि मा॑नुष॒ वसू॑नि चर्ष॒णिभ्य॒ आ ॥२०॥
मा ते॒ राधां॑सि॒ मा ते॒ ऊ॒तयः॑ व॒सो॒ इति॑ अ॒स्मान् कदा॑ च॒न द॒भ॒न् ।
विश्वा॑ च॒ नः॒ उ॒प॒ऽमि॒मी॒हि॒ मा॒नु॒ष॒ वसू॑नि च॒र्ष॒णिऽभ्यः॑ आ ॥

हे वसो निवासहेतुभूत, सर्वत्र सत्त्वे वसतीति वसुः, तथा वर्तमानेन्द्र, ते तव राधांसि धनानि अस्मान् आराधकान् त्वदीयान् कदाचन कदाचिदपि मा दभन् मा कार्षुर्दग्धान् मा विनाशयन्तु, अस्माकं धनदर्पात् कापथप्रवृत्तिसंभवात् विनाशहेतुभूतानि मा भूवन् 'ते राधांसि' इत्यर्थः । तथा ते ऊतयः त्वदीयान्यस्मदभिवर्धनानि 'मा दभन्' । हे मानुष, मनुष्यहितेन्द्र, चर्षणिभ्यः मन्त्रद्रष्टृभ्यः नः अस्मभ्यं विश्वा सर्वाणि वसूनि सारभूतानि सत्त्वानि, (सत्त्वैव सत्त्वं) अत एव धनपर्यायो वसु । आ उप मिमीहि च आहृत्य, सर्वतः समाहृत्य अस्मत्समीपे कुरु ॥ दभन्–दभु दम्भे, लोडर्थे छान्दसे लङि विकरणस्य लुक्, अडभावः छन्दसि, 'न माङ्योगे' इति वा । मिमीहि–माङ् माने शब्दे च, व्यत्ययेन परस्मैपदम् ॥

इति प्रथमस्य षष्ठेऽष्टमो वर्गः
प्रथमे मण्डले त्रयोदशोऽनुवाकः समाप्तः

चतुर्दशानुवाके नव सूक्तानि, तत्र "प्र य" इति द्वादशर्चं प्रथमं सूक्तं गोतमस्यार्षम् । पञ्चमीद्वादश्यौ त्रिष्टुभौ, शिष्टा जगत्यः मरुतो देवताः ॥

तत्र प्रथमामृचमाह—

प्र ये शु॒म्भन्ते॒ जन॑यो॒ न सप्त॑यो॒ याम॑न्रु॒द्रस्य॑ सू॒नवः॑ सु॒दं॑ससः ।
रोद॑सी॒ हि म॒रुत॑श्चक्रि॒रे वृ॒धे मद॑न्ति वी॒रा वि॒दथे॑षु घृ॒ष्वयः॑ ॥१॥
प्र ये शु॒म्भन्ते॒ जन॑यः॒ न सप्त॑यः॒ याम॑न् रु॒द्रस्य॑ सू॒नवः॑ सु॒ऽदं॑ससः॒
रोद॑सी॒ इति॑ हि म॒रुतः॑ च॒क्रि॒रे वृ॒धे मद॑न्ति वी॒राः॒ वि॒दथे॑षु घृ॒ष्वयः॑ ॥

मरुतां स्वरूपं, प्रचण्डवेगानां तेषां कर्माणि, पृश्निमातृत्वं, इन्द्रभ्रातृत्वं इत्येतानि सर्वाणि सरहस्यं प्राग्विवृतानि कण्वसूक्तेषु (१.३७, ३८, ३९), ततः प्राक् च शुनःशेपसूक्ते क्वचित्

(१.२३.१०)। तदत्र मारुतेषु सूक्तेषु सङ्केतार्थविवरणं न पुनर्दीयते। ये ये मरुतः। यामन् यामनि गमने प्रत्यासन्ने प्र शुम्भन्ते दीप्यन्ते, उज्ज्वला भवन्ति। तत्र दृष्टान्तः जनयो न जाया इव, यथा जायाः भर्तॄन् वशयित्वा स्वयं तद्वशं यान्ति, तथा प्राणभूसमुत्पन्नाः ऐन्द्रज्योतिर्बलज्वलिताः धीवृत्तयः यजमानानृषीन् वशयित्वा स्वयं तद्वशं गच्छन्ति, कीदृशाः मरुतः? सप्तयः सर्पणशीलाः गमनस्वभावाः रुद्रस्य सूनवः रुद्रपुत्राः मध्यमस्थानाः, अत एव चण्डबलाः सुदंससः शोभनकर्माणः। चण्डवेगा अपि ते साधु कृत्यं देवप्रीतिकरं कर्म निर्वहन्ति, तदेवोपपादयति। हि यस्मात् मरुतः उक्तलक्षणाः रोदसी द्यावापृथिव्यौ चक्रिरे कृतवन्तः। द्विविधां ऊर्ध्वां तृतीयस्थानां अधरां पृथिवीस्थानां च चितिं इति संकेतरहस्यम्। नेमे मरुतः स्थूला वायवः, रोदस्योः कर्तारो भवन्ति। उज्ज्वलानां धीवृत्तीनां प्रभावादेव दिवि ऊर्ध्वमधः पृथिव्यां च चिद्विकासो द्विधा सम्पद्यते। किमर्थं रोदसी चक्रिरे? वृधे वर्धनाय, यजमाने उक्तलक्षणयोः रोदस्योरिति बोध्यम्। पुनः कीदृशाः? वीराः विशेषेण शत्रुक्षेपणशीलाः घृष्वयः घर्षणशीलाः बलाढ्यत्वात्, ईदृशाः मरुतः विदथेषु ज्ञानप्राप्तिस्थानेषु यज्ञेषु मदन्ति हृष्यन्ति सोमरसस्वीकारेण॥

शुम्भन्ते—शुभ शुम्भ दीप्तौ। जनयः—जनी प्रादुर्भावे, जायन्ते आसु। यामन्—या प्रापणे, भावे आतो मनिन्, सप्तम्या लुक्। सुदंससः—शोभनं दंसः कर्म येषां ते। वृधे—वृधू वृद्धौ, संपदादिलक्षणो भावे क्विप्। विदथेषु—विदन्त्येषु देवान्, रुदिविदिभ्यां किदिति अथप्रत्ययः। घृष्वयः—घृषु संघर्षे, विन्प्रत्ययान्तो निपातितः॥

द्वितीयामृचमाह—

त उक्षितासो महिमानमाशत दिवि रुद्रासो अधि चक्रिरे सदः।
अर्चन्तो अर्कं जनयन्त इन्द्रियमधि श्रियो दधिरे पृश्निमातरः॥२॥
ते उक्षितासः महिमानम् आशत दिवि रुद्रासः अधि चक्रिरे सदः
अर्चन्तः अर्कम् जनयन्तः इन्द्रियम् अधि श्रियः दधिरे पृश्निऽमातरः॥

ते पूर्वोक्ता मरुतः उक्षितासः सिक्ताः, यजने सुतेन सोमरसेन तृप्ताः सरसा आर्द्रचित्ता इति रहस्यम्। तथाभूताः सन्तः महिमानम् महत्त्वं आशत आप्नुवन्। रुद्रासः रुद्रपुत्राः जन्ये जनकांशवर्तनात्, ते मरुतः दिवि द्योतमाने तृतीये इन्द्रस्थाने सदः सदनं शुद्धमनश्चैतन्य-

स्थानं ऐन्द्रं धाम अधि चक्रिरे अधिकं उत्कृष्टं चक्रुः, मध्यमस्थानोद्भवा मरुतः ऊर्ध्वभुवमारुह्य ऐन्द्रं ज्योतिर्भजन्ते, तदेव स्पष्टयति। अर्कम् दीप्तमर्चनीयं इन्द्रं अर्चन्तः पूजयन्तः इन्द्रियम् इन्द्रलिङ्गं इन्द्रसंबन्धि सर्वं वैभवं जनयन्तः आविष्कुर्वन्तः पृश्निमातरः पृश्निः चित्रवर्णा गौः माता येषां ते, गौरदितिः तत्प्रसूतयः, अन्तरिक्षात्मिका अदितिः, प्राग्विवृतम्। श्रियः ऐश्वर्याणि अधि अधिकं दधिरे अधारयन् ॥ उक्षितार इत्यादयः गताः ॥

तृतीयामृचमाह—

गोमातरो यच्छुभयन्ते अञ्जिभिस्तनूषु शुभ्रा दधिरे विरुक्मतः।
बाधन्ते विश्वमभिमातिनमप वर्त्मान्येषामनु रीयते घृतम् ॥३॥

गोऽमातरः यत् शुभयन्ते अञ्जिऽभिः तनूषु शुभ्राः दधिरे विरुक्मतः
बाधन्ते विश्वम् अभिऽमातिनम् अप वर्त्मानि एषाम् अनु रीयते घृतम् ॥

गोमातरः गौः चित्रवर्णा पृश्निः माता येषां ते मरुतः, अत्र गौः पृश्निरित्युपपद्यते, गोरूपा भूमिरिति सायणः। अञ्जिभिः अभिव्यञ्जकैर्विभवैः, आभरणैरिति स्थूलोऽर्थः। यत् यदा शुभयन्ते स्वीयं दिव्यं रूपं दीप्तं कुर्वन्ति तदानीं ते मरुतः शुभ्राः स्वच्छाः ज्वलिताः सन्तः तनूषु शरीरेषु स्वीयेषु विरुक्मतः विशेषेण रोचमानान् प्रभावान् दधिरे धारयन्ति। अपि च विश्वम् सर्वं अभिमातिनम् शत्रुं अप बाधन्ते हिंसन्ति। एषाम् मरुतां वर्त्मानि मार्गान् अनु अनुसृत्य घृतम् दीप्तिः, धीप्रकाश इति बोध्यम्, रीयते स्रवति। ऐन्द्रतेजोबलदीपिता धीवृत्तयो हि मरुतः॥ शुभयन्ते—संज्ञापूर्वकस्य विधेरनित्यत्वाच्छ्घूपधगुणाभावः। अञ्जिभिः—अञ्जू व्यक्ति-म्रक्षणादिषु। विरुक्मतः—विशिष्टा रुक् विरुक्, तद्वन्तः। रीयते—रीङ् स्रवणे दैवादिकः॥

चतुर्थीमृचमाह—

वि ये भ्राजन्ते सुमखास ऋष्टिभिः प्रच्यावयन्तो अच्युता चिदोजसा।
मनोजुवो यन्मरुतो रथेष्वा वृषव्रातासः पृषतीरयुग्ध्वम् ॥४॥

वि ये भ्राजन्ते सुऽमखासः ऋष्टिऽभिः प्रऽच्यवयन्तः अच्युता चित् ओजसा मनःऽजुवः यत् मरुतः रथेषु आ वृषऽव्रातासः पृषतीः अयुग्ध्वम् ॥

सुमखासः शोभनयज्ञाः ये मरुतः ऋष्टिभिः आयुधैः, मरुतां दृष्टय एव ऋष्टय इति प्रागुपपादितम्। विभ्राजन्ते विशेषेण दीप्यन्ते, ते मरुतः अच्युता चित् च्यावयितुमशक्यानि पर्वतादीनीति स्थूलदृष्ट्या अचित्तिस्थानानि जडघनानि अपि ओजसा स्वीयबलेन प्रच्यावयन्तः प्रकर्षेण च्यावयितारो भवन्ति। अथ प्रत्यक्षकृतो मन्त्रवर्णः। हे मरुतः, मनोजुवः मनोगतयः, मनोवद्वेगगमनाः वृषव्रातासः वृष्णां बलवेगवर्षकाणां व्राताः संघभूताः यूयं रथेषु आत्मीयेषु पृषतीः वाहनभूताः श्वेतबिन्दुमृगीः, गतिवेगलक्षकः सङ्केतोऽयं प्राग्विवृतः, यत् यदा आ अयुग्ध्वम् नियुक्ता अकृद्वं तदा अच्युतान्यपि च्युतानि भवन्तीति भावः॥ मनोजुवः—जु इति सौत्रो धातुः गत्यर्थकः। अयुग्ध्वम्—युजिर् योगे॥

पञ्चमीमृचमाह—

प्र यद्रथेषु पृषतीरयुग्ध्वं वाजे अद्रिं मरुतो रंहयन्तः।
उतारुषस्य वि ष्यन्ति धाराश्चर्मेवोदभिर्व्युन्दन्ति भूमं ॥५॥
प्र यत् रथेषु पृषतीः अयुग्ध्वम् वाजे अद्रिम् मरुतः रंहयन्तः उत अरुषस्य वि स्यन्ति धाराः चर्मेऽइव उदऽभिः वि उन्दन्ति भूमं ॥

हे मरुतः, पृषतीः यत् यदा रथेषु प्र अयुग्ध्वम् भवन्तः प्रायुयुजन्, किं कुर्वन्तः? वाजे निमित्तभूते सति, समृद्धिप्रतिपादको वाजशब्दः। अद्रिम् मेघं अन्तर्निहिततेजोबलादिकं तमोघनं रंहयन्तः वर्षणार्थं प्रेरयन्तः। उत तदानीं अरुषस्य आरोचमानस्य इन्द्रात्मनः सौरज्योतिषः सकाशात् धाराः ज्योतिर्बलादिधाराः विष्यन्ति विमुञ्चन्ति भवन्तः। ताश्च धाराः विमुक्ताः सत्यः, उदभिः उदकैः चर्मेव यथा चर्म निष्प्रतिरोधं क्लेद्यते तथा भूम सर्वां भूमिं व्युन्दन्ति विशेषतः क्लेदयन्ति। भूमिः स्थूलशरीरं स्थूलप्रज्ञाभूमिश्चेत्यवधेयम्॥ रंहयन्तः—रहि गतौ। विष्यन्ति—षो अन्तकर्मणि दैवादिकः। व्युन्दन्ति—उन्दी क्लेदने॥

षष्ठीमृचमाह—

आ वो वहन्तु सप्तयो रघुष्यदो रघुपत्वानः प्र जिगात बाहुभिः।
सीदता बर्हिरुरु वः सदस्कृतं मादयध्वं मरुतो मध्वो अन्धसः ॥६॥
आ वः वहन्तु सप्तयः रघुऽस्यदः रघुऽपत्वानः प्र जिगात बाहुऽभिः

सीदत आ बर्हिः उरु वः सदः कृतम् मादयध्वम् मरुतः मध्वः अन्धसः ॥

हे मरुतः, वः युष्मान् सप्तयः सर्पणशीलाः अश्वस्थानीयाः पृषत्यः आ वहन्तु अस्मद्यजनं प्रापयन्तु । कीदृशाः सप्तयः? रघुष्यदः लघु शीघ्रं स्यन्दमानाः गच्छन्त इत्यर्थः । रघुपत्वानः लघु पतन्तो गच्छन्तो यूयं बाहुभिः वीरकर्मलक्षकबलद्योतनाय बाहुभिः सहेत्युक्तम् । प्र जिगात प्रकर्षेण गच्छत । हे मरुतः, वः युष्माकं सदः सदनं उरु विस्तीर्णं कृतम् । यजमानस्यान्तर्वेदिः सिद्धा । तत्र बर्हिः आस्तीर्णं आसनं आ सीदत तत्रोपविशत । उपविश्य च मध्वः मधुरस्य अन्धसः अन्नभूतस्य सोमस्य पानेन मादयध्वम् तृप्ता भवत ॥ रघुष्यदः-रघु स्यन्दन्ते, स्यन्द् प्रस्रवणे । रघुपत्वानः-पत्लृ गतौ । जिगात-जिगातीति गतिकर्मसु पठितम् ॥

इति प्रथमस्य षष्ठे नवमो वर्गः

सप्तमीमृचमाह—

तेऽवर्धन्त स्वतवसो महित्वना नाकं तस्थुरुरु चक्रिरे सदः ।
विष्णुर्यद्धावद्वृषणं मदच्युतं वयो न सीदन्नधि बर्हिषि प्रिये ॥७॥

ते अवर्धन्त स्वऽतवसः महिऽत्वना आ नाकम् तस्थुः उरु चक्रिरे सदः विष्णुः यत् ह आवत् वृषणम् मदऽच्युतम् वयः न सीदन् अधि बर्हिषि प्रिये ॥

ते मरुतः अवर्धन्त वृद्धिं प्राप्ताः । कीदृशाः? स्वतवसः स्वाधीनबलाः, अन्यबलनिरपेक्षं प्रवर्तन्ते । अत एव वृद्धिं प्राप्य महित्वना महत्त्वेन नाकम् द्युलोकं आ तस्थुः आस्थितवन्तः सदः सदनं यजमानकृते स्वनिवासस्थानं उरु विस्तीर्णं चक्रिरे चक्रुः । यत् यदर्थं, मरुतां कृते वृषणम् वर्षकं दिव्यसम्पदां मदच्युतम् हर्षस्य आसेक्तारं सोमं विष्णुर्ह विष्णुरेव आवत् रक्षति, ते मरुतः वयो न पक्षिण इव शीघ्रपतनाः आगत्य प्रिये प्रीतिकरे अस्मदीये आस्तीर्णे बर्हिषि अधि अन्तर्यजनवेदिस्थाने सीदन् सीदन्तु ॥ अत्र मन्त्रे विष्णुर्मरुतां रक्षक इत्युक्तम् । यद्यपि घोरकर्मणां मरुतां पिता प्रचण्डो रुद्रः सर्वत्र प्रसिद्धः, तथापि विष्णुरेतान् रक्षतीति कथने वेदरहस्यमिदमवधेयम् । यथा रुद्रस्य मरुतां पितुर्घोरव्यापारत्वेऽपि शिवङ्करत्वं सौम्यांशद्योतकलक्षणानि च घोषयन्ति मन्त्रवर्णाः, यथा च मरुतां प्रचण्डत्वेऽपि 'शुभयन्ते अञ्जिभिस्तनूषु शुभ्राः दधिरे विरुक्मतः' इत्यादि सौम्यत्वं च वर्णयन्ति मन्त्राः, तथा विष्णोः सर्वथा सौम्यस्यापि

रुद्रकर्मत्वं कीर्त्यते, मरुतां स परम आधार इति च। "मृगो न भीमः कुचरो गिरिष्ठाः" इति दीर्घतमाः (१.१५४.२)। आत्रेयमण्डलेऽन्तिमसूक्ते विष्णुः 'एवयामरुत्' इति वर्णितः। रुद्र इव मरुत इव विष्णुरतिशीघ्रचण्डगतिक इति विवक्षा व्यञ्जिता 'एवया'शब्दप्रयोगेण॥ यत्–चतुर्थ्या लुक्। आवत्–छान्दसो वर्तमाने लङ्। मदच्युतम्–मदं च्योतति इति मदच्युत्। सीदन्–लिङर्थे लेट्यडागमः॥

अष्टमीमृचमाह—

शूरा इवेद्युयुधयो न जग्मयः श्रवस्यवो न पृतनासु येतिरे।
भयन्ते विश्वा भुवना मरुद्भयो राजान इव त्वेषसन्दृशो नरः॥८॥
शूराःऽइव इत् युयुधयः न जग्मयः श्रवस्यवः न पृतनासु येतिरे
भयन्ते विश्वा भुवना मरुत्ऽभ्यः राजानःऽइव त्वेषऽसन्दृशः नरः॥

शूरा इव इत् शौर्ययुक्ताः पुरुषा इवैव युयुधयो न युध्यमाना इव च जग्मयः सत्वरं गच्छन्तः मरुतः श्रवस्यवो न श्रवः दिव्यमान्तरं च आत्मन इच्छन्तः पुरुषा इव पृतनासु सङ्ग्रामेषु येतिरे प्रयतन्ते। देवविरोधिभिर्वृत्रादिभिर्युद्धे व्याप्रियन्ते यजमानस्योपकाराय। तथाविधेभ्यः मरुद्भ्यः विश्वा सर्वाणि भुवना भूतजातानि भयन्ते बिभ्यति। नरः नेतारः बलिनस्ते मरुतः राजानः इव राजमानाः नृपतय इव त्वेषसन्दृशः उज्ज्वलसंदर्शनाः अत एव सर्वे यज्ञयात्राविघातकाः बिभ्यति। मरुतो न केवलं चण्डकर्माणः क्रियादक्षाः, अपि तु 'त्वेषसन्दृश'श्च ज्ञानशक्तिप्रकाशकाश्चेति बोद्धव्यम्॥ युयुधयः–युध संप्रहारे, छन्दसि किन्प्रत्ययः। जग्मयः–पूर्ववत् किन्प्रत्ययः। भयन्ते–जिभी भये, बहुलं छन्दसीति शपः श्लोरभावः। त्वेषसंदृशः–त्विष दीप्तौ, पचाद्यच्, दृशिर् प्रेक्षणे, संपूर्वादस्मात् संपदादिलक्षणो भावे क्विप्॥

नवमीमृचमाह—

त्वष्टा यद्वज्रं सुकृतं हिरण्ययं सहस्रभृष्टिं स्वपा अवर्तयत्।
धत्त इन्द्रो नर्यपांसि कर्तवेऽहन्वृत्रं निरपामौब्जदर्णवम्॥९॥
त्वष्टा यत् वज्रम् सुऽकृतम् हिरण्ययम् सहस्रऽभृष्टिम् सुऽअपाः अवर्तयत्
धत्ते इन्द्रः नरि अपांसि कर्तवे अहन् वृत्रम् निः अपाम् औब्जत् अर्णवम्॥

त्वपाः शोभनकर्मा त्वष्टा विश्वकर्मा यद्वज्रम् अवर्तयत् अगमयत् इन्द्रं प्रति, तस्मै दत्तवानित्यर्थः। कीदृशम्? सुकृतम् सुष्ठु निष्पादितं हिरण्ययम् हिरण्यविकारं सहस्रभृष्टिम् सहस्रधाराभिर्युक्तं, अनेकार्थकः सहस्रशब्दः। तद्वज्रं इन्द्रो धत्ते धारयति। कस्मिन्? नरि नेतरि, बलिनि पुरुषे, बलाढ्ये यजमाने, 'नृसंबन्धात् नृशब्देन संग्रामोऽभिधीयते' इति सायणीयम्। स्थूलपक्षेऽपि नेदमावश्यकम्। मरुतां प्रकृतत्वात् नरि बलिनि मरुद्गणे इति विवरणं वरम्। न चेत् सूक्तमध्ये ऋगियं पूर्वोत्तरसंबन्धरहिता मरुत्संबन्धशून्या च भवति। किमर्थम्? अपांसि कर्तवे कर्माणि कर्तुम्। इन्द्रार्थं मारुतं प्रबलं कर्म बहुधा कीर्त्यते वेदे। इन्द्र एवं तेन वज्रेण वृत्रम् अहन् वृत्रवधं कृतवान्। अपाम् अर्णवम् अपां राशिं निरौब्जत् निर्गमय्य अधोमुखमपातयत्। यथा क्षीराब्धिरित्यादौ अब्धिपदाभिधेयसमुद्रमात्रस्य विवक्षा, तथेह अर्णवशब्देन अपरिमितराशित्वं ग्राह्यम्। इमाश्च दिव्या आपः तेजोबलादिलक्षणाः रहस्यार्थे बोध्याः॥ हिरण्ययम्-हिरण्यशब्दान्मयटो मकारस्य लोपः। कर्तवे-तुमर्थे तवेन्प्रत्ययः। अर्णवम्-मत्वर्थीयो वः सलोपश्च॥

दशमीमृचमाह—

ऊर्ध्वं नुनुद्रेऽवतं त ओजसा दादृहाणं चिद्बिभिदुर्वि पर्वतम्।
धमन्तो वाणं मरुतः सुदानवो मदे सोमस्य रण्यानि चक्रिरे ॥१०॥
ऊर्ध्वम् नुनुद्रे अवतम् ते ओजसा ददृहाणम् चित् बिभिदुः वि पर्वतम्
धमन्तः वाणम् मरुतः सुऽदानवः मदे सोमस्य रण्यानि चक्रिरे॥

इयमुत्तरा च काश्चनाख्यायिकामाधारीकृत्य व्याख्याते सायणीये। मरुतः दूरस्थं कूपमुत्खाय तृषितस्य ऋषेर्गोतमस्यान्तिकं प्रापय्य तमासिच्य तर्पयामासुरिति सा कथा। वेदार्थरहस्यजिज्ञासूनां तया नास्ति प्रयोजनम्। तत्त्वग्रहणे सा भ्रमहेतुरेव भवति॥ ते मरुतः अवतम् कूपं, कूपनाम, अधस्ताद्भवति। ऊर्ध्वम् उपरि ओजसा स्वीयबलेन नुनुद्रे प्रेरितवन्तः। मरुतां कर्मणामिदमेकम्, यत् अधस्तात् जडे अन्नमये शरीरे (लोके च) निलीय वर्तमानानां अपां ज्योतिश्शक्तिविशेषाणां ऊर्ध्वं प्राणमनोमयेषु स्थानेषु प्रापणं भवति। तथा उपरि प्रापणे जाड्यादिघनप्रतिबन्धकं च भञ्जयन्तीत्याह। ददृहाणम् प्रवृद्धं दृढं पर्वतम् चित् बहुपर्वयुक्तं शिलामयं जडघनमपि वि बिभिदुः बभञ्जुः। सुदानवः शोभनदानाः ते मरुतः वाणम् वीणा-

विशेषमित्येके, वाद्यविशेषं धमन्तः वादयन्तः (स्वनिर्वर्तितकर्मजन्योल्लासद्योतकमिदम्) सोमस्य मदे सोमपानेन हर्षे सति रण्यानि रमणीयानि विविधानि रतियोग्यानि यजमानायर्षये चक्रिरे कुर्वन्ति, लङर्थे लिट् ॥ नुनुद्रे-णुद प्रेरणे, लिटि इरयो रे इति रे आदेशः ॥ दद्हाणम्-दह दहि वृद्धौ, लिटि कानच् । वाणम्-अण रण वण शब्दार्थाः । रण्यानि-रणतेर्भावे छन्दसि यत् ॥

एकादशीमृचमाह—

जिह्मं नुनुद्रेऽवतं तया दिशासिञ्चन्नुत्सं गोतमाय तृष्णजे ।
आ गच्छन्तीमवसा चित्रभानवः कामं विप्रस्य तर्पयन्त धामभिः ॥११॥
जिह्मम् नुनुद्रे अवतम् तया दिशा असिञ्चन् उत्सम् गोतमाय तृष्णऽजे
आ गच्छन्ति ईम् अवसा चित्रऽभानवः कामम् विप्रस्य तर्पयन्त
धामऽभिः ॥

मरुतः अवतम् उद्धृतं उक्तलक्षणं कूपं तया दिशा यत्र अवस्थित ऋषिरूर्ध्वगतिकः तत्र जिह्मम् नुनुद्रे वक्रं प्रेरितवन्तः, ऊर्ध्वप्रेरणे न केवलमृजुधारया किं तु नानाभागसंस्पर्शो यथा स्यात् तथा तिरश्चीनगत्या प्रेरयामासुः । एवं सर्वाङ्गसेचनं सिध्यति । एवं तृष्णजे तृषिताय गोतमाय ऋषये उत्सम् जलप्रवाहं असिञ्चन् अवानयन् । अथ ईम् एनं यजमानमृषिं चित्रभानवः विचित्रदीप्तयः मरुतः अवसा ईदृशेन रक्षणेन सह आगच्छन्ति प्राप्नुवन्ति । विप्रस्य विपश्चित ऋषेः कामम् अपेक्षितं धामभिः धारकैः अन्नैस्तेजोभिः तर्पयन्त अतर्पयन् ॥ तृष्णजे-तृष्णा जाता यस्य सः, तस्मै, ङ्यापोः संज्ञाच्छन्दसोर्बहुलमिति ह्रस्वत्वम् । धामभिः-दधातेः ॥

द्वादशीमृचमाह—

या वः शर्म शशमानाय सन्ति त्रिधातूनि दाशुषे यच्छताधि ।
अस्मभ्यं तानि मरुतो वि यन्त रयिं नो धत्त वृषणः सुवीरम् ॥१२॥
या वः शर्म शशमानाय सन्ति त्रिऽधातूनि दाशुषे यच्छत अधि अस्मभ्यम्
तानि मरुतः वि यन्त रयिम् नः धत्त वृषणः सुऽवीरम् ॥

हे मरुतः, वः युष्माकं संबन्धीनि या यानि त्रिधातूनि त्रिषु पृथिव्यादिस्थानेषु (पिण्डाण्डे

ब्रह्माण्डे च) धारितानि अवस्थितानीत्यर्थः शर्म शर्माणि शरणानि, शान्तिसुखानि वा शशमानाय स्तुतिभिः भजमानाय दातुं सन्ति यानि च दाशुषे दत्तवते यजमानाय अधि यच्छत अधिकं प्रयच्छथ तानि सर्वाणि अस्मभ्यम् वि यन्त विशेषेण प्रयच्छत। हे वृषणः, वर्षितारः अभीष्टानां, नः अस्मभ्यं सुवीरम् शोभनवीर्योपेतं रयिम् धनं धत्त दत्त॥ शशमानाय-शश प्लुतगतौ, ताच्छीलिकश्चानश्। यन्त-यमेर्लोटि बहुलं छन्दसीति शपो लुक्॥

इति प्रथमस्य षष्ठे दशमो वर्गः

अथ 'मरुतो यस्ये'ति दशर्चं द्वितीयं सूक्तं चतुर्दशेऽनुवाके। गोतमस्यार्षं गायत्रं मरुद्देवताकम्॥

तत्र प्रथमामृचमाह—

मरुतो यस्य हि क्षये पाथा दिवो विमहसः। स सुगोपातमो जनः॥१॥
मरुतः यस्य हि क्षये पाथ दिवः विऽमहसः सः सुऽगोपातमः जनः॥

हे विमहसः विशिष्टतेजसः, मरुतः, दिवः द्युलोकादेत्य यूयं यस्य हि यस्य खलु यजमानस्य क्षये यजनगृहे शरीरे पाथ सोमं अभिषुतं पिबथ सः जनः स जातो यजमानः सुगोपातमः शोभनैः चिद्ररश्मिपालकैर्देवैरत्यन्तं युक्तो भवति॥ विमहसः-विशिष्टं महो येषां ते। सुगोपातमः-शोभनो गोपाः रश्मिरक्षको यस्य सः, अतिशयेन सुगोपाः॥

द्वितीयामृचमाह—

यज्ञैर्वा यज्ञवाहसो विप्रस्य वा मतीनाम्। मरुतः शृणुता हवम्॥२॥
यज्ञैः वा यज्ञऽवाहसः विप्रस्य वा मतीनाम् मरुतः शृणुत हवम्॥

हे यज्ञवाहसः यज्ञस्य वोढारो मरुतः, यज्ञैर्वा यजमानस्य यजनैश्च सोमसवैश्च, वा समुच्चये, मतीनां वा स्तुतीनां च संबन्धिनः विप्रस्य विपश्चितः हवम् आह्वानं शृणुत आकर्णयत॥ सोमाभिषवैः साधनैः स्तुतिभिश्च साधनैः विपश्चित ऋषेराह्वानं शृणुतेति भावः॥

तृतीयामृचमाह—

उत वा यस्य वाजिनोऽनु विप्रमतक्षत। स गन्ता गोमति व्रजे॥३॥
उत वा यस्य वाजिनः अनु विप्रम् अतक्षत सः गन्ता गोऽमति व्रजे॥

उत वा अपि च यस्य वाजिनः बलसमृद्धा मरुतः यस्य यजमानस्य अर्थे विप्रम् विपश्चितं, तल्लक्षितं अन्तश्चक्षुष्मत्त्वं अत एव मेधावित्वं अन्वतक्षत तीक्ष्णीकुर्वन्ति शिल्पनिष्पादन इव, सः तादृशो यजमानः गोमति चिद्रश्मिपूरिते व्रजे गोष्ठे निवासस्थाने गन्ता गमनशीलो भवति ॥ अतक्षत-तक्ष्णोतेः छान्दसो लङ् । गन्ता-गमेस्ताच्छीलिकस्तृन् ॥

चतुर्थीमृचमाह—

अस्य वीरस्य बर्हिषि सुतः सोमो दिविष्टिषु । उक्थं मदश्च शस्यते ॥४॥
अस्य वीरस्य बर्हिषि सुतः सोमः दिविष्टिषु उक्थम् मदः च शस्यते ॥

दिविष्टिषु दिवः द्योतमानस्य ऊर्ध्वस्थानस्य इष्टयः एषणानि येषु कालेषु तेषु अस्य पूर्वोक्तस्य बलिनः वीरस्य शत्रुक्षेपणदक्षस्य यजमानस्यर्षेः बर्हिषि यज्ञे अन्तः हृदयवेद्यां सुतः अभिषुतः सोमः शस्यते प्रशस्तो भवति, तथा उक्थम् शस्त्रात्मकं स्तोत्रं शस्यते मदश्च हर्षश्च देवानां मादयितृत्वं च शस्यत इत्यर्थः ॥

पञ्चमीमृचमाह—

अस्य श्रोषन्त्वा भुवो विश्वा यश्चर्षणीरभि । सूरं चित् सस्रुषीरिषः ॥५॥
अस्य श्रोषन्तु आ भुवः विश्वाः यः चर्षणीः अभि सूरम् चित् सस्रुषीः इषः ॥

अस्य यजमानस्य स्तोतुः स्तुतिं आ श्रोषन्तु आभिमुख्येन शृण्वन्तु मरुतः । यः यजमानः मरुतामनुग्रहात् विश्वाः चर्षणीः सर्वान् दृष्टिसम्पन्नान् पुरुषान् अभि भुवः अभि भवति, अतिशेत इत्यर्थः । अस्य इषः एषणाः मारुतबलप्रेरिताः सूरं चित् सूर्यमपि सस्रुषीः प्राप्ताः भवन्तु ॥ भुवः-भवतेर्लेटि लेटोऽडाटावित्यडागमः । सस्रुषीः-सृ गतौ, अस्माल्लिटः क्वसुः, उगितश्चेति ङीप्, भसंज्ञायां वसोः संप्रसारणम्, शासिवसिघसीनां चेति षत्वम्, जसि वा छन्दसीति पूर्वसवर्णदीर्घत्वम् ॥

इति प्रथमस्य षष्ठ एकादशो वर्गः

षष्ठीमृचमाह—

पूर्वीभिर्हि ददाशिम शरद्भिर्मरुतो वयम् । अवोभिश्चर्षणीनाम् ॥६॥

पूर्वीभिः हि ददाशिम शरत्ऽभिः मरुतः वयम् अवःऽभिः चर्षणीनाम् ॥

हे मरुतः, पूर्वीभिः बह्वीभिः शरद्भिः वत्सरैः चर्षणीनाम् सर्वस्य द्रष्टॄणां ऋषीणां देवानां मवतां वा, अवोभिः रक्षणैः युक्ताः वयम् ददाशिम हविर्दत्तवन्तः । हि यस्मादेवं तस्मादनुग्रहं करुत ॥ पूर्वीभिः—पुरुशब्दाद् गुणवचनात् ङीष् । ददाशिम—दाशृ दाने, लिटि इडागमः ॥

सप्तमीमृचमाह—

सुभगः स प्रयज्यवो मरुतो अस्तु मर्त्यः । यस्य प्रयांसि पर्षथ ॥७॥
सुऽभगः सः प्रऽयज्यवः मरुतः अस्तु मर्त्यः यस्य प्रयांसि पर्षथ ॥

हे प्रयज्यवः, प्रकर्षेण यष्टव्याः मरुतः, सः मर्त्यः मनुष्यो यजमानः सुभगः अस्तु शोभन-भाग्ययुक्तो भवतु । यस्य संबन्धीनि प्रयांसि प्रियाणि अर्पणानि स्तोत्राण्यपि, पर्षथ आत्मनि सिञ्चथ, यूयं स्वीकुरुथ ॥ पर्षथ—पृषु वृषु सेचने भौवादिकः ॥

अष्टमीमृचमाह—

शशमानस्य वा नरः स्वेदस्य सत्यशवसः । विदा कामस्य वेनतः ॥८॥
शशमानस्य वा नरः स्वेदस्य सत्यऽशवसः विद कामस्य वेनतः ॥

हे सत्यशवसः सत्यबलाः, नरः नेतारो बलिनो मरुतः, शशमानस्य स्तुतिभिर्भजमानस्य स्वेदस्य खिद्यतः, परिश्रमं कुर्वतः, (स्वेदेन स्वेदवान् लक्ष्यते) यजमानस्य वेनतः वेनतिः कान्तिकर्मा कामयमानस्य कामस्य कामं अभीष्टं, कर्मार्थे षष्ठी, विद लम्भय । वा समुच्चये । अत्र कामना न सामान्यैषणा किं तु तपःप्रभावात् कान्तियुक्तस्य कामः, तस्मात् भजमानस्य कामयमानस्य चेति ग्राह्यम् ॥

नवमीमृचमाह—

यूयं तत्सत्यशवस आविष्कर्त महित्वना । विध्यता विद्युता रक्षः ॥९॥
यूयम् तत् सत्यऽशवसः आविः कर्त महिऽत्वना विध्यत विऽद्युता रक्षः ॥

हे सत्यशवसः अमोघबलाः मरुतः, यूयम् तत् प्रसिद्धं तच्छब्दवाच्यं महत् 'महद्देवानाम-सुरत्वमेकम्' इत्यन्यत्र गीतं आविष्कर्त आविष्कुरुत । इदं च महत् ज्योतिरिति विस्पष्टमुत्तरस्यां

वर्णितम्। रक्षः आविष्कारप्रतिबन्धकं राक्षसादिकं विद्युता विद्योतमानेन महित्वना महत्त्वेन विध्यत ताडयत नाशयतेत्यर्थः ॥

दशमीमृचमाह—

गूहता गुह्यं तमो वि यात विश्वमत्रिणम्। ज्योतिष्कर्ता यदुश्मसि ॥१०॥
गूहत गुह्यम् तमः वि यात विश्वम् अत्रिणम् ज्योतिः कर्त यत् उश्मसि ॥

हे मरुतः, गुह्यम् रहसि वर्तमानं, अन्तर्निलीनं तमः अन्धकारं गूहत संवृतं कुरुत, विनाशयतेत्यर्थः, विश्वम् अत्रिणम् सर्वं अत्तारं राक्षसादिकं वि यात विविधं यापयत, निर्गमयत। ज्योतिः तत् पूर्वोक्तं कर्त आविष्कुरुत, यत् वयं उश्मसि कामयामहे ॥ अत्रिणम्—अत्तेः त्रिनिप्रत्ययः। उश्मसि—वष्टेः, इदन्तो मसिः ॥

इति प्रथमस्य षष्ठे द्वादशो वर्गः

'प्रत्वक्षस' इति षड्चं तृतीयं सूक्तम्, गोतमस्यार्षं जागतं मारुतम् ॥

तत्र प्रथमामृचमाह—

प्रत्वक्षसः प्रतवसो विरप्शिनोऽनानता अविथुरा ऋजीषिणः।
जुष्टतमासो नृतमासो अञ्जिभिर्व्यानञ्जे के चिदुस्रा इव स्तृभिः ॥१॥
प्रऽत्वक्षसः प्रऽतवसः विऽरप्शिनः अनानताः अविथुराः ऋऽजीषिणः
जुष्टऽतमासः नृऽतमासः अञ्जिऽभिः वि आनञ्जे के चित् उस्राःऽइव स्तृऽभिः ॥

प्रत्वक्षसः शत्रूणां प्रकर्षेण कर्शयितारः प्रतवसः प्रकृष्टबलाः, विरप्शिनः महन्नामैतत्, प्राग्विवृतम् (१.८.८) महान्तः, 'विविधेन जयघोषेणोपेताः महान्तो हि विविधैः शब्दैः प्रशस्यन्ते' इति सायणीयम्। अनानताः आनतिहीनाः उद्धता इत्यर्थः, अविथुराः अव्यथमानतया भयचलनरहिताः। ऋजीषिणः प्रार्जयितारो रसानामिति सायणव्याख्या, ऋजीषं अपार्जनं शत्रूणां, तदेषामस्तीति वयम्, प्रागिदं कथितम् (१.३२.६)। जुष्टतमासः अतिशयेन प्रीताः नृतमासः अतिशयेन नेतारो बलिनः अञ्जिभिः स्वरूपाभिव्यञ्जकैः प्रभाविशेषैः व्यानञ्जे व्यक्ताः दृश्यन्ते। तत्र दृष्टान्तः, स्तृभिः नक्षत्रैर्युक्ताः के चित् उस्रा इव स्वल्पसंख्याकाः सूर्यकिरणा इव। स्वल्पेषु

उदयरश्मिषु नक्षत्रदर्शनं प्रसिद्धम्। अत्र मरुतां आदौ दर्शनं तेषां 'अञ्जिभिः' स्फुटं भवतीत्युक्तम्॥ प्रत्वक्षसः—तक्षू त्वक्षू तनूकरणे। अविथुराः—व्यथ भयसंचलनयोः, व्यथेः संप्रसारणं, घेः किचेति उरच्प्रत्ययः। आनञ्जे—अनक्तेः, कर्मणि लिट्, इरयो रे॥

द्वितीयामृचमाह—

उपह्वरेषु यदचिध्वं यियिं वयं इव मरुतः केन चित्पथा।
श्रोतन्ति कोशा उप वो रथेष्वा घृतमुक्षता मधुवर्णमर्चते॥२॥

उपऽह्वरेषु यत् अचिध्वम् यियिम् वयःऽइव मरुतः केन चित् पथा
श्रोतन्ति कोशाः उप वः रथेषु आ घृतम् उक्षत मधुऽवर्णम् अर्चते॥

हे मरुतः, उपह्वरेषु उपह्वर्तव्येषु कौटिल्येन गन्तव्येषु पार्थिवेषु स्थलेषु अस्माकमन्नमयशरीरेषु यत् यदा यियिम् गमनयुक्तं दिव्यबलादिवर्षकं मेघं अचिध्वम् उपचितं कुरुथ। किं कुर्वन्तः? वय इव पक्षिण इव केन चित् पथा केनापि मार्गेण पतन्तः। तदानीं कोशाः तेजोबलादिनिधिभूताः मेघाः वः युष्माकं रथेषु यानेषु उप समीपे आ श्रोतन्ति क्षरन्ति, बलादिकं मुञ्चन्ति, तावद् भूरि वर्तते अतः हे मरुतः, यूयं अर्चते पूजयते यजमानाय मधुवर्णम् मधुसदृशं भासमानं घृतम् दीप्तिमत्तेजः उक्षत सिञ्चत॥ उपह्वरेषु—गतम् (१.६२.६)। अचिध्वम्—चिनोतेः वर्तमाने लङ्, छन्दसि विकरणस्य लुक्। यियिम्—या प्रापणे, किप्रत्ययः। श्रोतन्ति—श्च्युतिर् क्षरणे, छान्दसो यलोपः॥

तृतीयामृचमाह—

प्रैषामज्मेषु विथुरेव रेजते भूमिर्यामेषु यद्ध युञ्जते शुभे।
ते क्रीळयो धुनयो भ्राजदृष्टयः स्वयं महित्वं पनयन्त धूतयः॥३॥

प्र एषाम् अज्मेषु विथुराऽइव रेजते भूमिः यामेषु यत् ह युञ्जते शुभे
ते क्रीळयः धुनयः भ्राजत्ऽऋष्टयः स्वयम् महिऽत्वम् पनयन्त धूतयः॥

यत् ह यदा खलु शुभे शोभनाय तेजोबलादिवर्षणाय, युञ्जते वर्षणं सज्जीकुर्वन्ति मरुतः, तदानीं अज्मेषु उत्क्षेपकेषु एषाम् मरुतां यामेषु नियमनेषु सत्सु भूमिः पृथिवी शरीरं प्ररेजते

प्रकर्षेण कम्पते। केव? विधुरा इव व्यथिता भयाच्चलितेव "यथा भर्त्रा वियुक्ता जाया निरालम्बा कम्पते" इति सायणीयम्। मरुतां तेजोबलादिवृष्टिसञ्जीकरणे नियमनानि उत्क्षेपण-पूर्वाणि आवश्यकानि भवन्ति, तत्र पृथिवी, (अन्तर्यजने शरीरं) प्रथमं भयादिव कम्पते। ते तथाभूताः क्रीळयः विहारशीलाः धुनयः कम्पनस्वभावाः भ्राजदृष्टयः दीप्यमानायुधाः धृतयः धुन्वन्तः प्रतिबन्धकान् महित्वम् स्वीयं महिमानं स्वयम् स्वयमेव पनयन्त प्रकटं कुर्वन्ति॥ अज्मेषु-अज गतिक्षेपणयोः। यामेषु-यम उपरमे, भावे घञ्। शुभे-शुभ दीप्तौ, संपदादिलक्षणः क्विप्। पनयन्त-पन व्यवहारे॥

चतुर्थीमृचमाह—

स हि स्वसृत्पृषदश्वो युवा गणोऽया ईशानस्तविषीभिरावृतः।
असि सत्य ऋणयावाऽनेद्योऽस्या धियः प्राविताथा वृषा गणः॥४॥

सः हि स्वऽसृत् पृषत्ऽअश्वः युवा गणः अया ईशानः तविषीभिः आऽवृतः असि सत्यः ऋणऽयावा अनेद्यः अस्याः धियः प्रऽअविता अथ वृषा गणः॥

स हि स खलु मरुतां गणः अया अस्य सर्वस्य ईशानः ईश्वरो भवति। कीदृशः? स्वसृत् स्वयमेव सरन्, नान्यसाहाय्यमपेक्षमाणः पृषदश्वः पृषत्यः अश्वा यस्य सः युवा तरुणः तविषीभिः बलैः आवृतः परिवेष्टितः अथ सत्यः अनृतपरिपन्थी ऋणयावा भक्तानां ऋणस्य यापयिता अनेद्यः अनिन्दितः वृषा वर्षकः अभीष्टानां, अस्याः धियः अस्मदीयायाः धारणावत्या मेधायाः प्राविता प्रवर्धयिता गणः असि भवति, पुरुषव्यत्ययः॥ अया-षष्ठ्या याजादेशः। अनेद्यः-णिदि कुत्सायाम्, ण्यत्॥

पञ्चमीमृचमाह—

पितुः प्रत्नस्य जन्मना वदामसि सोमस्य जिह्वा प्र जिगाति चक्षसा।
यदीमिन्द्रं शम्यृक्वाण आशतादिन्नामानि यज्ञियानि दधिरे॥५॥

पितुः प्रत्नस्य जन्मना वदामसि सोमस्य जिह्वा प्र जिगाति चक्षसा यत् ईम् इन्द्रम् शमि ऋक्वाणः आशत आत् इत् नामानि यज्ञियानि दधिरे॥

प्रत्नस्य पुरातनस्य पितुः अस्मद्वंशमूलपुरुषस्य सकाशात् जन्मना यदार्षं जन्म लब्धं तेन तन्महिम्ना वदामसि नूमः। वक्ष्यमाणमिदम्-सोमस्य अभिषुतस्य, देवेभ्योऽर्पणीयस्य सर्वानुभूति-रसस्य चक्षसा (प्रकाशेनेत्येके) दर्शनमात्रेण जिह्वा मन्त्रात्मिका वाक् प्रजिगाति मरुद्गणं प्रकर्षेण गच्छति, रसे निष्पन्ने सति, अनायासेन स्तुतिवाक् प्रवर्तते। यत् यदा ईम् एनं इन्द्रम् मरुत्वन्तं शमि इन्द्रस्य कर्तव्ये कर्मणि ऋक्वाणः ऋगात्मकस्तोत्रयुक्ताः सन्तः आशत आप्नुवन्, आप्नुवन्ति, लडर्थे, आदित् अनन्तरमेव ते मरुतः यज्ञियानि यज्ञार्हाणि नामानि देवतोद्बोधनसमर्थानि रहस्यानि नामानि दधिरे धृतवन्तः, धारयन्ति। इन्द्रकार्यभागहरत्वादेव यज्ञिया भवन्ति मरुत इत्युक्तम्॥ शमि-कर्मनामसु, सप्तम्येकवचने छान्दस ईकारलोपः। आशत-लङ्, विकरणस्य लुक्॥

षष्ठीमृचमाह—

श्रियसे कं भानुभिः सं मिमिक्षिरे ते रश्मिभिस्त ऋक्वभिः सुखादयः।
ते वाशीमन्त इष्मिणो अभीरवो विद्रे प्रियस्य मारुतस्य धाम्नः ॥६॥
श्रियसे कम् भानुऽभिः सम् मिमिक्षिरे ते रश्मिऽभिः ते ऋक्वऽभिः
सुऽखादयः ते वाशीऽमन्तः इष्मिणः अभीरवः विद्रे प्रियस्य मारुतस्य
धाम्नः ॥

ते प्रक्रान्ताः मरुतः भानुभिः दीप्यमानैः रश्मिभिः किरणैः सह कम् सुखवृष्टिजलं श्रियसे श्रयितुं, यजमानस्यर्षेः सेवनायेति भावः, संमिमिक्षिरे सम्यक् मेढुं सेक्तुमिच्छन्ति, यजमान-शरीरादिकं सुखार्द्रं कर्तुं प्रवृत्ता इत्यर्थः। तथा कृत्वा ते मरुतः ऋक्वभिः ऋग्युक्तैः, स्तुति-विषयभूतैरन्यैर्देवैरथवा स्तोतृभिः ऋषिभिः सह सुखादयः शोभनस्य सर्वस्य भोक्तारः भवन्ति। अथ ते वाशीमन्तः, वाशीति वाङ्नाम, वाग्युक्ताः इष्मिणः प्रेरणावेगोपेतगतियुक्ताः अभीरवः भयरहिताः सन्तः प्रियस्य स्वीयस्य अभिमतस्य मारुतस्य मरुत्संबन्धिनः धाम्नः स्थानस्य, स्थानमिति द्वितीयार्थे षष्ठी विद्रे लेभिरे लभन्त इति लडर्थे॥ श्रियसे-तुमर्थे असेन्प्रत्ययः। सुखादयः-खाद भक्षणे, औणादिक इप्रत्ययः, खादिः। इष्मिणः-इष गतौ, मक्प्रत्ययः, ततो मत्वर्थीय इनिः। विद्रे-विदृ लाभे, इरेचो रेभावः॥

इति प्रथमस्य षष्ठ त्रयोदशो वर्गः

'आ विद्युन्मद्भिरि'ति षड्चं चतुर्थं सूक्तम्। पूर्ववदृषिदेवते। आद्या षष्ठी च प्रस्तारपङ्क्ती, पञ्चमी विराड्रूपा। शिष्टास्त्रिष्टुभः, आद्यौ पादौ जागतौ तृतीयचतुर्थौ गायत्रौ यस्याः सा प्रस्तारपङ्क्तिः, आदितस्त्रयः पादा एकादशकाः अन्त्योऽष्टकः यस्याः सा विराड्रूपेत्युच्यते॥

तत्र प्रथमामृचमाह—

आ विद्युन्मद्भिर्मरुतः स्वर्कै रथेभिर्यात ऋष्टिमद्भिरश्वपर्णैः।
आ वर्षिष्ठया न इषा वयो न पप्तता सुमायाः ॥१॥

आ विद्युन्मत्ऽभिः मरुतः सुऽअर्कैः रथेभिः यात ऋष्टिमत्ऽभिः अश्वऽपर्णैः आ वर्षिष्ठया नः इषा वयः न पप्तत सुऽमायाः ॥

हे मरुतः, विद्युन्मद्भिः विद्युत् विद्योतनं तद्वद्भिः स्वर्कैः शोभनार्चनयुक्तैः (अर्कः अर्चनं स्तुतिः, दीप्तिरपि भवति) ऋष्टिमद्भिः आयुधयुक्तैः, दृष्टय एव ऋष्टय इति प्रागुपपादितम्, मारुतरथस्यापि दर्शनसामर्थ्यं वर्तत इति बोध्यम्। अश्वपर्णैः अश्वपतनसदृशवेगयुक्तैः, एवंभूतैः रथेभिः रथैः रंहणशीलैः यानैः आ यात आगच्छत। हे सुमायाः शोभनप्रज्ञोपेताः, नः अस्माकं वर्षिष्ठया प्रवृद्धया इषा प्रेरणशक्त्या सह वयो न पक्षिण इव आ पप्तत आपतत, शीघ्रमागच्छत॥ वर्षिष्ठया—वृद्धशब्दादिष्ठनि वर्षादेशः। पप्तत—पत्लृ गतौ, लुङि पतः पुमागमः॥

द्वितीयामृचमाह—

तेऽरुणेभिर्वरमा पिशङ्गैः शुभे कं यान्ति रथतूर्भिरश्वैः।
रुक्मो न चित्रः स्वधितीवान्पव्या रथस्य जङ्घनन्त भूमं ॥२॥

ते अरुणेभिः वरम् आ पिशङ्गैः शुभे कम् यान्ति रथतूःऽभिः अश्वैः रुक्मः न चित्रः स्वधितिऽवान् पव्या रथस्य जङ्घनन्त भूमं ॥

ते मरुतः अरुणेभिः अरुणकान्तियुक्तैः पिशङ्गैः पिङ्गलवर्णैः वर्णद्वयोपेतैः, अरुणवर्णः क्रियां प्रचण्डक्रियोद्योगश्च द्योतयितुं पिङ्गलवर्णः शुभप्रदत्वं चेति ज्ञेयम्। रथतूर्भिः रथस्य प्रेरयितृभिः अश्वैः तुरङ्गैः वरम् वरणीयं श्रेष्ठं शुभे शुभाय कम् सुखवर्षणात्मकमुदकं आयान्ति आगच्छन्ति, प्राप्नुवन्ति, तेषां गणः रुक्मो न रोचमानं सुवर्णमिव चित्रः दर्शनीयः स्वधितीवान् वज्रयुक्तः

शत्रुविघातार्थः, स्वधितिर्वज्रनाम । रथस्य पव्या चक्रधारया भूम भूमिं, यजमानशरीरं जङ्घनन्त अत्यर्थं हन्ति, जडस्य घनस्य शरीरस्य मार्दवापादनाय, एवंविधप्रहारः ऊर्ध्वतनशक्तिभिः प्रयुज्यते, तेन दिव्यतेजोबलाद्यवतरणं सोढुं प्रभवति यजमानस्य अन्नमयादिशरीरम् ॥ रथतूर्भिः- रथं तुरन्ति त्वरायुक्तं कुर्वन्ति रथतुरः, क्विप् । पव्या-पविः रथनेमिर्भवतीति यास्कः । जङ्घनन्त- हन्तेर्यङ्लुगन्तात् छान्दसो लङ् । भूम-भूमिशब्दादुत्तरस्यामः डादेशः, ह्रस्वः छान्दसः ॥

तृतीयामृचमाह—

श्रिये कं वो अधि तनूषु वाशीर्मेधा वना न कृणवन्त ऊर्ध्वा ।
युष्मभ्यं कं मरुतः सुजातास्तुविद्युम्नासो धनयन्ते अद्रिम् ॥३॥
श्रिये कम् वः अधि तनूषु वाशीः मेधा वना न कृणवन्ते ऊर्ध्वा
युष्मभ्यम् कम् मरुतः सुऽजाताः तुविऽद्युम्नासः धनयन्ते अद्रिम् ॥

हे मरुतः वः युष्माकं तनूषु अधि शरीरेषु अधिकरणे श्रिये शोभायै वाशीः (आयुधनाम स्थूलपक्षे) वाग्रूपाः शब्दाः वर्तन्त इति शेषः । कम् पदपूरणम् । तादृशा मरुतः वना न वनानि यथा चालयन्ति तथा मेधा अस्मदीयानि यजनानि चालयित्वा ऊर्ध्वा उच्छ्रितानि ऊर्ध्वगतिकानि कृणवन्ते कुर्वन्ति । हे सुजाताः, शोभनजन्मानः मरुतः, युष्मभ्यम् युष्मदर्थं कम् सुखकरं अद्रिम् सोमाभिषवग्रावाणं इन्द्रवज्रलक्षितदिव्यवाग्रूपं तुविद्युम्नासः प्रभूततेजस्काः यजमाना ऋषयः धनयन्ते धनमिव कुर्वन्ति संपादयन्तीत्यर्थः । ग्रावस्वरूपं अज्रः सवसूक्ते विचारितम् (१ मं. २८ सू.) ॥ मेधा-शसो डादेशः । धनयन्ते-धनशब्दात् तत् करोतीति णिच् ॥

चतुर्थीमृचमाह—

अहानि गृध्राः पर्या व आगुरिमां धियं वार्क्यां च देवीम् ।
ब्रह्म कृण्वन्तो गोतमासो अर्केरूर्ध्वं नुनुद्र उत्सधिं पिबध्यै ॥४॥
अहानि गृध्राः परि आ वः आ अगुः इमाम् धियम् वार्क्यार्याम् च देवीम्
ब्रह्म कृण्वन्तः गोतमासः अर्केः ऊर्ध्वम् नुनुद्रे उत्सऽधिम् पिबध्यै ॥

अस्यामृचि ऋषिर्गोतमः स्ववर्गीयानृषीन् श्रेष्ठान् चिद्रश्मिसम्पन्नान् 'गोतमान्' संबोध्याह । हे गृध्राः गृध्नवः सुखोदकामिकाङ्क्षिणः, वः युष्मान् अहानि दिनानि शोभनसुखभरितानि

पर्यागुः पुनरावर्तनेन प्राप्तानि। कारणमाह। इमाम् वाकार्याम् वाग्भिः ज्योतिर्बलादिसुखलक्षकैः उदकैः कार्यां निष्पाद्यां धियं च धीलक्षितां दृढप्रज्ञां च देवीम् द्योतमानां दिव्यां कुर्वन्तीति शेषः। एवं गोतमासः (वयं वा) ऋषयः अर्कैः दीप्तैः स्तोत्रैः साधनैः ब्रह्म हार्दवाग्रूपं मन्त्रं कृण्वन्तः कुर्वन्तः उत्सधिम् उत्सो जलप्रवाहः अस्मिन् धीयत इति उत्सधिः, तं कूपं पिबध्यै पानाय ऊर्ध्वं नुनुद्रे ऊर्ध्वं प्रेरितवन्तः, अत्र कूपस्य ऊर्ध्वप्रापणं रहस्यार्थगर्भितम्॥ अधस्ताज्जडे प्राणसहितान्नमयशरीरे निमग्नेन चैतन्येन सह तेजोबलादिलक्षणा आपः धीयन्ते। तस्मादुत्सधिः शरीरस्थप्राणशरीरं भवति। मरुतां प्राणमयान्तरिक्षसमुत्पन्नानां दिवि संचरतां बलवर्षणेन अधस्तात् स्थितस्य प्राणमयशरीरस्य ऊर्ध्वगमनाभिकाङ्क्षामूलका ऊर्ध्वगमनप्रेरणा ऊर्ध्वगमनं च सिध्यन्ति। मरुतः 'ऊर्ध्वं नुनुद्रे' इत्यत्र प्राक् व्याख्याते द्वे ऋचौ (१.८५.१०, ११) अनुसंधेये। गृध्राः-गृधु अभिकाङ्क्षायां, क्रन्प्रत्ययः। अगुः-एतेर्लुङ्। पिबध्यै-पा पाने, तुमर्थे शध्यैन्प्रत्ययः। अन्ये गताः॥

पञ्चमीमृचमाह—

एतत्यन्न योजनमचेति सस्वर्ह यन्मरुतो गोतमो वः।
पश्यन्हिरण्यचक्रानयोदंष्ट्रान्विधावतो वराहून् ॥५॥

एतत् त्यत् न योजनम् अचेति सस्वः ह यत् मरुतः गोतमः वः पश्यन् हिरण्यऽचक्रान् अयःऽदंष्ट्रान् विऽधावतः वराहून्॥

ऋचोऽस्या उत्तरस्याश्च तात्पर्यग्रहणे पूर्वेषां व्याख्यातृणां विप्रतिपत्तिर्भवति। तदत्र वक्ष्यमाणार्थस्य सुखबोधाय प्रथमं पदानामन्वयं ततः पदार्थं च ब्रूमः। "सस्वः" अन्तर्हितनाम, गुप्तं रहस्यमिति वा अर्थः। स्वृ शब्दोपतापयोरिति धातोर्निष्पन्नमिति मत्वा कथञ्चित् प्रक्रिया दत्ता सायणभाष्ये। "'सस्वर्ह' उच्चारितवान् खलु" इति क्रियापदत्वेन गृहीतं तत्र। नेदं साधु। अयमन्वयो भवति-"मरुतः!। गोतमः हिरण्यचक्रान् अयोदंष्ट्रान् विधावतः वराहून् वः पश्यन् यत् (प्राप) त्यत् न सस्वः ह एतत् योजनं अचेति"। हे मरुतः, गोतमः आत्मानमेव परोक्षेण निर्दिशति, इयं च ऋषीणां शैली, चिद्रश्मिसंपन्नानां श्रेष्ठ इति वा हिरण्यचक्रान् हिरण्मयचक्ररथारूढान् अयोदंष्ट्रान् अयोमयीभिः शत्रुघातकघोरदर्शन-आयुधस्थानीयाभिः दंष्ट्राभिर्युक्तान् विधावतः विविधं संचरतः वराहून् उत्कृष्टस्य शत्रोर्हन्तॄन्, अत्र बहुधा निर्वचनं

भवति सायणीये। अन्यत्र (१२१-११) "वराहुं वराहारं वृत्रमसुरं" इति सायण एव व्याचष्टे। वः एवंभूतान् युष्मान् पश्यन् प्रत्यक्षयन् यत् योजनं प्राप सस्वर्ह अन्तर्हितं खलु त्यत् चिराद् दृष्टं तत् योजनम् मन्त्राक्षराणां वर्णानुपूर्वीरूपं विन्यासात्मकं संयोजनं न संप्रति, नेति संप्रत्यर्थे (निरुक्तम्) एतत् लब्धमिदं सूक्तरूपं स्तोत्रं अचेति ज्ञातं भवति, मया तदेवेदमिति संप्रति प्रत्यभिज्ञायत इत्यर्थः। अत्र वेदनित्यत्व-ऋषिकर्तृकत्वयोर्नानुपपत्तिरिति यद् भूमिकायां प्रपञ्चितं (पृ. ४२-४३) तदनुसंधेयम्॥ इदमिह तात्पर्यं भवति—ऋषिर्गोतमः पूर्वं एतत्सूक्तस्थमन्त्रार्थान् ध्यानबलेन परमे व्योम्नि ददर्श। 'ऋचो अक्षरे परमे व्योमन्' इति हि प्रसिद्धिः। दृष्टानां मन्त्राणां वैखरीवाग्भुवि अवतरणे विलम्ब आसीत्, स्मृतिन्यूनताहेतोर्वा तद्वर्णानुपूर्वरूपं मन्त्राक्षरयोजनं कञ्चित्कालं न लब्धं, संप्रति तस्मिन् स्मृतिपथमागते प्रत्यभिज्ञातम्॥ अचेति—चिती संज्ञाने, कर्मणि लुङ्, लडर्थे छन्दसि॥

षष्ठीमृचमाह—

एषा स्या वो मरुतोऽनुभर्त्री प्रति ष्टोभति वाघतो न वाणी।
अस्तोभयद्वृथासामनु स्वधां गभस्त्योः ॥६॥

एषा स्या वः मरुतः अनुऽभर्त्री प्रति स्तोभति वाघतः न वाणी अस्तोभयत् वृथा आसाम् अनु स्वधाम् गभस्त्योः॥

इयमृक् बहुपदाध्याहारैः क्लिष्टकल्पनया कथञ्चित् पूर्वैराधुनिकैश्च व्याख्यायते। उत्तरार्धं वर्तत एव कष्टम्, तस्मादहमात्रमस्मदीयं व्याख्यानं 'आसा'मित्यादेः। हे मरुतः, एषा स्या सैषा पूर्वोक्तयोजनलक्षणा स्तुतिः न संप्रति वाघतः वाणी स्तोतुर्मम वाग्भूत्वा वः युष्माकं अनुभर्त्री अनुहर्त्री, युष्माननुहरन्ती युष्मद्गुणसदृशी प्रतिष्टोभति प्रत्येकं स्तौति। अपि च सा वाणी गभस्त्योः मरुद्गणस्य बाह्वोः स्वधाम् अनु स्वभावधारणसमर्थां शक्तिं (१.६.४) अनुलक्ष्य वृथा अनायासेन आसाम् आभिः ऋग्भिः अस्तोभयत् अस्तौत्॥ अनुभर्त्री—हृञ् हरणे, तृच्, हस्य भः छन्दसि॥

इति प्रथमस्य षष्ठे चतुर्दशो वर्गः

'आ नो भद्रा' इति दशर्चं पञ्चमं सूक्तं गोतमस्यार्षं वैश्वदेवम्। आदितः पञ्चर्चः सप्तमी च जगत्यः, षष्ठी विराट्स्थाना, अष्टम्याद्यास्तिस्रः त्रिष्टुभः॥

तत्र प्रथमामृचमाह—

आ नो भद्राः क्रतवो यन्तु विश्वतोऽदब्धासो अपरीतास उद्भिदः ।
देवा नो यथा सदमिद्वृधे असन्नप्रायुवो रक्षितारो दिवेदिवे ॥१॥
आ नः भद्राः क्रतवः यन्तु विश्वतः अदब्धासः अपरिऽइतासः उत्ऽभिदः
देवाः नः यथा सदम् इत् वृधे असन् अप्रऽआयुवः रक्षितारः दिवेऽदिवे ॥

नः अस्मान् क्रतवः प्राज्ञेच्छाबलभरितकर्मसमर्थाः शक्तयः विश्वतः विश्वस्मात् दैवाधीनात् प्रपञ्चात् आयन्तु आगच्छन्तु। कीदृशाः क्रतवः? भद्राः कल्याणाः अदब्धासः अन्यैरहिंसिताः दमनाक्षमाः अपरीतासः अपरिगताः अप्रतिरुद्धाः उद्भिदः उद्भेत्तारो विरोधिनां, ईदृशाः क्रतवः अस्मान् तथा प्राप्नुवन्तु यथा येन प्रकारेण देवाः सर्वेऽपि नः अस्माकं सदमित् सदैव वृधे वर्धनाय असन् भवन्तु। कीदृशाः देवाः? अप्रायुवः न प्रकर्षेण गच्छन्तः, अस्मान् परित्यज्य नापगच्छन्तः, दिवेदिवे रक्षितारः प्रत्यहं रक्षां कुर्वन्तः ॥ असन्—अस भुवि, लेट्यडागमः, शपो लुगभावः छान्दसः। अप्रायुवः—इण् गतौ, उण्प्रत्ययः ॥

द्वितीयामृचमाह—

देवानां भद्रा सुमतिर्ऋजूयतां देवानां रातिरभि नो नि वर्तताम् ।
देवानां सख्यमुप सेदिमा वयं देवा न आयुः प्र तिरन्तु जीवसे ॥२॥
देवानाम् भद्रा सुऽमतिः ऋजुऽयताम् देवानाम् रातिः अभि नः नि
वर्तताम् देवानाम् सख्यम् उप सेदिम वयम् देवाः नः आयुः प्र तिरन्तु
जीवसे ॥

भद्रा कल्याणी देवानां सुमतिः शोभना अनुग्रहात्मिका बुद्धिः अस्माकं अस्तु। ऋजूयताम् ऋजुं आर्जवयुक्तं देवोपासकं आत्मन इच्छतां तेषां देवानां रातिः दानं, प्रसाद इत्यर्थः नः अभि अस्मानाभिमुख्येन निवर्तताम् नितरां वर्तताम्, तेषाममीष्टदानं भवत्वस्माकम्। वयम् देवानाम् सख्यम् सखित्वं उपसेदिम प्राप्नुवाम। तादृशाः देवाः नः अस्माकं जीवसे जीवितुं आयुः प्रतिरन्तु वर्धयन्तु। ऋजूयताम्—सुप आत्मनः क्यच्। रातिः—रा दाने। सेदिम—वर्तमाने प्रार्थनायां लिट्, छान्दसम्। प्रतिरन्तु—प्रपूर्वस्तिरतिर्वर्धनार्थः ॥

तृतीयामृचमाह—

तान्पूर्वया निविदा हूमहे वयं भगं मित्रमदितिं दक्षमस्रिधम् ।
अर्यमणं वरुणं सोममश्विना सरस्वती नः सुभगा मयस्करत् ॥३॥

तान् पूर्वया निऽविदा हूमहे वयम् भगम् मित्रम् अदितिम् दक्षम् अस्रिधम् अर्यमणम् वरुणम् सोमम् अश्विना सरस्वती नः सुऽभगा मयः करत् ॥

तान् विश्वान् देवान् पूर्वया बहोः कालादागतया निविदा वेदवाचा, निविदिति वाङ्नाम, वयम् हूमहे आह्वयामः । कान् देवानिति विविच्यते । भगम् मित्रम् अदितिम् सर्वदेवमातरम् अस्रिधम् शोषणरहितं दक्षम् प्रजापतिं हिरण्यगर्भं मरुद्गणं वेति विकल्पेन सायण आह । "अदितेर्दक्षः दक्षाददितिः" इत्यन्यत्र श्रुतत्वात्, सर्वथा अदितिसंबन्धी दक्षः इति स्पष्टम् । अर्यमणम् वरुणम् सोमम् अश्विना अश्विनौ, एतानाह्वयामः । अस्माभिराहूता सरस्वती सुभगा शोभनैश्वर्योपेता नः अस्माकं मयः सुखं करत् करोतु ॥ हूमहे—ह्वेञो लटि बहुलं छन्दसीति संप्रसारणम् । अस्रिधम्—स्रिधु शोषणे, भावे क्विप् । करत्—करोतेर्लेटि अडागमः ॥

चतुर्थीमृचमाह—

तन्नो वातो मयोभु वातु भेषजं तन्माता पृथिवी तत्पिता द्यौः ।
तद्ग्रावाणः सोमसुतो मयोभुवस्तदश्विना शृणुतं धिष्ण्या युवम् ॥४॥

तत् नः वातः मयःऽभु वातु भेषजम् तत् माता पृथिवी तत् पिता द्यौः तत् ग्रावाणः सोमऽसुतः मयःऽभुवः तत् अश्विना शृणुतम् धिष्ण्या युवम् ॥

वातः वायुः तत् भेषजम् तद् दिव्यमौषधं नः अस्मान् वातु प्रापयतु यत् मयोभु मयसः सुखस्य भावयितृ । माता पृथिवी जननी भूमिरपि तत् भेषजं नः प्रापयतु, पिता द्यौः सर्वस्य पाता रक्षिता द्यौरपि तत् 'मयोभु भेषजम्' नः प्रापयतु । सोमसुतः सोमाभिषवं कुर्वन्तः अभिषवसाधनभूताः, अत एव मयोभुवः सुखस्य भावयितारः ग्रावाणः उक्तदिव्यलक्षणाः तत् भेषजं नः प्रापयन्तु । धिष्ण्या धारयितारौ, धिषणया युक्तौ, तत्र भवौ हे अश्विना अश्विनौ

देवमिषजौ युवम् युवां तत् शृणुतम् आकर्णयतं, अस्मत्प्रार्थनानुकूलं जानीतम्॥ वातु–वा गति-गन्धनयोः, अन्तर्भावितण्यर्थः। धिष्ण्या–धिषणाशब्दादर्हार्थे भवार्थे वा छन्दसि यः॥

पञ्चमीमृचमाह—

तमीशानं जगतस्तस्थुषस्पतिं धियञ्जिन्वमवसे हूमहे वयम्।
पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये ॥५॥
तम् ईशानम् जगतः तस्थुषः पतिम् धियम्ऽजिन्वम् अवसे हूमहे वयम् पूषा नः यथा वेदसाम् असत् वृधे रक्षिता पायुः अदब्धः स्वस्तये॥

पूर्वार्धेनेन्द्रः अपरार्धेन पूषा स्तुतौ इति सायणः। सर्वेश्वर एव स्तूयत इति चेत् न कापि क्षतिः। तम् तच्छब्दवाच्यं ईशानम् ईश्वरं धियञ्जिन्वम् बुद्धिं प्रकाशदानेन प्रीणयन्तं जगतः जङ्गमस्य तस्थुषः स्थावरस्य च पतिम् पालकं अवसे रक्षणाय वयम् हूमहे आह्वयामः। सः ईश्वरः पूषा पूषा देवः सन् यथा येन प्रकारेण नः अस्माकं वेदसाम् ज्ञानानां (धनानां वा) वृधे वर्धनाय रक्षिता असत् भवति तथा स्वस्तये अविनाशाय अदब्धः अन्यैरहिंसितः, अप्रतिबद्धः इत्यर्थः सन् पायुः रक्षिता भवतु॥ धियञ्जिन्वम्–जिविः प्रीणनार्थः। असत्–लेटि अडागमः। पायुः–पा रक्षणे। स्वस्ति–सुपूर्वादस्तेर्भावे क्तिन्॥

इति प्रथमस्य षष्ठे पञ्चवशो वर्गः

षष्ठीमृचमाह—

स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥६॥
स्वस्ति नः इन्द्रः वृद्धऽश्रवाः स्वस्ति नः पूषा विश्वऽवेदाः स्वस्ति नः तार्क्ष्यः अरिष्टऽनेमिः स्वस्ति नः बृहस्पतिः दधातु॥

वृद्धश्रवाः वृद्धं भूरि श्रवः श्रवणं यस्य सः इन्द्रः नः अस्माकं स्वस्ति अविनाशं दधातु विदधातु। विश्ववेदाः विश्वज्ञानोपेतः पूषा पोषको देवः नः स्वस्ति विदधातु। अरिष्टनेमिः अरिष्टः अहिंसितः नेमिः रथचक्रधारा यस्य सः तार्क्ष्यः गरुत्मान्, तृक्षस्य जगत्पतेः (कश्यपस्य

प्रजापतेरिति पुराणानि) अपत्यं तार्क्ष्यः, प्रभातसूर्यरश्मिविशेषः अत एव अरुणवाही गरुत्मान् स्वस्ति नः विदधातु । बृहस्पतिः नः स्वस्ति विदधातु, करोत्वित्यर्थः ॥

सप्तमीमृचमाह—

पृषदश्वा मरुतः पृश्निमातरः शुभंयावानो विदथेषु जग्मयः ।
अग्निजिह्वा मनवः सूरचक्षसो विश्वे नो देवा अवसा गमन्निह ॥७॥
पृषत्ऽअश्वाः मरुतः पृश्निऽमातरः शुभम्ऽयावानः विदथेषु जग्मयः
अग्निऽजिह्वाः मनवः सूरऽचक्षसः विश्वे नः देवाः अवसा आ गमन् इह ॥

पृषदश्वाः पृषद्भिः शुभ्रबिन्दुभिर्युक्ता अश्वा वाहा येषां ते पृश्निमातरः पृश्निश्चित्रा गौरदितिर्माता येषां ते शुभंयावानः शोभनं यान्ति, शोभनगतय इत्यर्थः, विदथेषु ज्ञानागमस्थानेषु अन्तर्यजनेषु जग्मयः गन्तारः अग्निजिह्वाः अग्निमुखाः, अग्निर्हि देवानां मुखं, तस्य द्वारेण यजमानीयं सर्वं अर्पणं गृह्णन्ति सर्वे देवाः । मन्नवः मन्तारः ज्ञातारः सूरचक्षसः सूर्यप्रकाश इव प्रकाशो येषां ते, एवंभूताः विश्वे सर्वेऽपि देवाः मरुतः नः अस्मान् इह अत्र अवसा रक्षणेन सह आगमन् आगच्छन्तु । पृषदश्वाः गुप्तार्थानुसारेण व्याख्याताः, तथा पृश्निमातरश्च ॥ शुभंयावानः—या प्रापणे, आतो मनिन्निति वनिप्, तत्पुरुषे कृति बहुलमिति द्वितीयाया अलुक् । गमन्—गमेः प्रार्थनायां लेटि अडागमः ॥

अष्टमीमृचमाह—

भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः ॥८॥
भद्रम् कर्णेभिः शृणुयाम देवाः भद्रम् पश्येम अक्षऽभिः यजत्राः स्थिरैः
अङ्गैः तुष्टुऽवांसः तनूभिः वि अशेम देवऽहितम् यत् आयुः ॥

हे देवाः, कर्णेभिः श्रोत्रैः भद्रम् कल्याणं शृणुयाम श्रोतुं समर्थाः स्याम युष्मदनुग्रहात् हे यजत्राः, यष्टव्याः, पूजयितव्याः, अक्षभिः अक्षिभिः भद्रम् कल्याणं पश्येम द्रष्टुं प्रभवाम । अत्रेदमवधेयम् । यत् प्रथमसूक्ते भद्रपदमधिकृत्य विचार्योपपादितं 'सर्वथा भद्रपदं अशुभ-

अनृतज्ञानजन्य-दुरित-प्रतिद्वन्द्वित्वेन प्रयुज्यते वेदे' इति। स्थिरैः दृढैः अङ्गैः करचरणाद्यवयवैः तनूभिः शरीरैश्च युक्ता वयं तुष्टुवांसः युष्मान् स्तुवन्तः देवहितम् देवैर्विहितं यत् आयुः यदायुर्मानं भवति तत् व्यशेम प्राप्नुयाम, तस्योपभोक्तारः स्याम ॥ कर्णेभिः-भिस ऐसभावः। अक्षभिः-छन्दसि अनङ्। यजत्राः-यजेरत्रन्प्रत्ययः। तुष्टुवांसः-ष्टुञ् स्तुतौ, लिटः क्वसुः। अशेम-लिङि आशिष्यङ् ॥

नवमीमृचमाह—

शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम्।
पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः ॥९॥

शतम् इत् नु शरदः अन्ति देवाः यत्र नः चक्र जरसम् तनूनाम् पुत्रासः यत्र पितरः भवन्ति मा नः मध्या रिरिषत आयुः गन्तोः ॥

हे देवाः, अन्ति अन्तिके युष्माकं समीपे, मनुष्याणां शरदः संवत्सराः शतमिन्नु शतं खलु। सामान्याभिप्रायेणेदं शतमायुर्मानमिति। शतमानं भवतीति यजुर्वाक्यादनन्तरवाक्ये श्रूयते च "अथो खलु, यावतीः समा एष्यन् मन्येत तावदेव मानं स्यात्" इति। तस्मात् नः अस्माकं आयुः गन्तोः आयुषो गमनात् पूर्वं मध्या मध्ये मा रिरिषत मा हिंसिष्ट। यत्र क्लृप्तस्य आयुषोऽवस्थाविशेषे तनूनाम् शरीराणां जरसम् जरां चक्र कृतवन्तः यूयं, यत्र आयुषि पुत्रासः पुत्राः पितरः अपत्यजनकत्वात् स्वयं पितरो भवन्ति॥ अन्ति-अन्तिकशब्दस्य कलोपः। जरसम्-जराया जरसादेशः। मध्या-सप्तम्या डादेशः। रीरिषत-रिष हिंसायाम्, अस्मात् ण्यन्तात् यङ्लुङि मध्यमबहुवचनम् ॥

दशमीमृचमाह—

अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः।
विश्वे देवा अदितिः पञ्च जना अदितिर्जातमदितिर्जनित्वम् ॥१०॥

अदितिः द्यौः अदितिः अन्तरिक्षम् अदितिः माता सः पिता सः पुत्रः विश्वे देवाः अदितिः पञ्च जनाः अदितिः जातम् अदितिः जनित्वम् ॥

अखण्डस्वरूपाया देवमातुरदितेः सर्वात्मकत्वमस्यां स्तूयते। अदितिः द्यौः द्युलोकः

अदितिः अन्तरिक्षम् मध्यमो भुवर्लोकः अदितिः माता पृथिवी जननी, सः सैव पिता जनकः सः सैव पुत्रः मातापित्रोर्जातः सैव विश्वे सर्वेऽपि देवाः, अदितिः सैव पञ्च जनाः पञ्चजनानधिकृत्य मतभेदा भूमिकायां उक्ताः (पु. ५७)। अन्नमयाद्यानन्दमयान्तेषु लोकेषु जाताः वर्तमाना जनाः पञ्चजना इति रहस्यपक्षः। अदितिः सैव जातम् उत्पन्नं सर्वं अदितिः सैव जनित्वम् जन्माधिकरणम् ॥ जनित्वम्-जनेरौणादिकस्त्वन्प्रत्ययः ॥

इति प्रथमस्य षष्ठे षोडशो वर्गः

'ऋजुनीती'ति नवर्चं षष्ठं सूक्तम्, बहुदेवताकं अतो वैश्वदेवम्, गायत्रं अन्त्या अनुष्टुप्॥

तत्र प्रथमामृचमाह—

ऋजुनीती नो वरुणो मित्रो नयतु विद्वान्। अर्यमा देवैः सजोषाः ॥१॥
ऋजुऽनीती नः वरुणः मित्रः नयतु विद्वान् अर्यमा देवैः सऽजोषाः ॥

ऋजुनीती ऋजुना कौटिल्यशून्येन नयनेन नेतव्यमुत्तमं स्थानं प्रति प्रापणेन नः अस्मान् मित्रः तथा वरुणः देवश्च विद्वान् उत्तमं पदं जानन् नयतु प्रापयतु। तथा देवैः इन्द्रादिभिः सजोषाः समानप्रीतिः अर्यमा देवश्चास्मान् नेतव्यं नयतु ॥ ऋजुनीती—तृतीयायाः पूर्वसवर्णदीर्घत्वम् ॥

द्वितीयामृचमाह—

ते हि वस्वो वसवानास्ते अप्रमूरा महोभिः। व्रता रक्षन्ते विश्वाहा ॥२॥
ते हि वस्वः वसवानाः ते अप्रऽमूराः महःऽभिः व्रता रक्षन्ते विश्वाहा ॥

ते हि पूर्वोक्ता मित्रादयः खलु वस्वः सर्वावासाधारभूतस्य द्रव्यस्य वसवानाः वासयितारः आच्छादकाः स्वयं आत्मना आवरीतार इत्यर्थः। ते देवाः अप्रमूराः अप्रमूढाः अमूर्च्छिताः प्राज्ञाः अत एव महोभिः स्वीयैः ज्योतिर्भिः विश्वाहा सर्वेष्वहस्सु इत्यर्थे निपातः, सर्वदेत्यर्थः व्रता व्रतानि नियतानि दैव्यानि कर्माणि, तदनुरूपाण्यस्मदीयानि च रक्षन्ते पालयन्ति ॥ वसवानाः—वस आच्छादने, अस्मादन्तर्भावितण्यर्थात् शानच्। अप्रमूराः—मूर्च्छा मोहसमुच्छ्रायोः, अस्मात् क्विप्, राल्लोप इति ककारलोपः। रक्षन्ते—व्यत्ययेन तङ् ॥

तृतीयामृचमाह—

ते अस्मभ्यं शर्म यंसन्नमृता मर्त्येभ्यः । बाधमाना अप द्विषः ॥३॥
ते अस्मभ्यं शर्म यंसन् अमृताः मर्त्येभ्यः बाधमानाः अप द्विषः ॥

अमृताः अमरणधर्माणः ते सर्वे देवाः मर्त्येभ्यः मरणधर्मभ्यः अस्मभ्यम् शर्म सुखं अमृतलक्षणं यंसन् यच्छन्तु ददतु । कीदृशाः? द्विषः पापलक्षणान् शत्रून् अप बाधमानाः विनष्टिं प्रापयन्तः सन्तः ॥ यंसन्—यम उपरमे, लेटि अडागमः ॥

चतुर्थीमृचमाह—

वि नः पथः सुवितायं चियन्त्विन्द्रो मरुतः । पूषा भगो वन्द्यासः ॥४॥
वि नः पथः सुवितायं चियन्तु इन्द्रः मरुतः पूषा भगः वन्द्यासः ॥

वन्द्यासः वन्दनीयाः इन्द्रादयो वक्ष्यमाणा देवाः नः अस्माकं पथः मार्गान् उत्तमस्थानप्रापकान् विचियन्तु विचिन्वन्तु सम्पादयन्त्वित्यर्थः । किमर्थम्? सुविताय दुरितप्रतिद्वन्द्विने भद्रपदवाच्याय उत्तमकल्याणाय । के देवाः? इन्द्रः मरुतः पूषा भगः च ॥ सुविताय—इण् गतौ, कर्मणि निष्ठा, सोः उवङ् छन्दसि । चियन्तु—चिञ् चयने, विकरणस्य लुक्, इयङ्, पादादित्वान्निघाताभावः ॥

पञ्चमीमृचमाह—

उत नो धियो गोअग्राः पूषन्विष्णवेवयावः । कर्ता नः स्वस्तिमतः ॥५॥
उत नः धियः गोऽअग्राः पूषन् विष्णो इति एवऽयावः कर्त नः स्वस्तिऽमतः ॥

हे पूषन् पोषक देव, हे विष्णो व्यापक, हे एवयावः मरुद्गण, यद्वा एवयामरुत् विष्णुरेव भवति, एवैः गन्तृभिः अश्वैः यातीति एवयावा तस्यामन्त्रणम् । सर्वे यूयं नः अस्माकं धियः धारणवतीः प्रज्ञाः गोअग्राः चित्किरणाग्राः चिद्रश्मिपुरस्सरा इत्यर्थः, कर्त कुरुत । उत अपि च नः अस्मान् स्वस्तिमतः अविनाशिनः कुरुत ॥ एवयावः—इण् गतौ, अस्माद्वनिप्रत्ययः, अस्मिन् उपपदे या प्रापणे इत्यस्मात् वनिप्, संबुद्धौ वकारस्य रुत्वम् ॥

इति प्रथमस्य षष्ठे सप्तदशो वर्गः

अथ मधुपर्कतृचम्। तृचे प्रथमां सूक्ते षष्ठीमृचमाह—

मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः। माध्वीर्नः सन्त्वोषधीः ॥६॥
मधु वाताः ऋतऽयते मधु क्षरन्ति सिन्धवः माध्वीः नः सन्तु ओषधीः ॥

ऋतायते ऋतं सत्यमात्मन इच्छते अन्तर्यजनशालिने पुरुषाय वाताः वायवः मधु सर्वान्तरवर्त्ति गूढं रसात्मकं अमृतं क्षरन्ति वर्षन्ति। सिन्धवः स्यन्दनशीला नद्य आपः मधु क्षरन्ति। नः अस्माकं ओषधीः पृथिवीसारभूताः पृथिवीरुहः माध्वीः उक्तलक्षणमधुभरिताः सन्तु भवन्तु। सृष्टौ सर्वस्मादपि वस्तुजातात् मधु गृहीत्वा तत्सम्पन्नाः स्यामेत्यर्थः ॥ ईदृशीर्ऋचः आधारीकृत्य औपनिषदं मधुब्राह्मणमुपदिष्टम् ॥ ऋतायते—सुप आत्मनः क्यच्। माध्वीः—मधोरञ् चेति मत्वर्थीयोऽञ्प्रत्ययः, अञि यणादेशो निपात्यते ॥

तृचे द्वितीयां सूक्ते सप्तमीमृचमाह—

मधु नक्तमुतोषसो मधुमत्पार्थिवं रजः। मधु द्यौरस्तु नः पिता ॥७॥
मधु नक्तम् उत उषसः मधुऽमत् पार्थिवं रजः मधु द्यौः अस्तु नः पिता ॥

नक्तम् रात्रिः नः अस्माकं मधु उक्तलक्षणं अमृतमुखं अस्तु भवतु। उत अपि च उषसः प्रभातवेलाः मधुभरिता भवन्तु। पार्थिवम् रजः पृथिव्याः संबन्धी लोकः मधुमत् मधुमान् भवतु। द्यौः पिता सर्वस्य पालको द्युलोकश्च मधु भवतु ॥ रजः—रजःशब्दो लोकवाची ॥

तृचे तृतीयां सूक्ते अष्टमीमृचमाह—

मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः। माध्वीर्गावो भवन्तु नः ॥८॥
मधुऽमान् नः वनस्पतिः मधुऽमान् अस्तु सूर्यः माध्वीः गावः भवन्तु नः ॥

नः अस्माकं वनस्पतिः वनानां पालयिता देवः, वृक्षजातिर्वा मधुमान् मधुयुक्तः अस्तु भवतु, सूर्यः देवः मधुमान् अस्तु। नः अस्माकं गावः बाह्यपक्षे पशवः प्रसिद्धाः, चिन्मरीचयः माध्वीः मधुयुक्ताः भवन्तु ॥

नवमीमृचमाह—

शं नो मित्रः शं वरुणः शं नो भवत्वर्यमा ।
शं न इन्द्रो बृहस्पतिः शं नो विष्णुरुरुक्रमः ॥९॥

शम् नः मित्रः शम् वरुणः शम् नः भवतु अर्यमा शम् नः इन्द्रः बृहस्पतिः शम् नः विष्णुः उरुऽक्रमः ॥

मित्रः देवः नः अस्माकं शम् शान्तिमयसुखकरः भवतु । तथा वरुणः शम् भवतु । नः अर्यमा देवश्च शम् भवतु इन्द्रः देवः नः शम् भवतु । तथा बृहस्पतिः च । उरुक्रमः उरु विस्तीर्णं क्रामति सर्वं जगदाक्रामतीति उरुक्रमः विष्णुः व्यापनशीलः आदित्यात्मा नः अस्माकं शम् शान्तिमयसुखकरो भवतु ॥

इति प्रथमस्य षष्ठेऽष्टादशो वर्गः

'त्वं सोमे'ति त्रयोविंशत्यृचं सप्तमं सूक्तम् । गोतमस्यार्षं सोमदेवताकं पञ्चम्याद्याः षोडशान्त्याः द्वादशर्चो गायत्र्यः सप्तदशी उष्णिक् शिष्टा दश त्रिष्टुभः ॥

तत्र प्रथमामृचमाह—

त्वं सोम प्र चिकितो मनीषा त्वं रजिष्ठमनु नेषि पन्थाम् ।
तव प्रणीती पितरो न इन्दो देवेषु रत्नमभजन्त धीराः ॥१॥

त्वम् सोम प्र चिकितः मनीषा त्वम् रजिष्ठम् अनु नेषि पन्थाम् तव प्रऽनीती पितरः नः इन्दो इति देवेषु रत्नम् अभजन्त धीराः ॥

हे सोम, त्वम् मनीषा मनीषया अस्मदीयया बुद्धया प्रचिकितः प्रकर्षेण ज्ञातोऽसि, ज्ञात्वैवेदं ब्रूमः । त्वम् रजिष्ठम् ऋजुतमं पन्थाम् पन्थानं दिव्यं मार्गं अनुनेषि अस्मान् अनुक्रमेण सोपानक्रमेण, न तु हठात्, प्रापयसि । अपि च हे इन्दो उन्दनशील, विश्वममृतेन स्वीयेन रसेन क्लेदयितः, तव प्रणीती प्रणीत्या प्रकृष्टनयनेन धीराः धीयुक्ताः प्राज्ञाः नः पितरः अस्माकं पूर्वे पुरुषा ऋषयः देवेषु इन्द्रादिषु मध्ये रत्नम् अभजन्त रमणीयं, सर्वं स्वीयं भागं असेवन्त, प्राप्नुवन् ॥ प्रचिकितः—कित ज्ञाने, कर्मणि निष्ठा, छान्दसं द्विर्वचनम् । रजिष्ठम्—ऋजुशब्दादिष्ठन्, ऋजोः छन्दसि रत्वम् । नेषि—नयतेर्लटि छन्दसि शपो लुक् ॥

द्वितीयामृचमाह—

त्वं सोम क्रतुभिः सुक्रतुर्भूस्त्वं दक्षैः सुदक्षो विश्ववेदाः ।
त्वं वृषा वृषत्वेभिर्महित्वा द्युम्नेभिर्द्युम्न्यभवो नृचक्षाः ॥ २॥

त्वम् सोम क्रतुऽभिः सुऽक्रतुः भूः त्वम् दक्षैः सुऽदक्षः विश्वऽवेदाः त्वम् वृषा वृषऽत्वेभिः महिऽत्वा द्युम्नेभिः द्युम्नी अभवः नृऽचक्षाः ॥

हे सोम, त्वम् क्रतुभिः क्रियासमर्थैः स्वीयैर्ज्ञानैः सुक्रतुः शोभनप्राज्ञकर्मा भूः भवसि । त्वम् दक्षैः सदसद्विवेकसमर्थैर्बलैः सुदक्षः तादृशशोभनबलो भवसि । विश्ववेदाः विश्वस्य वेदिता त्वम् वृषत्वेभिः वृषत्वैः सेचनसामर्थ्यैः वृषा वर्षिता स्वीयस्य रसस्य, यजमानस्याभीष्टानां वा महित्वा महत्त्वेन, महिम्ना च त्वं वृषा । द्युम्नेभिः द्योतनैः द्युम्नी द्योतवान् त्वं नृचक्षाः नेतॄणां बलवतां यजमानानां दर्शयिता दिव्यस्य मार्गस्य अभवः ॥

तृतीयामृचमाह—

राज्ञो नु ते वरुणस्य व्रतानि बृहद्गभीरं तव सोम धाम ।
शुचिष्ट्वमसि प्रियो न मित्रो दक्षाय्यो अर्यमेवासि सोम ॥ ३॥

राज्ञः नु ते वरुणस्य व्रतानि बृहत् गभीरम् तव सोम धाम शुचिः त्वम् असि प्रियः न मित्रः दक्षाय्यः अर्यमाऽइव असि सोम ॥

राज्ञो वरुणस्य नु राजमानस्य वरुणस्येव, नु उपमार्थे (निरुक्तम्) ते तव व्रतानि नियतानि दैव्यानि कर्माणि भवन्ति । हे सोम, तव धाम त्वदीयं तेजः बृहत् महद्विस्तीर्णं गभीरम् गाम्भीर्योपेतं च भवति । हे सोम, त्वम् शुचिः शोधकः मित्रो न मित्रो देव इव प्रियः असि प्रीतिकरो भवसि सर्वेषाम् । अपि च अर्यमा इव अर्यमा देव इव दक्षाय्यः ऋतानृतविवेचनपटुः असि ॥ दक्षाय्यः—दक्षेः आय्यप्रत्ययः ॥

चतुर्थीमृचमाह—

या ते धामानि दिवि या पृथिव्यां या पर्वतेष्वोषधीष्वप्सु ।
तेभिर्नो विश्वैः सुमना अहेळन्राजन्त्सोम प्रति हव्या गृभाय ॥ ४॥

या ते धामानि दिवि या पृथिव्याम् या पर्वतेषु ओषधीषु अप्ऽसु तेभिः
नः विश्वैः सुऽमनाः अहेळन् राजन् सोम प्रति हव्या गृभाय ॥

हे सोम, ते तव या यानि धामानि तेजांसि दिवि द्युलोके वर्तन्ते, या यानि पृथिव्याम् पृथिवीस्थाने या यानि पर्वतेषु ओषधीषु अप्सु पर्वतादिषु च वर्तन्ते तेभिः विश्वैः तैः सर्वैः तेजोभिः प्रभावैर्युक्तः सुमनाः शोभनमनस्कः अहेळन् अक्रुध्यन् प्रसन्नः सन्नित्यर्थः हे राजन् सोम, राजमान सोमदेव, नः हव्या अस्माभिरर्पितानि सर्वाणि प्रतिगृभाय प्रतिगृहाण ॥ या–यानि, शेर्लोपः छन्दसि। गृभाय–ग्रह उपादाने, छन्दसि श्नाप्रत्ययस्य शायजादेशः ॥

पञ्चमीमृचमाह—

त्वं सोमासि सत्पतिस्त्वं राजोत वृत्रहा। त्वं भद्रो असि क्रतुः ॥५॥
त्वम् सोम असि सत्ऽपतिः त्वम् राजा उत वृत्रऽहा। त्वम् भद्रः असि क्रतुः ॥

हे सोम, त्वम् सत्पतिरसि सतो वस्तुजातस्य सर्वस्याधिपतिरसि। उत अपि च राजा राजमानः त्वम् वृत्रहा वृत्रमावरकं सर्वं तमोऽसुरं वा हन्तीति वृत्रहा। त्वम् भद्रः शोभनः क्रतुरसि प्राज्ञकर्मरूपश्च भवसि ॥

इति प्रथमस्य षष्ठ एकोनविंशो वर्गः

षष्ठीमृचमाह—

त्वं च सोम नो वशो जीवातुं न मरामहे। प्रियस्तोत्रो वनस्पतिः ॥६॥
त्वम् च सोम नः वशः जीवातुम् न मरामहे प्रियऽस्तोत्रः वनस्पतिः ॥

हे सोम, नः अस्माकं जीवातुम् जीवनौषधं त्वम् च त्वं चेत् वशः कामयेथाः, तदा वयम् न मरामहे न म्रियामहे, अमृता भवामः। त्वं प्रियस्तोत्रः प्रियाणि स्तोत्राणि यस्य सः, यमुद्दिश्य प्रीत्या बहूनि स्तोत्राणि प्रवर्तन्ते महर्षीणामित्यर्थः। वनस्पतिः ओषधीशः वनानां पतिरिति बाह्यः पक्षः। वनस्य वननीयस्य रसस्यानन्दस्य पतिरिति रहस्यम् ॥ त्वं चेति चशब्दः चेदर्थे निपातितः। वशः–वश कान्तौ, लेटि सिप्यडागमः। जीवातुम्–जीवेरातुः। मरामहे–मृङ् प्राणत्यागे, व्यत्ययेन शप् ॥

सप्तमीमृचमाह—

त्वं सोम महे भगं त्वं यून ऋतायते। दक्षं दधासि जीवसे ॥७॥
त्वम् सोम महे भगम् त्वम् यूने ऋतऽयते दक्षम् दधासि जीवसे ॥

हे सोम, त्वम् ऋतायते ऋतं सत्यं सत्यधर्मं वा आत्मन इच्छते महे महते, तपसा वृद्धाय पुरुषाय भगम् भजनीयं सुखं दधासि विदधासि। त्वम् ऋतायते यूने तरुणाय जीवसे चिरकालं जीवितुं दक्षम् युक्तायुक्तविवेकसामर्थ्यं विदधासि ॥

अष्टमीमृचमाह—

त्वं नः सोम विश्वतो रक्षा राजन्नघायतः। न रिष्येत्त्वावतः सखा ॥८॥
त्वम् नः सोम विश्वतः रक्ष राजन् अघऽयतः न रिष्येत् त्वाऽवतः सखा ॥

हे सोम, राजन्, त्वम् अघायतः पापं अस्माकं कर्तुं इच्छतः विश्वतः सर्वस्मादपि पुरुषात् अदैव्यात् मनुष्यादसुराद्वा नः रक्ष अस्मान् पालय। त्वावतः त्वत्सदृशस्य सखा सख्यं प्राप्तो मादृशः न रिष्येत् न विनश्येत् ॥ अघायतः—छन्दसि परेच्छायामपि क्यच्। त्वावतः—छन्दसि सादृश्य उपसंख्यानमिति वतुप् ॥

नवमीमृचमाह—

सोम यास्ते मयोभुव ऊतयः सन्ति दाशुषे। ताभिर्नोऽविता भव ॥९॥
सोम याः ते मयःऽभुवः ऊतयः सन्ति दाशुषे ताभिः नः अविता भव ॥

हे सोम, ते तुभ्यं दाशुषे यथाभागं दत्तवते यजमानाय याः त्वदीयाः मयोभुवः सुखस्य भावयित्र्यः ऊतयः रक्षाः वृद्धिकृतः सन्ति, ताभिः ऊतिभिः नः अस्माकं अविता वर्धयिता भव ॥

दशमीमृचमाह—

इमं यज्ञमिदं वचो जुजुषाण उपागहि। सोम त्वं नो वृधे भव ॥१०॥
इमम् यज्ञम् इदम् वचः जुजुषाणः उपऽआगहि सोम त्वम् नः वृधे भव ॥

हे सोम, त्वम् इमम् यज्ञम् अस्मदीयं यजनं इदम् वचः इदानीमुच्चार्यमाणं मन्त्रात्मकं स्तोत्रं च जुजुषाणः प्रीत्या सेवमानः सन् उपागहि उपागच्छ। नः अस्माकं वृधे वृद्धये भव कल्पस्व ॥ जुजुषाणः—जुषी प्रीतिसेवनयोः, छन्दसि लिटः कानच् ॥

इति प्रथमस्य षष्ठे विंशो वर्गः

एकादशीमृचमाह—

सोम गीर्भिष्ट्वा वयं वर्धयामो वचोविदः। सुमृळीको न आ विश ॥११॥
सोम गीःऽभिः त्वा वयम् वर्धयामः वचःऽविदः सुऽमृळीकः नः आ विश ॥

हे सोम, त्वा त्वां वचोविदः मन्त्रलक्षणस्य वचसो वेदितारः वयम् गीर्भिः स्तुतिभिर्वाग्भिः वर्धयामः, स्तुत्या हि देवता वर्धते। नः अस्माकं सुमृळीकः शोभनसुखकरः आविश आगच्छ, अस्माकमन्तराविष्टो भवेत्यर्थः ॥ सुमृळीकः—मृड सुखने, अस्माद्भावे कीकन्प्रत्ययः ॥

द्वादशीमृचमाह—

गयस्फानो अमीवहा वसुवित्पुष्टिवर्धनः। सुमित्रः सोम नो भव ॥१२॥
गयऽस्फानः अमीवऽहा वसुऽवित् पुष्टिऽवर्धनः सुऽमित्रः सोम नः भव ॥

गयस्फानः गय इति धननामेति सायणः, गृहेऽपि वर्तते, गयो गमनं गतिरिति व्याख्यातम् (१.७४.२), गमनस्य दिव्ययात्रात्मकस्य वर्धयिता प्रोद्बलयितेत्यर्थः अमीवहा अमीवानां रोगाणां हन्ता वसुवित् धनस्य सर्वस्यापि वेदिता पुष्टिवर्धनः पोषणस्य वर्धयिता सुमित्रः शोभनानि मित्राणि सुहृदो यस्य सः, हे सोम, नः अस्माकं एवंविधः भव ॥ गयस्फानः—स्फायी वृद्धौ, अस्मादन्तर्भावितण्यर्थात् ल्युटि व्यत्ययेन यलोपः ॥

त्रयोदशीमृचमाह—

सोम रारन्धि नो हृदि गावो न यवसेष्वा। मर्यं इव स्व ओक्ये ॥१३॥
सोम ररन्धि नः हृदि गावः न यवसेषु आ मर्यःऽइव स्वे ओक्ये ॥

हे सोम, नः हृदि अस्मदीये हृदये ररन्धि रमस्व। तत्र द्वौ दृष्टान्तौ भवतः—गावो न यवसेषु आ यथा गावः शोभनतृणेषु आभिमुख्येन रमन्ते, अपि च मर्य इव स्वे ओक्ये यथा वा मनुष्यः स्वीये ओकसि गृहे स्वीयैः सह रमते तद्वत् ॥ ररन्धि—रमु क्रीडायाम्, व्यत्ययेन

परस्मैपदम्, शपः श्लुः हेर्धिश्च छान्दसौ। ओक्ये-उच समवाये, उच्यते समवेयते प्राप्यत इत्योक्यं गृहम् ॥

चतुर्दशीमृचमाह—

यः सोम सख्ये तव रारणद्देव मर्त्यः। तं दक्षः सचते कविः ॥१४॥
यः सोम सख्ये तव ररणत् देव मर्त्यः तम् दक्षः सचते कविः ॥

हे सोम, देव, द्योतमान, तव सख्ये सखित्वे निमित्तभूते यः मर्त्यः मनुष्यः ररणत् त्वां रणति स्तौति, तम् त्वदीयसख्यलिप्सुं पुरुषं दक्षः विवेचनपटुः कविः सत्यस्य द्रष्टा त्वम् सचते सचसे सेवसे, व्यत्ययेन प्रथमपुरुषः, अनुगृह्णासीत्यर्थः ॥ ररणत्-रण शब्दे, लेट्यडागमः, शपः श्लुः ॥

पञ्चदशीमृचमाह—

उरुष्या णो अभिशस्तेः सोम नि पाह्यंहसः। सखा सुशेव एधि नः ॥१५॥
उरुष्य नः अभिऽशस्तेः सोम नि पाहि अंहसः सखा सुऽशेवः एधि नः ॥

हे सोम, त्वम् नः अस्मान् अंहसः पाप्मनः अभिशस्तेः अभिशंसनात् आहतेरित्यर्थः उरुष्य रक्ष, उरुष्यतिः रक्षाकर्मा। तथा पापाभिघाताद्रक्षित्वा नि पाहि सर्वथा नितरां पालय। नः अस्मदर्थं सुशेवः शोभनसुखोपेतः सखा एधि सुहृद् भव ॥ एधि-अस भुवि, लोटि सेर्हिः, सकारस्य एत्वं, हेर्धिरादेशः ॥

इति प्रथमस्य षष्ठ एकविंशो वर्गः

षोडशीमृचमाह—

आ प्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम्। भवा वाजस्य सङ्गथे ॥१६॥
आ प्यायस्व सम् एतु ते विश्वतः सोम वृष्ण्यम् भव वाजस्य सम्ऽगथे ॥

हे सोम, आप्यायस्व वर्धस्व, ते तव वृष्ण्यम् वृषत्वं अभीष्टतेजोबलानन्दादिवर्षणसामर्थ्यं विश्वतः सर्वतः समेतु त्वया संयुक्तं भवतु। वाजस्य समृद्धेः सङ्गथे संगमने भव अस्माकं वाजस्य सङ्गमयिता भवेत्यर्थः ॥ वृष्ण्यम्-वृष्णि भवम्, भवे छन्दसि यत्। सङ्गथे-गमेः थक्प्रत्ययः ॥

सप्तदशीमृचमाह—

आ प्यायस्व मदिन्तम सोम विश्वेभिरंशुभिः ।
भवा नः सुश्रवस्तमः सखा वृधे ॥ १७॥

आ प्यायस्व मदिन्ऽतम सोम विश्वेभिः अंशुऽभिः भव नः सुश्रवःऽतमः सखा वृधे ॥

हे मदिन्तम अतिशयेन हर्षवन् सोम, विश्वेभिः सर्वैः अंशुभिः कलाभूतैस्त्वदीयविभवैः आप्यायस्व समन्तात् वर्धस्व तथा पूर्णविभवस्त्वं नः वृधे अस्मदीयवर्धनाय सुश्रवस्तमः भव अतिशयेन शोभनश्रवणशाली सखा भव ॥ मदिन्तम–मदोऽस्येति मदी, अतिशयेन मदी, तमपो नुम् ॥

अष्टादशीमृचमाह—

सं ते पयांसि समु यन्तु वाजाः सं वृष्ण्यान्यभिमातिषाहः ।
आप्यायमानो अमृताय सोम दिवि श्रवांस्युत्तमानि धिष्व ॥ १८॥

सम् ते पयांसि सम् उम् इति यन्तु वाजाः सम् वृष्ण्यानि अभिमातिऽसहः आऽप्यायमानः अमृताय सोम दिवि श्रवांसि उत्ऽतमानि धिष्व ॥

हे सोम, अभिमातिषाहः अभिमातीनां शत्रूणां साहयिता अभिभविता अभिमातिषाट् तस्य ते तव, क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वात् चतुर्थ्यर्थे षष्ठी। पयांसि गव्यानि चिद्रश्मिजन्यसाराः संयन्तु त्वां संप्राप्नुवन्तु। तथा वाजाः उ समृद्धयश्च सम् संयन्तु। वृष्ण्यानि वीर्याणि च त्वां सम् संयन्तु। हे सोम, अस्मदर्थं अमृताय अमरणधर्माय आप्यायमानः वर्धमानः सन् दिवि द्युलोके उत्तमानि उत्कृष्टतमानि श्रवांसि दिव्यावेशश्रवणानि धिष्व अस्मदर्थं धारय ॥ अभिमातिषाहः–छन्दसि सह इति ष्विप्रत्ययः, सुषामादित्वात् षत्वम्। धिष्व–सुधितेत्यादीनां धिभावो निपात्यते ॥

एकोनविंशीमृचमाह—

या ते धामानि हविषा यजन्ति ता ते विश्वा परिभूरस्तु यज्ञम् ।
गयस्फानः प्रतरणः सुवीरोऽवीरहा प्र चरा सोम दुर्यान् ॥१९॥
या ते धामानि हविषा यजन्ति ता ते विश्वा परिऽभूः अस्तु यज्ञम्
गयऽस्फानः प्रऽतरणः सुऽवीरः अवीरऽहा प्र चर सोम दुर्यान् ॥

हे सोम, ते या धामानि त्वदीयानि यानि तेजांसि द्युस्थानादिषु अवस्थितानि हविषा स्वीयेन अर्पणेन (चरुपुरोडाशादिनेति बाह्ये कर्मणि) यजन्ति पूजयन्ति यजमानाः, ता ते विश्वा त्वदीयानि तानि सर्वाणि तेजांसि यज्ञम् यजनमस्मदीयं परिभूः अस्तु परितो भवन्ति, परितः प्राप्तानि भवन्तु । वचनव्यत्ययः । तादृशो बहुधामा त्वं दुर्यान् द्वारयुक्तान् गृहान्, (शरीराण्येव गृहाणि रहस्यार्थे) प्रचर प्रकर्षेण गच्छ। कीदृशस्त्वम्? गयस्फानः गृहस्य (शरीरस्य) वर्धयिता प्रतरणः प्रकर्षेण दुरितात्तारयिता सुवीरः शोभनवीर्योपेतः अवीरहा वीरान् न हन्ति, देवपक्षे स्थितान् पराक्रमशालिन ऋषीन् यजमानान् न कदापि परित्यजति, अनुगृह्णात्येवेत्यर्थः ॥ अवीरहा—वीराणां हन्ता वीरहा, न वीरहा अवीरहा ॥

विंशीमृचमाह—

सोमो धेनुं सोमो अर्वन्तमाशुं सोमो वीरं कर्मण्यं ददाति ।
सादन्यं विदथ्यं सभेयं पितृश्रवणं यो ददाशदस्मै ॥२०॥
सोमः धेनुम् सोमः अर्वन्तम् आशुम् सोमः वीरम् कर्मण्यम् ददाति
सदन्यम् विदथ्यम् सभेयम् पितृऽश्रवणम् यः ददाशत् अस्मै ॥

यः यजमानः ददाशत् यथाभागं दद्यात् सोमाय, अस्मै तस्मै यजमानाय सोमः धेनुम् अमृतस्य दोग्ध्रीं गां, गोलक्षणां चिन्मरीचिं ददाति प्रयच्छति । सोमः अर्वन्तम् सत्वरं गच्छन्तं आशुम् अश्वं तल्लक्षितप्राणक्रियावेगं ददाति । सोमः वीरम् वीर्योपेतं पुत्रं ददाति इति बाह्यः पक्षः, रहस्यं तु, अन्तर्यजनशालिन ऋषेः प्रभाप्रसारः यत्र शिष्ये पुत्रे अन्यस्मिन्नुग्राह्ये जने वा संक्रामति, स एव वीरः पुत्र इति बोध्यम् । कीदृशम् वीरम्? कर्मण्यम् क्रियासु कुशलं सदन्यम् सदनं अन्तर्यागसमर्थं शरीरं तदर्हम् । विदथ्यम् विदथः देवताज्ञानप्राप्तिस्थानं यजनं तदर्हम् ।

समेयम् सभायां साधुं तत्त्वाभिज्ञमित्यर्थः। पितृश्रवणम् पितॄणां पूर्वेषां श्रवणमिव श्रवणं आन्तरं दिव्यं च यस्य तं, पिता श्रूयते प्रख्यायते येन पुत्रेण तादृशमिति स्थूलरीत्या ॥ समेयम्-ढः छन्दसीति तत्र साधुरित्यर्थे ढप्रत्ययः। ददाशत्-लेटि अडागमः, शपः श्लुः ॥

इति प्रथमस्य षष्ठे द्वाविंशो वर्गः

एकविंशीमृचमाह—

अषाळ्हं युत्सु पृतनासु पप्रिं स्वर्षामप्सां वृजनस्य गोपाम्।
भरेषुजां सुक्षितिं सुश्रवसं जयन्तं त्वामनु मदेम सोम ॥ २१ ॥

अषाळ्हम् युत्ऽसु पृतनासु पप्रिम् स्वःऽसाम् अप्साम् वृजनस्य गोपाम् भरेषुऽजाम् सुऽक्षितिम् सुऽश्रवसं जयन्तम् त्वाम् अनु मदेम सोम ॥

युत्सु संग्रामेषु अषाळ्हम् शत्रुभिरनभिभवनीयं पृतनासु सेनासु पप्रिम् पालयितारं स्वर्षाम् स्वः स्वर्गस्य सनितारं दातारं अप्साम् अपां ज्योतिर्बलादीनां दातारं वृजनस्य दृढस्यास्माकं स्थानस्य गोपाम् गोपायितारं रक्षितारं भरेषुजाम् भरेषु यजनेषु जायमानं प्रादुर्भवन्तं सुक्षितिम् शोभनावासयुक्तं सुश्रवसम् शोभनश्रवणशालिनं जयन्तम् शत्रून् अभिभवन्तं त्वाम् हे सोम, अनु मदेम अनृसृत्य हृष्टा भवेम ॥ अषाळ्हम्-षह अभिभवे, सहेः साढः स इति षत्वम्। पप्रिम्-पॄ पालनपूरणयोः, किन्प्रत्ययः। स्वर्षाम्-स्वः स्वर्गं सनोतीति स्वर्षाः, षणु दाने। अप्साम्-अप्शब्दोपपदात् सनोतेः पूर्ववत्। भरेषुजाम्-जनी प्रादुर्भावे, पूर्ववत् आत्वम् ॥

द्वाविंशीमृचमाह—

त्वमिमा ओषधीः सोम विश्वास्त्वमपो अजनयस्त्वं गाः।
त्वमा ततन्थोर्वन्तरिक्षं त्वं ज्योतिषा वि तमो ववर्थ ॥ २२ ॥

त्वम् इमाः ओषधीः सोम विश्वाः त्वम् अपः अजनयः त्वम् गाः त्वम् आ ततन्थ उरु अन्तरिक्षम् त्वम् ज्योतिषा वि तमः ववर्थ ॥

हे सोम, त्वम् इमाः विश्वा ओषधीः अत्र वर्तमानाः सर्वा ओषधीः पृथ्वीसारभूताः अजनयः आविष्कृतवानसि। तथा त्वम् अपः अजनयः, त्वम् गाः अजनयः। आनन्दपर्यायरसस्वरूपस्य सोमस्य सर्वस्रष्टृत्वोपपत्तेः गवां अपां च जनयिता सोम इत्यत्र स्थूलपक्षः रहस्यपक्षश्च उपपद्येते।

त्वम् उरु विस्तीर्णं अन्तरिक्षम् आकाशं आततन्थ समन्तात् विस्तारितवानसि। त्वम् तमः अन्धकारं बाह्यमाभ्यन्तरं च ज्योतिषा आत्मीयेन प्रकाशेन विववर्थ विवृतं शिथिलितं विनष्टं कृतवानसि॥ ततन्थ-तनु विस्तारे। ववर्थ-वृञ् वरणे, उभयत्र लिटः थलि निगमे एवं निपात्यते॥

त्रयोविंशीमृचमाह—

देवेन नो मनसा देव सोम रायो भागं सहसावन्नभि युध्य।
मा त्वा तनदीशिषे वीर्यस्योभयेभ्यः प्र चिकित्सा गविष्टौ॥२३॥

देवेन नः मनसा देव सोम रायः भागम् सहसाऽवन् अभि युध्य मा त्वा आ तनत् ईशिषे वीर्यस्य उभयेभ्यः प्र चिकित्स गोऽइष्टौ॥

हे देव, सोम, सहसावन्, बलवन्, देवेन मनसा द्योतमानेन मननेन त्वदीयेन ज्ञानेनेत्यर्थः नः अस्माकं रायः भागम् दिव्यस्य धनस्य अस्माभिर्भजनीयं अंशं अभियुध्य आभिमुख्येन प्रेरय, असुरादिकं शत्रुं आभिमुख्येन प्रहृत्य नः प्रेषयेति भावः। त्वा त्वां मा आतनत् मा कार्षीत् आततं कोऽपि शत्रुः, मा हिंसीदित्यर्थः, न कोऽपि हिंसितुं प्रभवतीति भावः, कुतः? वीर्यस्य ईशिषे बलस्य ईश्वरोऽसि। तस्मात् उभयेभ्यः देवेभ्यो मनुष्येभ्यश्च हितार्थं गविष्टौ गवां चिद्रश्मीनां इष्टौ एषणे अन्वेषणे प्रचिकित्स प्रकर्षेण ज्ञानेच्छां कुरु। इदं च गवेषणमधिकृत्य अङ्गिरस्तत्त्वविचारे प्रपञ्चितम् (पु. ३२७, ३२८)॥ सहसावन्-सहःशब्दात् मतुपि छान्दस आकारोपजनः। युध्य-व्यत्ययेन परस्मैपदम्। तनत्-व्यत्ययेन शप्। चिकित्स-कित ज्ञाने, अस्मात् सन्। गविष्टौ-गवां इष्टयः एषणानि यस्मिन् (संग्रामे, यजने वा) तस्मिन्॥

इति प्रथमस्य षष्ठे त्रयोविंशो वर्गः

'एता उ त्या' इत्यष्टादशर्चं अष्टमं सूक्तं गोतमस्यार्षम्। आद्याश्चतस्रो जगत्यः, त्रयोदश्याद्याः उष्णिहः षड्चः, अष्टौ शिष्टा अनुष्टुभः। उषो देवता, अश्विना वर्तिरित्यन्त्यस्तृचो विश्वदेवत्यः॥

तत्र प्रथमामृचमाह—

एता उ त्या उषसः केतुमक्रत पूर्वे अर्धे रजसो भानुमञ्जते।
निष्कृण्वाना आयुधानीव धृष्णवः प्रति गावोऽरुषीर्यन्ति मातरः॥१॥

एताः ऊम् इति त्याः उषसः केतुम् अक्रत पूर्वे अर्धे रजसः भानुम् अञ्जते
निः कृण्वानाः आयुधानिऽइव धृष्णवः प्रति गावः अरुषीः यन्ति मातरः॥

यद्यपि सूक्तेऽस्मिन् ऋचां स्थूलार्थः उषःकालपरत्वेन विस्पष्टं लक्ष्यत एव, तथापि तत्र तत्र रहस्यार्थमन्तरेण न शक्यं ऋजुतात्पर्यं बोद्धुम्। अन्तरर्थे उषसः न प्रभातवेलाः किं तु प्रज्ञान-सूर्योदयकालीनाः प्रभातभासो देव्यः। एताश्च चित्प्रभातभासः चित्सत्यज्योतिषः साक्षात्कारात् प्राक् बहुवारं व्यक्ता भवन्ति वैदिकयोगमार्गयायिन ऋषेः, तासां दर्शने मन्त्रद्रष्टारः तथा वर्णयन्ति ताः यथा प्रायः बाह्यारुणोदयगामी च स्यान्मन्त्रवर्णः॥ उ पादपूरणः एताः त्याः उषसः एतास्ताः चिज्ज्योतिरुदयभासः केतुम् प्रज्ञानकारकं प्रकाशं अक्रत अकृषत, तस्मात् रजसः अन्तरिक्षस्य मध्यमस्थानस्य प्राणनिलयस्य पूर्वे अर्धे प्राक् व्यक्ते भागे भानुम् प्रकाशं अञ्जते व्यक्तीकुर्वन्ति। धृष्णवः धर्षणशीलाः योद्धारः आयुधानीव यथा आयुधानि संस्कुर्वन्ति तथा निष्कृण्वानाः संस्कुर्वाणाः (जगत्सर्वम्) ऋषेः प्राणध्रुवं आकाशं स्वशरीरं चेति बोध्यम्। अरुषीः आरोचमानाः मातरः सत्यसूर्यप्रकाशस्य जनयित्र्यः गावः उषसः प्रति यन्ति प्रत्या-गच्छन्ति। बह्वीनामुषसां प्रादुर्भावः भवति सत्यज्योतिषः साक्षात्कारात्पूर्वम्॥ अक्रत—करोतेर्लुङ्, मन्त्रे च्लेर्लुक्। निष्कृण्वानाः—कृवि हिंसाकरणयोः, ताच्छीलिकश्चानश्॥

द्वितीयामृचमाह—

उदपप्तन्नरुणा भानवो वृथा स्वायुजो अरुषीर्गा अयुक्षत।
अक्रन्नुषासो वयुनानि पूर्वथा रुशन्तं भानुमरुषीरशिश्रयुः॥२॥

उत् अपप्तन् अरुणाः भानवः वृथा सुऽआयुजः अरुषीः गाः अयुक्षत
अक्रन् उषसः वयुनानि पूर्वऽथा रुशन्तम् भानुम् अरुषीः अशिश्रयुः॥

अरुणाः अरुणवर्णाः भानवः किरणाः वृथा अनायासेन उदपप्तन् उद्गता अभूवन्। ततः उषसः चित्प्रभातभासो देव्यः स्वायुजः सुखेन आयोक्तुं शक्याः अरुषीः आरोचमानाः गाः पूर्वं उदितान् चिद्रश्मीन् अयुक्षत अयोजयन् स्वरथे। एवं गोरथयुक्ताः उषसः पूर्वथा यथापूर्वं वयुनानि ज्ञानानि, पूर्णसत्यसाक्षात्कारात् प्रागावश्यकानि अक्रन् अकार्षुः। ततः परं अरुषीः आरोचमानाः ता उषसः रुशन्तम् भानुम् ज्वलन्तं सत्यज्योतिःस्वरूपं सूर्यं अशिश्रयुः असेवन्त॥

अपप्तन्–पततेर्लुङ्। अक्रन्–मन्त्रे घसेत्यादिना च्लेर्लुक्। अशिश्रयुः–श्रिञ् सेवायाम्, शपः श्लुः॥

तृतीयामृचमाह—

अर्चन्ति॒ नारी॒रप॒सो न वि॒ष्टिभिः॒ समा॒नेन॒ योज॑ने॒ना प॑रा॒वतः॑।
इष॒ं वह॑न्तीः सु॒कृते॑ सु॒दान॑वे॒ विश्वेद॒ह॒ यज॑मानाय सुन्व॒ते॥ ३॥
अर्चन्ति नारीः॑ अ॒पसः॑ न वि॒ष्टिऽभिः॒ स॒मा॒नेन॑ योज॑नेन आ प॒रा॒ऽवतः॑
इष॑म् वह॑न्तीः सु॒ऽकृते॑ सु॒ऽदान॑वे विश्वा॑ इत् अह॑ यज॑मानाय सुन्व॒ते॥

नारीः नेत्र्यः उषसः, चित्सत्योदयात्पूर्वं तत्प्रभातरश्मीनां नेत्र्य इत्यर्थः विष्टिभिः स्वीयाभिः व्याप्तिभिः अर्चन्ति सर्वतः दीपयन्ति। तत्र दृष्टान्तः–अपसो न अपसा अपस्वी लक्ष्यते, यथा कर्मकुशलः एकत्र स्थितः सर्वत्र व्याप्नोति स्वकर्मव्याप्तिभिः तद्वत्। कथं अर्चन्ति? समानेन योजनेन वैषम्यराहित्येन उद्योजनेन, समप्रवर्तनेनेत्यर्थः। किं कुर्वत्यः? परावतः दूरप्रदेशात्, परस्मात् ज्योतिषः स्थानात् विश्वेदह सर्वामेव इषम् एषणां, प्रेरणाशक्तिं आवहन्तीः आहरन्त्यः। कस्मै? सुकृते शोभनकर्मकारिणे सुदानवे देवेभ्यः शोभनदानकर्त्रे सुन्वते सोमाभिषवं कुर्वते, एवंभूताय यजमानाय॥ नारीः–नृ नयने, शार्ङ्गरवादिषु पाठात् ङीन्। विष्टिभिः–विष्लृ व्याप्तौ। विश्वा–सुपां सुलुगिति अमो डादेशः॥

चतुर्थीमृचमाह—

अधि॒ पेशां॑सि वपते नृ॒तूरि॒वापो॑र्णुते॒ वक्ष॑ उ॒स्रेव॒ बर्ज॑हम्।
ज्योति॒र्विश्व॑स्मै॒ भुव॑नाय कृण्व॒ती गावो॒ न व्र॒जं व्यु॒१॑षा आ॑व॒र्तम॑ः॥ ४॥
अधि॑ पेशां॑सि व॒पते॒ नृ॒तूःऽइ॑व अप॑ ऊ॒र्णु॒ते॒ वक्षः॑ उ॒स्राऽइ॑व॒ बर्ज॑हम् ज्योतिः॑
विश्व॑स्मै॒ भुव॑नाय कृण्व॒ती गा॑वः॑ न व्र॒जम् वि उ॒षाः॑ आ॒व॒रि॒त्या॑वः॑ तमः॑॥

नेत्र्य उषसः व्याप्तिभिः सर्वतो दीपयन्तीति तमसः प्रध्वंस उक्तः। इदानीमौषस्यं दर्शनीयत्वमाह। उषाः देवी नृतूरिव नृत्यन्ती योषिदिव पेशांसि रूपाणि बहूनि दर्शनीयानि अधि वपते स्वस्यां अधिकं धारयते। नृतूर्नापितः यथा केशान् निःशेषेण छिनत्ति तथा उषाः तमश्छिनत्तीति व्याख्यान्तरं सायणस्य, अस्मिन् पक्षे नॄन् तूर्वति केशेन रिक्तीकरोति नृतूर्नापितः, तदा पेशांसि कृष्णवर्णानि तमांसीति व्याख्या भवति। अत्र पेशो रूपमित्येव साधीयानर्थः।

एवं बहुधा रूपप्रदर्शनात्परं वक्षः अपोर्णुते स्वीयं उरःप्रदेशं अनाच्छादितं करोति स्वयं आविर्भवतीत्यर्थः । उषसां गोभिरुपमा वेदे प्रसिद्धा, वक्षःप्रदर्शनं उषसां सम्यगाविष्कारं ज्ञापयति । तत्र दृष्टान्तः—बर्जहम् सकृदेवास्य प्रयोग ऋक्संहितायाम्, अस्य रूपावतारः सायणीयानुसारेण क्रियते, पयस उत्पत्तिस्थानं, उस्रा इव गौर्यथा दोहनसमये आविष्करोति तद्वत् । अथ उषाः, गावः व्रजम् न यथा गावः स्वीयं स्थानं गोष्ठं सत्वरं प्राप्नुवन्ति तथा उत्तमज्योतिःस्थानं चित्-सूर्यमण्डलं प्राप्य विश्वस्मै भुवनाय सर्वस्मै जगते ज्योतिः कृण्वती प्रकाशं कुर्वती तमः अन्धकारं अन्तर्बहिश्च व्यावः विवृतं अकरोत्, व्यनाशयत् ॥ नृतूः—नृती गात्रविक्षेपे, नृतिगृध्योः कूरिति कूप्रत्ययः । बर्जहम्—बृह् संभजने, वृणीते संभजते गामिति वः पयः, वबयोरभेद इति बत्वं, विच्, तज्जहातीति बर्जहः । आवः—वृञ् वरणे, लुङि मन्त्रे घसेति च्लेर्लुक् ॥

पञ्चमीमृचमाह—

प्रत्यर्ची रुशदस्या अदर्शि वि तिष्ठते बाधते कृष्णमभ्वम् ।
स्वरुं न पेशो विदथेष्वञ्जञ्चित्रं दिवो दुहिता भानुमश्रेत् ॥५॥

प्रति अर्चिः रुशत् अस्याः अदर्शि वि तिष्ठते बाधते कृष्णम् अभ्वम् स्वरुम् न पेशः विदथेषु अञ्जन् चित्रम् दिवः दुहिता भानुम् अश्रेत् ॥

अस्याः उषसः रुशत् दीप्यमानं अर्चिः कान्तिः प्रति अदर्शि पूर्वमिव प्रत्यावृत्य दृश्यते, वितिष्ठते सर्वत्र व्याप्यावतिष्ठते, अभ्वम् महन्नाम, बलिष्ठं सान्द्रं कृष्णम् कृष्णवर्णं घनं तमः बाधते अपसारयति । विदथेषु ज्ञानसाधनप्राप्तिस्थानेषु अन्तर्यजनेषु पेशः स्वकीयं रूपं अनक्ति संश्लिष्टं करोति । तत्र दृष्टान्तः—विदथेषु बाह्येषु यज्ञेषु स्वरुम् न यूपं यथा अञ्जन् अञ्जन्ति अध्वर्यवः । स्वरुशब्दस्य व्युत्पत्तिः सन्दिग्धा, यूपः दारुशकलः, दृढप्रतिष्ठो ध्वजो वा भवति । ततः चित्रम् विचित्रं आश्चर्यकरं भानुम् सूर्यं दिवो दुहिता उषाः अश्रेत् असेवत ॥ वितिष्ठते—समवप्रविभ्यः स्थ इत्यात्मनेपदम् । अश्रेत्—श्रिञ् सेवायाम्, लङ्, शपो लुक् बहुलं छन्दसि ॥

इति प्रथमस्य षष्ठे चतुर्विंशो वर्गः

षष्ठीमृचमाह—

अतारिष्म तमसस्पारमस्योषा उच्छन्ती वयुना कृणोति ।
श्रिये छन्दो न स्मयते विभाती सुप्रतीका सौमनसायाजीगः ॥६॥

अतारिष्म तमसः पारम् अस्य उषाः उच्छन्ती वयुना कृणोति श्रिये छन्दः न स्मयते विऽभाती सुऽप्रतीका सौमनसाय अजीगरिति ॥

उषसमधिकृत्य देवताविचारे भूमिकायां यदुक्तं तदवधेयम् (पृ. ७०)। ऋगेषा बाह्यार्थपक्षे गृहीता चेदुपहसनीयतां भजत इति भूमिकायामुदाहृतम् (पृ. १४)॥ अस्य बहोः कालादनुभूयमानस्य तमसः अज्ञानान्धकारस्य पारम् अवधिं अतारिष्म तीर्त्वा चित्प्रकाशं प्राप्ताः स्मः। कुतः? उच्छन्ती तमो वर्जयन्ती, प्रकाशमाना उषाः चित्प्रभातभा देवी वयुना ज्ञानानि नवनवानि कृणोति करोति। अपि च श्रिये शोभायै स्वप्रभाप्रदर्शनाय, स्मयते हसति, तत्र दृष्टान्तः—छन्दः न छन्देन छन्दयिता लक्ष्यते, यथा उपच्छन्दयिता पुरुषः हसति तद्वत्। अपि च विभाती एवं विशिष्टां भां कुर्वती सुप्रतीका शोभनमुखी सौमनसाय सर्वस्यापि सौमनस्यापादनाय अजीगः भक्षितवती पूर्वोक्तलक्षणं तमः॥ स्मयते—ष्मिङ् ईषद्धसने। अजीगः—गृ निगरणे, लङ्, शपः श्लुः अन्यत्सर्वं च छान्दसम्॥

सप्तमीमृचमाह—

भास्वती नेत्री सूनृतानां दिवः स्तवे दुहिता गोतमेभिः।
प्रजावतो नृवतो अश्वबुध्यानुषो गोअग्राँ उप मासि वाजान्॥७॥
भास्वती नेत्री सूनृतानाम् दिवः स्तवे दुहिता गोतमेभिः प्रजाऽवतः नृऽवतः अश्वऽबुध्यान् उषः गोऽअग्रान् उप मासि वाजान्॥

भास्वती प्रभावती सूनृतानाम् शोभनसत्यानां, प्रियसत्यवाचामिति सायणो लौकिकीं भाषां अनुसृत्य, प्रागुक्तं (१.३) अवधेयम्। नेत्री प्रापयित्री यजमानमृषिं प्रति। दिवो दुहिता द्युलोकात् उत्तमज्योतिःस्थानादुत्पन्ना गोतमेभिः चिद्रश्मिसंपन्नतमैरस्माभिः स्तवे स्तूयते। हे उषः, स्तुता त्वं प्रजावतः सन्ततियुक्तान् नृवतः नृभिर्बलवद्भिरुपेतान् अश्वबुध्यान् अश्वाः प्राणबलात्मानः बुध्याः बोद्धव्याः येषु तान् गोअग्रान् चित्किरणपुरस्सरान्, एवंभूतान् वाजान् समृद्धिविभवान् उपमासि प्रयच्छसि॥ स्तवे—ष्टुञ् स्तवे, कर्मणि लिडि छन्दसि बहुलग्रहणात् यकोऽपि लुक्, एवमन्यदपि छान्दसम्। नृवतः—व्यत्ययेन मतोर्वत्वम्। मासि—मा माने, अदादिः॥

अष्टमीमृचमाह—

उषस्तमश्यां यशसं सुवीरं दासप्रवर्गं रयिमश्वबुध्यम् ।
सुदंससा श्रवसा या विभासि वाजप्रसूता सुभगे बृहन्तम् ॥८॥
उषः तम् अश्याम् यशसम् सुऽवीरम् दासऽप्रवर्गम् रयिम् अश्वऽबुध्यम्
सुऽदंससा श्रवसा या विऽभासि वाजेऽप्रसूता सुऽभगे बृहन्तम् ॥

हे उषः, तम् रयिम् तत् दिव्यं धनं अश्याम् प्राप्नुयाम् । नेदं लोकसाधारणं धनं "बृहन्तं विभासि" इति वक्ष्यमाणो वाक्यार्थः तद्विस्पष्टयति । कीदृशं रयिम्? यशसम् यशोयुक्तं, प्रशस्यं श्रेष्ठमिति यावत् । सुवीरम् शोभनवीर्योपेतं दासप्रवर्गम् दासानां क्रियादक्षाणां प्रवर्गः प्रकृष्टः वर्गः सङ्घो यस्मिन् तं, बहुकर्मकुशलत्वोपेतं इत्यर्थः । अश्वबुध्यम् अश्वाः प्राणक्रियावेगाः बुध्याः बोद्धव्याः येन तम् । हे सुभगे, शोभनैश्वर्योपेते, उषः, सुदंससा शोभनकर्मणा युक्तेन श्रवसा दिव्यावेशश्रुतिजन्येनास्मदीयस्तोत्रेण युक्ता प्रीता वा त्वं वाजप्रसूता समृद्धिप्रदात्री सती बृहन्तम् महान्तं अति प्रौढं लोकोत्तरं लोकातीतं वा या रयिम् यद् धनं विभासि प्रकाशयसि, आविष्करोषि तमश्यामिति संबन्धः ॥ या—सुपां सुलुगिति अमो डादेशः । अन्ये गताः ॥

नवमीमृचमाह—

विश्वानि देवी भुवनाभिचक्ष्या प्रतीची चक्षुरुर्विया वि भाति ।
विश्वं जीवं चरसे बोधयन्ती विश्वस्य वाचमविदन्मनायोः ॥९॥
विश्वानि देवी भुवना अभिऽचक्ष्य प्रतीची चक्षुः उर्विया वि भाति
विश्वम् जीवम् चरसे बोधयन्ती विश्वस्य वाचम् अविदत् मनायोः ॥

देवी द्योतमानोषाः विश्वानि भुवना सर्वाणि भुवनानि भूर्भुवरादीनि अभिचक्ष्य अभितः प्रकाश्य, ऋषिदृष्टेर्गोचरतां गमयित्वा, प्रतीची प्रत्यङ्मुखी अन्तर्मुखी सती, पराक्प्रतिद्वन्द्वी प्रत्यक्शब्दः, चक्षुः चक्षुषा प्रकाशकेन तेजसा, विभक्तिलोपः, उर्विया विस्तीर्णा विभाति प्रकाशते । अपि च विश्वम् जीवम् सर्वं प्राणयुक्तं देवकामं पुरुषं चरसे चरणाय दिव्यकार्यप्रवर्तनाय बोधयन्ती ज्ञापयन्ती, विश्वस्य मनायोः सर्वस्य मनोयुक्तस्य मनस्विनः पुरुषस्य वाचम् देवाह्वानसमर्थां मन्त्रात्मिकां वाचं अविदत् अलभत । "जीवं चरसे" इति प्राणक्रियां "मनायोः वाचम्"

इति ज्ञानक्रियां चावेदयति उषःशब्दवेदनीयचित्प्रभातव्यापारः ॥ अभिचक्ष्य–चक्षिः प्रकाशनार्थेऽपि प्रसिद्धः । उर्विया–उर्वीशब्दादुत्तरस्य सोः डियाजादेशः । मनायोः–मन आत्मन इच्छति मनस्यति, क्यच्, क्याच्छान्दसीत्युः ॥

दशमीमृचमाह—

पुनःपुनर्जायमाना पुराणी समानं वर्णमभि शुम्भमाना ।
श्वघ्नीव कृत्नुर्विज आमिनाना मर्तस्य देवी जरयन्त्यायुः ॥१०॥
पुनःऽपुनः जायमाना पुराणी समानम् वर्णम् अभि शुम्भमाना
श्वघ्नीऽइव कृत्नुः विजः आऽमिनाना मर्तस्य देवी जरयन्ती आयुः ॥

पूर्णसत्योदयात्प्राक् बह्व्य उषसो भवन्तीति प्रागुक्तं स्मार्यम् । पुनःपुनः जायमाना पुनरावृत्त्या प्रादुर्भवन्ती पुराणी चिरन्तनी नित्येत्यर्थः समानम् वर्णम् तुल्यं रूपं अभिशुम्भमाना अभिप्राप्य शोभमाना विविधप्रादुर्भावेऽपि एकमेवास्याः स्वरूपमित्यर्थः । देवी दिव्या मर्तस्य मरणधर्मणः पुरुषस्य आयुः आयुर्मानं जरयन्ती ऊनयन्ती वर्तते, मरणधर्मस्य ऊनतापादनेन अमरणधर्मस्य अमृतत्वस्य लब्धिर्बोध्या । बाह्यपक्षे तु, उषःसु अतीतासु मानुषं आयुर्हीयते । तत्र दृष्टान्तः–कृत्नुः कर्तनशीला श्वघ्नी श्वभिः मृगान् हन्तीति, व्याधस्त्री विजः इव विजः चलतः पक्षिणः यथा आमिनाना हिंसन्ती वर्तते, तद्वत् ॥ विजः उद्वेजक इति सायणोऽन्यत्र (२.१) । नव्याः केचन अक्षद्यूतकरा यथा कपटयुक्त्या वञ्चयन्ति तथा उषाः मानुषायुर्मोषणेनेति मन्यन्ते, निराधारमिदमूहमात्रम् ॥ विजः–ओविजी भयचलनयोः, विजन्ते चलन्ति पक्षिणः । आमिनाना–मीञ् हिंसायाम्, क्रैयादिकः ॥

इति प्रथमस्य षष्ठ पञ्चविंशो वर्गः

एकादशीमृचमाह—

व्यूर्ण्वती दिवो अन्ताँ अबोध्यप स्वसारं सनुतर्युयोति ।
प्रमिनती मनुष्या युगानि योषा जारस्य चक्षसा वि भाति ॥११॥
विऽऊर्ण्वती दिवः अन्तान् अबोधि अप स्वसारम् सनुतः युयोति
प्रऽमिनती मनुष्या युगानि योषा जारस्य चक्षसा विभाति ॥

दिवः अन्तान् द्युलोकस्य प्रान्तान् व्यूर्ण्वती विवृतान् कुर्वती अबोधि अस्माभिर्ज्ञाता भवति। स्वसारम् साहचर्यात् सहोदरीं तामसीं शक्तिं, रात्रिमिति बाह्यः पक्षः सनुतः अन्तर्हितनामैतत् रहस्ये अपयुयोति अपगमय्य पृथक् करोति। मनुष्या युगानि मनुष्यसंबन्धीनि कालमानानि, न तु देवसंबन्धीनि प्रमिनती प्रकर्षेण हिंसन्ती। (विवृतमेतत् दशम्याम्) जारस्य जरयितुस्तमसः योषा अङ्गना चक्षसा प्रकाशेन विभाति विशेषेण भासते॥ व्यूर्ण्वती—ऊर्णुञ् आच्छादने, विपूर्वादस्माच्छटः शतृ, उगितश्चेति ङीप्। सनुतः—एतदन्तोदात्तत्वं स्वरादिषु निपातितं, अतः अव्ययसंज्ञायामाप्सुप इति सप्तम्या लुक्। युयोति—यु मिश्रणामिश्रणयोः। मनुष्या—षष्ठ्या डादेशः। युगानि—युजेः घञ् करणे कर्मणि वा। जारस्य—दारजारौ कर्तरि णिलुक् चेति घञन्तो निपातितः॥

द्वादशीमृचमाह—

पशून्न चित्रा सुभगा प्रथाना सिन्धुर्न क्षोद उर्विया व्यश्वैत्।
अमिनती दैव्यानि व्रतानि सूर्यस्य चेति रश्मिभिर्दृशाना॥१२॥
पशून् न चित्रा सुऽभगा प्रथाना सिन्धुः न क्षोदः उर्विया वि अश्वैत्
अमिनती दैव्यानि व्रतानि सूर्यस्य चेति रश्मिऽभिः दृशाना॥

सुभगा शोभनैश्वर्या चित्रा अद्भुता उषाः पशून् न पशुपालो यथा पशून् चारणाय सर्वासु दिक्षु विस्तारयति तथा प्रथाना स्वतेजांसि विस्तारयन्ती उर्विया विस्तीर्णा स्वयं बृहती सिन्धुर्न क्षोदः स्यन्दनशीलमुदकं यथा सर्वतो व्याप्नोति तद्वत् व्यश्वैत् विश्वं व्याप्नोति। अपि च दैव्यानि देवसंबन्धीनि व्रतानि नियतानि कर्माणि अमिनती अहिंसन्ती, स्वतन्त्रापि दिव्यधर्मानुसारिणीत्यर्थः। सूर्यस्य उत्तमस्य ज्योतिषः सत्यस्वरूपस्य रश्मिभिः किरणैः सह मिलिता दृशाना दृश्यमाना चेति अचेति, अज्ञायि, अस्माभिर्ज्ञातेत्यर्थः॥ प्रथाना—प्रथ प्रख्याने, अन्तर्भावितण्यर्थात् ताच्छीलिकश्चानश्, बहुलं छन्दसीति शपो लुक्। अश्वैत्—टु ओश्वि गतिवृद्ध्योः, लुङ्, इडभावश्छान्दसः। चेति—चिती संज्ञाने, कर्मणि लुङ्। दृशाना—दृशेः कर्मणि लटः शानच्, विकरणस्य लुक्॥

त्रयोदशीमृचमाह—

उषस्तच्चित्रमा भरास्मभ्यं वाजिनीवति। येन तोकं च तनयं च धामहे॥१३॥

उषः तत् चित्रम् आ भर अस्मभ्यम् वाजिनीऽवति येन तोकम् च तनयम् च धामहे ॥

हे वाजिनीवति बहुविधया समृद्ध्या युक्ते, उषः उषोदेवि, तत् चित्रम् अद्भुतं तद्दिव्यं वैभवं अस्मभ्यम् अस्मदर्थं आभर आहर । येन चित्रेण वैभवेन तोकम् च अपत्यं तनयम् च तत्सन्तानं च धामहे दध्महे, धारयामः । तोकः अन्तर्यागप्रभावस्य अविच्छेदेनान्यत्राश्रिते पुरुषे संक्रामो भवति, तस्य सन्तानं तनयो भवति ॥ धामहे-दधातेर्लटि शपो लुक् ॥

चतुर्दशीमृचमाह—

उषो अद्येह गोमत्यश्वावति विभावरि । रेवदस्मे व्युच्छ सूनृतावति ॥१४॥

उषः अद्य इह गोऽमति अश्वऽवति विभाऽवरि रेवत् अस्मे इति वि उच्छ सूनृताऽवति ॥

हे गोमति, चिद्रश्मियुक्ते, अश्वावति प्राणशक्तिसंपन्ने विभावरि विशिष्टभायुक्ते सूनृतावति शोभनसत्यवाग्युक्ते उषः अद्य इदानीं इह अस्मिन् स्थाने अस्मे अस्मासु रेवत् दिव्यं धनं यथा भवति तथा व्युच्छ प्रकाशं कुरु ॥ गोमतीत्यादयः सर्वे प्राग्व्याख्याताः ॥ अस्मे-सप्तम्याः शे आदेशः ॥

पञ्चदशीमृचमाह—

युक्ष्वा हि वाजिनीवत्यश्वाँ अद्यारुणाँ उषः ।
अथा नो विश्वा सौभगान्या वह ॥१५॥

युक्ष्व हि वाजिनीऽवति अश्वान् अद्य अरुणान् उषः अथ नः विश्वा सौभगानि आ वह ॥

हे वाजिनीवति बहुविधसमृद्धिसंपन्ने, हे उषः अरुणान् अश्वान् अरुणवर्णान् अश्वान्, क्रियावेगद्योतकोऽरुणवर्णः राजसः, अश्वाश्च प्राणबलात्मानो बोध्याः, अद्य इदानीं युक्ष्व हि योजयैव । अथ ततः परं नः अस्मभ्यं विश्वा सौभगानि सर्वविधानि सौभाग्यानि आवह आनय ॥

इति प्रथमस्य षष्ठे षड्विंशो वर्गः

षोडशीमृचमाह—

अश्विना वर्तिरस्मदा गोमद्दस्रा हिरण्यवत्।
अर्वाग्रथं समनसा नि यच्छतम् ॥१६॥

अश्विना वर्तिः अस्मत् आ गोऽमत् दस्रा हिरण्यऽवत् अर्वाक् रथम् सऽमनसा नि यच्छतम् ॥

उषा अश्विनोर्योषा, रथे तयोः प्रतिष्ठते, तत्साहचर्यात् अश्विनौ प्रस्तुतौ तृचेऽस्मिन्, तत्र आद्या "अश्विना वर्तिरि"ति भवति। हे अश्विना अश्ववन्तौ, दस्रा क्रियादक्षौ, व्याख्यातम् (१.३.३) अस्मत् अस्माकं वर्तिः वर्तनं, आवासगृहं शरीरमित्यर्थः गोमत् चित्किरणयुक्तं हिरण्यवत् सौरज्योतिर्द्योतकसुवर्णयुक्तं यथा भवति तथा समनसा समानमनस्कौ सन्तौ युवां अर्वाक् अर्वाचीनं अस्माकं समीपे रथम् युष्मदीयं आ नियच्छतम् आवर्तयतम् ॥ वर्तिः—वर्ततेऽस्मिन्निति औणादिक इसिप्रत्ययः। अस्मत्—सुपां सुलुगिति षष्ठ्या लुक् ॥

सप्तदशीमृचमाह—

यावित्था श्लोकमा दिवो ज्योतिर्जनाय चक्रथुः।
आ न ऊर्जं वहतमश्विना युवम् ॥१७॥

यौ इत्था श्लोकम् आ दिवः ज्योतिः जनाय चक्रथुः आ नः ऊर्जम् वहतम् अश्विना युवम् ॥

हे अश्विनौ, यौ युवां दिवः द्युलोकात् श्लोकम् श्लोकनीयं प्रशस्यं ज्योतिः उत्तमं तेजः जनाय यजमानाय इत्था इत्थमस्मदनुभवक्षमं आ चक्रथुः आकारयुक्तं निष्पादितवन्तौ, तौ युवम् युवां नः अस्मभ्यं ऊर्जम् वीर्यवद्बलमपि आवहतम् आनयतम् ॥ श्लोकम्—श्लोकृ संघाते, स्तुत्यर्थेऽपि प्रसिद्धः, कर्मणि घञ् ॥

अष्टादशीमृचमाह—

एह देवा मयोभुवा दस्रा हिरण्यवर्तनी। उषर्बुधो वहन्तु सोमपीतये ॥१८॥

आ इह देवा मयःऽभुवा दस्रा हिरण्यवर्तनी इति हिरण्यऽवर्तनी उषःऽबुधः वहन्तु सोमऽपीतये ॥

उषर्बुधः उषसि प्रबुद्धाः सामर्थ्यादश्वा इति पूर्वे व्याख्यातारः। तथा ग्रहणमुपपन्नम्। इह अस्मिन्नस्मदन्तर्यजने सोमपीतये सोमपानाय दस्रा क्रियादक्षौ अश्विनौ आवहन्तु आनयन्तु। कीदृशौ? देवा देवौ मयोभुवा मयोभुवौ सुखस्य भावयितारौ हिरण्यवर्तनी हिरण्मयो वर्तनिर्मार्गो ययोस्तौ॥ "रुद्रवर्तनी" (१.३.३) इत्यत्र वर्तनिशब्दव्याख्या द्रष्टव्या॥

इति प्रथमस्य षष्ठे सप्तविंशो वर्गः

'अग्नीषोमावि'ति द्वादशर्चं नवमं सूक्तं गोतमस्यार्षम्। आदितस्तिस्रोऽनुष्टुभः नवम्याद्यास्तिस्रो गायत्र्यः अष्टमी जगती त्रिष्टुब्वा शिष्टाः पञ्च त्रिष्टुभः, अग्नीषोमौ देवता॥

तत्र प्रथमामृचमाह—

अग्नीषोमाविमं सु मे शृणुतं वृषणा हवम्।
प्रति सूक्तानि हर्यतं भवतं दाशुषे मयः॥१॥

अग्नीषोमौ इमम् सु मे शृणुतम् वृषणा हवम् प्रति सुऽउक्तानि हर्यतम् भवतम् दाशुषे मयः॥

वृषणा वर्षितारौ अभीष्टानां हे अग्नीषोमौ मे इमम् हवम् प्रकृतमस्मदाह्वानं सु शृणुतम् सम्यगाकर्णयतम्। सूक्तानि प्रति अस्मदीयानि स्तोत्राणि समुद्दिश्य हर्यतम् तानि कान्तानि कुरुतं, 'सूक्तानि प्रति हर्यतम् प्रत्येकं कामयेथाम्' इति सायणानुसारतो वा भवतु। अथ दाशुषे दत्तवते यजमानाय मयः सुखं, सुखमयौ भवतम्॥ हर्यतम्—हर्य गतिकान्त्योः॥

द्वितीयामृचमाह—

अग्नीषोमा यो अद्य वामिदं वचः सपर्यति।
तस्मै धत्तं सुवीर्यं गवां पोषं स्वश्व्यम्॥२॥

अग्नीषोमा यः अद्य वाम् इदम् वचः सपर्यति तस्मै धत्तम् सुऽवीर्यम् गवाम् पोषम् सुऽअश्व्यम्॥

हे अग्नीषोमा अग्नीषोमौ, यः यजमानः अद्य इदानीं वाम् युष्मभ्यं इदम् वचः मन्त्रात्मकं वचनं सपर्यति पूजितं करोति तस्मै यजमानाय गवाम् पोषम् ज्ञानांशूनामभिवृद्धिं धत्तम् धारयतं,

प्रयच्छतमित्यर्थः। कीदृशं पोषम्? सुवीर्यम् शोभनवीर्योपेतं स्वश्व्यम् शोभनैरश्वैः प्राणलक्षणैर्युक्तम्। गवाश्वैः ज्ञानक्रियात्मकशक्तिद्वयं प्रतिपाद्यते ॥

तृतीयामृचमाह—

अग्नीषोमा य आहुतिं यो वां दाशाद्धविष्कृतिम्।
स प्रजया सुवीर्यं विश्वमायुर्व्यश्नवत् ॥३॥

अग्नीषोमा यः आऽहुतिम् यः वाम् दाशात् हविःऽकृतिम् सः प्रऽजया सुऽवीर्यम् विश्वम् आयुः वि अश्नवत् ॥

हे अग्नीषोमा अग्नीषोमौ, यः यजमानः हविष्कृतिम् हविषा अर्पणद्रव्येण कृतां आहुतिम् आह्वानलक्षणमर्पणं वाम् युष्मभ्यं दाशात् दद्यात्, सः यजमानः प्रजया उक्तलक्षणया सन्तत्या सह सुवीर्यम् शोभनवीर्योपेतं विश्वम् आयुः सर्वं जीवनं व्यश्नवत् व्याप्नोत्। मन्त्रे "यः" द्विरावृत्तः आदरार्थो ग्राह्यः ॥ हविष्कृतिः—हविषः कृतिः करणं यस्यामाहुतौ। अश्नवत्, दाशात्—उभयं लेट् ॥

चतुर्थीमृचमाह—

अग्नीषोमा चेति तद्वीर्यं वां यदमुष्णीतमवसं पणिं गाः।
अवातिरतं बृसयस्य शेषोऽविन्दतं ज्योतिरेकं बहुभ्यः ॥४॥

अग्नीषोमा चेति तत् वीर्यम् वाम् यत् अमुष्णीतम् अवसम् पणिम् गाः अव अतिरतम् बृसयस्य शेषः अविन्दतम् ज्योतिः एकम् बहुऽभ्यः ॥

हे अग्नीषोमा अग्नीषोमौ, वाम् तत् वीर्यम् युवयोः तद्वक्ष्यमाणं सामर्थ्यं चेति अचेति, अस्माभिर्ज्ञातं भवति। यत् येन वीर्येण गाः अवसम् गवात्मकं रक्षणं, चिद्रश्मिजालं हि महद्रक्षणं देवकामानाम्। पणिम् अमुष्णीतम् पणेर्व्यवहारिणोऽसुरात् अपाहार्ष्टम्। तथा बृसयस्य बृसयति संवेष्टयति आवृणोति तमोघनोऽसुरो वृत्रः तस्य शेषः अवशिष्टं अंशं, अवातिरतम् अधः प्रापयतम्। हिरण्यस्तूपस्यैन्द्रे सूक्ते वृत्रवधं प्रति विचारितम् (१.३२), इन्द्रेण हतस्य वृत्रस्य शिष्टं शरीरं अपामधः पातितं तत्र शेत इति। ततः परं बहुभ्यः देवकामेभ्य ऋषिभ्यः एकम् ज्योतिः उत्तमं सौरं सत्यं अविन्दतम् अलप्साथाम् ॥ अत्र बृसयः त्वष्टा तस्य शेषः अपत्यं इत्र

इति पुराणकथारीतिमवलम्ब्य व्याचष्टे सायणः ॥ अधसम्–अवतेरौणादिकः असच् । शेषः–सुपां सुलुगिति द्वितीयायाः सुः ॥

पञ्चमीमृचमाह—

युवमेतानि दिवि रोचनान्यग्निश्च सोम सक्रतू अधत्तम् ।
युवं सिन्धूँरभिशस्तेरवद्यादग्नीषोमावमुञ्चतं गृभीतान् ॥ ५॥

युवम् एतानि दिवि रोचनानि अग्निः च सोम सक्रतू इति सऽक्रतू अधत्तम्
युवम् सिन्धून् अभिऽशस्तेः अवद्यात् अग्नीषोमौ अमुञ्चतम् गृभीतान्॥

हे सोम, त्वं अग्निः च सक्रतू समानकर्माणौ सन्तौ युवम् युवां दिवि द्युलोके एतानि रोचनानि ज्योतींषि, दिव्यानि तेजांसीति रहस्यम्, नक्षत्रपरं बाह्यपक्षे । अधत्तम् अधारयतम्, युवम् युवां गृभीतान् गृहीतान् वृत्रबन्धनस्थान् सिन्धून् अव्लक्षणान् तेजोबलादीन् हे अग्नीषोमौ, अभिशस्तेः अभितो हिंसतः अवद्यात् पापात् अमुञ्चतम् मुक्तवन्तौ । "रोचनानि" चित्प्रकाशं "सिन्धवः" प्राणबलधारां चावेदयन्ति ॥

षष्ठीमृचमाह—

आन्यं दिवो मातरिश्वा जभारामथ्नादन्यं परि श्येनो अद्रेः ।
अग्नीषोमा ब्रह्मणा वावृधानोरुं यज्ञाय चक्रथुरु लोकम् ॥ ६॥

आ अन्यम् दिवः मातरिश्वा जभार अमथ्नात् अन्यम् परि श्येनः अद्रेः
अग्नीषोमा ब्रह्मणा ववृधाना उरुम् यज्ञाय चक्रथुः उम् इति लोकम् ॥

हे अग्नीषोमा अग्नीषोमौ, अन्यम् युवयोरेकं अग्निं मातरिश्वा वायुः दिवः द्युलोकात् आजभार आजहार । श्येनः शंसनीयगतियुक्तः पक्षी अन्यम् सोमं अद्रेः परि अन्नमयादिभूमिकानामुपरि अमथ्नात् मथित्वा आहृतवान् ॥ प्राणशक्तिविभवेन तपसा प्रादुर्भवति क्रतुरूपो भगवानग्निरन्तः । मातरिश्वा अग्निमाजहारेत्युक्तेरिदं रहस्यम् । "मथीद्यदीं विभृतो मातरिश्वा" (१.७१.४) "प्रशस्तं रातिं भृगवे मातरिश्वा" इत्याद्यवधेयम् । श्येनः पक्षी जीवभूतोऽन्तरात्मैव, तस्योच्चैः पतनेन अद्रिवदवस्थितस्य बहुप्रस्थोपेतस्य शारीरस्य पुरुषस्य सोमपदवेदनीय-अमृताहरणसंभवो बोध्यः । अत्रापि तपसा मथनेन उच्चैःशिखरात्स पक्षी सोमं सम्पाद्याहरति ॥ एवं युवां ब्रह्मणा

मन्त्रेण ऋषेर्हार्दवाग्रूपेण वर्धमानौ यज्ञाय यजनार्थं लोकम् प्रपञ्चं उरुम् विस्तीर्णं चक्रथुः कृतवन्तौ । उ पदपूरणम् ॥

इति प्रथमस्य षष्ठ अष्टाविंशो वर्गः

सप्तमीमृचमाह—

अग्नीषोमा हविषः प्रस्थितस्य वीतं हर्यतं वृषणा जुषेथाम् ।
सुशर्माणा स्ववसा हि भूतमथा धत्तं यजमानाय शं योः ॥७॥
अग्नीषोमा हविषः प्रऽस्थितस्य वीतम् हर्यतम् वृषणा जुषेथाम्
सुऽशर्माणा सुऽअवसा हि भूतम् अथ धत्तम् यजमानाय शम् योः ॥

हे अग्नीषोमा अग्नीषोमौ, प्रस्थितस्य युवां प्रति प्रस्थानं कृतवतः अस्य हविषः अस्मदीयस्य अर्पणस्य, द्वितीयार्थे षष्ठी, सिद्धं अर्पणं वीतम् व्याप्नुतं, वी गतिव्याप्त्यादिषु, हर्यतम् व्याप्य च कान्तं कुरुतम् । हे वृषणा वर्षितारौ, जुषेथाम् सेवेथां तदस्माभिरर्पितम् । हे सुशर्माणा शोभनसुखोपेतौ स्ववसा स्ववसौ शोभनरक्षोपेतौ च भूतम् भवतम् । हि पादपूरणम् । अथ अनन्तरं योः युवां कामयमानाय, विभक्तिव्यत्ययः, यजमानाय शम् शान्तिसुखं धत्तम् विधत्तम् ॥ भूतम्—लोटि बहुलं छन्दसीति शपो लुक् । अन्ये गताः ॥

अष्टमीमृचमाह—

यो अग्नीषोमा हविषा सपर्यादेवद्रीचा मनसा यो घृतेन ।
तस्य व्रतं रक्षतं पातमंहसो विशे जनाय महि शर्म यच्छतम् ॥८॥
यः अग्नीषोमा हविषा सपर्यात् देवद्रीचा मनसा यः घृतेन तस्य व्रतम्
रक्षतम् पातम् अंहसः विशे जनाय महि शर्म यच्छतम् ॥

यः यजमानः अग्नीषोमा अग्निं सोमं च देवद्रीचा देवान् अञ्चता, देवपरायणेन मनसा मानसेन युक्तः हविषा अर्पणलक्षणेन स्वीयेन द्रव्येण सपर्यात् सपर्यति, पूजयति, यः यश्च घृतेन धीप्रदीप्त्या च युक्तः अग्नीषोमौ सपर्यति, एकाग्रेण मनसा दीप्तया बुद्ध्या चेति भावः । तस्य तादृशस्य यजमानस्य व्रतम् नियतं कर्म रक्षतम्, लङर्थे लोट्, रक्षथ एवेत्यर्थः, अंहसः पातम् तं पापात् रक्षतम्, रक्षथः । विशे जनाय विशतीति विट्, तस्मै अन्तः प्रविश्य देवान् यजते

जनाय यजमानाय महि प्रभूतं शर्म शरणं सुखं वा यच्छतम् दत्तम्, अत्रापि लडर्थ एव ॥ एकाग्रमनसो देवतापरायणस्य जनस्य पापाद्रक्षणं कर्मरक्षणं च, अन्तर्लब्धप्रवेशस्य प्रभूतं शर्मेत्युक्तम् ॥ सपर्यात्-सपर पूजायां, कण्ड्वादिः, लेट् । देवद्रीचा-देवान् अञ्चतीति देवद्र्यङ्, देवशब्दस्य टेरद्र्यादेशः ॥

नवमीमृचमाह—

अग्नीषोमा सवेदसा सहूती वनतं गिरः । सं देवत्रा बभूवथुः ॥९॥
अग्नीषोमा सऽवेदसा सहूती इति सऽहूती वनतम् गिरः सम् देवऽत्रा बभूवथुः ॥

हे अग्नीषोमा, युवां सवेदसा समानं वेदो ज्ञानं ययोस्तौ सहूती समाना हूतिराह्वानं ययोस्तौ सन्तौ गिरः स्तुतीरस्मदीयाः वनतम् संभजेथाम् । देवत्रा देवेषु संबभूवथुः युवां संभूतौ, अतः संभावितौ ॥ देवत्रा-सप्तम्यर्थे त्राप्रत्ययः ॥

दशमीमृचमाह—

अग्नीषोमावनेनं वां यो वां घृतेन दाशति । तस्मै दीदयतं बृहत् ॥१०॥
अग्नीषोमौ अनेनं वाम् यः वाम् घृतेनं दाशति तस्मै दीदयतम् बृहत् ॥

हे अग्नीषोमौ, वाम् युवयोः संबन्धी यः यजमानः अनेन घृतेन ईदृशा धीप्रदीप्त्या युक्तः सन् वाम् युष्मभ्यं दाशति यथाभागं प्रयच्छति स्वीयं अर्पणीयं तस्मै तादृशाय बृहत् बृहच्छब्दवाच्यं ऋतं सत्यं दीदयतम् प्रकाशयतम्, दीदयतिः दीप्तिकर्मा ॥

एकादशीमृचमाह—

अग्नीषोमाविमानिं नो युवं हव्या जुजोषतम् । आ यातमुपं नः सचा ॥११॥
अग्नीषोमौ इमानिं नः युवम् हव्या जुजोषतम् आ यातम् उपं नः सचा ॥

हे अग्नीषोमौ, युवम् युवां नः अस्मत्संबन्धीनि इमानि हव्या सिद्धानि अर्पणार्थानि द्रव्याणि जुजोषतम् सेवेथाम् । तथा सेवनाय नः अस्मान् सचा सह उपायातम् उपगच्छतम् ॥ जुजोषतम्-विकरणव्यत्ययेन श्लुः छान्दसः ॥

द्वादशीमृचमाह—

अग्नीषोमा पिपृतमर्वतो न आ प्यायन्तामुस्रिया हव्यसूदः ।
अस्मे बलानि मघवत्सु धत्तं कृणुतं नो अध्वरं श्रुष्टिमन्तम् ॥ १२ ॥
अग्नीषोमा पिपृतम् अर्वतः नः आ प्यायन्ताम् उस्रियाः हव्यऽसूदः अस्मे इति बलानि मघवत्ऽसु धत्तम् कृणुतम् नः अध्वरम् श्रुष्टिऽमन्तम् ॥

हे अग्नीषोमा नः अस्माकं अर्वतः अश्वलक्षितप्राणक्रियावेगान् पिपृतम् पूरयतम् । तथा हव्यसूदः हव्यमर्पणीयं सूदन्ते क्षरन्ति त्वरयन्ति प्रेरयन्तीति हव्यसूदः उस्रियाः गावः गोलक्षित-चित्प्रभाः आप्यायन्ताम् आप्यायिताः प्रवृद्धाः भवन्तु । मघवत्सु धनवत्सु देवेषु, दिव्यधन-युक्तेषु महानुभावेषु वा मध्ये अस्मे अस्मासु बलानि दिव्यानि विविधानि धत्तम् धारयतं, स्थापयतम् ॥ प्राणबलानां परिपूरणं ज्ञानरश्मीनां प्रवर्धनं मघवत्सु देवेषु मनुष्येषु वा मध्ये बलप्रतिष्ठापनं च प्रार्थितानि । तदनन्तरं नः अस्माकं अध्वरम् दिव्ययात्रात्मकं यज्ञं श्रुष्टिमन्तम् दिव्यावेश(श्रवण)युक्तं कृणुतम् कुरुतम् ॥ पिपृतम्—पॄ पालने पूरणे च । अस्मे—सप्तम्याः शे आदेशः । श्रुष्टिमन्तम्—श्रुष्टिः धननामेति स्थूलः पक्षः, श्रुष्टिः श्रवणं अन्तर्दिव्यं वा, तत्प्रेरितो दिव्यावेशश्च रहस्यार्थे ॥

इति प्रथमस्य षष्ठ एकोनत्रिंशो वर्गः
प्रथमे मण्डले चतुर्दशोऽनुवाकः समाप्तः

पञ्चदशेऽनुवाके द्वादश सूक्तानि, तत्र 'इमं स्तोममि'ति षोडशर्चं प्रथमं सूक्तम् । आङ्गिरसस्य कुत्सस्यार्षम्, पञ्चदशी षोडशी च त्रिष्टुभौ, शिष्टा जगत्यः, अग्निर्देवता । अन्या देवताः लिङ्गोक्ता निपातभाक्त्वेन अप्रधानाः ॥

तत्र प्रथमामृचमाह—

इमं स्तोममर्हते जातवेदसे रथमिव सं महेमा मनीषया ।
भद्रा हि नः प्रमतिरस्य संसद्यग्ने सख्ये मा रिषामा वयं तव ॥ १ ॥
इमम् स्तोमम् अर्हते जातऽवेदसे रथम्ऽइव सम् महेम मनीषया भद्रा हि नः प्रऽमतिः अस्य सम्ऽसदि अग्ने सख्ये मा रिषाम वयम् तव ॥

अर्हते पूज्याय जातवेदसे जातानां सर्वेषां वेदित्रे अग्नये इमम् एतत्सूक्तात्मकं स्तोमम् स्तोत्रं त्यमिव यथा तक्षा रथं तक्ष्णोति, संस्करोति च तथा मनीषया बुद्ध्या संमहेम सम्यक् पूजितं कुर्मः। अस्य अग्नेः संसदि सम्यक् सीदन्त्यस्यामिति संसत् सभा तस्यां, अग्निसंनिधौ इत्यर्थः नः अस्माकं प्रमतिः प्रकृष्टा बुद्धिः भद्रा हि कल्याणी खलु। अग्नेः साग्निध्ये तत्प्रभावादेवं स्तोमं कर्तुं समर्था निशिता नो बुद्धिरिति भावः। हे अग्ने तव सख्ये त्वदीयसखित्वे वयम् मा रिषाम हिंसिताः न भवाम, सख्ये विच्छेदः शैथिल्यं वा मा भूदित्यर्थः॥ अर्हते-अर्ह पूजायाम्। महेम-मह पूजायाम्। रिषाम-रिष हिंसायाम्॥

द्वितीयामृचमाह—

यस्मै त्वमायजसे स साधत्यनर्वा क्षेति दधते सुवीर्यम्।
स तूताव नैनमश्नोत्यंहतिरग्ने सख्ये मा रिषामा वयं तव॥२॥

यस्मै त्वम् आऽयजसे सः साधति अनर्वा क्षेति दधते सुऽवीर्यम् सः तूताव न एनम् अश्नोति अंहतिः अग्ने सख्ये मा रिषाम वयम् तव॥

यस्मै यजमानाय हे अग्ने, त्वम् आयजसे देवान् आभिमुख्येन यजसि, यजमानकृत्यं सर्वमग्निरेव निर्वहति, तस्मात्स धन्यः यस्मिन् प्रादुर्भूतोऽग्निः यजमानार्थं देवान् यजति। सः यजमानः साधति साधयति कार्यम्। अनर्वा अप्रत्यृतः, अप्रतिगतः शत्रुभिः क्षेति निवसति स्वस्थ इत्यर्थः, सुवीर्यम् शोभनवीर्यं दधते धारयते। सः तूताव स वर्धते, उत्तरोत्तराभिवृद्धिस्तस्य। एनम् यजमानं अंहतिः पाप्मा न अश्नोति न प्राप्नोति, न स्पृशतीत्यर्थः, अंहतिर्दारिद्र्यमिति सायणः, अन्यत्र "अंहतिभ्यः" पापेभ्यो निर्गमयत् (५.५५.१०) स एव पापमिति व्याचष्टे। शिष्टं व्याख्यातम्॥ क्षेति-क्षि निवासे, विकरणस्य लुक्। दधते-दध धारणे, भौवादिकः। तूताव-तू इति सौत्रो धातुः वृद्ध्यर्थः। अंहतिः-हन्तेः अंह चेति अतिप्रत्ययः॥

तृतीयामृचमाह—

शकेमं त्वा समिधं साधया धियस्त्वे देवा हविरदन्त्याहुतम्।
त्वमादित्याँ आ वह तान्ह्युश्मस्यग्ने सख्ये मा रिषामा वयं तव॥३॥

शकेम त्वा समऽइधम् साधय धियः त्वे इति देवाः हविः अदन्ति

आऽहुतम् त्वम् आदित्यान् आ वह तान् हि उश्मसि अग्ने सख्ये मा रिषाम वयम् तव ॥

हे अग्ने, त्वा त्वां समिधं समिद्धं सम्यग् ज्वलितं कर्तुं शकेम शक्ताः भूयास्म । धियः अस्मदीयाः बुद्धीः यथा युक्ता भवन्ति तथा साधय निष्पादय । त्वे त्वयि देवाः इन्द्रादयः आहुतम् हविः अर्पितमर्पणद्रव्यं अदन्ति भक्षयन्ति, स्वीकुर्वन्तीत्यर्थः । त्वम् आदित्यान् अदितेः पुत्रान् देवान् आवह आनय । तान् हि तान् खलु उश्मसि कामयामहे । शिष्टं प्राग्वत् ॥

चतुर्थीमृचमाह—

भरामेध्मं कृणवामा हवींषि ते चितयन्तः पर्वणापर्वणा वयम् ।
जीवातवे प्रतरं साधया धियोऽग्ने सख्ये मा रिषामा वयं तव ॥४॥

भराम इध्मम् कृणवाम हवींषि ते चितयन्तः पर्वणाऽपर्वणा वयम् जीवातवे प्रऽतरम् साधय धियः अग्ने सख्ये मा रिषाम वयम् तव ॥

हे अग्ने, इध्मम् इन्धनसाधनं त्वद्बोधनज्वलनकरणं अस्माकमिति शेषः । भराम संपादयाम । ते तुभ्यं हवींषि कृणवाम अर्पणीयानि भोग्यानि करवाम । वयम् पर्वणापर्वणा पदे पदे सोपानक्रमेण (दर्शपूर्णमासाभ्यामिति कर्मठाः) त्वां चितयन्तः अस्मदभिमुखं बोधयन्तः प्रज्ञापयन्तः कृणवामेति पूर्वेण संबन्धः । जीवातवे जीवनौषधाय दीर्घकालजीवनप्रदाय, प्रतरम् प्रकृष्टतरं अस्माकं धियः साधय । अन्यत्समानम् ॥ चितयन्तः—चिती संज्ञाने, संज्ञापूर्वकविधेरनित्यत्वात् लघूपधगुणाभावः ॥

पञ्चमीमृचमाह—

विशां गोपा अस्य चरन्ति जन्तवो द्विपच्च यदुत चतुष्पदक्तुभिः ।
चित्रः प्रकेत उषसो महाँ अस्यग्ने सख्ये मा रिषामा वयं तव ॥५॥

विशाम् गोपाः अस्य चरन्ति जन्तवः द्विऽपत् च यत् उत चतुःऽपत् अक्तुऽभिः चित्रः प्रऽकेतः उषसः महान् असि अग्ने सख्ये मा रिषाम वयम् तव ॥

अस्यां "द्विपत् चतुष्पत्" च प्रयुक्ते। मनुष्यादिकं गवादिकं चोक्ते इति आपाततः स्थूलोऽर्थः साधुरेव भवति। रहस्यं तु पृथिव्यां दिवि च वर्तनाय यः प्रभवति स द्विपात्। व्याहृतिचतुष्टयवेदनीयस्थानचतुष्टये पृथक् पदं स्थानं धारयितुं यः प्रभुः स चतुष्पात्। एवं अरविन्दश्रीचरणानां दृष्टिरवधेया॥ विशाम् सर्वेषां मनुष्याणां गोपाः गोपायितारः सन्तः अस्य अग्नेः जन्तवः जाताः रश्मयः चरन्ति उच्चरन्ति उद्गच्छन्ति। यच्च द्विपत् पूर्वोक्तस्थानद्वयवर्ति-प्रभावशालि मानुष्यकं अस्ति, उत अपि च चतुष्पत् पदचतुष्टयवर्तिदिव्यज्ञानोपेतं ऋग्यादिकं अस्ति तदुभयं अक्तुभिः अञ्जकैः अभिव्यञ्जकैः अस्य रश्मिभिः अक्तमाश्लिष्टं भवतीत्यध्याहारः। हे अग्ने, तव प्रकेतः प्रज्ञापयिता प्रकाशको रश्मिः चित्रः नानावर्णः अद्भुतः सर्वदा प्रकाशयति, उषास्तु प्रभात एव, तस्मात् उषसः उषसोऽपि त्वं महान् असि। अन्यत् समानम्॥ गोपाः-गुपू रक्षणे, क्विप्॥

इति प्रथमस्य षष्ठे त्रिंशो वर्गः

षष्ठीमृचमाह—

त्वमध्वर्युरुत होतासि पूर्व्यः प्रशास्ता पोता जनुषा पुरोहितः।
विश्वा विद्वाँ आर्त्विज्या धीर पुष्यस्यग्ने सख्ये मा रिषामा वयं तव॥६॥

त्वम् अध्वर्युः उत होता असि पूर्व्यः प्रऽशास्ता पोता जनुषा पुरःऽहितः
विश्वा विद्वान् आर्त्विज्या धीर पुष्यसि अग्ने सख्ये मा रिषाम वयम् तव॥

त्वम् अध्वर्युः अध्वरकार्यनिर्वाही त्वमेव। उत अपि च पूर्व्यः होता मुख्य आह्वाता असि भवसि। पूर्व्यः पुराणश्चिरन्तनो नित्य इति यावत्। अग्निमुखा देवा एव आर्त्विज्यं निर्वहन्ति यजमानाय। तेषां प्रतिनिधिभूताः मानुषर्त्विजः बाह्ये कर्मणि हौत्र-आध्वर्यव-औद्गात्र-ब्रह्मण्यानि अनुतिष्ठन्ति॥ अत्र यथा अग्निरेव सर्वे देवाः, तथा स एव ऋत्विजः सर्वेऽपीति प्रतिपाद्यते। तथा त्वमेव प्रशास्ता प्रकर्षेण शिक्षकोऽसि, पोता पावयिता शोधयिता च ऋत्विगसि। जनुषा जन्मना पुरोहितः देवेषु मध्ये अग्निरेव यजमाने प्रथमो जायते, तं पुरोधाय क्रमेणान्येषां देवानां प्रादुर्भावः। त्वं विश्वा सर्वाणि आर्त्विज्या आर्त्विज्यानि आह्वानादिकर्माणि विद्वान् जानन्, हे धीर प्राज्ञ पुष्यसि स्वयं पुष्टः यजमानं पोषयसि। अन्यत्समानम्॥ जनुषा—जनेरुसिः। आर्त्विज्या—ब्राह्मणादित्वात् ष्यञ्॥

सप्तमीमृचमाह—

यो विश्वतः सुप्रतीकः सदृङ्ङसि दूरे चित्सन्तळिदिवाति रोचसे।
रात्र्याश्चिदन्धो अति देव पश्यस्यग्ने सख्ये मा रिषामा वयं तव ॥७॥

यः विश्वतः सुऽप्रतीकः सऽदृङ् असि दूरे चित् सन् तळित्ऽइव अति रोचसे रात्र्याः चित् अन्धः अति देव पश्यसि अग्ने सख्ये मा रिषाम वयम् तव ॥

हे अग्ने, यः त्वं सुप्रतीकः शोभनाङ्गः सन् विश्वतः सर्वतः सदृङ् असि सदृशो भवसि। यजमानस्यान्तर्बहिर्वा अन्तःप्रकाशावस्थायां अप्रकाशावस्थायां च तुल्योऽसीत्यर्थः। दूरे चित् सन् दूरे वर्तमानोऽपि तळिदिव तळित् अन्तिकनाम, समीपे सन्निव अति रोचसे अत्यन्तं दीप्यसे। हे देव द्योतमानाग्ने, रात्र्याः चित् रात्रेरपि अन्धः अन्धकारं अति पश्यसि अतीत्य तव दृष्टिर्वर्तत इति भावः। यजमानस्यान्तरप्रकाशदशामतिघनामप्यतीत्य सोऽग्निः तमसः परस्तात् उज्ज्वलः पश्यति। अन्यत्समानम्॥ सदृङ्–समानोपपदाद्दृशेः क्विन्, समानस्य सभावः॥

अष्टमीमृचमाह—

पूर्वी देवा भवतु सुन्वतो रथोऽस्माकं शंसो अभ्यस्तु दूढ्यः।
तदा जानीतोत पुष्यता वचोऽग्ने सख्ये मा रिषामा वयं तव ॥८॥

पूर्वः देवाः भवतु सुन्वतः रथः अस्माकम् शंसः अभि अस्तु दुःऽध्यः तत् आ जानीत उत पुष्यत वचः अग्ने सख्ये मा रिषाम वयम् तव ॥

हे देवाः अग्न्यङ्गभूताः सर्वे देवाः, सुन्वतः सोमाभिषवं कुर्वतः यजमानस्य रथः पूर्वः भवतु दिव्ययात्रासाधनं यानं प्रतिरोधकैः राक्षसादिभिः शत्रुभिरनासादितं सत् पूर्वं गच्छतु। अस्माकम् शंसः अस्मदीयं शंसनीयं अभिशापरूपं वचनं दूढ्यः दुर्धियः पापबुद्धीन् देवद्विषः अभ्यस्तु अभिभवतु। तत् वचः आजानीत अस्मदीयं तदभिशापवचनं अवगच्छत, उत अवगम्य च पुष्यत पोषयत, सफलं कुरुतेत्यर्थः। अन्यत् समानम्॥ शंसः–शंस्यते कीर्त्यत इति शंसोऽभिशापः, कर्मणि घञ्। दूढ्यः–दुष्टं ध्यायन्तीति दुर्धियः, ध्यै चिन्तायामित्यस्मात् क्विप्, पृषोदरादिषु ध्यै चेति पाठात् दुरो रेफस्योत्वं, उत्तरपदादेः ष्टुत्वं च॥

नवमीमृचमाह—

वधैर्दुःशंसाँ अप दुद्धयो जहि दूरे वा ये अन्ति वा के चिदत्रिणः।
अथा यज्ञाय गृणते सुगं कृध्यग्ने सख्ये मा रिषामा वयं तव ॥९॥

वधैः दुःऽशंसान् अप दुःऽध्यः जहि दूरे वा ये अन्ति वा के चित् अत्रिणः
अथ यज्ञाय गृणते सुऽगम् कृधि अग्ने सख्ये मा रिषाम वयम् तव ॥

हे अग्ने, त्वं वधैः हननैस्ताडनैरित्यर्थः दुःशंसान् दुःखेन कीर्तनीयान् दृढ्यः दुर्धियः पापात्मनः अप जहि वधं प्रापय ये केचित् ये केचन दूरे दूरप्रदेशे अन्ति वा अन्तिके समीपे वा अत्रिणः अत्तारो राक्षसादयः वर्तन्ते, तान् दुर्धियोऽपजहीति संबन्धः। अथ अनन्तरं यज्ञाय यजनपरिपूर्तये गृणते त्वां स्तुक्ते यजमानाय सुगम् शोभनं मार्गं कृधि कुरु। अन्यत् समानम्॥ वधैः–हनश्च वध इति हन्तेः करणे अप् वधादेशश्च। दुःशंसान्–कर्मणि खल्। जहि–लोटि हिः, हन्तेः जः इति जादेशः। सुगम्–सुदुरोरधिकरणे इति गमेर्डः। कृधि–हेर्धिः, विकरणस्य लुक्॥

दशमीमृचमाह—

यदयुक्था अरुषा रोहिता रथे वातजूता वृषभस्येव ते रवः।
आदिन्वसि वनिनो धूमकेतुनाऽग्ने सख्ये मा रिषामा वयं तव ॥१०॥

यत् अयुक्थाः अरुषा रोहिता रथे वातऽजूता वृषभस्यऽइव ते रवः आत्
इन्वसि वनिनः धूमऽकेतुना अग्ने सख्ये मा रिषाम वयम् तव ॥

हे अग्ने, अरुषा रोचमानौ रोहिता लोहितवर्णौ इन्द्रस्य हरी इव अग्नेः रोहितौ अश्वौ मन्त्रेषु विश्रुतौ वातजूता वातस्य जूतं जवो वेग इव वेगो ययोस्तौ अश्वौ यत् यदा रथे अयुक्थाः अयोजयः तदानीं ते तव रवः शब्दः वृषभस्येव दृप्तस्य महोक्षस्य शब्द इव गम्भीरो भवति। आत् अनन्तरं वनिनः वनसंबन्धिनः पृथ्वीरुहान् धूमकेतुना रश्मिना "धूमः ऊर्जवेगेन यो वाष्पगतिप्रायः कम्पो जायते सः केतुः प्रज्ञापको ज्ञानं यस्येति" प्राग् व्याख्यातमन्तरर्थानुरोधेन (१.२७.११) इन्वसि व्याप्नोषि। अन्यत् समानम्॥ पृथ्वीरुहाणां दहनं, अग्निप्रादुर्भावप्रभावात् अन्नमयशरीरस्थानां हेयानां सर्वेषां विनष्टिं लक्षयति। अयमाशयः आग्नेयमन्त्रेषु अन्यत्र चावधेयः, यथा वा पराशरसूक्तेषु "अग्निर्ह दाति रोमा पृथिव्याः" (१.६५.४)॥

अयुक्थाः—युजिर् योगे, लुङ् । अरुषेत्यादिषु द्विवचनेषु सुपां सुलुगित्याकारः । रवः—रु शब्दे इन्वसि—इवि व्याप्तौ ॥

इति प्रथमस्य षष्ठ एकत्रिंशो वर्गः

एकादशीमृचमाह—

अध॑ स्व॒नादुत बि॑भ्युः पत॒त्रिणो॑ द्र॒प्सा यत्ते॑ यव॒सादो॒ व्यस्थिरन् ।
सु॒गं तत्ते॑ ताव॒केभ्यो॒ रथे॒भ्योऽग्ने॑ स॒रूप्ये मा रि॑षामा व॒यं तव॑ ॥११॥
अध॑ स्व॒नात् उ॒त बि॒भ्युः प॒त॒त्रिणः॑ द्र॒प्साः यत् ते॒ यव॑सऽअदः॑ वि अ॑स्थिरन्
सु॒ऽगम् तत् ते॒ ता॒व॒केभ्यः॑ रथे॑भ्यः अग्ने॑ स॒रूप्ये मा रि॒षा॒म॒ व॒यम् तव॑ ॥

यथा यात्रायां यात्रिकस्य तद्यानस्य च पृथ्वीरुहाः कण्टकादयः प्रतिबन्धका भवन्ति, तथा यजमानस्य अध्वरयात्रायां अन्नमयदेहोद्भवाः तमोजाड्यादिसंस्काराः वासनाश्च सूक्ष्मदेहं मनः प्राणात्मकं बाधन्ते, तत्प्रतिरोधकाः भवन्ति । यदा अग्नेर्ज्वालया ते विनाशिता भवन्ति तदा मार्गः सुगमो भवति, अन्नमयं जगत् शरीरं च शोधिते भवतः ॥ इदमेवाहास्यां ऋचि । हे अग्ने, अध वनप्रवेशात्परं स्वनात् त्वदीयशब्दात् उत पतत्रिणः उत अप्यर्थः शीघ्रमुत्पतनशीलाः पक्षिणोऽपि वृक्षावासाः बिभ्युः भीता भवन्ति । रहस्यं तु, चण्डवेगाः मरुतः पक्षिणः, प्राणबलोद्रिक्तधीवृत्ति-विशेषाः । यत् यदा ते तव द्रप्साः ज्वालैकदेशाः, प्राग्विवृतो द्रप्सशब्दः (१.१४.४) यवसादः तृणानामत्तारः व्यस्थिरन् वनं व्याप्य अवतिष्ठन्ते "यद्वातजूतो वना व्यस्थादग्निर्ह दाति रोमा पृथिव्याः" इति अन्यत्र चोक्तम् । तत् तदा ते तव तावकेभ्यः रथेभ्यः त्वदीयरथेभ्यश्च सुगम् सुखेन गन्तुं शक्यं वनं भवति, अन्नमयशरीरजातं सर्वं प्रतिरोधकमिति रहस्यम् । अन्यत्समानम् । बिभ्युः—छान्दसो लिट् लडर्थे । व्यस्थिरन्—विपूर्वस्तिष्ठतिरात्मनेपदी, व्यत्ययेन झस्य रन् ॥

द्वादशीमृचमाह—

अ॒यं मि॒त्रस्य॒ वरु॑णस्य॒ धाय॑सेऽवया॒तां म॒रुतां॒ हेळो॒ अद्भु॑तः ।
मृ॒ळा सु नो॒ भूत्वे॑षां मन॒ः पुन॒रग्ने॑ स॒रूप्ये मा रि॑षामा व॒यं तव॑ ॥१२॥
अ॒यम् मि॒त्रस्य॑ वरु॑णस्य धाय॑से अव॑ऽया॒ताम् म॒रुता॑म् हेळः॑ अद्भु॑तः मृ॒ळ
सु नः॒ भू॒तु॒ ए॒षा॒म् मनः॑ पुनः॑ अग्ने॑ स॒रूप्ये मा रि॒षा॒म॒ व॒यम् तव॑ ॥

अयम् अग्नेरुपासकः मित्रस्य देवस्य वरुणस्य देवस्य उभयोश्च धायसे धारणाय, स्वस्मिन्नवस्थापनाय प्रभवत्विति शेषः। अवयाताम् अवेत्युपसर्गः अधःपर्यायः प्राणक्षेत्रात् अन्तरिक्षादधस्तात् गच्छतां मरुताम् हेळः क्रोधः अद्भुतः महान् प्रसिद्धः। तस्मादपि रक्षतां मित्रावरुणौ मयि अवस्थापितौ। नः अस्मान् हे अग्ने, सु मृळ सुष्ठु सुखय, एषाम् मरुतां मनः चित्तं पुनः भूतु पुनरपि प्रसन्नं भवतु। अन्यत्समानम्॥ धायसे–धाञो भावेऽसुन्, आतो युक्। अवयाताम्–यातेः शतृ, षष्ठीबहुवचनम्। भूतु–शपो लुक्॥

त्रयोदशीमृचमाह—

देवो देवानामसि मित्रो अद्भुतो वसुर्वसूनामसि चारुरध्वरे।
शर्मन्त्स्याम तव सप्रथस्तमेऽग्ने सख्ये मा रिषामा वयं तव॥१३॥
देवः देवानाम् असि मित्रः अद्भुतः वसुः वसूनाम् असि चारुः अध्वरे
शर्मन् स्याम तव सप्रथःऽतमे अग्ने सख्ये मा रिषाम वयम् तव॥

हे अग्ने, त्वं देवानाम् सर्वेषां मध्ये देवः विशेषतो द्योतमानः सन् अद्भुतः महान् मित्रः असि प्रौढः सखा भवसि। चारुः रमणीयस्त्वं अध्वरे यज्ञयात्रायां वसूनाम् वर्तमानानां दिव्यानां धनानां वसुः असि निवासयिता भवसि। सप्रथस्तमे सर्वतः पृथुतमे अत्यन्तं विस्तीर्णे तव शर्मन् त्वदीये शर्मणि शरणे वासस्थले स्याम वर्तमानाः भवेम॥ "ऋतं बृहत्" अग्नेः स्वं गृहं तदुरु भवति त्रैलोक्यादुपरि, तत्र स्यामेत्युक्तम्। अन्यत् प्राग्वत्॥ शर्मन्–सुपां सुलुगिति सप्तम्या लुक्॥

चतुर्दशीमृचमाह—

तत्ते भद्रं यत्समिद्धः स्वे दमे सोमाहुतो जरसे मृळयत्तमः।
दधासि रत्नं द्रविणं च दाशुषेऽग्ने सख्ये मा रिषामा वयं तव॥१४॥
तत् ते भद्रम् यत् समऽइद्धः स्वे दमे सोमऽआहुतः जरसे मृळयत्ऽतमः
दधासि रत्नम् द्रविणम् च दाशुषे अग्ने सख्ये मा रिषाम वयम् तव॥

तत् वक्ष्यमाणलक्षणं ते त्वदीयं भद्रम् दुरितप्रतिद्वन्द्वि नित्यकल्याणम्। प्रथमसूक्ते भद्रशब्दार्थस्य वैशिष्ट्यं सविस्तरं प्रपञ्चितम्। समिद्धः सम्यक् प्रज्वलितः स्वे दमे स्वीये गृहे

"ऋते सत्ये बृहति" सोमऽआहुतः सोमेन रसेन संतर्पितः सन् जरसे स्तूयसे महर्षिभिरिति शेषः, इति यत् यदस्ति, तत् ते भद्रमिति संबन्धः। एवमुत्तमस्त्वं मृळयत्तमः अतिशयेन सुखयिता रत्नम् रमणीयं हर्षाधायकं रतिसुखं द्रविणम् च उत्तमं धनं च दाशुषे यजमानाय दधासि धारयसे, प्रयच्छसि। समानमन्यत्॥ समिद्धः—इन्धी दीप्तौ, कर्मणि निष्ठा। जरसे—जरतिः स्तुतिकर्मा, व्यत्ययेन कर्मणि कर्तृप्रत्ययः॥

पञ्चदशीमृचमाह—

यस्मै त्वं सुद्रविणो ददाशोऽनागास्त्वमदिते सर्वताता।
यं भद्रेण शवसा चोदयासि प्रजावता राधसा ते स्याम ॥१५॥
यस्मै त्वम् सुऽद्रविणः ददाशः अनागाःऽत्वम् अदिते सर्वऽताता यम् भद्रेण शवसा चोदयासि प्रजाऽवता राधसा ते स्याम ॥

हे सुद्रविणः शोभनधन, अदिते अखण्डस्वरूप, अग्ने, सर्वताता सर्वतातौ सर्वेषु ज्ञानक्रियाव्यापारेषु यस्मै यजमानाय अनागास्त्वम् अदोषत्वं, पापराहित्यं ददाशः त्वम् ददासि, स धन्यः। यम् यं च भद्रेण कल्याणेन शवसा उज्ज्वलबलेन चोदयासि संयोजयसि स च भाग्यवान्। वयमपि ते तव प्रजावता सन्ततियुक्तेन राधसा उत्तमेन धनेन युक्ताः स्याम भवेम॥ सुद्रविणः—शोभनानि द्रविणानि यस्य, सकारोपजनश्छान्दसः, द्रु गतौ॥ ददाशः—शपः श्लुः, लेट्यडागमः। सर्वताता—सर्वदेवात्तातिलिति स्वार्थे तातिल्प्रत्ययः। चोदयासि—चुद प्रेरणे, लेट्याडागमः॥

षोडशीमृचमाह—

स त्वमग्ने सौभगत्वस्य विद्वानस्माकमायुः प्र तिरेह देव।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः॥१६॥
सः त्वम् अग्ने सौभगऽत्वस्य विद्वान् अस्माकम् आयुः प्र तिर इह देव
तत् नः मित्रः वरुणः ममहन्ताम् अदितिः सिन्धुः पृथिवी उत द्यौः॥

हे देव, अग्ने, सः त्वम् पूर्वोक्तविधस्त्वं सौभगत्वस्य विद्वान् सौभाग्यं जानन् इह अस्मिन् लोके अस्माकम् आयुः अस्मदीयं सशरीरजीवनं प्रतिर प्रवर्धय, येन वयं त्वद्युक्ताः तावकाः

स्यामेति विवक्षा। नः अस्माकं तत् देवार्थं आयुः मित्रादयः वक्ष्यमाणाः ममहन्ताम् पूजयन्तां अभिमान्य रक्षन्तु। के ते देवाः? मित्रः वरुणः अदितिः देवमाता सिन्धुः स्यन्दनशीलाः आपः पृथिवी उत चार्थे द्यौः द्युलोकाधिष्ठाता देवः॥ ममहन्ताम्—मह पूजायाम्, लोटि शपः श्लुः॥

इति प्रथमस्य षष्ठे द्वात्रिंशो वर्गः

प्रथमाष्टके षष्ठोऽध्यायः समाप्तः

अथ प्रथमाष्टके सप्तमोऽध्याय आरभ्यते। प्रथमे मण्डले पञ्चदशेऽनुवाके प्रथमं सूक्तं व्याख्यातम्। द्वे विरूपे इति एकादशर्चं द्वितीयं सूक्तम्, आङ्गिरसस्य कुत्सस्यार्षम्, आग्नेयम्, त्रैष्टुभम्॥

तत्र प्रथमामृचमाह—

द्वे विरूपे चरतः स्वर्थे अन्यान्या वत्समुप धापयेते।
हरिरन्यस्यां भवति स्वधावाञ्छुक्रो अन्यस्यां ददृशे सुवर्चीः॥१॥

द्वे इति विरूपे इति विऽरूपे चरतः स्वर्थे इति सुऽअर्थे अन्याऽअन्या वत्सम् उप धापयेते इति हरिः अन्यस्याम् भवति स्वधाऽवान् शुक्रः अन्यस्याम् ददृशे सुऽवर्चीः॥

स्वर्थे शोभनः अर्थः प्रयोजनं ययोस्ते विरूपे विभिन्नरूपे द्वे अहोरात्रस्वरूपे, प्रकाशाप्रकाशदशावस्थाने कालात्मानौ इत्यर्थः चरतः पर्यावृत्त्या गच्छतः। ते अहोरात्रस्वरूपे अन्यान्या परस्परव्यतिहारेण वत्सम् जातं शिशुं अग्निं उपधापयेते स्वीयं रसं पाययतः। दिव्यसंपत्तये यज्ञयात्रां कुर्वतो यजमानस्यान्तरग्नौ प्रादुर्भूते सति, तं जातं अहश्च रात्रिश्च पोषयतः। अहःशब्देन प्रकाशदशा रात्रिशब्देन अप्रकाशदशा च लक्षिते। पर्यायेण प्रकाशाप्रकाशौ भवतः। अप्रकाशे सर्वस्य प्रपञ्चस्य विस्मृतिः, प्रकाशे तु उज्ज्वला स्मृतिः। प्रकाशदशानुभूतीनां स्वात्मसात्काराय अप्रकाशावस्था आवश्यकी भवति। तत्रापि अग्निर्जागरूकः पोष्यत इति रहस्यम्। "अहश्च कृष्णं अहरर्जुनं च" (६.९.१) इत्यादिमन्त्रान्तराणां इदमेव रहस्यम्। न चेत् कथं अहः कृष्णं कृष्णवर्णं भवेत्? एकदा अप्रकाशः अन्यदा प्रकाश इति खल्वाशयः॥ अन्यस्याम् अहोरूपायां प्रकाशावस्थायां हरिः सूर्यः स्वधावान् स्वधारणशक्तियुक्त उज्ज्वलन् भवति स्वप्रकाशं ख्यापयन् वर्तते। अन्यस्याम् रात्रिस्वरूपायां अप्रकाशावस्थायां शुक्रः निर्मल-

दीप्तिः। अग्निः सुवर्चाः शोभनवर्चस्कः ददृशे दृश्यते। दशाद्वयेऽपि यजमानजातस्याग्नेः संवर्धनं भवत्येवेत्युक्तम्॥ अन्यान्या-कर्मव्यतिहारे सर्वनाम्नो द्वे भवतः। धापयेते-धेट् पाने, हेतुमण्णिच्। ददृशे-दृशेः छन्दसि वर्तमाने लिट्॥

द्वितीयामृचमाह—

दशेमं त्वष्टुर्जनयन्त गर्भमतन्द्रासो युवतयो विभृत्रम्।
तिग्मानीकं स्वयशसं जनेषु विरोचमानं परि षीं नयन्ति॥२॥
दश इमम् त्वष्टुः जनयन्त गर्भम् अतन्द्रासः युवतयः विऽभृत्रम्
तिग्मऽअनीकम् स्वऽयशसम् जनेषु विऽरोचमानम् परि सीम् नयन्ति॥

प्रथमानुवाके तृतीयसूक्ते "अप्वीमिस्तना पूतासः" इत्यस्य व्याख्याने सूक्ष्माः शक्तयः अप्व्य इत्युपपादितम् (पु. ११७-११८) तत्सर्वमवधेयम्। विस्तरभयान्नेह मन्त्रवर्णा उदाहियन्ते। तत्र या दश स्वसार उक्ताः ता एव "युवतयः मातरः योषणः" अग्निं पोषयन्तीति अन्यत्र सूक्तेषु वर्ण्यते, तथा वैश्वामित्र (३ म. १ सू.) पाराशर्यादि (१.७३.१०) सूक्तेषु च। दशसंख्याया वैशिष्ट्यं न शक्यं निर्णेतुम्। पूर्तिद्योतकमित्यूहः॥ अतन्द्रासः अनलसाः युवतयः नित्यतरुण्यः दश दशसंख्याकाः शक्तयः त्वष्टुः विश्वकर्मणो देवात् इमं गर्भम् अग्निं जनयन्त उत्पादयन्ति। कीदृशम्? विभृत्रम् वितत्य भृतं धारितं, तिग्मानीकम् तीक्ष्णमुखं तीव्रतेजसं, स्वयशसम् स्वीयेन यशसा कीर्तनीयप्रभावेण युक्तं जनेषु सर्वेषु जातेषु भूतेषु विरोचमानम् विविधं दीप्यमानम्। ईदृशं सीम् एनमग्निं परि परितः नयन्ति प्रापयन्ति, एकत्र प्रादुर्भूतं अग्निं स्वीयपोषणेन पूर्वोक्ता युवतयः परितः प्रभाभिस्तं प्रसारयन्ति॥ विभृत्रम्-भृञ्धातोरौणादिकः क्रन्प्रत्ययः, यद्वा कर्मणि निष्ठायां रेफोपजनश्छान्दसः। तिग्मानीकम्-तिज निशाने, मक्प्रत्ययः, अन प्राणने, अनिहृषिभ्यां चेति कीकन्प्रत्ययः। परि षीम्-पूर्वपदादिति षत्वम्॥

तृतीयामृचमाह—

त्रीणि जाना परि भूषन्त्यस्य समुद्र एकं दिव्येकमप्सु।
पूर्वामनु प्र दिशं पार्थिवानामृतून्प्रशासद्वि दधावनुष्ठु॥३॥
त्रीणि जाना परि भूषन्ति अस्य समुद्रे एकम् दिवि एकम् अप्ऽसु पूर्वीम्

अनु प्र दिशम् पार्थिवानाम् ऋतून् प्रऽशासत् वि दधौ अनुष्टु ॥

अस्य अग्नेः त्रीणि जाना त्रीणि जन्मानि परिभूषन्ति परि समित्यर्थे, संभवन्ति, परितोऽलंकुर्वन्तीति वा। क्व तानि जन्मस्थानानि? समुद्रे एकम् अखण्डसच्चपूर्णे सर्वजगदुपादानभूते एकं जन्म, दिवि एकम् द्युलोके एकमन्यत्, द्वितीयं जन्म, ततः अप्सु अन्तरिक्षस्थानासु प्राणावासभूमिषु अन्यदेकम् ॥ प्रथमं अखण्डज्ञानक्रियाशक्तिनिधौ समुद्रे, ततः ज्योतिर्मयज्ञानभुवि 'दिवि', ततः प्राणक्रियाशक्तिनिधिभूतासु मध्यमस्थानासु "अप्सु" एवं जन्मत्रयमग्नेरुक्तम्। तत्र दिव्यः उत्तमस्थाने सौरज्योतिरात्मना वर्तमानोऽग्निः अखण्डतया वर्तमानस्य देशस्य तथा कालस्य च विभागं यजमानस्योपयोगाय विधत्त इत्याह (देशकालविभागं सूर्यो विधत्ते बहिर्जगति)। अन्तर्यजने प्रवृत्तस्य ऋषेः कया दिशा गन्तव्यमिति उपदिशति, प्रदिशति वा मार्गं उत्तमस्थानोऽग्निः, तथा कालविशेषं चोपदिशति पदे पदे प्रवर्तनाय। पार्थिवानाम् पृथिवीसंबन्धिनां सर्वेषां प्रशासत् प्रकर्षेण ज्ञापयन् पूर्वाम् प्र दिशम् प्रथमां प्रकृष्टां उपदेशपद्धतिं अनु अनुक्रमेण अनुष्टु सम्यगर्थे, सुष्ठु विदधौ विधत्ते। तथा ऋतून् युक्तकालविशेषान् विदधौ। अन्यत्रेवात्रापि धात्वर्थः शब्दानामवधातव्यः। प्राधान्येन प्रदिशमित्यस्यार्थविवरणं सायणीयव्याख्यामनुसृत्यैव भवति। स हि व्याचष्टे "'प्राचीनं ज्योतिः प्रदिशा दिशन्ता' (१०.११०.७) प्रदिशा प्रदिष्टेन उपदिष्टेन मार्गेण" इति ॥ जाना—जनी प्रादुर्भावे, भावे घञ्। भूषन्ति—भूधातोर्लेटि सिप् बहुलमिति सिप्, भूष अलङ्कार इत्यस्माद्वा। प्रशासत्—शासु अनुशिष्टौ, अस्मात् शतृ। अनुष्टु—अव्ययम्, अपदुःसुषु स्थ इति विधीयमानः कुप्रत्ययः बहुलवचनात् तिष्ठतेरनुपूर्वादपि भवति ॥

चतुर्थीमृचमाह—

क इमं वो निण्यमा चिकेत वत्सो मातृर्जनयत स्वधाभिः।
बह्वीनां गर्भो अपसामुपस्थान्महान्कविर्निश्चरति स्वधावान् ॥४॥

कः इमम् वः निण्यम् आ चिकेत वत्सः मातृः जनयत स्वधाभिः बह्वीनाम् गर्भः अपसाम् उपऽस्थात् महान् कविः निः चरति स्वधाऽवान् ॥

अदृश्रुतोऽयमग्निः, रहस्यं को वेदेति पृच्छति कुत्स ऋषिः। हे ऋषयः, यजमानाः, निण्यम् अन्तर्हितं, रहसि स्थितं इमम् अग्निं वः युष्मासु मध्ये, कः आचिकेत को जानाति? दुर्विज्ञेयं

रहस्यमग्नेरित्यर्थः। तद्रहस्यमाह—वत्सः शिशुः अग्निः मातॄः स्वस्य पोषयित्रीः नित्यतरुणीः दिव्याः शक्तीः, स्वधाभिः स्वधारणसामर्थ्यप्रभाभिः जनयत उत्पादयति। दक्षाददितिरजायत अदितेर्दक्ष इति यथा अन्यत्र तथा मातृरग्निर्जनयतीति मन्त्रवर्णेषु चमत्कृतिस्तत्र तत्र लक्ष्यते। बह्वीनाम् अपसाम् अपां उपस्थात् उत्सङ्गात् गर्भः वत्सोऽग्निः महान् बृहन् कविः द्रष्टा स्वधावान् स्वधारणसामर्थ्योपेतश्च एवंभूतः सन् निश्चरति निर्गच्छति। बह्वीभ्यो मातृभ्य एको गर्भः उक्तगुणविशिष्टः सन् निश्चरति। अद्भुतमिदं अतः को वेदेति पृच्छा॥ अपसाम्—आपः कर्माख्यायां ह्रस्वश्च नुट् च वेति बहुलवचनात् आप्नोतेः असिप्रत्ययो ह्रस्वश्च॥

पञ्चमीमृचमाह—

आविष्ट्यो वर्धते चारुरासु जिह्मानामूर्ध्वः स्वयशा उपस्थे।
उभे त्वष्टुर्बिभ्यतुर्जायमानात्प्रतीची सिंहं प्रति जोषयेते॥५॥

आविःऽत्यः वर्धते चारुः आसु जिह्मानाम् ऊर्ध्वः स्वऽयशाः उपऽस्थे उभे इति त्वष्टुः बिभ्यतुः जायमानात् प्रतीची इति सिंहम् प्रति जोषयेते इति॥

आसु अप्सु उक्तस्वरूपासु मातृषु प्राणक्रियाशक्तिभूयिष्ठासु चारुः शोभनरूपः सन् आविष्ट्यः आविर्भूतः प्रकाशमानः वर्धते वृद्धिं प्राप्नोति। जिह्मानाम् कुटिलानां तिर्यगवस्थाय स्यन्दमानानां तासां अपां उपस्थे उत्सङ्गे स्थितः ऊर्ध्वः ऊर्ध्वज्वलनः स्वयशाः स्वकीयवर्णनीयप्रभावोपेतः वर्धत इति संबन्धः। त्वष्टुः विश्वकर्मणः स्रष्टुः देवशिल्पिनः प्रभावेण जायमानात् उत्पद्यमानात् अस्मादग्नेः उभे द्यौश्च पृथिवी च बिभ्यतुः भयं प्रापतुः। तादृशोऽस्य प्रतापः। अथ ते उभे सिंहम् सिंहवत् विक्रान्तमेनमग्निं प्रतीची प्रतिगच्छन्त्यौ आभिमुख्येन प्राप्नुवन्त्यौ प्रति जोषयेते संसेवेते॥ आविष्ट्यः—आविःशब्दात् छन्दसीति शैषिकस्त्यप्। जोषयेते—स्वार्थे णिच्॥

इति प्रथमस्य सप्तमे प्रथमो वर्गः

षष्ठीमृचमाह—

उभे भद्रे जोषयेते न मेने गावो न वाश्रा उप तस्थुरेवैः।
स दक्षाणां दक्षपतिर्बभूवाञ्जन्ति यं दक्षिणतो हविर्भिः॥६॥

उभे इति भद्रे इति जोषयेते इति न मेने इति गावः न वाश्राः उप तस्थुः

एवैः सः दक्षाणाम् दक्षऽपतिः बभूव अञ्जन्ति यम् दक्षिणतः हविःऽभिः॥

उभे द्यावापृथिव्यौ, ऊर्ध्वा दिव्या मनोमयी चित् द्यौर्भवति, अधरा भौमा मनोमयी जागरितस्थाना चित् पृथिवी भवतीति रहस्यं बहुधा प्रागुक्तं स्मार्यम्। भद्रेकन्याष्यौ मेने न स्त्रियौ इव जोषयेते सेवेते। जातमग्निं शोभनाङ्ग्यौ योषितौ यथा प्रभुं सेवेते तथा उभे अपि चितौ सेवनेन प्रीणयतः। अपि च वाश्राः हम्भारवं कुर्वन्त्यः गावो न गावो यथा एवैः गमनैः स्वकीयैश्चरित्रैः उपतस्थुः वत्सान् संगच्छन्ते तथा उभे पूर्वोक्ते अग्निं उपस्थिते भवतः, अनेन आदरातिशयो द्योत्यते। एवं प्रीणित आदृतश्च सः अग्निः दक्षाणाम् सदसद्विवेकबलानां मध्ये दक्षपतिः दक्षस्य अतिशयितबलस्य पतिः अधिपतिः बभूव। यम् अग्निं हविर्भिः अर्पणैः दक्षिणतः दाक्षिण्येन देवकार्ये औदार्येण अञ्जन्ति अलंकुर्वन्ति, यद्वा व्यञ्जयन्ति स्पष्टीकुर्वन्ति महान्तो यजमानाः। बाह्ये कर्मणि, दक्षिणतः आहवनीयस्य दक्षिणे भागेऽवस्थिता ऋत्विजः हविर्भिः चरुपुरोडाशादिभिः अञ्जन्ति अक्तं आर्द्रं कुर्वन्ति। सोऽग्निरिति पूर्वेण संबन्धः॥ वाश्राः—वाशृ शब्दे, गतः। एवैः—इण् गतौ, भावे वन्प्रत्ययः॥

सप्तमीमृचमाह—

उद्यंयमीति सवितेव बाहू उभे सिचौ यतते भीम ऋञ्जन्।
उच्छुक्रमत्कमजते सिमस्मान्नवा मातृभ्यो वसना जहाति॥७॥

उत् यंयमीति सविताऽइव बाहू इति उभे इति सिचौ यतते भीमः ऋञ्जन्
उत् शुक्रम् अत्कम् अजते सिमस्मात् नवा मातृऽभ्यः वसना जहाति॥

अयमग्निः एवं प्रादुर्भूतो वर्धितस्तर्पितश्च द्यावापृथिवीभ्यां, सवितेव सर्वस्य प्रेरकः सूर्यो यथा बाहू बाहुस्थानीयान् किरणान् उद्गमयति तथा उद्यंयमीति स्वीयानि तेजांसि उद्यतानि ऊर्ध्वाभिमुखानि करोति। अपि च अयं भीमः भयङ्करः उभे सिचौ सिञ्चतः अभीष्टवर्षणेन इति सिचौ (फलेन संयोजयत इति सायणः) द्यावापृथिव्यौ ऋञ्जन् प्रसाधयन्, स्वाविर्भावेन स्वतेजसा च भूषयन्नित्यर्थः, यतते स्वव्यापारे प्रयतते॥ ततः, सिमस्मात् सर्वस्मात् भूतजातात् शुक्रम् ज्वलितं अत्कम् सारभूतं रसं उदजते उद्गमयति। सर्वत्र भूतजाते यो गुप्तोऽन्तर्हितो रसो वर्तते तं निर्गमय्य सर्वमपि ऊर्ध्वगतिकं करोतीति भावः। अनन्तरं मातृभ्यः उक्तलक्षणाभ्यः अद्भ्यः उद्धृत्य नवा वसना प्रत्यग्राणि वसनानि आच्छादकानि प्रागतेजोबलादीनि जहाति मुञ्चति

भूतजातस्य सर्वस्योत्तरोत्तराभिवृद्धये । यंयमीति-यम उपरमे, यङ्लुकि अभ्यासस्य नुगागमः । सिचौ-षिचिर् क्षरणे, क्विप् । अत्कम्-अत सातत्यगमने, कन्प्रत्ययः । सिमस्मात्-सिमशब्दः सर्वशब्दपर्यायः । नवा, वसाना-उभयतः शेर्लोपः छन्दसि । जहाति-ओहाक् त्यागे ॥

अष्टमीमृचमाह—

त्वेषं रूपं कृणुत उत्तरं यत्सम्पृञ्चानः सदने गोभिरद्भिः ।
कविर्बुध्नं परि मर्मृज्यते धीः सा देवताता समितिर्बभूव ॥८॥

त्वेषम् रूपम् कृणुते उत्ऽतरम् यत् सम्ऽपृञ्चानः सदने गोभिः अत्ऽभिः कविः बुध्नम् परि मर्मृज्यते धीः सा देवऽताता सम्ऽइतिः बभूव ॥

सदने अन्तरिक्षस्थाने विशाले प्राणमयाकाशप्रदेशे, गोभिः चिद्रश्मिभिः अद्भिः तेजोबलवाहिनीभिश्च सह संपृञ्चानः संपृक्तः संयुक्तः सन् त्वेषम् दीप्तं सर्वैर्द्रष्टुमशक्यं उत्तरम् उत्कृष्टतरं उत्तमस्थानोचितं दिव्यं रूपम् स्वरूपं यत् यदा कृणुते करोति, तदा सः कविः सर्वस्य द्रष्टा भूत्वा बुध्नम् सर्वस्य तेजोबलादेः मूलभूतं द्युस्थानं परि परितः मर्मृज्यते स्वतेजसा मार्ष्टि, शुद्धं करोति । सा धीः तादृशी । धारणासमर्था द्युस्थानगता शुद्धा बुद्धिः देवताता देवैर्विस्तारिता समितिः सङ्गमनं तेजसां, बभूव संवृत्ता । अग्निना तेजोबलयुक्तेन यदा तदुपरि मूलस्थानं शुद्धं क्रियते, तदा तत्र प्रकाशमाना धीमयी शुद्धा चित् तेजस्संहतिरूपं देवसमागमस्थानं भवतीत्युक्तम् ॥ संपृञ्चानः-पृची संपर्के, रौधादिकः, लटः शानच् । मर्मृज्यते-मृजूष् शुद्धौ, अस्माद्यङि अभ्यासस्य नुगागमः । देवताता-देवेन देवैर्वा तता, तनोतेः, कर्मणि निष्ठा, व्यत्ययेन आत्वम् ॥

नवमीमृचमाह—

उरु ते ज्रयः पर्येति बुध्नं विरोचमानं महिषस्य धाम ।
विश्वेभिरग्ने स्वयशोभिरिद्धोऽदब्धेभिः पायुभिः पाह्यस्मान् ॥९॥

उरु ते ज्रयः परि एति बुध्नम् विऽरोचमानम् महिषस्य धाम विश्वेभिः अग्ने स्वयशःऽभिः इद्धः अदब्धेभिः पायुऽभिः पाहि अस्मान् ॥

महिषस्य महतः ते तव ज्रयः राक्षसादीनां अभिभवनशीलं विरोचमानम् विशेषेण दीप्यमानं उरु विस्तीर्णं धाम तेजः बुध्नम् त्रैलोक्यस्य तेजोबलादेर्वा मूलभूतं ऊर्ध्वं स्थानं परि परितः

एति गच्छति, व्याप्नोतीत्यर्थः। हे अग्ने, इद्धः प्रज्वलितस्त्वं विश्वेभिः सर्वैः स्वयशोभिः स्वकीयतेजोभिः अस्मान् पाहि अस्मान् रक्ष। कीदृशैः? अदब्धेभिः अहिंसितैः अप्रतिहतैः, पायुभिः रक्षणसमर्थैः ॥ ऋयः-जि ऋि अभिभवे, असुन् ॥

दशमीमृचमाह—

धन्वन्स्रोतः कृणुते गातुमूर्मिं शुक्रैरूर्मिभिरभि नक्षति क्षाम्।
विश्वा सनानि जठरेषु धत्तेऽन्तर्नवासु चरति प्रसूषु ॥१०॥

धन्वन् स्रोतः कृणुते गातुम् ऊर्मिम् शुक्रैः ऊर्मिऽभिः अभि नक्षति क्षाम् विश्वा सनानि जठरेषु धत्ते अन्तः नवासु चरति प्रऽसूषु ॥

धन्वन् निरुदके क्षेत्रे, अन्नमये जडे देहे गातुम् गमनशीलं मार्गं ऊर्मिम् आप्यतरङ्गं तद्युक्तं, स्रोतः प्रवाहरूपं यथा भवति तथा कृणुते करोति। जडेऽन्तर्हिता आपः तेजोबलादि-शक्तिततीः निर्गमय्य प्रवाहयतीति भावः। क्षाम् भूमिं, (जागरितस्थानां स्थूलामपि सर्वां चितिं) शुक्रैः निर्मलैः ज्वलद्भिः ऊर्मिभिः तेजस्तरङ्गैः अभिनक्षति अभिव्याप्नोति। तदनन्तरं विश्वा सनानि सर्वाणि संभजनीयानि भोग्यानि जठरेषु गुप्तेषु अन्तःगूढं यथा भवति तथा धत्ते धारयते, अवस्थापयति। नवासु प्रसूषु नूतनासु ज्योतिर्बलादीनां उत्पादयित्रीषु आविष्कर्त्रीषु अन्नमय-प्राणमयमनोमयादिभूमिकासु अन्तः गूढं चरति सव्यापारं गच्छति ॥ धन्वन्-धवि गत्यर्थः, इदित्वान्नुम्, कनिन्युवृषीत्यादिना कनिन्, सप्तम्या लुक्। गातुम्-गाङ् गतौ, तुप्रत्ययः। नक्षति-नक्ष गतौ ॥

एकादशीमृचमाह—

एवा नो अग्ने समिधा वृधानो रेवत्पावक श्रवसे वि भाहि।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥११॥

एव नः अग्ने समऽइधा वृधानः रेवत् पावक श्रवसे वि भाहि तत् नः मित्रः वरुणः ममहन्ताम् अदितिः सिन्धुः पृथिवी उत द्यौः ॥

हे पावक, शोधक, अग्ने, समिधा अस्माभिः साधितेन ज्वलनसाधनेन एव एवं वृधानः वर्धमानः सन् रेवत् दिव्यसंपद्युक्तं यथा भवति तथा श्रवसे अस्माकं श्रवणाय दिव्याय, अन्तः

सत्यश्रुतेः संपादनायेति यावत् विभाहि विशेषेण दीप्यस्व। तत् उक्तं श्रवः नः अस्माकं मित्रादयो रक्षन्तु। अर्धर्चो व्याख्यातः प्राक्॥ वृधानः–वृधेश्चानश्, शपो लुक् छान्दसः। रेवत्–रयेर्मतौ बहुलमिति संप्रसारणं, रयिशब्दान्मतुप्, छन्दसि मतुपो वत्वम्॥

इति प्रथमस्य सप्तमे द्वितीयो वर्गः

'स प्रत्नथे'ति नवर्चं तृतीयं सूक्तं कुत्सस्यार्षं आग्नेयं त्रैष्टुभम्। द्रविणोदस्त्वविशिष्टः अग्निः शुद्धो वा देवतेत्याहुः॥

तत्र प्रथमामृचमाह—

स प्रत्नथा सहसा जायमानः सद्यः काव्यानि बळधत्त विश्वा।
आपश्च मित्रं धिषणा च साधन्देवा अग्निं धारयन्द्रविणोदाम्॥ १॥

सः प्रत्नऽथा सहसा जायमानः सद्यः काव्यानि बट् अधत्त विश्वा आपः च मित्रम् धिषणा च साधन् देवाः अग्निम् धारयन् द्रविणःऽदाम्॥

सहसा बलेन जायमानः उत्पद्यमानः सः अग्निः, सहसस्पुत्र इति हि स वर्ण्यते। सद्यः प्रादुर्भावक्षणात्परमेव प्रत्नथा प्रत्नश्चिरन्तन इव विश्वा सर्वाणि काव्यानि कविकर्माणि, सर्वस्य द्रष्टुः कवेः कृत्यानि, बट् सत्यं अधत्त अधारयत्। "नि काव्या वेधसः शश्वतस्कर्हस्ते दधानो नर्या पुरूणि" (१.७२.१) इति मन्त्रान्तरेऽपि अयमाशयो द्रष्टव्यः। आपः च ज्योतिर्बलादिवाहिन्यः शक्तयः च धिषणा च उत्कृष्टा बुद्धिश्च तमग्निं मित्रम् सखिभूतं साधन् साधयन्ति, कुर्वन्ति। देवाः इन्द्रादयः अग्निम् इमं द्रविणोदाम् द्रविणस्य दातारं द्रुतगमनशीलस्य धनविशेषस्य दातारं धारयन् अधारयन्, मानुषे जने यजमाने प्रादुर्भावात्पूर्वं देवा ईदृशं द्रविणोदां स्वेषु धारितवन्तः इत्यर्थः॥ प्रत्नथा–प्रत्नशब्दात् थाल् छन्दसि इवार्थे। साधन्–षिधु संराद्धौ, णिचि सिध्यतेः अपारलौकिके इत्यात्वं, लेव्यडागमः। द्रविणोदाम्–द्रविणानि ददातीति द्रविणोदाः, दु गतौ, द्रुदक्षिभ्यामिनन्, ददातेर्विच्, सकारान्तं तु असुनि कृते निष्पद्यते॥

द्वितीयामृचमाह—

स पूर्वया निविदा कव्यतायोरिमाः प्रजा अजनयन्मनूनाम्।
विवस्वता चक्षसा द्यामपश्च देवा अग्निं धारयन्द्रविणोदाम्॥ २॥

सः पूर्वया निऽविदा कव्यता आयोः इमाः प्रऽजाः अजनयत् मनूनाम् विवस्वता चक्षसा द्याम् अपः च देवाः अग्निम् धारयन् द्रविणःऽदाम् ॥

सः अग्निः आयोः आयुः मनुष्यनाम तस्य पूर्वया चिरन्तन्या निविदा देवताह्वानसमर्थया स्तुत्या आहूतः सन् कव्यता कविः द्रष्टा सत्यश्रुत्, कव्यं कवनं सत्यदर्शनं तत् कुर्वता साधनेन पश्यन्त्या बुद्ध्येत्यर्थः, मनूनाम् मन्तॄणां मननशालिनां इमाः प्रजाः सन्ततीः अजनयत् उदपादयत्। अपि च विवस्वता प्रकाशमानेन चक्षसा स्वकीयेन तेजसा द्याम् द्युलोकं अपः च ज्योतिर्बलादिवाहिनीः शक्तीश्च व्याप्नोतीति शेषः। कव्यता दर्शनसाधनेन मन्तॄणां मनुष्याणां सन्ततीरजनयत्, तेजसा साधनेन द्यामपश्च व्याप्तवान्। सायणीये, "कव्यता स्तुतिं कुर्वता सूक्तेन" "आयोः मनोः" इति पदार्थौ दत्तौ। चिन्त्यमेतत्, अध्याहारबाहुल्यं क्लेशं जनयति तात्पर्यावगाहने। देवाः इत्याद्यन्यत् समानम्॥ कव्यता—कुधातोः भावे यत्, कव्यं कवनं तत् करोतीति कव्यति, लटः शतरि तृतीयैकवचनान्तं कव्यता इति॥

तृतीयामृचमाह—

तमीळत प्रथमं यज्ञसाधं विश आरीराहुतमृञ्जसानम्।
ऊर्जः पुत्रं भरतं सृप्रदानुं देवा अग्निं धारयन्द्रविणोदाम् ॥ ३॥

तम् ईळत प्रथमम् यज्ञऽसाधम् विशः आरीः आऽहुतम् ऋञ्जसानम् ऊर्जः पुत्रम् भरतम् सृप्रऽदानुम् देवाः अग्निम् धारयन् द्रविणःऽदाम्॥

हे विशः मनुष्याः आरीः देवं अग्निं गच्छन्त्यः यूयं तम् अग्निम् देवं ईळत स्तुध्वम्, अध्येषध्वम्। कीदृशम्? प्रथमम् देवेषु पूर्वमस्माकं, यज्ञसाधम् यजनस्य साधकं आहुतम् अर्पणैः तर्पितं ऋञ्जसानम् प्रसाध्यमानं स्तुतिभिः ऊर्जः पुत्रम् वेगवद्वीर्यस्य पुत्रं, सहसस्पुत्रः इति हि स प्रसिद्धः, भरतम् भर्तारं सृप्रदानुम् सर्पणशीलदानोपेतं, अविच्छेदेन ददाति दातव्यमित्यर्थः। देवा इत्यादि गतम्॥ ईळत—लोटि व्यत्ययेन परस्मैपदम्। यज्ञसाधम्—यज्ञं साधयतीति यज्ञसात्, साधयतेः क्विप्, णेरनिटीति णिलोपः। आरीः—ऋ गतौ, जनिघसिभ्यामिण् इति बहुलग्रहणादस्मादपि इण्, कृदिकारादक्तिन इति ङीष्, वा छन्दसीति पूर्वसवर्णदीर्घत्वम्। ऋञ्जसानम्—ऋञ्जतेः कित्, कर्मणि असानच्। भरतम्—भृञ् भरणे, भृमृदृशीत्यादिना अतच्। सृप्रदानुम्—सृप्लृ गतौ, स्फायितञ्चीत्यादिना रक्, सृप्रो दानुर्दानं यस्य तम्॥

चतुर्थीमृचमाह—

स मा॑तरिश्वा पुरुवा॑रपुष्टिर्विद॒द्गा॒तुं त॑नयाय स्व॒र्वित्।
वि॒शां गो॒पा ज॑नि॒ता रोद॑स्योर्दे॒वा अ॒ग्निं धा॑रयन्द्रविणो॒दाम्॥४॥

सः मा॒त॒रिश्वा॑ पुरुवा॑रऽपुष्टिः वि॒दत् गा॒तुम् त॑नयाय स्व॒ःऽवित् वि॒शाम् गो॒पाः ज॒नि॒ता रोद॑स्योः दे॒वाः अ॒ग्निम् धा॒र॒य॒न् द्र॒वि॒ण॒ःऽदाम्॥

सः अग्निः मातरिश्वा मातरि अन्तरिक्षे श्वसिति इति वायौ रूढिः, अत्र अग्नेः प्राणबल विशिष्टं वैशाल्यं व्यापकत्वं च द्योतयति, पुरुवारपुष्टिः पुरुभिर्बहुभिः वारा वरणीया पुष्टिरभिवृद्धिः यस्य स एवंभूतः तनयाय सन्ततये, अस्माकं विस्ताराय गातुम् मार्गं विदत् लम्भयतु। पुनः कीदृशः? स्वर्वित् स्वः स्वर्गस्य लम्भयिता, विशाम् प्रजानां गोपाः रक्षिता, रोदस्योः द्यावापृथिव्योः जनिता जनयिता प्रादुर्भावयिता। देवा इत्यादि गतम्॥ विदत्–विद्लृ लाभे, अस्मादन्तर्भावितण्यर्थात् छान्दसो लुङ्। जनिता–मन्त्रे इति णिलोपनिपातः॥

पञ्चमीमृचमाह—

नक्तो॒षासा॒ वर्ण॑मा॒मेम्या॑ने धा॒पये॑ते शिशु॒मेकं॑ समी॒ची।
द्यावा॒क्षामा॑ रु॒क्मो अ॒न्तर्वि भा॑ति दे॒वा अ॒ग्निं धा॑रयन्द्रविणो॒दाम्॥५॥

नक्तो॒षसा॑ वर्ण॑म् आ॒मेम्या॑ने इत्या॑ऽऽमेम्या॑ने धा॒पये॑ते इति॑ शिशु॑म् एक॑म् स॒मी॒ची इति॑ स॒म्ऽई॒ची द्यावा॒क्षामा॑ रु॒क्मः अ॒न्तः वि भा॒ति॒ दे॒वाः अ॒ग्निम् धा॒र॒य॒न् द्र॒वि॒ण॒ःऽदाम्॥

नक्तोषसा रात्रिरहश्च वर्णम् स्वीयं रूपं आमेम्याने परस्परं पुनः पुनः हिंसन्त्यौ, परिणमयन्त्यौ इत्यर्थः समीची सङ्गते संश्लिष्टे सत्यौ एकम् शिशुम् वत्सं अग्निं धापयेते पाययेते। "द्वे विरूपे" इत्यत्र (१.९५.१) व्याख्यातमवधेयम्। रुक्मः रोचमानः सोऽग्निः द्यावाक्षामा द्यावापृथिव्योः अन्तः मध्ये वि भाति विशेषेण भासते। देवा इत्यादि गतम्॥ आमेम्याने–मीञ् हिंसायाम्, अस्माद्यङ्लुगन्तात् व्यत्ययेन शानच्, शपो लुक्, एरनेकाच इति यण्। समीची–संपूर्वादञ्चतेः किप्। द्यावाक्षामा–दिवो द्यावादेशः, षष्ठ्या डादेशः॥

इति प्रथमस्य सप्तमे तृतीयो वर्गः

षष्ठीमृचमाह—

रायो बुध्नः सङ्गमनो वसूनां यज्ञस्य केतुर्मन्मसाधनो वेः ।
अमृतत्वं रक्षमाणास एनं देवा अग्निं धारयन्द्रविणोदाम् ॥ ६ ॥

रायः बुध्नः सम्ऽगमनः वसूनाम् यज्ञस्य केतुः मन्मऽसाधनः वेरिति वेः
अमृतऽत्वम् रक्षमाणासः एनम् देवाः अग्निम् धारयन् द्रविणःऽदाम् ॥

रायः धनस्य समृद्धिरूपस्य बुध्नः मूलभूतः वसूनाम् वासहेतुभूतानां धनानां सङ्गमनः सङ्गमयिता, यज्ञस्य केतुः यजनस्य प्रज्ञापयिता, वेः गच्छतः उत्तरोत्तरं पदमिति शेषः, यजमानस्य मन्मसाधनः मननीयस्य साधयिता, अभिमतस्य निष्पादयितेत्यर्थः, एवंभूतोऽग्निः, तं एनम् अग्निं अमृतत्वम् रक्षमाणासः स्वकीयं अमरणधर्मं पालयन्तो देवाः इत्यादि गतम् ॥ सङ्गमनः—नन्द्यादिलक्षणो ल्युः । वेः—वी गत्यादिषु, औणादिक इप्रत्ययः टिलोपश्च ॥

सप्तमीमृचमाह—

नू च पुरा च सदनं रयीणां जातस्य च जायमानस्य च क्षाम् ।
सतश्च गोपां भवतश्च भूरेर्देवा अग्निं धारयन्द्रविणोदाम् ॥ ७ ॥

नु च पुरा च सदनम् रयीणाम् जातस्य च जायमानस्य च क्षाम् सतः
च गोपाम् भवतः च भूरेः देवाः अग्निम् धारयन् द्रविणःऽदाम् ॥

नू च अद्येत्यर्थे निपातः पुरा च पुराणकाले च रयीणाम् सर्वविधधनानां सदनम् आवासस्थानभूतं जातस्य च जायमानस्य च उत्पन्नस्य उत्पद्यमानस्य च सर्वस्य भूतजातस्य क्षाम् वासभूमिभूतं सतश्च गोपाम् अविकार्यतया स्वतःसिद्धस्य सर्वत्र सतः स्वभावस्य रक्षितारं भूरेः भवतश्च अमितस्य परिणामं प्राप्नुवतः सर्वस्यापि गोपां, एवंभूतं अग्निं देवा इत्यादि गतम् ॥ क्षाम्—क्षि निवासगत्योः, अस्माण्णिच, वृद्ध्यायादेशौ, ण्यन्तात् क्विप्, णेरनिटीति णिलोपः ॥

अष्टमीमृचमाह—

द्रविणोदा द्रविणसस्तुरस्य द्रविणोदाः सनरस्य प्र यँसत् ।
द्रविणोदा वीरवतीमिषं नो द्रविणोदा रासते दीर्घमायुः ॥ ८ ॥

द्रविणःऽदाः द्रविणसः तुरस्य द्रविणःऽदाः सनरस्य प्र यंसत् द्रविणःऽदाः वीरऽवतीम् इषम् नः द्रविणःऽदाः रासते दीर्घम् आयुः ॥

द्रविणोदाः द्रुतगतिशीलस्य धनविशेषस्य बलस्य वा दाताऽग्निः तुरस्य त्वरमाणस्य द्रविणसः द्रविणस्य (चलतो जङ्गमस्येति सायणः) एकदेशं, कमप्यंशं नः प्रयंसत् अस्मभ्यं प्रयच्छतु। तथा द्रविणोदाः सनरस्य सननीयस्य संभजनीयस्य (जङ्गमात्मकस्य धनस्येति सायणः) 'प्रयंसत्' एकदेशं प्रयच्छतु। द्रविणोदाः तथा सः वीरवतीम् वीर्योपेतां इषम् प्रचोदनाशक्तिं "प्रयंसत्" तथा द्रविणोदाः दीर्घम् आयुः रासते प्रयच्छतु॥ तुरस्य—तुर त्वरणे, इगुपधलक्षणः कः। सनरस्य—वन षण संभक्तौ, अरन्प्रत्ययः। यंसत्—यम उपरमे, लेट्यडागमः, लेटि सिप्। रासते—रा दाने, पूर्ववल्लेटि सिप्, व्यत्ययेनात्मनेपदम्॥

नवमीमृचमाह—

एवा नो अग्ने समिधा वृधानो रेवत्पावक श्रवसे वि भाहि।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः॥९॥
एव नः अग्ने सम्ऽइधा वृधानः रेवत् पावक श्रवसे वि भाहि तत् नः मित्रः वरुणः ममहन्ताम् अदितिः सिन्धुः पृथिवी उत द्यौः॥

एकादशी पूर्वसूक्ते व्याख्यातेयम्॥

इति प्रथमस्य सप्तमे चतुर्थो वर्गः

अथ 'अप न' इत्यष्टर्चं चतुर्थं सूक्तं कुत्सस्यार्षं गायत्रम्। शुचिगुणकोऽग्निः शुद्धो वा देवता॥

तत्र प्रथमामृचमाह—

अप नः शोशुचदघमग्ने शुशुग्ध्या रयिम्। अप नः शोशुचदघम्॥१॥
अप नः शोशुचत् अघम् अग्ने शुशुग्धि आ रयिम् अप नः शोशुचत् अघम्॥

हे अग्ने, नः अस्माकं अघम् पापं अप शोशुचत् अस्मत्तः निर्गत्य शोकग्रस्तं सत् विनश्यतु। अपि च अस्माकं रयिम् समृद्धिरूपं धनविशेषं आ समन्तात् शुशुग्धि प्रकाशय। उक्तार्थमपि

वाक्यं आदरातिशयद्योतनाय पुनः पठ्यते, नः अघम् अप शोशुचत् इति ॥ शोशुचत्–शुच शोके, यङ्लुगन्तात् लेट्यडागमः । शुशुग्धि–शुच दीप्तौ, लोटि शपः श्लुः ॥

द्वितीयामृचमाह—

सुक्षेत्रिया सुगातुया वसूया च यजामहे । अप नः शोशुचदघम् ॥ २ ॥
सुऽक्षेत्रिया सुगाऽतुऽया वसुऽया च यजामहे अप नः शोशुचत् अघम् ॥

सुक्षेत्रिया शोभनक्षेत्रेच्छया, क्षेत्रं च अन्नमयादियुक्तं शरीरं बोध्यम् । सुगातुया शोभनमार्गेच्छया, दिव्ययात्रामार्गः राक्षसादिशत्रुशून्यः सुगमः स्यादिति इच्छया, वसूया च वसु धनं तदिच्छया, वासहेतुभूतसंपन्निमित्तभूतया च यजामहे पूजयामः अग्निम् । अन्यत्समानम् ॥ सुक्षेत्रिया–शोभनं क्षेत्रं सुक्षेत्रं, तद्विषया इच्छा सुक्षेत्रिया, तृतीयाया लुक् । एवमुत्तरत्रापि ॥

तृतीयामृचमाह—

प्र यद्वन्दिष्ठ एषां प्रास्माकासश्च सूरयः । अप नः शोशुचदघम् ॥ ३ ॥
प्र यत् भन्दिष्ठः एषाम् प्र अस्माकासः च सूरयः अप नः शोशुचत् अघम् ॥

यत् यथा एषाम् ऋषीणां स्तोतॄणां मध्ये अयं कुत्सः प्रभन्दिष्ठः प्रकर्षेण कल्याणतमः, स्तोतृतम इति वा, एवं अस्माकासः आस्माकीनाः सूरयः च विद्वांसश्च "प्र भन्दिष्ठाः" भवन्ति । अन्यत्समानम् ॥ भन्दिष्ठः–भन्दतिः स्तुतिकर्मा, भदि कल्याणे सुखे च, अस्मात् तृजन्तात् तुश्छन्दसीति इष्ठन्, तृलोपश्छन्दसि । अस्माकासः–अण्प्रत्ययलोपश्छान्दसः, आज्जसेरसुक् ॥

चतुर्थीमृचमाह—

प्र यत्ते अग्ने सूरयो जायेमहि प्र ते वयम् । अप नः शोशुचदघम् ॥ ४ ॥
प्र यत् ते अग्ने सूरयः जायेमहि प्र ते वयम् अप नः शोशुचत् अघम् ॥

हे अग्ने, यत् यस्मात् ते तव सम्बन्धिनः स्तोतारः सूरयः विद्वांसः प्र प्रजायन्ते, तस्मात् वयं च वयमपि ते त्वदीयाः सन्तः प्रजायेमहि सूरयो भवेम । अन्यत्समानम् ॥ जायेमहि–प्रार्थनायां लिङ् ॥

पञ्चमीमृचमाह—

प्र यद॒ग्नेः सह॑स्वतो वि॒श्वतो॒ यन्ति॑ भा॒नवः॑। अप॑ नः शोशुचद॒घम्॥ ५॥
प्र यत् अ॒ग्नेः सह॑स्वतः वि॒श्वतः॑ यन्ति॑ भा॒नवः॑ अप॑ नः शोशुचत् अ॒घम्॥

सहस्वतः सहनवतः, अभिभवतः पापानां इति शेषः, अग्नेः भानवः दीप्तयः विश्वतः सर्वतः प्रयन्ति प्रकर्षेण गच्छन्ति, यत् यस्मादेवं तस्मात् अग्नितेजसा 'नः अघं अप शोशुचत्'॥

षष्ठीमृचमाह—

त्वं हि वि॑श्वतोमुख वि॒श्वतः॑ परि॒भूरसि॑। अप॑ नः शोशुचद॒घम्॥ ६॥
त्वम् हि वि॒श्वतः॑ऽमुख॒ वि॒श्वतः॑ प॒रि॒ऽभूः आसि॑ अप॑ नः शोशुचत् अ॒घम्॥

हे अग्ने, त्वम् हि त्वं खलु विश्वतोमुख सर्वतोज्वाल, विश्वतः सर्वतः परिभूः असि अस्माकं परिग्रहीता भवसि, रक्षको भवेत्यर्थः। परिपूर्वस्य भवतेः परिग्रहार्थः प्रागुक्तः। अन्यत्समानम्॥

सप्तमीमृचमाह—

द्विषो॑ नो विश्वतोमु॒खाति॑ ना॒वेव॑ पारय। अप॑ नः शोशुचद॒घम्॥ ७॥
द्विषः॑ नः॒ वि॒श्वतः॑ऽमुख॒ अति॑ ना॒वाऽइ॑व पा॒र॒य॒ अप॑ नः शोशुचत् अ॒घम्॥

हे विश्वतोमुख, सर्वतोमुखाग्ने, नावेव नावा नदीमिव द्विषः शत्रून् नः अस्मान् अति पारय अतिक्रमय्य दूरं प्रापय। अन्यत्समानम्॥

अष्टमीमृचमाह—

स नः॒ सिन्धु॑मिव ना॒वयाति॑ पर्षा स्व॒स्तये॑। अप॑ नः शोशुचद॒घम्॥ ८॥
सः नः॒ सिन्धु॑म्ऽइव ना॒वया॑ अति॑ पर्ष॒ स्व॒स्तये॑ अप॑ नः शोशुचत् अ॒घम्॥

हे अग्ने, सः स त्वं नः अस्मान् नावया नावा सिन्धुमिव नदीमिव स्वस्तये क्षेमार्थं अतिपर्ष शत्रूनतिक्रमय्य उद्दिष्टं स्थानं प्रापय। अन्यद्वृतम्॥ पर्ष—पॄ पालनपूरणयोः, लोटि छन्दसि शपः श्लोरभावः, बहुलवचनात् सिप्॥

इति प्रथमस्य सप्तमे पञ्चमो वर्गः

वैश्वानरस्येति तृचं पञ्चमं सूक्तं कुत्सस्यार्षं त्रैष्टुभम्। वैश्वानरगुणकोऽग्निर्देवता॥

तत्र प्रथमामृचमाह—

वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्रीः।
इतो जातो विश्वमिदं वि चष्टे वैश्वानरो यतते सूर्येण॥१॥
वैश्वानरस्य सुऽमतौ स्याम राजा हि कम् भुवनानाम् अभिऽश्रीः इतः जातः विश्वम् इदम् वि चष्टे वैश्वानरः यतते सूर्येण॥

वैश्वानरस्य विश्वेषां नराणां सम्बन्धी, तत्र आत्मभावेन स्वामित्वेन च वर्तनात्, तस्याग्नेः सुमतौ शोभनायां बुद्धौ स्याम अनुग्राह्यत्वेन वर्तमाना भवेम। हि कम् एतद्विशब्दार्थे, स हि वैश्वानरः अभिश्रीः अभिश्रयणीयः आभिमुख्येन सेवितव्यः सन् भुवनानाम् सर्वेषां जगतां भूतजातानां च राजा स्वामी भवति। सः इतो जातः अस्मादुपासकात् प्रादुर्भूतः इदम् विश्वम् परिदृश्यमानं सर्वं जगत् वि चष्टे विशेषेण पश्यति, एवं पश्यन् सर्वस्य द्रष्टा भूत्वा सूर्येण उत्तमस्थानेन सत्यज्योतिरात्मना यतते संगच्छते। यजमानव्यष्टौ एकत्र प्रादुर्भूतः सर्वत्र व्यापको द्रष्टा च भूत्वा स्वीयमूलस्थानभूतेनोर्ध्वेन ज्योतिषा संगतो भवति॥ वैश्वानरस्य—नरो संज्ञायामिति पूर्वपदस्य दीर्घत्वं, तस्येदमित्यण्। चष्टे—चक्षिङ् व्यक्तायां वाचि, अयं पश्यतिकर्मा च॥

द्वितीयामृचमाह—

पृष्टो दिवि पृष्टो अग्निः पृथिव्यां पृष्टो विश्वा ओषधीरा विवेश।
वैश्वानरः सहसा पृष्टो अग्निः स नो दिवा स रिषः पातु नक्तम्॥२॥
पृष्टः दिवि पृष्टः अग्निः पृथिव्यां पृष्टः विश्वाः ओषधीः आ विवेश
वैश्वानरः सहसा पृष्टः अग्निः सः नः दिवा सः रिषः पातु नक्तम्॥

अग्निः अयं वैश्वानरः दिवि द्युलोके पृष्टः निषिक्तः निहितः। तथा पृथिव्याम् इह च पृष्टः निषिक्तो निहितो वर्तते। स एवंभूतः विश्वाः ओषधीः सर्वाः भूसारस्य आविष्कर्त्रीः भूजन्मनः वानस्पत्यसंपदः पृष्टः संस्पृष्टः सः अग्निः आ विवेश अन्तः प्रविष्टः, परिपाकसंपादनाय। सः वैश्वानरः अग्निः एवंगुणविशिष्टोऽग्निर्वैश्वानरः सहसा बलेन पृष्टः निषिक्तः सन् नः अस्मान्

दिवा नक्तम् अहर्निशं, सर्वदेत्यर्थः रिषः हिंसकात् पापात् पातु रक्षतु ॥ पृष्टः–पृषु सेचने, निष्ठायां यस्य विभाषेति इट्प्रतिषेधः । रिषः–रिष हिंसायाम्, क्विप् ॥

तृतीयामृचमाह—

वैश्वानर तव तत्सत्यमस्त्वस्मान्रायो मघवानः सचन्ताम् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥३॥
वैश्वानर तव तत् सत्यम् अस्तु अस्मान् रायः मघऽवानः सचन्ताम् तत् नः मित्रः वरुणः ममहन्ताम् अदितिः सिन्धुः पृथिवी उत द्यौः ॥

हे वैश्वानर, तव तत् सत्यम् त्वदीयं तच्छब्दवाच्यं सत्यं ज्योतिः अस्तु अस्माकं प्राप्यं भवतु । मघवानः महनीयेन धनेन युक्ताः रायः समृद्धिरूपधनविशेषाः दिव्याः अस्मान् सचन्ताम् सेवन्ताम्, उत्तमसत्यप्राप्तौ ईदृशा रायः सुगमा एव । एवं यदस्माभिः प्रार्थितं तत् मित्रादयो मामहन्तामित्यादि गतम् ॥

इति प्रथमस्य सप्तमे षष्ठो वर्गः

'जातवेदस' इत्येकर्चं षष्ठं सूक्तम्, मरीचिपुत्रस्य कश्यपस्यार्षम् त्रैष्टुभम्, जातवेदोगुणकोऽग्निर्देवता ॥ ऋक्संहितायां इदमेकमेव एकर्चं सूक्तमित्यत्र विशेषोऽवधेयः । तान्त्रिकैरुपात्तेषु वेदमन्त्रेषु दुर्गामन्त्रत्वेनायं मन्त्रो गृहीत इति च बोध्यम् ॥

तामिमामृचमाह—

जातवेदसे सुनवाम सोममरातीयतो नि दहाति वेदः ।
स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः ॥१॥
जातऽवेदसे सुनवाम सोमम् अरातिऽयतः नि दहाति वेदः सः नः पर्षत् अति दुःऽगानि विश्वा नावाऽइव सिन्धुम् दुःऽइता अति अग्निः ॥

जातवेदसे जातानां सर्वेषां वेदित्रे सोमम् सर्वानुभूतिरसं सुनवाम अभिषुणवाम, संस्कृत्य समर्पयेम । सः अग्निः अरातीयतः शत्रुमिवास्मानाचरतः, अस्मासु शत्रुत्वमाचरतः राक्षसादेः इत्यर्थः वेदः ज्ञानं धनं वा निदहाति नितरां दहतु, पापात्मनां ज्ञाने सति महत् कष्टं साधुलोकस्य देवपरायणस्य, तेषां ज्ञानविनाशे सर्वक्षेमं भवति । सः अग्निः जातवेदाः नः अस्मान्

विश्वा सर्वाणि दुर्गाणि दुर्गमनानि स्थानानि दुःखानि च अति पर्षत् अतिक्रमय्य दुर्गतिरहितं सुखं प्रापयतु। तत्र दृष्टान्तः–इव यथा नावा नौकया सिन्धुम् नदीं कर्णधारः तारयति, तथा दुरिता दुरितानि पापानि अति तारयत्वस्मान्॥ दहाति–दहतेः लेट्यडागमः। पर्षत्–पॄ पालनपूरणयोः, अस्मादन्तर्भावितण्यर्थाल्लेट्यडागमः, लेटि सिप्॥

इति प्रथमस्य सप्तमे सप्तमो वर्गः

'स यो वृषे'त्येकविंशत्यृचं सप्तमं सूक्तम्। वार्षागिराः ऋज्राश्व-अम्बरीष-सहदेव-भयमान-सुराधसः ऋषयः। त्रिष्टुप् छन्दः इन्द्रो देवता॥

तत्र प्रथमामृचमाह—

स यो वृषा वृष्ण्येभिः समोका महो दिवः पृथिव्याश्च सम्राट्।
सतीनसत्वा हव्यो भरेषु मरुत्वान्नो भवत्विन्द्र ऊती॥१॥

सः यः वृषा वृष्ण्येभिः सम्ऽओकाः महः दिवः पृथिव्याः च सम्ऽराट् सतीनऽसत्वा हव्यः भरेषु मरुत्वान् नः भवतु इन्द्रः ऊती॥

यः इन्द्रः वृषा वर्षिता अभीष्टानां दिव्यसंपदां वृष्ण्येभिः वृष्णि भवैर्वीर्यैः समोकाः सं सङ्गतं ओकः स्थानं यस्य सः, वीर्यैः समवेतः, महः महतः दिवः द्युलोकस्य पृथिव्याः च प्रथितायाः पृथुलायाः भूमेश्च सम्राट् ईश्वरः, सतीनसत्वा सतीनं सत्यसंबन्धि ज्योतिर्बलादिकं तस्य सत्वा आसादयिता प्रापयिता। सायणस्तु 'सतीनं वृष्टयुदकं, यद्वा सती माध्यमिका वाक् इना ईश्वरा यस्य तत् सतीनं तत्सत्वा' इति व्याचष्टे। अस्मत्पक्षे तु, 'सत्' शब्दात् औणादिक ईन्प्रत्ययः, दकारस्य व्यत्ययेन तकारः छान्दसः, भरेषु यजनेषु हव्यः आह्वातव्यः एवंभूतः मरुत्वान् मरुद्भिर्युक्तः सः इन्द्रः नः अस्माकं ऊती ऊतये, चतुर्थ्याः पूर्वसवर्णदीर्घः, वर्धनाय, रक्षणाय वा, भवतु॥ वृष्ण्येभिः–वृषन्शब्दात् भवे छन्दसीति यत्। सतीनसत्वा–सतीनस्य व्युत्पादितलक्षणस्य सत्वा आसादयिता, सदेरन्तर्भावितण्यर्थात् औणादिको वनिप् तुडागमश्च॥

द्वितीयामृचमाह—

यस्यानासः सूर्यस्येव यामो भरेभरे वृत्रहा शुष्मो अस्ति।
वृषन्तमः सखिभिः स्वेभिरेवैर्मरुत्वान्नो भवत्विन्द्र ऊती॥२॥

यस्य अनाप्तः सूर्यस्येव यामः भरेभरे वृत्रहा शुष्मः अस्ति वृषन्तमः सखिभिः स्वेभिः एवैः मरुत्वान् नः भवतु इन्द्रः ऊती ॥

यस्य इन्द्रस्य यामः गमनं अनाप्तः अप्राप्तः परैः सूर्यस्येव सूर्यस्य गतिर्यथा नान्यैः प्राप्तुं शक्यते तद्वत् । स्वेभिः आत्मीयैः एवैः गमनशीलैः सखिभिः समानाख्यानैः सहायभूतैः मरुद्भिः सह वृषन्तमः अतिशयेन वर्षिता भरेभरे सर्वेषु यजनेषु वृत्रहा वृत्रस्यासुरस्य हन्ता शुष्मः बलवान् शोषणोऽसुराणां, एवंभूतो य इन्द्रः अस्ति, मरुत्वानित्याद्यन्यत्समानम् ॥ यामः—यातेः भावे मन् । शुष्मः—शुष शोषणे, मन्प्रत्ययः । वृषन्तमः—वृषन्शब्दात् उत्तरस्य तमपो नाद्धस्येति नुट् । एवैः—एतेः, इण्शीङ्भ्यां वन् ॥

तृतीयामृचमाह—

दिवो न यस्य रेतसो दुघानाः पन्थासो यन्ति शवसापरीताः ।
तरद्द्वेषाः सासहिः पौंस्येभिर्मरुत्वान्नो भवत्विन्द्र ऊती ॥३॥

दिवः न यस्य रेतसः दुघानाः पन्थासः यन्ति शवसा अपरिऽइताः
तरत्ऽद्वेषाः ससहिः पौंस्येभिः मरुत्वान् नः भवतु इन्द्रः ऊती ॥

यस्य इन्द्रस्य पन्थासः मार्गाः दिवो न रेतसः द्युलोकस्य सारांशानिव तेजोबलादीन् दुघानाः दुहन्तः प्रवर्षन्तः प्रसारयन्तः यन्ति गच्छन्ति, इन्द्रस्य गमनमार्गाः द्युलोकसारैरार्द्रा इव तेजोबलादिप्रसरा भवन्तीत्यर्थः । ते च पन्थासः शवसा दीप्तेन बलेन सहिताः अपरीताः परैरनभिगताः । सोऽयमिन्द्रः तरद्द्वेषाः द्वेषांसि तरन् जितवैरिवर्ग इत्यर्थः पौंस्येभिः बलैः सासहिः अभिभविता शत्रूणाम् । अन्यत्समानम् ॥ रेतसः—रीयते गच्छतीति रेतः, सुरीभ्यां तुट् चेति असुन् तुडागमश्च । दुघानाः—दुह प्रपूरणे, शानच्, अदादित्वात् शपो लुक्, व्यत्ययेन घत्वम् । पन्थासः—पन्थानः, आजसेरसुक् । सासहिः—षह अभिभवे, लिड्वद्भावाद् द्विर्वचनं, छन्दसि किप्रत्ययः ॥

चतुर्थीमृचमाह—

सो अङ्गिरोभिरङ्गिरस्तमो भूद्वृषा वृषभिः सखिभिः सखा सन् ।
ऋग्मिभिर्ऋग्मी गातुभिर्ज्येष्ठो मरुत्वान्नो भवत्विन्द्र ऊती ॥४॥

सः अङ्गिरःऽभिः अङ्गिरःऽतमः भूत् वृषा वृषऽभिः सखिऽभिः सखा सन्
ऋग्मिऽभिः ऋग्मी गातुऽभिः ज्येष्ठः मरुत्वान् नः भवतु इन्द्रः ऊती ॥

अङ्गिरस्तत्त्वविचारे (पु. ३२७) "सर्वथा आङ्गिरसं तत्त्वं अग्निवैभवसंबन्धी"त्युपपादितम्। सः इन्द्रः अङ्गिरोभिः अङ्गिरोभ्यः, पञ्चम्यर्थे तृतीया, अग्निवैभवभूतेभ्योऽपि अङ्गिरस्तमः अतिशयेन अङ्गिराः (पु. ३०४) वृषभिः वृषा वर्षितृभ्योऽपि अतिशयेन वर्षिता। सखिभिः मित्रभूतेभ्योऽपि सखा अतिशयेन मित्रभूतो हितकारी भूत् भवति। एवंभूतः सन् भवन् ऋग्मिभिः ऋगात्मकमन्त्रयुक्तेभ्यः ऋषिभ्यः ऋग्मी अतिशयेन ऋग्युक्तः। गातुभिः गातुभ्यः स्तोतव्येभ्योऽपि ज्येष्ठः अतिशयेन स्तोतव्यः। एवंगुणविशिष्टो मरुत्वानित्यादि गतम् ॥ ऋग्मिभिः—मत्वर्थीयो मिनिः। गातुभिः—गा स्तुतौ, कमिमनीत्यादिना कर्मणि तुप्रत्ययः ॥

पञ्चमीमृचमाह—

स सूनुभिर्न रुद्रेभिर्ऋभ्वा नृषाह्ये सासह्वाँ अमित्रान्।
सनीळेभिः श्रवस्यानि तूर्वन्मरुत्वान्नो भवत्विन्द्र ऊती ॥५॥

सः सूनुऽभिः न रुद्रेभिः ऋभ्वा नृऽसह्ये ससह्वान् अमित्रान् सऽनीळेभिः श्रवस्यानि तूर्वन् मरुत्वान् नः भवतु इन्द्रः ऊती ॥

सूनुभिर्न पुत्रैरिव रुद्रेभिः रुद्रपुत्रैर्मरुद्भिर्युक्तः ऋभ्वा महान् सः इन्द्रः नृषाह्ये नृभिः पुरुषैः बलिभिः सोढव्ये संग्रामे अमित्रान् शत्रून् ससह्वान् अभिभूतवान्। अपि च सनीळेभिः समाननिलयैः मरुद्भिः द्वारा श्रवस्यानि दिव्यश्रवणहेतुभूतान् आवेशशक्तिविशेषान् तूर्वन् प्रच्यावयन्। मरुत्वानित्यादि गतम् ॥ इन्द्रः शुद्धसत्त्वप्रधानभूतमनोभूमेः पतिः। तस्य भ्रातरः सखायः पुत्रा इव भवन्ति मरुतः, यैस्तीव्रकर्मभिर्यजमानस्य धीवृत्तीर्दिव्यावेशशक्तिप्रचोदिताः विधत्त इन्द्रः ॥ नृषाह्ये—षह मर्षणे, कर्मणि यत्। ससह्वान्—षह अभिभवे, लिटः क्वसुः ॥

इति प्रथमस्य सप्तमेऽष्टमो वर्गः

षष्ठीमृचमाह—

स मन्युमीः समदनस्य कर्ताऽस्माकेभिर्नृभिः सूर्ये सनत्।
अस्मिन्नहन्त्सत्पतिः पुरुहूतो मरुत्वान्नो भवत्विन्द्र ऊती ॥६॥

सः मन्युऽमीः सऽमदनस्य कर्ता अस्माकेभिः नृऽभिः सूर्यम् सनत् अस्मिन् अहन् सत्ऽपतिः पुरुऽहूतः मरुत्वान् नः भवतु इन्द्रः ऊती ॥

सः पूर्वोक्तगुणविशिष्ट इन्द्रः, मन्युमीः मन्योः कोपस्य हिंसकः, असुरादीनां शत्रूणां मतेः ज्ञानस्य वा। समदनस्य सह माद्यन्ति अस्मिन्, सङ्ग्रामः, तस्य कर्ता शत्रुभिर्युद्धस्य कारकः, सत्पतिः सतां व्याकृतानां सर्वेषां भूतजातानां वस्तूनां च पतिः पालयिता। पुरुहूतः पुरुभिः बहुभिः स्तोतृभिराहूतः अस्मिन् अहन् अस्मिन् दिवसे अस्माकेभिः अस्मदीयैः नृभिः बलिभिः पुरुषैः सूर्यं उत्तमज्योतिरात्मानं सनत् संभक्तं करोतु, अस्मदीयाः बलाढ्याः स्तोतारः इन्द्रस्य साहाय्यात् सूर्यं संभजन्तु, दिव्यं प्रकाशं लभन्ताम्। एवंभूतो मरुत्वानिन्द्रः रक्षत्वस्मानित्यादि गतम् ॥ मन्युमीः-मीञ् हिंसायाम्, क्विप्। अस्माकेभिः-छान्दसः, आस्माकीनैः। सनत्-लेटि अडागमः ॥

सप्तमीमृचमाह—

तमूतयो रणयञ्छूरसातौ तं क्षेमस्य क्षितयः कृण्वत त्राम्।
स विश्वस्य करुणस्येश एको मरुत्वान्नो भवत्विन्द्र ऊती ॥७॥

तम् ऊतयः रणयन् शूरऽसातौ तम् क्षेमस्य क्षितयः कृण्वत त्राम् सः विश्वस्य करुणस्य ईशे एकः मरुत्वान् नः भवतु इन्द्रः ऊती ॥

तम् इन्द्रं शूरसातौ शूरैः संभजनीये, देवासुरसंग्रामरूपे यजमानस्य यजनयात्रोद्यमे, ऊतयः रक्षकाः इन्द्रसखाः मरुतः रणयन् रमयन्ति। अपि च क्षितयः पृथिव्यादिलोकवासिनो जनाः तम् क्षेमस्य लब्धस्य सर्वस्य त्राम् त्रातारं कृण्वत कुर्वन्ति। सः एकः इन्द्रः विश्वस्य सर्वस्य करुणस्य कर्मणः ईशे ईश्वरो भवति। अन्यत्पूर्ववत् ॥ ऊतयः-अवतेः कर्तरि क्तिन्। रणयन्-रमतेः हेतुमण्णिजन्ताद्वर्तमाने छान्दसो लङ्। त्राम्-त्रैङ् पालने, क्विप्। करुणस्य-करोतेः, भावे उनन् ॥

अष्टमीमृचमाह—

तमप्सन्त शवस उत्सवेषु नरो नरमवसे तं धनाय।
सो अन्धे चित्तमसि ज्योतिर्विदन्मरुत्वान्नो भवत्विन्द्र ऊती ॥८॥

तम् अप्सन्त शवसः उत्ऽसवेषु नरः नरम् अवसे तम् धनाय सः
अन्धे चित् तमसि ज्योतिः विदत् मरुत्वान् नः भवतु इन्द्रः ऊती ॥

नरः नेतारः बलिनः पुरुषाः यजमानाः नरम् नेतारं बलाढ्यं तम् इन्द्रं शवसः उज्ज्वलस्य बलस्य संबन्धिषु उत्सवेषु संग्रामेषु अवसे रक्षणाय अप्सन्त आप्नुवन्ति, आश्रयन्त इति भावः। धनाय दिव्याय धनाय च तम् आश्रयन्ते। सः इन्द्रः अन्धे चित् आध्यानरहिते अविद्यामयेऽपि तमसि दर्शनरहिते सान्द्रे व्यापिन्यप्रकाशे ज्योतिः उत्तमं सौरं प्रकाशघनं विदत् लम्भयति। यद्यपि सृष्टौ लोकभूमिकासंस्थानापेक्षया उत्तमः सूर्यः तमसः परस्ताल्लोकानतीत्य ज्वलति, तथापि सर्वेश्वरस्य तस्य सर्वान्तर्यामित्वात् अन्धे तमसि च स गुप्तो भवति। तस्मात्तमस्यपि स लभ्यः इन्द्रप्रसादात्। अन्यत्समानम्॥ अप्सन्त–आप्नोतेः, लङि व्यत्ययेनात्मनेपदं तथा क्सन्-प्रत्ययश्च, धातोः ह्रस्वत्वं च॥ विदत्–विन्दतेः, लुङ् छान्दसः॥

नवमीमृचमाह—

स सव्येन यमति व्राधतश्चित्स दक्षिणे सङ्गृभीता कृतानि।
स कीरिणा चित्सनिता धनानि मरुत्वान्नो भवत्विन्द्र ऊती ॥९॥

सः सव्येन यमति व्राधतः चित् सः दक्षिणे सम्ऽगृभीता कृतानि सः
कीरिणा चित् सनिता धनानि मरुत्वान् नः भवतु इन्द्रः ऊती ॥

सः इन्द्रः सव्येन वामेन हस्तेन व्राधतः चित् प्रवृद्धान् शत्रूनपि यमति नियमयति। सः इन्द्रः दक्षिणे सव्येतरेण हस्तेन कृतानि यजमानैरर्पितानि सम् गृभीता संग्रहीता संगृह्णाति। अतिबलस्येन्द्रस्य वामहस्तः अलं शत्रुदमनाय। दक्षिणहस्तेन संग्रहणं भक्तेष्वादरातिशयं द्योतयति। सः इन्द्रः कीरिणा चित् स्तोत्राऽपि स्तुतः धनानि सनिता धनानां प्रदानशीलो भवति। यजमान इव सर्वार्पणं अकृत्वापि भक्त्या स्तोत्रं कुर्वतो जनस्य च धनमनुगृह्णाति। अन्यत् समानम्॥ यमति–यम उपरमे, णिच् छान्दसः। व्राधतः–वृधु वृद्धौ, अस्मादतिप्रत्यय औणादिक आमागमश्च॥

दशमीमृचमाह—

स ग्रामेभिः सनिता स रथेभिर्विदे विश्वाभिः कृष्टिभिर्न्व१य।
स पौंस्येभिरभिभूरशस्तीर्मरुत्वान्नो भवत्विन्द्र ऊती ॥१०॥

सः ग्रामेभिः सनिता सः रथेभिः विदे विश्वाभिः कृष्टिऽभिः नु अद्य
सः पौंस्येभिः अभिऽभूः अशस्तीः मरुत्वान् नः भवतु इन्द्रः ऊती ॥

सः इन्द्रः ग्रामेभिः सङ्घैः मरुतामिति शेषः, मरुद्गणैः सनिता प्रदाता अभिमतस्य भवति। सः स च अद्य इदानीं नु क्षिप्रं विश्वाभिः कृष्टिभिः सर्वैः देवार्थं कृषिशीलैः उद्योगपरैरार्यैः रथेभिः इन्द्रसंबन्धिभिः करणभूतैः विदे विज्ञायते। अपि च सः इन्द्रः पौंस्येभिः पौंस्यैः स्वकीयैर्बलैः अशस्तीः अशंसनीयान् शत्रून् अभिभूः अभिभवन् वर्तते। अन्यद्गतम् ॥ विदे-विद ज्ञाने, कर्मणि लट्, विकरणस्य लुक् ॥

इति प्रथमस्य सप्तमे नवमो वर्गः

एकादशीमृचमाह—

स जामिभिर्यत्समजाति मीळ्हेऽजामिभिर्वा पुरुहूत एवैः।
अपां तोकस्य तनयस्य जेषे मरुत्वान्नो भवत्विन्द्र ऊती ॥११॥

सः जामिऽभिः यत् समऽअजाति मीळ्हे अजामिऽभिः वा पुरुऽहूतः
एवैः अपाम् तोकस्य तनयस्य जेषे मरुत्वान् नः भवतु इन्द्रः ऊती ॥

पुरुहूतः बहुभिराहूतः सः इन्द्रः मीळ्हे सेचने, अभीष्टदिव्यरसवर्षणे, निमित्तसप्तमी। जामिभिः सहजन्मभिः देवैः मरुद्भिर्वा अजामिभिर्वा तदितरैर्वा सह एवैः स्वीयैराशुगमनैः यत् यदा समजाति संगच्छते, तदा अपाम् ज्योतिर्बलादिवाहिनीनां, तोकस्य अपत्यस्य तनयस्य तत्सन्तानस्य च, सर्वथा विस्तारस्य जेषे विजयाय स भवति। अन्यत्समानम् ॥ समजाति-अज गतिक्षेपणयोः, लेट्याडागमः। जेषे-जि जये, औणादिकः सप्रत्ययः, चतुर्थ्यर्थे सप्तमी ॥

द्वादशीमृचमाह—

स वज्रभृद्दस्युहा भीम उग्रः सहस्रचेताः शतनीथ ऋभ्वा।
चम्रीषो न शवसा पाञ्चजन्यो मरुत्वान्नो भवत्विन्द्र ऊती ॥१२॥

सः वज्रऽभृत् दस्युऽहा भीमः उग्रः सहस्रऽचेताः शतऽनीथः ऋभ्वा
चम्रीषः न शवसा पाञ्चऽजन्यः मरुत्वान् नः भवतु इन्द्रः ऊती ॥

सः इन्द्रः वज्रभृत् दुर्भरस्य वज्रस्य भर्ता दस्युहा दस्यूनां उपक्षपयितॄणां पापानामसुराणां वा हन्ता भीमः भयजनको दुष्टानां उग्रः उद्गूर्णतेजाः सहस्रचेताः सहस्रं चेतांसि यस्य सः, बहुविधचेतनायुक्तः शतनीथः बहुविधप्रापणः ऋम्वा महान् चम्रीषो न चमसे यजमानशरीरलक्षणे रसात्मना अवस्थितः सोम इव शवसा दीप्यमानबलेन युक्तः पाञ्चजन्यः पञ्चजनेषु पृथिव्यादि-भूमिकासु पञ्चसु जनेषु जातेषु भवः वर्तमान इत्यर्थः। अन्यत्समानम्॥ भीमः-बिभेतेः, मियः ष्युग्वेति मक्। शतनीथः-णीञ् प्रापणे, क्थन्प्रत्ययः। चम्रीषः-इष गतौ, चम्वां इष्यतीति चम्रीषः, इगुपधलक्षणः कः, वर्णव्यापत्त्या रेफो दीर्घश्च॥

त्रयोदशीमृचमाह—

तस्य॒ वज्रः॑ क्रन्दति॒ स्मत्स्व॒र्षा दि॒वो न त्वे॒षो र॒वथः॒ शिमी॑वान्।
तं स॑चन्ते स॒नय॒स्तं धना॑नि म॒रुत्वा॑न्नो भव॒त्विन्द्र॑ ऊ॒ती ॥१३॥

तस्य॑ वज्रः॑ क्र॒न्द॒ति॒ स्मत् स्व॒र्ऽसाः॑ दि॒वः॑ न त्वे॒षः॑ र॒वथः॑ शिमी॑ऽवान् तं स॒च॒न्ते॒ स॒नयः॑ तं धना॑नि म॒रुत्वा॑न् नः॑ भव॒तु॒ इन्द्रः॑ ऊ॒ती॑॥

तस्य इन्द्रस्य वज्रः कुलिशः शत्रुघातकमायुधं क्रन्दति स्मत् क्रन्दयति भृशं शत्रून्। यः इन्द्रः स्वर्षाः स्वः, अव्ययं, स्वर्गं सनोति ददातीति स्वर्षाः। दिवो न द्युस्थानसंबन्धी सूर्य इव त्वेषः दीप्तः, उज्ज्वलः। रवथः शब्दस्य असुरभेदनगर्जनस्य कर्ता शिमीवान् लोकानुग्रहार्थक-कर्मयुक्तः। तम् तथाभूतं सनयः दानानि, सर्वाणि यजमानैरर्पितानि सचन्ते सेवन्ते, प्राप्नुवन्ति। तथा तम् धनानि सर्वाणि धनानि च तदधीनानि सन्ति आश्रयन्ते। अन्यत्समानम्॥ क्रन्दति-णेरनिटीति णिलोपः। त्वेषः-त्विष दीप्तौ, पचाद्यच्। रवथः-रु शब्दे, शीङ्शपीत्यादिभ्यः अथप्रत्ययः, गुणावादेशौ। सनयः-सनोतेः, औणादिक इप्रत्ययः॥

चतुर्दशीमृचमाह—

यस्याज॑स्रं शव॑सा मान॑मुक्थं॑ परि॒भुज॒द्रोद॑सी वि॒श्वत॑ः सीम्।
स पा॑रिष॒त्क्रतु॑भिर्मन्दसा॒नो म॒रुत्वा॑न्नो भव॒त्विन्द्र॑ ऊ॒ती ॥१४॥

यस्य॑ अज॑स्रम् शव॑सा मान॑म् उ॒क्थम् परि॑ऽभुजत् रोद॑सी॒ इति॑ वि॒श्वत॑ः सी॒म् सः पा॒रि॒ष॒त् क्रतु॑ऽभिः म॒न्द॒सा॒नः म॒रुत्वा॑न् नः॑ भव॒तु॒ इन्द्रः॑ ऊ॒ती॑॥

यस्य इन्द्रस्य अजस्रम् अनवरतं शवसा बलेन मानम् सर्वस्य परिच्छेदकं उक्थम् स्तोत्रं तेन उक्थार्हत्वं लक्ष्यते प्रशंसनीयत्वं, प्राशस्त्यमिति यावत्। रोदसी द्यावापृथिव्यौ विश्वतः सीम् सर्वतः परिभुजत् परितो भुनक्ति, सर्वतः पालयति। यस्येन्द्रस्य 'मानं' सर्वस्य बलस्य परिच्छेदकं मानभूतं प्रमाणभूतं प्राशस्त्यं "रोदसी" सर्वतः पालयति, सः इन्द्रः क्रतुभिः प्राज्ञैः कर्मभिः अस्मदीयैः मन्दसानः मोदमानः सन् पारिषत् पारयतु अस्मान् दुरितादिति शेषः। अन्यत्समानम्॥ परिभुजत्—भुज पालनाभ्यवहरणयोः, लेट्यडागमः, व्यत्ययेन शः। पारिषत्—पार तीर कर्मसमाप्तौ, लेट्यडागमः, सिप् णिलोपश्च छान्दसौ। मन्दसानः—मन्दतेः ऋज्रिवृधीत्यादिभ्यः किदित्यसानच्प्रत्ययः॥

पञ्चदशीमृचमाह—

न यस्य देवा देवता न मर्ता आपश्चन शवसो अन्तमापुः।
स प्ररिक्वा त्वक्षसा क्ष्मो दिवश्च मरुत्वान्नो भवत्विन्द्र ऊती ॥१५॥
न यस्य देवाः देवता न मर्ताः आपः चन शवसः अन्तम् आपुः सः प्रऽरिक्वा त्वक्षसा क्ष्मः दिवः च मरुत्वान् नः भवतु इन्द्रः ऊती॥

देवता देव एव देवता स्वार्थे तल्, षष्ठ्या लुक्, देवस्य द्योतमानस्य यस्य इन्द्रस्य संबन्धिनः शवसः बलस्य अन्तम् अवसानं देवाः न आपुः नानशिरे। तथा मर्ताः मनुष्याः आपश्चन आपो देव्योऽपि न न प्रापुः। सः तादृश इन्द्रः त्वक्षसा तनूकर्त्रा, स्वबलेन, शत्रूणामिति शेषः, क्ष्मः पृथिव्याः दिवः च स्वर्गस्य च प्ररिक्वा प्रकर्षेण रेचको भवति। लोकद्वयादप्यतिरिच्यते बलमस्य। अन्यत्पूर्ववत्॥ प्ररिक्वा—रिचिर् विरेचने, वनिप्। त्वक्षसा—त्वक्षू तनूकरणे, असुन्। क्ष्मः—क्ष्मेति पृथिवीनाम, आतो धातोरित्यत्र योगविभागादिष्टसिद्धिरित्यभिधानात् ङसि भसंज्ञायामाकारलोपः॥

इति प्रथमस्य सप्तमे दशमो वर्गः

षोडशीमृचमाह—

रोहिच्छ्यावा सुमदंशुर्ललामीर्धुक्षा राय ऋज्राश्वस्य।
वृषण्वन्तं बिभ्रती धूर्षु रथं मन्द्रा चिकेत नाहुषीषु विक्षु॥१६॥

रोहित् श्यावा सुमत्ऽअंशुः ललामीः द्युक्षा राये ऋज्राऽअश्वस्य वृषण्ऽवन्तम् बिभ्रती धूःऽसु रथम् मन्द्रा चिकेत नाहुषीषु विक्षु ॥

रोहित् रोहितवर्णा श्यावा श्यामवर्णा, पार्श्वद्वये द्विविधवर्णयुक्तेत्यर्थः। क्रियाशक्तिद्योतकः रोहितः, आकाशवत् सर्वावरणद्योतकः श्यामश्च वर्णः, एवमिन्द्राश्वपङ्क्तिद्वयस्य प्राणबलोपलक्षणस्य वर्णभेदार्थो बोध्यः। सुमदंशुः स्वतः प्रांशुरिति यास्कमनुसृत्य सायणः, सुखं शुभं वा "सुमत्", अंशुः किरणः, अवयवार्थः, शोभनावयवा सुमदंशुरश्वपङ्क्तिरित्यर्थः। ललामीः अश्वभूषणयुक्ता द्युक्षा द्युलोके कृतवासा, ऋज्राश्वस्य एतत्संज्ञकस्य मन्त्रद्रष्टृणामेकस्यर्षेः (ऋज्रः ऋजुगमनोऽश्वो यस्य स इति अक्षरार्थः) राये सम्पदर्थं वृषण्वन्तम् वृष्णा वर्षित्रा इन्द्रेण युक्तं रथम् धूर्षु वहनप्रदेशेषु युगसंबन्धिषु बिभ्रती वहन्ती मन्द्रा आह्लादकरी अश्वपङ्क्तिः नाहुषीषु नहुषाः मनुष्याः, तत्संबन्धिनीषु विक्षु प्रजासु चिकेत ज्ञायते। ऋज्राश्वमृषिमनुग्रहीतुमिन्द्रः रथाश्वयुक्तः द्युस्थोऽपि मानुषविशुद्धज्ञानगोचरतां गत इति भावः ॥ ललामीः—ललामशब्दात् छन्दसि मत्वर्थीय ईकारः, सुलोपाभावश्च। द्युक्षा—क्षि निवासगत्योः, औणादिको डप्रत्ययः, ततष्टाप्। वृषण्वन्तम्—अनो नुडिति मतुपो नुट्। चिकेत—कित ज्ञाने, छन्दसि कर्मणि लिट्, व्यत्ययेन तिप् ॥

सप्तदशीमृचमाह—

एतत्त्यत्ते इन्द्र वृष्ण उक्थं वार्षागिरा अभि गृणन्ति राधः।
ऋज्राश्वः प्रष्टिभिरम्बरीषः सहदेवो भयमानः सुराधाः॥१७॥

एतत् त्यत् ते इन्द्र वृष्णे उक्थम् वार्षागिराः अभि गृणन्ति राधः
ऋज्राऽअश्वः प्रष्टिऽभिः अम्बरीषः सहऽदेवः भयमानः सुऽराधाः॥

हे इन्द्र, वृष्णे वर्षित्रे ते तुभ्यं त्यत् एतत् तदेतत् राधः संराधकं उक्थम् स्तोत्रं वार्षागिराः वृषागिरोऽपत्यानि पुमांसः ऋज्राश्वादयः अभिगृणन्ति आभिमुख्येन वदन्ति। ऋज्राश्वः एतत्संज्ञः ऋषिः प्रष्टिभिः पार्श्वस्थैर्ऋषिभिः सह अस्तौदिन्द्रम्। के ते पार्श्वस्था राजर्षयः? अम्बरीषादयः ॥ राधः—राध साध संसिद्धौ, राध्नोति समृद्धो भवत्यनेनेति राधः, करणे असुन्। ऋज्राश्वः—गतः पूर्वस्याम्। अम्बरीषः—अबि शब्दे, औणादिक ईषन्प्रत्ययः। सहदेवः—देवैः सह वर्तते। भयमानः—बिभेतेः, अन्तर्भावितण्यर्थात् व्यत्ययेन शानच् ॥

अष्टादशीमृचमाह—

दस्यूञ्छिम्यूँश्च पुरुहूत एवैर्हत्वा पृथिव्यां शर्वा नि बर्हीत्।
सनत्क्षेत्रं सखिभिः श्वित्न्येभिः सनत्सूर्यं सनदपः सुवज्रः॥१८॥
दस्यून् शिम्यून् च पुरुऽहूतः एवैः हत्वा पृथिव्याम् शर्वा नि बर्हीत्
सनत् क्षेत्रम् सखिऽभिः श्वित्न्येभिः सनत् सूर्यम् सनत् अपः सुऽवज्रः॥

पुरुहूतः बहुभिर्यजमानैराहूतः इन्द्रः एवैः स्वकीयैर्मरुद्भिर्युक्तः दस्यून् उपक्षपयितॄन् असुरान् शिम्यून् च यजनस्य शमयितॄन् विघातकान् राक्षसादींश्च हत्वा प्रहत्य पृथिव्याम् भूमौ वर्तमानान् दस्युशिम्युप्रतिनिधीन् च शर्वा हिंसकेन वज्रेणायुधेन निबर्हीत् अवधीत्। एते चासुरादयः न भूमिष्ठाः, किंतु बहुसोपानयुक्ते विततेमध्यमस्थाने प्राणलोके तेषां वासः सञ्चारश्च। तत्र प्राणमयान्तरिक्षप्रपञ्चे ऊर्ध्वभूमिका वासभूरसुराणाम्। तदधोभूमिका राक्षसानां, तदधश्च पृथिव्याः सन्निकृष्टा भूमिका भूतपिशाचादीनाम्। यद्यपि असुरादीनां वासो मध्यमस्थाने, तथापि तैः स्वकीयचेष्टाभिः पृथिवी समाक्रान्ता सती मानुषेषु जनेषु असुरादीनां प्रातिनिध्यं दुर्भरवेदनयाऽनुभवति। तादृशं पार्थिवं पापं दुःखमपि मरुत्वानिन्द्रः प्रध्वंसयतीत्युक्तम्। तथा असुरादीनां वधं कृत्वा, ततः किं कृतवानिन्द्रः? श्वित्न्येभिः श्वेतैः शुभ्रैः सर्वथा नैर्मल्यद्योतकैः वर्णैरुपेतैः सखिभिः सहायभूतैः देवभक्तैर्यजमानैः सह क्षेत्रम् शत्रुभिः पूर्वमाक्रान्तं पार्थिवं क्षेत्रं सनत् समभाक्षीत् तथा वृत्रेणावृतं उपरुद्धं वा सूर्यम् उत्तमज्योतिरात्मानं सनत् अभजत। तथा अपः ज्योतिर्बलादिवाहिनीश्च सनत् प्राप्तवान् यजमानाय, सः सुवज्रः शोभनवज्रयुक्त इन्द्रः॥ शिम्यून्—शम उपरमे, शमयति, औणादिको युन्प्रत्ययः, अकारस्येत्वं वर्णव्यापत्त्या। शर्वा—शृ हिंसायाम्, वनिप्, तृतीयाया डादेशः। श्वित्न्येभिः—श्विता वर्णे, औणादिको नक्प्रत्ययः, छन्दसि चेति यः॥

एकोनविंशीमृचमाह—

विश्वाहेन्द्रो अधिवक्ता नो अस्त्वपरिह्वृताः सनुयाम वाजम्।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः॥१९॥
विश्वाहा इन्द्रः अधिऽवक्ता नः अस्तु अपरिऽह्वृताः सनुयाम वाजम्
तत् नः मित्रः वरुणः ममहन्ताम् अदितिः सिन्धुः पृथिवी उत द्यौः॥

विश्वाहा सर्वदेत्यर्थे निपातितः, सर्वकालं इन्द्रः देवराट् नः अस्माकं अधिवक्ता अस्मत्पक्षपाती सन्, अस्मानधिष्ठाय वक्ता अस्तु भवतु, अस्मद्वचनेऽपि तस्यैव वचनं राजताम्। ततश्च वयं अपरिह्वृताः अकुटिलगतयः ऋजुवर्तिनः सन्तः वाजम् सर्वविधां समृद्धिं सनुयाम संभजेमहि। आनो मित्र इत्यादि व्याख्यातम् (१.९४.१६)॥

इति प्रथमस्य सप्तम एकादशो वर्गः

'प्र मन्दिन' इत्येकादशर्चं अष्टमं सूक्तं कुत्सस्य आर्षम्। अष्टम्याद्याश्चतस्रस्त्रिष्टुभः, शिष्टाः सप्त जगत्यः, इन्द्रो देवता॥

अत्र प्रथमामृचमाह—

प्र मन्दिने पितुमदर्चता वचो यः कृष्णगर्भा निरहन्नृजिश्वना।
अवस्यवो वृषणं वज्रदक्षिणं मरुत्वन्तं सख्याय हवामहे॥१॥

प्र मन्दिने पितुऽमत् अर्चत वचः यः कृष्णऽगर्भाः निःऽअहन् ऋजिश्वना अवस्यवः वृषणम् वज्रऽदक्षिणम् मरुत्वन्तम् सख्याय हवामहे॥

हे सखायः, यजमानाः, मन्दिने स्तोतव्यायेन्द्राय पितुमत् रसभरितं वचः स्तोत्रं प्र अर्चत प्रकर्षेणोच्चारयत। यः इन्द्रः ऋजिश्वना एतत्संज्ञकेन राज्ञा इति सायणः, ऋजुगमनयुक्तः सर्वथा आर्जवसम्पन्नो यजमानः ऋजिश्वा (१.५१.५), तेन सख्या कृष्णगर्भाः कृष्णः वृत्रो भवति, ऋश्वनासुर इति सायणः, तेन निषिक्तगर्भास्तदीया भार्याः निरहन् अवधीत्, वृत्रं निस्सन्तानं निरवशेषं कर्तुं तद्भार्यावध इत्युक्तिः। अवस्यवः रक्षणेच्छवो वयं वृषणम् वर्षितारं वज्रदक्षिणम् वज्रेण स्वप्रकाशायुधेन सदसद्विवेचनसमर्थं, वज्रयुक्तदक्षिणहस्तोपेतमिति सायणः। एवंभूतं मरुत्वन्तम् मरुद्गणयुक्तं सख्याय अस्माकं सख्युः कर्मणे हवामहे आह्वयामः॥ सर्वे गताः॥

द्वितीयामृचमाह—

यो व्यंसं जाह्रषाणेन मन्युना यः शम्बरं यो अहन्पिप्रुमव्रतम्।
इन्द्रो यः शुष्णमशुषं न्यावृणङ्मरुत्वन्तं सख्याय हवामहे॥२॥

यः विऽअंसम् जह्रषाणेन मन्युना यः शम्बरम् यः अहन् पिप्रुम् अव्रतम् इन्द्रः यः शुष्णम् अशुषम् नि अवृणक् मरुत्वन्तम् सख्याय हवामहे॥

यः इन्द्रः जहृषाणेन प्रवृद्धेन मन्युना कोपेन व्यंसम् (१.३२) विगतभुजं वृत्रम् अहन् अवधीत्। यः शम्बरम् एतन्नामकमसुरं, तथा अव्रतम् व्रतं दैव्यं कर्म, तद्रहितं पिप्रुम् एतन्नामकं असुरं च यः अहन्। यः इन्द्रः अशुषम् शोषकरहितं शुष्णम् सर्वस्य शोषकं असुरं न्यवृणक् न्यवर्जयत् निर्मूलं कृतवान्, तं मरुत्वन्तमित्यादि पूर्ववत्। अत्र शम्बरासुरादीनां गूढार्थोऽवधेयः शुष्णः (१.११.७) पिप्रुः (१.५१.५) शम्बरः (१.५१.६)॥ जहृषाणेन—हृष तुष्टौ, अत्र वृद्धयर्थ इति सायणः, हर्ष उद्रेके उपचर्यते, तर्हि उद्रिक्तेन मन्युना इति संगच्छते। अवृणक्—वृर्ज वर्जने, रुधादिः॥

तृतीयामृचमाह—

यस्य द्यावापृथिवी पौंस्यं महद्यस्य व्रते वरुणो यस्य सूर्यः।
यस्येन्द्रस्य सिन्धवः सश्चति व्रतं मरुत्वन्तं सख्याय हवामहे॥ ३॥

यस्य द्यावापृथिवी इति पौंस्यम् महत् यस्य व्रते वरुणः यस्य सूर्यः यस्य इन्द्रस्य सिन्धवः सश्चति व्रतम् मरुत्वन्तम् सख्याय हवामहे॥

यस्य इन्द्रस्य महत् विपुलं पौंस्यम् बलं द्यावापृथिवी द्यावापृथिव्यौ 'अनुवर्तेते' इति सायणीयोऽध्याहारः। नायमावश्यकः, इन्द्रस्य महत् पौंस्यं द्यौश्च पृथिवी च भवति, तदधीनत्वात्तयोः। यस्य व्रते नियमात्मके धर्मे कर्मणि वा वरुणः वर्तते। यस्य व्रते सूर्यः वर्तते। यस्य इन्द्रस्य, व्रतम् नियतं कर्म धर्मं वा सिन्धवः स्यन्दमाना आपः सश्चति, वचनव्यत्ययः, सश्चन्ति गच्छन्ति सेवन्त इति यावत्। तं मरुत्वन्तमित्यादि पूर्ववत्॥

चतुर्थीमृचमाह—

यो अश्वानां यो गवां गोपतिर्वशी य आरितः कर्मणिकर्मणि स्थिरः।
वीळोश्चिदिन्द्रो यो असुन्वतो वधो मरुत्वन्तं सख्याय हवामहे॥ ४॥

यः अश्वानाम् यः गवाम् गोऽपतिः वशी यः आरितः कर्मणिऽकर्मणि स्थिरः वीळोः चित् इन्द्रः यः असुन्वतः वधः मरुत्वन्तम् सख्याय हवामहे॥

यः इन्द्रः अश्वानाम् मूर्तानां प्राणबलानां पतिः, तथा यः इन्द्रः गवाम् सर्वेषां चिद्रश्मीनां पतिः, गोपतिः विशिष्टायाः सर्वोत्कृष्टायाः गोः चिन्मरीचेः पतिः अधिपतिः भवति। वशी

स्वतन्त्रः यः इन्द्रः कर्मणिकर्मणि सर्वत्र कर्मणि स्थिरः नैश्चल्येनावस्थितः, आरितः 'स्तोमान् प्रत्यृतः' इति यास्कः, स्तुतिभिः प्रापितः। यः इन्द्रः असुन्वतः अयज्वनः यजनविरोधिनः वीळोश्चित् दृढस्य बलिनोऽपि वधः हन्ता, तं मरुत्वन्तमित्यादि पूर्ववत्॥ आरितः—ऋ गतौ, अस्मात् ण्यन्तान्निष्ठा। वधः—कृत्यल्युटो बहुलमिति वचनात् हनश्च वध इति कर्तर्यप् वधादेशश्च॥

पञ्चमीमृचमाह—

यो विश्वस्य जगतः प्राणतस्पतिर्यो ब्रह्मणे प्रथमो गा अविन्दत्।
इन्द्रो यो दस्यूँरधराँ अवातिरन्मरुत्वन्तं सख्याय हवामहे॥५॥

यः विश्वस्य जगतः प्राणतः पतिः यः ब्रह्मणे प्रथमः गाः अविन्दत् इन्द्रः यः दस्यून् अधरान् अवऽअतिरत् मरुत्वन्तम् सख्याय हवामहे॥

यः इन्द्रः विश्वस्य सर्वस्य जगतः गच्छतः प्राणतः प्रश्वसतः प्राणिजातस्य पतिः अधिपतिः। यः इन्द्रः ब्रह्मणे ब्रह्मात्मने अङ्गिरःप्रभृतये ऋषये प्रथमः अन्येभ्यो देवेभ्यः पूर्वभावी सन् गाः पणिभिरपहृत्य बलादिभिर्गोपिताः गाः चिद्रश्मीन् गुहासु गूढं निक्षिप्तान्, अविन्दत् स्वयमलभत, अङ्गिरस्तत्त्वविचारे समुपन्यस्तमिदम् (पृ. ३२७-८, ३४४-५)। यः इन्द्रः दस्यून् उपक्षपयितॄनसुरान् अधरान् निकृष्टान् कृत्वा अवातिरत् अवधीत्, तं मरुत्वन्तमित्यादि समानम्॥ जगतः—गच्छतेः, अतिप्रत्ययान्तो निपात्यते। प्राणतः—श्वस प्राणने अन च, अस्मात् लटः शतृ॥

षष्ठीमृचमाह—

यः शूरेभिर्हव्यो यश्च भीरुभिर्यो धावद्भिर्हूयते यश्च जिग्युभिः।
इन्द्रं यं विश्वा भुवनाभि सन्दधुर्मरुत्वन्तं सख्याय हवामहे॥६॥

यः शूरेभिः हव्यः यः च भीरुऽभिः यः धावत्ऽभिः हूयते यः च जिग्युऽभिः इन्द्रम् यम् विश्वा भुवना अभि सम्ऽदधुः मरुत्वन्तम् सख्याय हवामहे॥

यः इन्द्रः शूरेभिः शौर्ययुक्तैः यजमानैः हव्यः आह्वातव्यः। यश्च भीरुभिः कातरैः सहायार्थं आह्वातव्यः। यः धावद्भिः पलायनपरैः हूयते आहूयते रक्षार्थं, यश्च जिग्युभिः प्राप्तजयैः पुरुषैराहूयते, विविधमवस्थितैः पुरुषैः तत्तदुपकाराय सेवनीयो विश्वसनीयश्च इन्द्र इति विवक्षा। यम् इन्द्रम् विश्वा भुवना सर्वाणि भूतजातानि अभिसन्दधुः आभिमुख्येन स्थापयन्ति, तं मरुत्वन्त-

मित्यादि गतम् ॥ हव्यः—ह्वयतेः, अचो यत्, बहुलं छन्दसीति संप्रसारणम्, गुणः, धातोस्तन्निमित्तस्येति अवादेशः । जिग्युभिः—जयतेः, लिटः क्वसुः, वसोः संप्रसारणम् ॥

इति प्रथमस्य सप्तमे द्वादशो वर्गः

सप्तमीमृचमाह—

रुद्राणामेति प्रदिशा विचक्षणो रुद्रेभिर्योषा तनुते पृथु ज्रयः ।
इन्द्रं मनीषा अभ्यर्चति श्रुतं मरुत्वन्तं सख्याय हवामहे ॥७॥

रुद्राणाम् एति प्रऽदिशा विऽचक्षणः रुद्रेभिः योषा तनुते पृथु ज्रयः इन्द्रम् मनीषा अभि अर्चति श्रुतम् मरुत्वन्तम् सख्याय हवामहे ॥

विचक्षणः प्रकाशमानः सूर्य इव द्रष्टा सर्वस्य, इन्द्रः रुद्राणाम् रुद्राः मरुतः अन्तरिक्षस्थानाः प्राणदेवाः तेषां प्रदिशा प्रदेशेन प्रकृष्टेन विशालेन अन्तरिक्षमार्गेण एति गच्छति । केचन इन्द्रः सूर्यात्मना वर्ण्यत इत्याहुः, नेदमावश्यकम् । इन्द्रः तृतीयस्थानोऽपि, तं मरुतां क्षेत्रे अन्तरिक्षे प्राणलोके ऋषिः पश्यति । रुद्रेभिः मरुद्भिः प्राणदेवैः करणभूतैः योषा वाक्, इन्द्रस्याह्वात्री, पृथु विस्तीर्णं ज्रयः वेगं तनुते विस्तारयति, ततः श्रुतम् प्रख्यातं इन्द्रम् मनीषा स्तुतिलक्षणा वाक् अभ्यर्चति आभिमुख्येन स्तौति । प्रथमं मरुतां क्षेत्रे इन्द्रदर्शनं, ततः मरुत्साहाय्येन बलेन वाचो वेगविस्तारः, पश्चात् ऋषिः इन्द्रमभिमुखं स्तौति । अन्यत्समानम् ॥ ज्रयः—जि जॄ अभिभवे, जीयते अभिभूयतेऽनेनेति ज्रयो वेगः, करणे असुन् ॥

अष्टमीमृचमाह—

यद्वा मरुत्वः परमे सधस्थे यद्वावमे वृजने मादयासे ।
अत आ याह्यध्वरं नो अच्छा त्वाया हविश्चकृमा सत्यराधः ॥८॥

यत् वा मरुत्वः परमे सधऽस्थे यत् वा अवमे वृजने मादयासे अतः आ याहि अध्वरम् नः अच्छ त्वाऽया हविः चकृम सत्यऽराधः ॥

हे मरुत्वः, मरुत्वन्निन्द्र, परमे उत्तमे दिव्ये सधस्थे सहस्थाने देवसदने यद्वा यदि वा मादयासे तृप्तो वर्तसे, यद्वा यदि वा अवमे अधस्तादिह पार्थिवे वृजने गृहे, मानवावासस्थाने 'मादयासे', अतः अस्मादुभयविधात् स्थानात् नः अस्माकं अध्वरम् दिव्ययात्रात्मकं यज्ञं अच्छ

आभिमुख्येन आ याहि आगच्छ। हे सत्यराधः, सत्यसमृद्धियुक्त, त्वाया त्वत्कामनया वयं हविश्चक्रम हव्यं कृतवन्तः॥ सधस्थे—छन्दसि सहस्य सधादेशः। मादयासे—मद तृप्तियोगे, लेट्याडागमः। त्वाया—त्वामात्मन इच्छति, सुप आत्मनः क्यच्, प्रत्ययोत्तरपदयोश्चेति मपर्यन्तस्य त्वादेशः, व्यत्ययेन दकारस्यात्वं, सुपां सुलुगिति तृतीयाया लुक्॥

नवमीमृचमाह—

त्वायेन्द्र सोमं सुषुमा सुदक्ष त्वाया हविश्चक्रमा ब्रह्मवाहः।
अधा नियुत्वः सगणो मरुद्भिरस्मिन्यज्ञे बर्हिषि मादयस्व॥९॥

त्वाऽया इन्द्र सोमम् सुषुम सुऽदक्ष त्वाऽया हविः चक्रम ब्रह्मऽवाहः
अध नियुत्वः सऽगणः मरुत्ऽभिः अस्मिन् यज्ञे बर्हिषि मादयस्व॥

हे सुदक्ष, शोभनविवेकबल इन्द्र, त्वाया त्वत्कामनया सोमम् सुषुम अभिषुतवन्तो वयम्। हे ब्रह्मवाहः, ब्रह्मणा मन्त्रेण उह्यमान प्राप्यमाणेन्द्र, त्वाया त्वत्कामनया हविः चक्रम हव्यं कृतवन्तो वयम्। हे नियुत्वः, वायोरश्वाः नियुतः, तद्वान् इन्द्रः संबोध्यते प्राणबलाढ्यत्वद्योतनाय। अध अथ मरुद्भिः सगणः मरुद्गणसहितः सन् अस्मिन् यज्ञे बर्हिषि आस्तीर्णे सिद्धे अन्तरे वेदिस्थाने उपविश्य मादयस्व तृप्तो भव॥ सुषुम—षुञ् अभिषवे, छान्दसो लिट्॥

दशमीमृचमाह—

मादयस्व हरिभिर्ये त इन्द्र वि ष्यस्व शिप्रे वि सृजस्व धेने।
आ त्वा सुशिप्र हरयो वहन्तूशन्हव्यानि प्रति नो जुषस्व॥१०॥

मादयस्व हरिऽभिः ये ते इन्द्र वि स्यस्व शिप्रे इति वि सृजस्व धेने इति आ त्वा सुऽशिप्र हरयः वहन्तु उशन् हव्यानि प्रति नः जुषस्व॥

हे इन्द्र, हरिभिः त्वदीयैरश्वैः सह मादयस्व तृप्तो भव, ये ते ये तव स्वभूताः त्वदर्थं वर्तन्ते, तैर्हरिभिरिति संबन्धः। शिप्रे हनू संहते विष्यस्व विवृते कुरु, सोमपानाय। तथा धेने धेना वाङ्नाम, तया जिह्वा लक्ष्यते, रसग्रहणसाधनभूते प्रजिह्विके विसृजस्व विश्लिष्टे कुरु। हे सुशिप्र शोभनशिप्रेन्द्र, त्वा त्वां हरयः अश्वाः आवहन्तु अस्मान् प्रापयन्तु। त्वं च उशन् कामयमानः नः अस्मदीयानि हव्यानि प्रतिजुषस्व प्रत्येकं सेवस्व, उदासीनो मा भूः॥ विष्यस्व—षो अन्त-

कर्मणि, उपसर्गात् सुनोतीति षत्वं, व्यत्ययेनात्मनेपदम् ॥

एकादशीमृचमाह—

मरुत्स्तोत्रस्य वृजनस्य गोपा वयमिन्द्रेण सनुयाम वाजम् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥११॥
मरुत्ऽस्तोत्रस्य वृजनस्य गोपाः वयम् इन्द्रेण सनुयाम वाजम् तत् नः मित्रः वरुणः ममहन्ताम् अदितिः सिन्धुः पृथिवी उत द्यौः ॥

मरुत्स्तोत्रस्य मरुद्भिः सह स्तोत्रं यस्य तस्येन्द्रस्य वृजनस्य अस्मासु वासस्थानभूतस्य गृहस्य, गोपाः रक्षितारः वयम् अस्मदीयं शरीरादिकं इन्द्रवासगृहं, तदीयत्वेन तस्य "वृजनस्य" तदर्थं गोपायितारः वयमित्यर्थः । इन्द्रेण देवेन वाजम् समृद्धिं सनुयाम लभेमहि । तन्नो मित्र इत्यादि गतम् ॥

इति प्रथमस्य सप्तमे त्रयोदशो वर्गः

'इमां त' इत्येकादशर्चं नवमं सूक्तं कुत्सस्यार्षं ऐन्द्रं, अन्त्या त्रिष्टुप्, शिष्टा जगत्यः ॥

तत्र प्रथमामृचमाह—

इमां ते धियं प्र भरे महो महीमस्य स्तोत्रे धिषणा यत्त आनजे ।
तमुत्सवे च प्रसवे च सासहिमिन्द्रं देवासः शवसामदन्ननु ॥१॥
इमाम् ते धियम् प्र भरे महः महीम् अस्य स्तोत्रे धिषणा यत् ते आनजे
तम् उत्ऽसवे च प्रऽसवे च ससहिम् इन्द्रम् देवासः शवसा अमदन् अनु ॥

हे इन्द्र, महः महतः ते तव इमाम् महीम् धियम् सद्यः आविर्भवन्तीं महतीमुत्कृष्टां धीशब्दलक्षितां स्तुतिवाचं प्रभरे प्रकर्षेण संपादयामि । ते तव धिषणा धारयित्री बुद्धिः अस्य मम स्तोत्रे प्रकृते स्तोत्रे यत् यस्मात् आनजे आसक्ता संश्लिष्टासीत्, तस्मात् तव प्रीणयित्रीं स्तुतिं करोमीत्यर्थः । अथ परोक्षकृतः उत्तरोऽर्धर्चः । ससहिम् अभिभवितारं शत्रूणां तम् इन्द्रम् पूर्वोक्तं देवासः सर्वे देवाः शवसा ज्वलता बलेन अन्वमदन् अनुक्रमेण हर्षं प्रापयन्, प्रापयन्ति, लङर्थे लङ् छन्दसि । किमर्थम्? उत्सवे च अभ्युदयार्थं, निमित्तसप्तमी, प्रसवे च दिव्यानां लोकहितानां ज्योतिर्बलादीनां वृष्ट्यर्थं, उत्पत्त्यर्थम् ॥ आनजे—अनक्तेः कर्मणि लिट् । ससहिम्—

षह अभिभवे, लिङ्वद्भावाद् द्विर्वचनं, किप्रत्ययः ॥

द्वितीयामृचमाह—

अस्य श्रवो नद्यः सप्त बिभ्रति द्यावाक्षामा पृथिवी दर्शतं वपुः ।
अस्मे सूर्याचन्द्रमसाभिचक्षे श्रद्धे कमिन्द्र चरतो वितर्तुरम् ॥ २॥

अस्य श्रवः नद्यः सप्त बिभ्रति द्यावाक्षामा पृथिवी दर्शतम् वपुः अस्मे इति सूर्याचन्द्रमसा अभिऽचक्षे श्रद्धे कम् इन्द्र चरतः विऽतर्तुरम् ॥

अस्य इन्द्रस्य श्रवः श्रूयमाणं, श्रुतं यशः, दिव्यं वैभवमिति यावत् सप्त नद्यः सप्तसंख्याकाः ज्योतिर्बलादिप्रवाहिण्यः स्यन्दमाना आपः, भूरादिसप्तलोकात्मक-विश्वसत्ताशक्तयः, बिभ्रति धारयन्ति प्रकाशयन्ति स्वव्यापारैरिति भावः। द्यावाक्षामा द्यावापृथिव्यौ पृथिवी पृथुला विस्तीर्णा अन्तरिक्षस्थाना विततभूश्च दर्शतम् दर्शनीयं अस्य वपुः शरीरं, रूपं वा भवति । त्रैलोक्यमस्य वपुरिति स्पष्टं मूलं, सायणस्तु अन्यथा ब्रूते अध्याहारैः । हे इन्द्र, अस्मे अस्माकं अभिचक्षे दृष्टये जगतः प्रदर्शनाय, प्रकाशनायेति यावत्, श्रद्धे श्रद्धार्थं च कम् पदपूरणम् । सूर्याचन्द्रमसौ सूर्यश्चन्द्रमाश्च वितर्तुरम् परस्परव्यतिहारेण तरणं पुनः पुनर्गमनं यथा भवति तथा चरतः वर्तेते ॥ त्रैलोक्यमिन्द्रस्य वपुः, तदन्तर्गतौ सोमसूर्यौ इन्द्रवैभवद्योतकौ अस्मभ्यं जगतः प्रकाशकौ, श्रद्धाजनकौ च भवतः । एतावानिन्द्रस्य महिमा ॥ द्यावाक्षामा—दिवो द्यावादेशः, विभक्तेर्डादेशः । दर्शतम्—दृशेः अतच् । अभिचक्षे—चक्षेः प्रकाशनार्थात् संपदादिलक्षणः क्विप्, तादर्थ्ये चतुर्थी । श्रद्धे—दृशिग्रहणाद्धातेर्भावे विच्, चतुर्थ्येकवचने आतो धातोरित्याकारलोपः । वितर्तुरम्—तरतेर्यङ्लुगन्तात् औणादिकः कुरच्, बहुलं छन्दसीत्युत्वम् ॥

तृतीयामृचमाह—

तं स्मा रथं मघवन्प्रावं सातये जैत्रं यं ते अनुमदाम सङ्गमे ।
आजा न इन्द्र मनसा पुरुष्टुत त्वायद्भ्यो मघवञ्छर्म यच्छ नः ॥३॥

तम् स्म रथम् मघऽवन् प्र अव सातये जैत्रम् यम् ते अनुऽमदाम सम्ऽगमे
आजा नः इन्द्र मनसा पुरुऽस्तुत त्वायत्ऽभ्यः मघऽवन् शर्म यच्छ नः ॥

हे मघवन्, इन्द्र, सातये लब्धये अभीष्टानां तम् स्म तमेव रथम् रंहणशीलं गमनसाधनं

प्राव प्रकर्षेण गच्छ, वर्तयेत्यर्थः। नः अस्माकं मनसा मननेन ध्यानेन पुरुष्टुत बहुशः स्तुत इन्द्र, ते तव स्वीयं जैत्रम् जयशीलं यम् यं रथं सङ्गमे शत्रुभिः सह संघर्षे आजा आजौ युद्धे सति अनुमदाम अनुक्रमेण वयं स्तुमः। अपि च हे मघवन्, त्वायद्भ्यः त्वां कामयमानेभ्यः नः अस्मभ्यं शर्म शरणं सुखं वा यच्छ देहि॥ अव-बह्वर्थत्वादत्र गत्यर्थः। आजा-सप्तम्या डादेशः। त्वायद्भ्यः-प्रत्ययोत्तरपदयोश्चेति मपर्यन्तस्य त्वादेशः, सुप आत्मनः क्यच्, तस्मात् लटः शतृ॥

चतुर्थीमृचमाह—

वयं जयेम त्वया युजा वृतमस्माकमंशमुदवा भरेभरे।
अस्मभ्यमिन्द्र वरिवः सुगं कृधि प्र शत्रूणां मघवन्वृष्ण्या रुज॥ ४॥

वयम् जयेम त्वया युजा वृतम् अस्माकम् अंशम् उत् अव भरेऽभरे अस्मभ्यम् इन्द्र वरिवः सुऽगम् कृधि प्र शत्रूणाम् मघऽवन् वृष्ण्या रुज॥

हे इन्द्र, युजा अस्माभिर्युक्तेन त्वया सहायभूतेन वृतम् आवृण्वन्तं शत्रुं असुरादिं वयम् त्वद्योगिनो यजमानाः जयेम अभिभवेम। अपि च भरेभरे यजने यजने प्रतियजनं, यजनस्य दिव्ययात्रात्मकत्वात्। यजनोपघातुकैः देवद्विड्भिस्तत्र दिव्ययात्रायां मार्गे सङ्ग्रामः संघटते। भरो यज्ञ इति क्वचित् सङ्ग्राम इति क्वचिच्च सायणीयव्याख्यानं भवति। अस्मत्पक्षानुसारेण विरोधः परिहियते। अस्माकम् अंशम् अस्मदीयं भागं उदव उत्कृष्टं यथा भवति तथा रक्ष, प्रापय, यजनयात्रामार्गे बहूनि सोपानानि ऊर्ध्वारोहणार्थानि भवन्ति, तस्मादस्मदीयं दैव्यं भागं शत्रूणामसुराणां अपावरणेन समुद्धृत्य उत्कर्षं प्रापय। एवं एकैकमपि यजनं यजमानभागस्य उत्कर्षकं भवति। हे इन्द्र, अस्मभ्यम् अस्मदर्थं वरिवः स्थानं, अवकाश-सुख-परिचर्यादीनामन्यतमो भवति वरिवःशब्दार्थः (१.५९.५) गम्यं स्थानं सुगम् सुगमं, सुप्रापं कृधि कुरु। तथा मघवन्, शत्रूणाम् विरोधिनां वृष्ण्या वृष्ण्यानि वीर्याणि प्ररुज प्रकर्षेण भङ्ग्धि, बाधस्वेत्यर्थः॥ वृतम्-वृञ् वरणे, क्विप्, तुगागमः। सुगम्-सुदुरोरधिकरणे इति गमेर्डप्रत्ययः॥

पञ्चमीमृचमाह—

नाना हि त्वा हवमाना जना इमे धनानां धर्तरवसा विपन्यवः।
अस्माकं स्मा रथमा तिष्ठ सातये जैत्रं हीन्द्र निभृतं मनस्तव॥ ५॥

नाना हि त्वा हवमानाः जनाः इमे धनानाम् धर्तः अवसा विपन्यवः
अस्माकम् स्म रथम् आ तिष्ठ सातये जैत्रम् हि इन्द्र निऽभृतम् मनः तव ॥

हे धनानाम् धर्तः, बहुविधानां धनानां धारयितः, इन्द्र, विपन्यवः स्तोतारः इमे जनाः अवसा रक्षणाय, चतुर्थ्यर्थे तृतीया, त्वा त्वां नाना हि विभिन्नतया खलु बहुधेत्यर्थः हवमानाः आह्वयन्तो भवन्ति। तत्र स्वकीयप्रार्थनामाह–अस्माकम् स्म अस्माकं तु सैषा प्रार्थनाविधा। हे इन्द्र, सातये लब्धव्यस्य लब्धये रथम् आतिष्ठ रथमारोह। निभृतम् निश्चलं ध्रुवं तव मनः त्वदीयं चेतः जैत्रम् हि जयशीलं खलु। असुरादीन् वैरिणोऽपोद्धृत्य दिव्यस्वं तेजोबलज्ञानादिकं गवाश्वादिलक्षणं तैरपहृतं जित्वा दातुं नः समर्थं हि तव चित्तम् ॥

इति प्रथमस्य सप्तमे चतुर्दशो वर्गः

षष्ठीमृचमाह—

गोजिता बाहू अमितक्रतुः सिमः कर्मन्कर्मञ्छतमूतिः खजङ्करः।
अकल्प इन्द्रः प्रतिमानमोजसाथा जना वि ह्वयन्ते सिषासवः ॥ ६ ॥

गोऽजिता बाहू इति अमितऽक्रतुः सिमः कर्मन्ऽकर्मन् शतम्ऽऊतिः खजम्ऽकरः अकल्पः इन्द्रः प्रतिऽमानम् ओजसा अथ जनाः वि ह्वयन्ते सिसासवः ॥

हे इन्द्र, बाहू तव भुजौ गोजिता गोजितौ गवां जयेन लम्भयितारौ। त्वं च अमितक्रतुः अपरिच्छिन्नप्रज्ञः, अत एव सिमः बन्धको यज्ञविरोधिनाम्, सिमः श्रेष्ठ इति वाजसनेयकवचनं उदाहृतं सायणीये। कर्मन्कर्मन् कर्मणि कर्मणि शतमूतिः बहुविधरक्षणोपेतः, एकैकमपि त्वदीयं कर्म यजमानरक्षणाय भवतीत्यर्थः। खजङ्करः खजति मथ्नाति पुरुषानिति खजः सङ्ग्रामः तस्य कर्ता। अकल्पः कल्पेनान्येन रहितः, अद्वितीयः, ओजसा, षष्ठ्यर्थे तृतीया, सर्वस्यापि ओजसो बलस्य प्रतिमानम् प्रतिनिधिश्च, एवंभूतः इन्द्रः। अथ अस्मात्कारणात् सिषासवः सनितुं संभक्तुमिच्छवः दिव्यत्वस्य संभजनकामाः जनाः वि ह्वयन्ते विविधमाह्वयन्ति ॥ गोजिता–विभक्तेराकारः। सिमः–षिञ् बन्धने, औणादिको मक्। खजङ्करः–खज मन्थे, करोतेः पचाद्यच्, अरुर्द्विषदजन्तस्येति मुम्। सिषासवः–षण संभक्तौ, सनि सनीवन्तर्धेति विकल्पनात् इडभावः, जनसनखनां सन्झलोरित्यात्वम् ॥

सप्तमीमृचमाह—

उत्ते शतान्मघवन्नुच्च भूयस उत्सहस्रादिरिचे कृष्टिषु श्रवः ।
अमात्रं त्वा धिषणा तित्विषे मह्यधा वृत्राणि जिघ्नसे पुरन्दर ॥७॥
उत् ते शतात् मघऽवन् उत् च भूयसः उत् सहस्रात् रिरिचे कृष्टिषु श्रवः
अमात्रम् त्वा धिषणा तित्विषे महीः अध वृत्राणि जिघ्नसे पुरऽन्दर ॥

हे मघवन् धनाढ्येन्द्र, कृष्टिषु कर्षणशीलेषु उद्योगिषु, उद्युक्तेषु मनुष्येष्विति यावत्, ते तव संबन्धि श्रवः यशः, वैभवमित्यर्थः शतात् उद्रिरिचे शतसंख्याकात् त्वदीयवैभवभेदात् उद्रिक्तं अधिकं भवति, तव श्रवसो विजृम्भणं शतविधं ततोऽप्यधिकं भवतीत्यर्थः । अपि च भूयसः च बहुतरात् श्रवसोऽपि उत् उद्रिरिचे । सहस्रात् सहस्रसंख्याकादपि उत् उद्रिक्तं भवति । अमात्रम् मात्रारहितं, मात्रा इयत्ता, तद्वर्जितं त्वा त्वां मही महती धिषणा अस्मदीया ध्यानलक्षणा धीः स्तुतिर्वाग्वा तित्विषे दीपयति, त्वदीयविभवानाविष्करोति । अध अनन्तरं एवमुद्दीपितस्त्वं हे पुरन्दर पुराणामासुराणां दारयितः, वृत्राणि आवरकाणि उपरोधकानि धनानि आसुराणि तमांसि जिघ्नसे हंसि, प्रध्वंसयसि ॥ रिरिचे–रिचिर् विरेचने, कर्मणि लिट् । तित्विषे–त्विष दीप्तौ । जिघ्नसे–हन्तेः लेटि व्यत्ययेनात्मनेपदं, अडागमः, शपः श्लुः ॥

अष्टमीमृचमाह—

त्रिविष्टिधातु प्रतिमानमोजसस्तिस्रो भूमीर्नृपते त्रीणि रोचना ।
अतीदं विश्वं भुवनं ववक्षिथाशत्रुरिन्द्र जनुषा सनादसि ॥८॥
त्रिविष्टिऽधातु प्रतिऽमानम् ओजसः तिस्रः भूमीः नृऽपते त्रीणि रोचना
अति इदम् विश्वम् भुवनम् ववक्षिथ अशत्रुः इन्द्र जनुषा सनात् असि ॥

हे नृपते नृणां नेतृणां बलिनां पते अधिपते पालयितः, इन्द्र, त्वं ओजसः बलस्य सर्वस्यापि प्रतिमानम् प्रतिनिधिर्भवसि । कीदृशं प्रतिमानम्? त्रिविष्टिधातु त्रिधा विष्टया प्रवेशनेन धीयते इति त्रिविष्टिधातु, त्रिधा भूरादिस्थानत्रये इन्द्रबलस्य प्रवेशनेनास्य धारणमित्यर्थः । 'यथा त्रिगुणितरज्जुर्दृढीयसी तथा इन्द्रोऽपि दृढतर इति' सायणीयम् । अत्र तिस्रो भूमीरित्यादि श्रवणात् त्रिकोपन्यासः अस्मदुक्तार्थस्य प्रोद्बलको भवति । किञ्च त्वं तिस्रो भूमीः त्रीन् लोकान्

भूरादीन् त्रीणि रोचना त्रीणि ज्योतींषि, लोकत्रयप्रकाशकानि अग्निवाय्वादित्यात्मकानि दैवतानि तेजांसि। सर्वेषां देवानां तैजसरूपत्वात्, अति ववक्षिथ अतिशयेन वोढुमिच्छसि। इदम् विश्वम् भुवनम् सर्वमिदं भूतजातं च अतिवोढुमिच्छसि। यस्मात् त्वं हे इन्द्र, जनुषा जन्मना सनात् चिरात् अशत्रुरसि विरोधिरहितोऽसि॥ त्रिविष्टिधातु-विशेर्भावे क्तिन्, धातः कर्मणि तुप्रत्ययः। ववक्षिथ-वहतेः इच्छासनि ढत्वकत्वषत्वानि, सन्यत इतीत्वाभावश्छान्दसः॥

नवमीमृचमाह—

त्वां देवेषु प्रथमं हवामहे त्वं बभूथ पृतनासु सासहिः।
सेमं नः कारुमुपमन्युमुद्भिदमिन्द्रः कृणोतु प्रसवे रथं पुरः॥९॥

त्वाम् देवेषु प्रथमम् हवामहे त्वम् बभूथ पृतनासु ससहिः सः इमम् नः कारुम् उपऽमन्युम् उत्ऽभिदम् इन्द्रः कृणोतु प्रऽसवे रथम् पुरः॥

हे इन्द्र, देवेषु प्रथमम् अग्रगण्यं त्वाम् हवामहे आह्वयामः यजनार्थम्। त्वम् त्वमपि पृतनासु संग्रामेषु ससहिः अभिभविता शत्रूणां बभूथ भवसि। अथ परोक्षकृतः अर्धर्चः। सः इन्द्रः तादृश इन्द्रः इमम् रथम् नः अस्माकं पुरः पुरस्तादग्र इत्यर्थः कृणोतु वर्तमानं करोतु। कदा? प्रसवे गवादिलाभार्थकयुद्धोत्पत्तौ सत्याम्। कीदृशं रथम्? कारुम् कर्तारं, कर्तव्यक्रियासमर्थं, उपमन्युम् उपगतेन प्राप्तेन मन्युना क्रोधेन युक्तं वेगद्योतकमिदं उद्भिदम् उद्भेत्तारं प्रतिबन्धकानाम्॥ बभूथ-बभूथेत्यादीनां इडभावो निपात्यते। सेमम्-स इमं, सोऽचि लोपे चेत् पादपूरणमिति सुलोपः॥

दशमीमृचमाह—

त्वं जिगेथ न धना रुरोधिथाभीष्वाजा मघवन्महत्सु च।
त्वामुग्रमवसे सं शिशीमस्यथा न इन्द्र हवनेषु चोदय॥१०॥

त्वम् जिगेथ न धना रुरोधिथ अभीषु आजा मघऽवन् महत्ऽसु च त्वाम् उग्रम् अवसे सम् शिशीमसि अथ नः इन्द्रः हवनेषु चोदय॥

हे इन्द्र, त्वम् जिगेथ त्वं जयसि शत्रून्, धना अस्माकं प्राप्तव्यानि ज्योतिर्बलादि-लक्षणानि धनानि न रुरोधिथ नावरुणत्सि, तेषां अस्मान्प्रति प्रापणे तवानुग्रहो वर्तत एव।

हे मघवन्, धनवन्, अर्भेषु अल्पेषु महत्सु च प्रौढेषु च आजा आजौ आजिषु संग्रामेषु, वचनव्यत्ययः, अवसे रक्षणाय उग्रम् अधिकबलं त्वाम् संशिशीमसि सम्यक् तीक्ष्णीकुर्मः, तपसा ध्यानेन स्तोत्रेण च। अथ अनन्तरं हे इन्द्र, हवनेषु अस्माभिः क्रियमाणेषु आह्वानेषु नः अस्मान् चोदय प्रेरय कर्तव्यं उद्दिश्य ॥ जिगेथ–जयतेः लिट् छान्दसः। रुरोधिथ–क्रादिनियमादिट्। शिशीमसि–शो तनूकरणे, विकरणस्य श्लुः ॥

एकादशीमृचमाह—

विश्वाहेन्द्रो अधिवक्ता नो अस्त्वपरिह्वृताः सनुयाम वाजम्।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः॥११॥

विश्वाहा इन्द्रः अधिऽवक्ता नः अस्तु अपरिऽह्वृताः सनुयाम वाजम् तत् नः मित्रः वरुणः ममहन्ताम् अदितिः सिन्धुः पृथिवी उत द्यौः ॥

व्याख्यातेयं स यो वृषेति सूक्तस्यान्ते ॥

इति प्रथमस्य सप्तमे पञ्चवशो वर्गः

'तत्त' इत्यष्टर्चं दशमं सूक्तं कुत्सस्यार्षमैन्द्रं त्रैष्टुभम् ॥

तत्र प्रथमामृचमाह—

तत्त इन्द्रियं परमं पराचैरधारयन्त कवयः पुरेदम्।
क्षमेदमन्यद्दिव्यन्यदस्य समी पृच्यते समनेव केतुः ॥१॥

तत् ते इन्द्रियम् परमम् पराचैः अधारयन्त कवयः पुरा इदम् क्षमा इदम् अन्यत् दिवि अन्यत् अस्य सम् ईम् इति पृच्यते समनाऽइव केतुः॥

हे इन्द्र, ते त्वदीयं परमम् उत्कृष्टं तत् इदम् प्रसिद्धं इन्द्रियम् इन्द्रलिङ्गं कवयः द्रष्टारः सत्यश्रुतः ऋषयः पराचैः उच्चैर्नीचैरिव अव्ययं, पराञ्चनैरिति यास्कः, परागमनैः तमसः परस्तात् गतैः, अत्यन्तमुच्चैरिति यावत्, पुरा चिरन्तनात्कालात् अधारयन्त धृतवन्तः। इन्द्रस्य लिङ्गं बलं अतीन्द्रियदर्शिभिः बहोः कालाद् दृष्टम्। अस्य बलवैभवं तेजो वा इदम् अन्यत् प्रत्यक्षं दृश्यमानं एकं क्षमा क्षमायां पृथिव्यां भवति, आग्नेयं ज्योतिरिति प्राहुः। दिवि द्युलोके अन्यत

एकं सौरं ज्योतिश्च । पार्थिवं ज्योतिरग्निः दिव्यं ज्योतिस्तु सूर्यः । ईम् एवमुभयविधं इन्द्रलिङ्गं द्यावापृथिव्योः ज्योतिर्द्वयात्मना संपृच्यते परस्परं संधुज्यते । ऊर्ध्वस्य सौरज्योतिषः अधोऽग्निस्वरूपे संगमनं अधरस्याग्नेयज्योतिषः ऊर्ध्वगतेः सौरज्योतिषि संगमनं च परस्परव्यतिहारेण भवतः । तत्र दृष्टान्तः—समनेव केतुः समने संग्रामे केतुः ध्वज इव, पक्षप्रतिपक्षयोः सङ्गमने यथा ध्वजः प्रज्ञापकं लिङ्गं, लक्षणं भवति तद्वत् । यजमानस्यान्तर्जातः प्रज्वलितो महान् क्रतुरग्निः ऊर्ध्वं प्रतिष्ठते, उत्तमं दिव्यं सौरं ज्योतिरधोऽवतरति यजमानं प्रति । एवमुभयोः सङ्गमनं इन्द्रलिङ्गस्य द्योतकं भवति ॥ इन्द्रियम्—इन्द्रियं इन्द्रलिङ्गमिति घच्प्रत्ययान्तो निपात्यते । क्षमा—सप्तम्या लुक् । समना इव—पम ष्टम वैकुव्ये, अस्माद्युच्, सप्तम्या आकारः ॥

द्वितीयामृचमाह—

स धारयत्पृथिवीं पप्रथच्च वज्रेण हत्वा निरपः ससर्ज ।
अहन्नहिमभिनद्रौहिणं व्यहन्व्यंसं मघवा शचीभिः ॥२॥

सः धारयत् पृथिवीम् पप्रथत् च वज्रेण हत्वा निः अपः ससर्ज अहन् अहिम् अभिनत् रौहिणम् वि अहन् विऽअंसम् मघऽवा शचीभिः ॥

सः इन्द्रः पृथिवीम् असुराद्याक्रमणैरार्तां धारयत् धृतवान् । स्वीयबलेन तां दृढामकरोदित्यर्थः । ततः परं पप्रथत् च तां पृथुलां विस्तीर्णां चाकरोत् । अपि च वज्रेण असुरादीनां आवरकाणां उपरोधकानां वृत्रादीनां वधसाधनेन ज्वलद्ध्वललक्षणेनायुधेन हत्वा हन्तव्यान् निहत्य अपः तेजोबलादिलक्षणाः अपः निः ससर्ज निर्गमयामास । सामान्येनोक्तमर्थं विशेषेण स्पष्टीकरोति । अहिम् अहन् हतवान्, मेघमितिं स्थूलः पक्षः तेनापां निःसर्जनं भवति । रौहिणम् एतन्नामकमसुरमिति सायणः, वृत्रस्य बन्धुरवस्थाभेदो वा, अत्यन्ततमोघनस्य कृष्णवर्णस्य वृत्रस्य अचलवत् स्थितस्य वज्रप्रहारस्वीकारारम्भे चलने सति रोहितवर्णः भवति, एवं तामसस्य वृत्रस्य राजसत्वं रोहिणशब्देन लक्ष्यते । तथाभूतं रोहितवर्णं वृत्रं व्यभिनत् व्यदारयत् । अपि च मघवा इन्द्रः शचीभिः शक्तिभिः स्वकीयाभिः व्यंसम् विगतभुजं तमेवाहिं वृत्रं अहन् अवधीत् । अत्रापि वृत्र एव व्यंसः अवस्थान्तरं प्राप्तः, अहिरिव सर्पणशीलः भुजनाशादनन्तरमपि क्रियायुक्तः दुश्चेष्टितः, तं बह्वीभिः शक्तिभिः प्रध्वंसयामासेन्द्रः ॥ पप्रथत्—प्रथयतेर्लुङ्, चङि णिलोपः, द्विर्वचनादिकं छान्दसम् ॥

तृतीयामृचमाह—

स जातूभर्मा श्रद्दधान ओजः पुरो विभिन्दन्नचरद्वि दासीः।
विद्वान्वज्रिन्दस्यवे हेतिमस्यार्यं सहो वर्धया द्युम्नमिन्द्र ॥३॥
सः जातूऽभर्मा श्रत्ऽदधानः ओजः पुरः विऽभिन्दन् अचरत् वि दासीः
विद्वान् वज्रिन् दस्यवे हेतिम् अस्य आर्यम् सहः वर्धय द्युम्नम् इन्द्र ॥

जातूभर्मा सकृदेव प्रयुक्तोऽयं ऋग्वेदे, जातू इत्यशनिनामेति सायणः, तर्हि भर्म आयु भवति, वज्रायुध इत्यर्थः सः इन्द्रः ओजः ओजसि, सप्तम्या लुक्, स्वकीये बले श्रद्दधानः दृढ विश्वासयुक्तः सन् दासीः दस्यूनां असुरादीनां संबन्धिनीः पुरः पुरीः, शत्रुपुराणीत्यर्थः विभिन्दन् विध्वंसयन् व्यचरत् विविधं यथेच्छं संचरति। हे वज्रिन् इन्द्र, वज्रवन्निन्द्र, विद्वान् विजानन् स्त्वं अस्य यजमानस्य स्तोतुः दस्यवे उपक्षपयित्रे शत्रवे हेतिम् आयुधं विसृजेति शेषः, तथ अस्य आर्यम् सहः आर्याः विद्वांसः उद्योगिनः तदीयं बलं वर्धय प्रवृद्धं कुरु, तथा द्युम्नम् तदी यशः, शोभाप्रसरं च वर्धय ॥ जातूभर्मा—जनी प्रादुर्भावे इत्यस्मात् जातूः, बिभर्तेः भर्मेति स कथञ्चित् रूपावतारः क्रियते पूर्वव्याख्यातृभिः ॥

चतुर्थीमृचमाह—

तदूचुषे मानुषेमा युगानि कीर्तेन्यं मघवा नाम बिभ्रत्।
उपप्रयन्दस्युहत्याय वज्री यद्ध सूनुः श्रवसे नाम दधे ॥४॥
तत् ऊचुषे मानुषा इमा युगानि कीर्तेन्यम् मघऽवा नाम बिभ्रत्
उपऽप्रयन् दस्युऽहत्याय वज्री यत् ह सूनुः श्रवसे नाम दधे ॥

कीर्तेन्यम् कीर्तनीयं स्तुत्यं नाम इन्द्रबलगर्भितं अन्येभ्यो देवेभ्यो विलक्षणं इन्द्रस्वात्म विशेषकं नामधेयं बिभ्रत् धारयन् मघवा इन्द्रः तत् इन्द्रबललक्षकं नाम ऊचुषे उक्तवते स्तुवते यजमानाय इमा मानुषा युगानि इमानि मानुषाणि कालपरिच्छेदात्मकानि युगपदवेदनीयानि विधत्त इति शेषः। अत्र कृतादियुगचतुष्टयस्य विधाता सूर्यात्मना इन्द्र इति सायणीय आशयः इदमत्र विचारणीयम्। ऋग्वेदे कृतत्रेतादीनां नामापि न श्रूयते, ऐतरेयब्राह्मण एव प्रथममेतानि कृतादिनामानि श्रूयन्ते। अपि च "ऊचुषे" स्तुवते जनाय मानुषाणि युगानि विधत्त इति

उपहसनीयं वचनम्। स्तुवतः अस्तुवतो वा जनस्य युगानि प्रवर्तितान्येव भवन्ति। कथं यजमानस्य स्तुवत एव इन्द्रः युगानि करोति, नान्यस्येति शक्यं वदितुम्? तर्हि कथं अन्वयः सूपपादः स्यादिति चेत्, ब्रूमः। "तत् ऊचुषे" स्तुवते यजमानाय "मानुषा इमा युगानि" मनुष्यसंबन्धीनि इमानि सन्ततं प्रवर्तमानानि युगानि असंख्यातानि अतीतानि, भवन्ति, भविष्यन्ति च, कालाध्वनोरत्यन्तसंयोगे द्वितीया, सर्वं मानुषमानं कालं 'कीर्तेन्यम्' कीर्तनीयं "नाम" रहस्यं वीर्यवत्तरं नाम येन ऋषिभिस्तपोबलादाहूत इन्द्रः प्रसीदति। तादृशं नाम 'बिभ्रत्' धारयन् 'मघवा' इन्द्रः प्रवर्तत इति शेषः। तन्नामोच्चारयते यजमानाय प्रसीदति कर्तव्यं करोतीति भावः। एवमनावश्यकाध्याहारसनाथं अमूलव्याख्यानं परिहार्यम्। अथ उत्तरोऽर्धर्चः सुगमार्थो भवति। तदूचुष इत्युक्तम्। किं तत्? यद्ध यत् खलु नाम पूर्वोक्तलक्षणं (कर्म) इन्द्रः दधे धृतवान्। कीदृशः? श्रवसे सूनुः श्रवणं, यशो वा भवति, स्वविभवप्रसारायेत्यर्थः, सूनुः प्रेरकः पुत्रो वा, स्तोतुः प्रेरको भवन्, (स्तोतुः पुत्रो भवन् वा) पुनः कीदृशः? उपप्रयन् स्तोतुः समीपं प्रतिष्ठमानः दस्युहत्याय असुरस्य शत्रोर्वधाय वज्री वज्रायुधोपेतः॥ ऊचुषे-ब्रूञ् व्यक्तायां वाचि, ब्रुवो वचिः, लिटः क्वसुः, चतुर्थ्येकवचनम्। कीर्तेन्यम्-कृत संशब्दने, कृत्यार्थे केन्प्रत्ययः॥

पञ्चमीमृचमाह—

तदस्येदं पश्यता भूरि पुष्टं श्रदिन्द्रस्य धत्तन वीर्याय।
स गा अविन्दत्सो अविन्ददश्वान्त्स ओषधीः सो अपः स वनानि ॥५॥
तत् अस्य इदम् पश्यत भूरि पुष्टम् श्रत् इन्द्रस्य धत्तन वीर्याय सः गाः
अविन्दत् सः अविन्दत् अश्वान् सः ओषधीः सः अपः सः वनानि॥

हे सखायः, यजमानलक्षणाः, अस्य इन्द्रस्य पूर्वोक्तगुणविशिष्टस्य तदिदम् वीर्यं पुष्टम् प्रवृद्धं अत एव भूरि विस्तीर्णं पश्यत आलोकयत। तस्यैव वीर्याय श्रत् धत्तन तद्वीर्ये श्रद्धां बद्ध्वा बहुमानं कुरुत। किं पुनस्तद्वीर्यम्? उच्यते। सः गाः अविन्दत् येन वीर्येणेन्द्रः पणिभिरपहृताः गाः अलभत। चिद्रश्मिलक्षणा इमा इति स्मर्तव्यम्। सः अश्वान् अविन्दत् प्राणबलात्मानोऽश्वाः, तानलभत। सः ओषधीः पृथिव्या अन्तःसाराविष्कृतीः सः अपः तेजोबलादि-

वाहिनीः सः वनानि वननीयानि तानि सर्वाणि सुखानि च अलभत ॥

इति प्रथमस्य सप्तमे षोडशो वर्गः

षष्ठीमृचमाह—

भूरिकर्मणे वृषभाय वृष्णे सत्यशुष्माय सुनवाम सोमम् ।
य आदित्या परिपन्थीव शूरोऽयज्वनो विभजन्नेति वेदः ॥६॥

भूरिऽकर्मणे वृषभाय वृष्णे सत्यऽशुष्माय सुनवाम सोमम् यः आऽदित्य परिपन्थीऽइव शूरः अयज्वनः विऽभजन् एति वेदः ॥

भूरिकर्मणे विविधेन प्रभूतेन कर्मणा युक्ताय वृषभाय वृषभवत् देवानां मध्ये श्रेष्ठाय वृष्णे सेचनसमर्थाय सत्यशुष्माय अवितथबलायेन्द्राय सोमम् सुनवाम सोमाभिषवं करवाम । शूरः शौर्योपेतः यः इन्द्रः आदित्य आदरं कृत्वा अयज्वनः अयजमानस्य अदैव्यस्य शत्रोः वेदः धनं ज्ञानं वा विभजन् तस्मादयज्वनः विभक्तं कुर्वन्, अपहरन् एति गच्छति । तत्र दृष्टान्तः—परिपन्थी इव यथा मार्गनिरोधकश्चोरः गच्छतां पुरुषाणां धनमपहृत्य गच्छति तद्वत् ॥ परिपन्थीव—छन्दसि परिपन्थिपरिपरिणौ पर्यवस्थातरीति इनिप्रत्ययान्तो निपात्यते ॥

सप्तमीमृचमाह—

तदिन्द्र प्रेव वीर्यं चकर्थ यत्ससन्तं वज्रेणाबोधयोऽहिम् ।
अनु त्वा पत्नीर्हृषितं वयश्च विश्वे देवासो अमदन्ननु त्वा ॥७॥

तत् इन्द्र प्रऽइव वीर्यम् चकर्थ यत् ससन्तम् वज्रेण अबोधयः अहिम् अनु त्वा पत्नीः हृषितं वयः च विश्वे देवासः अमदन् अनु त्वा ॥

हे इन्द्र, तद्वीर्यम् तद्वीरकर्म प्रेव चकर्थ प्रख्यातमिवाकार्षीः । यत् यतः वीर्येण त्वं ससन्तम् स्वपन्तं अहिम् वृत्रं वज्रेण कुलिशप्रयोगेण अबोधयः प्रबुद्धं, युद्धाय जागरितं कृतवानसि । हृषितम् वृत्रप्रबोधेन संप्राप्तहर्षं त्वा त्वां अनु पश्चात् पत्नीः देवपत्न्यः अमदन् हृष्टा अभवन् । तथा वयश्च गमनशीला मरुतो देवाः विश्वे देवासः विश्वे देवाश्च त्वा अनु अमदन् ॥ ससन्तम्—पस स्वप्ने, अस्मात् शतृ । पत्नीः—वा छन्दसीति पूर्वसवर्णदीर्घत्वम् । अमदन्—मदी हर्षे, अमाद्यन्, व्यत्ययेन शप् ॥

अष्टमीमृचमाह—

शुष्णं पिप्रुं कुयवं वृत्रमिन्द्र यदावधीर्वि पुरः शम्बरस्य ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥८॥

शुष्णम् पिप्रुम् कुयवम् वृत्रम् इन्द्र यदा अवधीः वि पुरः शम्बरस्य तत् नः मित्रः वरुणः ममहन्ताम् अदितिः सिन्धुः पृथिवी उत द्यौः ॥

हे इन्द्र, त्वं शुष्णम् पिप्रुम् कुयवम् वृत्रम् शुष्णादीन् चतुरोऽसुरान् यदा अवधीः यदा हतवानसि, तदा शम्बरस्य असुरस्य पुरः वि पुराणि विदारितवानसि । शुष्णादीनामसुराणां स्वरूपाणि धात्वर्थानुसारेण प्राग्विवृतानि । तन्नो मित्र इत्यादि पूर्वं व्याख्यातम् ॥ कुयवम्—यवो यवनं मिश्रणं, कुत्सितं यवनमस्येति कुयवस्तम् ॥

इति प्रथमस्य सप्तमे सप्तदशो वर्गः

'योनिरि'ति नवर्चमेकादशं सूक्तं कुत्सस्यार्षं त्रैष्टुभं ऐन्द्रम् ॥

तत्र प्रथमामृचमाह—

योनिष्ट इन्द्र निषदे अकारि तमा नि षीद स्वानो नार्वा ।
विमुच्या वयोऽवसायाश्वान्दोषा वस्तोर्वहीयसः प्रपित्वे ॥१॥

योनिः ते इन्द्र निऽसदे अकारि तम् आ नि सीद स्वानः न अर्वा विऽमुच्य वयः अवऽसाय अश्वान् दोषा वस्तोः वहीयसः प्रऽपित्वे ॥

हे इन्द्र, योनिः वेदिस्थानीयं अन्तरासनं ते तव निषदे निषदनाय उपवेशनाय अकारि कृतम् । तम् योनिं, अन्तःसिद्धमासनं आ निषीद आगत्य तत्रोपविश । तत्र दृष्टान्तः—स्वानः अर्वा न हर्षेण हेषाशब्दं कुर्वन्नश्वः यथा स्वीयं स्थानमागच्छति, तद्वत् । प्रपित्वे 'प्रपित्वे प्राप्ते' इति यास्कः, यजनकाले प्राप्ते, दोषा वस्तोः नक्तंदिवं निरन्तरं विश्रामवर्जं वहीयसः अतिशयेन वोढॄन् अश्वान् वाहान् अवसाय विमुच्य रथादिति शेषः, वयः अश्वबन्धनार्थान् रश्मीन् विमुच्य रथाद्विश्लिष्य च योनिं निषीदेति संबन्धः ॥ अत्राश्वाः क्रियाशक्तिमूलभूताः प्राणबलात्मानः, तन्नियामकाः "वयः" प्रज्ञावृत्तिविशेषाः ज्ञानप्रकाशाः, एवं ज्ञानक्रियाशक्तिद्वयोपेते रंहणशीले रथे इन्द्र आगच्छति यजमानस्यान्तराविश्य प्रवेष्टुम् ॥ निषदे—सदेः संपदादिलक्षणो भावे

क्विप्। खानः—खनतेः, बहुलवचनात् कर्तरि घञ्। अवसाय—अवपूर्वात् स्यतेः। वहीयसः—वह प्रापणे, तृजन्ताद्वोदृशब्दात् तुश्छन्दसीतीयसुन्॥

द्वितीयामृचमाह—

ओ त्ये नर इन्द्रमूतये गुर्नू चित्तान्त्सद्यो अध्वनो जगम्यात्।
देवासो मन्युं दासस्य श्वघ्नन्ते न आ वक्षन्त्सुविताय वर्णीम्॥२॥
ओ इति त्ये नरः इन्द्रम् ऊतये गुः नु चित् तान् सद्यः अध्वनः जगम्यात्
देवासः मन्युम् दासस्य श्वघ्नन् ते नः आ वक्षन् सुविताय वर्णीम्॥

त्ये ते प्रसिद्धाः नरः नेतारः, बलिनो देवाः, यजमाना इति सायणः, उत्तरत्र "ते देवासः आ वक्षन्" इति पठितत्वात्, नरो देवा इत्येवोपपन्नम्। ऊतये स्वीयाय यजमाने अभिवर्धनाय इन्द्रम् देवराजं ओ आ उ इति निपातद्वयसमुदाय आकारार्थः आगुः आगच्छन्ति, स चेन्द्रः नू चित् क्षिप्रं सद्यः इदानीमेव तान् आगतान् अध्वनः यजनयात्रामार्गान् जगम्यात् गमयतु प्रापयतु। मार्गेषु असुरचेष्टितविध्वंसनाय देवान् तत्र प्रापयत्वित्युक्तम्। देवासः सर्वे देवाः दासस्य उपक्षपयितुरसुरस्य मन्युम् मननयुक्तं क्रोधभावं श्वघ्नन् भक्षयन्तु, हिंसन्तु। अपि च ते देवाः नः अस्माकं सुविताय दुरितप्रतिद्वन्द्विने कल्याणाय भद्रप्राप्तये वर्णम् वर्णनीयं रूपं, प्रकाशं तेज इति यावत् आवक्षन् आनयन्तु। 'वर्णं अनिष्टनिवारकमिन्द्र'मिति सायणीय-व्याख्या। अन्यत्र सायण एव वर्णो वर्णनीयं रूपं, वर्णः प्रकाश इत्यनेकशो व्याचष्टे॥ जगम्यात्—गमेरन्तर्भावितण्यर्थात् लिङि बहुलं छन्दसीति शपः श्लुः। श्वघ्नन्—चमु अदने, लेटि व्यत्ययेन श्ना, शकारोपजनश्छान्दसः। वक्षन्—वहेः लेट्। वर्णम्—वृञ् वरणे॥

तृतीयामृचमाह—

अव त्मना भरते केतवेदा अव त्मना भरते फेनमुदन्।
क्षीरेण स्नातः कुयवस्य योषे हते ते स्यातां प्रवणे शिफायाः॥३॥
अव त्मना भरते केतऽवेदाः अव त्मना भरते फेनम् उदन् क्षीरेण
स्नातः कुयवस्य योषे इति हते इति ते इति स्याताम् प्रवणे शिफायाः॥

रहस्यार्थविज्ञानायेदं वक्तव्यम्। परार्धमपरार्धमिति द्विधा विभक्ता विश्वसत्ता। तत्र परार्धं सत्यं नित्यं स्वतःप्रकाशं ऋतज्योतिरावासस्थानं भूमिकाविशेषोपेतं, अत एव सोपानयुक्तं च भवति। अपरार्धं तु भूरादि त्रैलोक्यं, अनृतप्रपञ्चयुक्तं भूमिकाभिर्युक्तं सोपानवच्च भवति। यद्यपि इदं त्रैलोक्यं ऋतप्रतिद्वन्द्वि प्रोक्तं, तथापि ऋतानृतयोः संयोजनं भवति, तेन मिश्रणेन व्यामोहजनकव्याकुलत्वं आपद्यते। यथा ऊर्ध्वं परार्धे ऋतस्य ज्योतिषः घनत्वं पदे पदे आरोहे प्रवृद्धं घनं च भवति, तथा त्रैलोक्ये अवरोहक्रमेण अनृतस्य असत्यप्रकाशस्य घनत्वं पृथिव्यामात्यन्तिकं च भवति। तदत्र त्रैलोक्ये मध्यमस्थाने भुवर्लोकाख्ये क्रियाशक्तिमूलस्थानभूतप्राणबलावसथे ऋतज्योतिःसंबन्धिनां देवानां तद्विरोधिनां अनृतराज्याधिकारिणामसुराणां च संग्रामो भवति, यतः त्रैलोक्येऽपि ऊर्ध्वसोपानेषु द्युसन्निहितेषु अनृतस्य आसुरबलस्य चात्यन्तन्यूनता अभावो वा भवति, ऋतस्य तत्प्रकाशबलादेः संनिकर्षात्। मध्यमस्थान एव आसुराणि दुर्गाणि पुराणि। तत्रैव असुरवैभवानामिदं एकं भवति, यत् ऋतज्योतिषः अवरोहे तस्यानृतेन मिश्रणं भवति। अस्य फलितं तु सत्याभासः ज्योतिराभासः, ऋतस्य अन्यथा प्रदर्शनं, अनृतस्य ऋतरूपतया च। असुरैर्देवभोग्यानां गवादेः सोमरसस्य च स्वायत्तीकरणेन स्वोपभोगायोपयोजनं च भवति। एवं ज्योतिर्बलादिलक्षणाः आपश्च स्वार्थं अत्रैवोपयुज्यन्ते असुरैः। बहूनामसुराणां वृत्रादीनां कुयव एकः, यस्य ऋतानृतमिश्रणं मुख्यो व्यापारः। इदं चावधेयम्, यद्यथा वेदान्तिनो मन्यन्ते 'अविद्या दोषसहिता विद्या न तु अत्यन्तविद्याभावः' इति, तथा अनृतं नात्यन्तिक ऋताभावः, किं तु दोषदूषितं ऋतमिति। तदिदं ऋतानृतयोः कुत्सितस्य मिश्रणस्याधिकारिको यथार्थनामा कुयवः, यमत्र उत्तरस्यां च शृणुमः॥ अथ ऋचोऽस्या अक्षरार्थकथनेन तात्पर्यं सुगमं भवेत्॥

केतवेदाः केतं ज्ञातं वेदः धनं ज्ञानं वा परेषामिति शेषः येन सः, अस्यासुरस्य शत्रुविषयकज्ञानं जायत इत्यर्थः, अत एव कपटयुक्तिं प्रयुङ्क्ते, प्रयोक्तुं समर्थः। तादृशः कुयवः त्मना आत्मना स्वयमेव इतरसाहाय्यनिरपेक्षं अवभरते अपहरति परस्वं देवधनम्। तथा उदन् उदके, प्राणबलभरिते मध्यमस्थानगते जले अन्तर्वर्तमानः फेनम् नवनवं प्रवहत्। अत एव फेनयुक्तं ज्योतिर्बलादिलक्षणं उदकं त्मना आत्मना स्वयमेव अवभरते अपहरति स्वार्थोपयोगाय। ईदृशस्य कुयवस्य असुरस्य योषे भार्ये, भार्याद्वयं प्राणक्रियात्मिका ज्ञानप्रकाशात्मिका चेति शक्तिद्वयस्य द्योतकं भवति। ऋतवतां देवानामिव अनृतवतां असुराणां च प्रकाशो बलमिति द्विविधा शक्तिः

उपभोग्या अनृतभरिता भार्या भवति। एवंभूते कुयवभार्ये क्षीरेण पयसा स्नातः मज्जतः। आसुरीं समृद्धिं द्योतयति क्षीरेण स्नानं, न तु जलेन। ते उभे कुयवभार्ये उक्तलक्षणे। शिफायाः शिफा काचन नदीति सायणः। सकृदेव श्रूयते। निर्वचनं न दत्तम्, तस्याः प्रवणे निम्नप्रदेशे हते नष्टे स्याताम् भवेताम्। 'शिफाजटे' इति नामलिङ्गानुशासनम्। "अधो रोहन्ति शाखाः शिफाः, शिफाख्या शाखावरोहोऽश्वत्थादेरित्युपाध्यायः" इति क्षीरस्वामी। तर्हि एतदुक्तं भवति—यत् ऊर्ध्वं मूले प्रस्थाय पृथिव्यामवसितस्यावरोहस्य ततोऽपि निम्ने महान्धकारे पाताले कुयवस्य द्विविधाऽपि शक्तिः पततु, नश्यत्विति॥ त्मना—मन्त्रेष्वाकारलोपः। भरते—हृञ् हरणे, हस्य भत्वम्। उदन्—उदकस्य उदन्नादेशः, सप्तम्या लुक्। शिफा—'शिनोति शेते वा शिफा' इति क्षीरस्वामी॥

चतुर्थीमृचमाह—

युयोप॒ नाभि॒रुप॑रस्या॒योः प्र पूर्वा॑भिस्तिरते॒ राष्टि॒ शूर॑ः।
अ॒ञ्ज॒सी कु॒लि॒शी वी॒रप॑त्नी॒ पयो॑ हिन्वा॒ना उ॒दभि॑र्भरन्ते॥४॥

युयोप॑ नाभिः उप॑रस्य आ॒योः प्र पूर्वा॑भिः ति॒र॒ते॒ राष्टि॒ शूर॑ः अ॒ञ्ज॒सी कु॒लि॒शी वी॒रऽप॑त्नी॒ पयः॑ हि॒न्वा॒नाः उ॒दऽभिः॑ भ॒र॒न्ते॒॥

उपरस्य उपरि मध्यमस्थाने उदके वर्तमानस्य आयोः गन्तुः, इतस्ततः सञ्चरतः कुयवस्य नाभिः सन्नद्धो मुख्य आवासप्रदेशः युयोप गूढ आसीत्, यथा अन्ये न जानीयुः तथा निजावासस्थानं सोऽसुरः कृतवान्। अपि च सः पूर्वाभिः पूर्वमपहृताभिरद्भिः प्रतिरते प्रवर्धते। देवस्वानि ज्योतिर्बलादिलक्षणानि उदकानि अपहृत्य तैः प्रवर्धते। शूरः शौर्योपेतः सः राष्टि राजते च, स्वीयशौर्येण दीप्तः प्रख्यातो भवति। अञ्जसी कुलिशी वीरपत्नी एतास्तिस्रः स्यन्दमाना आपः, स्वभावतः शुद्धा दिव्याश्च, अधुना कुयवासुराधीनाः सत्यः तमसुरं पयः पयसा, तृतीयाया लुक्, तत्सारभूतेनोदकेन हिन्वानाः प्रीणयन्त्यः उदभिः उदकैः भरन्ते धारयन्ति॥ अञ्जसी—अञ्जस्योपेतेति सायणः। अन्यत्र तेनैव यदुक्तं तदुपपन्नतरम् "अञ्जसीनां स्तुतिं विन्दति" (१०.३२.७) 'ऋजुना मार्गेण गन्तव्यानामपां मार्गं लभत' इति। तस्मात् अञ्जसी दिव्यस्वभावात् ऋजुपथगामिनी आप्या धारा, सा असुरायत्ता तं धारयति। एवं कुलिशी कूलं शातयतीति सायणः, कुलिशस्येन्द्रायुधत्वात् तत्संबन्धिनी, व्यत्ययेन ईकारान्तः छान्दसः, तथा वीरपत्नी सरस्वत्याः

विशेषणं भवति "पावीरवी.....सरस्वती वीरपत्नी धियं धात्" इत्यत्र तस्मादेषा वीरस्य इन्द्रस्य (प्रजापतेरिति सायणः) पत्नी। एवं तिस्रोऽपि सिन्धवो दिव्यास्तमसुरं कुयवं पोषयन्ति॥ युयोप-युप् विमोहने। नाभिः-नहो भश्चेतीज्प्रत्ययः। राष्टि-राजृ दीप्तौ, शपो लुक्, व्रश्चादिना षत्वे ष्टुत्वम्। हिन्वानाः-हिविः प्रीणनार्थः॥

पञ्चमीमृचमाह—

प्रति॒ यत्स्या नीथाद॑र्शि॒ दस्यो॒रोको॒ नाच्छा॒ सद॑नं जान॒ती गा॑त्।
अध॑ स्मा नो मघवञ्चर्कृ॒तादि॒न्मा नो॑ म॒घेव॑ निष्प॒पी परा॑ दाः॥५॥

प्रति॑ यत् स्या नीथा॑ अद॑र्शि दस्यो॑ः ओकः॑ न अच्छ॑ सद॑नम् जा॒न॒ती गा॒त्
अध॑ स्म॒ नः॒ म॒घ॒ऽव॒न् च॒र्कृ॒तात् इत् मा नः॒ म॒घाऽइ॑व नि॒ष्प॒पी परा॑ दाः॥

यत् यदा नीथा नयनस्य प्रापणस्य करणभूता साधनभूता या स्या सा पदवी प्रति अदर्शि दृष्टा भवत्यस्माभिः, सा च पदवी दस्योः असुरस्य कुयवस्य सदनम् गृहं अच्छ आभिमुख्येन गात् गता प्राप्ता। तत्र दृष्टान्तः-जानती गन्तव्यं गोष्ठमभिजानती गौः ओको न स्वीयं स्थानं यथा निरन्तरायं प्राप्नोति तद्वत् पदवी असुरस्य गूढं वासस्थानं प्राप्नोति। तादृशी पदवी दृष्टाऽस्माभिः। अध स्म अथानन्तरमेव हे मघवन् धनवन्निन्द्र, चर्कृतात् पुनः पुनः असुरेण कृताद् दुःखात् नः अस्मान् रक्षसि इति शेषः, इत् अवधारणे। मार्गदर्शनं अस्माकं भक्तानां कर्तव्यं, तदनन्तरकरणीयं असुरवधेनास्माकं रक्षणं इन्द्रस्य देवस्य कर्तव्यम्। नः अस्मान् मा परादाः मा परित्याक्षीः। तत्र दृष्टान्तः-निष्पपी निर्गतसपः स्वच्छन्दचारी पुरुषः मघेव धनानि यथा अस्थाने परित्यजति तथा मा त्याक्षीरस्मान्॥ नीथा-णीञ् प्रापणे, करणे क्थन्प्रत्ययः। चर्कृतात्-करोतेर्यङ्लुगन्ताच्निष्ठा। मघा इव-शेर्लोपः। निष्पपी-षप समवाये, सपति समवैति सपः, शेपः, पचाद्यच्, निर्गतः सपो यस्य सः, वर्णव्यापत्त्या ईकारः। दाः-डुदाञ् दाने, लुङ्॥

इति प्रथमस्य सप्तमेऽष्टावशो वर्गः

षष्ठीमृचमाह—

स त्वं न॑ इन्द्र॒ सूर्ये॑ सो अ॒प्स्व॑नागा॒स्त्व आ भ॑ज जीवशं॒से।
मान्तरां॑ भुज॒मा रीरिषो नः॒ श्रद्धि॑तं ते मह॒त इ॑न्द्रि॒याय॑॥६॥

सः त्वम् नः इन्द्र सूर्ये सः अप्ऽसु अनागाःऽत्वे आ भज जीवऽशंसे मा अन्तराम् भुजम् आ रिरिषः नः श्रद्धितम् ते महते इन्द्रियाय ॥

हे इन्द्र सः त्वम् तादृशस्त्वं नः अस्मान् सूर्ये सर्वस्य प्रेरके सवितरि आभज आभिमुख्येन भजय भक्तान् कुरु, रहस्यं तु, सूर्ये उत्तमे ज्योतिषि अस्माकं भागं संपादयेति बोध्यम्। प्रायशः वेदे, भजतेर्भागशब्दनिष्पत्तेः, देवेषु यजमानस्य भागसम्पत्तेश्च भजनस्य विभजनार्थो गुप्तो भवति। एवं अप्सु तेजोबलादिलक्षणासु सः स त्वं नः आभज। तथा जीवशंसे जीवैः शंसनीये कामयितव्ये अनागास्त्वे अपापत्वे पारिशुद्ध्ये भागं नः संपादय। नः अस्माकं अन्तराम् अन्तर्वर्तमानां अनाविर्भूतां आविर्भाविनीं भुजम् पालयित्रीं दिव्यसम्पद्रूपां अस्मत्सन्ततिं आ समन्तात् मा रिरिषः मा हिंसीः। ते तव महते बृहते इन्द्रियाय इन्द्रलिङ्गभूताय बलाय श्रद्धितम् श्रद्धानं कृतम्, तव सर्वोत्कृष्टे बले बद्धा नः श्रद्धा ॥ अनागास्त्वे-न विद्यते आगः पापं यस्य तस्यानागसो भावस्तस्मिन्, उपधादीर्घश्छान्दसः। जीवशंसे-शंसु स्तुतौ, कर्मणि घञ्। भुजे-भुनक्तेः, क्विप् ॥

सप्तमीमृचमाह—

अधा मन्ये श्रत्ते अस्मा अधायि वृषा चोदस्व महते धनाय।
मा नो अकृते पुरुहूत योनाविन्द्र क्षुध्यद्भ्यो वयो आसुतिम् दाः ॥७॥
अध मन्ये श्रत् ते अस्मै अधायि वृषा चोदस्व महते धनाय मा नः
अकृते पुरुऽहूत योनौ इन्द्र क्षुध्यत्ऽभ्यः वयः आऽसुतिम् दाः ॥

हे इन्द्र, अध अथानन्तरमेव, मन्ये जानामि त्वाम् ते तव अस्मै बलाय श्रदधायि श्रद्धा कृता, त्वदीयबले दृढो विश्वासो नः। वृषा वर्षिता त्वं महते बृहते उत्कृष्टाय धनाय दिव्याय धनाय चोदस्व चोदयस्व, प्रेरयास्मान्। पुरुहूत बहुभिराहूत, इन्द्र, अकृते अनिष्पादिते योनौ वासस्थाने, दिव्यसम्पद्रिक्ते स्थाने नः अस्मान् मा मा धाः, मा निधेहि। क्षुध्यद्भ्यः देवभोजनाय संजातक्षुद्भ्यः स्तोतृभ्यः वयः बलं, अत्र बलार्थो युक्तः यथा 'वयोधाः बलस्य धर्ता' इत्यादौ, देवभुक्तेर्बलमवश्यम्। आसुतिम् पेयं सोमरसं च दाः देहि ॥ अधायि-दधातेः कर्मणि लुङ्। क्षुध्यद्भ्यः-क्षुध बुभुक्षायाम्, दिवादिः ॥

अष्टमीमृचमाह—

मा नो वधीरिन्द्र मा परा दा मा नः प्रिया भोजनानि प्र मोषीः।
आण्डा मा नो मघवञ्छक्र निर्भेन्मा नः पात्रा भेत्सहजानुषाणि॥८॥
मा नः वधीः इन्द्र मा परा दाः मा नः प्रिया भोजनानि प्र मोषीः
आण्डा मा नः मघऽवन् शक्र निः भेत् मा नः पात्रा भेत् सहऽजानुषाणि॥

हे इन्द्र, नः अस्मान् मा वधीः मा हिंसीः। मा परादाः मा परित्याक्षीः नः अस्माकं प्रिया प्रियाणि भोजनानि उपभोग्यानि वस्तूनि धनानि वा मा प्र मोषीः मापहार्षीः। हे मघवन्, इन्द्र, शक्र शक्त सर्वशक्त, नः अस्माकं आण्डा अण्डसंबन्धीनि गर्भरूपेणान्तरवस्थितानि अनाविर्भूतानि आविष्कारं प्राप्तव्यानि दिव्यसंपत्प्रभवाणि मा निर्भेत् मा भिनः नः अस्माकं सहजानुषाणि जनुषः संबन्धीनि जानुषाणि, जनुषा सहोत्पन्नानीत्यर्थः पात्रा पात्राणि अस्मासु अन्तराधारभूतानि अन्तरङ्गाणि मा भेत् मा भिनः॥ वधीः—लुङ्, तथा मोषीः भेत् च। सर्वत्र न माड्योग इति अडागमप्रतिषेधः॥

नवमीमृचमाह—

अर्वाङेहि सोमकामं त्वाहुरयं सुतस्तस्य पिबा मदाय।
उरुव्यचा जठर आ वृषस्व पितेव नः शृणुहि हूयमानः॥९॥
अर्वाङ् आ इहि सोमऽकामम् त्वा आहुः अयम् सुतः तस्य पिब मदाय
उरुऽव्यचाः जठरे आ वृषस्व पिताऽइव नः शृणुहि हूयमानः॥

हे इन्द्र, त्वं अर्वाङ् अस्मदभिमुखः सन् एहि आगच्छ। त्वा त्वां सोमकामम् सोमाभिलाषं, सोमरतं आहुः पुराविद ऋषयः प्राहुः। तदिदानीं अयम् सुतः सोमोऽभिषुतः। मदाय हर्षाय तस्य तं सोमं पिब। उरुव्यचाः उरु विस्तीर्णं व्यचो व्यापनं यस्य स त्वं जठरे उदरे आवृषस्व आसिञ्च सोमं, समन्तात्पूरय। हूयमानः स्तुतिभिराहूयमानः सन् पिता इव पिता पुत्राणां वचांसि यथा सावधानः प्रीत्या शृणोति तथा नः अस्माकं वचांसि शृणुहि॥ वृषस्व—व्यत्ययेनात्मनेपदम्॥

इति प्रथमस्य सप्तम एकोनविंशो वर्गः

'चन्द्रमा' इत्येकोनविंशत्यृचं द्वादशं सूक्तम्। आप्त्यस्त्रित ऋषिः कुत्सो वा, उभयोः कूपपात आम्नायते, 'त्रितः कूपेऽवहितो देवान् हवत ऊतये' इत्यत्रैव सूक्ते (१०५.१७)। 'इन्द्रं कुत्सो वृत्रहणं शचीपतिं काटे निबाह्ळ ऋषिरह्वदूतये' (१.१०६.६) इति। विश्वे देवा देवता। अन्त्या त्रिष्टुप्, सं मा तपन्तीत्येषा यवमध्या महाबृहती, शिष्टाः पङ्क्तयः॥ त्रितकुत्सयोः इन्द्रसंबन्धित्वं च समानम्। यथा पाण्डवार्जुनस्य विशिष्टं श्रीकृष्णसख्यं महाभारतप्रसिद्धम्, तथा कुत्सस्य इन्द्रसख्यम्। कुत्स ऋषिरित्यसंशयम्। त्रितोऽपि ऋषिरेवेति मन्त्रवर्णेभ्योऽवगम्यते। बहुषु स्थलेषु स तृतीयस्थानो देव इति च ज्ञायते। तर्हि ऋषित्रितो देवभावं प्राप्तस्तृतीयस्थाने इन्द्रकार्यनिर्वाही भवति, यथा ऋषय अङ्गिरसः नित्या आग्नेयज्वाला देवा भवन्ति॥ त्रितमधिकृत्य शाट्यायनिभिराख्यातमितिहासमुदाहृत्य सायणीयं सूक्तव्याख्यानं प्रवर्तते। तत्र एकतो द्वितस्त्रित इति ऋषयस्त्रयो मरुभूमौ पिपासयार्ताः कूपमेकमविन्दन्। त्रितः कूपं प्रविष्टो जलं पीत्वा इतराभ्यामुदकमुद्धृत्य प्रादात्। तौ च पीत्वा त्रितं कूपे पातयित्वा रथचक्रेण कूपं पिधाय प्रस्थितौ। अस्यां दशायां विश्वान् देवान् स्तौति स्वात्मानं कूपादुद्धारयितुम्॥ अत्र कथा विरमतु, तत्त्वं तु बोद्धव्यम्॥ सायणीये भाष्ये त्रितः त्रिषु स्थानेषु तायमानः, ततो व्याप्तः, तृतीयस्थानगतः, त्रिषु स्थानेषु वर्तमान इत्येवञ्जातीयकैर्वचनैर्विवृतः। तृतीयः त्रिधाभूतो वा त्रितः। अन्नमयत्वं प्राप्तश्चिन्मयः पुरुषः एकतः प्रथमस्थानः। प्राणमयत्वं प्राप्तश्चिन्मयः द्वितः द्वितीयस्थानः, शुद्धमनोमयत्वं प्राप्तस्तु तृतीयः त्रितः। आर्भवसूक्ते (१.२०) अन्यत्र च प्रागुक्तं मरुभूमिः नीरसाऽन्नमयी जडप्रकृतिरिति। तत्र उत्तमस्थानस्य त्रितस्य प्रवेशेन अन्नमयप्राणमयपुरुषयोरुद्धारः रसप्राप्तिः। कृतकृत्यस्य मनोमयस्य पुरुषस्य त्रितस्य निर्गमनं पुनरूर्ध्वगमनं च देवानां साहाय्यमपेक्षेते। अतः परं धीमद्भिरूह्यम्॥

तत्र प्रारम्भ एव चन्द्रमा इति प्रथमर्चि अर्थावबोधे महत् कष्टं वर्तत एव, अत एव बहुधा व्याख्यातारः स्थूलार्थपराः प्राञ्चोऽधुनातनाश्च व्याचक्षते। चन्द्रमाः न स्थूलश्चन्द्रः क्षपाकरः, किं तु आह्लादको रसमयः सोमः। इमं प्रति "इत्था चन्द्रमसो गृहे" (१.८४.१५) "गन्धर्वस्य ध्रुवे पदे" (१.२२.१४) इत्यत्र व्याख्यायामुक्तम्। "चन्द्राग्राः अर्णाः आह्लादकं हिरण्यं वा अग्रे यासां ता नद्यः" (५.४१.१४) इति सायणः। एवं अन्यत्र च बहुशः चन्द्रशब्दस्य हिरण्यार्थत्वं आह्लादनार्थत्वं च सायण एव व्याचष्टे। तस्मात् तादृश आह्लादकः सोमो रसमयः अप्सु अन्तर्वर्तते यत्र त्रित ऋषिर्जातोऽधुना वर्तमानश्च ब्रवीति। नेदं कूपोदकम् कूपश्चेत् न स्थूलो

भौतिकः, किं तु पूर्वोक्तलक्षणः, स्वभावतो रसवर्जिते जडे अन्नमये देहे अपां ज्योतिर्बलादि-लक्षणानां आविष्कारः ॥

तत्र प्रथमामृचमाह—

चन्द्रमा अप्स्व१न्तरा सुपर्णो धावते दिवि।
न वो हिरण्यनेमयः पदं विन्दन्ति विद्युतो वित्तं मे अस्य रोदसी ॥१॥
चन्द्रमाः अप्ऽसु अन्तः आ सुऽपर्णः धावते दिवि न वः हिरण्यऽनेमयः पदम् विन्दन्ति विऽद्युतः वित्तम् मे अस्य रोदसी इति ॥

चन्द्रमाः आह्लादकः सोमः अप्सु अन्तः अपां अन्तः गूढं वर्तते, जानामि। यद्यपि सः अपामन्तरप्रकाशो वर्तते, तथापि सः सुपर्णः शोभनपतनो रश्मिः सन् दिवि अन्तरिक्षे आ धावते समन्ताद्गच्छति, वेगेन सर्वतो व्याप्तो भवति। अयं च सुपर्णः सूर्यः सूर्यरश्मिर्वा प्रसिद्धः, वस्तु-तस्तु स ऋतरश्मिः ऋतसूर्यः, अत एव हिरण्यवर्णत्वं चन्द्रत्वं च। हे हिरण्यनेमयः, हिरण्मय-पर्यन्ताः, विद्युतः विद्योतमानाः, सुपर्णप्रभाविसराः, वः युष्माकं पदम् मूलं उद्भवस्थानं तमसस्परस्तात्सत्यज्योतिरेव सर्वासां हिरण्यनेमीनां प्रभाणां पदम्, न विन्दन्ति मदीयानि करणानि न प्राप्नुवन्ति। यद्यपि अन्तरप्सु आनन्दमयः सोमः सुपर्णः सन् दिवि सर्वतो गतो भवति, यद्यपि हिरण्यवर्णास्तत्प्रभाश्च लक्ष्यन्त एव, तथापि तासां मूलं स्थानं तृतीयस्थानादप्यूर्ध्वं 'गन्धर्वस्य ध्रुवे पदे' 'चन्द्रमसो गृहे' इत्येवमादिवर्णनविषयभूतं सत्यं ज्योतिर्बृहत् तु मया मदीयैः करणैः आन्तरैर्बाह्यैश्च न लब्धम्। तस्मात् विश्वेषां देवानां साहाय्येन तत्प्राप्तिं प्रार्थये। हे रोदसी द्यावापृथिव्यौ, अस्य स्तुवतः मे मम वाचं अवस्थां वा वित्तम् जानीतम्, मद्विषये कर्तव्यमनुग्रहीतुम्॥ पृथिवी अन्नमयत्वं प्राप्ता अधरा पृथुला विस्तीर्णा चित्, ऊर्ध्वस्थानां सर्वासां चिन्मयभूमिकानां धारयित्री। द्यौस्तु शुद्धमनस्त्वं प्राप्ता तृतीयस्थाना द्योतमाना ऊर्ध्वा चित्। एवमुभे चितौ प्रार्थिते सत्यौ ऋषिव्यक्तौ संपूर्णविकासाय प्रभवतः॥ चन्द्रमाः—चन्द्रमाह्लादनं सर्वस्य जगतः मिमीते निर्मिमीत इति चन्द्रमाः, चन्द्रे मो डित् इत्यसुन्। धावते—सृ गतौ पाघ्रेत्यादिना वेगितायां धावादेशः, व्यत्ययेनात्मनेपदम्। वित्तम्—वेत्तेः, लोटि अदादित्वात् शपो लुक्, मध्यमद्विवचनम्॥

द्वितीयामृचमाह—

अर्थमिद्वा उ अर्थिन आ जाया युवते पतिम्।
तुञ्जाते वृष्ण्यं पयः परिदाय रसं दुहे वित्तं मे अस्य रोदसी ॥२॥
अर्थम् इत् वै ऊम् इति अर्थिनः आ जाया युवते पतिम् तुञ्जाते इति वृष्ण्यम् पयः परिऽदाय रसम् दुहे वित्तम् मे अस्य रोदसी इति ॥

अर्थिनः तत्तदर्थिनः धनादिकमपेक्षमाणाः पुरुषाः अर्थमिद्वै अपेक्षितं धनादिकं प्राप्नुवन्त्येव उ पादपूरणम्। जाया भार्या पतिम् स्वभर्तारं आयुवते आभिमुख्येन प्राप्नोति, पतिसंयोगं प्राप्नोति॥ संयुक्तौ च स्त्रीपुरुषौ वृष्ण्यम् सेचनसमर्थबलजन्यं पयः वीर्यं तुञ्जाते प्रेरयतः। यथा एवं लोके तत्तत्कामाः स्वोद्योगबलात् तत्तत्सिद्ध्युपायान् प्रयुञ्जते, तथा अहमपि तत्पदलाभकामः परिदाय परितः अप्सु वर्तमानात् चन्द्रमसः सोमात् बलमादाय रसम् सारभूतं अमृतं दुहे आविष्करोमि। वित्तमित्यादि पूर्ववत्॥ अस्या ऋचोऽर्थान्तरसाधनाय अमूला अध्याहारा अवलम्बिताः सायणीये, व्याकरणं चोल्लङ्घितं यथा 'दुहे' इत्यत्र 'दुग्धे' युवतिरिति द्वितीयपादस्थं पदं कर्तृपदमित्यभिधाय दुहेर्लटि उत्तमपुरुषं प्रथमपुरुषं 'दुग्धे' इति कृत्वा 'लोपस्त आत्मनेपदेष्विति तलोपः' इति च साधितम्। एवमर्थतः शब्दतश्च बह्वन्याय्यं लक्ष्यते, विस्तरभयान्नेह विमृश्यते॥ युवते—यु मिश्रणे, व्यत्ययेनात्मनेपदम्॥

तृतीयामृचमाह—

मो षु देवा अदः स्वरव पादि दिवस्परि।
मा सोम्यस्य शम्भुवः शूने भूम कदा चन वित्तं मे अस्य रोदसी ॥३॥
मो इति सु देवाः अदः स्वः अव पादि दिवः परि मा सोम्यस्य शम्ऽभुवः शूने भूम कदा चन वित्तम् मे अस्य रोदसी इति ॥

हे देवाः, अदः तत् दिवः परि द्युलोकादुपरि वर्तमानं स्वः स्वराख्यं ज्योतिः मो षु मैव अव पादि अवपन्नं विपन्नं अस्मदर्थे विनष्टं मा भूत्, अस्माकं अलभ्यं मा भूत् तदुत्तमं ज्योतिः। अपि च सोम्यस्य सोमार्हस्य शम्भुवः सुखस्य भावयितुः देववृन्दस्य शूने अपगमने कदा चन कदाचिदपि मा भूम यथा देवगणोऽतृप्तो भूत्वा अस्मद्विमुखो भवति, तथा मा भूम। वित्तमिति

गतम् ॥ मो षु-मा उ इति निपातद्वयसमुदायो मैवेत्यर्थे, सु इत्यवधारणे ॥ पादि-पद गतौ, लुङ्, अडभावः । शूने-टु ओश्वि गतिवृद्ध्योः, भावे निष्ठा ॥

चतुर्थीमृचमाह—

यज्ञं पृच्छाम्यवमं स तद् दूतो वि वोचति ।
क्व ऋतं पूर्व्यं गतं कस्तद्बिभर्ति नूतनो वित्तं मे अस्य रोदसी ॥४॥

यज्ञम् पृच्छामि अवमम् सः तत् दूतः वि वोचति क्व ऋतम् पूर्व्यम् गतम् कः तत् बिभर्ति नूतनः वित्तम् मे अस्य रोदसी इति ॥

यज्ञम् यजनीयं, अवमम् अर्वाचीनं, प्रत्यासन्नं देवानां मध्ये अत्रास्माकादिभूतं अग्निं पृच्छामि पृच्छा अत्र प्रार्थनापर्यायः । सः दूतः स देवानां दूतः तत् यन्मया पृष्टं तत् विवोचति विविच्य कथयतु । किं तत्? उच्यते । पूर्व्यम् पूर्वकालीनं सर्वदा वर्तमानं ऋतम् सत्यं क्व गतम् कुत्र गतं, ममागोचरं भवति तत् । नूतनः त्वत्तोऽन्यः कः देवः ऋतं तत् बिभर्ति अधुना धारयति? त्वमेव मदर्थं तद्बिभ्रच्चेत्, कथं ममागोचरं भवति तत्? वित्तमिति पूर्ववत् ॥ वोचति-लेट्यडागमः ॥

पञ्चमीमृचमाह—

अमी ये देवाः स्थन त्रिष्वा रोचने दिवः ।
कद्व ऋतं कदनृतं क्व प्रत्ना व आहुतिर्वित्तं मे अस्य रोदसी ॥५॥

अमी इति ये देवाः स्थन त्रिषु आ रोचने दिवः कत् वः ऋतम् कत् अनृतम् क्व प्रत्ना वः आऽहुतिः वित्तम् मे अस्य रोदसी इति ॥

हे देवाः, ये अमी यूयं दिवः सूर्यस्य, सौरज्योतिषः आरोचने दीप्तिविषये अवस्थितेषु त्रिषु त्रिषु स्थानेषु, दिवोऽपि त्रिस्थानोपेताः श्रूयन्ते, तस्मात्तेषु त्रिषु दिव्यलोकेषु स्थन वर्तमाना भवथ । तेषां वः युष्मत्संबन्धि ऋतम् सत्यं कत् कुत्र वर्तते । अनृतम् कत् द्वेष्टृविषयमसत्यं च केदानीम्? प्रत्ना चिरकालीना वः युष्मदर्थं आहुतिः यागः, मया आचरितं यजनं क्व कुत्रासीत्? किं युष्मान् न प्राप्नोत्? वित्तमित्यादि गतम् ॥ स्थन-तप्तनप्तनथनाश्चेति थनादेशः । कत्-कशब्दस्य वर्णव्यापत्त्या कद्भावः ॥

इति प्रथमस्य सप्तमे विंशो वर्गः

षष्ठीमृचमाह—

कद्व ऋतस्य धर्णसि कद्वरुणस्य चक्षणम् ।
कदर्यम्णो महस्पथाति क्रामेम दूढ्यो वित्तं मे अस्य रोदसी ॥६॥
कत् वः ऋतस्य धर्णसि कत् वरुणस्य चक्षणम् कत् अर्यम्णः महः पथा अति क्रामेम दुःऽध्यः वित्तम् मे अस्य रोदसी इति ॥

हे देवाः, वः युष्माकं संबन्धिनः ऋतस्य बृहतः सत्यस्य धर्णसि धारणं कत् क्व गतम्, तन्ममागोचरं संवृत्तमिदानीम् । वरुणस्य दोषादोषविचक्षणस्य देवस्य चक्षणम् दर्शनं कत् क्व? महान् यष्टा स्तोता देवभक्तोऽहं तस्यानुग्रहपात्रमस्मि, स इदं जानन्नपि कथं न पश्यति? महः महतः अर्यम्णः यजमानं जनं गन्तव्यमूर्ध्वं स्थानं प्रापयितुं नित्यमुद्युक्तस्य देवस्य संबन्धिना पथा मार्गेण उत्तमपदप्रापणं कत् क्व गतम्? एतत्सर्वं न क्वापि गतं वर्तत एव युष्मासु, अतो वयं दूढ्यः दुर्धियः पापबुद्धीन् शत्रून् असुरादीन् अतिक्रामेम अतितरेम । वित्तमिति शिष्टं गतम् ॥ धर्णसि–सानसि इत्यादिना असिच्प्रत्ययान्तो निपात्यते । दूढ्यः–पृषोदरादिः, ध्यै चिन्तायामित्यस्मात् ॥

सप्तमीमृचमाह—

अहं सो अस्मि यः पुरा सुते वदामि कानि चित् ।
तं मा व्यन्त्याध्यो वृको न तृष्णजं मृगं वित्तं मे अस्य रोदसी ॥७॥
अहम् सः अस्मि यः पुरा सुते वदामि कानि चित् तम् मा व्यन्ति आऽध्यः वृकः न तृष्णऽजम् मृगम् वित्तम् मे अस्य रोदसी इति ॥

हे देवाः, पुरा पूर्वं कदाचित् सुते सोमे अभिषुते कानिचित् कतिपयानि रहस्यानि वचांसि, स्तोत्राणि वा योऽहम् वदामि योऽहमुक्तवानस्मि, सः स एवाधुनापि अस्मि भक्तः । तम् तादृशं मा मां आध्यः आधयः अन्तरङ्गव्यथाः व्यन्ति भक्षयन्ति । तत्र दृष्टान्तः–तृष्णजम् जाततृष्णं पिपासुं उदकं प्रति गच्छन्तं मृगम् वृको न अरण्यश्वा यथा अर्दति, तद्वत् । शिष्टं गतम् ॥ व्यन्ति–वी गत्यादिषु, अदादित्वात् शपो लुक्, जसादिषु छन्दसि गुणस्य विकल्पनात् अभावे यण् । तृष्णजम्–तृष्णा जाता यस्य तं, ङ्याप्योः संज्ञाछन्दसोर्बहुलमिति ह्रस्वत्वम् ॥

अष्टमीमृचमाह—

सं मा तपन्त्यभितः सपत्नीरिव पर्शवः।
मूषो न शिश्ना व्यदन्ति माध्यः स्तोतारं ते शतक्रतो
वित्तं मे अस्य रोदसी ॥८॥

सम् मा तपन्ति अभितः सपत्नीःऽइव पर्शवः मूषः न शिश्ना वि अदन्ति मा आऽध्यः स्तोतारम् ते शतक्रतो इति शतऽक्रतो वित्तम् मे अस्य रोदसी इति ॥

एषा ऐन्द्री। हे इन्द्र, पर्शवः पार्श्वास्थीनि मा मां अभितः सर्वतः सन्तपन्ति सम्यक् पीडयन्ति। तत्र दृष्टान्तः—सपत्नीरिव समानः पतिर्यासां ताः, सपत्न्यो यथा एकं पतिं पीडयन्ति परस्परं च पीड्यन्ते। हे शतक्रतो बहुकर्मन् बहुविधप्रज्ञ वेन्द्र, ते तव स्तोतारम् मा मां आध्यः अन्तर्व्यथाः व्यदन्ति विविधं भक्षयन्ति। तत्र दृष्टान्तः—मूषो न यथा मूषिकाः शिश्ना शिश्नानि कुविन्दलिप्तानि सूत्राणि भक्षयन्ति, अथवा शिश्नशब्देन प्रजननमेवोच्यते तच्चोपचारात् पुच्छे वर्तते, यथा तैलादिलिप्तं स्वपुच्छमूर्ध्वमुत्कृष्य लिहन्ति इति द्विधा सायणीयम्, अपरोक्तमेव वरम्। शिष्टं गतम्॥ मूषः—मुष स्तेये, किपि छान्दसो दीर्घः। शिश्ना—ष्णा शौचे इत्यस्मान्निष्पादयन्ति पूर्वे छान्दसाः, शिनोतेरित्यर्वाचीनाः॥

नवमीमृचमाह—

अमी ये सप्त रश्मयस्तत्रा मे नाभिरातता।
त्रितस्तद्वेदाप्त्यः स जामित्वाय रेभति वित्तं मे अस्य रोदसी ॥९॥

अमी इति ये सप्त रश्मयः तत्र मे नाभिः आऽतता त्रितः तत् वेद आप्त्यः सः जामिऽत्वाय रेभति वित्तं मे अस्य रोदसी इति ॥

ये अमी दिव्ये धामनि वर्तमानाः सप्त रश्मयः सप्ततत्त्वात्मकाः सौरघृणयः सन्ति तत्र तेषु रश्मिषु मे मदीया नाभिः सन्नद्धं चक्रस्य मध्यमिव प्रधानस्थानं मूलभूमिरिति यावत् आतता समन्ताद्व्याप्ता भवति, अत्रैव मम संकोचो बन्धः कष्टं च, तत्र तु मदीया मूलस्थानभूः विमुक्ता विततता। एतद्विज्ञायैव ऋषिराह परोक्षतया। तत् पूर्वोक्तं आप्त्यः अपां पुत्रः त्रितः तृतीयस्थाने

ततः एतत्संज्ञको मन्त्रद्रष्टा ऋषिः वेद जानाति। सः त्रितः जामित्वाय भ्रातृत्वाय देवानां बन्धुत्वाय रेभति स्तौति। शिष्टं पूर्ववत्॥ रेभति-रेभ शब्दे, भौवादिकः॥

दशमीमृचमाह—

अमी ये पञ्चोक्षणो मध्ये तस्थुर्महो दिवः।
देवत्रा नु प्रवाच्यं सध्रीचीना नि वावृतुर्वित्तं मे अस्य रोदसी॥१०॥
अमी इति ये पञ्च उक्षणः मध्ये तस्थुः महः दिवः देवऽत्रा नु प्रऽवाच्यम् सध्रीचीनाः नि ववृतुः वित्तम् मे अस्य रोदसी इति॥

उक्षणः सेक्तारो देवाः पञ्च पञ्चसंख्याका ये अमी देवाः महः महतः बृहतः दिवः द्युलोकस्य मध्ये तस्थुः तिष्ठन्ति, आसते। अत्र देवपञ्चकं बहुधा विकल्पेन व्याचक्षते। साक्षाद्दतसंबन्धि 'मित्रो वरुणोऽर्यमा भगश्चे'ति देवताचतुष्टयं अधिकृत्य प्रथमेऽनुवाके समुपन्यस्तं, तेन सह त्रैलोक्यदेवानां राजा इन्द्रश्चेति पञ्च देवा इत्यत्र बोध्यम्। देवत्रा देवेषु नु क्षिप्रं प्रवाच्यम् प्रशंसनीयं मदीयं स्तोत्रं देवाराधनं वा इत्यध्याहारः। सध्रीचीनाः सहाञ्चन्तो युगपदागच्छन्तो देवास्ते स्वीकृत्य निववृतुः तृप्ताः निवर्तन्ते। अन्यत्समानम्॥ देवत्रा-सप्तम्यर्थे त्राप्रत्ययः। सध्रीचीनाः-सहस्य सधिरादेशः॥

इति प्रथमस्य सप्तम एकविंशो वर्गः

एकादशीमृचमाह—

सुपर्णा एत आसते मध्य आरोधने दिवः।
ते सेधन्ति पथो वृकं तरन्तं यह्वतीरपो वित्तं मे अस्य रोदसी॥११॥
सुऽपर्णाः एते आसते मध्ये आऽरोधने दिवः ते सेधन्ति पथः वृकम् तरन्तम् यह्वतीः अपः वित्तम् मे अस्य रोदसी इति॥

सुपर्णाः सौरा रश्मयः एते ममान्तर्दृष्टिगोचराः आरोधने सर्वस्यावरके दिवः महतो द्युलोकस्य मध्ये आसते वर्तन्ते। ते रश्मयः वृकम् छेदकं असुरं पथः मार्गात् सेधन्ति निषेधन्ति निवारयन्ति। दिव्ययात्रायामूर्ध्वं गच्छतो यजमानान् मार्गे प्रतिरुध्य आच्छेत्तुं आगच्छति वृकोऽसुरः। तदर्थं प्रवहन्तीर्नदीश्च तरति। तदेवाह। कीदृशं वृकम्? यह्वतीः महतीः अपः नदीः तरन्तम् अति-

क्रामन्तम्। जीवत एव ऋषेस्त्रितस्योर्ध्वयात्रायां वृकस्य प्रतिषेधः देवानुग्रहात् सिध्यति। इमाश्च आपः ऊर्ध्वस्थानाः लाक्षणिक्यः, न तु भौमाः स्थूलाः। शिष्टं पूर्ववत्॥ यह्वतीः-यह्व इति महन्नाम, अस्मादाचारार्थे सर्वप्रातिपदिकेभ्य इति क्विप्, ततो लटः शतृ, उगितश्चेति ङीप्, आगमानुशासनस्यानित्यत्वान्नुमभावः॥

द्वादशीमृचमाह—

नव्यं तदुक्थ्यं हितं देवासः सुप्रवाचनं।
ऋतमर्षन्ति सिन्धवः सत्यं तातान सूर्यो वित्तं मे अस्य रोदसी॥१२॥
नव्यम् तत् उक्थ्यम् हितम् देवासः सुऽप्रवाचनम् ऋतम् अर्षन्ति सिन्धवः सत्यम् तताान सूर्यः वित्तम् मे अस्य रोदसी इति॥

हे देवासः, देवाः, नव्यम् नवतरं उक्थ्यम् स्तुत्यर्हं प्रशस्यं सुप्रवाचनम् सुष्ठु वाचयितुं शक्यं तत् भवदीयं प्रसिद्धं बलं हितम् निहितं युष्मासु। तस्मात्तेन बलेन सिन्धवः स्यन्दनशीला ज्योतिर्बलादिवाहिन्यः ऋतम् तत्सत्यं अर्षन्ति प्रेरयन्ति अस्मान् प्रति, अस्मान् प्रापयन्ति। तथा सूर्यः सर्वस्य प्रेरकः सविता च सत्यम् स्वकीयं ज्योतिः तताान विस्तारयति, अन्यद्गतम्॥ सुप्रवाचनम्-वच परिभाषणे, अस्मात् ण्यन्तात् खलर्थे युच्। अर्षन्ति-अर्तेर्लेटि सिप्, गुणः॥

त्रयोदशीमृचमाह—

अग्ने तव त्यदुक्थ्यं देवेष्वस्त्याप्यम्।
स नः सत्तो मनुष्वदा देवान्यक्षि विदुष्टरो वित्तं मे अस्य रोदसी॥१३॥
अग्ने तव त्यत् उक्थ्यम् देवेषु अस्ति आप्यम् सः नः सत्तः मनुष्वत् आ देवान् यक्षि विदुःऽतरः वित्तम् मे अस्य रोदसी इति॥

हे अग्ने, उक्थ्यम् प्रशस्यं तव त्वत्संबन्धि त्यत् तत् प्रसिद्धं आप्यम् आपिर्बन्धुः तस्य भावः, बन्धुत्वं देवेषु इन्द्रादिषु अस्ति वर्तते। तस्मात् विदुष्टरः विद्वत्तरः देवरहस्यवित् सः तादृशस्त्वं नः अस्माकं यजने सत्तः निषण्णः सन् देवान् आ यक्षि देवानाहूय यज पूजय। मनुष्वत् यथा मनोर्यज्ञे तद्वत् पूजय। शिष्टं पूर्ववत्॥ सत्तः-निष्ठानत्वाभावो निपातितः। मनुष्वत्-

मनोरौणादिक उसिप्रत्ययः, षष्ठ्यर्थे वतिः। यक्षि-छन्दसि शपो लुक्। विदुष्टरः-विद्वस्-शब्दात् तरपि वसोः संप्रसारणम्॥

चतुर्दशीमृचमाह—

सत्तो होता मनुष्वदा देवाँ अच्छा विदुष्टरः।
अग्निर्हव्या सुषूदति देवो देवेषु मेधिरो वित्तं मे अस्य रोदसी॥१४॥
सत्तः होता मनुष्वत् आ देवान् अच्छ विदुःऽतरः अग्निः हव्या सुसूदति देवः देवेषु मेधिरः वित्तम् मे अस्य रोदसी इति॥

मनुष्वत् मनोरिवास्माकं यजने सत्तः निषण्णः होता आह्वाता विदुष्टरः विद्वत्तरः देवः द्योतमानः देवेषु इन्द्रादिषु मध्ये मेधिरः मेधावी अग्निः एवंभूतोऽग्निः देवान् तान् अच्छ आभिमुख्येन हव्या हव्यानि अस्मदीयान्यर्पणानि आ सुषूदति आहूय प्रेरयतु। वित्तमित्यादि गतम्॥ सुषूदति-षूद क्षरणे, लेट्यडागमः। मेधिरः-मेधाशब्दान्मत्वर्थीय इरन्प्रत्ययः॥

पञ्चदशीमृचमाह—

ब्रह्मा कृणोति वरुणो गातुविदं तमीमहे।
व्यूर्णोति हृदा मतिं नव्यो जायतामृतं वित्तं मे अस्य रोदसी॥१५॥
ब्रह्म कृणोति वरुणः गातुऽविदम् तम् ईमहे वि ऊर्णोति हृदा मतिम् नव्यः जायताम् ऋतम् वित्तम् मे अस्य रोदसी इति॥

वरुणः निवारकः पापानां, प्रसिद्धो देवः ब्रह्म मन्त्रात्मकं वचः कृणोति करोति, ऋषिर्मन्त्रं पश्यति, तद्दर्शनकारको भगवान् वरुणः, स एवं सर्वं दिव्यं मार्गं रक्षति। गातुविदम् गातोर्मार्गस्य लम्भयितारं तम् वरुणम् ईमहे याचामहे। तस्मै देवाय हृदा हृदयेन मतिम् मननीयां स्तुतिं व्यूर्णोति विवृणोति, प्रकाशयति। ऋषेः स्तोतुः हृदयेन द्वारेण मन्त्रं प्रकाशयति, अत एव 'ब्रह्म कृणोति वरुणः' इति प्रथमे पादे। नव्यः स्तुत्यः तादृशः स देवः ऋतम् सत्यं, जायताम् अस्माकं प्रसन्नः सत्यभूतो भवतु। शिष्टं पूर्ववत्॥ ईमहे-ईड् गतौ, अत्र याच्ञाकर्मा, विकरणस्य लुक्॥

इति प्रथमस्य सप्तमे द्वाविंशो वर्गः

षोडशीमृचमाह—

असौ यः पन्था आदित्यो दिवि प्रवाच्यः कृतः ।
न स देवा अतिक्रमे तं मर्तासो न पश्यथ वित्तं मे अस्य रोदसी ॥१६॥
असौ यः पन्थाः आदित्यः दिवि प्रऽवाच्यम् कृतः नः सः देवाः अतिऽक्रमे तम् मर्तासः न पश्यथ वित्तम् मे अस्य रोदसी इति ॥

पन्थाः मार्गभूतः सत्यलोकं गच्छतां पुण्यात्मनां योऽसौ आदित्यः दिवि द्युलोके आदित्यात्मना व्यवस्थितः सन् प्रवाच्यम् प्रकर्षेण वचनं यथा भवति तथा कृतः निर्मितः, हे देवाः, सः आदित्यः अतिक्रमे न अतिक्रमितुं युष्माभिरपि न शक्यः । तम् आदित्यं हे मर्तासः हे मर्त्याः न पश्यथ यूयं न पश्यथ, अहं तु पश्यामि जानामीत्यर्थः । नायं बाह्यः सूर्यः, लौकिकश्चेत् सर्वेऽपि मर्त्याः पश्येयुः । वित्तमिति पूर्ववत् ॥ प्रवाच्यम्—वक्तेर्ण्यन्तादचो यदिति भावे यत् । अतिक्रमे—क्रमु पादविक्षेपे, कृत्यार्थे तवैकेनिति केन्प्रत्ययः ॥

सप्तदशीमृचमाह—

त्रितः कूपेऽवहितो देवान्हवत ऊतये ।
तच्छुश्राव बृहस्पतिः कृण्वन्नंहूरणादुरु वित्तं मे अस्य रोदसी ॥१७॥
त्रितः कूपे अवऽहितः देवान् हवते ऊतये तत् शुश्राव बृहस्पतिः कृण्वन् अंहूरणात् उरु वित्तम् मे अस्य रोदसी इति ॥

कूपे नायं कूपो बाह्यः, अन्नमये नीरसे जडे अपां उद्भवः । इदं च सूक्तप्रारम्भे विवृतम् । अवहितः अवस्थितः त्रितः तृतीयस्थाने ततः व्याप्तः पुरुषः, अन्नमयोद्धाराय जडेऽवरुह्यावस्थित इत्यर्थः । देवान् विश्वान् देवान् ऊतये रक्षायै हवते आह्वयति तत् आह्वानं बृहस्पतिः मन्त्रवाक्पतिर्देवः शुश्राव श्रुतवान् । किं कुर्वन्? अंहूरणात् पापात् जडकूपात्मकात् त्रितस्योद्गमनसौलभ्याय उरु कृण्वन् कूपद्वारं विस्तीर्णं कुर्वन् । वित्तमित्यादि पूर्ववत् ॥ हवते—ह्वयतेर्लटि छान्दसं संप्रसारणम् । अंहूरणात्—अंहस्-शब्दात् ऊरप्रत्ययः, मत्वर्थीयो नः, आङ्पूर्वात् हन्तेर्वा रूपमित्येके ॥

अष्टादशीमृचमाह—

अरुणो मा सकृद्वृकः पथा यन्तं ददर्श हि ।
उज्जिहीते निचाय्या तष्टेव पृष्ट्यामयी वित्तं मे अस्य रोदसी ॥१८॥

अरुणः मा सकृत् वृकः पथा यन्तम् ददर्श हि उत् जिहीते निऽचाय्य तष्टाऽइव पृष्टिऽआमयी वित्तम् मे अस्य रोदसी इति ॥

अरुणः लोहितवर्णः राजसक्रियाद्योतनार्थकः, वृकः छेदकः असुरः पथा मार्गेण यन्तम् गच्छन्तं ऊर्ध्वं दिवं प्रति, मा मां सकृत् एकवारं ददर्श हि दृष्टवान् खलु । अनेन जीवतामृषीणां ऊर्ध्वं दिव्यं धाम प्रति गमनं पुनरागमनं च साधारणमभूत् तेषां रहोयागमार्गे इति बोध्यम् । इदं च पूर्वमनुभूतं मयेति ब्रूते ऋषिः । सः निचाय्य दृष्ट्वा मां जिघृक्षन् उज्जिहीते उद्गच्छति स्म । यद्यपि स उद्गतः, ततोऽप्यहमुद्गततर आसं देवानामनुग्रहबलात्, तस्मात् केवलं उत्पश्यन्नवर्तत । क इव? तक्षा इव यथा वर्धकिः पृष्टिऽआमयी तक्षणजनितपृष्ठक्लेशः तद्दुःखापनोदनायोर्ध्वाभिमुखो भवति, तद्वत् । अत्रापि प्रागृषेरूर्ध्वप्रयाणं आसीदिति गम्यते । वित्तमिति समानम् ॥ सकृत्—एकस्य सकृच्चेति क्रियाभ्यावृत्तिगणने निपातितः । जिहीते—ओहाक् त्यागे, जुहोत्यादिः । पृष्ट्यामयी—स्पृश संस्पर्शने, पृष्टिः पृष्टं, स्पृश्यतेऽनेनेति पृष्टिः छान्दसो वर्णलोपः, पृष्टौ आमयः, तद्वान् ॥

एकोनविंशीमृचमाह—

एनाङ्गूषेण वयमिन्द्रवन्तोऽभि ष्याम वृजने सर्ववीराः ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥१९॥

एना आङ्गूषेण वयम् इन्द्रऽवन्तः अभि स्याम वृजने सर्वऽवीराः तत् नः मित्रः वरुणः ममहन्ताम् अदितिः सिन्धुः पृथिवी उत द्यौः ॥

एना अनेन आङ्गूषेण आघोषणार्हेण स्तोत्रेण हेतुना इन्द्रवन्तः इन्द्रयुक्ताः वयम् सर्ववीराः सर्वविधवीर्योपेताः सन्तः वृजने संग्रामे असुरजयार्थके अभि स्याम अभिभवेम शत्रून् देवद्वेषिणः । तन्नो मित्र इत्यादि व्याख्यातम् ॥ एना—इदम एनादेशः, विभक्तेराजादेशः । आङ्गूषेण—आङ्पूर्वात् घुषेः कर्मणि घञ्, घस्य गः अन्यच्च सर्वं छान्दसम् ॥

इति प्रथमस्य सप्तमे त्रयोविंशो वर्गः
प्रथमे मण्डले पञ्चदशोऽनुवाकः समाप्तः

षोडशेऽनुवाके दश सूक्तानि। तत्र 'इन्द्रमि'ति सप्तर्चं प्रथमं सूक्तम्। कुत्स ऋषिः, जगती छन्दः, अन्त्या त्रिष्टुप्, विश्वे देवा देवता ॥

तत्र प्रथमामृचमाह—

इन्द्रं मित्रं वरुणमग्निमूतये मारुतं शर्धो अदितिं हवामहे।
रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन ॥ १ ॥
इन्द्रम् मित्रम् वरुणम् अग्निम् ऊतये मारुतम् शर्धः अदितिम् हवामहे
रथम् न दुःऽगात् वसवः सुऽदानवः विश्वस्मात् नः अंहसः निः पिपर्तन ॥

इन्द्रम् मित्रम् वरुणम् अग्निम् एतान् देवान् मारुतम् शर्धः मरुत्संबन्धि बलं, मरुद्गणं वा, तथा अदितिम् अखण्डसत्त्वभूतां सर्वदेवमातरं च ऊतये रक्षायै हवामहे आह्वयामः। वसवः निवासयितारः सुदानवः शोभनदानोपेताः, हे देवाः, नः अस्मान् विश्वस्मात् सर्वस्मात् अंहसः पापात् निष्पिपर्तन निर्गमय्य पालयत। तत्र दृष्टान्तः—दुर्गात् गन्तुं दुःखेन शक्यात् निम्नोन्नतात् प्रदेशात् रथम् न रथं यथा सारथयः पालयन्ति, तद्वत् ॥ पिपर्त्तन—पालनार्थात् पिपर्तेर्लोटि तनबादेशः, अर्तिपिपर्त्योश्चेति अभ्यासस्य इत्वम् ॥

द्वितीयामृचमाह—

त आदित्या आ गता सर्वतातये भूत देवा वृत्रतूर्येषु शम्भुवः।
रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन ॥ २ ॥
ते आदित्याः आ गत सर्वऽतातये भूत देवाः वृत्रऽतूर्येषु शम्ऽभुवः रथम्
न दुःऽगात् वसवः सुऽदानवः विश्वस्मात् नः अंहसः निः पिपर्तन ॥

हे आदित्याः, देवाः, ते तादृशा यूयं आगत आगच्छत। सर्वतातये सर्वैस्तायनाय सर्वैः कर्तव्याय प्रयासाय भूत सहायाः भवत। वृत्रतूर्येषु वृत्राः असुराः तूर्याः हिंस्याः येषु तेषु युद्धेषु शम्भुवः सुखस्य भावयितारो भवत। रथं न दुर्गेति व्याख्यातम् ॥ गत—गमेर्लोट्, शपो लुक् छन्दसि विकल्पनात् ॥

तृतीयामृचमाह—

अवन्तु नः पितरः सुप्रवाचना उत देवी देवपुत्रे ऋतावृधा।
रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन ॥३॥
अवन्तु नः पितरः सुऽप्रवाचनाः उत देवी इति देवपुत्रे इति देवऽपुत्रे ऋतऽवृधा रथम् न दुःऽगात् वसवः सुऽदानवः विश्वस्मात् नः अंहसः निः पिपर्तन ॥

नः अस्मान् पितरः पूर्वे ऋषयः अवन्तु रक्षन्तु। कीदृशाः? सुप्रवाचनाः सुखेन प्रवक्तुं शक्याः। उत अपि च देवपुत्रे देवाः पुत्राः ययोस्ते ऋतावृधा ऋतस्य वर्धयित्र्यौ देवी देव्यौ, द्यावापृथिव्यौ इति सायणः, तर्हि, ऊर्ध्वा मनोमयत्वं प्राप्ता चित् द्यौः, अधरा अन्नमयत्वस्य धारयित्री स्थूला चित् पृथिवी, अस्मान् रक्षताम् उभयोः सङ्गतयोः पुत्रस्थानीया देवाः यजमाने प्रादुर्भवन्ति। रथं नेति पूर्ववत् ॥ देवी—देव्यौ, वा छन्दसीति पूर्वसवर्णदीर्घत्वम् ॥

चतुर्थीमृचमाह—

नराशंसं वाजिनं वाजयन्निह क्षयद्वीरं पूषणं सुम्नैरीमहे।
रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन ॥४॥
नराशंसम् वाजिनम् वाजयन् इह क्षयत्ऽवीरम् पूषणम् सुम्नैः ईमहे
रथम् न दुःऽगात् वसवः सुऽदानवः विश्वस्मात् नः अंहसः निः पिपर्तन ॥

नराशंसम् नरैः बलिभिः पुरुषैः शंसनीयं वाजिनम् समृद्धिमन्तं वाजयन् समर्थयन् विशेषतो ज्वलयन् इह अस्मिन् यजने स्तौमि। क्षयद्वीरम् क्षयन्तो वीरा यस्मिन् तमतिबलाढ्यं पूषणम् पोषकं देवं सुम्नैः सुखकरैः वचोभिः ईमहे याचामहे। रथं नेति पूर्ववत् ॥ क्षयद्वीरम्—क्षि क्षये, लटः शतृ, शपि प्राप्ते व्यत्ययेन शः ॥

पञ्चमीमृचमाह—

बृहस्पते सदमिन्नः सुगं कृधि शं योर्यत्ते मनुर्हितं तदीमहे।
रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन ॥५॥

बृहस्पते सदम् इत् नः सुऽगम् कृधि शम् योः यत् ते मनुःऽहितम् तत् ईमहे रथम् न दुःऽगात् वसवः सुऽदानवः विश्वस्मात् नः अंहसः निः पिपर्तन ॥

बृहस्पते, सदमित् सदैव नः अस्माकं, योः शम् देवान् कामयमानस्य शमरूपं यत् सुखं वर्तते तत् सुगम् सुप्रापं कृधि कुरु । ते तव स्वभूतं मनुर्हितम् मनुना ब्रह्मणा हितं व्यवस्थापितं यत् शान्तिसुखं भवति तत् ईमहे प्रार्थयामहे । शंयोरिति पदद्वयं 'शमनं च रोगाणां यावनं च भयानाम्' इति यास्केन व्याख्यातम् । तदनुसारेण सायणीयम् । रथं नेति पूर्ववत् ॥

षष्ठीमृचमाह—

इन्द्रं कुत्सो वृत्रहणं शचीपतिं काटे निबाळ्ह ऋषिरह्वदूतये ।
रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन ॥६॥
इन्द्रम् कुत्सः वृत्रऽहनम् शचीऽपतिम् काटे निऽबाळ्हः ऋषिः अह्वत् ऊतये रथम् न दुःऽगात् वसवः सुऽदानवः विश्वस्मात् नः अंहसः निः पिपर्तन ॥

काट इति कूपनाम । काटे कूपे निबाळ्हः नितरां कृतप्रयासः, बाह प्रयत्ने इति धातोर्निष्पन्नः, न तु पतितः पातितो वा, एवं अस्मदुक्ततात्पर्यमुपपन्नं भवति । ऋषिः कुत्सः, अत एव त्रितः कुत्स एव स्यादित्यनुमानम् । वृत्रहनम् वृत्रस्य हन्तारम् शचीपतिम् शच्याः पतिं, सर्वकर्मसु शक्तं, इन्द्रम् देवराजं ऊतये रक्षायै अह्वत् आह्वयति स्म । अन्यत्समानम् ॥

सप्तमीमृचमाह—

देवैर्नो देव्यदितिर्नि पातु देवस्त्राता त्रायतामप्रयुच्छन् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥७॥
देवैः नः देवी अदितिः नि पातु देवः त्राता त्रायताम् अप्रऽयुच्छन् तत् नः मित्रः वरुणः ममहन्ताम् अदितिः सिन्धुः पृथिवी उत द्यौः ॥

देवी अदितिः देवमाता देवैः स्वीयैः पुत्रैः सह नः अस्मान् निपातु नितरां रक्षतु । त्राता

सर्वस्य रक्षकः देवः सविता अप्रयुच्छन् अप्रमाद्यन्, सर्वदा अस्मद्विषये जागरूकः सन् त्रायताम् पालयत्वस्मान्। तन्नो मित्र इति प्राग्व्याख्यातम्॥ अप्रयुच्छन्—युच्छ प्रमादे॥

इति प्रथमस्य सप्तमे चतुर्विंशो वर्गः

'यज्ञो देवानामि'ति तृचं द्वितीयं सूक्तं, कुत्सस्यार्षं त्रैष्टुभं वैश्वदेवम्॥

तत्र प्रथमामृचमाह—

यज्ञो देवानां प्रत्येति सुम्नमादित्यासो भवता मृळयन्तः।
आ वोऽर्वाची सुमतिर्ववृत्यादंहोश्चिद्या वरिवोवित्तरासत्॥१॥

यज्ञः देवानाम् प्रति एति सुम्नम् आदित्यासः भवत मृळयन्तः आ वः अर्वाची सुऽमतिः ववृत्यात् अंहोः चित् या वरिवोवित्ऽतरा असत्॥

यज्ञः अस्मदीयः देवानाम् इन्द्रादीनां सुम्नम् प्रति सुखं प्रति एति गच्छतु। आदित्यासः हे अदितिपुत्राः देवाः, मृळयन्तः सुखयन्तः युष्मानाश्रितान् भवत। तथा वः युष्माकं सुमतिः शोभना भक्तानुग्रहात्मिका बुद्धिः अर्वाची अस्मदभिमुखी सती आववृत्यात् आवर्तताम्। या सुमतिः अंहोश्चित् पापादपि उद्धृत्य वरिवोवित्तरा वरिवः परिचरणं सुखं वा, तस्यातिशयेन लम्भयित्री असत् भवेत्॥ ववृत्यात्—वृतु वर्तने, लिङ्, व्यत्ययेनात्मनेपदं, छन्दसि शपः श्लुः। अंहोः—अहि गतौ, इदित्त्वान्नुम्, औणादिक उप्रत्ययः। वरिवोवित्तरा—विदॢ लाभे। असत्—अस भुवि, लेट्॥

द्वितीयामृचमाह—

उप नो देवा अवसा गमन्त्वङ्गिरसां साममिः स्तूयमानाः।
इन्द्र इन्द्रियैर्मरुतो मरुद्भिरादित्यैर्नो अदितिः शर्म यंसत्॥२॥

उप नः देवाः अवसा आ गमन्तु अङ्गिरसाम् साम ऽभिः स्तूयमानाः इन्द्रः इन्द्रियैः मरुतः मरुत्ऽभिः आदित्यैः नः अदितिः शर्म यंसत्॥

देवाः सर्वेऽपि अवसा रक्षणेन युक्ताः नः अस्मान् उप आगमन्तु उपगच्छन्तु। कीदृशाः? अङ्गिरसाम् प्रसिद्धानां ऋषीणां सामभिः मन्त्रगानैः स्तूयमानाः। अपि च इन्द्रः देवराजः

इन्द्रियैः इन्द्रलिङ्गैः स्वीयैर्बलैः युक्तः अस्मान् प्राप्नोतु तथा मरुतः इन्द्रभ्रातरः मरुद्भिः मरुद्गणैः सह अस्मान् प्राप्नुवन्तु । अथ अदितिः देवानां माता अखण्डस्वरूपा आदित्यैः स्वकीयपुत्रैः सह नः अस्मभ्यं शर्म सुखं यंसत् यच्छतु ॥ गमन्तु-गच्छन्तु, छन्दसि उभयथा । यंसत्-यम उपरमे, लेट्, सिप् बहुलमिति सिप् ॥

तृतीयामृचमाह—

तन्न इन्द्रस्तद्वरुणस्तदग्निस्तदर्यमा तत्सविता चनो धात् ।
तन्नो मित्रो वरुणो ममहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥३॥

तत् नः इन्द्रः तत् वरुणः तत् अग्निः तत् अर्यमा तत् सविता चनः धात् तत् नः मित्रः वरुणः ममहन्ताम् अदितिः सिन्धुः पृथिवी उत द्यौः ॥

यदस्माभिः प्रार्थ्यते, तत् तादृशं चनः सुखं संमदं वा नः अस्मभ्यं इन्द्रः देवः धात् दधातु । तत् वरुणः दधातु । तत् अग्निः दधातु । तत् अर्यमा दधातु । तत् सविता परमो देवः दधातु । तन्नो मित्रो वरुण इत्यादि व्याख्यातम् ॥ धात्-छन्दसि प्रार्थनायां लुङ् ॥

इति प्रथमस्य सप्तमे पञ्चविंशो वर्गः

'य इन्द्राग्नी' इति त्रयोदशर्चं तृतीयं सूक्तं, कुत्सस्यार्षं त्रैष्टुभमैन्द्राग्नम् ॥

तत्र प्रथमामृचमाह—

य इन्द्राग्नी चित्रतमो रथो वामभि विश्वानि भुवनानि चष्टे ।
तेना यातं सरथं तस्थिवांसाथा सोमस्य पिबतं सुतस्य ॥१॥

यः इन्द्राग्नी इति चित्रऽतमः रथः वाम् अभि विश्वानि भुवनानि चष्टे तेन आ यातम् सऽरथम् तस्थिऽवांसा अथ सोमस्य पिबतम् सुतस्य ॥

हे इन्द्राग्नी, हे देवौ, चित्रतमः अतिशयेन चित्रः अद्भुतः यः वाम् युवयोः संबन्धी रथः विश्वानि भुवनानि सर्वाणि भूतजातानि अभिचष्टे आभिमुख्येन पश्यति, तेन रथेन आयातम् आगच्छतम् । कीदृशौ सन्तौ? सरथम् समानं एकं रथं तस्थिवांसा अधिष्ठितवन्तौ, आयातम् । अथ तथा आगमनात्परं सुतस्य अभिषुतस्य सोमस्य एकदेशं स्वं भागं पिबतम् ॥ तस्थिवांसा-तिष्ठतेः लिटः क्वसुः, द्विर्वचनं, सुपां सुलुगित्याकारः ॥

द्वितीयामृचमाह—

यावदिदं भुवनं विश्वमस्त्युरुव्यचा वरिमता गभीरम्।
तावाँ अयं पातवे सोमो अस्त्वरमिन्द्राग्नी मनसे युवभ्याम् ॥२॥
यावत् इदम् भुवनम् विश्वम् अस्ति उरुऽव्यचा वरिमता गभीरम् तावान् अयम् पातवे सोमः अस्तु अरम् इन्द्राग्नी इति मनसे युवऽभ्याम्॥

विश्वम् इदम् भुवनम् सर्वमिदं जगत् उरुव्यचा उरु विस्तीर्णं व्यचः व्यापनं यस्य तेन वरिमता वरिम्णा उरुत्वेन स्वात्मीयेन महत्त्वेन गभीरम् गाम्भीर्योपेतं सत् यावत् अस्ति यावत्-प्रमाणं भवति, हे इन्द्राग्नी, युवभ्याम् पातवे युवाभ्यां पातुं अयम् सोमः अस्माभिर्युष्मदर्थ-मभिषुतः तावानस्तु तावत्प्रमाणो भवतु। तथा मनसे अरम् अस्तु अलं पर्याप्तो भवतु। वरिमता—उरुशब्दात् भावे इमनिच्, उरुशब्दस्य वरादेशः, तृतीयायाश्छान्दसस्तुडागमः ॥

तृतीयामृचमाह—

चक्राथे हि सध्रयङ्नाम भद्रं सधीचीना वृत्रहणा उत स्थः।
ताविन्द्राग्नी सध्र्यञ्चा निषद्या वृष्णः सोमस्य वृषणा वृषेथाम् ॥३॥
चक्राथे इति हि सध्र्यक् नाम भद्रम् सधीचीना वृत्रऽहनौ उत स्थः तौ इन्द्राग्नी इति सध्र्यञ्चा निऽसद्य वृष्णः सोमस्य वृषणा आ वृषेथाम्॥

हे इन्द्राग्नी, भद्रम् शुभं उत्कृष्टं नाम स्वकीयं नामधेयं सध्र्यक् सहगतं संयुक्तं चक्राथे युवां कृतवन्तौ। अग्निः पृथिव्यां इन्द्रो दिवि, एवं द्यावापृथिव्योरूर्जस्वलावध्यक्षौ नित्यसंयुक्तौ भवतः। अग्निरितो देवानाह्वातुं समर्थः, आहूतानां मुख्यो राजा इन्द्रः। उत अपि च हे वृत्रहनौ, उभौ संयुक्तौ असुरं वृत्रं हतः, अत एवं संबोधनम्। सधीचीना सह गच्छन्तौ, स्थः वृत्रवधाय संयुक्तौ भवथः। हि यस्मादेवं तस्मात् हे वृषणा, वर्षितारौ इन्द्राग्नी, तौ युवां सध्र्यञ्चा सहितावेव सन्तौ निषद्य निषण्णौ उपविष्टौ भूत्वा वृष्णः सोमस्य सेक्तुः सोमस्य स्वीयं भागं आवृषेथाम् आसिञ्चेथां आत्मीयोदरे ॥ सर्वे गताः ॥

चतुर्थीमृचमाह—

समिद्धेष्वग्निष्वानजाना यतस्रुचा बर्हिरु तिस्तिराणा।
तीव्रैः सोमैः परिषिक्तेभिरर्वागेन्द्राग्नी सौमनसाय यातम् ॥४॥
सम्ऽइद्धेषु अग्निषु आनजाना यतऽस्रुचा बर्हिः उम् इति तिस्तिराणा
तीव्रैः सोमैः परिऽसिक्तेभिः अर्वाक् आ इन्द्राग्नी इति सौमनसाय यातम् ॥

अस्यां कर्मपरार्थस्यावकाशं विस्पष्टं दधाति मन्त्रवर्णः। तस्मात् "यतस्रुचा" इत्यादीनां सङ्केतत्वं रहस्यार्थे बोद्धव्यम्। समिद्धेषु प्रज्वलितेषु अग्निषु पृथिव्यादिस्थानगतेषु ऊर्ध्वेषु सोपानेषु गच्छन्नग्निः बहुत्वं दधाति, तस्माद्बहुवचनम्। तादृशेषु अग्निविशेषेषु आनजाना अञ्जन्तौ, आत्मानं व्यक्तं कुर्वन्तौ यतस्रुचा यता उद्यता मुहुर्मुहुरुद्गता उत्कांक्षा ययोस्तौ, ऊर्ध्वं यजमानं गमयितुं तेन सह स्वयं गन्तुमभिलषन्तौ, बर्हिः उ वेद्यां यजमानस्यान्तरासने तिस्तिराणा आस्तीर्णं कृतवन्तौ, ऊर्ध्वगमने, स्वीयमासनं यजमानस्यान्तः तावेव देवौ सिद्धं कुरुतः, तथाविधा यजमानेऽनुग्रहबुद्धिः। तथाभूतौ हे इन्द्राग्नी, तीव्रैः क्षिप्रं हर्षप्रदैः परिषिक्तेभिः परितः यजमानस्याधारभूतेषु सर्वेष्वङ्गेषु सिक्तैः सोमैः हेतुभूतैः अर्वाक् अस्मदभिमुखं सौमनसाय सौमनस्याय अनुग्रहाय आयातम् आगच्छतम्॥ आनजाना—अञ्जू व्यक्तिम्रक्षणादिषु, लिटः कानच्, व्यत्ययेन नुट्। तिस्तिराणा—स्तृञ् आच्छादने, पूर्ववत् कानच्, विभक्तेराकारः॥

पञ्चमीमृचमाह—

यानीन्द्राग्नी चक्रथुर्वीर्याणि यानि रूपाण्युत वृष्ण्यानि।
या वां प्रत्नानि सख्या शिवानि तेभिः सोमस्य पिबतं सुतस्य ॥५॥
यानि इन्द्राग्नी इति चक्रथुः वीर्याणि यानि रूपाणि उत वृष्ण्यानि या
वाम् प्रत्नानि सख्या शिवानि तेभिः सोमस्य पिबतम् सुतस्य ॥

हे इन्द्राग्नी, यानि वीर्याणि असुरवधादीनि चक्रथुः युवां कृतवन्तौ, यानि रूपाणि यानि च नवनवानि दिव्यानि रूपाणि यजमाने तदर्थं च कृतवन्तौ, उत अपि च यानि वृष्ण्यानि वृष्णि भवानि, सेचनसामर्थ्योद्भवानि भक्तेषु यजमानेषु फलितानि दिव्यपुष्टिप्रकाशादीनि, या यानि

प्रत्नानि चिरन्तनानि वाम् युवयोः शिवानि शुभप्रदानि सख्या सख्यानि च भवन्ति, तेभिः तैः सर्वैः युक्तौ सन्तौ सुतस्य सोमस्य पिबतम् अभिषुतं सोमं यथाभागं पिबतम् ॥

इति प्रथमस्य सप्तमे षड्विंशो वर्गः

षष्ठीमृचमाह—

यद्ब्रवं प्रथमं वां वृणानो ३ऽयं सोमो असुरैर्नो विहव्यः ।
तां सत्यां श्रद्धामभ्या हि यातमथा सोमस्य पिबतं सुतस्य ॥६॥
यत् अब्रवम् प्रथमम् वाम् वृणानः अयम् सोमः असुरैः नः विऽहव्यः
ताम् सत्याम् श्रद्धाम् अभि आ हि यातम् अथ सोमस्य पिबतम् सुतस्य ॥

हे इन्द्राग्नी, वाम् युवां वृणानः संभजमानोऽहं प्रथमम् यजनस्योपक्रम एव यदब्रवम् यदुक्तवानस्मि, किं तदुक्तम्? आह–अयम् नः सोमः असुरैः विहव्यः अयमस्माभिरभिषुतः सोमः देवद्वेषिभिरस्मच्छत्रुभिः विपर्ययेण होतव्यः स्यात् यदि प्राप्तकालं युवाभ्यां न स्वीक्रियेत, तस्माद्विपरीतं मा भूत्, एवमर्थकं वचः प्रागेव दत्तं मया। सत्याम् परमार्थां ताम् श्रद्धाम् आदरातिशयेन श्रद्धया कृतां प्रतिज्ञां अभि अभिलक्ष्य अवधाय आ हि यातम् आयातमेव। अथ आगमनादनन्तरं सुतस्य सोमस्य पिबतम् ॥ वृणानः–वृङ् संभक्तौ ॥

सप्तमीमृचमाह—

यदिन्द्राग्नी मदथः स्वे दुरोणे यद् ब्रह्मणि राजनि वा यजत्रा ।
अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥७॥
यत् इन्द्राग्नी इति मदथः स्वे दुरोणे यत् ब्रह्मणि राजनि वा यजत्रा
अतः परि वृषणौ आ हि यातम् अथ सोमस्य पिबतम् सुतस्य ॥

हे यजत्रा यष्टव्यौ, इन्द्राग्नी, स्वे दुरोणे स्वकीये द्वारयुक्ते निवासस्थाने यत् यदि मदथः हृष्यथः। ब्रह्मणि ब्रह्मपदवाच्यमन्त्रयुक्ते ऋषौ तदनुग्रहे यत् यदि हृष्यथः वा यदि वा राजनि दीप्यमाने नरपतौ, तस्मिन् बलाधाने हृष्यथः। अतः परि अस्मात् सर्वस्मादप्युपरि हे वृषणौ वर्षितारौ दिव्यतेजोबलधनादीनामभीष्टानाम् आयातम् हि आगच्छतमेव। अन्यत् पूर्ववत् ॥ यजत्रा–यजेः कर्मण्यत्रन्, विभक्तेराकारः ॥

अष्टमीमृचमाह—

यदिन्द्राग्नी यदुषु तुर्वशेषु यद् द्रुह्युष्वनुषु पूरुषु स्थः ।
अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥८॥

यत् इन्द्राग्नी इति यदुषु तुर्वशेषु यत् द्रुह्युषु अनुषु पूरुषु स्थः अतः परि वृषणौ आ हि यातम् अथ सोमस्य पिबतम् सुतस्य ॥

हे इन्द्राग्नी, यत् यदि यदुषु प्रसिद्धेषु राजसु स्थः भवथः तथा यत् तुर्वशेषु द्रुह्युषु अनुषु पूरुषु स्थः, अतः परीत्यादि व्याख्यातम् । अत्र सायणव्याख्यानमवधेयम् । तदस्माकं पक्षस्य सामान्यतः प्रोद्बलकं भवतीति हेतोः यदुप्रभृतीनां निर्वचनं न निरूप्यते ॥ तत्र सारं ब्रूमः । यदुष्वित्यादीनि पञ्च मनुष्यनामानि । यदुषु—अहिंसकेषु, यम उपरमे, नियम्यन्ते इन्द्रियाण्येभिरिति यदवः, यमेर्दुक् चेति कुप्रत्ययो दुगागमश्च । तुर्वशेषु—हिंसकेषु, तुर्वी हिंसार्थः । द्रुह्युषु—द्रोहं परेषामुपद्रवमिच्छत्सु । अनुषु—अन प्राणने, प्राणत्सु, सफलैः प्राणैर्युक्तेषु ज्ञातृषु । पूरुषु—पूरी आप्यायने, पूरयितव्येषु स्तोतृजनेषु ॥

नवमीमृचमाह—

यदिन्द्राग्नी अवमस्यां पृथिव्यां मध्यमस्यां परमस्यामुत स्थः ।
अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥९॥

यत् इन्द्राग्नी इति अवमस्याम् पृथिव्याम् मध्यमस्याम् परमस्याम् उत स्थः अतः परि वृषणौ आ हि यातम् अथ सोमस्य पिबतम् सुतस्य ॥

हे इन्द्राग्नी, अवमस्याम् सन्निकृष्टायां पृथिव्याम् आरोहणक्रमे प्रथमस्थानभूतायां भूम्यां स्थः भवथः, तथा मध्यमस्याम् द्युवर्लोकाख्यायां अन्तरिक्षभूतायां यदि स्थः । तथा परमस्याम् उत तृतीयस्थानभूतायां स्वर्लोकाख्यायां च यदि स्थः, अतः परीत्यादि समानम् ॥

दशमीमृचमाह—

यदिन्द्राग्नी परमस्यां पृथिव्यां मध्यमस्यामवमस्यामुत स्थः ।
अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥१०॥

यत् इन्द्राग्नी इति परमस्याम् पृथिव्याम् मध्यमस्याम् अवमस्याम् उत

स्थः अतः परि वृषणौ आ हि यातम् अथ सोमस्य पिबतम् सुतस्य ॥

यदारोहक्रमेण नवम्यामुक्तं, तदवरोहक्रमेण परमं तृतीयं स्थानं प्रथमं निर्दिश्यान्ते पृथिवीस्थाने स्थ इत्युच्यते । अन्तर्यागे आरोहोऽवरोहश्च भवत इति बोध्यम् ॥

एकादशीमृचमाह—

यदिन्द्राग्नी दिवि ष्ठो यत्पृथिव्यां यत्पर्वतेष्वोषधीष्वप्सु ।
अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥११॥

यत् इन्द्राग्नी इति दिवि स्थः यत् पृथिव्याम् यत् पर्वतेषु ओषधीषु अप्ऽसु अतः परि वृषणौ आ हि यातम् अथ सोमस्य पिबतम् सुतस्य ॥

हे इन्द्राग्नी, दिवि द्युलोके यत् यदि स्थः भवथः । यत् यदि वा पृथिव्याम् भूमौ यत् यदि वा पर्वतेषु ओषधीषु अप्सु एवं सर्वत्र भवथः, अन्यत् पूर्ववत् ॥

द्वादशीमृचमाह—

यदिन्द्राग्नी उदिता सूर्यस्य मध्ये दिवः स्वधया मादयेथे ।
अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥१२॥

यत् इन्द्राग्नी इति उत्ऽइता सूर्यस्य मध्ये दिवः स्वधया मादयेथे इति अतः परि वृषणौ आ हि यातम् अथ सोमस्य पिबतम् सुतस्य ॥

हे इन्द्राग्नी, उदिता उदितस्य सूर्यस्य प्रादुर्भूतस्य ऋतस्य ज्योतिषः संबन्धिनः दिवः स्वर्लोकस्य मध्ये मुख्ये भागे स्वधया स्वभावधारणशक्त्या यत् यदि वा मादयेथे तृप्तौ भवथः, अन्यत्पूर्ववत् ॥ उदिता—षष्ठ्या डादेशः । मादयेथे—मद तृप्तियोगे, चुरादिरात्मनेपदी ॥

त्रयोदशीमृचमाह—

एवेन्द्राग्नी पपिवांसा सुतस्य विश्वास्मभ्यं सं जयतं धनानि ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥१३॥

एव इन्द्राग्नी इति पपिऽवांसा सुतस्य विश्वा अस्मभ्यम् सम् जयतम् धनानि तत् नः मित्रः वरुणः ममहन्ताम् अदितिः सिन्धुः पृथिवी उत द्यौः ॥

हे इन्द्राग्नी, सुतस्य सोमस्य, सोमं एव एवं पपिवांसा पीतवन्तौ युवां अस्मभ्यम् विश्वा सर्वाणि सर्वविधानि धनानि सम् जयतम् जित्वा यच्छतम्। तन्नो मित्रो वरुण इत्यादि गतम्॥ पपिवांसा–पा पाने, लिटः क्वसुः॥

इति प्रथमस्य सप्तमे सप्तविंशो वर्गः

'वि ही'त्यष्टर्चं चतुर्थं सूक्तं, ऋष्याद्याः पूर्ववत्॥

तत्र प्रथमामृचमाह—

वि ह्यख्यं मनसा वस्य इच्छन्निन्द्राग्नी ज्ञास उत वा सजातान्।
नान्या युवत्प्रमतिरस्ति मह्यं स वां धियं वाजयन्तीमतक्षम्॥१॥

वि हि अख्यम् मनसा वस्यः इच्छन् इन्द्राग्नी इति ज्ञासः उत वा सऽजातान् न अन्या युवत् प्रऽमतिः अस्ति मह्यम् सः वाम् धियम् वाजऽयन्तीम् अतक्षम्॥

हे इन्द्राग्नी, वस्यः वसीयः वसुमत्तरलक्षणं श्रेयः इच्छन् प्रेप्सन्नहं ज्ञासः ज्ञातीन् उत वा अपि वा सजातान् समानजन्मनः सयोनीन् भ्रातॄन् अपि मनसा बुद्धया व्यख्यम् हि व्यज्ञासिषं, युवामेव मम ज्ञातयः सजाताश्चेति ज्ञातवानस्मि। अपि च युवत् युवाभ्यां मह्यम् दत्ता प्रमतिः प्रकृष्टा बुद्धिः न अन्या अस्ति अन्येन न दत्ता भवति अत एव सा प्रकृष्टा भवति। यया सः तादृशोऽहं वाजयन्तीम् समर्धयन्तीं समृद्धिकारिणीं धियम् धिया साधनेन निष्पादितां स्तुतिं वाम् युवाभ्यां अतक्षम् अकार्षम्॥ वस्यः–वसुशब्दादीयसुन्, टिलोपः। ज्ञासः–ज्ञातयः, सुखदुःखादिकं साम्येन जानन्ति, ज्ञाधातोरौणादिकः असुन्प्रत्ययः। युवत्–सुपां सुलुगिति विभक्तेर्लुक्॥

द्वितीयामृचमाह—

अश्रवं हि भूरिदावत्तरा वां विजामातुरुत वा घा स्यालात्।
अथा सोमस्य प्रयती युवभ्यामिन्द्राग्नी स्तोमं जनयामि नव्यम्॥२॥

अश्रवम् हि भूरिदावत्ऽतरा वाम् विऽजामातुः उत वा घ स्यालात् अथ सोमस्य प्रऽयती युवऽभ्याम् इन्द्राग्नी इति स्तोमम् जनयामि नव्यम्॥

हे इन्द्राग्नी, वाम् युवां भूरिदावत्तरा अतिशयेन भूरेः प्रभूतस्य धनस्य दातारौ इति अश्रवम् हि श्रुतवानहं खलु। विजामातुः विकलो जामाता कन्यालाभाय भूरिधनस्य दाता भवति, तस्मादप्यतिशयेन दातारौ, उत वा अपि च स्यालात् कन्याभ्रातुः, सः भगिनीप्रीतये भूरि धनं ददाति, तस्मादप्यतिशयेन दातारावित्यर्थः। घ पादपूरणः। अथ एवं श्रवणात्परं अहमपि अनर्घं सोमं स्तोमं च ददामि वामित्याह। युवभ्याम् युवाभ्यां सोमस्य प्रयती सोमस्य प्रदानेन सह नव्यम् स्तोमम् प्रत्यग्रं गानयोग्यं स्तोत्रं जनयामि निष्पादयामि॥ अश्रवम्—लङि उत्तमैकवचने विकरणस्य श्लुः। भूरिदावत्तरा—ददातेः आतो मनिन्निति वनिप्। प्रयती—यम उपरमे॥

तृतीयामृचमाह—

मा छेद्म रश्मीँरिति नाधमानाः पितॄणां शक्तीरनुयच्छमानाः।
इन्द्राग्निभ्यां कं वृषणो मदन्ति ता ह्यद्री धिषणाया उपस्थे॥३॥

मा छेद्म रश्मीन् इति नाधमानाः पितॄणाम् शक्तीः अनुऽयच्छमानाः इन्द्राग्निऽभ्याम् कम् वृषणः मदन्ति ता हि अद्री इति धिषणायाः उपऽस्थे॥

रश्मीन् रश्मिः रज्जुपर्यायः, अस्माकं देवबन्धुत्वद्योतकान् बहोः कालात् परंपरागतान् रश्मीन् मा छेद्म मा विच्छिन्नान् कार्ष्म इति नाधमानाः इति प्रार्थयमानाः, पितॄणां पूर्वेषामृषीणां शक्तीः असाधारणसामर्थ्यसम्पत्तीः अनुयच्छमानाः अनुक्रमेण स्वात्मसु नियताः धारिताः कुर्वन्तः वृषणः सेक्तारो बलाढ्याः यजमानाः इन्द्राग्निभ्याम् उभाभ्यां सकाशात् कम् सुखं यथा भवति तथा मदन्ति स्तुवन्ति। हि यस्मात् ता तौ इन्द्रोऽग्निश्च अद्री अत्तारौ हन्तारौ असुराणां, धिषणायाः स्तुतिनिष्पत्तिसाधनभूतायाः बुद्धेः उपस्थे उपस्थाने समीपे भवतः। अत्र अद्री इति सोमाभिषवग्रावाणौ कर्मणि प्रसिद्धौ। तर्हि, द्यावापृथिव्यौ तौ, पृथिव्यामग्निः दिवि इन्द्रः। एवमप्युपपद्यते अद्री इन्द्राग्नी इति॥ छेद्म—छिदिर् द्वैधीकरणे, लङि विकरणस्य लुक्। नाधमानाः—नाधृ याच्ञायाम्। मदन्ति—मद तृप्तियोगे॥

चतुर्थीमृचमाह—

युवाभ्यां देवी धिषणा मदायेन्द्राग्नी सोममुशती सुनोति।
तावश्विना भद्रहस्ता सुपाणी आ धावतं मधुना पृङ्क्तमप्सु॥४॥

युवाभ्याम् देवी धिषणा मदाय इन्द्राग्नी इति सोमम् उशती सुनोति तौ अश्विना भद्रऽहस्ता सुपाणी इति सुऽपाणी आ धावतम् मधुना पृङ्क्तम् अप्ऽसु ॥

हे इन्द्राग्नी, युवाभ्याम् मदाय युवयोर्हर्षाय देवी द्योतमाना धिषणा मन्त्रात्मिका वाक् उशती युवां कामयमाना सती सोमम् सुनोति अभिषुणोति। अश्विनोः कृत्यमपि इन्द्राग्नी निर्वहत इति अश्विनाविव इन्द्राग्नी संबोधयति। अश्विना अश्ववन्तौ बलवेगयुक्तौ, भद्रहस्ता कल्याणकारिभुजोपेतौ, सुपाणी शोभनपाणियुक्तौ एवंभूतौ हे इन्द्राग्नी, तौ युवां आधावतम् शीघ्रमागच्छतम्। आगत्य च अप्सु उदकेषु ज्योतिर्बलादिलक्षणेषु वर्तमानेन मधुना सारांशेन आत्यन्तिकसुखेन पृङ्क्तम् संयोजयतं अस्मदीयं सोमम्॥ पृङ्क्तम्-पृची संपर्के, रौधादिकः, लेटि थसस्तम्॥

पञ्चमीमृचमाह—

युवामिन्द्राग्नी वसुनो विभागे तवस्तमा शुश्रव वृत्रहत्ये।
तावासद्या बर्हिषि यज्ञे अस्मिन्प्र चर्षणी मादयेथां सुतस्य ॥५॥

युवाम् इन्द्राग्नी इति वसुनः विऽभागे तवःऽतमा शुश्रव वृत्रऽहत्ये तौ आऽसद्य बर्हिषि यज्ञे अस्मिन् प्र चर्षणी इति मादयेथाम् सुतस्य॥

हे इन्द्राग्नी, वसुनः दिव्यस्य धनस्य विभागे विभजने यथार्हं यजमानाय भागदाने वर्तमानौ युवाम् वृत्रहत्ये वृत्रवधे तवस्तमा अतिशयेन बलिनौ वां शुश्रव अश्रौषम्। हे चर्षणी, द्रष्टारौ सर्वस्य, तौ युवां अस्मिन् यज्ञे मदीये यजने बर्हिषि आस्तीर्णे आसने आसद्य उपविश्य सुतस्य अभिषुतस्य सोमस्य स्वीकरणेन प्र मादयेथाम् प्रकर्षेण तृप्तौ भवतम्॥ तवस्तमा-तव इति बलनाम, तस्मात् लुप्तमत्वर्थीयात्तमप्॥

इति प्रथमस्य सप्तमेऽष्टाविंशो वर्गः

Post Graduate Library
College of Arts & Commerce, O. U.

षष्ठीमृचमाह—

प्र चर्षणिभ्यः पृतनाहवेषु प्र पृथिव्या रिरिचाथे दिवश्च।
प्र सिन्धुभ्यः प्र गिरिभ्यो महित्वा प्रेन्द्राग्नी विश्वा भुवनात्यन्या॥६॥

प्र चर्षणिऽभ्यः पृतनाऽहवेषु प्र पृथिव्याः रिरिचाथे इति दिवः च प्र

सिन्धुऽभ्यः प्र गिरिऽभ्यः महिऽत्वा प्र इन्द्राग्नी इति विश्वा भुवना अति अन्या ॥

हे इन्द्राग्नी, पृतनाहवेषु पृतनासु युद्धेषु हवेषु रक्षार्थं आह्वानेषु सत्सु, युवां महित्वा स्वमहत्त्वेन चर्षणिभ्यः द्रष्टृभ्यः सर्वेभ्यः प्र रिरिचाथे प्रकर्षेण अतिरिच्येथे, रक्षणे सर्वाधिकौ भवथः। तथा रक्षणे विषये पृथिव्याः प्र विस्तीर्णाया भूमेः प्ररिरिचाथे अत्यधिकौ भवथ, दिवश्च प्र द्युलोकादप्यतिरिक्तौ युवां, सिन्धुभ्यः प्र स्यन्दमानाभ्यः अद्भ्यः अधिकौ, गिरिभ्यः प्र पर्वतेभ्यः चाधिकौ, अन्या अन्यानि अत्रानुक्तानि विश्वा भुवना सर्वाणि भूतजातानि, अति अतिरिक्तौ भवथ ॥ रिरिचाथे-रिचिर् विरेचने, छन्दसि वर्तमाने लिट् ॥

सप्तमीमृचमाह—

आ भरतं शिक्षतं वज्रबाहू अस्माँ इन्द्राग्नी अवतं शचीभिः।
इमे नु ते रश्मयः सूर्यस्य येभिः सपित्वं पितरो न आसन् ॥७॥

आ भरतम् शिक्षतम् वज्रबाहू इति वज्रबाहू अस्मान् इन्द्राग्नी इति अवतम् शचीभिः इमे नु ते रश्मयः सूर्यस्य येभिः सऽपित्वम् पितरः नः आसन् ॥

हे वज्रबाहू वज्रहस्तौ, इन्द्राग्नी, आभरतम् आहरतं सामर्थ्यात् ऋतसम्पदमिति शेषः, आहृत्य च शचीभिः शक्तिभिः अस्मान् शिक्षतम् शिक्षयतं, अन्तर्भावितण्यर्थः, अवतम् वर्धयतम् अस्मान्। तादृशशिक्षणाय वयमिदानीमधिकारिणः संवृत्ता एवेत्याह। इमे नु अस्माकं प्रत्यक्षा एव ते सूर्यस्य रश्मयः ते ऋतसूर्यरश्मयः, येभिः रश्मिभिः नः पितरः अस्माकं पूर्वे पुरुषा ऋषयः सपित्वम् सहप्राप्तव्यं स्थानं आसन् गता आसन्, अगच्छन् ॥ शिक्षतम्-शिक्ष विद्योपादाने ॥ सपित्वम्-आप्लृ व्याप्तौ, अस्मात् सशब्दोपपदात् कृत्यार्थे त्वन्प्रत्ययः, धातोः पिभावः पृषोदरादित्वात् ॥

अष्टमीमृचमाह—

पुरंन्दरा शिक्षतं वज्रहस्तास्माँ इन्द्राग्नी अवतं भरेषु।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥८॥

पुरंम्ऽदरा शिक्षतम् वज्रऽहस्ता अस्मान् इन्द्राग्नी इति अवतम् भरेषु

तत् नः मित्रः वरुणः ममहन्ताम् अदितिः सिन्धुः पृथिवी उत द्यौः ॥

हे वज्रहस्ता, वज्रधरहस्तयुक्तौ, पुरन्दरा असुरपुराणां दारयितारौ, इन्द्राग्नी, अस्मान् शिक्षतम् शिक्षयतं, दिव्यरहस्यविद्यां ग्राहयतम् । भरेषु संग्रामेषु अवतम् रक्षतम् । यज्ञयात्रायां संग्रामो भवतीति स्मार्यम् । तन्नो मित्र इत्यादि गतम् ॥ पुरन्दरा—वाचंयमपुरंदरौ चेति निपातनादम्, विभक्तेराकारः ॥

इति प्रथमस्य सप्तम एकोनत्रिंशो वर्गः

'ततं म' इति नवर्चं पञ्चमं सूक्तं कुत्सस्यार्षं ऋभुदेवताकं, पञ्चमीनवम्यौ त्रिष्टुभौ, शिष्टा जगत्यः ॥

तत्र प्रथमामृचमाह—

ततं मे अपस्तदु तायते पुनः स्वादिष्ठा धीतिरुचथाय शस्यते ।
अयं समुद्र इह विश्वदेव्यः स्वाहाकृतस्य समु तृप्णुत ऋभवः ॥१॥
ततम् मे अपः तत् उम् इति तायते पुनरिति स्वादिष्ठा धीतिः उचथाय शस्यते अयम् समुद्रः इह विश्वऽदेव्यः स्वाहाऽकृतस्य सम् उम् इति तृप्णुत ऋभवः ॥

मेधातिथेरार्भवसूक्तस्य व्याख्याने (२० सू.) ऋभूनधिकृत्योक्तं सर्वमिहावधेयम् । 'ऋभवो मनुष्याः सन्तस्तपसा देवत्वं प्राप्ताः' इत्यारभ्य (पु. २२१-२) 'साङ्केतिकं गूढार्थमन्तरेण प्रहेलिकाप्रायाणामेषां सूक्तानां ऋजुविवरणं न सिध्यतीत्यापाततोऽवलोकनादेव स्फुटं लक्ष्येत' इत्यादि हि तत्रोक्तम् ॥ हे ऋभवः, मे मम संबन्धि अपः कर्म यजनात्मकं ततम् विस्तारितं, यथा यात्रारूपं यज्ञस्य, तथा तन्तुरूपमपि, प्रसिद्धम् । तदु तदेव पुनस्तायते विस्तार्यते । तत्र स्वादिष्ठा स्वादुतमा, अत्यन्तप्रीतिकरी धीतिः स्तुतिः उचथाय स्तुत्याय शस्यते कीर्त्यते । अपि च इह अस्मिन् यजने समुद्रः समुन्दनशीलः अयम् सोमरसः विश्वदेव्यः सर्वेभ्यो देवेभ्यः यथा अर्हः पर्याप्तस्तथा निष्पादितः । स्वाहाकृतस्य देवतृप्तिवाचकस्वाहाकारेणार्पितस्य तस्य सोमस्य पानेन समु तृप्णुत सम्यगेव तृप्ता भवत ॥ उचथाय—वचेः संप्रसारणम्, औणादिकः अथक्-प्रत्ययः । समुद्रः—उन्दी क्लेदने । विश्वदेव्यः—देवार्हो भागो देव्यः, छन्दसि चेति यः, विश्वे देव्या यस्मिन् स सोमः । तृप्णुत—तृप प्रीणने, स्वादिभ्यः श्नुः ॥

द्वितीयामृचमाह—

आभोगयं प्र यदिच्छन्त ऐतनापाकाः प्राञ्चो मम के चिदापयः।
सौधन्वनासश्चरितस्य भूमनागच्छत सवितुर्दाशुषो गृहम् ॥२॥
आऽभोगयम् प्र यत् इच्छन्तः ऐतन अपाकाः प्राञ्चः मम के चित् आपयः
सौधन्वनासः चरितस्य भूमना अगच्छत सवितुः दाशुषः गृहम् ॥

हे ऋभवः, अपाकाः परिपक्वज्ञानाः प्राञ्चः पूर्वे मम संबन्धिनः आपयः आपयितारः बन्धवः के चित् ये केचन यूयं आभोगयम् समन्तादुपभोगयोग्यं सोमं इच्छन्तः कामयमानाः यत् यदा प्र ऐतन प्रयाणमकुरुत तदानीं हे सौधन्वनासः सुधन्वनः पुत्राः, चरितस्य अनुष्ठितस्य तपसः भूमना भूम्ना बहुत्वेन सवितुः सोमाभिषवं कर्तुः दाशुषः दत्तवतः यजमानस्य गृहम् निवासस्थानं शरीरं अगच्छत प्राप्ताः। ऋभवः सुतसोमानां अमृतत्वप्राप्तौ उपकुर्वन्तीति तत्त्वं प्रागुक्तम् ॥ आभोगयम्—आ समन्तात् भोगः आभोगः तदर्हः आभोगयः, छन्दसि चेति यः, यस्येति लोपाभावश्छान्दसः। ऐतन—इण् गतौ, लङि थस्य तनबादेशः। भूमना—बहोर्भूभावः, अलोपाभावश्छान्दसः ॥

तृतीयामृचमाह—

तत्सविता वोऽमृतत्वमासुवदगोह्यं यच्छ्रवयन्त ऐतन।
त्यं चिच्चमसमसुरस्य भक्षणमेकं सन्तमकृणुता चतुर्वयम् ॥३॥
तत् सविता वः अमृतऽत्वम् आ असुवत् अगोह्यम् यत् श्रवयन्तः ऐतन त्यम्
चित् चमसम् असुरस्य भक्षणम् एकम् सन्तम् अकृणुत चतुःऽवयम् ॥

हे ऋभवः, तत् तदा वः युष्माकं अमृतत्वम् अमरणधर्मत्वं, देवत्वं सविता सर्वस्य प्रेरको देवः आ असुवत् प्रेरितवान्, देवभावं समपीपदत्। यत् यदा अगोह्यम् गूहितुं अशक्यं सत्यप्रकाशं श्रवयन्तः सवितुर्देवस्य श्रवणं प्रापयन्तः ऐतन यूयमागच्छत, तदेति पूर्वेण संबन्धः। भूतपूर्वमनुष्याणां तपसा कर्मणा ज्ञानेन च देवत्वं प्राप्तानां ऋभूणां मनुष्योपकाराय देवकृत्यानि वर्ण्यन्ते वेदे। तत्रैकं तेषां कर्मेदं भवति—त्वष्टुर्विश्वकर्मणः निर्माणे एकं शरीरं चमसपात्रेण सङ्केतितं सर्वस्यापि भूतजातस्येव यजमानस्यापि प्राकृतजन्मना वर्तते। तस्मिन् सोमपानयोग्ये शरीरपात्रे चत्वारोंऽशाः संमिश्रिताः न पृथग्व्यक्ता भवन्ति। ते च अन्नमयः प्राणमयः मनोमयः, एषां

त्रयाणां कारणभूतो दिव्योऽशश्चेति चत्वारो भवन्ति, तेषां पृथक्करणेन एकं शरीरपात्रं चतुर्व्यूहात्मकं भवति। तेन अन्नमये जगति अन्नमयो देह इव प्राणमयादयश्च तत्तल्लोके निष्पादितव्यक्तयः सिद्धव्यापाराश्च देवेषु साक्षादधीनाः दैव्यस्वीकाराय प्रभवन्ति। तदेवाह—असुरस्य महाबलस्य त्वष्टुर्देवस्य विश्वकर्मणः संबन्धिनं, तेन निर्मितमित्यर्थः, नायं देवशत्रुरसुरः, वेदे देवोऽप्यसुर उच्यते "महद्देवानामसुरत्वमेकम्" इत्यादौ, भक्षणम् सोमपानसाधनभूतं त्यम् तं चमसमेकम् चित् एकमेव चमसं सन्तम्, चतुर्वयम् चतुर्व्यूहं, चत्वारो वयाः शाखाभूताः अवयवा यस्येति विग्रहः, अकृणुत कृतवन्तः॥ असुवत्—षू प्रेरणे, तुदादिः। श्रवयन्तः—छान्दसो वृद्ध्यभावः॥

चतुर्थीमृचमाह—

विष्ट्वी शमी तरणित्वेना वाघतो मर्तासः सन्तो अमृतत्वमानशुः।
सौधन्वना ऋभवः सूरचक्षसः संवत्सरे समपृच्यन्त धीतिभिः॥४॥
विष्ट्वी शमी तरणिऽत्वेना वाघतः मर्तासः सन्तः अमृतऽत्वम् आनशुः
सौधन्वनाः ऋभवः सूरऽचक्षसः संवत्सरे सम् अपृच्यन्त धीतिऽभिः॥

वाघतः स्तोतार ऋषयः ऋभवः शमी कर्माणि, एकस्य चमसस्य चतुर्धा करणादीनि अन्यान्यपि तरणित्वेन तरणकौशलेन विष्ट्वी विष्ट्वा व्याप्य, व्याप्तिं कृत्वा मर्तासः सन्तः मनुष्याः सन्तोऽपि अमृतत्वम् देवत्वं आनशुः आनशिरे। तथा देवत्वं प्राप्य सौधन्वनाः सुधन्वजाताः सूरचक्षसः सूर्यसदृशप्रकाशाः सूर्यसदृशज्ञानचक्षुषो वा, संवत्सरे परिपाककालद्योतकोऽयं, पक्के काले इत्यर्थः धीतिभिः धारणसमर्थप्रज्ञावृत्तयो धीतयः, सामर्थ्यात्तद्विषयभूताभिः दैव्याभिः सम्पद्भिः समपृच्यन्त संपृक्ताः संयुक्ता अभवन्, देवैः सह स्वाधिकारं प्राप्ता इति भावः॥ विष्ट्वी—विष्लृ व्याप्तौ। शमी—शसो लुक्। अपृच्यन्त—कर्मणि लङ्॥

पञ्चमीमृचमाह—

क्षेत्रमिव वि ममुस्तेजनेनँ एकं पात्रमृभवो जेहमानम्।
उपस्तुता उपमं नाधमाना अमर्त्येषु श्रव इच्छमानाः॥५॥
क्षेत्रम्ऽइव वि ममुः तेजनेन एकम् पात्रम् ऋभवः जेहमानम्
उपऽस्तुताः उपऽमम् नाधमानाः अमर्त्येषु श्रवः इच्छमानाः॥

उपस्तुताः ऋषिभिः समीपे स्तुताः ऋभवः उक्तस्वरूपाः जेहमानम् प्रयतमानं (वेह जेह बाह प्रयत्ने) चतुर्व्यूहतां प्राप्तुं शरीरलक्षणं सोमरसपात्रमेव प्रयतते। तथा यतमानं एकम् पात्रम् चमसं मानदण्डेन क्षेत्रमिव भूमिमिव तेजनेन निशातनेन चतुष्टयरूपेण कर्तुं विममुः विशेषेण मानं कृतवन्तः। किं कुर्वन्तः? उपमम् उपमानभूतं प्रशस्तं सोमं नाधमानाः याचमानाः, अपि च अमर्त्येषु देवेषु मध्ये श्रवः श्रवणं दैव्यवाच इति शेषः, इच्छमानाः इच्छन्तः। एकतः पक्केभ्यो मनुष्येभ्यः सोममिच्छन्ति, अन्यतो देवेषु मध्ये श्रवणम्॥ ममुः-माङ् माने, व्यत्ययेन परस्मैपदम्। उपमम्-माङ् माने, आतश्चोपसर्ग इति कप्रत्ययः। इच्छमानाः-व्यत्ययेनात्मनेपदम्॥

इति प्रथमस्य सप्तमे त्रिंशो वर्गः

षष्ठीमृचमाह—

आ मनीषामन्तरिक्षस्य नृभ्यः स्रुचेव घृतं जुहवाम विद्मना।
तरणित्वा ये पितुरस्य सश्चिर ऋभवो वाजमरुहन्दिवो रजः॥६॥
आ मनीषाम् अन्तरिक्षस्य नृऽभ्यः स्रुचाऽइव घृतम् जुहवाम विद्मना
तरणिऽत्वा ये पितुः अस्य सश्चिरे ऋभवः वाजम् अरुहन् दिवः रजः॥

अन्तरिक्षस्य मध्यमस्थानस्य भुवर्लोकस्य संबन्धिभ्यः नृभ्यः नेतृभ्य ऋभुभ्यः, इतः प्रेत्य भुवर्लोकमार्गेणैव तृतीयं स्थानं प्राप्नुवन्ति कृतात्मानो मनुष्याः, तत्र ऋभव उपकारिणो भवन्ति। तस्मान्मध्यमस्थानसंबन्धित्वमृभूणाम्, तेषां पदं तु उत्तमस्थानम्। तेभ्यः स्रुचेव घृतम् जुह्वा आज्योपेतं हविः यथा आजुहवाम प्रयच्छाम, तथा मनीषाम् स्तुतिं विद्मना वेदनेन ज्ञानेन कुर्मः। ये ऋभवः देवभूताः पूर्वेऽस्मत्पितरः अस्य सर्वस्य जगतः पितुः पालकस्य सवितुः तरणित्वा तरणित्वानि तरणकौशलानि सश्चिरे प्रापुः, सावित्रान् विभवान् लब्धवन्त इत्यर्थः। अत एव दिवः द्योतमानस्य रजः रजसः स्वर्लोकस्य वाजम् समृद्धिं प्रति अरुहन् प्राप्नुवन्॥ जुहवाम-हु दानादनयोः। विद्मना-वेत्तेः, औणादिको मनिः॥

सप्तमीमृचमाह—

ऋभुर्न इन्द्रः शवसा नवीयानृभुर्वाजेभिर्वसुभिर्वसुर्ददिः।
युष्माकं देवा अवसाहनि प्रिये भि तिष्ठेम पृत्सुतीरसुन्वताम्॥७॥
ऋभुः नः इन्द्रः शवसा नवीयान् ऋभुः वाजेभिः वसुऽभिः वसुः ददिः

युष्माकम् देवाः अवसा अहानि प्रिये अभि तिष्ठेम पृत्सुतीः असुन्वताम् ॥

ऋभुरिति सर्वेषामृभूणामुपलक्षणम्, शवसा ज्वलितेन बलेन नवीयान् नवतरः प्रशस्ततरः ऋभुः नः अस्माकं इन्द्रः देवराजः परम ईश्वरो भवति। अपि च, वाजेभिः समृद्धिभिः वसुभिः धनैश्च ऋभुः अस्माकं वसुः निवासयिता देवः, अत एव ददिः दाता चाभीष्टानाम् ॥ परोऽर्धर्चः प्रत्यक्षकृतः। हे देवाः ऋभवः, युष्माकम् अवसा युष्मत्कर्तृकरक्षणेन प्रिये अनुकूले प्रीतिप्रदे अहनि दिवसे संप्राप्ते असुन्वताम् अयजमानानां यज्ञविरोधिनां देवद्वेषिणां पृत्सुतीः सेनाः अभितिष्ठेम अभिभवेम ॥ नवीयान्—नवशब्दादातिशायनिके ईयसुन्। ददिः—डुदाञ् दाने, आदृगमहन इति किप्रत्ययः, लिड्वद्भावाद् द्विर्भावादि, आतो लोप इटि चेत्याकारलोपः ॥

अष्टमीमृचमाह—

निश्चर्मण ऋभवो गामपिंशत सं वत्सेनासृजता मातरं पुनः।
सौधन्वनासः स्वपस्यया नरो जिव्री युवाना पितराकृणोतन ॥८॥

निः चर्मणः ऋभवः गाम् अपिंशत सम् वत्सेन असृजत मातरम् पुनरिति सौधन्वनासः सुऽअपस्यया नरः जिव्री इति युवाना पितरा अकृणोतन ॥

अस्यामृचि ऋभूणां अन्यत्कर्म वर्णितम्। अस्यास्तात्पर्यं कामपि कथामवलम्ब्याविष्कृतं सायणीये, तत्र नास्माकमादरः। अस्मदीयं तात्पर्यं तु (१.२०.३, पृ. २२४) तत्रोक्तम्। स एष सारांशः। "गौरियं आदिमा प्रभा अदितिर्भवति। ऋभवः एनां आवृण्वत् चर्म अपोद्धार्य संस्कृतवन्तः इत्यन्यत्र प्रोक्तम्। 'निश्चर्मणो गामरिणीत धीतिभिः' (४.३६.७) एषा गौः विश्वरूपेति चोक्तम् 'ये धेनुं विश्वधुजं विश्वरूपाम्' (४.३३.८)। विश्वस्य प्रेरयित्री विश्वरूपा च अदितिरेव माता अखण्डप्रज्ञास्वरूपिणी भवति। तस्या एव पुत्रो जीव आत्मा मनुष्यस्य। मातुर्विप्रयुक्तः प्रज्ञायाम्। तत्र आवरणं चर्म हेतुर्भवति। तच्च तमोभूतं प्रकृतिकार्यमेव लक्षणीयम्। तदपाये अखण्डप्रज्ञाया अदितेरमृतसुवो धेनोः स्वीयां वृत्तिं रूपीभवन्तीं मानुषे पुरुषे निष्पादयन्त्येत ऋभवः"। अथ ऋचोऽक्षरार्थः तात्पर्यबोधाय भवति। हे ऋभवः, यूयं चर्मणः आवरकात् तमोरूपात् गाम् 'सबर्दुघां' धेनुं निरपिंशत निःशेषेण अश्लिष्टरूपां विश्लिष्टां अकुरुतेत्यर्थः। तथा कृत्वा मातरम् तां वत्सेन पुनः समसृजत वत्सेन पुनः समगमयत ॥ अन्यदार्भवं कर्म परेणार्धर्चेनोच्यते। हे सौधन्वनासः सुधन्वजाताः ऋभवः, नरः नेतारो यजमानपुरुषाणामूर्ध्वमिति

शेषः, यूयं स्वपस्यया शोभनकर्मेच्छया जिव्री जीर्णौ वृद्धौ पितरा युवाना पुनर्यौवनोपेतौ अकृणोतन अकृद्वम्। अत्र माता पृथिवी पिता द्यौः। सृष्टौ सिद्धयोः वृद्धयोः जगत्पित्रोः द्यावापृथिव्योः मानुषे यजमाने नवतां बलवतीमापादयन्ति ऋभव इत्युक्तं भवति॥ अपिंशत–पिश अवयवे, तुदादिः, शे मुचादीनामिति नुम्। युवाना पितरा–उभयत्र विभक्तेराकारः॥

नवमीमृचमाह—

वाजेभिर्नो वाजसाताविविड्ढ्यृभुमाँ इन्द्र चित्रमा दर्षि राधः।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः॥९॥
वाजेभिः नः वाजऽसातौ अविड्ढि ऋभुऽमान् इन्द्र चित्रम् आ दर्षि राधः
तत् नः मित्रः वरुणः ममहन्ताम् अदितिः सिन्धुः पृथिवी उत द्यौः॥

हे इन्द्र, ऋभूणामिन्द्रेण सहैकभावं गतत्वादेवं संबोधनम्। ऋभुमान् ऋभुभिर्युक्तः त्वं वाजसातौ समृद्धिप्राप्तौ, निमित्तसप्तमी, वाजेभिः समृद्धिभिः, त्वदीयाभिः नः अस्मान् अविड्ढि व्याप्नुहि। तथा व्याप्य चित्रम् अद्भुतमुत्तमं राधः धनं आदर्षि आद्रियस्व अस्मत्कृते। तन्नो मित्र इत्यादि गतम्॥ अविड्ढि–विष्लृ व्याप्तौ, लोटो हिः, शपो लुक्, छन्दस्यपि दृश्यते इति दृशिग्रहणात् लोट्यडागमः। दर्षि–दृङ् आदरे, लोट्, व्यत्ययेन परस्मैपदम्, विकरणस्य लुक्॥

इति प्रथमस्य सप्तम एकत्रिंशो वर्गः

'तक्षन्निति'ति पञ्चर्चं षष्ठं सूक्तं कुत्सस्यार्षं आर्भवं, पञ्चमी त्रिष्टुप्, शिष्टाश्चतस्रो जगत्यः॥

तत्र प्रथमामृचमाह—

तक्षन्रथं सुवृतं विद्मनापसस्तक्षन्हरी इन्द्रवाहा वृषण्वसू।
तक्षन्पितृभ्यामृभवो युवद्वयस्तक्षन्वत्साय मातरं सचाभुवम्॥१॥
तक्षन् रथम् सुऽवृतम् विद्मनाऽअपसः तक्षन् हरी इति इन्द्रऽवाहा
वृषण्ऽवसू इति वृषण्ऽवसू तक्षन् पितृऽभ्याम् ऋभवः युवत् वयः तक्षन्
वत्साय मातरम् सचाऽभुवम्॥

मनुष्याणामुद्धाराय, यजमानं प्रति इन्द्रस्यागमनाय, ऋभवः इन्द्ररथाऽऽश्विनाश्वतक्षणादि कुर्वन्ति। इदमप्यार्भवं कर्म प्राक् संक्षेपेणोक्तम् (१.२० सू.)। विद्मनापसः विद्मना ज्ञानेनोत्कृष्टेन

निष्पाद्यानि अपांसि कर्माणि, आर्भवमन्त्रवर्णैरावेदितानि, येषां ते ऋभवः रथम् अश्विनोरारोहणार्थं सुवृतम् शोभनवर्तनं तक्षन् अकुर्वन्। तथा इन्द्रवाहा इन्द्रस्य वाहनभूतौ वृषण्वसू वर्षितृ वसु धनं ययोस्तौ, अभीष्टवर्षणसमर्थधनयुक्तौ, हरी अश्वौ तक्षन् अकुर्वन्। अपि च पितृभ्याम् मातापितृभ्यां, द्यावापृथिवीभ्यां वृद्धाभ्यां युवत् यौवनोपेतं नवं वयः आयुः ऋभवः तक्षन् कृतवन्तः। तथा वत्साय मातरम् गां सचाभुवम् सहभुवं सह वर्तमानां वत्सेन संयुक्तां तक्षन् अकुर्वन्। अत्र रहस्यं सर्वं पूर्वस्यां उक्तम्॥ सुवृतम्-शोभनं वर्तत इति सुवृत्, क्विप्। वृषण्वसू-वृषण्वस्वश्वयोरुपसंख्यानमिति वसुशब्दे उत्तरपदे वृषण्भावः। युवत्-अत्र युवन्शब्दः युवत्वमाचष्टे, तदस्मिन्नस्तीति युवत्, छान्दसो वर्णलोपः॥

द्वितीयामृचमाह—

आ नो यज्ञाय तक्षत ऋभुमद्वयः कृत्वे दक्षाय सुप्रजावतीमिषम्।
यथा क्षयाम सर्ववीरया विशा तन्नः शर्धाय धासथा स्विन्द्रियम्॥२॥
आ नः यज्ञाय तक्षत ऋभुऽमत् वयः कृत्वे दक्षाय सुऽप्रजावतीम् इषम्
यथा क्षयाम सर्वऽवीरया विशा तत् नः शर्धाय धासथ सु इन्द्रियम्॥

हे ऋभवः, नः अस्माकं यज्ञाय यजनस्य सम्यङ्निर्वाहाय ऋभुमत् युष्मद्विभवोपेतं वयः ज्ञानं आतक्षत समन्तान्निष्पादयत। कृत्वे क्रतवे, प्राज्ञाय कर्मणे दक्षाय युक्तायुक्तविवेचनबलाय सुप्रजावतीम् शोभनसन्तानोपेतां इषम् एषणां, प्रेरणाशक्तिं च आतक्षतेति संबन्धः। सर्ववीरया सर्वविधवीर्योपेतया विशा प्रजया युक्ताः यथा क्षयाम येन प्रकारेण सुखं निवसाम तत् तादृशं इन्द्रियम् इन्द्रलिङ्गं बलं नः शर्धाय अस्माकं बलाय सुधासथ सुष्ठु धत्त, अस्मासु धारयत॥ धासथ-धाञो लेट्यडागमः॥

तृतीयामृचमाह—

आ तक्षत सातिमस्मभ्यमृभवः सातिं रथाय सातिमर्वते नरः।
सातिं नो जैत्रीं सं महेत विश्वहा जामिमजामिं पृतनासु सक्षणिम्॥३॥
आ तक्षत सातिम् अस्मभ्यम् ऋभवः सातिम् रथाय सातिम् अर्वते नरः
सातिम् नः जैत्रीम् सम् महेत विश्वहा जामिम् अजामिम् पृतनासु सक्षणिम्॥

हे नरः नेतारो यज्ञस्य, ऋभवः, अस्मभ्यम् अस्मत्कृते सातिम् संभजनीयं बलं (धनमिति सायणः) आतक्षत समन्तात् कुरुत। तथा रथाय रंहणशीलाय अस्माकमूर्ध्वयानाय सातिम् आतक्षत। तथा अर्वते अश्वाय सातिम् आतक्षत। किञ्च, विश्वहा सर्वेष्वहस्सु नः अस्माकं जैत्रीम् जयशीलां सातिम् संभजनीयां शक्तिं, सर्वाधिकबलं सं महेत सर्वोऽपि सम्यक् पूजयतु। वयं च पृतनासु संग्रामेषु जामिम् सहजातं बन्धुं अजामिम् तदितरं वा शत्रुं सक्षणिम् अस्मानभिभवन्तं, युष्मदनुग्रहादभिभवेम ॥ महेत–मह पूजायाम्। सक्षणिम्–सह अभिभवे, औणादिकः सनिप्रत्ययः, ढत्वं, तथा कत्वषत्वे ॥

चतुर्थीमृचमाह—

ऋभुक्षणमिन्द्रमा हुव ऊतय ऋभून्वाजान्मरुतः सोमपीतये।
उभा मित्रावरुणा नूनमश्विना ते नो हिन्वन्तु सातये धिये जिषे ॥४॥
ऋभुक्षणम् इन्द्रम् आ हुवे ऊतये ऋभून् वाजान् मरुतः सोमऽपीतये
उभा मित्रावरुणा नूनम् अश्विना ते नः हिन्वन्तु सातये धिये जिषे ॥

ऋभुक्षणम् ऋभुषु क्षियति निवसतीति ऋभुक्षाः, तं इन्द्रम् आहुवे आह्वयामि। किमर्थम्? ऊतये उत्तराभिवृद्धये। तथा ऋभून् ऋभुर्विभ्वा वाज इति त्रयो भ्रातरः, एकैकोऽपि गणरूपः, तस्माद्भूनिति बहुवचनम्। तथा वाजान् मरुतः एतानपि सोमपीतये सोमपानाय आह्वयामि। तथा उभा उभौ द्वन्द्वरूपेणावस्थितौ मित्रावरुणा एतौ अश्विना अश्विनौ च नूनम् अवश्यं आह्वयामि। ते आहूता इन्द्रादयः नः अस्मान् हिन्वन्तु प्रेरयन्तु। किमर्थम्? सातये संभजनीयायोत्तमधनाय धिये शोभनायै बुद्धये जिषे जयार्थं च ॥ हिन्वन्तु–हि गतिवृद्धयोः, स्वादित्वात् श्नुः, अन्तर्भावितण्यर्थः। जिषे–जि जये, तुमर्थे सेप्रत्ययः ॥

पञ्चमीमृचमाह—

ऋभुर्भराय सं शिशातु सातिं समर्यजिद्वाजो अस्माँ अविष्टु।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥५॥
ऋभुः भराय सम् शिशातु सातिम् समर्यऽजित् वाजः अस्मान् अविष्टु
तत् नः मित्रः वरुणः ममहन्ताम् अदितिः सिन्धुः पृथिवी उत द्यौः ॥

ऋभुः प्रथम ऋभूणां अस्माकं सातिम् संभजनीयां संपदं भराय संग्रामार्थं सम् शिशातु सम्यक् तीक्ष्णीकरोतु। समर्यजित् मर्यैः मनुष्यैः सह वर्तत इति समर्यः संग्रामः तत्र शत्रूणां जेता वाजः तृतीय ऋभुगणः अस्मान् अविष्टु अवतु। तन्नो मित्र इत्यादि व्याख्यातम्॥ शिशातु-शो तनूकरणे, लोट्, द्विर्भावादिश्छान्दसः। अविष्टु-अवतेर्लोट्, इडागमः छान्दसः, तथा सिप् च॥

इति प्रथमस्य सप्तमे द्वात्रिंशो वर्गः

'ईळ' इति पञ्चविंशत्यृचं पञ्चमं सूक्तं आङ्गिरसस्य कुत्सस्यार्षम्। चतुर्विंशीपञ्चविंश्यौ त्रिष्टुभौ, शिष्टा जगत्यः। आद्यः पादो द्यावापृथिव्यः, द्वितीय आग्नेयः, शिष्टं सूक्तं आग्नेयम्॥

तत्र प्रथमामृचमाह—

ईळे द्यावापृथिवी पूर्वचित्तयेऽग्निं घर्मं सुरुचं यामन्निष्टये।
याभिर्भरे कारमंशाय जिन्वथस्ताभिरू षु ऊतिभिरश्विना गतम्॥१॥
ईळे द्यावापृथिवी इति पूर्वऽचित्तये अग्निम् घर्मम् सुऽरुचम् यामन् इष्टये याभिः भरे कारम् अंशाय जिन्वथः ताभिः ऊम् इति सु ऊतिऽभिः अश्विना आ गतम्॥

द्यावापृथिवी द्यावापृथिव्यौ, ऊर्ध्वा चित्तिः द्यौः, अधरा चित्तिः पृथिवी, इमे उभे च पूर्वचित्तये पूर्वज्ञानाय प्रथममेव तयोः चित्प्रसादलाभायेत्यर्थः ईळे अध्येषे, याचामि। अथ अग्निम् ईळे। कीदृशम्? घर्मम् दीप्तं अत एव सुरुचम् शोभनकान्तियुक्तम्। किमर्थम्? यामन् यामनि गमने, प्रकृते अश्विनोरागमने इष्टये यजनाय। दीप्तस्याग्नेः प्रभावादाश्विनमार्गः प्रकाशो भवति यज्ञयात्रायाः, तत्र ऊर्ध्वमधश्च चित्प्रसादः प्रथमा प्रतिष्ठा स्यादिति रोदस्योरीळनं आदौ प्रस्तुतम्। हे अश्विना अश्विनौ, याभिः ऊतिभिः भरे संग्रामलक्षणे यज्ञे अंशाय भागाय स्वकीयाय कारम् कर्तारं यज्ञस्य स्तोत्रस्य वा जिन्वथः प्रीणयथः ताभिः उ उ इति पादपूरणः ऊतिभिः रक्षाभिः सह अस्मान् सु आगतम् सुष्ठु आगच्छतम्॥ अत्र सायणः 'कारशब्दः शङ्खवाची तेन ह्यभियुक्ताः संगिरन्ते, कारं शब्दकारिणं शङ्खं जिन्वथः मुखेन पूरयथः' इति व्याचष्टे। स एव 'कारं कर्तारं' इति इतरत्र आह, 'कारं कर्तारमभिमतस्य प्रयोजनस्य' (४.१.१४) 'कारं न स्वामिनः कर्मकारमिव' (५.२९.८) 'कार इत् शत्रुजयकर्तैव' (१०.५३.११)॥ जिन्वथः-जिविः प्रीणनार्थः, अत्र प्रीणनहेतुभूतं आपूरणं लक्ष्यत इति सायणः॥

द्वितीयामृचमाह—

युवोर्दानाय सुभरा असश्चतो रथमा तस्थुर्वचसं न मन्तवे।
याभिर्धियोऽवथः कर्मन्निष्टये ताभिरू षु ऊतिभिरश्विना गतम् ॥२॥

युवोः दानाय सुऽभराः असश्चतः रथम् आ तस्थुः वचसम् न मन्तवे याभिः धियः अवथः कर्मन् इष्टये ताभिः ऊम् इति सु ऊतिऽभिः अश्विना आ गतम् ॥

सुभराः सुखेन बिभ्रतः देवताप्रसादमिति शेषः असश्चतः असङ्गाः स्तोतारः, निस्सङ्गतया आश्विनं तेजोबलादिकं सुखेन भर्तुं शक्नुवन्ति स्तोतारः। ते युवोः युवयोः रथमातस्थुः रथं आतिष्ठन्ति प्राप्नुवन्ति। किमर्थम्? दानाय युष्मत्कर्तृकाय प्रसादाय। तत्र दृष्टान्तः—वचसम् न मन्तवे वचोयुक्तं विपश्चितं ज्ञानाय यथा ज्ञानेच्छवः उपासते तद्वत्। अपि च इष्टये यजनाय कर्मन् कर्मणि याभिः ऊतिभिः धियः ध्यानभरिता बुद्धीः स्तुतीर्वा अवथः रक्षथः, ताभिरित्यादि पूर्ववत् ॥ वचसम्—अर्शआदित्वादच् मत्वर्थीयः। मन्तवे—मन ज्ञाने, कमिमनीत्यादिना तुप्रत्ययः ॥

तृतीयामृचमाह—

युवं तासां दिव्यस्य प्रशासने विशां क्षयथो अमृतस्य मज्मना।
याभिर्धेनुमस्वं१ पिन्वथो नरा ताभिरू षु ऊतिभिरश्विना गतम् ॥३॥

युवम् तासाम् दिव्यस्य प्रऽशासने विशाम् क्षयथः अमृतस्य मज्मना याभिः धेनुम् अस्वम् पिन्वथः नरा ताभिः ऊम् इति सु ऊतिऽभिः अश्विना आ गतम् ॥

हे नरा नेतारावश्विनौ, दिव्यस्य दिवि भवस्य अमृतस्य मरणरहितस्य सर्वधारकस्य सोमस्य रसस्य मज्मना बलेन युक्तौ युवम् युवां तासाम् प्रसिद्धानां सर्वासां विशाम् प्रजानां प्रशासने प्रकृष्टे अनुशासने शिक्षणे क्षयथः ऐश्वर्यकर्माऽयं, ईशाथे, शक्तौ भवथः। अपि च याभिः ऊतिभिः अस्वम् असुवं अप्रसवां प्रसवासमर्थां धेनुम् गां पिन्वथः सिञ्चथः, अमृतरसलक्षणं क्षीरं स्वात्मनो दोग्धुमसमर्थां चिद्रश्मिलक्षणां गां तादृशप्रसदसमर्थां अश्विनौ स्वीयेन दिव्येन भैषज्येन कुरुत इत्यर्थः। सायणस्तु शंयोर्नाम ऋषेः काचन गौः प्रसवासमर्थाऽभूत्, तां प्रसव-

समर्थामकुरुतामश्विनाविति कथां ब्रूते । ताभिरिति पूर्ववत् ॥

चतुर्थीमृचमाह—

याभिः परिज्मा तनयस्य मज्मना द्विमाता तूर्षु तरणिर्विभूषति ।
याभिस्त्रिमन्तुरभवद्विचक्षणस्ताभिरू षु ऊतिभिरश्विना गतम् ॥४॥

याभिः परिऽज्मा तनयस्य मज्मना द्विऽमाता तूर्षु तरणिः विऽभूषति याभिः त्रिऽमन्तुः अभवत् विऽचक्षणः ताभिः ऊम् इति सु ऊतिऽभिः अश्विना आ गतम् ॥

याभिः ऊतिभिः परिज्मा परितो गन्ता मातरिश्वा तनयस्य स्वीयसन्तानस्य अग्नेः 'वायोरग्निः' इत्यौपनिषदाः, सृष्टावपि भुवर्लोकात्परमेव भूलोकस्यावस्थानम्, यस्याग्निर्देवता । तस्य अग्नेः मज्मना बलेन द्विमाता द्वयोः द्यावापृथिव्योः माता निर्माता, क्रियादक्षत्वात् प्राणात्मकस्य मातरिश्वनः । तथाभूतः तूर्षु तरीतृषु त्वरितगमनेषु मध्ये तरणिः अतिशयेन तरीता सत्वरगामी विभूषति विभवति, व्याप्तो भवति । अपि च याभिः ऊतिभिः त्रिमन्तुः त्रयाणां मन्ता ज्ञाता, आसादितत्रिलोकज्ञानः, एतन्नामा ऋषिर्वा विचक्षणः विशिष्टज्ञानयुक्तः अभवत् भवतीति लडर्थे । ताभिरित्यादि पूर्ववत् । अत्र सायणः त्रिमन्तुः कक्षीवानृषिरित्याह। स्यान्नाम । सूक्तेऽस्मिन् ऐतिहासिकपुरुषाणां आश्विनानुग्रहपात्रभूतानां नामानि श्रूयन्ते, तत्र धात्वर्थानुगमेन रहस्यार्थप्रतिपत्तिः सिध्यतीति बोध्यम् । तावता ऋषीणां ऐतिहासिकत्वं न बाधितं भवति, यथा कुत्सादेः । इदं च प्राक् प्रस्तुतं विवृतं च ॥ तूर्षु–तॄ प्लवनतरणयोः, बहुलं छन्दसीत्युत्वं, यद्वा त्वरतेः क्विप् । विभूषति–भवतेर्लेट्यडागमः, सिप् लेटि बहुलम् ॥

पञ्चमीमृचमाह—

याभी रेभं निवृतं सितमद्रय उद्वन्दनमैरयतं स्वर्दृशे ।
याभिः कण्वं प्र सिषासन्तमावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥५॥

याभिः रेभम् निऽवृतम् सितम् अत्ऽभ्यः उत् वन्दनम् ऐरयतम् स्वः दृशे याभिः कण्वम् प्र सिसासन्तम् आवतम् ताभिः ऊम् इति सु ऊतिऽभिः अश्विना आ गतम् ॥

हे अश्विनौ, याभिः ऊतिभिः रेभम् एतत्संज्ञकं रेभतिः स्तुतिकर्मा, स्तुत्या ख्यातमृषिं निवृनम् निवारितं (अन्तर्भावितण्यर्थः) पापैर्देवविरोधिभिरिति शेषः, तथा सितम् बद्धं अज्ञानमयान्धकूपे पतितं तत्र आसुरशक्तिरज्जुभिर्बद्धं च ऋषिं अद्भ्यः उक्तलक्षणकूपाद्भ्यः सकाशात् उदैरयतम् उदगमयतं, तथा वन्दनम् एतत्संज्ञकमृषिं च उदैरयतम्। किमर्थम्? स्वः दृशे सौरस्य ज्योतिषः दर्शनाय। अपि च कण्वम् मेधाविनं एतत्संज्ञकं वा ऋषिं अन्धकारे प्रक्षिप्तं सिषासन्तम् संभक्तुमिच्छन्तं सौरप्रकाशमिति शेषः, याभिः ऊतिभिः प्रावतम् प्रकर्षेणारक्षतम्। ताभिरित्यादि समानम्॥ सितम्–षिञ् बन्धने। अन्ये गताः॥

इति प्रथमस्य सप्तमे त्रयस्त्रिंशो वर्गः

षष्ठीमृचमाह—

याभिरन्तकं जसमानमारणे भुज्युं याभिरव्यथिभिर्जिजिन्वथुः।
याभिः कर्कन्धुं वय्यं च जिन्वथस्ताभिरू षु ऊतिभिरश्विना गतम्॥६॥
याभिः अन्तकम् जसमानम् आऽअरणे भुज्युम् याभिः अव्यथिऽभिः
जिजिन्वथुः याभिः कर्कन्धुम् वय्यम् च जिन्वथः ताभिः ऊम् इति सु
ऊतिऽभिः अश्विना आ गतम्॥

आरणे आ समन्तात् अरणं सोद्यमगमनं तत्र, सप्रयासोद्यम इत्यर्थः जसमानम् हिंस्यमानं शत्रुभिः पापैः अन्तकम् एतत्संज्ञकं राजर्षिं, शत्रूणामन्तकरं वा ऋषिं याभिः ऊतिभिः अवथः रक्षथः तथा भुज्युम् पालकं एतत्संज्ञकं, काक्षीवते आश्विने सूक्ते चोपन्यस्यते भुज्युः राजर्षिः, तं याभिः ऊतिभिः अव्यथिभिः व्यथारहिताभिः सुखोपायभूताभिः रक्षाभिः जिजिन्वथुः अतर्पयतम्। तथा कर्कन्धुम् अविदितमस्य स्वरूपं सकृत्प्रयोगात् वय्यम् च एतत्संज्ञकं च, अस्य स्वरूपं प्रागुक्तम् (१.५४.६), याभिः ऊतिभिः जिन्वथः प्रीणयथः। गतमन्यत्॥ जसमानम्–जसि हिंसायाम्, यकि प्राप्ते व्यत्ययेन शप्। जिजिन्वथुः–जिविः प्रीणनार्थः, लिटि रूपम्॥

सप्तमीमृचमाह—

याभिः शुचन्तिं धनसां सुषंसदं तसं घर्ममोम्यावन्तमत्रये।
याभिः पृश्निंगुं पुरुकुत्समावतं ताभिरू षु ऊतिभिरश्विना गतम्॥७॥
याभिः शुचन्तिम् धनऽसाम् सुऽसंसदम् तसम् घर्मम् ओम्याऽवन्तम्

अत्रये याभिः पृश्निऽगुम् पुरुऽकुत्सम् आवतम् ताभिः ऊम् इति सु ऊतिऽभिः अश्विना आ गतम् ॥

हे अश्विनौ, धनसाम् दिव्यस्य धनस्य संभक्तारं शुचन्तिम् दीप्यमानमृषिं एतत्संज्ञकं सुषंसदम् शोभनावासगृहयुक्तं याभिः ऊतिभिः अकुरुतम्, तथा अत्रये एतत्संज्ञकाय ऋषये तप्तम् तपसा परिपक्वं घर्मम् दीप्तियुक्तं महावीरसङ्केतकं शरीरं ओम्यावन्तम् रक्षासुखयुक्तं याभिरूतिभिः अकुरुतम्। अपि च याभिः ऊतिभिः पृश्निगुम् पृश्नयश्चित्रवर्णाः गावः चिद्रश्मिलक्षणाः यस्य तं, एतत्संज्ञकं पुरुकुत्सम् एतं ऋषिं च आवतम् अरक्षतम्। ताभिरिति गतम्॥ शुचन्तिम्–शुच दीप्तौ। सुषंसदम्–सीदतेः। ओम्यावन्तम्–अवतेः मनिन्, ज्वरत्वरेत्यादिना वकारस्योपधायाश्च ऊठ्, गुणः, अर्हार्थे यप्रत्ययः॥

अष्टमीमृचमाह—

याभिः शचीभिर्वृषणा परावृजम् प्रान्धं श्रोणं चक्षसे एतवे कृथः।
याभिर्वर्तिकां ग्रसितामुञ्चतं ताभिरू षु ऊतिभिरश्विना गतम् ॥८॥
याभिः शचीभिः वृषणा पराऽवृजम् प्र अन्धम् श्रोणम् चक्षसे एतवे कृथः याभिः वर्तिकाम् ग्रसिताम् अमुञ्चतम् ताभिः ऊम् इति सु ऊतिऽभिः अश्विना आ गतम् ॥

हे वृषणा वर्षितारौ अश्विनौ, याभिः शचीभिः शक्तिभिः क्रियाभिः प्रज्ञाभिर्वा परावृजम् एतत्संज्ञकं, परावृणक्ति तपसा पापं प्रध्वंसयति इति परावृक् तमृषिं 'पङ्गुं अपङ्गुं अकुरुतम्' इति सायणः, केयं पुराणकथेति न ज्ञायते। अन्धम् दृष्टिरहितं 'ऋज्राश्वमृषिम्' इति सायणः, चक्षसे चक्षुषा सम्यग्दर्शनाय याभिरूतिभिः प्रकृथः प्रकर्षेण कुरुथः। श्रोणम् एतत्संज्ञकं 'विगुणजानुकमेव सन्त'मिति सायणः, एतवे गन्तुं प्रकृथः प्रकर्षेण कृतवन्तौ, वर्तिकाम् चटकसदृशस्य पक्षिणः स्त्रियमिति सायणः, ग्रसिताम् वृकेण ग्रस्तां इति सायणः याभिः ऊतिभिः अमुञ्चतम् निर्मुक्तामकुरुतम्। ताभिरिति गतम्। अत्रेदं चिन्त्यम्। अस्यामृचि उत्तरासु च अश्विनोरनुग्रहप्रभावो वर्ण्यते, पादहीनस्य गमनसामर्थ्यं अन्धस्य प्रकाशदानमित्यादि तत्र निदर्शनम्। एतेषां वादानां ऐतिहासिकत्वेऽपि अन्तरर्थस्य न क्षतिः, स्तोत्रात्मकत्वात्तेषाम्, अन्यथा च अन्धादीनां सत्यप्रकाशनिर्मूढत्वादि विवक्षितम्। अत्र वर्तिकाकथासारस्तु विचेयः॥

काचन चटकपक्षिस्त्री वृकेण ग्रस्ताऽभूत्, तां निर्मुक्तामकुरुतामश्विनौ इति भूतार्थं मन्यमान इव कथयति कथाम्। यास्कस्तु वृकेण विवृतज्योतिष्केण सूर्येण ग्रस्तामुषसं निर्मुक्तामकुरुतामिति कथां लाक्षणिकीं मन्यते। नव्यास्तु रात्र्या ग्रस्ता उषा वर्तिकेति विभावयन्ति, एवं बहवो वादा ऊहमात्राधाराः विप्रतिपद्यन्ते। सायणं विना सर्वेऽपि कथाया गौणत्वमाश्रित्यैव प्रघर्तन्ते। अस्माकमपि गौणत्वाश्रयणेनैव सङ्केतार्थः प्रवर्तते॥ तर्हि ब्रूमः–वर्तिका न चटकपक्षिस्त्री, अन्येयं भीरुत्वेन ख्याता "श्येनावपातचकिता वनवर्तिकेव" इत्येवमादिप्रयोगे अतिभीरुत्वमस्याः द्योतितम्। बलहीनतामवद्योतयति स्त्रीत्वम्। अन्तः ऊर्ध्वगमनायोद्यतो जीवन् योगी पक्षिणोपमीयते। असति दूरोत्पतनसामर्थ्ये, ऊर्ध्वं जिगमिषोर्योगिनः असुरेभ्यः भयं नित्यसिद्धम्। एवं वर्तिकास्थानीयं भीरुं योगिनमृषिं वृकेण छेदकेनासुरेण ग्रस्तं अश्विनौ निर्मुक्तमकुरुताम्॥ एतवे–एतेः तुमर्थे तवेन्प्रत्ययः। कृथः–करोतेः, विकरणस्य लुक्॥

नवमीमृचमाह—

याभिः सिन्धुं मधुमन्तमसश्चतं वसिष्ठं याभिरजरावजिन्वतम्।
याभिः कुत्सं श्रुतर्यं नर्यमावतं ताभिरू षु ऊतिभिरश्विना गतम्॥९॥
याभिः सिन्धुम् मधुऽमन्तम् असश्चतम् वसिष्ठम् याभिः अजरौ अजिन्वतम् याभिः कुत्सम् श्रुतर्यम् नर्यम् आवतम् ताभिः ऊम् इति सु ऊतिऽभिः अश्विना आ गतम्॥

हे अश्विनौ, सिन्धुम् स्यन्दनशीलां तेजोबलादिवाहिनीं मधुमन्तम् रसभरितां याभिः ऊतिभिः असश्चतम् अगमयतं (सश्चतिर्गतिकर्मा, अन्तर्भावितण्यर्थः)। हे अजरौ जरारहितौ वसिष्ठम् ऋषिं याभिः ऊतिभिः अजिन्वतम् अप्रीणयतं, याभिः कुत्सं श्रुतर्यं नर्यं एतान् ऋषीन् आवतम् अरक्षतम् ताभिरिति गतम्॥

दशमीमृचमाह—

याभिर्विश्पलां धनसामथर्व्यं सहस्रमीळ्ह आजावजिन्वतम्।
याभिर्वशमश्व्यं प्रेणिमावतं ताभिरू षु ऊतिभिरश्विना गतम्॥१०॥
याभिः विश्पलाम् धनऽसाम् अथर्व्यम् सहस्रऽमीळ्हे आजौ अजिन्वतम्

याभिः वशम् अश्व्यम् प्रेणिम् आवतम् ताभिः ऊम् इति सु ऊतिऽभिः अश्विना आ गतम् ॥

हे अश्विनौ, याभिः ऊतिभिः धनसाम् दिव्यं धनं संभजमानां अथर्व्यम् थर्वतिर्गतिकर्मा, गमनरहितां (लिङ्गव्यत्ययः) स्थिरां दृढस्थितिकामित्यर्थः विश्पलाम् विशां पालयित्रीं ऋषिकां (अगस्त्यपुरोहितस्य खेलस्य संबन्धिनी पत्नी वेति इतिहासः) सहस्रमीळ्हे सहस्रदिव्यधनवृष्टियुक्ते (मीळ्हं धननाम स्थूले, वर्षणमपि स्यात्) आजौ असुरैः सह युद्धे अजिन्वतम् अप्रीणयतम्। याभिः वशम् (वष्टेः) एतत्संज्ञकमृषिं अश्व्यम् अश्वाख्यस्यर्षेः प्राणसमृद्धस्य पुत्रं प्रेणिम् प्रेरयितारं यजनस्य स्तुतेर्वा ऋषिं आवतम् अरक्षतम्। ताभिरिति गतम् ॥ प्रेणिम्–प्रेण् गतिप्रेरणश्लेषणेषु, औणादिक इप्रत्ययः ॥

इति प्रथमस्य सप्तमे चतुस्त्रिंशो वर्गः

एकादशीमृचमाह—

याभिः सुदानू औशिजाय वणिजे दीर्घश्रवसे मधु कोशो अक्षरत्।
कक्षीवन्तं स्तोतारं याभिरावतं ताभिरू षु ऊतिभिरश्विना गतम्॥११॥

याभिः सुदानू इति सुऽदानू औशिजाय वणिजे दीर्घऽश्रवसे मधु कोशः अक्षरत् कक्षीवन्तम् स्तोतारम् याभिः आवतम् ताभिः ऊम् इति सु ऊतिऽभिः अश्विना आ गतम् ॥

हे सुदानू शोभनदानौ अश्विनौ, औशिजाय उशिक्पुत्राय, अस्य स्वरूपं प्रागुक्तम् (१.१८.१) वणिजे वाणिज्यं कुर्वते फलप्रतिफलबुद्धिचोदनया यत् क्रियते तत्र वाणिज्यगन्धो वर्तत एव, तदिह विवक्षितं बोध्यम्, तथाभूताय दीर्घश्रवसे सुदूरदिव्यश्रवणशालिने ऋषये याभिः युष्मदीयाभिरूतिभिः हेतुभूताभिः कोशः दिव्यधनसमृद्धिनिधानभूतः मधु मधुरं मदकरं रसभरितं अक्षरत् अवर्षत्। दीर्घतमसः पत्न्या उशिजः पुत्रो दीर्घश्रवाः अनावृष्टेर्वाणिज्यवृत्तिमवललम्बे इति कथामुदाहरन्ति, स एव कक्षीवानित्येके। अपि च स्तोतारम् कक्षीवन्तम् एतमृषिं (१.१८.१) याभिः आवतम् अरक्षतम्। ताभिरिति गतम् ॥

द्वादशीमृचमाह—

याभी रसां क्षोदसोद्रः पिपिन्वथुरनश्वं याभी रथमावतं जिषे।
याभिस्त्रिशोक उस्रिया उदाजत ताभिरू षु ऊतिभिरश्विना गतम्॥१२॥

याभिः रसाम् क्षोदसा उद्नः पिपिन्वथुः अनश्वम् याभिः रथम् आवतम् जिषे याभिः त्रिऽशोकः उस्रियाः उत्ऽआजत ताभिः ऊम् इति सु ऊतिऽभिः अश्विना आ गतम् ॥

हे अश्विनौ, याभिः ऊतिभिः रसाम् ऊर्ध्वं दिव्यभूमिगां रसमयीं नदीं क्षोदसा संपिषता कूलानीति शेषः, उद्नः उदकेन, तृतीयायाः द्वितीयाबहुवचनविपर्ययः, पिपिन्वथुः पूरितवन्तौ युवाम् । रथम् रंहणशीलं आत्मीयं गतिवेगं अनश्वम् अश्विनौ सन्तावपि अश्वं विनैव जिषे जेतुं याभिः ऊतिभिः आवतम् अरक्षतम्, युष्मदीयवेगः अश्वनिरपेक्षं प्रवर्तत इति भावः । याभिः ऊतिभिः त्रिशोकः त्रिषु स्थानेषु अन्तर्बहिश्च, शोकः दीप्तिर्यस्यासौ (शुच दीप्तौ, अस्मात् शोकः) उस्रियाः गाः चिद्रश्मिलक्षणाः उदाजत उदगमयत्, अन्धकारे जडे तमसि या गावः निलीनास्ता इत्यर्थः । ताभिरिति गतम् ॥ क्षोदसा-क्षुदिर् संपेषणे, औणादिकोऽसुन्प्रत्ययः । जिषे-तुमर्थे क्सेप्रत्ययः ॥

त्रयोदशीमृचमाह—

याभिः सूर्यं परियाथः परावति मन्धातारं क्षैत्रपत्येष्वावतम् ।
याभिर्विप्रं प्र भरद्वाजमावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥ १३ ॥
याभिः सूर्यम् परिऽयाथः पराऽवति मन्धातारम् क्षैत्रऽपत्येषु आवतम्
याभिः विप्रम् प्र भरत्ऽवाजम् आवतम् ताभिः ऊम् इति सु ऊतिऽभिः
अश्विना आ गतम् ॥

हे अश्विनौ, परावति त्रैलोक्यात् परस्तात् दूरस्थाने सूर्यम् ऋतज्योतिःस्वरूपं याभिः ऊतिभिः परियाथः परितो गच्छथः । तथा मन्धातारम् मेधाविनामेदं, मनसो धातारं, एतमृषिं क्षैत्रपत्येषु क्षेत्राणां त्रिलोकवर्तिनां पतिः क्षेत्रपतिः तत्संबन्धिषु कर्मसु आवतम् अरक्षतम् । याभिः ऊतिभिः विप्रम् विपश्चितं भरद्वाजम् समृद्धिभरितं एतमृषिं प्रावतम् प्रकर्षेणारक्षतम् । ताभिरिति गतम् ॥ क्षैत्रपत्येषु-ब्राह्मणादेराकृतिगणत्वात् कर्मण्यर्थे ष्यञ् ॥

चतुर्दशीमृचमाह—

याभिर्महामतिथिग्वं कशोजुवं दिवोदासं शम्बरहत्य आवतम् ।
याभिः पूर्भिद्ये त्रसदस्युमावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥ १४ ॥

याभिः महाम् अतिथिऽग्वम् कशःऽजुवम् दिवःऽदासम् शम्बरऽहत्ये आवतम् याभिः पूःऽभिद्यै त्रसदस्युम् आवतम् ताभिः ऊम् इति सु ऊतिऽभिः अश्विना आ गतम् ॥

हे अश्विनौ, महाम् महान्तं अतिथिग्वम् अतिथिभिर्गन्तव्यं कशोजुवम् कश इत्युदकनाम, कशांसि उदकानि ज्योतिर्बलादिभरितानि जवते गच्छतीति कशोजूः तं एवंभूतं दिवोदासम् दिव्यकिङ्करं, एतं राजर्षिं शम्बरहत्ये शंबरस्यासुरस्य हनने याभिः ऊतिभिः आवतम् अरक्षतम्। याभिः ऊतिभिः पूर्भिद्ये पुराणि आसुराणि भिद्यन्तेऽस्मिन्निति पूर्भिद्यः सङ्ग्रामः तस्मिन् त्रसदस्युम् दस्यूनां त्रासकरं ऋषिं पुरुकुत्सपुत्रमित्याहुः आवतम् अरक्षतम्। ताभिरिति गतम् ॥

पञ्चदशीमृचमाह—

याभिर्वम्रं विपिपानमुपस्तुतं कलिं याभिर्वित्तजानिं दुवस्यथः।
याभिर्व्यश्वमुत पृथिमावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥१५॥

याभिः वम्रम् विऽपिपानम् उपऽस्तुतम् कलिम् याभिः वित्तऽजानिम् दुवस्यथः याभिः विऽअश्वम् उत पृथिम् आवतम् ताभिः ऊम् इति सु ऊतिऽभिः अश्विना आ गतम् ॥

याभिः ऊतिभिः वम्रम् ऋषिं विखनसः पुत्रमिति प्राहुः, विपिपानम् विशेषेण रसं पिबन्तं अरक्षतम्। तथा उपस्तुतम् समीपस्थैः स्तुतं एतमृषिं, वित्तजानिम् वित्ता लब्धा जाया येन तं कलिम् कलयन्तं प्रेरयन्तं यजनायान्यानिति शेषः, एतमृषिं याभिः ऊतिभिः दुवस्यथः परिचरथः रक्षथ इत्यर्थः। याभिः ऊतिभिः व्यश्वम् विगताश्वं ऋषिं उत अपि च पृथिम् पृथुलं, एतमृषिं आवतम् अरक्षतम्। ताभिरिति गतम् ॥ वित्तजानिम्—समासान्तो निङादेशः ॥

इति प्रथमस्य सप्तमे पञ्चत्रिंशो वर्गः

षोडशीमृचमाह—

याभिर्नरा शयवे याभिरत्रये याभिः पुरा मनवे गातुमीषथुः।
याभिः शारीराजतं स्यूमरश्मये ताभिरू षु ऊतिभिरश्विना गतम् ॥१६॥

याभिः नरा शयवे याभिः अत्रये याभिः पुरा मनवे गातुम् ईषथुः याभिः

शारीः आजतम् स्यूमऽरश्मये ताभिः ऊम् इति सु ऊतिऽभिः अश्विना आ गतम् ॥

हे नरा नेतारौ अश्विनौ, पुरा पूर्वं याभिः ऊतिभिः शयवे शेते दैव्यभूमौ शयुः, तस्मै ऋषये गातुम् शोभनं पन्थानम् ईषथुः वाञ्छितवन्तौ युवाम् । तथा याभिः अत्रये ऋषये मनवे मन्त्रे ऋषये च याभिः ईषथुर्गातुम् । याभिः ऊतिभिः स्यूमरश्मये स्यूतः संबद्धो रश्मिर्ज्ञानकिरणो यस्य तस्मै ऋषये शारीः शरैर्वेणुविशेषैर्निष्पादिता इषूः आजतम् असुरान् प्रति प्रैरयतम् । ताभिरिति गतम् ॥ ईषथुः-इष इच्छायाम्, लिट् । शारीः-शरशब्दाद्विकारार्थे अञ्प्रत्ययः । स्यूमरश्मये-षिवु तन्तुसन्ताने, सिवेरौणादिको मन्प्रत्ययः ॥

सप्तदशीमृचमाह—

याभिः पठर्वा जठरस्य मज्मनाग्निर्नादीदेच्चित इद्धो अज्मन्ना ।
याभिः शर्यातमवथो महाधने ताभिरू षु ऊतिभिरश्विना गतम् ॥१७॥

याभिः पठर्वा जठरस्य मज्मना अग्निः न अदीदेत् चितः इद्धः अज्मन् आ याभिः शर्यातम् अवथः महाऽधने ताभिः ऊम् इति सु ऊतिऽभिः अश्विना आ गतम् ॥

पठर्वा अविदितमस्य स्वरूपं, एष ऋषिः जठरस्य उदरोपलक्षितस्य शरीरस्य मज्मना बलेन, अन्तःशरीरबलेनेत्यर्थः । चितः काष्ठैरभिचितः इद्धः प्रदीपितः अग्निर्न अग्निरिव अज्मन् अज्मनि संग्रामे अदीदेत् अदीप्यत, तपोबलेन तेजोमयमभूच्छरीरमृषेः, तेन श्रमेण विना असुरान् युद्धे पराजितानकरोत् । एवं हे अश्विनौ, याभिः ऊतिभिः हेतुभूताभिः ऋषिः आ समन्तात् दीदेत् । अपि च शर्यातम् एतं मानवं महाधने महति संग्रामे याभिः अवथः रक्षथः । ताभिरिति पूर्ववत् ॥ अदीदेत्-दीदेतिः छान्दसो दीप्तिकर्मा ॥

अष्टादशीमृचमाह—

याभिरङ्गिरो मनसा निरण्यथोऽग्रं गच्छथो विवरे गोअर्णसः ।
याभिर्मनुं शूरमिषा समावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥१८॥

याभिः अङ्गिरः मनसा निऽरण्यथः अग्रम् गच्छथः विऽवरे गोऽअर्णसः

याभिः मनुम् शूरम् इषा समऽआवतम् ताभिः ऊम् इति सु ऊतिऽभिः अश्विना आ गतम् ॥

हे अङ्गिरः ऋषेरात्मन एवामन्त्रणमिति सायणः, अश्विनोरेव संबोधनमित्येके, वचनव्यत्ययः साधारणश्छान्दसः । हे अश्विनौ, युवां मनसा मनसैव करणभूतेन निरण्यथः नितरां रमयथः स्तोतॄन् । तथा गोअर्णसः चिद्रश्मिलक्षणानां गवां अर्णसः ज्योतिर्बलादिलक्षणानामपां च लाभे अङ्गिरोमुख्यैर्ऋषिभिः सहायैरिन्द्रेण प्राप्ये प्रसक्ते सति, विवरे वलाद्यसुरनिलयगुहाबिले याभिः ऊतिभिः सह अग्रम् पुरः गच्छथः । अपि च याभिः शूरम् पराक्रमशालिनं मनुम् ऋषिं इषा प्रेरणाशक्त्या समावतम् सम्यगरक्षतम् । ताभिरिति गतम् ॥ निरण्यथः–वर्णव्यापत्त्या निरमयथ इत्यस्य रूपम् ॥

एकोनविंशीमृचमाह—

याभिः पत्नीर्विमदाय न्यूहथुरा घ वा याभिररुणीरशिक्षतम् ।
याभिः सुदासे ऊहथुः सुदेव्यं ताभिरू षु ऊतिभिरश्विना गतम् ॥१९॥
याभिः पत्नीः विऽमदाय निऽऊहथुः आ घ वा याभिः अरुणीः अशिक्षतम्
याभिः सुऽदासे ऊहथुः सुऽदेव्यम् ताभिः ऊम् इति सु ऊतिऽभिः
अश्विना आ गतम् ॥

हे अश्विनौ, याभिः ऊतिभिः विमदाय ऋषये पत्नीः जायां, वचनव्यत्ययः, न्यूहथुः वा नितरां वा प्रापितवन्तौ युवां, घ पदपूरणः, तथा याभिः ऊतिभिः अरुणीः अरुणवर्णा आरोचमाना गाः चिन्मरीचीः आ अशिक्षतम् आभिमुख्येन अदत्तम् तथा याभिः ऊतिभिः सुदासे राजर्षये सुदेव्यम् प्रशस्तं धनं इति सायणः सुतरां देवार्हं धनं ऊहथुः प्रापितवन्तौ युवाम् । ताभिरिति गतम् ॥ सुदेव्यम्–दिगादित्वाद्यत् ॥

विंशीमृचमाह—

याभिः शन्तातीं भवथो ददाशुषे भुज्युं याभिरवथो याभिरध्रिगुम् ।
ओम्यावतीं सुभरामृतस्तुभं ताभिरू षु ऊतिभिरश्विना गतम् ॥२०॥
याभिः शन्तातीं इति शम्ऽतातीं भवथः ददाशुषे भुज्युम् याभिः अवथः

याभिः अध्रिऽगुम् ओम्याऽवतीम् सुऽभराम् ऋतऽस्तुभम् ताभिः ऊम् इति सु ऊतिऽभिः अश्विना आ गतम् ॥

हे अश्विनौ, ददाशुषे दत्तवते यजमानाय याभिः ऊतिभिः शन्ताती शं सुखं ततनुतः, सुखस्य कर्तारौ भवथः, याभिः ऊतिभिः भुज्युम् प्रसिद्धमेतं अवथः रक्षथः । याभिः अध्रिगुम् एतं प्रागुक्तलक्षणं अवथः । याभिः ऊतिभिः ऋतस्तुभम् ऋतं सत्यं स्तोभत्युच्चारयति ऋतस्तुप्, एतमृषिं ओम्यावतीम् ओम्या रक्षासुखं तद्युक्तां सुभराम् सुखेन भरणीयां संपदं प्रापयथः, ताभिरिति गतम् ॥ ददाशुषे–दाशृ दाने, लिटः क्वसुः ॥

इति प्रथमस्य सप्तमे षट्त्रिंशो वर्गः

एकविंशीमृचमाह—

याभिः कृशानुमसने दुवस्यथो जवे याभिर्यूनो अर्वन्तमावतम् ।
मधु प्रियं भरथो यत्सरड्भ्यस्ताभिरू षु ऊतिभिरश्विना गतम् ॥२१॥

याभिः कृशानुम् असने दुवस्यथः जवे याभिः यूनः अर्वन्तम् आवतम् मधु प्रियम् भरथः यत् सरट्ऽभ्यः ताभिः ऊम् इति सु ऊतिऽभिः अश्विना आ गतम् ॥

याभिः ऊतिभिः कृशानुम् सोमपालं अग्निं असने इषुक्षेपणे दुवस्यथः परिचरथः, रक्षथः, सोमं देवेभ्यो दीयमानं देवद्वेषिलोकालभ्यं इषुप्रयोगेण पालयन्तमग्निं दुवस्यथः इत्यर्थः, इष्वसनं लाक्षणिकमेव, असुराणां दूरादेव क्षेपणमभिप्रेतम् । याभिः ऊतिभिः यूनः तरुणस्य, पुरुकुत्सस्येत्याहुः, अर्वन्तम् अश्वं प्राणोपलक्षणं, जवे वेगे प्रवृत्तं आवतम् अरक्षतम् । यत् मधु क्षौद्रं प्रियम् सर्वेषां भोग्यं भवति, तत् मधुरं मधु सरड्भ्यः मधुमक्षिकाभ्यः भरथः संपादयथः । मधुमक्षिकास्थानीयेभ्यः यजमानेभ्यो देवभक्तेभ्यः सर्वेषामुपभोगक्षमं रसं सोमं संपादयथ इति लाक्षणिकोऽर्थः । ताभिरिति गतम् ॥ असने–असु क्षेपणे, करणे ल्युट् । सरड्भ्यः–सृ गतौ, सर्तेरटिः ॥

द्वाविंशीमृचमाह—

याभिर्नरं गोषुयुधं नृषाह्ये क्षेत्रस्य साता तनयस्य जिन्वथः ।
याभी रथाँ अवथो याभिरर्वतस्ताभिरू षु ऊतिभिरश्विना गतम् ॥२२॥

याभिः नरम् गोषुऽयुधम् नृऽसह्ये क्षेत्रस्य साता तनयस्य जिन्वथः याभिः

रथान् अवथः याभिः अर्वतः ताभिः ऊम् इति सु ऊतिऽभिः आश्विना आ गतम् ॥

याभिः ऊतिभिः गोषुयुधम् चिद्रश्मिलक्षणासु गोषु जेतव्यासु विषये युध्यत इति गोषुयुत् तं नरम् नेतारं यजमानं नृषाह्ये नृभिः सोढव्ये युद्धे जिन्वथः प्रीणयथः, तथा क्षेत्रस्य उपभोगक्षमस्य वासगृहादेः तनयस्य सन्ततेः, विस्तारस्य साता संभजने जिन्वथः। अत्र चित्प्रवृत्तेराधारभूतं सर्वं भूम्यादिकं क्षेत्रं बोध्यम्। याभिः रथान् गमनसाधनभूतान् अवथः रक्षथः याभिः अर्वतः तदीयानश्वान् अवथः, ताभिरिति गतम् ॥

त्रयोविंशीमृचमाह—

याभिः कुत्समार्जुनेयं शतक्रतू प्र तुर्वीतिं प्र च दभीतिमावतम्।
याभिर्ध्वसन्तिं पुरुषन्तिमावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥२३॥
याभिः कुत्सम् आर्जुनेयम् शतक्रतू इति शतऽक्रतू प्र तुर्वीतिम् प्र च दभीतिम् आवतम् याभिः ध्वसन्तिम् पुरुऽसन्तिम् आवतम् ताभिः ऊम् इति सु ऊतिऽभिः अश्विना आ गतम् ॥

हे शतक्रतू बहुकर्माणौ अश्विनौ, आर्जुनेयम् अर्जुनो धवलः शुद्धसत्त्वमनःप्रधान इन्द्र उच्यते तस्य पुत्र इव संबन्धी कुत्सः उभयोः श्रीकृष्णपाण्डवार्जुनयोरिव सख्यं प्रागुपन्यस्तम्। तं कुत्सम् याभिः ऊतिभिः प्रावतम् प्रकर्षेणारक्षतम्। तथा तुर्वीतिम् तुर्वति हिनस्ति शत्रूनिति तुर्वीतिः तं दमीतिम् च दभ्नोतेः, शत्रूणां दमयितारं च याभिः प्रावतम् प्रकर्षेणारक्षतम्। ध्वसन्तिम् गतिमन्तं (ध्वंसु गतौ च) एतं पुरुषन्तिम् पुरु बहु सनोति ददातीति पुरुषन्तिर्बहुदाता तं आवतम् अरक्षतम्। ताभिरिति गतम् ॥

चतुर्विंशीमृचमाह—

अप्नस्वतीमश्विना वाचमस्मे कृतं नो दस्रा वृषणा मनीषाम्।
अद्यूत्येऽवसे नि ह्वये वां वृधे च नो भवतं वाजसातौ ॥२४॥
अप्नस्वतीम् अश्विना वाचम् अस्मे इति कृतम् नः दस्रा वृषणा मनीषाम् अद्यूत्ये अवसे नि ह्वये वाम् वृधे च नः भवतम् वाजऽसातौ ॥

हे अश्विना, अश्विनौ, अस्मे अस्माकं वाचम् अग्मस्वतीम् अग्मः कर्मनाम, कर्मयुक्तां, वीर्यवतीमित्यर्थः कृतम् कुरुतम्। तथा नः अस्माकं मनीषाम् बुद्धिं "अग्मस्वतीं कृतम्"। हे दस्रा दस्रौ शत्रूणामुपक्षपयितारौ, वृषणा वर्षितारावभीष्टानां, अद्यूत्ये द्यूतरहिते साधुवृत्ते कर्मणि अवसे रक्षणाय वाम् युवां नि ह्वये नितरामाह्वयामि। वाजसातौ वाजस्य समृद्धेः सातौ लाभे निमित्ते नः अस्माकं वृधे च वर्धनाय च भवतम्। अत्र "अद्यूत्ये द्योतनरहिते प्रकाशनरहिते रात्रेः पश्चिमे यामे" इति सायणः॥

पञ्चविंशीमृचमाह—

द्युभिरक्तुभिः परि पातमस्मानरिष्टेभिरश्विना सौभगेभिः।
तन्नो मित्रो वरुणो ममहन्तामदितिः सिन्धुः पृथिवी उत द्यौः॥२५॥

द्युऽभिः अक्तुऽभिः परि पातम् अस्मान् अरिष्टेभिः अश्विना सौभगेभिः तत् नः मित्रः वरुणः ममहन्ताम् अदितिः सिन्धुः पृथिवी उत द्यौः॥

हे अश्विना अश्विनौ, द्युभिः दिवसैः अक्तुभिः रात्रिभिश्च सर्वदा अस्मान् परिपातम् परितो रक्षतम्। तथा अरिष्टेभिः अहिंसितैः अक्षपितैः सौभगेभिः सुभगत्वैः सौभाग्यैः अस्मान् रक्षतम्। यदस्माभिः प्रार्थितं तत् मित्रादयः षट् देवताः ममहन्ताम् पूजयन्तु॥

इति प्रथमस्य सप्तमे सप्तत्रिंशो वर्गः
प्रथमाष्टके सप्तमोऽध्यायः समाप्तः

अथाष्टमोऽध्याय आरभ्यते। प्रथमे मण्डले षोडशेऽनुवाके सप्त सूक्तानि गतानि। इदमिति विंशत्यृचं अष्टमं सूक्तम्। कुत्स ऋषिस्त्रिष्टुप् छन्द उषो देवता द्वितीयार्धर्चस्य रात्रिरपि॥

तत्र प्रथमामृचमाह—

इदं श्रेष्ठं ज्योतिषां ज्योतिरागाच्चित्रः प्रकेतो अजनिष्ट विभ्वा।
यथा प्रसूता सवितुः सवायँ एवा रात्र्युषसे योनिमारैक्॥१॥

इदम् श्रेष्ठम् ज्योतिषाम् ज्योतिः आ अगात् चित्रः प्रऽकेतः अजनिष्ट विऽभ्वा यथा प्रऽसूता सवितुः सवाय एव रात्री उषसे योनिम् अरैक्॥

ज्योतिषाम् द्योतमानानां सर्वेषां ज्योतिषां मध्ये इदम् प्रत्यक्षभूतं उषआख्यं ज्योतिः

चित्रप्रभातोदयज्योतिः श्रेष्ठं प्रशस्यतमं आगात् आगता प्रसन्ना भवति। तदागमने चित्रः नानावर्णः प्रकेतः तदीयः प्रकृष्टज्ञानरश्मिः विभ्वा विभुत्वेन (भावार्थकः) व्यापनेन, व्याप्तिगुणविशिष्टः अजनिष्ट प्रादुर्भूतः। यथा येन प्रकारेण प्रसूता स्वयं उत्पन्ना रात्रिगर्भात् सवितुः सवाय सूर्यस्य जन्मने प्रभवत्युषाः एव एवं, तथा रात्री रात्रिरपि उषसे उषसो जन्मने योनिम् आत्मनो गर्भं आरैक् आरेचितवती, रात्रिः स्वगर्भस्थामुषसं बहिरागमयत्। एवमेवोषोगर्भात् सूर्योद्भवः। सङ्केतार्थानुसारेण अहःसूर्यरात्र्युषसां स्वरूपाणि प्रागुपन्यस्तानि (१.१३.७)॥ आरैक्—रिचिर् विरेचने, लङि बहुलं छन्दसीति विकरणस्य लुक्॥

द्वितीयामृचमाह—

रुशद्वत्सा रुशती श्वेत्यागादारैगु कृष्णा सदनान्यस्याः।
समानबन्धू अमृते अनूची द्यावा वर्णं चरत आमिनाने॥ २॥

रुशत्ऽवत्सा रुशती श्वेत्या आ अगात् अरैक् उम् इति कृष्णा सदनानि अस्याः समानबन्धू इति समानऽबन्धू अमृते इति अनूची इति द्यावा वर्णम् चरतः आमिनाने इत्याऽमिनाने॥

रुशद्वत्सा रुशद्दीप्तः वत्सः ऋतज्योतिरात्मकः सूर्यः यस्याः सा श्वेत्या श्वेतवर्णा, उषसो नामेदं, रुशती दीप्ता सती आगात् आगतवती। अत्रेदमवधेयम्—साधारणी मानुषी लौकिकी प्रज्ञा निशा भवति यत्र सत्यप्रकाशो न वर्तते, अपि तु तस्यामेव रात्र्यामन्तर्वर्तमानः सूर्यः सत्यज्योतिः तद्गर्भान्निर्गतो भवति। अथ स्पष्टो भवेदुषस्यसूक्तरहस्यार्थः। उषस्यागतायां कृष्णा रात्रिः, उ इति पदपूरणः, अस्याः उषसः सदनानि वासस्थानानि आरैक् आरेचितवती, समन्तान्निर्मुक्तवती। रात्रावन्तर्हिताः सर्वाश्च भूमयः भूरादिलोकभूमिकाः उषसः प्रकाशलाभाय रात्रिपदवेदनीयायाः साधारणप्रज्ञावस्थायाः निर्मुक्ताः विस्पष्टा अभवन्नित्यर्थः। अपि च एते रात्र्युषसौ समानबन्धू समानः बन्धुः सूर्यः ययोस्ते, सूर्येण हि संबद्धा रात्रिः तथोषाश्च, अमृते नाशरहिते अनूची अन्वञ्चन्त्यौ रात्रिमनुसृत्य उषा इति क्रमेण गच्छन्त्यौ वर्णम् स्वकीयं रूपं आमिनाने हिंसन्त्यौ श्वेतेन उषोवर्णेन कृष्णो नैशवर्णो हिंसितो भवत्येव, तथा रात्र्या उषोरूपं च ग्रस्तं भवति। एवंभूते उभे अपि द्यावा द्योतमानेन नभसा चिदाकाशेन पथा चरतः पर्यायेण गच्छतः॥ श्वेत्या—श्विता वर्णे, अस्मात् ण्यन्तादचो यदिति यत्। अनूची—अनुपूर्वादञ्चतेः किन्। आमिनाने—मीञ् हिंसायाम्, क्रैयादिकः, शानच्॥

तृतीयामृचमाह—

समानो अध्वा स्वस्रोरनन्तस्तमन्यान्या चरतो देवशिष्टे ।
न मेथेते न तस्थतुः सुमेके नक्तोषासा समनसा विरूपे ॥३॥

समानः अध्वा स्वस्रोः अनन्तः तम् अन्याऽअन्या चरतः देवशिष्टे इति देवऽशिष्टे न मेथेते इति न तस्थतुः सुमेके इति सुऽमेके नक्तोषसा सऽमनसा विरूपे इति विऽरूपे ॥

स्वस्रोः साहचर्योपलक्षणमिदं, भगिन्योः अध्वा पूर्वोक्तः सञ्चारमार्गः समानः तुल्यः, एक एव अनन्तः अनवधिक आकाशश्चिन्मयः । तम् मार्गं देवशिष्टे देवेन सवित्रा अनुशिष्टे शिक्षिते सत्यौ अन्याऽअन्या एकैका चरतः क्रमेण गच्छतः । अपि च सुमेके सुदीप्ते, रात्रावपि दीप्तेरन्तर्हितत्वादुपपद्यतेऽयमर्थः । सायणस्तु बहुधा ब्रूते । "अत्र शोभनप्रजनने इति, सुमेकः सुदीप्त इति (४.६.३) सुमेके शोभनकर्माणौ शोभनमेहने वा परिचरणकुशले इत्यर्थः" इति । शोभनकर्माणौ एते नक्तोषासा रात्रिरुषाश्च विरूपे विरुद्धरूपे तमःप्रकाशरूपत्वात्, एवंभूते अपि समनसा समानमनस्के, ऐकमत्यसंपन्ने न मेथेते परस्परं न हिंस्तः, अत एव अमृते नित्ये सत्यौ न तस्थतुः चरत एव ॥ अन्याऽअन्या—कर्मव्यतिहारे सर्वनाम्नो द्वे भवतः । मेथेते—मेथृ हिंसने । सुमेके—मिह सेचने, भावे घञ्, व्यत्ययेन हस्य कः ॥

चतुर्थीमृचमाह—

भास्वती नेत्री सूनृतानामचेति चित्रा वि दुरो न आवः ।
प्राप्र्या जगद्व्युं नो रायो अख्यदुषा अजीगर्भुवनानि विश्वा ॥४॥

भास्वती नेत्री सूनृतानाम् अचेति चित्रा वि दुरः नः आवरित्यावः प्रऽअर्प्या जगत् वि ऊम् इति नः रायः अख्यत् उषाः अजीगः भुवनानि विश्वा ॥

भास्वती प्रकाशनयुक्ता सूनृतानाम् शोभनसत्यानां वाचां नेत्री प्रापयित्री, चोदयित्रीत्यर्थः उषाः अचेति अज्ञायि, ज्ञाता भवति । सा चित्रा चित्रवर्णा नः अस्माकं दुरः द्वाराणि पिहितद्वाराणां लोककक्ष्याभूमिकानां इत्यर्थः, व्यावः व्यवृणोत्, चित्प्रभाते सूनृतवाचां स्फुरणं, भूरादिलोककक्ष्याद्वारोद्घाटनं च भवतः, उ पादपूरणः । अपि च जगत् सर्वं भुवनं प्राप्र्य प्रकाशं

गमयित्वा नः अस्माकं रायः धनाय, दिव्यायोपभोगाय, विभक्तिव्यत्ययः, व्यख्यत् विशेषेण प्रकाशितवती। एवंभूता उषाः विश्वा भुवनानि सर्वाणि भुवनानि अजीगः स्वमुखान्निर्गमयति, तमसि लीनानि स्वभासा प्रकाशतां गमयति ॥ आवः-वृञ् वरणे, लुङ्, मन्त्रे च्लेर्लुक्। प्रार्ष्य-ऋ गतौ, णौ अर्तिह्रीत्यादिना युक्। अख्यत्-ख्या प्रकथने, लुङ्। अजीगः-गृ निगरणे, लडि तिपि छन्दसि विकरणस्य श्लुः, अभ्यासस्येत्वादिश्छान्दसः ॥

पञ्चमीमृचमाह—

जिह्मश्ये चरितवे मघोन्याभोगय इष्टये राय उ त्वम्।
दभ्रं पश्यद्भ्य उर्विया विचक्षे उषा अजीगर्भुवनानि विश्वा ॥५॥

जिह्मऽश्ये चरितवे मघोनी आऽभोगये इष्टये राये ऊम् इति त्वम् दभ्रम् पश्यत्ऽभ्यः उर्विया विऽचक्षे उषाः अजीगः भुवनानि विश्वा ॥

मघोनी धनवती, विचित्रसंपन्ना उषाः जिह्मश्ये जिह्मं वक्रं शयानाय ऋजुवर्तनरहितं अलसं जनं चरितवे सन्मार्गचरणाय व्युच्छन्ती भवति। एष चित्प्रभातप्रभावः। त्वम् अयमेकशब्दपर्यायः, एकं प्रति आ भोगये आभोग्याय देवदत्तस्य धनस्योपभोगाय, तथा अपरं प्रति इष्टये यजनाय तथा अन्यं प्रति राये धनाय व्युच्छन्ती भवति। उशब्दः समुच्चये, उ अपि च दभ्रम् अल्पं पश्यद्भ्यः अचिन्मयान्धकारावृतेभ्यः अल्पदृष्टिभ्यः उर्विया विचक्षे विशालदर्शनाय उर्वी विस्तीर्णा उषाः विश्वा भुवनानि अजीगः सर्वाणि भुवनानि स्वमुखान्निर्गमयति ॥ जिह्मश्ये-जिह्मं शेते इति जिह्मशीः तस्मै। आभोगये-आभोगशब्दाच्चतुर्थ्येकवचने यकारोपजनः। उर्विया-उर्वीशब्दादुत्तरस्य सोः डियाजादेशः। विचक्षे-विपूर्वात् चक्षिङ्धातोः संपदादिलक्षणो भावे क्विप् ॥

इति प्रथमस्याष्टमे प्रथमो वर्गः

षष्ठीमृचमाह—

क्षत्राय त्वं श्रवसे त्वं महीया इष्टये त्वमर्थमिव त्वमित्यै।
विसदृशा जीविताभिप्रचक्षे उषा अजीगर्भुवनानि विश्वा ॥६॥

क्षत्राय त्वम् श्रवसे त्वम् महीयै इष्टये त्वम् अर्थम्ऽइव त्वम् इत्यै विऽसदृशा जीविता अभिऽप्रचक्षे उषाः अजीगः भुवनानि विश्वा ॥

क्षत्राय वीरबलाय त्वम् एकं प्रति व्युच्छन्ती उषा इति शेषः। तथा श्रवसे श्रवणाय दिव्या वेशगर्भिताय त्वम् एकं प्रति, तथा महीयै इष्टये महत्यै इष्टये, महते यजनाय त्वम् एकं प्रति अर्थमिव अपेक्षितमर्थं प्रति इत्यै गमनाय त्वम् एकं प्रति व्युच्छन्ती, तथा विसदृशा विभिन्नानि नानाविधानि जीविता जीवितानि, जीवानां तत्तत्स्वभावानुरूपाः भिन्नभिन्नप्रवृत्तीः अभिप्रचक्षे आभिमुख्येन प्रकाशयितुं व्युच्छन्ती उषाः अजीगः भुवनानि विश्वा पूर्ववत् ॥ महीयै-मह्यै महेरिन् सर्वधातुभ्य इतीन्प्रत्ययः, ततो ङीष्, छान्दस ईकारोपजनः। अभिप्रचक्षे-चक्षेः तुमर्थे सेन्प्रत्ययः ॥

सप्तमीमृचमाह—

एषा दिवो दुहिता प्रत्यदर्शि व्युच्छन्ती युवतिः शुक्रवासाः।
विश्वस्येशाना पार्थिवस्य वस्व उषो अद्येह सुभगे व्युच्छ ॥७॥

एषा दिवः दुहिता प्रति अदर्शि विऽउच्छन्ती युवतिः शुक्रऽवासाः
विश्वस्य ईशाना पार्थिवस्य वस्वः उषः अद्य इह सुऽभगे वि उच्छ ॥

दिवः स्वर्लोकस्य दुहिता तदुद्भवात् दुहितृस्थानीया उषाः एषा व्युच्छन्ती सर्वं प्रकाशयन्ती तमोवर्जनेन, प्रत्यदर्शि प्रत्यक्षं दृष्टा भवति। कीदृशी? युवतिः नित्ययौवना शुक्रवासाः ज्योतिर्वसना, निर्मलदीप्तिरित्यर्थः, तथा विश्वस्य सर्वस्य पार्थिवस्य पृथिवीसंबन्धिनः वस्वः वसुनः धनस्य भोग्यस्य सर्वस्य ईशाना ईश्वरी। एवंभूते सुभगे शोभनभाग्योपेते, हे उषः, इह अत्र मयि अद्य इदानीं व्युच्छ अचित्तमो वर्जयित्वा प्रकाशस्व ॥

अष्टमीमृचमाह—

परायतीनामन्वेति पाथ आयतीनां प्रथमा शश्वतीनाम्।
व्युच्छन्ती जीवमुदीरयन्त्युषा मृतं कं चन बोधयन्ती ॥८॥

पराऽयतीनाम् अनु एति पाथः आऽयतीनाम् प्रथमा शश्वतीनाम्
विऽउच्छन्ती जीवम् उत्ऽईरयन्ती उषाः मृतम् कम् चन बोधयन्ती ॥

ऋतज्योतिषः सूर्यस्य प्रादुर्भावात् प्राक् बहुधा चित्प्रभातं भवति अन्तर्याजिनः। अत एव बह्वीनामुषसां प्रादुर्भावः कीर्त्यते वेदे। परायतीनाम् परागच्छन्तीनां अतीतानां उषसां पाथः

मार्गं अन्वेति अनुसरति इदानीमुषाः । तथा आयतीनाम् आगच्छन्तीनां, इतःपरं आगमिष्यन्तीनां शश्वतीनाम् नित्यानां क्षयरहितानां बह्वीनां प्रथमा आद्या अद्यतनी उषाः व्युच्छन्ती तमोवर्जनेन भासमाना जीवम् जीवन्तमात्मानं उदीरयन्ती ऊर्ध्वं दिवं प्रति प्रेरयन्ती मृतम् मरणधर्मग्रस्तं, अमर्त्यजीवप्रकाशरहितं कञ्चन कमपि धन्यं पुरुषं बोधयन्ती प्राप्तचित्प्रबोधं कुर्वती प्रवर्तते ॥ परायतीनाम्–इण् गतौ, लटः शतृ, इणो यण्, उगितश्चेति ङीप् ॥

नवमीमृचमाह—

उषो यदग्निं समिधे चकर्थ वि यदावश्चक्षसा सूर्यस्य ।
यन्मानुषान्यक्ष्यमाणाँ अजीगस्तद् देवेषु चकृषे भद्रमग्नः ॥९॥

उषः यत् अग्निम् समञ्जिधे चकर्थ वि यत् आवः चक्षसा सूर्यस्य यत् मानुषान् यक्ष्यमाणान् अजीगरिति तत् देवेषु चकृषे भद्रम् अग्नः ॥

हे उषः, अग्निम् यजमाने जागरितं कवित्रतुं समिधे सम्यग्ज्वलनाय यत् चकर्थ यत् कर्म कृतवती, चित्प्रभाते अग्निरन्तः प्रज्वलितो भवति । अपि च सूर्यस्य ऋतज्योतिषः चक्षसा दर्शनेन, प्रकाशेन यत् व्यावः यत् व्यावृणोः, अचिद्रूपान्धकारस्यापनोदनेन यत् विश्वं प्रकाशं व्यावृतवती । अपि च यक्ष्यमाणान् यजनाय प्रवृत्तान् मानुषान् मनोर्जातान् मानवान् अजीगः पूर्वं तमोग्रस्तान् चित्प्रकाशेनोद्गीर्णानिवाकरोः तत् अग्नः उक्तं तत्त्रिविधमपि कर्म देवेषु देवानामर्थे, तेषु मध्ये भद्रम् कल्याणं चकृषे कृतवती । त्रीण्यपि औषस्यानि कर्माणि मानुष्यहितान्येव सन्त्यपि देवहितान्येव फलितानि भवन्ति । तद्भद्रं येन मनुष्यो देवप्रियमाचरति ॥ आवः–वृञ् वरणे, लुङ्, च्लेर्लुक् ॥

दशमीमृचमाह—

कियात्या यत्समया भवाति या व्यूषुर्याश्च नूनं व्युच्छान् ।
अनु पूर्वाः कृपते वावशाना प्रदीध्याना जोषमन्याभिरेति ॥१०॥

कियति आ यत् समया भवाति याः विऽऊषुः याः च नूनम् विऽउच्छान् अनु पूर्वाः कृपते वावशाना प्रऽदीध्याना जोषम् अन्याभिः एति ॥

उषाः समया अव्ययं, सन्निहिता भवाति भवति इति यत् यदेतत् कियति तत् किंप्रमाणे काले प्रवृत्तं समाप्तं चेति आ प्रश्नार्थकः । वस्तुतः उषस आनन्त्यात् चित्प्रभातस्य कालातीत-

त्वात्, कालत इयत्तावच्छेदो नास्तीति भावः। अत एवाह। याः उषसः व्युषुः व्युष्टाः पुरा नूनम् च अवश्यं इतः परं याः व्युच्छान् याः व्युष्टा भविष्यन्ति, तत्र पूर्वाः अतीताः व्युष्टाः उषसः वावशानाः कामयमानाः अद्यतनी उषाः अनुकृपते अनुकल्पते समर्था भवति। अतीतायाः उषसोऽनुसारेण प्रकाशाय प्रभवतीत्यर्थः। तथा प्रदीध्याना प्रदीप्यमानोषाः अन्याभिः उषोभिः जोषम् सह एति संगच्छते। बहुषु चित्प्रभातेषु पूर्वापरविरोधं विना प्रभातानां सर्वत्र परस्परसद्योगमूलकः संवादो वर्तते इति विवक्षा॥ कियति–किं प्रमाणमस्येति कियान्, तस्मिन्। भवाति–लेट्याडागमः। व्यूषुः–विपूर्वो वसतिर्व्युच्छने वर्तते। व्युच्छान्–उच्छी विवासे, लेट्याडागमः। कृपते–कृपू सामर्थ्ये, व्यत्ययेन शः। प्रदीध्याना–दीधीङ् दीप्तिदेवनयोः, लटः शानच्, अदादित्वाच्छपो लुक्॥

इति प्रथमस्याष्टमे द्वितीयो वर्गः

एकादशीमृचमाह—

ईयुष्टे ये पूर्वतरामपश्यन्व्युच्छन्तीमुषसं मर्त्यासः।
अस्माभिरू नु प्रतिचक्ष्याभूदो ते यन्ति ये अपरीषु पश्यान्॥११॥

ईयुः ते ये पूर्वऽतराम् अपश्यन् विऽउच्छन्तीम् उषसम् मर्त्यासः अस्माभिः ऊम् इति नु प्रतिऽचक्ष्या अभूत् ओ इति ते यन्ति ये अपरीषु पश्यान्॥

ये मर्त्यासः ये मनुष्याः पूर्वतराम् उषसम् अत्यन्तप्राचीनं चित्प्रभातं व्युच्छन्तीम् व्युष्टं भवत् अपश्यन् दृष्टवन्तः ते पुण्यपुरुषाः ईयुः गन्तव्यं स्थानं ऋतज्योतिः गताः, नात्र मृता इति विवक्षा, अविशेषान्मर्त्यानां मृतेः। ऋतप्राप्तिरेवोद्दिष्टा, तथा द्वादश्यामुषस ऋतज्योतिर्जन्मादि वर्ण्यते। अस्माभिः अधुनातनैः उ अपि नु इदानीं प्रतिचक्ष्या प्रत्यक्षं द्रष्टव्या अभूत् अजायत। तथा अपरीषु भाविनीषु उषस्सु ये पश्यान् पश्यन्ति, ते तेऽपि ओ आ उ इति निपातद्वये उ इत्यवधारणे आ यन्ति आगच्छन्त्येव ऋतस्थानम्, चित्प्रभातमहिम्नोऽव्यभिचारित्वात् कालत्रयेऽपि उषसः प्रभावादृतज्योतिः प्राप्यत इत्यर्थः॥ ईयुः–एतेः लिट्॥

द्वादशीमृचमाह—

यावयद्द्वेषा ऋतपा ऋतेजाः सुम्नावरी सूनृता ईरयन्ती।
सुमङ्गलीर्बिभ्रती देववीतिमिहाद्योषः श्रेष्ठतमा व्युच्छ॥१२॥

यवयत्ऽद्वेषाः ऋतऽपाः ऋतेऽजाः सुम्नऽवरी सूनृताः ईरयन्ती सुऽमङ्गलीः

बिभ्रती देवऽवीतिम् इह अद्य उषः श्रेष्ठऽतमा वि उच्छ ॥

यावयद्द्वेषाः यावयन्ति पृथक् कृतानि द्वेषांसि द्वेष्टॄणि रक्षःप्रभृतीनि यया सा ऋतपाः ऋतस्य ज्योतिषः पालयित्री ऋतेजाः ऋते प्राप्तव्ये निमित्तभूते जायते, प्रादुर्भूता सुम्नावरी सुम्नं सुखं तद्वती सूनृताः ईरयन्ती शोभनसत्याः वाचः प्रेरयन्ती 'चोदयित्री सूनृतानाम्'। सुमङ्गलीः सौमङ्गल्योपेता, अत्यन्तसौभाग्यं विवक्षितम्। देववीतिम् देवानां वीतिं आगतिं प्रादुर्भूतिमित्यर्थः, तां बिभ्रती वहन्ती हे उषः, श्रेष्ठतमा अतिप्रशस्या त्वं इह अत्र मयि अद्य इदानीं व्युच्छ व्युष्टा भव ॥ यावयद्द्वेषाः-यु मिश्रणे अमिश्रणे च, ण्यन्ताल्लटः शतृ। ऋतपाः-पा रक्षणे, विच्। सुम्नावरी-मत्वर्थीयो वनिप्, नस्य रेफः, दीर्घश्च छन्दसि। सुमङ्गलीः-गौरादिषु पाठात् ङीष् ॥

त्रयोदशीमृचमाह—

शश्वत्पुरोषा व्युवास देव्यथो अद्येदं व्यावो मघोनी।
अथो व्युच्छादुत्तराँ अनु द्यूनजरामृता चरति स्वधाभिः ॥१३॥

शश्वत् पुरा उषाः वि उवास देवी अथो इति अद्य इदम् वि आवः मघोनी अथो इति वि उच्छात् उत्ऽतरान् अनु द्यून् अजरा अमृता चरति स्वधाभिः ॥

देवी दिव्या द्योतमाना वा उषाः पुरा चिरन्तनात्कालात् शश्वत् नित्यं अव्यभिचरितं यथा भवति तथा व्युवास व्युष्टाऽभवत्। अथो अनन्तरं अद्य इदानीं मघोनी विचित्रधनोपेता इदम् विश्वं व्यावः विवासितं प्राप्तप्रकाशमकरोत्। अथो अनन्तरं उत्तरान् ऊर्ध्वतरान् ऊर्ध्वगतान् द्यून् दिवसान् अनु अनुलक्ष्य व्युच्छात् व्युच्छति। ऋषिदृष्टेः पूर्वं अप्रकाशानां ऊर्ध्वलोककक्ष्यागतानां इतः परं उषसः प्रसादात् प्रकाशतां गमिष्यतां जगतां दिवसाननुलक्ष्य उषा व्युच्छतीति रहस्यम्। सैषा अजरा जरारहिता अमृता मृतिरहिता स्वधाभिः स्वधारणसामर्थ्यप्रभाभिः सह चरति चरन्ती वर्तते, स्वधाभिः 'आत्मीयैस्तेजोभि'रिति सायणीये। साध्विदं, प्रायशः स्वधाशब्दः अन्नपर्यायः सायणव्याख्यायाम् ॥

चतुर्दशीमृचमाह—

व्यऽ१ऽञ्जिभिर्दिव आतासु अद्यौदप कृष्णां निर्णिजं देव्यावः।
प्रबोधयन्त्यरुणेभिरश्वैरोषा याति सुयुजा रथेन ॥१४॥

वि अञ्जिऽभिः दिवः आतासु अद्यौत् अपः कृष्णाम् निःऽनिजम् देवी आवरित्यावः प्रऽबोधयन्ती अरुणेभिः अश्वैः आ उषाः याति सुऽयुजा रथेन ॥

दिवः द्युलोकस्य आतासु आततासु विस्तीर्णासु दिक्षु उषाः अञ्जिभिः व्यञ्जकैः, ऋतप्रकाशाभिव्यञ्जकैः तेजोभिः व्यद्यौत् विद्योतते । देवी सोषाः कृष्णाम् तमसा कृतं कृष्णवर्णं निर्णिजम् रूपं अपावः अपावृणोत् स्वचित्प्रकाशेन अचिन्मयतमोरूपं तिरस्कृतवतीत्यर्थः । अपि च अरुणेभिः अरुणवर्णैः, क्रियाद्योतको लोहितवर्णः, अश्वैः प्राणबलोपलक्षणैः सुयुजा सम्यग्युक्तेन रथेन रंहणशीलेन गमनेन आ याति आगच्छति उषाः । किं कुर्वती? प्रबोधयन्ती चिद्बोधं प्रकर्षेण पक्वानामापादयन्ती ॥ अद्यौत्-द्युत दीप्तौ, लुङ् ॥

पञ्चदशीमृचमाह—

आवहन्ती पोष्या वार्याणि चित्रं केतुं कृणुते चेकिताना ।
ईयुषीणामुपमा शश्वतीनां विभातीनां प्रथमोषा व्यश्वैत् ॥१५॥

आऽवहन्ती पोष्या वार्याणि चित्रम् केतुम् कृणुते चेकिताना ईयुषीणाम् उपऽमा शश्वतीनाम् विऽभातीनाम् प्रथमा उषाः वि अश्वैत् ॥

पोष्या पोषणसमर्थानि वार्याणि वरणीयानि दिव्यानि वैभवानि आवहन्ती आनयन्ती चेकिताना ऋतज्योतिः प्रति यजमानं प्रज्ञापयन्ती उषाः चित्रम् अद्भुतं केतुम् चिद्रश्मिं कृणुते करोति यजमानाय । सैषा ईयुषीणाम् पूर्वनिष्पन्नानां शश्वतीनाम् चिरन्तनीनां बह्वीनामुषसां उपमा उपमानभूता विभातीनाम् विशेषेण भासमानानां भाविनीनामुषसां प्रथमा आद्या व्यश्वैत् स्वतेजसा प्रवृद्धा भवति ॥ पोष्या-पुष पुष्टौ, पोषः, भावे घञ्, भवे छन्दसि यत्, शेर्लोपः । अश्वैत्-टु ओश्वि गतिवृद्ध्योः, लङि विकरणस्य लुक्, गुणे कृते व्यत्ययेनैत्वम् ॥

इति प्रथमस्याष्टमे तृतीयो वर्गः

षोडशीमृचमाह—

उदीर्ध्वं जीवो असुर्न आगादप प्रागात्तम आ ज्योतिरेति ।
आरैक्पन्थां यातवे सूर्यायागन्म यत्र प्रतिरन्त आयुः ॥१६॥

उत् ईर्ध्वम् जीवः असुः नः आ अगात् अप प्र अगात् तमः आ ज्योतिः एति अरैक् पन्थाम् यातवे सूर्याय अगन्म यत्र प्रऽतिरन्ते आयुः ॥

पञ्चपुरुषान् अन्तर्याजिनः संबोधयति। उदीर्ध्वम् उद्गच्छत ऊर्ध्वगमनं प्रति। नः अस्माकं असुः प्रेरयिता जीवः अन्तरवस्थितः जीवात्मा आगात् प्रबुद्धो बहिरागतवान् ऊर्ध्वं स्वयं गन्तुं, शरीरादिकं दिव्यं तेजो गमयितुम्। तमः अचिन्मयं तमः अप प्रागात् अपगतम्। ज्योतिः ऋतस्वरूपं आ एति प्रादुर्भूयागच्छति। अत्र सायणोक्तिरवधेया "परमात्मरूपतया स च जीवस्तदेव ज्योतिरागच्छति" इति। सूर्याय यातवे सूर्यस्य ऋतज्योतिषः गमनाय पन्थाम् मार्गं अरैक् विविक्तीकरोति पूर्वोक्तो जीव आत्मा। यस्य प्रबोधाद्बहिरागमने ऋतस्य पन्थाः विविक्तः अनृतात्पृथक् कृतो भवति। तत्र अगन्म गच्छामः, यत्र आयुः प्रतिरन्ते प्रवर्धन्ते, ऊर्ध्वासु ऋतभूमिषु वसतो दिव्यस्य मानवस्य आयुषः प्रवर्धनं, प्रसिद्धं, नैव क्षतिस्तत्र॥

सप्तदशीमृचमाह—

स्यूमना वाच उदियर्ति वह्निः स्तवानो रेभ उषसो विभातीः।
अद्या तदुच्छ गृणते मघोन्यस्मे आयुर्नि दिदीहि प्रजावत्॥१७॥

स्यूमना वाचः उत् इयर्ति वह्निः स्तवानः रेभः उषसः विऽभातीः अद्य तत् उच्छ गृणते मघोनि अस्मे इति आयुः नि दिदीहि प्रजाऽवत्॥

वह्निः वोढा स्तोत्राणां रेभः स्तोता विभातीः विशेषेण भासमानाः उषसः चिन्मयीः स्तवानः स्तुवन् वाचः मन्त्रात्मिकायाः गिरः स्यूमना अनुस्यूतानि पूर्वोत्तरसंबन्धरूपबन्धनयुक्तानि उक्थानि उदियर्ति उच्चारयति, ऋतं प्रति उद्गमयति। तत् तस्मात् हे मघोनि मघवत्युषः गृणते स्तुवते मादृशाय मह्यं वा अद्य इदानीं तदुच्छ तत् प्रसिद्धं ज्योतिः विवासय विवृणुहि प्रकाशयेति यावत्। अस्मे अस्मभ्यं आयुः जीवनं प्रजावत् सन्तानयुक्तं, अक्षयजीवनमित्यर्थः नि दिदीहि नितरां प्रकाशय॥ स्यूमना–षिवु तन्तुसन्ताने, अन्यद्गतम्, शेर्लोपः। स्तवानः–ष्टुञ् स्तुतौ, शानचि अदादित्वात् शपो लुक्। गृणते–गॄ शब्दे क्रैयादिकः॥

अष्टादशीमृचमाह—

या गोमतीरुषसः सर्ववीरा व्युच्छन्ति दाशुषे मर्त्याय।
वायोरिव सूनृतानामुदर्के ता अश्वदा अश्नवत्सोमसुत्वा॥१८॥

याः गोऽमतीः उषसः सर्वऽवीराः विऽउच्छन्ति दाशुषे मर्त्याय वायोःऽइव सूनृतानाम् उत्ऽअर्के ताः अश्वऽदाः अश्नवत् सोमऽसुत्वा॥

गोमतीः चिद्रश्मियुक्ताः सर्ववीराः सर्ववीर्योपेताः याः उषसः दाशुषे दत्तवते मर्त्याय यजमानाय व्युच्छन्ति व्युष्टाः भवन्ति तमोवर्जनेन प्रकाशन्ते, वायोरिव वायुवद्वेगेन प्रवर्तमानानां सूनृतानाम् शुभसत्यानां वाचां स्तुतीनां उदर्के भाविनि ऊर्ध्वे अर्चनीये समापने अश्वदाः अश्वानां प्राणबलोपलक्षणानां दात्री ताः उषसः याः पूर्वोक्ताः सोमसुत्वा सोमानामभिषोता यजमानः अश्नवत् प्राप्नोतु। प्रथमं गावः पश्चादश्वाः, प्रथमं ज्ञानं पश्चात्क्रियासामर्थ्याय प्राणबलमित्यवधेयम् ॥ अश्नवत्-अशू व्याप्तौ, लेट्यडागमः, व्यत्ययेन परस्मैपदम्। सोमसुत्वा-षुञ् अभिषवे, क्वनिप्, ह्रस्वस्य पितीति तुक् ॥

एकोनविंशीमृचमाह—

माता देवानाममदितेरनीकं यज्ञस्य केतुर्बृहती वि भाहि।
प्रशस्तिकृद् ब्रह्मणे नो व्युच्छा नो जने जनय विश्ववारे ॥१९॥

माता देवानाम् अदितेः अनीकम् यज्ञस्य केतुः बृहती वि भाहि प्रशस्तिऽकृत् ब्रह्मणे नः वि उच्छ आ नः जने जनय विश्वऽवारे ॥

हे उषः, त्वं देवानां माता उषसः चित्प्रभातस्य प्रादुर्भावात्परमेव देवानां ऋतविभवभूतानां प्रादुर्भावो यजमाने ऋषौ। अदितेः अनीकम् अखण्डचिद्रूपिणी सर्वदेवमाता अदितिः तस्याः मुखं भवत्युषाः, उषसा द्वारैव अदितेर्दर्शनं भवति। यज्ञस्य केतुः यजनस्य केतयित्री, यजनमार्गस्य ज्ञापयित्री, बृहती बृहच्छब्दवाच्य-ऋतसंबन्धिनी महती सती विभाहि प्रकाशस्व। अपि च प्रशस्तिकृत् अस्मद्विषये प्रशंसनं कुर्वती, वृषा सती नः अस्मदीयाय ब्रह्मणे मन्त्राय व्युच्छ व्युष्टा भव। विश्ववारे विश्वैर्वरणीये उषः, नः अस्मान् जने दैव्यजनमध्ये आजनय प्रादुर्भावय॥

विंशीमृचमाह—

यच्चित्रमप्न उषसो वहन्तीजानाय शशमानाय भद्रम्।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः॥२०॥

यत् चित्रम् अप्नः उषसः वहन्ति ईजानाय शशमानाय भद्रम् तत् नः मित्रः वरुणः ममहन्ताम् अदितिः सिन्धुः पृथिवी उत द्यौः॥

चित्रम् अद्भुतं यत् अप्नः यत् कर्म, क्रियासामर्थ्यं उषसः वहन्ति आनयन्ति, तत् ईजानाय इष्टवते यजमानाय शशमानाय संभजमानाय भद्रम् ऋतप्राप्तिरूपं कल्याणं भवति। यदेवमस्माभिः

सूक्तेन प्रार्थितं तन्मित्रादयः षट् देवताः ममहन्तां मानितं कुर्वन्तु ॥ ईजानाय–यजतेः छन्दसि लिट्, लिटः कानच्, वचिस्वपीत्यादिना संप्रसारणम्। शशमानाय–शश प्लुतगतौ, ताच्छीलिकश्चानश् ॥

इति प्रथमस्याष्टमे चतुर्थो वर्गः

'इमा रुद्राये'त्येकादशर्चं नवमं सूक्तम्, कुत्सस्यार्षं दशम्येकादश्यौ त्रिष्टुभौ शिष्टा जगत्यो नव। रुद्रो देवता ॥

तत्र प्रथमामृचमाह—

इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्र भरामहे मतीः।
यथा शमसद् द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम् ॥१॥

इमाः रुद्राय तवसे कपर्दिने क्षयत्ऽवीराय प्र भरामहे मतीः यथा शम् असत् द्विऽपदे चतुःऽपदे विश्वम् पुष्टम् ग्रामे अस्मिन् अनातुरम् ॥

रुद्राय मध्यमस्थानाय मरुतां पित्रे देवाय, अस्य स्वरूपं प्राग्विचारितम् (पृ. ४१७-४२०, ४३ सू.)। इमाः मतीः प्रकृताः मननीयाः स्तुतीः प्रभरामहे प्रकर्षेण निष्पादयामः। कीदृशाय? तवसे बलेन प्रवृद्धाय कपर्दिने जटिलाय, कपर्दश्चूडा तद्वते, प्रचण्डकर्मणो मरुद्गणस्य पितुरुग्ररूपत्वद्योतनायेदं विशेषणम्। क्षयद्वीराय क्षयन्तो नश्यन्तो वीराः शत्रवो यस्मिन् तस्मै। यथा येन प्रकारेण द्विपदे इह परत्र च स्थानयुक्ताय मनुष्याय चतुष्पदे भूरादिव्याहृतिचतुष्टयस्थानयुक्ताय यजमानाय च शम् शमसुखं असत् भवेत् तथा स्तुतीः कुर्मः। बाह्यार्थस्तु "द्विपदे मनुष्याय, चतुष्पदे गवाश्वादये" इति। अपि च अस्मिन् ग्रामे अस्मदीये संघे विश्वम् समस्तं भूतजातं पुष्टम् पोषयुक्तं अनातुरम् रोगरहितं भवतु ॥ असत्–लेट्यडागमः ॥

द्वितीयामृचमाह—

मृळा नो रुद्रोत नो मयस्कृधि क्षयद्वीराय नमसा विधेम ते।
यच्छं च योश्च मनुरायेजे पिता तदश्याम तव रुद्र प्रणीतिषु ॥२॥

मृळ नः रुद्र उत नः मयः कृधि क्षयत्ऽवीराय नमसा विधेम ते यत् शम् च योः च मनुः आऽयेजे पिता तत् अश्याम तव रुद्र प्रऽनीतिषु ॥

हे रुद्र, नः अस्मान् मृळ सुखय, उत अपि च नः अस्माकं मयः आत्यन्तिकं सुखं

आनन्दशब्दवाच्यं कृधि कुरु । क्षयद्वीराय विनश्यच्छत्रुवीराय ते तुभ्यं नमसा सर्वार्पणलक्षणेन नमस्कारेण विधेम परिचर्यां कुर्याम । अपि च पिता मनुः मनुष्याणां अस्माकमाद्यः उत्पादकः शम् च इष्टप्राप्तिरूपं शमं च योश्च अनिष्टस्य यावनं पृथक्करणं निवारणं च इति यत् यस्मै द्वयाय आयेजे समन्तात् यजनं कृतवान् । तत् द्वयं, हे रुद्र, तव प्रणीतिषु प्रकर्षेण नयनेषु सत्सु वयम् अश्याम प्राप्नुयाम ॥

तृतीयामृचमाह—

अश्याम ते सुमतिं देवयज्यया क्षयद्वीरस्य तव रुद्र मीढ्वः ।
सुम्नायन्निद्विशो अस्माकमा चरारिष्टवीरा जुहवाम ते हविः ॥३॥

अश्याम ते सुऽमतिम् देवऽयज्यया क्षयत्ऽवीरस्य तव रुद्र मीढ्वः सुम्नऽयन् इत् विशः अस्माकम् आ चर अरिष्टऽवीराः जुहवाम ते हविः ॥

हे मीढ्वः, सेक्तः, अभीष्टानां वर्षक, रुद्र, क्षयद्वीरस्य विनश्यत्प्रतिपक्षवीरस्य तव त्वदीयां सुमतिम् शोभनां अनुग्रहात्मिकां बुद्धिं ते तव संबन्धिनो वयं देवयज्यया देवयजनेन साधनेन अश्याम व्याप्नुयाम । त्वं च अस्माकम् विशः प्रजाः अभिलक्ष्य सुम्नायन्नित् सुखमिच्छन्नेव आचर अनुतिष्ठ । ततो वयमपि अरिष्टवीराः अरिष्टाः अहिंसिताः वीराः येषां ते, तथाभूताः सन्तः ते तुभ्यं हविः जुहवाम हवनं कुर्याम, अर्पयामार्पणीयम् ॥ देवयज्यया-छन्दसि यजेर्निष्टकर्येत्यादौ यप्रत्ययो निपातितः, स्त्रीलिङ्गता च । मीढ्वः-मिह सेचने । सुम्नायन्-सुम्नं परेषामिच्छति, छन्दसि परेच्छायामपि क्यच् ॥

चतुर्थीमृचमाह—

त्वेषं वयं रुद्रं यज्ञसाधं वङ्कुं कविमवसे नि ह्वयामहे ।
आरे अस्मद्दैव्यं हेळो अस्यतु सुमतिमिद्वयमस्या वृणीमहे ॥४॥

त्वेषम् वयम् रुद्रम् यज्ञऽसाधम् वङ्कुम् कविम् अवसे नि ह्वयामहे आरे अस्मत् दैव्यम् हेळः अस्यतु सुऽमतिम् इत् वयम् अस्य आ वृणीमहे ॥

त्वेषम् दीप्तं यज्ञसाधम् यजनस्य साधयितारं वङ्कुम् कुटिलगतिकं, कुटिले राक्षसादौ मर्दयितव्ये कुटिलगमनमुपायो भवति । कविम् द्रष्टारं युक्तायुक्तकर्मणां, ईदृशं रुद्रम् महादेवं अवसे रक्षणाय वयम् निह्वयामहे नितरामाह्वयामः । सः दैव्यम् देवानां संबन्धिनं हेळः क्रोधं

अनादरं वा अस्मत् अस्मत्तः आरे दूरे अस्यतु क्षिपतु। अस्य रुद्रस्य सुमतिमित् अनुग्रहात्मिकां शोभनां बुद्धिमेव वयम् आ वृणीमहे आभिमुख्येन संभजामहे॥ यज्ञसाधम्-यज्ञं साधयतीति यज्ञसात्, तम्। वङ्कुम्-वकि कौटिल्ये, उणादिः उप्रत्ययः। वृणीमहे-वृङ् संभक्तौ, क्रैयादिकः॥

पञ्चमीमृचमाह—

दिवो वराहमरुषं कपर्दिनं त्वेषं रूपं नमसा नि ह्वयामहे।
हस्ते बिभ्रद्भेषजा वार्याणि शर्म वर्म छर्दिरस्मभ्यं यंसत् ॥५॥

दिवः वराहम् अरुषम् कपर्दिनम् त्वेषम् रूपम् नमसा नि ह्वयामहे हस्ते बिभ्रत् भेषजा वार्याणि शर्म वर्म छर्दिः अस्मभ्यम् यंसत् ॥

वराहम् वरं श्रेष्ठं अहः दिनं यस्य सः उत्कृष्टप्रकाशोपेतः तं अरुषम् आरोचमानं कपर्दिनम् जटिलं त्वेषम् दीप्तं रूपम् पूर्वोक्तविशेषणविशिष्टरूपयुक्तं रुद्रं नमसा नमस्कारेण दिवः दिवः सकाशात् निह्वयामहे नितरामाह्वयामः। सः हस्ते स्वकीये हस्ते वार्याणि वरणीयानि लोकोत्तराणि भेषजा भैषज्यानि बिभ्रत् धारयमाणः अस्मभ्यम् प्रपन्नेभ्यः शर्म सुखं आरोग्यात्मकं वर्म कवचं अनिष्टनिवारकं छर्दिः गृहं वासयोग्यं यंसत् यच्छतु॥ भेषजा-भिषज चिकित्सायां, कण्ड्वादिः, पचाद्यच्, शेलोपः। यंसत्-यम उपरमे, लेट्यडागमः, सिप् बहुलमिति सिप्॥

इति प्रथमस्याष्टमे पञ्चमो वर्गः

षष्ठीमृचमाह—

इदं पित्रे मरुतामुच्यते वचः स्वादोः स्वादीयो रुद्राय वर्धनम्।
रास्वा च नो अमृत मर्तभोजनं त्मने तोकाय तनयाय मृळ ॥६॥

इदम् पित्रे मरुताम् उच्यते वचः स्वादोः स्वादीयः रुद्राय वर्धनम् रास्व च नः अमृत मर्तऽभोजनम् त्मने तोकाय तनयाय मृळ ॥

मरुताम् गणभूतानां मध्यमस्थानानां देवानां पित्रे पालकाय जनकाय रुद्राय महते देवाय स्वादोः स्वादीयः रसवतोऽपि रसवत्तरं हर्षजनकं वर्धनम् स्तुत्यस्य पोषकं, स्तुत्या वर्धते हि देवता स्तोतरि यजमाने, एवंभूतं इदम् स्तोत्रात्मकं वचः वचनं उच्यते उच्चार्यते। हे अमृत मरणरहित रुद्रदेव, मर्तभोजनम् मर्तानां मनुष्याणां भोजनं यावत् भोगयोग्यं दिव्यममृतमन्नं भवति तावत् नः अस्मभ्यं रास्व देहि, अमृतेति संबोधनस्य प्रयोजनमवधेयं मर्तभोजनप्रार्थनायाम्, नेदं

शाल्यादिधान्यनिष्पादितमन्नम् । च अपि च त्मने आत्मने मह्यं तोकाय पुत्राय तनयाय तत्सन्तानाय च मृळ सुखं प्रयच्छ ॥ रास्व–रा दाने, व्यत्ययेनात्मनेपदम् ॥

सप्तमीमृचमाह—

मा नो॑ महान्तमुत मा नो॑ अर्भकं मा न॒ उक्षन्तमुत मा न॑ उक्षितम् ।
मा नो॑ वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो॑ रुद्र रीरिषः ॥७॥
मा नः महान्तम् उत मा नः अर्भकम् मा नः उक्षन्तम् उत मा नः उक्षितम्
मा नः वधीः पितरम् मा उत मातरम् मा नः प्रियाः तन्वः रुद्र रिरिषः ॥

मध्यमस्थानाद्रक्षःप्रभृतिभ्यः पीडा भवति मर्त्यानाम् । तत्र प्रभुर्देवो रुद्रः उग्रेण कर्मणा पीडानिवृत्तिं करोति । तादृशे उग्रकर्मणि मर्त्यानामल्पबलानां दुःखवेदना जायते, तदिदं अत्र मा हिंसीरिति प्रार्थनातात्पर्यम् । हे रुद्र, नः अस्माकं मध्ये महान्तम् वृद्धं मा वधीः मा हिंसीः । उत अपि च नः अस्माकं अर्भकम् बालं मा मा हिंसीः । तथा नः अस्माकं मध्ये उक्षन्तम् सेक्तारं युवानं मा मा हिंसीः । उत अपि च नः अस्माकं मध्ये उक्षितम् सिक्तं, स्त्रीषु निषिक्तमपत्यं मा मा हिंसीः । नः अस्माकं पितरम् जनकं मा मा हिंसीः । उत अपि च मातरम् मा मा हिंसीः । नः अस्माकं प्रियाः तन्वः स्नेहविषयभूताः तनूषु भवाः प्रजाः मा रीरिषः मा हिंसीः ॥ वधीः–हन्तेर्लुङि वधादेशः । रीरिषः–रिष हिंसायां, ण्यन्ताल्लुङ् ॥

अष्टमीमृचमाह—

मा नस्तो॒के तन॑ये मा न॑ आयौ॒ मा नो॒ गोषु॒ मा नो॒ अश्वे॑षु रीरिषः ।
वी॒रान्मा नो॑ रुद्र भामि॒तो व॑धीर्हविष्म॒न्तः सद॒मित्त्वा॑ हवामहे ॥८॥
मा नः तो॒के तन॑ये मा नः आयौ॒ मा नः गोषु॒ मा नः अश्वे॑षु रिरिषः
वी॒रान् मा नः रु॒द्र॒ भा॒मि॒तः व॒धीः ह॒विष्म॑न्तः सद॑म् इ॒त् त्वा ह॒वा॒म॒हे ॥

हे रुद्र, नः अस्माकं तोके तनये तोकादिविषये मा रीरिषः मा हिंसीः । तोकः पुत्रः, तनयस्तत्पुत्रः, नः आयौ आयुः मनुष्यः तद्विषये मा रीरिषः, नः गोषु विषये मा रीरिषः, नः अश्वेषु विषये मा रीरिषः । तथा हे रुद्र, नः वीरान् अस्मदीयान् विक्रान्तान् भामितः क्रुद्धः सन् मा वधीः । वयं च सदमित् सर्वदैव हविष्मन्तः हविर्भिर्युक्ताः सन्तः त्वा त्वां हवामहे आह्वयामः ॥ भामितः–भाम क्रोधे, अधिकरणे कर्तरि क्तः ॥

नवमीमृचमाह—

उप॑ ते॒ स्तोमा॑न्पशुपा इवाकरं॒ रास्वा॑ पितर्मरुतां सु॒म्नम॒स्मे।
भ॒द्रा हि ते॑ सुम॒तिर्मृ॑ळयत्त॒माथा॑ व॒यमव॒ इत्ते॑ वृणीमहे ॥९॥

उप॑ ते॒ स्तोमा॑न् प॒शुपा॑ऽइव आ अ॒क॒र॒म् रास्व॑ पि॒तः॒ म॒रु॒ता॒म् सु॒म्नम् अ॒स्मे इति॑ भ॒द्रा हि ते॒ सु॒ऽम॒तिः॒ मृ॒ळ॒य॒त्ऽत॒मा अथ॑ व॒यम् अवः॑ इत् ते॒ वृ॒णी॒म॒हे॒ ॥

हे रुद्र, ते तुभ्यं स्तोमान् स्तोत्ररूपान् उपाकरम् समर्पयामि। तत्र दृष्टान्तः—पशुपाः इव यथा गोपः स्वस्मै गोस्वामिना प्रातः समर्पितान् पशून् सायं प्रत्यर्पयति, तद्वत्। दैवबलाद्दैवानुग्रहाच्च सर्वथा दैवादेवागताः इमे स्तोमाः दैवायैव प्रत्यर्पिता भवन्ति। हे मरुताम् पितः, रुद्र, अस्मे अस्मभ्यं सुम्नम् सुखं रास्व देहि। ते त्वदीया सुमतिः शोभना बुद्धिः मृळयत्तमा अतिशयेन सुखयितृतमा। हि यस्मादेवं तस्मात् भद्रा कल्याणी, भजनीया वा। अथ अनन्तरं वयम् ते अवः इत् त्वदीयं रक्षणमेव वृणीमहे संभजामहे ॥ अकरम्—वर्तमाने लङ्, छान्दसम् ॥

दशमीमृचमाह—

आरे॑ ते॒ गोघ्न॑मुत पूरुष॒घ्नं क्षय॑द्वीर सु॒म्नम॒स्मे ते॑ अस्तु।
मृ॒ळा च॑ नो॒ अधि॑ च ब्रूहि दे॒वाधा॑ च नः॒ शर्म॑ यच्छ द्वि॒बर्ह॑ाः ॥ १०॥

आरे॑ ते॒ गो॒ऽघ्न॒म् उ॒त पु॒रु॒ष॒ऽघ्न॒म् क्षय॑त्ऽवीर सु॒म्नम् अ॒स्मे इति॑ ते॒ अ॒स्तु॒ मृ॒ळ॒ च॒ नः॒ अधि॑ च॒ ब्रू॒हि॒ दे॒व॒ अध॑ च॒ नः॒ शर्म॑ य॒च्छ॒ द्वि॒ऽब॒र्ह॒ाः ॥

हे क्षयद्वीर, विनश्यच्छत्रुवीरजन, ते त्वदीयं गोघ्नम् गोहननं उत पुरुषघ्नम् पुरुषहननं, हननसाधनं वा तदुभयं आरे अस्मत्तो दूरे भवतु। अपक्वस्य पुरुषस्य शीघ्रपरिपाकविधाने रुद्रेण कशाभिघातादयः प्रागुक्ताः (पु० ४१९), रुद्रस्य उग्रकर्मणा धनभूतानां ज्ञानरश्मिभूतानां वा गवां, तद्वतां पुरुषाणां च क्षयः पीडा वा भवत्येव। तन्मास्तु इति प्रार्थ्यते। अस्मे अस्मभ्यं ते सुम्नम् त्वदीयं सुखं अस्तु भवतु। च अपि च हे देव, रुद्र, नः अस्मान् मृळ मृडय, सुखय। अपि च नः अस्मान् अधिब्रूहि च अधिवचनं पक्षपातेन वचनं ब्रूयाः। अध च अथापि द्विबर्हाः द्वयोः स्थानयोः इह मानुषे उत्तरत्र दैव्ये च स्थाने अस्मदर्थं वर्धितः सन् नः अस्मभ्यं शर्म शरणसुखं यच्छ देहि॥ गोघ्नम्—हन हिंसागत्योः, घञर्थे भावे करणे वा कविधानम्। द्विबर्हाः—द्वयोः स्थानयोः बर्हते प्रवर्धते इति द्विबर्हाः, असुन् ॥

एकादशीमृचमाह—

अवोचाम नमो अस्मा अवस्यवः शृणोतु नो हवं रुद्रो मरुत्वान्।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः॥११॥
अवोचाम नमः अस्मै अवस्यवः शृणोतु नः हवम् रुद्रः मरुत्वान् तत्
नः मित्रः वरुणः ममहन्ताम् अदितिः सिन्धुः पृथिवी उत द्यौः॥

अस्मै रुद्राय अवस्यवः रक्षणमिच्छन्तः वयं नमः नमस्कारोपलक्षणं सूक्तरूपं स्तोत्रं अवोचाम अवादिष्म। मरुत्वान् मरुद्भिर्युक्तः सः रुद्रः नः अस्मदीयं हवम् आह्वानं शृणोतु आकर्ण्याङ्गीकरोतु। यदस्माभिरुक्तं तत्सर्वं मित्रादयः षड्देवताः पूजयन्तु॥ अवस्यवः—अव रक्षणे, भावे असुन्, सुप आत्मनः क्यच्, क्याच्छन्दसि उप्रत्ययः॥

इति प्रथमस्याष्टमे षष्ठो वर्गः

'चित्रमि'ति षड्चं सूक्तं कुत्सस्यार्षं त्रैष्टुभं सूर्यदेवताकम्॥

तत्र प्रथमामृचमाह—

चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः।
आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च॥१॥
चित्रम् देवानाम् उत् अगात् अनीकम् चक्षुः मित्रस्य वरुणस्य अग्नेः
आ अप्राः द्यावापृथिवी इति अन्तरिक्षम् सूर्यः आत्मा जगतः तस्थुषः च॥

यद्यपि सूक्तमिदं बाह्यसूर्यपरं आपाततो लक्ष्यते, तथापि ऋतज्योतिरात्मनः परमात्मनो दर्शने ऋषेर्वागियं प्रवर्तत इत्यसंशयम्। "यत्र नरो युगानि वितन्वते" इति द्वितीयस्यामुक्तिः स्थूलपक्षे न घटते। कथं बहुयुगयागवितननं उपपद्यते मुहूर्तमात्रे उषसि? बाह्यसूर्येऽपि यथोपपत्तिः स्यात् तथा ऋचामत्र व्यवस्थितिः। सर्वेश्वरप्रतिनिधिर्हि सूर्यः स्थूले जगति, अत एव स ऋतस्य परमस्य ज्योतिषः सङ्केतः॥ देवानाम् ज्योतिर्मयदेहानां परमात्मनोंऽशभूतानां चित्रम् अद्भुतं अनीकम् मुखं सर्वतेजःपुञ्जं वा उदगात् उदितमभूत्। कीदृशम्? मित्रस्य वरुणस्य अग्नेः एतेषां देवानां चक्षुः चक्षणं, दर्शनं प्रकाशनमित्यर्थः। तादृशं चित्रं ज्योतिः उदितं सत् द्यावापृथिवी दिवं च पृथिवीं च, अन्तरे ऊर्ध्वां चितिं अधरां चितिं च, आप्राः समन्तादपूरयत् स्वतेजसा। तथा अन्तरिक्षम् मध्यमस्थानं च "आप्राः" तच्चित्रं सूर्यः। सूर्यः

सर्वस्य प्रेरकः सर्वेश्वरः जगतः जङ्गमस्य तस्थुषः च स्थावरस्य च आत्मा स्वरूपम्, परमात्मन एव चराचरात्मकविश्वरूपत्वात् ॥ आप्राः-प्रा पूरणे, लङि पुरुषव्यत्ययः । जगतः-गमेर्ढे चेति क्विप्, द्विर्वचनम् । तस्थुषः-तिष्ठतेर्लिटः क्वसुः ॥

द्वितीयामृचमाह—

सूर्यो देवीमुषसं रोचमानां मर्यो न योषामभ्येति पश्चात् ।
यत्रा नरो देवयन्तो युगानि वितन्वते प्रति भद्राय भद्रम् ॥२॥
सूर्यः देवीम् उषसम् रोचमानाम् मर्यः न योषाम् अभि एति पश्चात्
यत्र नरः देवऽयन्तः युगानि विऽतन्वते प्रति भद्राय भद्रम् ॥

सूर्यः उत्तमज्योतिरात्मा देवः देवीम् दिव्यां रोचमानाम् दीप्यमानां उषसम्, पश्चात् अभ्येति उषसः प्रादुर्भावात्परं तामभिलक्ष्य गच्छति । तत्र दृष्टान्तः-मर्यो न योषाम् यथा मनुष्यः शोभनाङ्गीं स्त्रियमनुगच्छति तद्वत् । उषसः चिन्मयत्वात् चित्प्रभातात्परं ऋतज्योतिर्दर्शनमवश्यम्भावीति विवक्षा । यत्र यस्मिन् चित्प्रभाते सति देवयन्तः देवं परं ज्योतिरिच्छन्तः, देवकामाः नरः नेतारो यजमानाः युगानि युगं कालवाचि, कालाध्वनोरत्यन्तसंयोगे द्वितीया, बहूनि नियतानि कालमानानि भद्राय निःश्रेयसाय भद्रम् प्रति कल्याणतमं ऋतं बृहत् उद्दिश्य वितन्वते विस्तारयन्ति यजनम्, यज्ञस्य तन्तुरूपवर्णनाद्वेदेषु ॥

तृतीयामृचमाह—

भद्रा अश्वा हरितः सूर्यस्य चित्रा एतग्वा अनुमाद्यासः ।
नमस्यन्तो दिव आ पृष्ठमस्थुः परि द्यावापृथिवी यन्ति सद्यः ॥३॥
भद्राः अश्वाः हरितः सूर्यस्य चित्राः एतऽग्वाः अनुऽमाद्यासः नमस्यन्तः
दिवः आ पृष्ठम् अस्थुः परि द्यावापृथिवी इति यन्ति सद्यः ॥

यद्यप्यश्वाः प्राणबलोपलक्षणाः क्रियापरा एव भवन्ति, तथापि सूर्यस्य अश्वाः रश्मयः चिन्मयाः सन्तः क्रियादक्षाः क्रियानिष्पादका इति ज्ञेयम् । अत एव सूर्यतुरगविशेषणानि अत्र तद्गुणक्रियाबोधकानि भवन्ति । भद्राः कल्याणाः अश्वाः व्यापनशीलाः तुरगाः हरितः कान्तिमन्तः (हर्यतेः कान्तिकर्मणः) चित्राः नानावर्णाः, अनन्तगुणोपलक्षणम्, एवंभूताः सूर्यस्य सर्वप्रेरकस्योत्तमज्योतिषः एतग्वाः एतं एतव्यं प्रति ग्वाः गन्तारः अनुमाद्यासः अनुक्रमेण

मादनीयाः स्तुत्याः नमस्यन्तः स्वामिनं स्वाश्रयभूतं सूर्यं पूजयन्तः दिवः द्युलोकस्य पृष्ठम् उपरिप्रदेशं आ अस्थुः आस्थिताः। आस्थाय च द्यावापृथिवी द्यावापृथिव्यौ सद्यः तदानीमेव परियन्ति परितो गच्छन्ति व्याप्नुवन्ति। सूर्याश्वानां द्युलोकादुपरि दर्शनमात्रेण तेषां सर्वव्यापिगुणः प्रकाशो भवति॥ यद्ययं बाह्यः सूर्यः, अश्वाः प्रथमं पूर्वस्यां दिशि दृश्येरन्, न तु 'दिवः पृष्ठे'॥ अनुमाद्यासः—मदि स्तुतौ, अस्माण्ण्यन्तादचो यत्॥

चतुर्थीमृचमाह—

तत्सूर्यस्य देवत्वं तन्महित्वं मध्या कर्तोर्वितंतं सं जभार।
यदेदयुक्त हरितः सधस्थादाद्रात्री वासस्तनुते सिमस्मै॥४॥

तत् सूर्यस्य देवऽत्वम् तत् महिऽत्वम् मध्या कर्तोः विऽततम् सम् जभार
यदा इत् अयुक्त हरितः सधऽस्थात् आत् रात्री वासः तनुते सिमस्मै॥

सूर्यस्य सर्वप्रेरकस्य सवितुः तत् देवत्वम् तदीश्वरत्वं, स्वातन्त्र्यद्योतकमिदं तन्महित्वम् तन्महत्त्वं यत् कर्तोः मध्या कर्मणः मध्ये विततम् स्वकीयं विस्तृतं किरणजालं सञ्जभार उपसंहरति। यथा चित्प्रभातानि बहूनि भवन्ति ऋतज्योतिर्दर्शनात्पूर्वं तथा ऋतज्योतिरपि बहुशः प्रादुर्भूय यजमानं परिपक्वमन्तेऽनुगृह्णातीति वैदिकयोगरहस्यम्। अत एव स सूर्यः स्वतन्त्रः स्वस्य योगिनो वा कर्मणः परिसमाप्तेः पूर्वं, कर्तव्यस्य मध्ये स्वीयं चिद्रश्मिसमूहं उपसंहृत्य पुनश्च योगिनोऽन्तर्याजिनः परिपाकाय कञ्चन कालं अनुपालयति। यदेत् यस्मिन्नेव काले हरितः कान्तिमतो रश्मीनश्वान् सधस्थात् तेषां सहस्थानात् रंहणशीलाद्रथात् आदाय अयुक्त स्वस्मिन्नेव संयुक्तानकरोत्, आत् अनन्तरमेव रात्री सत्यसूर्यप्रकाशाभावरूपा साधारणी लौकिकी मानुषप्रज्ञा सिमस्मै सर्वस्मिन् जगति, सप्तम्यर्थे चतुर्थी, वासः आच्छादयितृतमः सत्यावरणमन्धकारं तनुते विस्तारयति॥ मध्या—मध्यशब्दात् सप्तम्येकवचनस्य डादेशः। कर्तोः—करोतेरौणादिकस्तोसुन्प्रत्ययः। अन्ये गताः॥

पञ्चमीमृचमाह—

तन्मित्रस्य वरुणस्याभिचक्षे सूर्यो रूपं कृणुते द्योरुपस्थे।
अनन्तमन्यद्रुशदस्य पाजः कृष्णमन्यद्धरितः सं भरन्ति॥५॥

तत् मित्रस्य वरुणस्य अभिऽचक्षे सूर्यः रूपम् कृणुते द्योः उपऽस्थे

अनन्तम् अन्यत् रुशत् अस्य पाजः कृष्णम् अन्यत् हरितः सं भरन्ति ॥

तत् तदानीं ऋतप्रादुर्भावे मित्रस्य प्रीतिसौहार्दप्रधानस्य आदित्यस्य ऋतवैभवशालिनः तथा वरुणस्य सर्वपाशविमोचनस्य विभोरादित्यस्य ऋतमूर्तेश्च अभिचक्षे आभिमुख्येन द्योस्थस्थे स्वर्लोकस्योपस्थाने समीप इत्यर्थः, सूर्यः सर्वस्य प्रेरको भगवान् सविता रूपम् कृणुते स्वरूपप्रकाशकं तेजः करोति। अपि च अस्य सूर्यस्य हरितः कान्ताश्चिन्मयाश्वाः अनन्तम् अवसानरहितं रुशत् दीप्यमानं पाजः बलं अन्यत् तमसोऽन्यत् तमोनिवारकं श्वेतवर्णं अहोलक्षणं सत्यप्रकाशमित्यर्थः, संभरन्ति निष्पादयन्ति, तथा अन्यत् श्वेतवर्णादितरत् कृष्णम् कृष्णवर्णं सत्याप्रकाशरूपं नैशं तमश्च संभरन्ति, प्रकाशाप्रकाशदशयोरुभयोः निर्वाहः सूर्यस्य हरितां सिद्धः ॥ अभिचक्षे—संपदादिलक्षणो भावे क्विप् ॥

षष्ठीमृचमाह—

अद्या देवा उदिता सूर्यस्य निरंहसः पिपृता निरवद्यात् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥६॥

अद्य देवाः उत्ऽइता सूर्यस्य निः अंहसः पिपृत निः अवद्यात् तत् नः मित्रः वरुणः ममहन्ताम् अदितिः सिन्धुः पृथिवी उत द्यौः ॥

हे देवाः द्योतमाना ऋतरश्मयः, अद्य इदानीं सूर्यस्य उदिता उदितौ, उदये, ऋतप्रादुर्भावे सति अस्मान् अवद्यात् निन्द्यात् कर्मणः निः पिपृत निष्कृष्य रक्षत, तथा अंहसः पापात् निः पिपृत निष्कृष्य पालयत। यदिदमस्माभिरुक्तं सूक्ते तन्मित्रादयः षड्देवताः पूजयन्तु ॥ पिपृत—पॄ पालनपूरणयोः ॥

इति प्रथमस्याष्टमे सप्तमो वर्गः
प्रथमे मण्डले षोडशोऽनुवाकः समाप्तः

सप्तदशेऽनुवाके पञ्च सूक्तानि, तत्र 'नासत्याभ्यामि'ति पञ्चविंशत्यृचं प्रथमं सूक्तं, दीर्घतमसः पुत्रः कक्षीवानृषिः, त्रिष्टुप् छन्दः, अश्विनौ देवते ॥

तत्र प्रथमामृचमाह—

नासत्याभ्यां बर्हिरिव प्र वृञ्जे स्तोमाँ इयर्म्यभ्रियेव वातः ।
यावभैगाय विमदाय जायां सेनाजुवा न्यूहतू रथेन ॥१॥

नासत्याभ्याम् बर्हिःऽइव प्र वृञ्जे स्तोमान् इयर्मि अभ्रियाऽइव वातः

यौ अर्भगाय विऽमदाय जायाम् सेनाऽजुवा निऽऊहतुः रथेन ॥

नासत्याभ्याम् अश्विभ्यां स्तोमान् स्तुतीः इयर्मि प्रेरयामि, संपादयामि । तत्र दृष्टान्तः- बर्हिरिव प्रवृञ्जे यथा अग्निकार्ये कश्चित् दर्भं प्रकर्षेण वृङ्क्ते, अन्यूनातिरिक्तं छिनत्ति, संपादयति तद्वत् । यथा च अभ्रियाऽइव वातः वायुः अभ्रेष्ववस्थिताः अपः वर्षणार्थं प्रेरयति तथाऽहं अश्विभ्यां स्तोमानियर्मि । कीदृशावश्विनौ? यौ अश्विनौ अर्भगाय अर्भकाय (छान्दसो गकारः) बालाय विमदाय ऋषये एतन्नाम्ने, विशिष्टमोदाय जायाम् भार्यां सेनाजुवा सेनायाः प्रेरकेण रथेन न्यूहतुः प्रापयामासतुः । अस्मिन् सूक्ते यानि अश्विनोः कर्माणि कथ्यन्ते तानि प्रायशः कौत्से सूक्ते (सू. ११२) च कथितानि । यदुक्तं तत्र रहस्यार्थस्य न क्षतिरैतिहासिकत्वाभ्युपगमे इति तदिहोत्तरत्रापि अवधातव्यम् । तस्मात् कथाः तदन्तरर्था वा नेहोपन्यस्यन्ते । विस्तरभयात्पदार्थमात्रदानेन, प्राग्बहुषु स्थलेषु कृतस्य विवरणस्य बलात् यथासंभवं धात्वर्थानुगमेन च रहस्यमुन्नेयं धीमद्भिः ॥ नासत्याभ्याम्-माधुच्छन्दसे सूक्ते पदार्थो विचारितः । प्रवृञ्जे-प्रवृङ्क्ते, तलोपः । इयर्मि-ऋ गतौ । सेनाजुवा-जु इति सौत्रो धातुः गत्यर्थः, अस्मादन्तर्भावितण्यर्थात् क्विप् । न्यूहतुः-वह प्रापणे ॥

द्वितीयामृचमाह—

वीळुपत्मभिराशुहेमभिर्वा देवानां वा जूतिभिः शाशदाना ।
तद्रासभो नासत्या सहस्रमाजा यमस्य प्रधने जिगाय ॥२॥

वीळुपत्मऽभिः आशुहेमऽभिः वा देवानाम् वा जूतिऽभिः शाशदाना तत् रासभः नासत्या सहस्रम् आजा यमस्य प्रऽधने जिगाय ॥

वीळुपत्मभिः बलवद्भिरुत्पतनैः आशुहेमभिः शीघ्रगतिकैः वा समुच्चये एवंभूतैरश्वैः हे नासत्या देवानाम् जूतिभिर्वा इन्द्रादीनां प्रेरणाभिश्च शाशदाना शाशद्यमानयोः अत्यर्थं प्रेर्यमाणयोः युवयोः रासभः वाहनभूतः, सहनेन प्रख्यातः, शीघ्रगमनश्च, यमस्य सर्वस्य नियन्तुः विवस्वत्पुत्रस्य, त्रैलोक्यनियामकस्य प्रधने जेतव्यप्रकृष्टधनयुक्ते आजा आजौ संग्रामे तत् सहस्रम् अधिकं धनं जिगाय जित्वा अलभत ॥ अत्र अश्विवाहनस्य पराक्रमो वर्णितः । युद्धं तु ब्रह्माण्डे पिण्डाण्डे च असुरैः सह वर्तत एव । तत्र सर्वदेवाश्वप्रेरितयोरश्विनोः असुरविजये युद्धे स्वस्थतापादनादिकर्मणि वर्तमानेऽपि, तयोर्वाहनस्य सहिष्णुताप्रथितस्य शीघ्रगमनस्य प्रभावेण तत्र तत्र शत्रुषु गमनात् प्राप्तव्यस्य दिव्यधनस्य लाभः ॥ शाशदाना-शदॢ शातने, अत्र गत्यर्थः,

अस्माद्यङन्ताल्लुटः शानच्, श्यन्भावश्छन्दसि, तथा यलोपः षष्ठ्याः पूर्वसवर्णदीर्घश्च ॥

तृतीयामृचमाह—

तुग्रो ह भुज्युमश्विनोदमेघे रयिं न कश्चिन्ममृवाँ अवाहाः।
तमूहथुर्नौभिरात्मन्वतीभिरन्तरिक्षप्रुद्भिरपोदकाभिः ॥३॥

तुग्रः ह भुज्युम् अश्विना उदऽमेघे रयिम् न कः चित् ममृऽवान् अव अहाः
तम् ऊहथुः नौभिः आत्मन्ऽवतीभिः अन्तरिक्षप्रुत्ऽभिः अपऽउदकाभिः ॥

प्रसिद्धामाख्यायिकामुदाहरन्ति पूर्वे। परं तु नौभिरित्यस्य त्रीणि विशेषणानि चरमपादे पठितानि सर्वाऽपि कथा गौणी, लाक्षणिकीति द्योतयेयुः। तथा उत्तरत्र त्रीण्यहानि तिस्रो रात्रयश्च गूढमर्थं व्यञ्जयन्ति ॥ ह प्रसिद्धौ, तुग्रः शत्रुभिः हिंसितोऽपि बलाढ्यः (तोजयतिः हिंसाबलादानादिषु) अन्नमयप्रधानः पुरुषः भुज्युम् भोगसमर्थं प्राणमयप्रधानं स्वीयं पुत्रभूतं पुरुषं उदमेघे उदकैर्मिह्यते सिच्यत इत्युदमेघः समुद्रः तस्मिन् अवाहाः पर्यत्याक्षीत्, तत्र दृष्टान्तः—ममृवान् म्रियमाणः कश्चित् लोभी रयिम् न धनमिव। यथा स धनं अनिच्छन्नेव जहाति तथा उक्तलक्षणं भुज्युं तुग्रः उक्तलक्षणः प्राणबलभूयिष्ठानां अपां राशौ क्षिप्तवान्। हे अश्विना, तम् तादृशं भुज्युं नौभिः तरणसाधनभूताभिः युवां ऊहथुः गन्तव्यं तीरं प्रापितवन्तौ। आश्विनकर्मसु भैषज्यं बलप्रदत्वं स्वास्थ्यविधानं शरीरादेर्दृढत्वसंपादनं, सर्वथा सुखप्रदानं च गणनीयानि। तथाविधा मन्त्रवर्णाः प्रागुदाहृताः (पृ. ११५)। कीदृशीभिर्नौभिः? आत्मन्वतीभिः अश्विनोरात्मा स्वरूपं प्रकृतिर्वा तद्युक्ताभिः, तस्मान्नेमा भौतिक्यो जडा नावः, आश्विनवैभवमेव तरणसाधननौभूतं समपद्यत। अपि च अन्तरिक्षप्रुद्भिः अन्तरिक्षे मध्यमस्थाने प्राणानां महत्यायतने गन्त्रीभिः, तस्मान्नेमाः भौमसमुद्रगामिन्यो नावः। अपोदकाभिः इमाः आश्विन्यो नावः अप्सु प्लवन्ते, न तत्र निमज्जन्ति, अत एव अपगतोदकाभिरित्यर्थकं विशेषणम् ॥ ममृवान्—मृङ् प्राणत्यागे, लिटः क्वसुः। अहाः—ओहाक् त्यागे, पुरुषव्यत्ययः, सर्वमन्यत् छान्दसम्। आत्मन्वतीभिः—आत्मनो मतुप्, मादुपधाया इति वत्वं, अनो नुडिति नुट्। अन्तरिक्षप्रुद्भिः—प्लुङ् गतौ, क्विप् ॥

चतुर्थीमृचमाह—

तिस्रः क्षपस्त्रिरहातिव्रजद्भिर्नासत्या भुज्युमूहथुः पतङ्गैः।
समुद्रस्य धन्वन्नार्द्रस्य पारे त्रिभी रथैः शतपद्भिः षळश्वैः ॥४॥

तेस्रः क्षपः त्रिः अहा अतिव्रजत्ऽभिः नासत्या भुज्युम् ऊहथुः पतङ्गैः
समुद्रस्य धन्वन् आर्द्रस्य पारे त्रिऽभिः रथैः शतपत्ऽभिः षट्ऽअश्वैः ॥

हे नासत्या, नासत्यौ, भुज्युम् पूर्वोक्तलक्षणं प्राणमयाम्बुनिधौ प्रक्षिप्तं तिस्रः क्षपः तिस्रो त्रीः, त्रैलोक्यसंबन्धिमनःप्राणशरीरापेक्षया त्रिवृत्कृताप्रकाशदशावद्योतकः रात्रिशब्दः, तथा त्रिः अहा त्रीण्यहानि, पूर्वोक्तवत् प्रकाशावस्थाद्योतनाय, एवं प्रकाशाप्रकाशदशे पर्यायेण वर्तेते दिके योगे। एवमहोरात्रत्रयं अतिव्रजद्भिः अतीत्य गच्छद्भिः पतङ्गैः पतद्भिः पक्षिभिरिव शीघ्रं च्छद्भिः रथैरिति ग्राह्यं अश्वश्रवणात् ऊहथुः ऊढवन्तौ युवाम्। क्व? समुद्रस्य धन्वन् निरुदके देशे केवलप्राणमयाम्बुधावपि अन्नमयांशस्य वर्तनात्, तत्रैव रथगमनं युक्तम्, आर्द्रस्य पारे दकेनार्द्रीभूतस्य समुद्रस्य तीरे त्रिभिः रथैः त्रिसंख्याभिप्राय उक्तः। कीदृशैः? शतपद्भिः तसंख्याकैश्चक्रलक्षणैः पादैर्युक्तैः, अपि च षडश्वैः षड्भिरश्वैर्युक्तैः। एकैकस्य रथस्य द्वावश्वौ, श्वद्वयं च प्राणबलभूयस्त्वेऽपि ज्ञानक्रियात्मकशक्तिद्वयसंकेतकं बोध्यम्॥ शतपद्भ्यः—शतं दा येषां ते, पादशब्दस्यान्त्यलोपः समासान्तः, पादः पदिति पद्भावः॥

श्वमीमृचमाह—

अनारम्भणे तदवीरयेथामनास्थाने अग्रभणे समुद्रे।
यदश्विना ऊहथुर्भुज्युमस्तं शतारित्रां नावमातस्थिवांसम् ॥५॥

अनारम्भणे तत् अवीरयेथाम् अनास्थाने अग्रभणे समुद्रे यत् अश्विनौ ऊहथुः भुज्युम् अस्तम् शतऽअरित्राम् नावम् आतस्थिऽवांसम्॥

हे अश्विनौ, अनारम्भणे आलम्बनरहिते, अत एव अनास्थाने आस्थातुं शक्येन भूप्रदेशेन हिते अग्रभणे अग्रहणे हस्तेन ग्राह्यमालम्बनार्थं शाखादिकं यत्र नास्ति तस्मिन्, एवंभूते समुद्रे उक्तपूर्वे तत् तत्कर्म अवीरयेथाम् विक्रान्तं कृतवन्तौ युवाम्। किं तत्कर्म? भुज्युम् समुद्रे क्षिप्तं शतारित्राम् बह्वरित्रोपेतां, यैः पार्श्वतो बद्धैः काष्ठैः जलालोडने सति नौः शीघ्रं गच्छति तान्यरित्राणि, तादृशीं नावम् आतस्थिवांसम् आस्थितवन्तं कृत्वा अस्तम् गृहं, गन्तव्यं स्वस्थानं ऊहथुः गापितवन्तौ युवाम् इति यत् तत् कर्मेति संबन्धः॥ अवीरयेथाम्—वीर विक्रान्तौ, चुरादिरात्मनेपदी।

इति प्रथमस्याष्टमेऽष्टमो वर्गः

षष्ठीमृचमाह—

यमश्विना ददथुः श्वेतमश्वमघाश्वाय शश्वदित्स्वस्ति ।
तद्वां दात्रं महि कीर्तेन्यं भूत्पैद्वो वाजी सदमिद्धव्यो अर्यः ॥६॥
यम् अश्विना ददथुः श्वेतम् अश्वम् अघऽअश्वाय शश्वत् इत् स्वस्ति
तत् वाम् दात्रम् महि कीर्तेन्यम् भूत् पैद्वः वाजी सदम् इत् हव्यः अर्यः ॥

हे अश्विना अश्विनौ, अघाश्वाय अहन्तव्याश्वाय ऋषये पेदुनाम्ने इत्याहुः। तर्हि पद्यते शरणं देवानिति पेदुः । यम् श्वेतम् अश्वम् यं शुद्धं सत्त्वसमृद्धं प्राणबलोपलक्षणमश्वं ददथुः युवां दत्तवन्तौ सोऽश्वः शश्वदित् सर्वदैव तस्मै अघाश्वाय पेदवे स्वस्ति मङ्गलं जयलक्षणं करोति । वाम् युवयोः तत् दात्रम् तद्दानं महि महत् कीर्तेन्यम् कीर्तनीयं भूत् अभूत् । तस्मात् पैद्वः पेदोः संबन्धी वाजी अश्वः अर्यः प्रेरयिता युद्धे शत्रूणां वा सदमित् सदैव हव्यः आह्वातव्यः ॥ दात्रम्—ददातेरौणादिकस्त्रप्रत्ययः भावे । पैद्वः—पेदोः संबन्धी, अण्, वर्णलोपश्छान्दसः ॥

सप्तमीमृचमाह—

युवं नरा स्तुवते पज्रियाय कक्षीवते अरदतं पुरन्धिम् ।
कारोतराच्छफादश्वस्य वृष्णः शतं कुम्भाँ असिञ्चतं सुरायाः ॥७॥
युवम् नरा स्तुवते पज्रियाय कक्षीवते अरदतम् पुरम्ऽधिम् कारोतरात् शफात् अश्वस्य वृष्णः शतम् कुम्भान् असिञ्चतम् सुरायाः ॥

हे नरा नेतारावश्विनौ, युवम् युवां पज्रियाय पुष्टिबलाद्यर्थे पज्रशब्दः, तदुद्भवाय, पज्राः अङ्गिरस इत्यान्नातत्वात् तद्वंशजाय स्तुवते स्तोत्रं कुर्वते कक्षीवते रहस्यज्ञानोपेताय (१.१८.१), एतन्नाम्ने ऋषये पुरन्धिम् प्रभूतां धियं अरदतम् व्यलिखतं, यथा धीः सर्वार्थगोचरा भवति तथा कृतवन्तौ । कारोतरः चर्मवेष्टितो भाजनविशेषः, यस्मिन् सुरां स्रावयन्ति, तद्वदश्विनोरश्वशफं वर्णयति । कारोतरात् भाजनभूतात् वृष्णः वर्षितुः अश्वस्य शफात् खुरात् सुरायाः मादकद्रव्यस्य शतम् कुम्भान् असंख्यातान् सुराघटान् असिञ्चतम् अक्षारयतम् । तादृशो मदप्रदायको महिमा, यदश्वखुरान्निस्सरति मादकं द्रव्यम्, सर्वथा संमदसुखदायिनावश्विनौ ॥ पज्रियाय—पज्रशब्दात् शैषिको घच् । पुरन्धिम्—पृषोदरादित्वात् पुरन्धिभावः ॥

अष्टमीमृचमाह—

हिमेनाग्निं घ्रंसमवारयेथां पितुमतीमूर्जमस्मा अधत्तम् ।
ऋबीसे अत्रिमश्विनावनीतमुन्निन्यथुः सर्वगणं स्वस्ति ॥८॥

हिमेन अग्निम् घ्रंसम् अवारयेथाम् पितुऽमतीम् ऊर्जम् अस्मै अधत्तम् ऋबीसे अत्रिम् अश्विना अवऽनीतम् उत् निन्यथुः सर्वऽगणम् स्वस्ति ॥

वैदिके योगे चलति बह्वयः शक्तयः आसुर्यो राक्षस्योऽन्याश्च अन्तर्याजिनमृषिं प्रबाधन्ते । तथा बाधितानामेकोऽत्रिः विश्रुत ऋषिः, स चाश्विनानुग्रहपात्रमभवदित्यस्यां प्रस्तुतम् । हे अश्विना अश्विनौ, हिमेन लक्षणया शैत्यापादनेन अत्रेः घ्रंसम् अग्निम् दीप्यमानं तापं, नाम्यं बाह्यस्तापः अवारयेथाम् निवारितवन्तौ, तापोपशमनं कृतवन्तौ । अपि च अस्मै अत्रये पितुमतीम् ऊर्जम् रसभरितं बलप्रदं वस्तु अधत्तम् प्रायच्छतम् । अपि च, ऋबीसे प्रकाशरहिते स्थाने, गृहे, अवनीतम् अधोगत्या आसुरैर्बलैः प्रापितं अत्रिम् ऋषिं सर्वगणम् सर्वैर्गणैरुपेतं, गणोऽत्राश्रितानां समूहः, बहिरन्तरिन्द्रियाणां वा, स्वस्ति अविनाशो यथा भवति तथा उन्निन्यथुः उत्थाप्य यथास्थानं प्रापितवन्तौ ॥ ऋबीसे—पृषोदरादित्वादिष्टरूपसिद्धिः । अत्रिम्—अद भक्षणे, अदेस्त्रिनिश्चेति चशब्दात् त्रिप् ॥

नवमीमृचमाह—

परावतं नासत्यानुदेथामुच्चाबुध्नं चक्रथुर्जिह्मबारम् ।
क्षरन्नापो न पायनाय राये सहस्राय तृष्यते गोतमस्य ॥९॥

परा अवतम् नासत्या अनुदेथाम् उच्चाऽबुध्नम् चक्रथुः जिह्मऽबारम् क्षरन् आपः न पायनाय राये सहस्राय तृष्यते गोतमस्य ॥

हे नासत्या नासत्यावश्विनौ, युवां अवतम् अधस्तात् ततं विस्तृतं, कूपनामैतत्, कूपं परा अनुदेथाम् परस्तात् ऊर्ध्वं प्रेरितवन्तौ, तथा अधः स्थितं अन्नमयदेहलक्षणं प्राणमयोदकयुक्तं कूपमुद्धृत्य तं उच्चाबुध्नम् उच्चैर्बुध्नो मूलं यस्य तं जिह्मबारम् जिह्मं वक्रं बारं द्वारं यस्य तं तथाभूतं च चक्रथुः कृतवन्तौ । ऊर्ध्वमूलत्वादेव शिरः सहस्रारं प्रधानं भवति देहस्य। वक्रं भवति द्वारं, येन तिर्यक्प्रसारो भवति स्यन्दमानानां अपां प्राणामृतमयीनाम्, अथ तृष्यते क्रियाज्ञानबलाद्यर्थं पिपासतः, विभक्तिव्यत्ययः, गोतमस्य ऋषेः पायनाय पानार्थं आपो न न शब्दश्चार्थे

इति सायणः, मा भूत्, आप इव क्षरन् प्रवाहरूपेण निरगमन् 'सहस्रं रायः' यदर्थं गोतम ऋषिः पिपासितः, तदाह सहस्राय राये प्रभूताय धनाय, नेदं लौकिकं, न तदर्थं तृषितो गोतमः। गूढार्थमेव मन्त्रवर्णः प्रतिपादयति, अन्यथा उन्मत्तलपितं स्यात्॥ अनुदेथाम्–णुद प्रेरणे, तौदादिकः। जिह्मवारम्–द्वारशब्दस्य वारादेशः, पृषोदरादिः। पायनाय–हेतुमण्णिच्, भावे ल्युट्॥

दशमीमृचमाह—

जुजुरुषो नासत्योत वव्रिं प्रामुञ्चतं द्रापिमिव च्यवानात्।
प्रातिरतं जहितस्यायुर्दस्रादित्पतिमकृणुतं कनीनाम्॥१०॥

जुजुरुषः नासत्या उत वव्रिम् प्र अमुञ्चतम् द्रापिमऽइव च्यवानात् प्र अतिरतम् जहितस्य आयुः दस्रा आत् इत् पतिम् अकृणुतम् कनीनाम्॥

च्यवनमधिकृत्य महाभारतादिपुराणकथायाः मूलमस्यामृचि द्रष्टव्यम्। हे नासत्या नासत्यौ, जुजुरुषः जीर्णात् च्यवानात् च्यवनाख्यात् ऋषेः वव्रिम् आवृत्य स्थितां जरां प्रामुञ्चतम् प्रकर्षेणामोचयतम्। तत्र दृष्टान्तः–द्रापिमिव कवचमिव, कवचं यथा देहात्पृथक् कर्तुं शक्यते तथा च्यवनदेहात् जरा पृथक् कृता। उत अपि च हे दस्रा, दस्रौ कर्मकुशलौ, जहितस्य परित्यक्तस्य जरयेति शेषः, आयुः जीवनं प्रातिरतम् प्रावर्धयतम्, प्रपूर्वस्तिरतिर्वर्धनार्थः। आदित् अनन्तरमेव तमृषिं कनीनाम् पतिम् कन्यानां अनभिव्यक्तभावानां अत एवान्तर्हितानां दिव्यांशानां उपभोग्यतायै आविष्कारं प्रतीक्षमाणानामित्यर्थः, एवंलक्षणानां 'कन्यानां' पालकं भर्तारं अकृणुतम् अकुरुतम्॥ जुजुरुषः–जॄष् वयोहानौ, लिटः क्वसुः, बहुलं छन्दसीत्युत्वं, द्विर्भावः, संप्रसारणं, षत्वम्। जहितस्य–ओहाक् त्यागे, कर्मणि निष्ठा, अन्यत् छान्दसम्॥

इति प्रथमस्याष्टमे नवमो वर्गः

एकादशीमृचमाह—

तद्वौ नरा शंस्यं राध्यं चाभिष्टिमन्नासत्या वरूथम्।
यद्विद्वांसा निधिमिवापगूळ्हमुद्दर्शतादूपथुर्वन्दनाय॥११॥

तत् वाम् नरा शंस्यम् राध्यं च अभिष्टिऽमत् नासत्या वरूथम् यत् विद्वांसा निधिम्ऽइव अपऽगूळ्हम् उत् दर्शतात् ऊपथुः वन्दनाय॥

अत्र वन्दनः पूर्वं प्रस्तुत एव। हे नरा नरौ नेतारौ, हे नासत्या, अश्विनौ, अभिष्टिमत्

अभ्येषणयुक्तं, आभिमुख्येन प्राप्तव्यं, तथा वरूथम् वरणीयं, कामयितव्यं वाम् युवयोः तत् तत्कर्म शंस्यम् शंसनीयं राध्यम् च आराधनीयं च। तत्कर्म विवृणोति। विद्वांसा जानन्तौ युवां निधिमिव निक्षिप्तं धनमिव अपगूळ्हम् योगविघातकैरासुरैर्बलैर्निगूढं वन्दनाय स्तुवन्तं, एतदाख्यमृषिं दर्शतात् द्रष्टव्यात्, दर्शनं गतात् गूढस्थानात् उदपथुः उदाहार्ष्टम्। यत् यदेतत् उद्वपनकर्म तदिति संबन्धः॥ अभिष्टिमत्-अभिपूर्वात् इष गताविति्यस्मात् भावे क्तिन्, शकन्ध्वादित्वात्पररूपं, ततो मतुप्। वरूथम्-जृवृञ्भ्यामूथन्। दर्शतात्-दृशेरतच्। ऊपथुः-वपतेर्लिट्॥

द्वादशीमृचमाह—

तद्वौ नरा सनये दंस उग्रमाविष्कृणोमि तन्यतुर्न वृष्टिम्।
दध्यङ् ह यन्मध्वाथर्वणो वामश्वस्य शीर्ष्णा प्र यदीमुवाच॥१२॥
तत् वाम् नरा सनये दंसः उग्रम् आविः कृणोमि तन्यतुः न वृष्टिम्
दध्यङ् ह यत् मधु आथर्वणः वाम् अश्वस्य शीर्ष्णा प्र यत् ईम् उवाच॥

आथर्वणस्य दधीचो वृत्तान्तस्य गूढार्थं संक्षेपेण ऋचोऽस्याः पदार्थदानात्परं ब्रूमः। हे नरा नरौ, अश्विनौ, वाम् युवयोः तत् उग्रम् तदुद्गूर्णं दंसः कर्म सनये संभजनाय आविः कृणोमि प्रकटीकरोमि। तत्र दृष्टान्तः-तन्यतुर्न यथा मेघगर्जितशब्दः वृष्टिम् वर्षणं प्रकटयति, तद्वत्। किं तत्कर्म? यत् आथर्वणः अथर्वणः पुत्रः दध्यङ् एतन्नामा अश्वस्य शीर्ष्णा युष्मदनुग्रहेण प्रतिहितेनाश्वशिरसा ईम् मधु इमां मधुविद्यां यद्ध यदा खलु वाम् युवाभ्यां प्रोवाच प्रोक्तवान्, तदा युवयोः वीर्यवत् कर्म प्रकटितमेव॥ सनये-वन षण संभक्तौ। तन्यतुः-तनु विस्तारे, यतुच्॥

अत्र मधुविद्याप्रस्तावो भवति। अथर्वणः पुत्रो दध्यङ्। अश्विभ्यां स मधुविद्यां प्रोवाच। तत्र मधुप्रापणस्य अश्वशिरः साधनमभवत्, न तु दधीच ऋषेर्मुखम्। तच्च दध्यङ्शिर उद्धृत्य अश्वशिरोऽश्विभ्यामेव दधीचे दत्तम्। अश्विभ्यां मध्वादानात्परं पुनर्दधीचः शिरः प्रतिहितं, अश्वशिरस्तु इन्द्रेण छिन्नं व्यपगतमिति मन्त्रान्तरेभ्योऽवगम्यते॥

अत्रेदं विचारणीयम्। बहुभिः पुराणान्वाख्यानैरुपबृंहित एतादृशो मन्त्रवर्णः। नैष स्थूलो वृत्तान्तः कथितः। अत्र तत्त्वावगतिस्तु सङ्केतविवरणायत्ता। अथर्वा अङ्गिरसामग्रगण्यो भवति। अत एवाग्निविभवभूतो देवत्वं प्राप्त ऋषिः। स यजनैः साधनैर्दिव्यचिद्रश्मिप्रापकान् मार्गान् सर्वेभ्यः पूर्वं कृतवानिति मन्त्रवर्णः "यज्ञैरथर्वा प्रथमं पथस्ते" (१.८३.५)। स देवभूत

आधिकारिकः सन् मानुषे जन्मनि लब्धस्थितिपदः आग्नेयीः संपद आविष्करोति। पृथिवीस्थानोऽग्निरमर्त्यो यदा मर्त्ये सुप्तोत्थितो भवति तदा मानुषे हृदये दैवग्नेप्साज्वाला (महती तीव्रोत्काङ्क्षा) प्रादुर्भवति। तद्व्यापारस्य कोऽपि भागहरः सार्थकनामा दृढमवस्थितः स्थिरो निश्चेष्टज्वलितो भवत्यथर्वा। थर्वतिर्गतिकर्मा तद्रहित इत्यर्थः। अथर्व्यं गन्तुमसमर्थमिति सायणः (१.११२.१०)। मर्त्ये अग्निस्तेन निर्मथित आविर्भावितश्चेति मन्त्रवर्णाः "इममु त्यमथर्ववदग्निं मन्थन्ति वेधसः" (६.१५.१७)। सर्वस्यापि देवभक्तस्यर्षेः पुष्कराख्यात् शिरःकमलात् अथर्वा अग्निं निर्मथितवान्, पुष्करं परमं व्योम वा स्यात्, तस्मान्निर्मथ्याविष्कृतवान् "त्वामग्ने पुष्करादध्यथर्वा निरमन्थत। मूर्ध्नो विश्वस्य वाघतः" (६.१६.१३)॥ अन्योऽपि मन्त्रः अथर्वणः पुत्रो दध्यङ् अग्निं 'वृत्रहणं पुरन्दरं' दीपितवानिति वर्णयति। एवमङ्गिरसां प्रथमोऽग्निरथर्वा व्याख्यातः॥

अथ दध्यङ् तस्य पुत्रः। ऋषिरयमप्याधिकारिको देवभूतः पृथिवीस्थानो मनुष्ये धारणात्मिकां दधिशब्दसङ्केतितां धियमञ्चतीति सार्थकनामा दध्यङ्ङुच्यते। अत्र सङ्केतविवरणस्येदं द्वारं भवति, यत् चिद्रश्मिलक्षणायाः गोः सारभूतस्यामृतस्य दुग्धस्य दधिरूपेण परिणामात् दध्ना घनेऽन्नमये स्थूले देहे धारणात्मिका ज्वलिता बुद्धिः सङ्केत्यते। दध्याशिर इत्यस्य व्याख्यानमवधातव्यम् (पु. १३८) धात्वर्थानुसारेण दधिशब्दः प्रयुज्यते वेदे (१०.४६.१)। सोऽयं ऋषिः पुरुषो दध्यङ् देवतात्मा चित्प्रकाशप्रभासितां अन्नमयदेहाधारकां प्रसन्नशुभ्रां धियमधिष्ठाय सर्वं जगच्चराचरात्मकं द्वन्द्वभूतं अन्योन्याश्रयसंबद्धं मधुपदवाच्येन रसात्मना आनन्देन धार्यमाणमवतिष्ठत इति अनुभूत्या वेद। इदं च मधुनो विज्ञानं विशुद्धप्रकाशायाः धियः समुत्कर्षे प्राप्यावतिष्ठमानो दध्यङ् स्वर्धामाधिकारिण इन्द्राल्लब्धवान् किल। यस्मात्खलु प्रसरन् तमसां प्रध्वंसनः चित्प्रकाशो दधीचो धारणात्मिकां शुभ्रां प्रज्ञां प्रकाश्य सर्वस्यापि वस्तुनस्तत्त्वं रहस्ये मधुनि प्रतिष्ठितमित्यावेदयत्यस्मै। इदं तत् 'कक्ष्यं' (रहस्यं) मधु यद्दध्यङ् अश्विभ्यां प्रोवाच॥ यद्यप्यग्निविभूतिविशेषस्याथर्वणस्याङ्गिरसस्य दधीचो धीप्रकाशपदवी समुत्कृष्टैव भवति, यत्र दृढं मधुनः संवेदनं सहजं प्रथते, तथापि तस्य मधुज्ञानस्य तत्सदृशं क्रियाकारकसामर्थ्यं तदनुरूपं उपभोगसामर्थ्यं वा देहदार्ढ्य-प्राणबलसमृद्धि-स्वस्थताऽरोगतादिसंपदमन्तरेण न सिध्येत्। तादृशी संपदश्विभ्यां लब्धव्या। तौ हि अपेक्षितदेहसौख्यबलादीनां प्रदातारौ। तस्मादश्विभ्यां मधुविज्ञानप्रापणस्य दधीचो वाक् न पर्याप्तं साधनं भवति, प्राणबलमेव तत्प्रापणक्षमं, तदेवाश्वशिरसा अश्विप्रतिहितेन संकेतितम्। मधुप्रापणात्परं दध्यङ् पुनः सहजेन शिरसा युक्तो भवति॥

इदमेव उग्रं कर्मेति गौण्या वाण्या मन्त्रवर्णेषु वर्ण्यते। अत्र सारतः सङ्केताः प्रपञ्चिताः। एतदाधारकाणां पुराणोपाख्यानानां मधुविद्यायाः प्रवर्ग्यविद्यायाश्च रहस्यं नेह विचार्यते। यत् किञ्चिदुक्तमत्र तत् धीमतां चिन्तकानामुपयोगाय विचारणाय च कल्पेत। शतपथिनां श्रुतौ (१४.५.५.१६) मधुविद्याप्रस्तावे 'तदेतत्पश्यन्नृषि'रिति इयमृगुदाहृता। अन्या च तत्रैव (१.११७.२२) गीता। अनेन मधुविद्या रहस्यभाषया ऋक्संहितायामावेदितेति बोध्यम्। मधुविद्यारहस्यं तु विस्पष्टमुक्तं मधुब्राह्मणे (बृ. उप. २.५)। तत्र चतुर्दशधा दृष्टान्तेन मधुविद्योपदिष्टा। "इयं पृथिवी सर्वेषां भूतानां मधु" इत्यारभ्य "इदं वै तन्मधु दध्यङ्ङाथर्वणः अश्विभ्यामुवाच" इत्युपसंहारे मन्त्रवर्णा उदाहृताः। एवमन्याश्च औपनिषदविद्याः मन्त्रसंहितामूलकाः इति क्वचित् स्फुटं ज्ञायते॥ अथ दधीचमधिकृत्य अन्योऽस्ति वक्तव्यो विषयः, दधीचोऽस्थिभिः वृत्राणि नवतीर्नव हतवानिन्द्रः (१.८४.१३, १४)। प्रायशः पूर्णा वृत्रहत्या (तमसः प्रध्वंसः) स्वीकृतेन्द्रतेजस्कैः इन्द्रवज्रभूतैः (दध्यङ्ङस्थिनिर्मितं इन्द्रवज्रमिति सविस्तरा कथा) दधीचः अन्नमयाधारकमूलधातुभिर्निरुह्यते। संपूर्णो वृत्रवधस्तु साक्षादिन्द्रेणेति बोध्यम्॥

त्रयोदशीमृचमाह—

अजोहवीन्नासत्या करा वां महे यामन्पुरुभुजा पुरन्धिः।
श्रुतं तच्छासुरिव वध्रिमत्या हिरण्यहस्तमश्विनावदत्तम् ॥१३॥

अजोहवीत् नासत्या करा वाम् महे यामन् पुरुऽभुजा पुरम्ऽधिः श्रुतम् तत् शासुःऽइव वध्रिऽमत्याः हिरण्यऽहस्तम् अश्विनौ अदत्तम्॥

पुरुभुजा बहूनां पालकौ हे नासत्या अश्विनौ, महे महनीये यामन् यामनि गमने, महति कार्ये चलति सति, करा करौ अभिमतफलस्य कर्तारौ वाम् युवां पुरन्धिः प्रभूतधीयुक्ता वध्रिमती पुत्रोत्पादनाशक्तपतिका अजोहवीत् पुनः पुनः आहूतवती स्तुतिभिः। शासुरिव शासितुरिव, आचार्यस्य वचनं शिष्येणेव युवाभ्यां तस्याः वध्रिमत्याः तत् श्रुतम् तदाकर्णितम्। आकर्ण्य च हे अश्विनौ तस्यै हिरण्यहस्तम् हिरण्मयहस्तोपेतं अपत्यं अदत्तम् प्रायच्छतम्॥ अजोहवीत्—ह्वयतेः यङ्लुगन्ताल्लङ्। करा—करोतेः अच्। शासुः—शासु अनुशिष्टौ, तृच्, इडभावश्छान्दसः तलोपश्च॥

चतुर्दशीमृचमाह—

आस्रो वृकस्य वर्तिकामभीके युवं नरा नासत्यामुमुक्तम्।
उतो कविं पुरुभुजा युवं ह कृपमाणमकृणुतं विचक्षे ॥१४॥

आस्नः वृकस्य वर्तिकाम् अभीके युवम् नरा नासत्या अमुमुक्तम् उतो इति कविम् पुरुऽभुजा युवम् ह कृपमाणम् अकृणुतम् विऽचक्षे ॥

हे नरा, नासत्या, नेतारावश्विनौ, युवम् युवां अभीके अभिगते वृकवर्तिकयोः परस्परयुद्धे वृकस्य छेदकस्यासुरस्य आस्नः आस्यात् वर्तिकाम् पक्षिस्त्रियं तल्लक्षितजीवात्मानं (इदं कुत्ससूक्ते व्याख्यातम्, सू. ११३) अमुमुक्तम् अमोचयतम्। उतो अपि च कविम् तमृषिं हे पुरुभुजा बहूनां पालयितारौ, युवम् ह युवामेव कृपमाणम् स्तुवन्तं सन्तं विचक्षे विशेषेण द्रष्टुं अकृणुतम् अकुरुतम् ॥ आस्नः-आस्यशब्दस्य आसन्नादेशः। अमुमुक्तम्-मुचेरन्तर्भावितण्यर्थाल्लङि विकरणस्य श्लुः। कृपमाणम्-कृपिः स्तुतिकर्मा, तुदादिः। विचक्षे-तुमर्थे सेन्प्रत्ययः ॥

पञ्चदशीमृचमाह—

चरित्रं हि वेरिवाच्छेदि पर्णमाजा खेलस्य परितक्म्यायाम्।
सद्यो जङ्घामायसीं विश्पलायै धने हिते सर्तवे प्रत्यधत्तम् ॥१५॥
चरित्रम् हि वेःऽइव अच्छेदि पर्णम् आजा खेलस्य परिऽतक्म्यायाम्
सद्यः जङ्घाम् आयसीम् विश्पलायै धने हिते सर्तवे प्रति अधत्तम् ॥

अत्र खेलविश्पलावृत्तान्तः कुत्ससूक्ते प्रस्तुतः। आजा आजौ युद्धे खेलस्य एतदाख्यस्य संबन्धिन्याः विश्पलायाः चरित्रम् चरणं वेरिव पर्णम् पक्षिणः पतत्रमिव अच्छेदि हि छिन्नमभूत् खलु। युवां परितक्म्यायाम् रात्रौ सद्यः तदानीमेव विश्पलायै तस्यै छिन्नचरणायै आयसीम् जङ्घाम् अयोमयीं जङ्घां, जङ्घोपलक्षितं पादं प्रत्यधत्तम् सन्धानमेकीकरणं कृतवन्तौ। किमर्थम्? हिते निहिते विपक्षे आसुरबले इति शेषः धने दिव्ये, प्राप्तव्ये विषयभूते सति सर्तवे गन्तुम् ॥ अत्र पादच्छेदः दिव्याध्वनि गच्छन्त्याः गतिभङ्गं असुरकृतं लक्षयति। तथा रात्रिः रहस्यन्यैरलक्षित एव कृतः आश्विनोऽनुग्रहः इति द्योतयति। 'आयसीं जङ्घा'मिति गमनबलदार्ढ्यद्योतनाय ॥ परितक्म्यायाम्-परित एनामुभयतः सूर्यस्तकति गच्छतीति यास्कानुसारतः ॥

इति प्रथमस्याष्टमे दशमो वर्गः

षोडशीमृचमाह—

शतं मेषान्वृक्ये चक्षदानमृज्राश्वं तं पितान्धं चकार।
तस्मा अक्षी नासत्या विचक्ष आधत्तं दस्रा भिषजावनर्वन् ॥१६॥

शतम् मेषान् वृक्ये चक्षदानम् ऋज्रऽअश्वम् तम् पिता अन्धम् चकार तस्मै अक्षी इति नासत्या विऽचक्षे आ अधत्तम् दस्रा भिषजौ अनर्वन् ॥

ऋज्राश्वः ऋजुगमनः प्राणबलोपलक्षणः अश्वः यस्य तं, तस्य पिता स्तोत्रवाचां वर्षकः 'वृषागीः' अन्धं दृष्टिवियुक्तं कृतवान् । कुतः? "वृक्यै" छेदकासुरशक्त्यै बहून् "मेषान्" उन्मिषन्ति दृष्टिबलानि स दत्तवानिति हेतोः। ऋज्राश्वस्य दृष्टिबलानि आच्छिद्य आसुरशक्तिर्भुक्तवतीत्यर्थः। तत्र अश्विनोरनुग्रहस्तस्य दृष्टिं समपीपदत् ॥ ऋज्राश्वः राजर्षिरुक्तलक्षणः शतम् मेषान् बहूनुक्तलक्षणान् वृक्ये वृकस्त्रियै, व्याख्यातायै, चक्षदानम् हिंसितवन्तं 'क्षदतिरत्तिकर्मा अत्र शकलीकरणार्थ' इति सायणः, तम् ऋज्राश्वम् पिता वृषागीः उक्तलक्षणः अन्धम् चकार दृष्टिहीनं कृतवान् । हे नासत्या नासत्यौ, दस्रा दस्रौ कर्मकुशलौ, भिषजौ सर्वबाह्याभ्यन्तररोगाणां दिव्यौ चिकित्सकौ, अनर्वन् अनर्वणौ, गमनरहिते, द्रष्टव्यं प्रतीति शेषः, अक्षी चक्षुषी विचक्षे विशिष्य द्रष्टुं समर्थे तस्मै ऋज्राश्वाय आधत्तम् व्यधत्तं, अकुरुतम् ॥ चक्षदानम्-क्षदतेर्लिटः कानच् । अनर्वन्-ऋ गतौ, भावे वनिप्, अन्यत् छान्दसम् ॥

सप्तदशीमृचमाह—

आ वां रथं दुहिता सूर्यस्य कार्ष्मेवातिष्ठदर्वता जयन्ती ।
विश्वे देवा अन्वमन्यन्त हृद्भिः समु श्रिया नासत्या सचेथे ॥१७॥

आ वाम् रथम् दुहिता सूर्यस्य कार्ष्मेऽइव अतिष्ठत् अर्वता जयन्ती विश्वे देवाः अनु अमन्यन्त हृत्ऽभिः सम् ऊम् इति श्रिया नासत्या सचेथे इति ॥

उषा अश्विनोर्योषा तद्रथमारुह्य दिवमेतीति अन्यत्र च वर्ण्यते । अत्र सैव सूर्येति बोध्यम्। सूर्यस्य दुहिता सूर्या वाम् युवयोः रथम् आतिष्ठत् रथमारूढवती। कीदृशी? अर्वता शीघ्रगमनेन कार्ष्मेव जयन्ती बहूनां धावने अवधितया स्थापितं काष्ठं लक्ष्यमिव प्राप्नुवन्ती । तदानीं विश्वे देवाः इतरे सर्वेऽपि देवाः एतदारोहणं हृद्भिः हृदयैः अन्वमन्यन्त अनुज्ञातवन्तः । हे नासत्या अश्विनौ, तदानीं श्रिया सर्वोत्तरशोभया युवां संसचेथे संगच्छेथे । उ पादपूरणः ॥ सचेथे-षच समवाये ॥

अष्टादशीमृचमाह—

यदयातं दिवोदासाय वर्तिर्भरद्वाजायाश्विना हयन्ता ।
रेवदुवाह सचनो रथो वां वृषभश्च शिंशुमारश्च युक्ता ॥१८॥

यत् अयातम् दिवःऽदासाय वर्तिः भरत्ऽवाजाय अश्विना हयन्ता रेवत् उवाह सचनः रथः वाम् वृषभः च शिंशुमारः च युक्ता ॥

हे अश्विना अश्विनौ, हयन्ता आहूयमानौ युवां भरद्वाजाय देवार्थं म्रियमाणसमृद्धियुक्ताय दिवोदासाय राजर्षये, द्युलोकसेवकाय वर्तिः तदीयं गृहं यत् यदा अयातम् आगच्छतं, तदानीं रेवत् दिव्यधनयुक्तं वैभवं वाम् युवयोः सचनः सेवनः रथः उवाह तस्मै प्रापयामास। तस्मिन्रथे वृषभश्च अनड्वांश्च शिंशुमारश्च ग्राहश्च युक्ता वाहनतया संयुक्तावास्ताम्। वृषग्राहौ परस्परविरुद्धौ अश्विनोर्बलेन प्रसादेन एकत्र संयुक्तौ भवतः इति भावः॥ हयन्ता–ह्वेञः कर्मणि लटो व्यत्ययेन शतृ, संप्रसारणं, शपि गुणे छान्दसोऽयादेशः। सचनः–षच सेवने। युक्ता–विभक्तेराकारः॥

एकोनविंशीमृचमाह—

रयिं सुक्षत्रं स्वपत्यमायुः सुवीर्यं नासत्या वहन्ता।
आ जह्नावीं समनसोप वाजैस्त्रिरह्नो भागं दधतीमयातम् ॥१९॥

रयिम् सुऽक्षत्रम् सुऽअपत्यम् आयुः सुऽवीर्यम् नासत्या वहन्ता आ जह्नावीम् सऽमनसा उप वाजैः त्रिः अह्नः भागम् दधतीम् अयातम् ॥

हे नासत्या नासत्यौ, सुक्षत्रम् शोभनबलं रयिम् धनं, सत्पथे दैवार्थं उपयोज्यत्वात् शोभनमस्य धनस्य बलं, स्वपत्यम् शोभनप्रजायुक्तं सुवीर्यम् शोभनपराक्रमोपेतं च आयुः जीवितं वहन्ता वहन्तौ युवां समनसा समानमनस्कौ सन्तौ जह्नावीम् जाह्नवीं (ह्रस्वदीर्घयोर्विनिमयः) जह्नोः महर्षेः (ह्नुते अपनयति पापान् जह्नुः, तस्य पापनोदनस्य) संबन्धिनीं प्रजां उप आ अयातम् आभिमुख्येन उपागच्छतम्। कीदृशीम्? वाजैः समृद्धिभिः युक्तं अह्नः अह्ना लक्षितस्य चित्प्रकाशस्य त्रिः त्रिधा, लोकत्रयापेक्षया, मनःप्राणशरीररैरर्प्यमाणं त्रिविधं, भागम् भजनीयमंशं दधतीम् बिभ्रतीम् ॥

विंशीमृचमाह—

परिविष्टं जाहुषं विश्वतः सीं सुगेभिर्नक्तमूहथू रजोभिः।
विभिन्दुना नासत्या रथेन वि पर्वताँ अजरयू अयातम् ॥२०॥

परिऽविष्टम् जाहुषम् विश्वतः सीम् सुऽगेभिः नक्तम् ऊहथुः रजःऽभिः विऽभिन्दुना नासत्या रथेन वि पर्वतान् अजरयू इति अयातम् ॥

हे नासत्या नासत्यौ, विश्वतः सर्वतः परिविष्टम् परिवृतं शत्रुभिः जाहुषम् राजर्षिं (जहातेः, सर्वसङ्गपरित्यागिनं) अजरयू जरारहितौ युवां विभिन्दुना सर्वविभेदकेन रथेन आत्मीयेन रथेन नक्तम् रात्रौ, रहसीति विवक्षा, सुगेभिः सुष्ठु गन्तुं शक्यैः रजोभिः आकाशमार्गैः, रजः अन्तरिक्षनाम, सायणस्तु 'रज्जुकैर्मार्गैः' इत्याह। ऊहथुः वोढवन्तौ, तस्मात्संकटान्निरगमयतम् सीम् पादपूरणम्। निर्गतेन तेन सह पर्वतान् शत्रुभिरारोढुमशक्यान् व्ययातम् विशेषेण गतवन्तौ॥ परिविष्टम्-विश प्रवेशने, कर्मणि निष्ठा। विभिन्दुना-भिदिर् विदारणे, औणादिक उप्रत्ययः नुमागमश्च। अजरयू-अजरामात्मन इच्छतः, सुप आत्मनः क्यच्, क्याच्छन्दसीति उप्रत्ययः॥

इति प्रथमस्याष्टम एकादशो वर्गः

एकविंशीमृचमाह—

एकस्या वस्तोरावतं रणाय वशमश्विना सनये सहस्रा।
निरहतं दुच्छुना इन्द्रवन्ता पृथुश्रवसो वृषणावरातीः॥२१॥

एकस्याः वस्तोः आवतम् रणाय वशम् अश्विना सनये सहस्रा निः अहतम् दुच्छुनाः इन्द्रऽवन्ता पृथुऽश्रवसः वृषणौ अरातीः॥

हे अश्विना, वशम् एतमृषिं (वष्टेः, कान्तं, देवान् कामयमानम्) एकस्याः वस्तोः एकस्याह्नः रणाय रमणीयाय सहस्रा सहस्रसंख्याय सनये लाभाय आवतम् अरक्षतं, तस्मै ऋषये प्रत्यहं प्रवर्धमानां दिव्यां संपत्तिं दत्तवन्तौ युवाम्। अपि च हे वृषणौ, वर्षितारौ, इन्द्रवन्ता इन्द्रेण संयुक्तौ युवां दुच्छुनाः येषां सुखानि दुर्मार्गेण प्राप्तानि तान्, दुष्टसुखानित्यर्थः, पृथुश्रवसः अरातीः पृथुलदिव्यश्रुतिसम्पन्नस्य राजर्षेः शत्रून् निरहतम् निश्शेषेणावधिष्टम्॥ दुच्छुनाः-शुनं सुखं, दुष्टं शुनं यासां अरातिभूतानां ताः॥

द्वाविंशीमृचमाह—

शरस्य चिदार्चत्कस्यावतादा नीचादुच्चा चक्रथुः पातवे वाः।
शयवे चिन्नासत्या शचीभिर्जसुरये स्तर्यं पिप्यथुर्गाम्॥२२॥

शरस्य चित् आर्चत्ऽकस्य अवतात् आ नीचात् उच्चा चक्रथुः पातवे वारिति वाः शयवे चित् नासत्या शचीभिः जसुरये स्तर्यम् पिप्यथुः गाम्॥

आर्चत्कस्य ऋचत्कपुत्रस्य स्तोतुः शरस्य चित् पापानां हिंसितुः, एतत्संज्ञकस्यापि पातवे पानाय नीचात् नीचीनात् अवतात् कूपात् उच्चा उच्चैरुपरिष्टात् वाः वारि युवां आ चक्रथुः आभिमुख्येन कृतवन्तौ। अत्र कूपं उदकं पानं नीचैरुच्चैरित्येतानि साङ्केतिकानि पूर्ववद् ग्राह्याणि। कूपात्साधारणजलोद्धारः केनापि सेवकेन सख्या वा क्रियते, न तत्र अलौकिकमाश्विनं साहाय्यमावश्यकं भवति। हे नासत्या नासत्यौ, शचीभिः युष्मदीयशक्तिभिः जसुरये हिंसया श्रान्ताय शयवे चित् शयानाय, ऋषयेऽपि स्तर्यम् गाम् निवृत्तप्रसवां दोग्ध्रीं पिप्यथुः पयसा पूरितवन्तौ युवाम्। अत्रापि गौणोऽर्थः। ऋषिगत-चिद्रश्मि-प्रसारसन्तानासामर्थ्यं बोध्यम्॥ जसुरये–जसु हिंसायाम्, जसुसहोरुरिन्। स्तर्यम्–स्तीर्यते आच्छाद्यते प्रसवे सामर्थ्याभावेनेति स्तरीः, अविस्तृस्तृतन्त्रिभ्य ईरिति ईकारप्रत्ययः, वा च्छन्दसीत्यमि पूर्वस्य विकल्पितत्वादभावे यणादेशः। पिप्यथुः–प्यायी वृद्धौ, लिटि व्यत्ययेन परस्मैपदम्, पीभावः॥

त्रयोविंशीमृचमाह—

अवस्यते स्तुवते कृष्णियाय ऋजूयते नासत्या शचीभिः।
पशुं न नष्टमिव दर्शनाय विष्णाप्वं ददथुर्विश्वकाय ॥२३॥

अवस्यते स्तुवते कृष्णियाय ऋजुऽयते नासत्या शचीभिः पशुम् न नष्टमऽइव दर्शनाय विष्णाप्वम् ददथुः विश्वकाय॥

अवस्यते अवनं रक्षणं आत्मनः इच्छते स्तुवते स्तोत्रं कुर्वते कृष्णियाय कृष्णपुत्राय ऋजूयते आर्जवमिच्छते विश्वकाय ऋषये हे नासत्या नासत्यौ, युवां शचीभिः स्वशक्तिभिः विष्णाप्वम् एतन्नामकं नष्टं पुत्रं पशुम् न नष्टमिव एक उपमार्थीयः पूरकः, यथा कश्चित् नष्टं पशुं स्वामिनो दृष्टिपथं प्रापयति तद्वत्, गतस्य मृतस्य वा पुत्रस्य दर्शनाय पुनर्लाभे दर्शनार्थं ददथुः दत्तवन्तौ॥ अवस्यते–अवस्-शब्दात् सुप आत्मनः क्यच्। कृष्णियाय–अपत्यार्थे छान्दसो घच्॥

चतुर्विंशीमृचमाह—

दश रात्रीरशिवेना नव द्यूनवनद्धं श्रथितमप्स्वन्तः।
विप्रुतं रेभमुदनि प्रवृक्तमुन्निन्यथुः सोममिव स्रुवेण ॥२४॥

दश रात्रीः अशिवेन नव द्यून् अवऽनद्धम् श्रथितम् अप्ऽसु अन्तरिति वेऽप्रुतम् रेभम् उदनि प्रऽवृक्तम् उत् निन्यथुः सोमम्ऽइव स्रुवेण॥

हे अश्विनौ, अप्सु अन्तः प्राणबलभूयिष्ठे प्रवाहे निमग्नमृषिं अशिवेन अशुभेन आसुरेण पापपाशेन अवनद्धम् बद्धं श्रथितम् हिंसितं दश रात्रीः दश अप्रकाशदशाः नव द्यून् नव दिवसान्, प्रकाशदशाश्च, एतावन्तं कालं तादृशावस्थामापन्नं उदनि उक्तलक्षणे उदके विप्रुतम् विप्लुतं व्याक्षिप्तसर्वाङ्गं प्रवृक्तम् प्रवृञ्जनेन सन्तप्तं व्यथया सन्तप्यमानं एवंभूतं रेभम् स्तोतारं ऋषिं, (परिचितोऽयं), युवां उन्निन्यथुः उन्नीतवन्तौ, ऊर्ध्वं प्रापितवन्तौ, तत्र दृष्टान्तः—सोममिव स्रुवेण स्थालीमध्ये वर्तमानं सोमरसं स्रुवेण यथा अध्वर्युरुन्नयति तद्वत्। नेदं साधारणं उदकं यत्र रेभो निमग्नस्तावन्तं कालं, न वा संतप्तो भवति कोप्यप्सु वर्तनेन ॥ अवनद्धम्—णह बन्धने, कर्मणि निष्ठा, नहो धः। श्रथितम्—श्रथतिः हिंसार्थः, निष्ठा। विप्रुतम्—प्रुङ् गतौ। उदनि—उदकशब्दस्योदन्नादेशः ॥

पञ्चविंशीमृचमाह—

प्र वां॑ दंसौंस्यश्विनाववोचमस्य पतिः॑ स्यां सुगवः॑ सुवीरः॑।
उ॒त पश्यन्नश्नुवन्दी॒र्घमायु॒रस्तं॒मिवेज्जरि॒माणं॑ जगम्याम् ॥२५॥

प्र वा॒म् दंसां॑सि अ॒श्वि॒नौ॒ अ॒वो॒च॒म् अ॒स्य पति॑ः स्या॒म् सु॒ऽग॒वः॑ सु॒ऽवी॒रः॑
उ॒त पश्य॑न् अ॒श्नु॒वन् दी॒र्घम् आयु॑ः अस्त॑म्ऽइव इत् ज॒रि॒माण॑म् ज॒ग॒म्या॒म्॥

हे अश्विनौ, वाम् युवयोः दंसांसि कर्माणि प्रावोचम् प्रोक्तवानस्मि। सोऽहं सुगवः शोभनचिद्रश्मियुक्तः सुवीरः शोभनवीर्योपेतः, एवं ज्ञानक्रियाशक्तिद्वयसंपन्नः सन् अस्य पतिः स्याम् अस्य त्रैलोक्यांशभूतस्य मनःप्राणशरीरात्मकस्य आवासस्थानस्य सर्वस्याधिपतिर्भवेयम्। उत अपि च पश्यन् उपलक्षणमिदं, सर्वेन्द्रियपटुत्वयुक्तः सन् दीर्घमायुः चिरकालजीवितं अश्नुवन् प्राप्नुवन्नहं अस्तमिवेत् गृहस्वामी गृहमिव जरिमाणम् जरां जगम्याम् प्राप्नुयाम्, निर्भयं निष्कण्टकं च यथा स्वगृहं प्रविशति गृही तथा आयुषोऽन्ते जरां प्रविशेयम् ॥ जरिमाणम्—जॄष् वयोहानौ, अस्मात् इमनिच्, उणादिः। जगम्याम्—गमेः प्रार्थनायां लिङ्, विकरणस्य श्लुः ॥

इति प्रथमस्याष्टमे द्वादशो वर्गः

'मध्व' इति पञ्चविंशत्यृचं द्वितीयं सूक्तं कक्षीवत आर्षं त्रैष्टुभमाश्विनम् ॥

तत्र प्रथमामृचमाह—

मध्व॑ः सोम॑स्याश्विना॒ मदा॑य प्रत्नो॒ होता॑ विवासते वाम्।
ब॒र्हिष्म॑ती रा॒तिर्वि॑श्रि॒ता॒ गी॒रि॒षा या॑तं नासत्योप॒ वाजैः॑ ॥१॥

मध्वः सोमस्य अश्विना मदाय प्रत्नः होता आ विवासते वाम् बर्हिष्मती रातिः विऽश्रिता गीः इषा यातं नासत्या उप वाजैः ॥

अश्विना हे अश्विनौ, मध्वः मधुनः माधुर्योपेतस्य सोमस्य सोमरससंबन्धिनः तत्स्वीकरणजन्यस्य मदाय युवयोर्हर्षाय प्रत्नः चिरन्तनः होता आह्वाता यजमानः वाम् युवां आविवासते समन्तात् परिचरति। अपि च रातिः दातव्यं, युवाभ्यां अर्पणीयं सर्वं बर्हिष्मती आस्तीर्णेन बर्हिषा युक्तं, सन्नद्धं अन्तर्वेदिप्रदेशमासादितम्। तथा गीः स्तुतिलक्षणा वाक् च विश्रिता समवेता, सुसङ्गता सेवायै युवयोः। हे नासत्या नासत्यौ, इषा प्रेरणाशक्त्या सह वाजैः वीर्यसमृद्धिभिश्च सह उप यातम् अस्मत्समीपं प्राप्नुतम्॥ विश्रिता–श्रिञ् सेवायाम्, निष्ठा॥

द्वितीयामृचमाह—

यो वामश्विना मनसो जवीयान्रथः स्वश्वो विशं आजिगाति।
येन गच्छथः सुकृतो दुरोणं तेन नरा वर्तिरस्मभ्यं यातम्॥२॥

यः वाम् अश्विना मनसः जवीयान् रथः सुऽअश्वः विशः आऽजिगाति येन गच्छथः सुऽकृतः दुरोणम् तेन नरा वर्तिः अस्मभ्यम् यातम्॥

हे अश्विना अश्विनौ, वाम् युवयोः स्वभूतः मनसो जवीयान् मनोवेगादप्यतिशयेन वेगवान् स्वश्वः शोभनाश्वः, ईदृशः यः रथः विशः देवसेविनीः प्रजाः आजिगाति आभिमुख्येन गच्छति, येन रथेन सुकृतः शोभनकर्मकारिणः दुरोणम् द्वारोपेतं गृहं युवां गच्छथः, तेन रथेन हे नरा नेतारौ, अस्मभ्यम् अस्मदनुग्रहार्थं वर्तिः वर्तनाधिकरणं गृहं यातम् प्राप्नुतम्॥ जवीयान्–जवशब्दान्मतुप्, तत ईयसुन् आतिशायनिकः, विन्मतोर्लुक्, टेरिति टिलोपः। आजिगाति–गतिकर्मसु पठितः, अन्यत्र स्तुत्यर्थकः॥

तृतीयामृचमाह—

ऋषिं नरावंहसः पाञ्चजन्यमृबीसादत्रिं मुञ्चथो गणेन।
मिनन्ता दस्योरशिवस्य माया अनुपूर्वं वृषणा चोदयन्ता॥३॥

ऋषिम् नरौ अंहसः पाञ्चऽजन्यम् ऋबीसात् अत्रिम् मुञ्चथः गणेन मिनन्ता दस्योः अशिवस्य मायाः अनुऽपूर्वम् वृषणा चोदयन्ता॥

अयमर्थः पूर्वमुक्तो 'हिमेनाग्नि'मित्यत्र। स एव प्रकारान्तरेणोच्यते, हे नरौ नेतारौ, वृषणा वर्षितारौ, पाञ्चजन्यम् पञ्चसु अन्नप्राणमनोविज्ञानानन्देषु भवं, एवं पञ्चधा लब्धजन्मानं अत्रिम् ऋषिम् अंहसः पापरूपात् ऋबीसात् अन्धकारगृहावासात् मुञ्चथः अमोचयतम्। न केवलं ऋषिं, गणेन तदनुचरसमूहेन सह, तस्य बहिरन्तरिन्द्रियग्रामेण सह तममोचयतम्। किं कुर्वन्तौ? अशिवस्य अशुभस्य पापस्य दस्योः असुरस्य मायाः कपटयुक्ताः शक्तीः प्रज्ञा वा मिनन्ता हिंसन्तौ, अनुपूर्वम् आनुपूर्व्येण चोदयन्ता चोदयन्तौ, प्रेरयन्तौ, अन्तर्गुप्ताः दस्युमायाः व्यक्तीकृत्य स्पष्टं प्रध्वंसयितुं प्रेरयन्तौ॥

चतुर्थीमृचमाह—

अश्वं न गूळ्हमश्विना दुरेवैर्ऋषिं नरा वृषणा रेभमप्सु।
सं तं रिणीथो विप्रुतं दंसोभिर्न वां जूर्यन्ति पूर्व्या कृतानि॥४॥

अश्वम् न गूळ्हम् अश्विना दुःऽएवैः ऋषिम् नरा वृषणा रेभम् अप्ऽसु
सं तं रिणीथः विऽप्रुतम् दंसःऽभिः न वाम् जूर्यन्ति पूर्व्या कृतानि॥

हे नरा नेतारौ, वृषणा वर्षितारौ अश्विना, दुरेवैः दुष्प्रापैः असुरादिशत्रुबलैः अप्सु उदकेषु (गूढार्थ उक्तः) गूढम् निगूढं रेभम् ऋषिं उन्नीय विप्रुतमश्वम् न विप्लुताङ्गं व्याक्षिप्तगात्रयुक्तं व्याधितमश्वमिव तम् ऋषिं संरिणीथः समधत्तं युवाम्। कैः? दंसोभिः स्वकीयकर्मभिः भैषज्यरूपैः दिव्यैः। वाम् युवयोः पूर्व्या कृतानि चिरन्तनानि कर्माणि न जूर्यन्ति न जीर्णानि भवन्ति, सर्वदा सफलानि नव्यानीव वीर्यवन्ति॥ दुरेवैः—दुरुपसृष्टादेतेः खल्। रिणीथः—री गतिरेषणयोः, क्रैयादिकः। जूर्यन्ति—जॄष् वयोहानौ, दिवादित्वात् श्यन्, छन्दसि उत्वम्॥

पञ्चमीमृचमाह—

सुषुप्वांसं न निर्ऋतेरुपस्थे सूर्यं न दस्रा तमसि क्षियन्तम्।
शुभे रुक्मं न दर्शतं निखातमुदूपथुरश्विना वन्दनाय॥५॥

सुसुप्वांसम् न निःऽऋतेः उपऽस्थे सूर्यम् न दस्रा तमसि क्षियन्तम्
शुभे रुक्मम् न दर्शतम् निऽखातम् उत् ऊपथुः अश्विना वन्दनाय॥

निर्ऋतिर्भूनामेति सायणः। सर्वारिष्टहेतुभूतपापदेवता निर्ऋतिः। निर्ऋतेः तादृश्याः उपस्थे उत्सङ्गे सुषुप्वांसम् न सुप्तवन्तं, अत्यन्तदुरवस्थामापन्नं पुरुषमिव स्थितं, तमसि क्षियन्तम् सूर्यम् न

अन्धकारे वसन्तं सूर्यमिव स्थितं, शुभे शोभनार्थं प्रभावत् रुक्मम् न सुवर्णमिव दर्शतम् दर्शनीयं, एवंभूतमृषिं निखातम् निमज्जितमरातिभिः वन्दनाय वन्दनम् ऋषिं, हे दस्रा दस्रौ, अश्विना अश्विनौ, युवां उदूपथुः उद्धृतवन्तौ॥ सुषुप्वांसम्-ञिष्वप् शये, लिटः क्वसुः, वचिस्वपीत्यादिना संप्रसारणम्, द्विर्वचनादि॥

इति प्रथमस्याष्टमे त्रयोदशो वर्गः

षष्ठीमृचमाह—

तद्वां नरा शंस्यं पज्रियेण कक्षीवता नासत्या परिज्मन्।
शफाद्श्वस्य वाजिनो जनाय शतं कुम्भाँ असिञ्चतं मधूनाम् ॥६॥
तत् वाम् नरा शंस्यम् पज्रियेण कक्षीवता नासत्या परिऽज्मन् शफात् अश्वस्य वाजिनः जनाय शतम् कुम्भान् असिञ्चतम् मधूनाम्॥

हे नरा नेतारौ, नासत्या अश्विनौ, परिज्मन् परिगमने अभीष्टस्य प्रापणे निमित्ते सति, पज्रियेण आङ्गिरसेन कक्षीवता रहस्यज्ञानयुक्तेन ऋषिणा सूक्तस्य द्रष्ट्रा मया वाम् युवयोः संबन्धि तत् तत्कर्म शंस्यम् शंसनीयम्। यत् (अध्याहार्यम्) जनाय आश्रिताय पुरुषाय वाजिनः बलवेगसमृद्धस्य अश्वस्य युष्मदीयस्य शफात् खुरान्निर्गतैः मधूनाम् मधुपूरितैः शतम् कुम्भान् शतसंख्याकघटैः असिञ्चतम् अवर्षतम्। यदेतन्मधुभिर्वर्षणं तच्छंस्यम्॥

सप्तमीमृचमाह—

युवं नरा स्तुवते कृष्णियाय विष्णाप्वं ददथुर्विश्वकाय।
घोषायै चित्पितृषदे दुरोणे पतिं जूर्यन्त्या अश्विनावदत्तम् ॥७॥
युवम् नरा स्तुवते कृष्णियाय विष्णाप्वम् ददथुः विश्वकाय घोषायै चित् पितृऽसदे दुरोणे पतिम् जूर्यन्त्यै अश्विनौ अदत्तम्॥

हे नरा नेतारौ, अश्विनौ युवम् युवां स्तुवते स्तुतिं कुर्वते कृष्णियाय कृष्णपुत्राय विश्वकाय वेष्णाप्वम् पुत्रं विनष्टं ददथुः दत्तवन्तौ। घोषायै चित् देवान् प्रति स्तुतिभिः घोषयति घोषा (कक्षीवतः पुत्री रुग्णा अत एव आधार्धक्यमनूढा अश्विनोरनुग्रहात् यौवनारोग्यभर्तृसंपन्ना जातेति इतिहासः) तस्यै अपि पतिम् अदत्तम् भर्तारं दत्तवन्तौ। कीदृश्यै? दुरोणे जनकस्य गृहे पितृषदे पितृसमीपे निषण्णायै जूर्यन्त्यै जरां प्राप्नुवत्यै॥ पितृषदे-षदॢ विशरणादिषु, क्विप्॥

अष्टमीमृचमाह—

युवं श्यावाय रुशतीमदत्तं महः क्षोणस्याश्विना कण्वाय ।
प्रवाच्यं तद्वृषणा कृतं वां यन्नार्षदाय श्रवो अध्यधत्तम् ॥८॥

युवम् श्यावाय रुशतीम् अदत्तम् महः क्षोणस्य अश्विना कण्वाय प्रऽवाच्यम् तत् वृषणा कृतम् वाम् यत् नार्षदाय श्रवः अधिऽअधत्तम् ॥

हे अश्विना, युवम् युवां श्यावाय श्यामवर्णाय ऋषये रुशतीम् आरोचमानां दीप्तिं अदत्तम् दत्तवन्तौ । क्षोणस्य एकत्रैव निवसते, विभक्तिव्यत्ययः, कण्वाय प्राज्ञाय ऋषये महः तेजः अदत्तम् । हे वृषणा वर्षितारौ, वाम् युवयोः संबन्धि तत् कृतम् तत्कर्म प्रवाच्यम् प्रशंसनीयं यत् नार्षदाय नृषदपुत्राय श्रवः श्रवणं अध्यधत्तम् दत्तवन्तौ स्थः ॥ क्षोणस्य–क्षि निवासगत्योः, कर्तरि ल्युट्, पृषोदरादित्वात् क्षोणभावः । नार्षदाय–ऋष्यन्धकेत्यण् ॥

नवमीमृचमाह—

पुरू वर्पांस्यश्विना दधाना नि पेदवे ऊहथुराशुमश्वम् ।
सहस्रसां वाजिनमप्रतीतमहिहनं श्रवस्यं तरुत्रम् ॥९॥

पुरु वर्पांसि अश्विना दधाना नि पेदवे ऊहथुः आशुम् अश्वम् सहस्रऽसाम् वाजिनम् अप्रतिऽइतम् अहिऽहनम् श्रवस्यम् तरुत्रम् ॥

हे अश्विना, पुरु बहूनि वर्पांसि रूपाणि दधाना धारयन्तौ युवां आशुम् शीघ्रगामिनं अश्वम् पेदवे एतस्मै स्तुवते न्यूहथुः नितरां प्रापितवन्तौ, दत्तवन्तौ । अश्विनोर्बहुरूपधारणं तु प्रसङ्गवशाद्भक्तानुग्रहार्थमिष्टरूपस्वीकरणं दैवतसामर्थ्यमावेदयति। कीदृशमश्वम्? सहस्रसाम् धनसहस्रस्य सनितारं दातारं वाजिनम् बलसमृद्धियुक्तं अप्रतीतम् अप्रतिगतमरातिभिः अहिहनम् अहीनां वृत्राणामसुराणां हन्तारं श्रवस्यम् श्रवणे दिव्ये आन्तरे वा भवं, दिव्यश्रवणावेशात्प्राणबलवेगस्य प्रादुर्भावो बोध्यः । तरुत्रम् तरितारम् ॥ सहस्रसाम्–षणु दाने । श्रवस्यम्–श्रवस्-शब्दात् भवे यत् । तरुत्रम्–तरतेः उत्रप्रत्ययः ॥

दशमीमृचमाह—

एतानि वां श्रवस्या सुदानू ब्रह्माङ्गूषं सदनं रोदस्योः ।
यद्वां पज्रासो अश्विना हवन्ते यातमिषा च विदुषे च वाजम् ॥१०॥

एतानि वाम् श्रवस्या सुदानू इति सुऽदानू ब्रह्म आङ्गूषम् सदनम् रोदस्योः यत् वाम् पज्रासः अश्विना हवन्ते यातम् इषा च विदुषे च वाजम् ॥

हे सुदानू शोभनदानौ अश्विना अश्विनौ, वाम् युवयोः संबन्धीनि एतानि उक्तानि वक्ष्यमाणानि च वीर्याणि श्रवस्या श्रवणार्हाणि सर्वैः श्रवणीयानि (अत्र अर्हार्थे यत्) भवन्ति। रोदस्योः द्यावापृथिव्योः दिवं पृथिवीं चाविश्य तद्रूपतयावस्थितयोः युवयोः सदनम् निवेशनभूतं आङ्गूषम् आघोषणीयं ब्रह्म मन्त्रात्मकं स्तोत्रं निष्पन्नं भवतीति शेषः। मन्त्रे देवतासान्निध्यमुक्तम्। यत् यदा पज्रासः आङ्गिरसाः वाम् युवां हवन्ते आह्वयन्ति तदानीं इषा च प्रेरणाशक्त्या च सह यातम् गच्छतम्, विदुषे जानते युष्मन्महिमरहस्यं इति शेषः। वाजम् च बलसमृद्धिं च प्रयच्छतम् ॥

इति प्रथमस्याष्टमे चतुर्वंशो वर्गः

एकादशीमृचमाह—

सूनोर्मानेनाश्विना गृणाना वाजं विप्राय भुरणा रदन्ता।
अगस्त्ये ब्रह्मणा वावृधाना सं विश्पलां नासत्यारिणीतम् ॥११॥

सूनोः मानेन अश्विना गृणाना वाजम् विप्राय भुरणा रदन्ता अगस्त्ये ब्रह्मणा ववृधाना सम् विश्पलाम् नासत्या अरिणीतम् ॥

हे भुरणा भर्तारौ पोषकौ, अश्विना अश्विनौ, सूनोः मानेन पुत्रस्य पूज्यबुद्ध्या, पितरि पुत्रस्येव पूज्यभावेन गृणाना स्तूयमानौ। अत्र सायण एवमाह "सूनोः कुम्भात्प्रसूतस्य अगस्त्यस्य खेलपुरोहितस्य संबन्धिना मानेन स्तुत्यस्य परिच्छेदकेन स्तोत्रेण गृणाना स्तूयमानौ"। विप्राय मेधाविने भरद्वाजाय वाजम् रदन्ता समृद्धिं विलिखन्तौ निष्पादयन्तौ युवां ब्रह्मणा मन्त्रेण अगस्त्ये महर्षौ ववृधाना प्रवर्धितौ सन्तौ हे नासत्या नासत्यौ, विश्पलाम् पूर्वं प्रस्तुतां छिन्नपादां समरिणीतम् जङ्घया समयोजयतम् ॥ भुरणा—भुरण धारणपोषणयोः, कण्ड्वादिः, पचाद्यच्। ववृधाना—वृधेर्लिटः कानच्, संहितायामभ्यासस्य दीर्घत्वम् ॥

द्वादशीमृचमाह—

कुह यान्ता सुष्टुतिं काव्यस्य दिवो नपाता वृषणा शयुत्रा।
हिरण्यस्येव कलशं निखातमुदूपथुर्दशमे अश्विनाहन् ॥१२॥

कुह यान्ता सुऽस्तुतिम् काव्यस्य दिवः नपाता वृषणा शयुऽत्रा
हिरण्यस्यऽइव कलशम् निऽखातम् उत् ऊपथुः दशमे अश्विना अहन् ॥

हे दिवो नपाता द्योतमानस्य स्वर्लोकस्य पुत्रौ, वृषणा वर्षितारौ, शयुत्रा शयुनाम्नस्त्रायकौ अश्विना हे अश्विनौ, काव्यस्य उशनसो भार्गवस्य (कविर्द्रष्टा स्तोता तत्पुत्रः काव्यः सौरांशुभूतो भृगुवंशजः) सुष्टुतिम् शोभनां स्तुतिं यान्ता प्राप्नुवन्तौ कुह कुत्र स्थाने हिरण्यस्यऽइव कलशम् सुवर्णपूरितं कलशमिव निखातम् भूम्यां निक्षिप्तं ऋषिं रेभं, सामर्थ्यात् दशमे अहन् 'दश रात्रीर्नव द्यून्' इति प्रागुक्तेः, दशमेऽहनि उदूपथुः उन्निन्यथुः ॥ कुह-सप्तम्यर्थे हप्रत्ययश्छन्दसि । शयुत्रा-अशित्रादिभ्य इत्रोत्रौ इति शीङ उत्रः, "यद्यन्तोदात्तता न स्यात् तर्ह्येवं शयुं त्रायेते इति शयुत्रौ" इति सायणः ॥

त्रयोदशीमृचमाह—

युवं च्यवानमश्विना जरन्तं पुनर्युवानं चक्रथुः शचीभिः ।
युवो रथं दुहिता सूर्यस्य सह श्रिया नासत्यावृणीत ॥१३॥

युवम् च्यवानम् अश्विना जरन्तम् पुनः युवानम् चक्रथुः शचीभिः युवोः रथम् दुहिता सूर्यस्य सह श्रिया नासत्या अवृणीत ॥

हे अश्विना अश्विनौ, युवम् युवां शचीभिः शक्तिभिः क्रियात्मिकाभिः, जरन्तम् जीर्यन्तं च्यवानम् स्तुतीनां च्यावयितारं च्यवनमृषिं पुनः युवानम् यौवनोपेतं चक्रथुः कृतवन्तौ । अपि च हे नासत्या नासत्यौ, युवोः युवयोः रथम् सूर्यस्य दुहिता सूर्या, प्रस्तुतपूर्वा श्रिया सह शोभया, कान्तिसंपदा सह अवृणीत समभजत ॥ जरन्तम्-जीर्यन्तं, व्यत्ययेन शप् । युवोः-युवयोः, यत्वाभावश्छान्दसः ॥

चतुर्दशीमृचमाह—

युवं तुग्राय पूर्व्येभिरेवैः पुनर्मन्यावभवतं युवाना ।
युवं भुज्युमर्णसो निः समुद्राद्विभिरूहथुर्ऋज्रेभिरश्वैः ॥१४॥

युवम् तुग्राय पूर्व्येभिः एवैः पुनःऽमन्यौ अभवतम् युवाना युवम् भुज्युम् अर्णसः निः समुद्रात् विऽभिः ऊहथुः ऋज्रेभिः अश्वैः ॥

हे युवाना यावयितारौ अनिष्टानां, अश्विनौ, युवम् युवां पूर्व्येभिः चिरन्तनैः एवैः गन्तृभिः, आश्रितान् भक्तान् प्रति गमनैरित्यर्थः तुग्राय भुज्योर्जनकाय पुनर्मन्यौ युष्मदीयभुज्युरक्षणात्प्रागिव परमपि स्तोतव्यौ अभवतम्। युवम् युवां भुज्युम् तुग्रपुत्रं अर्णसः अर्णस्वतः, प्राणबललक्षणात् समुद्रात् अपां राशेः सकाशात् विभिः पक्षिवद्वेगगन्तृभिः ऋज्रेभिः ऋजुगमनैः अश्वैः उक्तलक्षणैः निरूहथुः निर्गमय्य गन्तव्यं स्थानं प्रापितवन्तौ ॥ एवैः-इण् गतौ, इण्शीङ्भ्यां वन्। पुनर्मन्यौ-मन ज्ञाने, अत्र स्तुत्यर्थः, पचाद्यच्, अर्हार्थे यः। युवाना-यु मिश्रणामिश्रणयोः, कनिन्युवृषीत्यादिना कनिन्। अर्णसः-अर्णस्-शब्दान्मत्वर्थीयस्य लोपः ॥

पञ्चदशीमृचमाह—

अजोहवीदश्विना तौग्र्यो वां प्रोळ्हः समुद्रमव्यथिर्जगन्वान्।
निष्टमूहथुः सुयुजा रथेन मनोजवसा वृषणा स्वस्ति ॥ १५ ॥

अजोहवीत् अश्विना तौग्र्यः वाम् प्रऽऊळ्हः समुद्रम् अव्यथिः जगन्वान्
निः तम् ऊहथुः सुऽयुजा रथेन मनःऽजवसा वृषणा स्वस्ति ॥

हे अश्विना अश्विनौ, वाम् युवां तौग्र्यः तुग्रपुत्रो भुज्युः प्रोळ्हः पित्रा प्रापितः समुद्रम् अपां राशिं जगन्वान् तत्राप्सु निमग्नोऽपि अव्यथिः व्यथामप्राप्त एव सन् अजोहवीत् आह्वयत्। तम् तथा आहूतवन्तं, हे मनोजवसा मनोवद्वेगयुक्तौ वृषणा वर्षितारौ अश्विनौ, सुयुजा सुष्ठु अश्वैर्युक्तेन रथेन स्वस्ति क्षेमं यथा भवति तथा निरूहथुः प्राप्तव्यं प्रापितवन्तौ ॥ जगन्वान्-गमेः लिटः क्वसुः, इडभावः मकारस्य नकारश्च छन्दसि विकल्पनात् ॥

इति प्रथमस्याष्टमे पञ्चदशो वर्गः

षोडशीमृचमाह—

अजोहवीदश्विना वर्तिका वामास्नो यत्सीममुञ्चतं वृकस्य।
वि जयुषा ययथुः सान्वद्रेर्जातं विष्वाचो अहतं विषेण ॥ १६ ॥

अजोहवीत् अश्विना वर्तिका वाम् आस्नः यत् सीम् अमुञ्चतम् वृकस्य
वि जयुषा ययथुः सानु अद्रेः जातम् विष्वाचः अहतम् विषेण ॥

हे अश्विना अश्विनौ, वाम् युवां वर्तिका पक्षिस्त्री (गूढार्थः पूर्वं विवृतः) अजोहवीत् आह्वयत्। यत् सीम् यदा खलु वृकस्य छेदकस्यासुरस्य आस्नः आस्यात् अमुञ्चतम् अमोचयतं ताम्।

अपि च जयुषा जयशीलेन रथेन अद्रेः सानु पर्वतस्याग्रं वियययुः व्याप्य गतवन्तौ (परिविष्टं जाहुषमित्यत्र विवृतम्) तथा विष्वाचः विविधमतियुक्तस्यासुरस्य एतन्नाम्नः जातम् अपत्यं विपेण अहतम् श्वेलेन अहतं युवां हतवन्तावित्यध्याहार्यम् ॥ अजोहवीत्-ह्वयतेर्ङ्लुगन्ता-ल्लुङि तिपि यङो वेति इडागमः, द्विर्वचनात्पूर्वमेव ह्वयतेः संप्रसारणम्। विष्वाचः-विषु साम्येन, आभिमुख्येन अञ्चतीति विग्रहः, ऋत्विगित्यादिना क्विन् ॥

सप्तदशीमृचमाह—

शतं मेषान्वृक्ये मामहानं तमः प्रणीतमशिवेन पित्रा।
आक्षी ऋज्राश्वे अश्विनावधत्तं ज्योतिरन्धाय चक्रथुर्विचक्षे ॥१७॥

शतम् मेषान् वृक्ये ममहानम् तमः प्रऽनीतम् अशिवेन पित्रा आ अक्षी इति ऋज्राऽअश्वे अश्विनौ अधत्तम् ज्योतिः अन्धाय चक्रथुः विऽचक्षे ॥

शतं मेषान् वृक्ये चक्षदानमित्यत्र व्याख्यानमनुसन्धेयम्। शतम् मेषान् शतसंख्याकान् मेषान् उक्तस्वरूपान् वृक्ये वृकस्त्रियै ममहानम् पूजितवन्तं अशिवेन असुखकारिणा पित्रा जनकेन तमः अन्धकारं, दृष्टिराहित्यरूपं प्रणीतम् प्रापितं ऋज्राश्वं अश्विनौ चक्षुष्मन्तं कृतवन्तौ इति शेषः। तदेवोच्यते। हे अश्विनौ, अक्षी नष्टे चक्षुषी ऋज्राश्वे एतस्मिन् आ अधत्तम् पुनर्दर्शन-समर्थे आहितवन्तौ युवाम्। एवं अन्धाय ऋज्राश्वाय ज्योतिः तमःप्रध्वंसनं दिव्यं प्रकाशकं चक्षुः विचक्षे विशिष्य दर्शनाय चक्रथुः कृतवन्तौ ॥ ममहानम्-मह पूजायाम्, लिटः कानच् ॥

अष्टादशीमृचमाह—

शुनमन्धाय भरमह्वयत्सा वृकीरश्विना वृषणा नरेति।
जारः कनीन इव चक्षदान ऋज्राश्वः शतमेकं च मेषान् ॥१८॥

शुनम् अन्धाय भरम् अह्वयत् सा वृकीः अश्विना वृषणा नरा इति जारः कनीनःऽइव चक्षदानः ऋज्राऽअश्वः शतम् एकम् च मेषान् ॥

भरम् पोषकं पोषणहेतुभूतं शुनम् सुखं अन्धाय तस्मै ऋज्राश्वाय इच्छन्ती सा वृकी पूर्वोक्त-मेषादिनी हे अश्विना अश्वयुक्तौ, वृषणा अभीष्टानां वर्षितारौ, नरा नेतारौ, इति संबोध्य अह्वयत् आहूतवती। तथा आहूय किमुक्तं तया? उत्तरेणार्धर्चेनाह। कनीनःऽइव यथा प्राप्तयौवनः कामुकः, कान्तो वा जारः पारदारिकः सर्वं धनं प्रयच्छति परस्त्रियै तथा ऋज्राश्वः शतम् एकम् च

मेषान्, चक्षदानः शकलीकुर्वन्, मह्यं प्रादादिति अध्याहार्यम्। कथातत्त्वं पूर्वमुक्तम्॥ कनीनः- युवशब्दस्य कन्नादेशः, अथवा कनी दीप्तिकान्तिगतिषु, औणादिक ईनप्रत्ययः॥

एकोनविंशीमृचमाह—

महो वां मीतिरश्विना मयोभूरुत स्तामं धिष्ण्या सं रिणीथः।
अथा युवामिदह्वयत्पुरन्धिरागच्छतं सीं वृषणाववोभिः॥१९॥

महो वाम् ऊतिः अश्विना मयःऽभूः उत स्तामम् धिष्ण्या सम् रिणीथः अथ युवाम् इत् अह्वयत् पुरम्ऽधिः आ अगच्छतम् सीम् वृषणौ अवःऽभिः॥

हे अश्विना अश्विनौ, वाम् युवयोः मही महती ऊतिः रक्षा मयोभूः सुखस्य भावयित्री उत अपि च हे धिष्ण्या धिषणा स्तुतिलक्षणा धीस्तत्र सन्तौ, स्तोत्रे सन्निहिता हि देवता, स्तामम् (स्तंसतेः) स्रस्तं विश्लथितं विश्लिष्टाङ्गमिति यावत्, प्रागुक्तमत्र्यादिकं पुरुषं संरिणीथः संगताङ्गं कुरुथः। अथ अपि च युवामित् युवामेव पुरन्धिः बहुधीः घोषादिका अह्वयत् आह्वयत्, हे वृषणौ वर्षितारौ, सीम् एनां अवोभिः रक्षणैः सह आगच्छतम् अभिमुखं प्राप्तवन्तौ॥ मयोभूः- भवतेरन्तर्भावितण्यर्थात् क्विप्॥

विंशीमृचमाह—

अधेनुं दस्रा स्तर्यं विषक्तामपिन्वतं शयवे अश्विना गाम्।
युवं शचीभिर्विमदाय जायां न्यूहथुः पुरुमित्रस्य योषाम्॥२०॥

अधेनुम् दस्रा स्तर्यम् विऽसक्ताम् अपिन्वतम् शयवे अश्विना गाम् युवम् शचीभिः विऽमदाय जायाम् नि ऊहथुः पुरुऽमित्रस्य योषाम्॥

हे दस्रा कर्मसु कुशलौ, अश्विना, विषक्ताम् असंगतावयवां कृशाङ्गीं अत एव स्तर्यम् प्रसवासमर्थां अत एव अधेनुम् अदोग्ध्रीं, ईदृशीं गाम् शयवे ऋषये अपिन्वतम् पयसा अपूरयतम् (इयमपि कथा गूढार्था प्रागुक्ता)। अपि च पुरुमित्रस्य बहुसुहृद्युक्तस्य, राज्ञः, योषाम् कुमारीं शचीभिः स्वीयाभिः शक्तिभिः विमदाय ऋषये युवम् युवां जायाम् न्यूहथुः प्रापितवन्तौ॥ विषक्ताम्-षञ्ज सङ्गे। अपिन्वतम्-पिवि सेचने॥

इति प्रथमस्याष्टमे षोडशो वर्गः

एकविंशीमृचमाह—

यवं॒ वृके॑णाश्वि॒ना व॒पन्तेषं॑ दु॒हन्ता॒ मनु॑षाय दस्रा।
अ॒भि दस्युं॒ बकु॑रेणा॒ धम॑न्तोरु॒ ज्योति॑श्चक्रथु॒रार्या॑य ॥२१॥
यवम् वृकेण अश्विना वपन्ता इषम् दुहन्ता मनुषाय दस्रा अभि दस्युम् बकुरेण धमन्ता उरु ज्योतिः चक्रथुः आर्याय ॥

हे दस्रा कर्मकुशलौ, अश्विना अश्विनौ, युवां आर्याय उद्योगशीलाय मनुषाय मनुष्यार्थं, मनोरर्थे वा (मनुर्मन्ता मूलपुरुषो मनुजानां) त्रिविधं कर्म कृतवन्तौ। तान्याह–अन्नमयदेहधारणाय यवम् धान्योपलक्षणं, स्थूलदेहोपादानभूतं वृकेण विकर्तनेन लाङ्गलेन कृष्टक्षेत्रे वपन्ता आवापयन्तौ, तथा इषम् प्रेरणाशक्तिं मध्यमस्थानसंबन्धिनि प्राणदेहे दुहन्ता क्षारयन्तौ, तथा तत्रैव दस्युम् क्षपयितारमसुरं बकुरेण भासमानेन वज्रेण अभि धमन्ता अभिघ्नन्तौ, एवं त्रिविधं कर्म कृतवन्तौ युवां तस्मै आर्याय उरु ज्योतिः विस्तीर्णं ऋतं बृहत् ज्योतिः चक्रथुः कृतवन्तौ आविर्भावितवन्तावित्यर्थः॥ बकुरेण–यास्को बहुधा निर्वचनं कल्पयति, तमेवोदाहरति सायणः, वयमप्यन्यथा शरणं नास्तीति तमेवोदाहरामः "बकुरो भास्करो भयङ्करो भासमान" इत्यादि॥

द्वाविंशीमृचमाह—

आ॒थ॒र्व॒णायाश्वि॒ना दधी॒चेऽश्व्यं॒ शिर॒: प्रत्यै॑रयतम्।
स वां॒ मधु॒ प्र वो॑चदृ॒तायन्त्वा॒ष्ट्रं यद्द॑स्रावपिक॒क्ष्यं॑ वाम् ॥२२॥
आथर्वणाय अश्विना दधीचे अश्व्यम् शिरः प्रति ऐरयतम् सः वाम् मधु प्र वोचत् ऋतऽयन् त्वाष्ट्रम् यत् दस्रौ अपिऽकक्ष्यम् वाम् ॥

"तद्वां नरा सनये" इत्यत्रोक्तमेवार्थमत्र स्मारयामः। हे दस्रौ अश्विना कर्मकुशलौ अश्विनौ, आथर्वणाय अथर्वपुत्राय दधीचे दध्यङ्नाम्ने अश्व्यम् अश्वसंबन्धि शिरः प्रत्यैरयतम् प्रत्यधत्तम्। सः स च दध्यङ् वाम् युवाभ्यां ऋतायन् ऋतमात्मन इच्छन् सत्यप्रतिज्ञः सन् मधु मधुविद्यां प्र वोचत्, त्वाष्ट्रम् त्वष्टुर्विश्वकर्मणः सकाशात् (इन्द्रादिति प्राहुः) लब्धं यत् अपिकक्ष्यम् अपिहितं रहस्यं मधुप्रवर्ग्यविद्यात्मकं, तत्प्रावोचत्॥

त्रयोविंशीमृचमाह—

सदा॑ कवी सुम॒तिमा च॑के वां॒ विश्वा॒ धियो॑ अश्विना॒ प्रावतं॑ मे ।
अ॒स्मे र॒यिं ना॑सत्या बृ॒हन्त॑मपत्य॒साचं॒ श्रुत्यं॑ रराथाम् ॥२३॥
सदा॑ क॒वी॒ इति॑ सु॒ऽम॒तिम् आ च॒के॒ वा॒म् विश्वाः॑ धियः॑ अ॒श्वि॒ना॒ प्र अ॒व॒त॒म् मे॒ अ॒स्मे इति॑ र॒यिम् ना॒स॒त्या॒ बृ॒ह॒न्त॒म् अ॒प॒त्य॒ऽसाच॑म् श्रुत्य॑म् र॒रा॒था॒म् ॥

हे कवी द्रष्टारौ सर्वस्य, अश्विना अश्विनौ, वाम् युवयोः सुमतिम् शोभनां बुद्धिं सदा सर्वदा आ चके आभिमुख्येन प्रार्थये, मे मत्संबन्धिनीः विश्वाः धियः सर्वाः स्तुतिलक्षणाः बुद्धीः प्रावतम् प्रकर्षेण रक्षतम्। अपि च हे नासत्या नासत्यौ, अस्मे अस्मभ्यं बृहन्तम् महान्तं अपत्यसाचम् अपत्यैः सह सचते संगच्छते इति अपत्यसाच् तं, सन्तानेऽपि अविच्छेदेन संगतमित्यर्थः, श्रुत्यम् प्रशंसनीयं एवंभूतं सर्वोत्कृष्टं रयिम् धनं रराथाम् प्रयच्छतम्॥ अस्मे—चतुर्थीबहुवचनस्य शे आदेशः। अपत्यसाचम्—छान्दसो ण्विः। श्रुत्यम्—श्रुतिः स्तुतिस्तत्र भवं, यत्। रराथाम्—रा दाने, लोटि व्यत्ययेनात्मनेपदम्, शपः श्लुः छन्दसि ॥

चतुर्विंशीमृचमाह—

हिर॑ण्यहस्तमश्विना रराणा पुत्रं न॑रा वध्रिम॒त्या अ॑दत्तम् ।
त्रिधा॑ ह॒ श्याव॑मश्विना विक॒स्तमु॒ज्जीव॑से॒ ऐर॑यतं सुदानू ॥२४॥
हिर॑ण्यऽहस्तम् अ॒श्वि॒ना॒ रराणा पुत्रम् नरा॒ वध्रि॑ऽमत्याः अ॒द॒त्त॒म् त्रिधा॑ ह॒ श्याव॑म् अ॒श्वि॒ना॒ वि॒ऽक॒स्तम् उत् जी॒व॒से॒ ऐर॑यतम् सु॒दा॒नू॒ इति॑ सु॒ऽदा॒नू॒ ॥

हे नरा नेतारौ, अश्विनौ, युवां रराणा रममाणौ सन्तौ वध्रिमत्याः एतस्यै ब्रह्मवादिन्यै (पूर्वं प्रस्तुतेयम्) हिरण्यहस्तम् एतं पुत्रम् अदत्तम् प्रायच्छतम्। अपि च हे अश्विना अश्विनौ, सुदानू शोभनदानौ, त्रिधा त्रेधा विकस्तम् विच्छिन्नं असुरैरिति शेषः, श्यावम् ऋषिं जीवसे जीवितुं उदैरयतम् उदगमयतम्। ह पादपूरणः॥ त्रिषु स्थानेषु अन्नप्राणमनःसु प्रहतं विनाशितमृषिमुदैरयतमित्यर्थः॥ रराणा—रमतेः शानच्, शपः श्लुः, व्यत्ययेन मकारस्यात्वम्। विकस्तम्—कसि गतिविनाशनयोरित्यस्मात् क्तः॥

पञ्चविंशीमृचमाह—

एतानि वामश्विना वीर्याणि प्र पूर्व्याण्यायवोऽवोचन् ।
ब्रह्म कृण्वन्तो वृषणा युवभ्यां सुवीरासो विदथमा वदेम ॥२५॥
एतानि वाम् अश्विना वीर्याणि प्र पूर्व्याणि आयवः अवोचन् ब्रह्म कृण्वन्तः वृषणा युवऽभ्याम् सुऽवीरासः विदथम् आ वदेम ॥

हे अश्विना अश्विनौ, वाम् युवयोः पूर्व्याणि चिरन्तनानि एतानि एवमुक्तानि वीर्याणि वीरकर्माणि आयवः मनुष्याः पूर्वे पितरः प्रावोचन् प्रोक्तवन्तः । वृषणा हे वर्षितारौ, युवभ्याम् युवाभ्यां वयमपि ब्रह्म कृण्वन्तः मन्त्रात्मकं स्तोत्रं कुर्वन्तः सुवीरासः शोभनवीर्योपेताः सन्तः विदथम् ज्ञानागमं सर्वोत्कृष्टज्ञानलाभं आ वदेम आभिमुख्येन प्रशंसेम ॥ विदथम्—रुविदिभ्यां किदिति अथप्रत्ययः ॥

इति प्रथमस्याष्टमे सप्तदशो वर्गः

'आ वामि'त्येकादशर्चं तृतीयं सूक्तं कक्षीवत आर्षं त्रैष्टुभमाश्विनम् ॥

तत्र प्रथमामृचमाह—

आ वां रथो अश्विना श्येनपत्वा सुमृळीकः स्ववाँ यात्वर्वाङ् ।
यो मर्त्यस्य मनसो जवीयान्त्रिवन्धुरो वृषणा वातरंहाः ॥१॥
आ वाम् रथः अश्विना श्येनऽपत्वा सुऽमृळीकः स्वऽवान् यातु अर्वाङ् यः मर्त्यस्य मनसः जवीयान् त्रिऽवन्धुरः वृषणा वातऽरंहाः ॥

हे अश्विना अश्विनौ, वाम् युवयोः संबन्धी रथः, अर्वाङ् अस्मत्समीपं आयातु आगच्छतु । कीदृशः? श्येनपत्वा श्येनः पतत्री इव शीघ्रं पतन् सुमृळीकः शोभनसुखयुक्तः स्ववान् स्वः आत्मा तद्वान् वशी इत्यर्थः, धनवानिति सायणः, हे वृषणा वर्षितारौ यः युष्मद्रथः मर्त्यस्य मनुष्यस्य मनसः जवीयान् अतिशयेन वेगवान् त्रिवन्धुरः त्रिविधसारथिस्थानयुक्तः वातरंहाः वायुवेग इव वेगवान् । मनसो जवीयानित्युक्त्या जगद्व्यापनं, वातरंहा इत्यनेन अप्रतिहतगतित्वं चेति भेदोऽवधेयः । त्रिवन्धुरः लोकत्रयापेक्षया स्थानत्रयम् बोध्यम् ॥ श्येनपत्वा—पततेः, अन्येभ्योऽपि दृश्यत इति वनिप् ॥

द्वितीयामृचमाह—

त्रिवन्धुरेण त्रिवृता रथेन त्रिचक्रेण सुवृता यातमर्वाक् ।
पिन्वतं गा जिन्वतमर्वतो नो वर्धयतमश्विना वीरमस्मे ॥२॥
त्रिऽवन्धुरेण त्रिऽवृता रथेन त्रिऽचक्रेण सुऽवृता आ यातम् अर्वाक् पिन्वतम् गाः जिन्वतम् अर्वतः नः वर्धयतम् अश्विना वीरम् अस्मे इति ॥

त्रिवन्धुरेणेत्यादौ त्रिकमधिकृत्य हिरण्यस्तूपसूक्ते (३४ सू.) विचारितम् । त्रिवन्धुरेण त्रिविधसारथिस्थानोपेतेन त्रिवृता त्रिधा वर्तमानेन त्रिचक्रेण चक्रत्रयोपेतेन सुवृता सुष्ठु वर्तमानेन, गच्छतेत्यर्थः रथेन, अर्वाक् समीपं अस्मदभिमुखं आयातम् आगच्छतम् । हे अश्विना, तथा आगत्य गाः अस्मदीयाः चिद्रश्मिलक्षणाः पिन्वतम् अमृतेन पूरयतम् । नः अस्माकं अर्वतः अश्वान् प्राणबललक्षणान् जिन्वतम् प्रीणयतम् । अपि च अस्मे अस्माकं वीरम् वीर्यबलं च वर्धयतम् प्रवृद्धं कुरुतम् ॥

तृतीयामृचमाह—

प्रवद्यामना सुवृता रथेन दस्राविमं शृणुतं श्लोकमद्रेः ।
किमङ्ग वां प्रत्यवर्तिं गमिष्ठाहुर्विप्रासो अश्विना पुराजाः ॥३॥
प्रवत्ऽयामना सुऽवृता रथेन दस्रौ इमम् शृणुतम् श्लोकम् अद्रेः किम् अङ्ग वाम् प्रति अवर्तिम् गमिष्ठा आहुः विप्रासः अश्विना पुराऽजाः ॥

हे दस्रौ अश्विनौ, प्रवद्यामना प्रकृष्टगमनेन सुवृता सुष्ठु वर्तमानेन, सुखेन गच्छता, रथेन आगत्य अद्रेः आदरं कुर्वतः स्तोतुर्मम इमम् श्लोकम् इमां स्तोत्रलक्षणां वाचं शृणुतम् आकर्णयतम् । अङ्ग अश्विना हे अश्विनौ, पुराजाः पुरा जाताः, पूर्वे विप्रासः मेधाविनः वाम् युवां अवर्तिम् अवर्तनं, स्तोतॄणां दैव्ये पदे स्थिरवासाभावं प्रति परिहर्तुं गमिष्ठा गन्तृतमौ आहुः वदन्ति, किम् "प्रदर्शनफलप्रश्ने वर्तते, किं न कथयन्ति कथयन्त्येवे"ति सायणः । एवं सति युवाभ्यामागन्तव्यं मामुद्दिश्य ॥ प्रवद्यामना—सोपसृष्टे धात्वर्थे वर्तमानात् प्रशब्दात् 'उपसर्गाच्छन्दसि धात्वर्थे' इति वतिः, या प्रापणे, भावे मनिन्, ततो बहुव्रीहिः, प्रवत् याम ययोस्तौ इति । अद्रेः—दृङ् आदरे, आङ्पूर्वादस्मादौणादिकः किप्रत्ययः आङो ह्रस्वश्च । गमिष्ठा—गन्तृशब्दात् तुश्छन्दसीति इष्ठन्, विभक्तेराकारः ॥

चतुर्थीमृचमाह—

आ वां श्येनासो अश्विना वहन्तु रथे युक्तास आशवः पतङ्गाः।
ये अप्तुरो दिव्यासो न गृध्रा अभि प्रयो नासत्या वहन्ति ॥ ४ ॥

आ वाम् श्येनासः अश्विना वहन्तु रथे युक्तासः आशवः पतङ्गाः ये अप्ऽतुरः दिव्यासः न गृध्राः अभि प्रयः नासत्या वहन्ति ॥

हे अश्विना अश्विनौ, रथे युक्तासः युक्ताः आशवः व्याप्नुवन्तः पतङ्गाः पतनपटवः श्येनासः पक्षिण इव पतन्तोऽश्वाः वाम् युवां आ वहन्तु अस्मदभिमुखमानयन्तु । ये अश्वाः अप्तुरः आप इव प्रवाहत्वरोपेताः दिव्यासो न गृध्राः दिव्याः पक्षिविशेषा इव शीघ्रगामिनः हे नासत्या, प्रयः प्रियं वस्तु किमपि दिव्यं, अन्नमिति सायणः, अभि अस्मदभिमुखं वहन्ति प्रापयन्ति ॥ अप्तुरः—तुर त्वरणे, क्विप् ॥

पञ्चमीमृचमाह—

आ वां रथं युवतिस्तिष्ठदत्र जुष्ट्वी नरा दुहिता सूर्यस्य ।
परि वामश्वा वपुषः पतङ्गा वयो वहन्त्वरुषा अभीके ॥ ५ ॥

आ वाम् रथम् युवतिः तिष्ठत् अत्र जुष्ट्वी नरा दुहिता सूर्यस्य परि वाम् अश्वाः वपुषः पतङ्गाः वयः वहन्तु अरुषाः अभीके ॥

हे नरा नेतारावश्विनौ, युवतिः यौवनोपेता सूर्यस्य दुहिता सूर्या जुष्ट्वी प्रीता सती वाम् युवयोः अत्र रथम् इमं रथं आतिष्ठत् आस्थिता आरूढवती । वाम् युवां तया सहितौ वपुषः वपुष्मन्तः, प्रशंसार्थस्य मत्वर्थीयस्य लोपः, पतङ्गाः उत्पतनपटवः वयः गच्छन्तः अरुषाः आरोचमानाः अश्वाः अभीके अस्मत्समीपे परि वहन्तु परिप्रापयन्तु ॥ जुष्ट्वी—जुषी प्रीतिसेवनयोः, औणादिकः क्तुप्रत्ययः, वोतो गुणवचनादिति ङीप् ॥

इति प्रथमस्याष्टमेऽष्टावशो वर्गः

षष्ठीमृचमाह—

उद्वन्दनमैरतं दंसनाभिरुद्रेभं दस्रा वृषणा शचीभिः ।
निष्टौग्र्यं पारयथः समुद्रात्पुनश्च्यवानं चक्रथुर्युवानम् ॥ ६ ॥

उत् वन्दनम् ऐरतम् दंसनाभिः उत् रेभम् दस्रा वृषणा शचीभिः निः

तौग्र्यम् पारयथः समुद्रात् पुनरिति च्यवानम् चक्रथुः युवानम् ॥

प्रागुक्तान्येवाश्विनवीर्याणि प्रस्तौति । हे अश्विनौ, वन्दनम् ऋषिं दंसनाभिः स्वीयैः कर्मभिः उदैरतम् उदगमयतं अधोऽन्धकारकूपात् । हे दस्रा कर्मवीरौ, वृषणा वर्षितारौ, शचीभिः शक्तिभिः स्वीयाभिः रेभम् ऋषिं उत् उदैरयतं, उत्तारितवन्तौ अज्ञानान्धकूपात् । तथा तौग्र्यम् तुग्रपुत्रं भुज्युं समुद्रात् निष्पारयथः तीरं प्रापितवन्तौ । च्यवानम् च्यवनमृषिं पुनर्युवानम् चक्रथुः वृद्धं पुनर्यौवनं प्रापितवन्तौ ॥ ऐरतम्-ईर गतौ कम्पने च, णिलोपः छान्दसः ॥

सप्तमीमृचमाह—

युवमत्रयेऽवनीताय तप्तमूर्जमोमानमश्विनावधत्तम् ।
युवं कण्वायापिरिप्ताय चक्षुः प्रत्यधत्तं सुष्टुतिं जुजुषाणा ॥ ७॥

युवम् अत्रये अवऽनीताय तप्तम् ऊर्जम् ओमानम् अश्विनौ अधत्तम् युवम् कण्वाय अपिऽरिप्ताय चक्षुः प्रति अधत्तम् सुऽस्तुतिम् जुजुषाणा ॥

हे अश्विनौ, युवम् युवां अवनीताय अधस्तात् प्रापिताय शत्रुभिरासुरबलैः अत्रये ऋषये तप्तम् पीडाकरं तापं अवारयेथाम् । अपि च अस्मै ओमानम् रक्षासुखकरं ऊर्जम् वीर्यवद्बलं अधत्तम् प्रायच्छतम् । सुष्टुतिम् शोभनां स्तुतिं जुजुषाणा सेवमानौ युवम् युवां अपिरिप्ताय अन्धकार-पटलेन पिहितदृष्टये कण्वाय महर्षये चक्षुः दर्शनेन्द्रियं प्रत्यधत्तम् प्रत्यस्थापयतम् ॥ ओमानम्-अवतेर्मनिः, वकारस्य ऊठ्, गुणः । अपिरिप्ताय-लिप उपदेहे, लस्य रेफः छान्दसः, कर्मणि निष्ठा । जुजुषाणा-जुषी प्रीतिसेवनयोः, छान्दसो लिट्, लिटः कानच्, विभक्तेराकारः ॥

अष्टमीमृचमाह—

युवं धेनुं शयवे नाधितायापिन्वतमश्विना पूर्व्याय ।
अमुञ्चतं वर्तिकामंहसो निः प्रति जङ्घां विश्पलाया अधत्तम् ॥८॥

युवम् धेनुम् शयवे नाधिताय अपिन्वतम् अश्विना पूर्व्याय अमुञ्चतम् वर्तिकाम् अंहसः निः प्रति जङ्घाम् विश्पलायाः अधत्तम् ॥

हे अश्विना अश्विनौ, युवम् युवां पूर्व्याय पुरातनाय नाधिताय याचमानाय शयवे शयानाय ऋषये प्रस्तुतपूर्वाय धेनुम् अपिन्वतम् पयसा पूरितवन्तौ, अमृतक्षरणासमर्थां चिन्मयरश्मिलक्षणां

गां पुनरमृतस्य दोग्ध्रीमकुरुतम्। अपि च वर्तिकाम् पक्षिस्त्रियं तल्लक्षितमूर्ध्वं दिव्यं धाम जिगमिषुं जीवात्मानं वृकेण असुरेण ग्रस्तं अंहसः वृकमुखलक्षणात् पापात् निरमुञ्चतम् निरमोचयतम्। तथा विश्पलायाः जङ्घाम् छिन्नजङ्घायै असुरबलैरापादितगतिभङ्गायै विशां पालयित्र्यै पुनः जङ्घाम् प्रत्यधत्तम् गमनसाधनं प्रत्यस्थापयतम्॥

नवमीमृचमाह—

युवं श्वेतं पेदव इन्द्रजूतमहिहनमश्विनादत्तमश्वम्।
जोहूत्रमर्यो अभिभूतिमुग्रं सहस्रसां वृषणं वीड्वङ्गम्॥९॥

युवम् श्वेतम् पेदवे इन्द्रऽजूतम् अहिऽहनम् अश्विना अदत्तम् अश्वम् जोहूत्रम् अर्यः अभिऽभूतिम् उग्रम् सहस्रऽसाम् वृषणम् वीळुऽअङ्गम्॥

हे अश्विना अश्विनौ, युवम् युवां पेदवे शरणं प्रपन्नाय राजर्षये श्वेतम् स्वच्छं सत्त्वभूयस्त्वलक्षणं अश्वम् क्रियादाक्ष्योपलक्षणं प्राणबलभूयिष्ठं साङ्केतिकं अश्वं अदत्तम् दत्तवन्तौ। कीदृशमश्वम्? इन्द्रजूतम् इन्द्रेण युवाभ्यां गमितं, अहिहनम् अहेर्वृत्रस्य हन्तारं जोहूत्रम् अतिशयेनाह्वातारं देवानां असुरैः सह संग्रामे, अर्यः अरेः शत्रोः अभिभूतिम् अभिभवितारं उग्रम् उद्गूर्णबलं सहस्रसाम् संपत्सहस्रस्य दातारं वृषणम् अभीष्टस्य वर्षितारं वीड्वङ्गम् दृढाङ्गम्॥ इन्द्रजूतम्—जु सौत्रो धातुर्गत्यर्थः, अन्तर्भावितण्यर्थः, कर्मणि निष्ठा। जोहूत्रम्—ह्वयतेर्यङ्लुगन्तादौणादिकः त्रप्प्रत्ययः। अर्यः—अरिशब्दात् षष्ठ्येकवचने छन्दसि गुणस्य विकल्पितत्वादभावे यणादेशः॥

दशमीमृचमाह—

ता वां नरा स्वर्वसे सुजाता हवामहे अश्विना नाधमानाः।
आ न उप वसुमता रथेन गिरो जुषाणा सुविताय यातम्॥१०॥

ता वाम् नरा सु अर्वसे सुऽजाता हवामहे अश्विना नाधमानाः आ नः उप वसुऽमता रथेन गिरः जुषाणा सुविताय यातम्॥

नरा नेतारौ, सुजाता शोभनजन्मानौ, हे अश्विना अश्विनौ, ता वाम् तौ युवां नाधमानाः याचमानाः, दिव्यं श्रेयः प्रार्थयमानाः वयं अवसे रक्षणाय सु हवामहे शोभनं आह्वयामहे। गिरः स्तुतीः जुषाणा सेवमानौ युवां वसुमता संपद्युक्तेन रथेन, सुविताय सुष्ठु प्राप्तव्याय दुरितप्रति-

द्वन्द्विने नित्यकल्याणाय नः अस्मान् उपायातम् उपागच्छतम् ॥ सुविताय-सुपूर्वादेतेः निष्ठा, तन्वादित्वादुवङ् ॥

एकादशीमृचमाह—

आ श्येनस्य जवसा नूतनेनास्मे यातं नासत्या सजोषाः ।
हवे हि वामश्विना रातहव्यः शश्वत्तमाया उषसो व्युष्टौ ॥ ११ ॥
आ श्येनस्य जवसा नूतनेन अस्मे इति यातम् नासत्या सऽजोषाः हवे हि वाम् अश्विना रातऽहव्यः शश्वत्ऽतमायाः उषसः विऽउष्टौ ॥

हे नासत्या नासत्यौ, अश्विना अश्विनौ, सजोषाः सजोषसौ समानं प्रीतौ, श्येनस्य उत्पतनपटोरश्वस्य नूतनेन प्रत्यग्रेण आयासगन्धेनाप्यस्पृष्टेन जवसा वेगेन युक्तौ युवां अस्मे अस्मदर्थं आयातम् आगच्छतम् । हि यस्मात् वाम् युवाभ्यां रातहव्यः रातेन दत्तेन हव्येन अर्पणीयद्रव्येण युक्तः सन् शश्वत्तमायाः शाश्वत्याः उपासककृते प्रादुर्भावार्थं नित्यसिद्धायाः उषसः चिन्मयप्रभायाः व्युष्टौ विवासने प्रकाशने हवे आह्वयामि, तस्मादायातम् । उषसः प्रादुर्भावे रथिनोरश्विनोरागतिस्तस्या आरोहार्थम् ॥ हवे-ह्वेञो लडुत्तमैकवचने संप्रसारणं छान्दसम् ॥

इति प्रथमस्याष्टम एकोनविंशो वर्गः

'आ वां रथमि'ति दशर्चं चतुर्थं सूक्तं कक्षीवत आर्षं जागतमाश्विनम् ॥

तत्र प्रथमामृचमाह—

आ वां रथं पुरुमायं मनोजुवं जीराश्वं यज्ञियं जीवसे हुवे ।
सहस्रकेतुं वनिनं शतद्वसुं श्रुष्टीवानं वरिवोधामभि प्रयः ॥ १ ॥
आ वाम् रथम् पुरुऽमायम् मनःऽजुवम् जीरऽअश्वम् यज्ञियम् जीवसे हुवे सहस्रऽकेतुम् वनिनम् शतत्ऽवसुम् श्रुष्टीऽवानम् वरिवःऽधाम् अभि प्रयः ॥

हे अश्विनौ, वाम् युवयोः रथम् जीवसे दिव्याय जीवनाय प्रयः अभि प्रियं, प्रेमास्पदं दिव्यं वस्त्वभिलक्ष्य आहुवे आह्वयामि । कीदृशं रथम्? पुरुमायम् बहुद्भुतकर्माणं मनोजुवम् मन इव शीघ्रगामिनं जीराश्वम् जीरः जववान् अश्वो यस्य सः तं, यज्ञियम् यजनेष्वाह्वातुमर्हं सहस्रकेतुम् संपत्सहस्रस्य केतयितारं ज्ञापयितारं वनिनम् संभजनीयेन रसपदवेदनीयेनानन्देन युक्तं शतद्वसुम् शतविधधनोपेतं श्रुष्टीवानम् दिव्यश्रवणशालिनं वरिवोधाम् स्थानं सुखं वा दधानम् ॥

जीराश्वम्–जु इति गत्यर्थः, जोरी चेति रक् ईकारान्तादेशश्च । शतद्वसुम्–छान्दसस्तकारोपजनः॥

द्वितीयामृचमाह—

ऊर्ध्वा धीतिः प्रत्यस्य प्रयामन्यधायि शस्मन्त्समयन्त आ दिशः।
स्वदामि घर्मं प्रति यन्त्युतय आ वामूर्जानी रथमश्विनारुहत्॥२॥
ऊर्ध्वा धीतिः प्रति अस्य प्रऽयामनि अधायि शस्मन् सम् अयन्ते आ दिशः
स्वदामि घर्मम् प्रति यन्ति ऊतयः आ वाम् ऊर्जानी रथम् अश्विना अरुहत्॥

अस्य रथस्य प्रयामनि प्रयाणे सति शस्मन् शंसने, अश्विनोः स्तवने धीतिः धारणात्मिका अस्मद्बुद्धिः ऊर्ध्वा उन्मुखा दिव्यं ऋतज्योतिःस्थानं प्रति प्रत्यधायि प्रतिष्ठिताऽभवत्। तथा ऊर्ध्वदृष्टौ सत्यां दिशः सर्वाः आ सर्वतः सम् अयन्ते संगच्छन्ते। दिशः सर्वाश्च एकीभूय मदीयां दृष्टिमूर्ध्वगतां द्रढयन्ति। अथ च अहं घर्मम् महावीरलक्षणं तप्तं दीप्तं च शरीरं स्वदामि स्वादूकरोमि, देवानामुपभोग्यं करोमि। ऊतयः (अवतेः कर्तरि क्तिच्) अवितारः रक्षकाः देवाः उक्तलक्षणं घर्मं प्रति यन्ति प्रति गच्छन्ति संस्कारार्थम्। अपि च हे अश्विना अश्विनौ, वाम् रथम् युवयोः रथं ऊर्जानी सूर्यस्य दुहितेति सायणः, सामर्थ्यात् सूर्या भवति, ऊर्जवती, महाबलेति शब्दार्थः, सा आ अरुहत् आरूढवती॥ प्रयामनि–यातेः भावे मनिन्। शस्मन्–शंसतेर्मनिन्॥

तृतीयामृचमाह—

सं यन्मिथः पस्पृधानासो अग्मत शुभे मखा अमिता जायवो रणे।
युवोरह प्रवणे चेकिते रथो यदश्विना वहथः सूरिमा वरम्॥३॥
सम् यत् मिथः पस्पृधानासः अग्मत शुभे मखाः अमिताः जायवः रणे
युवोः अह प्रवणे चेकिते रथः यत् अश्विना वहथः सूरिम् आ वरम्॥

मखाः यज्ञाः, मत्वर्थलक्षणा, यज्ञशालिनः अमिताः अत्यधिकाः जायवः जयशीलाः यजमानाः रणे देवविरोधिभिः सह संग्रामे शुभे शोभनाय, जयात्मककल्याणार्थं मिथः पस्पृधानासः परस्परं अहमहमिकया अरातिवधविषये स्पर्धमानाः यत् यदा सम् अग्मत संगच्छन्ते, तदानीं अश्विना हे अश्विनौ, युवोः अह युवयोरेव रथः प्रवणे दिवः निम्नप्रदेशे भूतले यजमानस्थाने चेकिते ज्ञायते, देवानां मध्ये प्रथमं युवामेवागच्छथ इत्यर्थः। यत् येन रथेन सूरिम् विचक्षणं ऋषिं प्रति वरम्

वरणीयं श्रेष्ठं दिव्यं वस्तु आवहथः प्रापयथः ॥ पस्पृधानासः-स्पर्ध संघर्षे, छान्दसो लिट्, कानच् । अग्मत-गमेश्छान्दसो लङ् । चेकिते-कित ज्ञाने, छान्दसो वर्तमाने लिट् ॥

चतुर्थीमृचमाह—

युवं भुज्युं भुरमाणं विभिर्गतं स्वयुक्तिभिर्निवहन्ता पितृभ्य आ ।
यासिष्टं वर्तिर्वृषणा विजेन्यं दिवोदासाय महि चेति वामवः ॥४॥

युवम् भुज्युम् भुरमाणम् विऽभिः गतम् स्वयुक्तिऽभिः निऽवहन्ता पितृऽभ्यः आ यासिष्टम् वर्तिः वृषणा विऽजेन्यम् दिवःऽदासाय महि चेति वाम् अवः ॥

हे वृषणा वर्षितारावश्विनौ, युवम् युवां विभिः पतनशीलैरश्वैः भुरमाणम् म्रियमाणं गतं भुज्युम् समुद्रे निमग्नं तुग्रपुत्रं स्वयुक्तिभिः स्वतः युज्यमानैरश्वैर्नौभिश्च निवहन्ता नितरां वहन्तौ, पितृभ्यः आ आङ् मर्यादायां, पूर्वे पितरः यत्र दिव्ये धामनि आसते तावत्पर्यन्तं विजेन्यम् विजने अत्यन्तमेकान्तवासस्थाने भवं वर्तमानं वर्तिः गृहं प्रति यासिष्टम् अगच्छतम् । (अस्य गूढार्थो विवृतः प्राक्) अपि च दिवोदासाय कृतं महि महत् वाम् अवः युष्मद्रक्षणं चेति ज्ञायते ॥ भुरमाणम्-बिभर्तेः, कर्मणि लटः शानच्, व्यत्ययेन शः, बहुलं छन्दसीति उत्वम् । विजेन्यम्-विजने भवः, भवे छन्दसीति यत्, एत्वं छान्दसम् ॥

पञ्चमीमृचमाह—

युवोरश्विना वपुषे युवायुजं रथं वाणी येमतुरस्य शर्ध्यम् ।
आ वां पतित्वं सख्याय जग्मुषी योषावृणीत जेन्या युवां पती ॥५॥

युवोः अश्विना वपुषे युवाऽयुजम् रथम् वाणी इति येमतुः अस्य शर्ध्यम् आ वाम् पतिऽत्वम् सख्याय जग्मुषी योषा अवृणीत जेन्या युवाम् पती इति ॥

अश्विना हे अश्विनौ, युवोः युवयोः वाणी वननीये वाचौ, अश्विनोर्द्वित्वात् वाचो द्वयं वपुषे रूपाय, दर्शनीयतायै युवायुजम् युवाभ्यां युज्यमानं रथम्, अस्य रथस्य शर्ध्यम् लक्ष्यभूतं स्थानं ऋतं सौरं ज्योतिः प्राप्तव्यं येमतुः प्रापयामासतुः । ततः परं आ जग्मुषी आगतवती जेन्या जयशीला योषा सूर्या सख्याय सखित्वाय वाम् युवयोः पतित्वम् अवृणीत, युवाम् पती इति मम युवामेव भर्तारावितिं अश्विनोः पतित्वमवृणीत सूर्या, या प्रथमं सख्यायागता ॥ युवायुजम्-

युवावौ द्विवचने इति युष्मच्छब्दस्य अविभक्तावपि युवादेशः। शर्ध्यम्-शृधु प्रसहने, अस्मात् ण्यन्तादचो यदिति यत्। जेन्या-जयतेः, औणादिक एन्यप्रत्ययः॥

इति प्रथमस्याष्टमे विंशो वर्गः

षष्ठीमृचमाह—

युवं रेभं परिषूतेरुरुष्यथो हिमेन घर्मं परितप्तमत्रये।
युवं शयोरवसं पिप्यथुर्गवि प्र दीर्घेण वन्दनस्तार्यायुषा॥६॥

युवम् रेभम् परिऽसूतेः उरुष्यथः हिमेन घर्मम् परिऽतप्तम् अत्रये युवम् शयोः अवसम् पिप्यथुः गवि प्र दीर्घेण वन्दनः तारि आयुषा॥

हे अश्विनौ, युवम् युवां रेभम् ऋषिं परिषूतेः परितः प्रेरकात् सङ्कोचनरूपादुपद्रवात् उरुष्यथः विकासनेन, विस्तारणेन रक्षथः। उरुष्यतिः रक्षाकर्मेति यास्कमुदाहरति सायणः। अत एव रक्षास्वरूपमत्र व्याख्यातम्, उरुशब्दस्य विस्तारार्थप्रसिद्धेः। तथा अत्रये ऋषये परितप्तम् घर्मम् हिमेन अवारयेथाम् (असकृत्प्रस्तुतेयं कथा गूढार्थगर्भिता)। अपि च शयोः ऋषेः गवि निवृत्तप्रसवायां अवसम् पालकं पयः युवम् युवां पिप्यथुः वर्धितवन्तौ। तथा वन्दनः ऋषिः जीर्णाङ्गः दीर्घेण आयुषा युवाभ्यां दत्तेन प्रतारि प्रवर्धितः, प्रपूर्वस्तिरतिर्वर्धनार्थः॥ अवसम्-अवतेरौणादिकः असच्। पिप्यथुः-प्यायी वृद्धौ, पीभावः, व्यत्ययेन परस्मैपदम्॥

सप्तमीमृचमाह—

युवं वन्दनं निर्ऋतं जरण्यया रथं न दस्रा करणा समिन्वथः।
क्षेत्रादा विप्रं जनथो विपन्यया प्र वामत्र विधते दंसना भुवत्॥७॥

युवम् वन्दनम् निःऽऋतम् जरण्यया रथम् न दस्रा करणा सम् इन्वथः क्षेत्रात् आ विप्रम् जनथः विपन्यया प्र वाम् अत्र विधते दंसना भुवत्॥

हे दस्रा अश्विनौ, युवम् युवां जरण्यया जरणक्रियार्हयाऽन्त्यावस्थया निर्ऋतम् निःशेषेण सङ्कटं प्राप्तं वन्दनम् ऋषिं करणा कर्तारौ कर्मणां, युवां समिन्वथः समधत्तं पुनर्युवानमकुरुतम्। तत्र दृष्टान्तः-रथम् न यथा शिल्पी शिथिलं रथं पुनरपि अभिनवं करोति तद्वत्। अपि च विपन्यया स्तुत्या "गर्भस्थितेन वामदेवेन स्तुतौ सन्तौ" इति सायणः। तर्हि नायं मानुषगर्भः, अन्तर्दिव्यं जन्म प्राप्तुं दिव्यगर्भप्रवेश एवाभिप्रेतः। 'अहं मनुरभवं सूर्यश्चे'त्यादिमन्त्रवर्णः

मानुषे गर्भे वसतो वामदेवस्यर्षेर्दृष्टिरिति न भ्रमितव्यम्। क्षेत्रात् दिव्यगर्भस्थानात् विप्रम् ऋषिं जनथः जनयथश्च, आ समुच्चये। तथा वाम् युवयोः दंसना कर्म रक्षणात्मकं अत्र अस्मै विधते परिचरते भक्ताय यजमानाय प्रभुवत् प्रभवतु॥ निर्क्तम्-ऋ गतौ, कर्मणि निष्ठा। जरण्यया-जरणार्हा जरण्या, छन्दसि चेति यः। करणा-करोतेः, युच्। विधते-विध विधाने, लटः शतृ। भुवत्-लेट्यडागमः, शपो लुक् छन्दसि॥

अष्टमीमृचमाह—

अगंच्छतं कृपंमाणं परावति पितुः स्वस्य त्यजसा निबाधितम्।
स्वर्वतीरित ऊतीर्युवोरह चित्रा अभीके अभवन्नभिष्टयः॥ ८॥
अगंच्छतम् कृपंमाणम् पराऽवति पितुः स्वस्य त्यजसा निऽबाधितम्
स्वःऽवतीः इतः ऊतीः युवोः अह चित्राः अभीके अभवन् अभिष्टयः॥

हे अश्विनौ, परावति परस्ताद् दूरे स्वस्य पितुः तुग्रस्य त्यजसा त्यागेन निबाधितम् पीडितं भुज्युं कृपमाणम् स्तुवन्तं अगच्छतम् रक्षणाय गतवन्तौ युवाम्। हे देवौ, इतः अस्मात्, अत एव स्वर्वतीः ज्योतिष्मत्यः ऋतसंबन्धिन्यः चित्राः अद्भुताः युवोः अह युवयोरेव ऊतीः ऊतयः रक्षाः अभीके समीपे अभिष्टयः सर्वैरभ्येषणीयाः अभवन् भवन्ति॥ कृपमाणम्-कृपतिः स्तुतिकर्मा, तुदादिः॥

नवमीमृचमाह—

उत स्या वां मधुमन्मक्षिकारपन्मदे सोमस्यौशिजो हुवन्यति।
युवं दधीचो मन आ विवासथोऽथा शिरः प्रति वामश्व्यं वदत्॥ ९॥
उत स्या वाम् मधुऽमत् मक्षिका अरपत् मदे सोमस्य औशिजः हुवन्यति
युवम् दधीचः मनः आ विवासथः अथ शिरः प्रति वाम् अश्व्यम् वदत्॥

उत अपि च मधुमत् मधुमन्तौ वाम् युवां, हे अश्विनौ, स्या सा मक्षिका मधुमक्षिका मधु कामयमाना सती अरपत् अस्तौत्। अश्विनोर्मधुमत्त्वात् सरघास्थानीयः कक्षीवानेव स्तोता। विस्पष्टमाह। औशिजः उशिजः पुत्रः कक्षीवान् सोमस्य मदे युवयोः सोमजन्यहर्षे निमित्तभूते सति हुवन्यति युवामाह्वयति। युवयोर्मधुरहस्यं वर्तत एव, तच्च मधुविद्याख्यं रहस्यं दधीचः सकाशादश्वशिरसा युवां प्रापितम्। अस्य वृत्तान्तस्य गूढार्थविवरणमन्यत्र कृतम्। तदाह।

युवम् युवां च दधीचः आथर्वणस्य मनः चित्तं आविवासथः प्रकाशितवन्तौ। अथ अनन्तरं अश्व्यम् अश्वसंबन्धि युवाभ्यां प्रति प्रतिहितं यत् शिरः तत् वाम् युवाभ्यां वदत् मधुविद्यामवोचत्॥ मधुमत्-सुपां सुलुगिति विभक्तेर्लुक्। हुवन्यति-ह्वेञ् स्पर्धायां शब्दे च, भावे ल्युट्, बहुलं छन्दसीति संप्रसारणम्, अथवा "हवनमात्मन इच्छति, सुप आत्मनः क्यच्, अन्त्यलोपश्छान्दसः, वर्णव्यापत्त्या उत्वम्" इति सायणः॥

दशमीमृचमाह—

युवं पेदवे पुरुवारमश्विना स्पृधां श्वेतं तरुतारं दुवस्यथः।
शर्यैरभिद्युं पृतनासु दुष्टरं चर्कृत्यमिन्द्रमिव चर्षणीसहम्॥१०॥

युवम् पेदवे पुरुऽवारम् अश्विना स्पृधाम् श्वेतम् तरुतारम् दुवस्यथः शर्यैः अभिऽद्युम् पृतनासु दुस्तरम् चर्कृत्यम् इन्द्रम्ऽइव चर्षणिऽसहम्॥

अश्विना हे अश्विनौ, पेदवे राज्ञे ऋषये पुरुवारम् बहुभिर्वरणीयं स्पृधाम् दैवं प्रति अहमहमिकया स्पर्धमानानां यजमानानां तरुतारम् तारकं श्वेतम् स्वच्छमश्वं युवम् युवां दुवस्यथः सेवनाय दत्तवन्तौ। पुनः कीदृशम्? शर्यैः शराहैः योद्धृभिः पृतनासु संग्रामेषु दुस्तरम् तरीतुमशक्यं अभिद्युम् अभिगतदीप्तिं चर्कृत्यम् पुनः पुनः कर्मसु प्रयोज्यं इन्द्रमिव चर्षणीसहम् इन्द्रो यथा अरातिजनानभिभवति तथा देवशत्रूणामभिभवितारम्॥ स्पृधाम्-स्पर्धतेः, क्विप्, षष्ठीबहुवचनम्। चर्कृत्यम्-करोतेर्यङ्लुगन्तात् क्यप्, ततस्तुक्॥

इति प्रथमस्याष्टम एकविंशो वर्गः

'का राधदि'ति द्वादशर्चं आश्विनं कक्षीवत आर्षम्। अन्त्यास्तिस्रो गायत्र्यः, आद्या गायत्री, द्वितीया ककुप्, तृतीया काविराट्, चतुर्थी नष्टरूपी, पञ्चमी तनुशिराः, षष्ठी उष्णिक्, सप्तमी विष्टारबृहती, अष्टमी कृतिः, नवमी विराट्॥

तत्र प्रथमामृचमाह—

का राधद्धोत्राश्विना वां को वां जोषऽउभयोः। कथा विधात्यप्रचेताः॥१॥
का राधत् होत्रा अश्विना वाम् कः वाम् जोषे उभयोः कथा विधाति अप्रऽचेताः॥

हे अश्विना अश्विनौ, वाम् युवां का होत्रा कीदृशी वाक् (वाङ्नाम, आह्वानसमर्था होत्रा)

राधत् आराधयति, प्रीणयति । मन्त्रलक्षणा वागेव युवामधिगच्छेत्, न तथा अन्यविधा । वाम् युवयोः उभयोः जोषे जोषणे, प्रीणने कः समर्थः? अस्ति चेत् सामर्थ्यं कस्यापि यजमानस्य, तद्युष्मदनुग्रहबलादेव भवति । अप्रचेताः यस्य युष्मद्विषयकं प्रकृष्टं चेतो ज्ञानं न विद्यते सः कथा केन प्रकारेण विधाति परिचरति युवाम् ॥ राधत्–लेट्यडागमः । जोषे–भावे घञ् । कथा–थाप्रत्ययः छन्दसि हेतौ, किंशब्दात्प्रकारवचने, किमः क इति कादेशः । विधाति–विध विधाने, लेट्यडागमः ॥

द्वितीयामृचमाह—

विद्वांसाविद् दुरः पृच्छेदविद्वानित्थापरो अचेताः। नू चिन्नु मर्ते अक्रौ ॥२॥
विद्वांसौ इत् दुरः पृच्छेत् अविद्वान् इत्था अपरः अचेताः नु चित् नु मर्ते अक्रौ ॥

इत्था इत्थं, उक्तप्रकारेण अविद्वान् अजानन् जनः विद्वांसौ इत् जानन्तौ अश्विनावेव दुरः द्वाराणि, अश्विनोर्युवयोः उपासनरहस्यमार्गान् पृच्छेत् प्रष्टुमर्हति । तयोरनुग्रहादेव तद्विषयक-सपर्योपायरहस्यज्ञानं संपादनीयम् । अपरः अश्विभ्यामन्यः अचेताः अज्ञः, न जानाति उपायमा-वेदयितुम् । तौ अश्विनौ तु अक्रौ अनाक्रान्तौ अरातिभिः नु चित् क्षिप्रमेव नु पदपूरणः मर्ते मनुष्ये अनुग्राह्ये प्रसन्नौ भवत इति शेषः ॥ अक्रौ–क्रमु पादविक्षेपे, अस्मात् नञ्युपपदे कृत्य-ल्युटो बहुलवचनात् कर्मण्यपि विट् ॥

तृतीयामृचमाह—

ता विद्वांसा हवामहे वां ता नो विद्वांसा मन्म वोचेतमद्य ।
प्रार्चद्दयमानो युवाकुः ॥ ३॥
ता विद्वांसा हवामहे वाम् ता नः विद्वांसा मन्म वोचेतम् अद्य प्र
आर्चत् दयमानः युवाकुः ॥

हे अश्विनौ, विद्वांसा विज्ञौ ता वाम् तौ युवां हवामहे आह्वयामहे । ता विद्वांसा तौ विद्वांसौ आहूतौ युवां अद्य इदानीं नः अस्मभ्यं मन्म मननीयं युष्मदीयं रहस्यं मन्त्रं वोचेतम् उच्यास्तम् । अहं च युवाकुः युवां कामयमानः (१.३.३, पु. ११३) दयमानः स्वात्मीयं सर्वं युवाभ्यां प्रयच्छन् प्रार्चत् प्रार्चं (मिपस्तिबादेशः) प्रकर्षेण स्तौमि ॥ वोचेतम्–ब्रुवो वचिः,

लिङ्याशिष्यङ्, वच उमित्युमागमः । दयमानः–दय दानगत्यादिषु ॥

चतुर्थीमृचमाह—

वि पृच्छामि पाक्या३ न देवान्वषट्कृतस्याद्भुतस्य दस्रा ।
पातं च सह्यसो युवं च रभ्यसो नः ॥ ४ ॥

वि पृच्छामि पाक्या न देवान् वषट्ऽकृतस्य अद्भुतस्य दस्रा पातं च सह्यसः युवम् च रभ्यसः नः ॥

हे अश्विनौ वि पृच्छामि युवां विशेषेण पृच्छामि, पाक्या पक्तव्यज्ञानान् अपक्वप्रज्ञान् देवान् न न पृच्छामि, परिपक्वप्रज्ञानौ हि युवां, अतः पृच्छामि । किमधिकृत्य पृच्छ्यते? आह वषट्कृतस्य अद्भुतस्य कर्मण्यर्थे षष्ठी । वषट् इति देवतायै संप्रदाने वषट्कारस्य वैशिष्ट्यं कर्मसु प्रसिद्धम्, तदनुसारेण अन्तर्यागेऽपि होतुराह्वानात्परं देवतायै संप्रदाने प्रवर्तमाने वीर्यवान् दार्ढ्यप्रदो मन्त्रात्मको वाग्विशेषः वषट्कारेण प्रतिपाद्यते । तथा मन्त्रपूतं अद्भुतशब्दवेदनीयं किमपि 'महत्' वस्तु प्रति पृच्छामि । वषट्कारविषयभूतं 'अद्भुतं' प्रति रहस्यज्ञानप्रार्थना । हे दस्रा, कर्मकुशलौ, युवम् युवां सह्यसः यस्मात्कस्मादपि अतिशयेन बलवतः नः अस्मान् पातम् च रक्षतं च रभ्यसश्च अतिशयेन रभस्विनश्च पातं रक्षतम् ॥ सह्यसः–सहो बलं, ततो मत्वर्थीयो विनिः, आतिशायनिक ईयसुन्, विन्मतोर्लुक्, छान्दस ईकारलोपः । रभ्यसः–रभ राभस्ये, राभस्यं प्रबलः कार्योपक्रमः, पूर्ववत्प्रक्रिया ॥

पञ्चमीमृचमाह—

प्र या घोषे भृगवाणे न शोभे यया वाचा यजति पञ्चियो वाम् ।
प्रैषयुर्न विद्वान् ॥ ५ ॥

प्र या घोषे भृगवाणे न शोभे यया वाचा यजति पञ्चियः वाम् प्र इषऽयुः न विद्वान् ॥

हे अश्विनौ, या या वाक् घोषे घोषापुत्रे सुहस्त्ये ऋषौ इति सायणः, तर्हि औपचारिकः । घोषायाः सुप्रसिद्धेः सैव स्यात्, लिङ्गव्यत्ययः, भृगवाणे न भृगुरिवाचरति भृगवाणः तस्मिन्निव प्र शोभे प्रकर्षेण शोभते (तलोपः) । या वाक् भृगाविव घोषे शोभते, यया वाचा, पञ्चियः आङ्गिरसः कक्षीवान् वाम् युवां यजति पूजयति सापि शोभते इषयुः न इषं चोदनाशक्तिं काम-

यमानश्च, नकारश्चार्थे, विद्वान् विज्ञः, अत्र कक्षीवानेव स्यात् प्र प्रभवतु युवयोः प्रसादात् ॥ शोभे-शुभ दीप्तौ, लोपस्त आत्मनेपदेषु । इषयुः-इष गतौ, इष इच्छायामित्यस्माद्वा ॥

इति प्रथमस्याष्टमे द्वाविंशो वर्गः

षष्ठीमृचमाह—

श्रुतं गायत्रं तकवानस्याहं चिद्धि रिरेभाश्विना वाम् ।
आक्षी शुभस्पती दन् ॥ ६ ॥

श्रुतम् गायत्रम् तकवानस्य अहम् चित् हि रिरेभ अश्विना वाम् आ अक्षी इति शुभः पती इति दन् ॥

हे अश्विना अश्विनौ, तकवानस्य गच्छतः, शीघ्रगामिन ऋषेः गायत्रम् गायत्रीच्छन्दोबद्धं स्तोत्रं श्रुतम् श्रृणुतम् । वाम् युवां अहम् चित् हि अहमेव हि सः यो रिरेभ स्तुतवान् । हे शुभः पती दीप्तेः उज्ज्वलभासः अधिपती, अक्षी युवयोरक्षिणी युष्मद्दृष्टिं आदन् मह्यं दत्तं, मयि क्षिपतम् ॥ श्रुतम्-श्रु श्रवणे, लोटि विकरणस्य लुक् । तकवानस्य-तक गतौ, भृगवाणवत् प्रक्रिया । आदन्-आङ्पूर्वात् ददातेः, व्यत्ययेन शत्, जुहोत्यादित्वात् श्लुः, द्विर्वचनाभाव-श्छन्दसि ॥

सप्तमीमृचमाह—

युवं ह्यास्तं महो रन्युवं वा यन्निरततंसतम् ।
ता नो वसू सुगोपा स्यातं पातं नो वृकादघायोः ॥ ७ ॥

युवम् हि आस्तम् महः रन् युवम् वा यत् निःऽअततंसतम् ता नः वसू इति सुऽगोपा स्यातम् पातम् नः वृकात् अघऽयोः ॥

हे अश्विनौ, युवम् हि युवां महः महतः दिव्यस्य वैभवस्येति वक्तव्यं, अन्नस्य धनस्य वेति स्थूलपक्षीयाः, रन् रातारौ आस्तम् अभूतं, भवथ इति लडर्थे, युवम् वा युवामेव यत् महद्दिव्यं वैभवं निरततंसतम् (तसि अलङ्कारे) निरलङ्कारं निर्भूषणं निःशोभं अकुरुतं, दातारौ युवामेव निस्तेजस्कतामापादयितारौ भवथः । हे वसू निवासयितारौ, ता तादृशौ युवां नः अस्माकं सुगोपा सुष्ठु रक्षितारौ स्यातम् भवेतम् । अघायोः पापमस्माकमिच्छतः वृकात् छेदकादसुरात् नः अस्मान् पातम् रक्षतम् ॥ महः-महतः, अल्लोपश्छान्दसः । रन्-दानितिवत् प्रक्रिया, व्यत्ययेनैक-

वचनम्। निरततंसतम्–तसि अलङ्कारे, ण्यन्ताल्लुङ्। अघायोः–अघं परेषामिच्छति, छन्दसि परेच्छायामिति क्यच्॥

अष्टमीमृचमाह—

मा कस्मै धातमभ्यमित्रिणे नो माकुत्रा नो गृहेभ्यो धेनवो गुः।
स्तनाभुजो अशिश्वीः॥८॥

मा कस्मै धातम् अभि अमित्रिणे नः मा अकुत्र नः गृहेभ्यः धेनवः गुः स्तनऽभुजः अशिश्वीः॥

हे अश्विनौ, अमित्रिणे कस्मै कस्मैचिदपि शत्रवे (अमित्रं शात्रवं इति भावार्थः, तद्वते शत्रवे) नः अस्मान् मा अभिधातम् आभिमुख्येन मा अवस्थापयतम्। अपि च नः अस्माकं गृहेभ्यः वासस्थानेभ्यः (अन्तर्यजने अन्नमयादिशरीरेभ्यः) सकाशात् स्तनाभुजः स्तनैः स्वदुग्धैरमृतैः भुञ्जन्ति पालयन्ति यजमानान्, तादृश्यः धेनवः गावः अशिश्वीः शिशुना वत्सेन रहिताः, सन्तानयोग्यतारिक्ताः सत्यः (चिद्रश्मिलक्षणाः) अकुत्र न कुत्रचिदपि अस्माकं दूरे मा गुः उज्झित्वाऽस्मान् मा गमन्॥ धातम्–लुङि न माङ्योगे इति अडभावः। स्तनाभुजः–स्तनभुजः, सांहितिको दीर्घः। अशिश्वीः–शिशुरस्या अस्तीति शिश्वी, छन्दसि ईवनिपौ इति मत्वर्थीय ईकारः॥

नवमीमृचमाह—

दुहीयन्मित्रधितये युवाकु राये च नो मिमीतं वाजवत्यै।
इषे च नो मिमीतं धेनुमत्यै॥९॥

दुहीयन् मित्रऽधितये युवाकु राये च नः मिमीतम् वाजऽवत्यै इषे च नः मिमीतम् धेनुऽमत्यै॥

हे अश्विनौ, युवाकु युवाकवः (जसो लुक्) युवां कामयमानाः (१.३.३) मित्रधितये युवयोर्मित्रत्वधारणाय, युष्मन्मैत्रीसंपादनाय दुहीयन् युष्मदनुग्रहात्मकं सख्यं दुहन्ति प्राप्नुवन्ति युवयोः सकाशात्। तस्मात् नः अस्मान् वाजवत्यै समृद्धिमते राये च धनाय दिव्याय च मिमीतम् अर्हान् कुरुतम्। तथा नः धेनुमत्यै अमृतक्षरणशीलया चिद्रश्मिलक्षणया गवा युक्ताय इषे च प्रेरणाबलाय च मिमीतम् अर्हान् समर्थान् कुरुतम्। 'बलयुक्तं धनं गोयुक्तमन्नं च प्रयच्छतम्' इति अन्नैकलक्ष्याः धनबलाभिलाषिणः स्थूलपक्षीयाः॥ दुहीयन्–दुहिर्दोहः, इगु-

पधात् किदिति भावे इप्रत्ययः, ततः क्यच्, दुहीयति, ततो लेव्यडागमः। मिमीतम्—माङ् माने शब्दे च, व्यत्ययेन परस्मैपदम् ॥

दशमीमृचमाह—

अश्विनोरसनं रथमनश्वं वाजिनीवतोः। तेनाहं भूरि चाकन ॥१०॥
अश्विनोः असनम् रथम् अनश्वम् वाजिनीऽवतोः तेन अहम् भूरि चाकन ॥

वाजिनीवतोः समृद्धिमद्भस्तुयुक्तयोः अश्विनोः देवयोः अनश्वम् अश्वरहितं रथम् असनम् अहम् समभजम्। अश्विनोर्वाऽत्रेण अनश्वो रथो गच्छतीत्यभिप्रायः (११९ सू., ५ ऋ.) "युवोः ...रथं वाणी येमतुः" इत्यत्र स्पष्टः। तेन रथेन भूरि महत् श्रेयः परमं निःश्रेयसं चाकन कामये ॥ असनम्—वन षण संभक्तौ, लङ्। चाकन—कनी दीप्तिकान्तिगतिषु, छान्दसो लिट्॥

एकादशीमृचमाह—

अयं समह मा तनूह्याते जनाँ अनु। सोमपेयं सुखो रथः ॥११॥
अयम् समह मा तनु ऊह्याते जनान् अनु सोमऽपेयम् सुऽखः रथः ॥

हे समह महेन महता (अल्लोपश्छान्दसः) निःश्रेयसप्रदेन वैभवेन सहित हे रथ, अयम् समीपवर्ती त्वं मा मां तनु विस्ताराय अन्नमयादिशरीरपरिच्छेदमतिक्रम्य वैशाल्यं आधत्स्व मयि। सुखो सुखहेतुभूतः रथः जनान् अनु देवभक्तान् जनान् अनुलक्ष्य सोमपेयम् सोमपानं प्रति ऊह्याते उह्यते, नीयते अश्विभ्याम्, तादृशः अश्विरथमहिमा, यादृशा देवभक्तानां अमृतानन्दलाभाय सोमरसः सुप्रापो भवति ॥ ऊह्याते—कर्मणि लेव्यडागमः। सोमपेयम्—पा पाने, अचो यदिति भावे यत् ॥

द्वादशीमृचमाह—

अध स्वप्नस्य निर्विदेऽभुञ्जतश्च रेवतः। उभा ता बस्रि नश्यतः ॥१२॥
अधं स्वप्नस्य निः विदे अभुञ्जतः च रेवतः उभा ता बस्रि नश्यतः ॥

अध अथ इदानीं स्वप्नस्य स्वप्नं प्रति निर्विदे निर्वेदं कमप्यन्तर्वेदनामनुभवामि। तथा अभुञ्जतः इतरान् अपालयतः, इतरेषामुपकारायाप्रयुञ्जतः रेवतः च धनवतः पुरुषस्य एवंभूतं मनुष्यं च प्रति 'निर्विदे' निर्विण्णोऽस्मि। उभा ता तावुभौ स्वप्नः कदर्यः पुरुषश्च बस्रि क्षिप्रं नश्यतः विनाशं प्राप्नुतः। स्वप्नो दृष्टः जागरणे नष्टो भवति, कदर्यश्च अमृतत्वलाभाय अप्रयत-

मानः स्वीयधने बद्धसर्वाभिलाषः अलक्षितपरदुःखः विनश्यत्येव ॥ अनेन पारमार्थिकबुद्धिरावश्यकीति गम्यते ॥ विदे–विदृ लृ लाभे, आगमानुशासनस्यानित्यत्वान्नुमभावः । रेवतः–रयेर्मतौ संप्रसारणम् । उभा, ता–उभयत्र सुपां सुलुगिति आकारः ॥

इति प्रथमस्याष्टमे त्रयोविंशो वर्गः

इति दाशतय्यां प्रथमे मण्डले सप्तदशोऽनुवाकः समाप्तः

अष्टादशेऽनुवाके षट् सूक्तानि, तत्र 'कदित्थे'ति पञ्चदशर्चं प्रथमं सूक्तम् । कक्षीवानृषिः त्रिष्टुप् छन्दः इन्द्रो देवता, विश्वे देवा वा ॥

तत्र प्रथमामृचमाह—

कदित्था नॄँः पात्रं देवयतां श्रवद्गिरो अङ्गिरसां तुरण्यन् ।
प्र यदानड्विश आ हर्म्यस्योरु क्रंसते अध्वरे यजत्रः ॥ १ ॥

कत् इत्था नृन् पात्रम् देवऽयताम् श्रवत् गिरः अङ्गिरसाम् तुरण्यन् प्र यत् आनट् विशः आ हर्म्यस्य उरु क्रंसते अध्वरे यजत्रः ॥

नॄन् नराणां नेतॄणां यजमानानां पात्रम् पाता, रक्षाभूतः इन्द्रः तुरण्यन् प्रेरयन् यजमानान् दिव्याध्वनीति शेषः, देवयताम् देवानिन्द्रादीनात्मन इच्छतां अङ्गिरसाम् ऋषीणां अस्माकं इत्था एवं उच्यमानाः गिरः स्तुतीः कत् कदा श्रवत् शृणुयात्, यत् यदा हर्म्यस्य यजमानीयस्य प्रासादस्य, समृद्धवासगृहस्य संबन्धिनः विशः यजमानाश्रितान् जनान् इन्द्रः आ प्रानट् आभिमुख्येन प्राप्नोति, तदानीं अध्वरे दिव्याध्वप्रदे यजने स इन्द्रः यजत्रः यष्टव्यः सन् उरु विस्तीर्णं यथा भवति तथा क्रंसते क्रमते स्वयमेवोत्सहते । अत्रेदं वैदिकयोगरहस्यं भवति, यजमाने देवतानुग्रहवैभवे विलसति सति, यजमानमाश्रिताः तदनुचराः शिष्याः पुत्रा वा तदनुग्रहस्वीकरणाय प्रभवन्ति, अत एव इन्द्रो यदा "हर्म्यस्य विशः प्रानट्" इति मन्त्रवर्णः ॥ पात्रम्–पा रक्षणे, ताच्छीलिकस्तृन्, व्यत्ययेन सोरमादेशः । श्रवत्–लेट्यडागमः । तुरण्यन्–तुरण त्वरायां, कण्ड्वादिः । आनट्–अश्नोतेर्लङ्, व्यत्ययेन परस्मैपदम् । क्रंसते–क्रमु पादविक्षेपे, लेट्यडागमः, सिप् बहुलमिति सिप् ॥

द्वितीयामृचमाह—

स्तम्भीद्द्यां स धरुणं पृषायदृभुर्वाजाय द्रविणं नरो गोः ।
अनु स्वजां महिषश्चक्षत त्वां मेनामश्वस्य परि मातरं गोः ॥ २ ॥

स्तम्भीत् ह द्याम् सः धरुणम् प्रुषायत् ऋभुः वाजाय द्रविणम् नरः गोः
अनु स्वऽजाम् महिषः चक्षत व्राम् मेनाम् अश्वस्य परि मातरम् गोः ॥

सः इन्द्रः द्याम् द्युलोकं स्तम्भीत् ह स्तभ्नाति खलु । तथा गोः चिद्रश्मिजालस्य नरः नेता ऋभुः "उरु भासमानः सूर्यात्मना" इति सायणः । ऋभुर्गणात्मकः, पूर्वं मनुष्याः तपसा ज्ञानेन कर्मणा च देवत्वं प्राप्ता इन्द्रकृत्येषु स्वात्मानं विनियुञ्जते, बहवोऽपि गणात्मकत्वादेक इव व्यवहियते । इन्द्रः ऋभुरूपेणावतिष्ठमानः द्रविणम् द्रुतगतिशीलं धरुणम् धारकं तेजोबलादिकं अन्लक्षणं वाजाय समृद्धये प्रुषायत् प्रुष्णाति प्रवर्षति । महिषः महान् स इन्द्रः स्वजाम् स्वस्मात् दिवस्पतेः जातां व्राम् वृणोति तमसा आच्छादयतीति व्रा स्वतोऽप्रकाशा पृथिवी तां अनु चक्षत पश्चात् पश्यति, चष्टिः पश्यतिकर्मा, अतः सापि प्रकाशवती भवति । प्रथमं दिवः तृतीयस्थानस्य स्तम्भनं ततः मध्यमस्थाने ऋभुरूपतया तेजोबलादिवर्षणं, ततः पृथिवीस्थाने पृथिव्याः प्रकाशनाय दर्शनं इति त्रीणि कर्माण्युक्त्वा प्राणबलस्य भूयस्त्वेन चैतन्यांशुसमूहानामाविर्भाव इति चतुर्थं एन्द्रं कर्म कीर्त्यते । अश्वस्य प्राणबललक्षणस्य मेनाम् स्त्रियम् प्रसवक्षमां गोः चिद्रश्मिसमूहस्य मातरम् प्रसवित्रीं परि परिकल्पितवान् ॥ अन्नमयसमृद्धेः प्राणः प्राणमयसमृद्धेर्मनः मनोमयसमृद्धेर्विज्ञानं विज्ञानमयसमृद्धेरानन्दः इति उत्तरोत्तरांशप्रादुर्भावोऽवधेयः, एवं गवां प्रसवित्री अश्वस्य मेना इत्यत्र प्राणबलमूलकक्रियाशक्तिसमृद्धेः ज्ञानशक्तिलक्षणस्य चिद्रश्मिसमूहस्याविष्कार इति बोध्यम् ॥ धरुणम्–धारेर्णिलुक् चेति उनप्रत्ययः । प्रुषायत्–प्रुष प्लुष स्नेहनसेचनपूरणेषु, क्रैयादिकः, लेट्यडागमः । चक्षत–चष्टेः, छान्दसो लङ् ॥

तृतीयामृचमाह—

नक्षद्धवमरुणीः पूर्व्यं राट् तुरो विशामङ्गिरसामनु द्यून् ।
तक्षद्वज्रं निर्युतं तस्तम्भद् द्यां चतुष्पदे नर्याय द्विपादे ॥ ३॥

नक्षत् हवम् अरुणीः पूर्व्यम् राट् तुरः विशाम् अङ्गिरसाम् अनु द्यून्
तक्षत् वज्रम् निऽर्युतम् तस्तम्भत् द्याम् चतुःऽपदे नर्याय द्विऽपादे ॥

अरुणीः अरुणवर्णाः चिन्मयरीचीः गाः उषसो वा तल्लक्षणाः राट् राजयन् दीपयन् इन्द्रः पूर्व्यम् चिरन्तनं ऋषिपरम्पराप्रयुक्तं हवम् आह्वानं, इदानीमस्मदीयं नक्षत् प्राप्नोतु, शृणोतु । कीदृशः ? अनु द्यून् अनुदिनं अङ्गिरसाम् ऋषीणां विशाम् प्रजानां तुरः प्रेरयिता, दिव्याध्वगमनाय

यजनायेति शेषः । अपि च सः वज्रम् आयुधं नियुतम् नितरां युक्तं, सन्नद्धं तक्षत् निशितमकरोत्, प्रकाशाच्छादकानां तेजोबलादिप्रवाहनिरोधकाणां आसुरबलानां प्रध्वंसनाय इन्द्रवज्रं युक्तं कृतवान्, अपि च, नर्याय नरेभ्यो देवेभ्यः मनुष्येभ्यश्च हिताय चतुष्पदे स्थानचतुष्टयवते द्विपादे द्विस्थानाय च, प्राग्विवृतम् (पु० ४५५), जनाय द्याम् द्युलोकं तस्तम्भत् अस्तम्भयच्च । राट्-राजृ दीप्तौ, अन्तर्भावितण्यर्थात् क्विप् । तुरः-तुर त्वरणे, इगुपधलक्षणः कः । तस्तम्भत्-ष्टमि स्कभि गतिप्रतिबन्धे, अस्मात् ण्यन्ताल्लुङि चङि रूपम् ॥

चतुर्थीमृचमाह—

अस्य मदे स्वर्यं दा ऋतायापीवृतमुस्रियाणामनीकम् ।
यद्ध प्रसर्गे त्रिककुब्निवर्तदप द्रुहो मानुषस्य दुरो वः ॥४॥

अस्य मदे स्वर्यम् दाः ऋताय आपीऽवृतम् उस्रियाणाम् अनीकम् यत् ह प्रऽसर्गे त्रिऽककुप् निऽवर्तत् अप द्रुहः मानुषस्य दुरः वरिति वः ॥

अस्य सोमस्य मदे हर्षे, सोमजन्ये हर्षे सति ऋताय सत्याय उत्तमाय ज्योतिषे, तत्प्राप्तये, स्वर्यम् स्वःशब्दवाच्यज्योतिर्भवं, अपीवृतम् तमोगुहासु निगूढं उस्रियाणाम् चिन्मयरश्मीनां अनीकम् समूहं दाः दत्तवानसि, अङ्गिरःप्रभृतिभ्यः ऋषिभ्यो यजमानेभ्यः । स्वरुद्भवं चिद्रश्मिसमूहं गुहासु गूढं ऋतप्राप्तये दत्तवान् ऋषिभ्यः । यद्ध यदा खलु प्रसर्गे देवद्विड्भिः सह संग्रामे त्रिककुप् त्रिषु स्थानेषु भूरादिषु समुच्छ्रितः सन् निवर्तत् नितरां वर्तते, तदा मानुषस्य मनुष्यवर्गस्य द्रुहः द्रोहकारीणि दुरः द्वाराणि, चिद्रश्मिलक्षणानां गवामनिर्गमनाय आसुरबलैः पिहितानि द्वाराणि नृणां द्रोहकारीणि खलु । अप वः अपवृणोति तृतीये स्थाने शुद्धसत्त्वमनोभूमिकायां तदधीश्वर इन्द्रो यदा प्रसन्नो भवति, अन्तर्गुहासु निगूढाश्चिद्रश्मयः निर्गन्तुं प्रभवन्ति, पिहितानां द्वाराणामपावरणात् । अथ चेदमवधातव्यम्, यत् देवशत्रवः पणिवृत्रादयः देवकामानां मनुष्याणामेव द्रोहकारिणः, तैः पिहितानि द्वाराणि द्रोहकारीणीत्युपचर्यते, द्वारपिधानस्यापि कष्टप्रदत्वात् द्रोहकृत्त्वं बोध्यम् ॥ स्वर्यम्-स्वरव्ययम्, ज्योतिर्वाचकं, भवे छन्दसीति यत् । अपीवृतम्-अपिपूर्वात् वृणोतेः कर्मणि निष्ठा, निपातस्य चेति पूर्वपदस्य दीर्घः । प्रसर्गः-प्रकर्षेण सृज्यन्ते विमुच्यन्तेऽस्मिन्निषव इति प्रसर्गः, अधिकरणे घञ् । निवर्तत्-वृतु वर्तने, लेट्यडागमः, व्यत्ययेन परस्मैपदम् । वः-वृञ् वरणे, छान्दसो लुङ् ॥

पञ्चमीमृचमाह—

तुभ्यं पयो यत्पितरावनीतां राधः सुरेतस्तुरणे भुरण्यू।
शुचि यत्ते रेक्ण आयजन्त सबर्दुघायाः पय उस्रियायाः ॥५॥
तुभ्यम् पयः यत् पितरौ अनीताम् राधः सुऽरेतः तुरणे भुरण्यू इति
शुचि यत् ते रेक्णः आ अयजन्त सबःऽदुघायाः पयः उस्रियायाः ॥

हे इन्द्र, तुरणे शीघ्रकारिणे तुभ्यम्, भुरण्यू जगत्सर्वं पोषयन्त्यौ पितरौ द्यावापृथिव्यौ यत् यदा पयः गव्यममृतं अनीताम् अनयतां, ऊर्ध्वकक्ष्या चितिः द्यौः, अधःकक्ष्या चितिः पृथिवी, उभाभ्यां जगत् पोषितं भवति, ताभ्यामेव यजमानप्रभृतिसर्ववस्तुगतपरिणामवशात् आविर्भूतासु चिन्मयमरीचिलक्षणासु गोषु तत्सारभूतं पयोनामकं अमृतं निधीयते, तच्च इन्द्राय अर्पणीयं भवति। कीदृशं पयः? राधः राधकं समृद्धिकरं सुरेतः सर्वोत्पादनसमर्थरेतःशब्दवाच्यप्राणसारांशभूतम्। यत् यदा च शुचि शुद्धं सबर्दुघायाः अमृतदुग्धस्य दोग्ध्र्याः चिल्लक्षणायाः उस्रियायाः गोः पयः पूर्वोक्तविधं क्षीरममृतं रेक्णः सर्वातिरिक्तं प्रवृद्धं, अत एव अत्यन्तं धनवत्प्रियं ते यजमानाः तुभ्यं आयजन्त आभिमुख्येन प्रायच्छन्, प्रयच्छन्ति, तदा गोपिधानद्वाराणि अपावृणोषीति पूर्वया संबन्धः इति पूर्वेषां व्याख्या, तदानीमेव यजमानकृते इन्द्रस्य प्रादुर्भाव इति वयम्, यतः "अध प्रजज्ञे" इति उत्तरा भवति॥ अनीताम्—णीञ् प्रापणे, लङि शपो लुक्। तुरणे—तुरण त्वरायां, कण्ड्वादिः, क्विप्। भुरण्यू—भुरण धारणपोषणयोः, अयमपि कण्ड्वादिः, औणादिक उप्रत्ययः॥

इति प्रथमस्याष्टमे चतुर्विंशो वर्गः

षष्ठीमृचमाह—

अध प्र जज्ञे तरणिर्ममत्तु प्र रोच्यस्या उषसो न सूरः।
इन्दुर्येभिराष्ट स्वेदुहव्यैः स्रुवेण सिञ्चञ्जरणाभि धाम ॥६॥
अध प्र जज्ञे तरणिः ममत्तु प्र रोचि अस्याः उषसः न सूरः इन्दुः
येभिः आष्ट स्वऽइदुहव्यैः स्रुवेण सिञ्चन् जरणा अभि धाम ॥

अध अथ, अनन्तरं पूर्वोक्तविधया "सबर्दुघायाः पयसः" प्रदानात्परमित्यर्थः, स इन्द्रः प्रीतः सन् प्रजज्ञे प्रकर्षेण प्रादुर्बभूव। सः तरणिः द्वेष्ट्रणि तमांसि वा तार्याणि जेतव्यानि

भवन्ति, तेषां तारकः ममत्तु अस्मान् मादयतु। स च प्ररोचि प्रकर्षेण रोचते। तत्र दृष्टान्तः- अस्याः समुपस्थितायाः उषसः चित्प्रभातभासः सन्निधौ सूरो न सूर्य इव। उषसः समीपे सूर्य इव अस्माकं समीपे इन्द्रः प्रसीदति। उत्तरोऽर्धेचेः सुदुर्बोधः। गूढार्थविवरणे स्यादेवमन्वयः- "जरणा, धाम अभि स्रुवेण सिञ्चन् इन्दुः, स्वेदुहव्यैः येमिः (अस्माभिः) आष्ट, तानस्मान् तरणिर्ममत्तु" इति। अथ अक्षरार्थः। जरणा जरणीयः स्तवनीयः धाम अभि स्थानमूर्ध्वमुत्तमं अभिलक्ष्य स्रुवेण तीव्राभिकाङ्क्षाविष्कारकेण मुहुर्मुहुराह्वानेन (स्रुक्स्रुवसङ्केतः प्रागुक्तः) सिञ्चन् इन्दुः सिच्यमानः सोमः स्वेदुहव्यैः स्वभूतैः समृद्धैरर्पणैरुपेतैः येमिः अस्माभिः आष्ट आशितः, देवभुक्तावशेषः भुक्त आसीत्, तानस्मान् तरणिस्तारक इन्द्रो "ममत्तु" इति संबन्धः॥ ममत्तु-मदी हर्षे, विकरणस्य श्लुः। रोचि-रुच दीप्तौ, छान्दसो वर्तमाने लुङ्। आष्ट-अश भोजने, कर्मणि लुडि विकरणस्य लुक्। स्वऽइदुहव्यैः-सावग्रहः शब्दः, सन्दिग्धापि सायणीय-प्रक्रियैवानुस्रियते, इदि परमैश्वर्ये, औणादिक उप्रत्ययः, अनित्यमागमशासनमिति नुमभावः, स्वभूतानि इदूनि समृद्धानि प्रभूतानि वा हव्यानि येषां तैः। सिञ्चन्-व्यत्ययेन कर्मणि कर्तृ-प्रत्ययः। जरणा-जरतिः स्तुतिकर्मा, अस्मात् कर्मणि ल्युट्, विभक्तेराकारः॥

सप्तमीमृचमाह—

स्विध्मा यद्वनधितिरपस्यात्सूरो अध्वरे परि रोधना गोः।
यद्ध प्रभासि कृत्व्याँ अनु द्यून्नर्विशे पश्विषे तुराय॥७॥

सुऽइध्मा यत् वनऽधितिः अपस्यात् सूरः अध्वरे परि रोधना गोः यत् ह प्रऽभासि कृत्व्यान् अनु द्यून् अनर्विशे पशुऽइषे तुराय॥

स्विध्मा शोभनं इध्मं दीप्तं दीप्तिर्यस्याः सा शोभनोज्ज्वला वनधितिः वनं वननीयं सुखं रसात्मकं अस्यां सोमरसधारायां धीयते इति वनधितिः सा क्षरणशीला सोमधारा यत् यदा अपस्यात् पवमानशीलं कर्म कर्तुमिच्छेत्, तदानीं सूरः प्रेरक इन्द्रः अध्वरे दिव्यस्याध्वनो दातरि यजने गोः चिल्लक्षणस्य गोव्रजस्य रोधना आवरणानि परि परितो निवारयतीति शेषः। यद्ध यदा खलु कृत्व्यान् कृत्वीति कर्मनाम, कर्मसु दैव्येषु साधून् द्यून् दिवसान् अनु अनुलक्ष्य प्रभासि प्रकर्षेण दीप्यसे, तदानीं अशक्ताय कर्मसु त्वरोपेताय च उभयविधाय पुरुषाय त्वदनु-ग्रहसम्पत्तेः निःश्रेयसं सिध्यत्येवेत्याह। अनर्विशे (व्युत्पत्त्यनवधारणादनवग्रहः शब्दः, अर्तेः कर्मणि विच्, अरं गन्तव्यं प्रति विशति, अर्विट्, न अर्विट् अनर्विट्, तस्मै गन्तुमशक्ताय पुरुषाय

पश्विषे पशून्, तच्छक्षितानि चक्षुरादीन्द्रियाणि प्रेरयते तुराय त्वरोपेताय समर्थाय पुरुषाय च सिद्धिर्भवतीति शेषः॥ अपस्यात्-अपस्-शब्दात् क्यच्, लेट्याडागमः। रोधना-रुधिर् आवरणे, भावे ल्युट्, शेर्लोपः। पश्विषे-इष गतौ, अस्मादन्तर्भावितण्यर्थात् क्विप्॥

अष्टमीमृचमाह—

अष्टा महो दिव आदो हरी इह द्युम्नासाहमभि योधान उत्सम्।
हरिं यत्ते मन्दिनं दुक्षन्वृधे गोरभसमद्रिभिर्वाताप्यम्॥८॥

अष्टा महः दिवः आदः हरी इति इह द्युम्नऽसहम् अभि योधानः उत्सम् हरिम् यत् ते मन्दिनम् धुक्षन् वृधे गोऽरभसम् अद्रिऽभिः वाताप्यम्॥

हे इन्द्र, महो दिवः महतो द्युलोकात् अष्टा अष्टारौ अशितारौ, अमृतस्य देवभुक्तावशेषस्य भोक्तारौ हरी अश्वौ इह अत्र यजने अस्मदीये आदः आत्तवान्, आनीतवानसि। तथा द्युम्नसहम् प्रकाशस्य अभिभवितारं उत्सम् तेजोबलादिप्रस्रवणाधारभूतं अन्तरिक्षालयं मेघस्थानीयं प्रकाशावरणं असुरायमाणं शत्रुं योधानः योधनशीलस्त्वं अभि अभिभव। यत् यदा ते तव वृधे वर्धनाय हरिम् कान्तं, मनोहरं गोरभसम् गौः वृषभ इव रभस्विनं, बलवद्वीर्यवन्तं वाताप्यम् वातेन अतिवेगबलवता आप्यं प्राप्तव्यं मन्दिनम् मदकरं अद्रिभिः कठिनानां घनानां वस्तूनामपि दारणेन मार्दवमापादयन्तीभिः शिलास्थानीयाभिर्वाग्भिः धुक्षन् दुहन्ति अभिषुण्वन्ति यजनोद्योगिन इति शेषः, तदा उत्सं अभिभवेति संबन्धः॥ अष्टा-अश भोजने, तृच्, इडभावश्छान्दसः॥

नवमीमृचमाह—

त्वमायसं प्रति वर्तयो गोर्दिवो अश्मानमुपनीतमृभ्वा।
कुत्साय यत्र पुरुहूत वन्वञ्छुष्णमनन्तैः परियासि वधैः॥९॥

त्वम् आयसम् प्रति वर्तयः गोः दिवः अश्मानम् उपऽनीतम् ऋभ्वा कुत्साय यत्र पुरुऽहूत वन्वन् शुष्णम् अनन्तैः परिऽयासि वधैः॥

हे इन्द्र, त्वम् दिवः द्युलोकात् ऋभ्वा ऋभुणा इन्द्रसहकारिणा ऋभुगणेन उपनीतम् आनीतं आयसम् अयोमयं, (दार्ढ्यद्योतकं) अश्मानम् शीघ्रं शत्रोर्व्यापकं वज्रं गोः गोनिमित्तं, असुरापहृतगोसमूहलाभहेतोः, प्रति वर्तयः प्रतिकूलं यथा भवति तथा व्यसृजः, विसृजसीति वर्तमानार्थः। यत्र यस्मिन् त्वदीये कर्मणि प्रचलति, हे पुरुहूत बहुभिराहूत, कुत्साय ऋषेः

कुत्सस्यार्थे, निकृष्टानां पापानां अधः कुत्सनात् कुत्सः तस्मै शुष्णम् शोषकमसुरं अनन्तैः अनवधिकैः वधैः वधसाधनैरायुधैः वन्वन् हिंसन् परियासि परितो गच्छसि ॥ वन्वन्-वनु याचने, अत्र हिंसार्थः, "वनुष्यतिर्हन्तिकर्मा अनवगतसंस्कारो भवति" इति यास्कः ॥

दशमीमृचमाह—

पुरा यत्सूरस्तमसो अपीतेस्तमद्रिवः फलिगं हेतिमस्य ।
शुष्णस्य चित्परिहितं यदोजो दिवस्परि सुग्रथितं तदादः ॥१०॥

पुरा यत् सूरः तमसः अपिऽइतेः तम् अद्रिऽवः फलिऽगम् हेतिम् अस्य शुष्णस्य चित् परिऽहितम् यत् ओजः दिवः परि सुऽग्रथितम् तत् आ अदरित्यदः ॥

पुरा यत् पूर्वं यदा सूरः सर्वस्य प्रेरकः सूर्यः तमसः तमोरूपस्यासुरस्य शुष्णस्य अपीतेः अपिधानात् आच्छादनात् मुक्तोऽभवदिति शेषः, तदानीं हे अद्रिवः वज्रवन्, तम् फलिगम् मेघनामैतत् (व्याख्यातमिदं १.६२.४) मेघवदावृण्वन्तं अस्य असुरस्य हेतिम् आयुधविशेषं प्राभाङ्क्षीरिति शेषः । तथा शुष्णस्य चित् शुष्णस्यासुरस्यापि यत् ओजः यद्बलं दिवः परि द्योतमानस्य ज्योतिषः उपरि परिहितम् परिधानवत् आच्छादितं सुग्रथितम् सुष्ठु संहतं तत् तदोजः आ अदः आदृणाः विश्लिष्टं शिथिलितं कृतवानसि । ऋतस्य ज्योतिषः सूर्यस्य दर्शने विषये प्रतिरोधकं आवरकं च गहनं तमः, तस्य प्रध्वंस इन्द्रेणापाद्यते ॥ अदः-दृ विदारणे, छान्दसो लङ् ॥

इति प्रथमस्याष्टमे पञ्चविंशो वर्गः

एकादशीमृचमाह—

अनु त्वा महो पाजसी अचक्रे द्यावाक्षामा मदतामिन्द्र कर्मन् ।
त्वं वृत्रमाशयानं सिरासु महो वज्रेण सिष्वपो वराहुम् ॥११॥

अनु त्वा महो इति पाजसी इति अचक्रे इति द्यावाक्षामा मदताम् इन्द्र कर्मन् त्वम् वृत्रम् आऽशयानम् सिरासु महः वज्रेण सिस्वपः वराहुम् ॥

हे इन्द्र, मही महत्यौ पाजसी पाजो बलं, मत्वर्थलक्षणया बलवत्यौ अचक्रे चक्ररहिते, अत एव चङ्क्रमणवर्जे स्थायिन्यौ द्यावाक्षामा द्यावापृथिव्यौ कर्मन् त्वदीये वीरकर्मणि त्वा त्वां

अनु मदताम् अनुलक्ष्य हृष्टं अकुरुताम्। तथा त्वम् आशयानम् समन्तात् व्याप्य वर्तमानं वराहुम् वराणां श्रेष्ठानां साधूनां हन्तारं वृत्रम् असुरं सिरासु सरणशीलासु अप्सु महो वज्रेण महता वज्रेण सिष्वपः अस्वापयः, पातितवान् (१.३२ सू०), तत्र व्याख्यातमवधेयम्॥ महः-महतः, करणे शेषत्वेन विवक्षिते षष्ठी, अल्लोपश्छान्दसः। सिष्वपः-ञिष्वप् शये, ण्यन्तान्लुङ्॥

द्वादशीमृचमाह—

त्वमिन्द्र नर्यो याँ अवो नृन्तिष्ठा वातस्य सुयुजो वहिष्ठान्।
यं ते काव्य उशना मन्दिनं दाद्वृत्रहणं पार्यं ततक्ष वज्रम्॥१२॥

त्वम् इन्द्र नर्यः यान् अवः नॄन् तिष्ठ वातस्य सुऽयुजः वहिष्ठान् यम् ते काव्यः उशना मन्दिनम् दात् वृत्रऽहनम् पार्यम् ततक्ष वज्रम्॥

हे इन्द्र, नर्यः नृभ्यो हितः त्वम् नॄन् नेतॄन् बलवतः यान् अश्वान् अवः अवसि, रक्षसि तान् सुयुजः सुखेन रथेन युज्यमानान् वातस्य सदृशान् वेगे बले चेति शेषः, वहिष्ठान् अतिशयेन वोढॄन् अश्वान् तिष्ठ आतिष्ठ, आरोह। काव्यः कवेः पुत्रः उशनाः देवर्षिः, मनुष्यो भूत्वा देवत्वं प्राप्तो वा कवेर्द्रष्टुः सत्यस्य पुत्र उशनाः कमनीयः कान्तिमान्, (१.५१.१०) अत्र व्याख्या द्रष्टव्या, मन्दिनम् शत्रुवधात् मदकरं यम् वज्रम् ते तुभ्यं दात् अदात् तम् वृत्रहणम् वज्रं पार्यम् शत्रूणां पारणे समर्थं ततक्ष तनूकृतवानसि॥ अवः-अवतेः, लेट्यडागमः। वहिष्ठान्-वोढृशब्दादातिशायनिक इष्ठन् तुश्छन्दसीति॥

त्रयोदशीमृचमाह—

त्वं सूरो हरितो रामयो नृन्भरच्चक्रमेतशो नायमिन्द्र।
प्रास्य पारं नवतिं नाव्यानामपि कर्तमवर्तयोऽयज्यून्॥१३॥

त्वम् सूरः हरितः रमयः नॄन् भरत् चक्रम् एतशः न अयम् इन्द्र प्रऽअस्य पारम् नवतिम् नाव्यानाम् अपि कर्तम् अवर्तयः अयज्यून्॥

यद्यपि अश्वः प्राणबलाद्युपलक्षणो भवति, तथापि सूर्यस्याश्वाः सूर्यरश्मयः प्रसिद्धाः, तेषां प्राणबलादिवैशिष्ट्ये सत्यपि चिन्मयप्रकाशकत्वं, तेन क्रियाकारकत्वं च बोध्ये। सूर्याश्वगतौ सत्यां सर्वत्र चिन्मयः प्रकाशो भवति, तस्यामसत्यामन्धकारो भवत्येव, तस्मिन्नेव तमोमये अरातीनामयज्वनां विनाशो निरुच्यते इन्द्रेण ऊर्ध्वं अत्यन्तदूरधाम्नः "परावतः" आगतेन। अयं

रहस्यार्थोऽस्यां प्रतिपाद्यते। स्थूलपक्षे दुर्घटोऽर्थः विकल्पबाहुल्याय कल्पते। हे इन्द्र, त्वम् सूरः प्रेरकः सर्वस्य, सूर्यो वा भूत्वा हरितः नॄन् हरिद्वर्णान् कमनीयान्, नेतॄन् बलवतोऽश्वान् रामयः उपारमयः, अत एव अयम् सूर्येणापि सह स्पर्धमान इति वर्णितः (१.६१.१५, व्याख्याऽवधेया)। एतशः उज्ज्वलः सूर्याश्वः चक्रम् रथस्य चक्रं न भरत् न प्रावहत्। अपि च त्वं नाव्यानाम् नाद्या तार्याणां नदीनां नवतिम् नवतिसंख्यां पारम् तीरं, तीरे (सप्तम्यर्थे) अयज्यून् अयज्वनः देवद्वेषिणः प्रास्य प्रक्षिप्य कर्तम् अपि तव कर्तव्यमपि अवर्तयः निरवर्तयः। "परावतः" इन्द्रस्यागमनं असुराद्ययज्ववासस्थानं दुर्गममिति च द्योतयति "नाव्यानां नवतिं" इति (१.३२.१४)॥ रमयः-लङि बहुलं छन्दस्यमाङ्योगेऽपीत्यडभावः॥

चतुर्दशीमृचमाह—

त्वं नो अस्या इन्द्र दुर्हणायाः पाहि वज्रिवो दुरितादभीके।
प्र नो वाजान्रथ्यो३ अश्वबुध्यानिषे यन्धि श्रवसे सुनृतायै ॥१४॥

त्वम् नः अस्याः इन्द्र दुःऽहनायाः पाहि वज्रिऽवः दुःऽइतात् अभीके प्र नः वाजान् रथ्यः अश्वऽबुध्यान् इषे यन्धि श्रवसे सूनृतायै॥

हे वज्रिवः वज्रवन्, इन्द्र, त्वम् दुर्हणायाः दुःखेन हन्तव्यायाः अस्याः दुरवस्थायाः, तथा अभीके समीपे, सङ्कटे समीपवर्तिनि सति दुरितात् पापाच्च नः अस्मान् पाहि रक्ष। अपि च रथ्यः रथयुक्तान् अश्वबुध्यान् अश्वैर्बोद्धव्यान्, यावन्तोऽश्वास्तावद्भिर्बोद्धुं योग्यान् इयन्तो वाजा इति वाजान् समृद्धिलक्षणान् नः प्रयन्धि प्रयच्छ। किमर्थम्? इषे प्रेरणाबलभोगाय श्रवसे दिव्याय श्रवणाय सूनृतायै शोभनसत्यात्मिकायै वाचे॥ दुर्हणायाः-ईषद्दुःसुष्विति हन्तेः कर्मणि खल्। रथ्यः-रथशब्दस्य मत्वर्थीय ईकारः। यन्धि-यम उपरमे, विकरणस्य लुक्, हेर्धिः छान्दसः॥

पञ्चदशीमृचमाह—

मा सा ते अस्मत्सुमतिर्वि दसद्वाजप्रमहः समिषो वरन्त।
आ नो भज मघवन्गोष्वर्यो मंहिष्ठास्ते सधमादः स्याम ॥१५॥

मा सा ते अस्मत् सुऽमतिः वि दसत् वाजऽप्रमहः सम् इषः वरन्त आ नः भज मघऽवन् गोषु अर्यः मंहिष्ठाः ते सधऽमादः स्याम॥

हे वाजप्रमहः वाजैः समृद्धिभिः प्रकर्षेण महनीय पूजनीय, इन्द्र, ते त्वदीया सा प्रसिद्धा, सुमतिः शोभना अनुग्रहात्मिका बुद्धिः अस्मत् अस्मासु (विभक्तिलोपः) मा वि दसत् मा क्षयं प्रापोतु । तथा इषः एषणाशक्तयः अस्मान् सम् वरन्त सम्यक् वृण्वन्तु, संवृतान् कुर्वन्तु । हे मघवन् धनवन् इन्द्र, अर्यः स्वामी त्वं नः अस्मान् गोषु चिन्मयकिरणेषु आभज प्रापय । ते तव मंहिष्ठाः अतिशयेन पूजयितारो वयं सधमादः त्वया सह युष्मदादिभिर्देवैः सह माद्यन्तः स्याम भवेम ॥ अस्मत्–सप्तम्या लुक् । दसत्–दसु उपक्षये, माङि लुङि पुषादित्वादङ् । मंहिष्ठाः–मह पूजायां, नुमागमः छान्दसः, अस्मादन्तर्भावितण्यर्थात् तृच्, तुश्छन्दसीतीष्ठन् । सधमादः–मद तृप्तियोगे चुरादिः, सह मादयन्ते तृप्ता भवन्तीति सधमादः, क्विप्, सहस्य सधादेशः ॥

इति प्रथमस्याष्टमे षड्विंशो वर्गः

इति श्रीमहर्षिरमणभगवत्पादानुध्यातश्रीभगवद्वासिष्ठगणपतिमुनिप्रवरान्तेवासिनः
पूर्णयोगाचार्यश्रीमदरविन्दभगवत्पादानुध्यातस्य
भारद्वाजस्य विश्वेश्वरसूनोः
कपालिनः कृतिः

वेदगुप्तार्थसिद्धाञ्जनाख्यं ऋग्वेदस्य प्रथमाष्टकभाष्यम्

समाप्तम्

सिद्धाञ्जनभाष्ये

अवधेयविषयांशानां सूचिका

पुटसङ्ख्या	
१–९१	भूमिका–विषयानुक्रमणिकासहिता
९३	अग्निधर्मप्रतिपादनपरं अग्निशब्दनिर्वचनम्
९४	ईळतिरध्येषणाकर्मेत्युपपादनम्, अध्येषणा अग्नेः उपास्तिश्चिरन्तनी
९६–७	अध्वरशब्दार्थविचारः, श्रवः-श्रवण-श्रुतिशब्दानां समानार्थत्वम्, अतीन्द्रियार्थविचित्रश्रवणशाली भगवानग्निरित्यादि प्रतिपादितम्, भद्रपदं अशुभ-अनृतज्ञानजन्य-दुरितप्रतिद्वन्द्वित्वेन प्रयुज्यते वेदे इति बहुमन्त्रवर्णोदाहरणेनोपपादनम्
९९	यजमानस्य गम्यं परं धाम, तत् 'सत्यं ऋतं बृहत्' अग्नेः स्वावासस्थानम्, तत्प्राप्तेः यज्ञः साधनं, तस्य निर्वोढा त्वग्निः कविक्रतुः सत्यः सत्यरक्षकः इत्यादिकं मन्त्रवर्णैरुपपादितम्
१००	प्रथमसूक्तसारांशकथनपूर्वकं लघुब्रह्मयज्ञः 'अग्निमीळे' सूक्तमिति सम्प्रदायस्योपपादनम्
१०१	माधुच्छन्दसे द्वितीयसूक्ते वायव्यतृचे प्रसङ्गात् सोमस्वरूपनिर्देशः
१०२	धेनाशब्दार्थविचारः
१०३–४	अन्तरर्थपरे व्याख्याने 'कोऽसौ सोमः' इति प्रश्नमुत्थाप्य तत्स्वरूपप्रतिपादनम्, प्रसङ्गाविन्द्रतत्त्वविचारः
१०५	वाजशब्दः समृद्धिवाचकोऽस्मत्पक्षे इति कथनम्
१०६	ऐन्द्रवायवतृचसूक्ष्मार्थप्रदर्शनम्
१०७	दक्ष-घृत-शब्दार्थविचारः
१०८	ऋतशब्दस्य एकरूपार्थत्वं सर्वत्रास्माकं नये, तथा क्रतुशब्दस्य प्राधान्यम्
१०९	'दक्षं दधाते अपसम्' इत्यत्र व्याख्याने 'अपसम्' दक्षविशेषणमिति निरूपणम्, दक्षशब्दार्थविचारः
११०-११	धीपदार्थविचारः, मैत्रावरुणतृचस्य अतीततृचसंबन्धः, तात्पर्यसंग्रहश्च
११२	'इषः' 'वनस्यतम्' इत्यत्र वैशिष्ट्यविचारः

पुटसङ्ख्या	
११३	'शबीरया' 'धिष्ण्या' पदार्थविचारः, तथा वस्रयुवाकुशब्दार्थविचारः
११४–६	'वृक्तबर्हिषः' 'रुद्रवर्तनी'–तत्र विचारः अश्विनोर्व्यापारविवरणं बहुभिर्मन्त्रवर्णैः, आश्विनतृचतात्पर्यम्
११७–८	ऐन्द्रतृचे 'अण्वीभिः तना पूतासः' इत्यस्य विशिष्टो विचारः
११९	ऐन्द्रतृचस्य तात्पर्योपपत्तिः
११९-२०	'ओमासः' इत्यस्य विचारोऽवधेयः, 'चर्षणयः' 'दाश्वांसः' इत्यत्र वैशिष्ट्यं प्रतिपादितम्
१२०	'विश्वे देवाः अप्तुरः' अर्थाविष्कार उपपाद्यते
१२१–२	'एहिमायासः' अस्य व्युत्पत्तिः तात्पर्योपपत्तिश्च, 'क इमे विश्वे देवाः' इति प्रश्नपूर्वकं प्रतिवचनम्
१२२–३	सारस्वततृचावतारिका—'सूनृतानां न केतुना' इत्यत्र विशिष्टो विचारः—सरस्वतीस्वरूपं, तत्र संशयः परिहारश्च
१२४	सारस्वततृचस्य तात्पर्यम्, तस्य वेदरहस्योद्घाटनोपयोगित्वं, 'महो अर्णः' इत्यत्र विशेषः
१२५	'सुरूपकृत्नुं' इति ऋचि दृष्टान्तदार्ष्टान्तिकविचारः
१२६	'गोदाः' अत्र वैशिष्ट्यं, कर्मठव्याख्यासरणिः प्रदर्शिता
१२७	'अति मा ख्यः' अस्य मा भूरगोचर इत्यर्थस्योपपादनम्, सायणीयव्याख्यानस्यायुक्तता प्रदर्शिता
१२८	'विप्रः' वेगवानित्युपपादनम्
१२९	'निदः' निरोद्धार इति निर्णयनम्, 'उत ब्रुवन्तु' ऋचस्तात्पर्ये विशेषः प्रदर्शितः
१३०	'उत नः सुभगा' अस्याः पूर्वस्याश्च परस्परसंबन्धो ज्ञापितः
१३२	वाजशब्दार्थप्रसक्तिः

पुटसङ्ख्या

१३३-५ चतुर्थसूक्ततात्पर्योपपादने वृत्राद्यसुराणां प्रस्तावशात् तेषां तत्त्वं प्रतिपादितम्

१३५ 'स्तोमवाहसः' साकूतं पदं, अन्तर्यागे अस्माकं 'सखाय इमे युजो जामयः' इन्द्रं प्रापयितुं प्रभवन्तीति प्रदर्शनम्

१३७ 'संस्थे' संस्थाने इत्यत्र चर्चा, 'हरी इन्द्रस्य' इत्यत्र विवरणम्

१३८ 'त्र्याशिरः सोमाः' अस्य विवरणम्, गवादिद्रव्यत्रयसङ्केतार्थप्रतिपादनम्, 'सद्यो वृद्धो अजायथाः' 'ज्यैष्ठ्याय' इत्यत्र तात्पर्योपपत्तिः कर्मपरव्याख्याने वैरस्यं च सूचिते

१३९ स्तोत्रेण मन्त्रात्मकेन देवानामभिवृद्धिर्यजमाने प्रोक्ता

१४० 'अक्षितोतिः' अत्र विचारः

१४१ 'यवय वधम्' शरीराद्वधं पृथक् कर्तुं इन्द्रः प्रभुरिति प्रतिपादनम्

१४१-२ 'युञ्जन्ति ब्रध्न'मित्यस्या व्याख्याने ब्रध्नशब्दार्थविचारः, ऋचः समासेन तात्पर्यकथनम्

१४३ इन्द्राश्वयोः रथयोगः, तदाख्यानम्, तृतीयर्चो व्याख्याने 'मर्यः' 'केतुः' इत्यादेर्विवरणम्

१४४ रथाश्वस्वरूपविवरणम्

१४४ इन्द्रप्रादुर्भावात्परं मरुतां साहाय्यमपेक्षितमित्यारभ्य 'देवकामानामृषीणामेव दिव्यत्वप्राप्तये पुनर्जन्म तत्' इति रहस्यार्थस्य प्रतिपादनम्

१४५ मरुतां जन्म 'स्वधामनु' इत्यस्य सविचारं तात्पर्यम्

१४६ 'वीळु चिदि'ति ऋचः सारांशकथने 'ज्योतिर्वृशामि'त्यारभ्य 'अतोऽयमेषां विभव इति उत्तरत्र वक्ष्यते' इति वाक्यान्यवधेयानि

१४६ प्रत्यग्रजन्मानो ज्योतिर्वृश इन्द्रकामा इत्युपपादनम्

१४९-५० षष्ठसूक्तस्य तात्पर्योपपादने विचारः, दैवतनिर्णये पूर्वेषां मतभेदः, तत्र कारणम्, 'देवयन्तः' इति मन्त्रे मरुतो देवता इति नाङ्गीकृताः, कारणमुक्तम्

१५१ इन्द्राश्वौ 'वचोयुजा' इत्यत्र ईषन्मात्रं विवरणम्

पुटसङ्ख्या

१५२ 'वि गोभिरद्रिमैरयत्' अत्र अर्थवैशिष्ट्यं प्रदर्शितम्

१५३ 'अप्रतिष्कुतः' अनाच्छादितः नित्यप्रकाश इति निरूपणम्

१५४ यद्यपि यदा प्रेरणं भवति तदा स्तोत्रं करोति मन्त्रद्रष्टा, तथापि स्तुतयो नालं इन्द्रमहिमानं परिच्छेत्तुमिति ऋष्युक्तिः, अत्र प्रेरणं विना मन्त्रं न कवयति कविरिति सूचनम्

१५४ पुनश्च 'अप्रतिष्कुतः' नित्यप्रकाश इति कथनम्

१५५ 'चर्षणीनाम्' 'पञ्च क्षितीनाम्' अत्र लोकसंस्थाननिर्देशः, पञ्चजनचर्चासूचनम्, 'इन्द्रः केवल' इत्यत्र विवरणम्

१५८ तोकशब्दार्थः अन्तर्थे, 'देवानामपत्यलाभस्तु मनुष्ये स्वांशप्रादुर्भावः' इत्यादि विवरणम्, इन्द्रस्य 'कुक्षिः सोमपातमः' अत्र विचारः

१५९ 'उर्वीरापो न काकुदः' अत्र तात्पर्ये वैशिष्ट्यं प्रोक्तम्

१५९ 'मही' भारतीति निरूपणम्, 'विरप्शी' पदार्थविचारः

१६१ 'एमेनं' इति ऋचस्तात्पर्ये अन्तर्यागपरे पुरुषे स्रष्टव्यानि सर्वाणि इन्द्रः स्रष्टा साध्नोतीति प्रतिपादनम्

१६२-३ 'चित्रं राधः विभु प्रभु' अत्र विवरणम्, 'अस्मान् सु तत्र चोदये'त्यत्र विशिष्टे व्याख्याने दिव्यधनरहस्यमुक्तम्

१६६-७ इन्द्रमेव सानुमन्तं बृहन्तं शिखरिणमिवारोहन्ति क्रमश इति रहस्यं प्रतिपादितम्, उत्तरोत्तराधिरोहे प्रभूतं प्राप्तव्यं स्पष्टं भवतीत्युपपादनम्

१६७ इन्द्राश्वप्रसङ्गे 'केशिनौ' इत्यस्य गम्यार्थः

१७०-१ 'स्वर्वतीरपः' अत्र विवरणम्, 'गाः सन्धूनुहि' अर्थस्योपपादनम्

१७२ ऋषौ देवतायां चावयवार्थ उपपद्यत इति कौशिकप्रस्तावे निर्वचनम्, तथा गोतम-जमदग्नि-भरद्वाजादयो निदर्शनमित्युक्तिः

१७६ स्वर्वतीर्गाः अपहृत्य पर्वतगुहायां क्वापि अन्धतमसे जडोपलक्षणे निहितवानसुरो वलो वृत्र-

पुटसङ्ख्या	
	बन्धुरिति वृत्तान्तान्वाख्यानस्य तत्त्वं संक्षेपेणोक्तम्
१७७	'शुष्णः' शोषयिता रसानां वल इव वृत्रबन्धुरिति कथनम्
१७९	अन्तर्यजने हविराद्यर्पणानां शरीरसंबन्धित्वकथनम्
१८१	'सत्यधर्माणं' अत्र सत्यधर्म एव परमं श्रेय इत्यादि निरूपणम्, 'सत्यधर्माय वृष्टये' इत्यौपनिषदवचनस्यानुस्मरणम्
१८३-४	आप्रीशब्दार्थविचारः—आप्रीणयित्र्यः आप्रियः याज्याः स्तुतयः, तत्र प्रयाजदेवता अधिकृत्य मतभेदोपन्यासः—आप्रीसूक्ते प्रतिपादितस्य तत्त्वस्य सारांशः कथं यजमाने अग्निराधातव्य इत्यादिना कथितः, आपूरयित्र्यो देवताः आप्रिय इति पक्षान्तरप्रतिपादनम्
१८५	सुसमिद्ध-तनूनपाच्छब्दार्थस्वरसतासूचनम्
१८६	नराशंसोऽग्निरित्युपपादनम्
१८६-७	'मनुर्हितः' अत्र विशेषः, ईळितोऽग्निरेवेति प्रतिपादनम्, अमृतचक्षुःस्थानं भवति अन्तर्वेद्यामासनमिति प्रतिपादनम्
१८८	द्वारो देवीरधिकृत्य यजमानायोर्ध्वगतिद्वाराणां उद्घाटनाय देवीः शक्तीः प्रार्थयत इत्यादि तत्त्वं प्रतिपादितम् 'नक्तोषासा' इत्यत्र रात्रिशब्देन साधारणी मानुषी प्रज्ञा, उषोलक्षितेन अह्ना दैवी प्रज्ञा इत्यादि रहस्यं सारत उक्तम्
१८९-९०	इळा सरस्वती भारती इति तिस्रो देवीरधिकृत्य विशिष्टं विवरणम्, 'इह त्वष्टारमूतये' इत्यस्य विवरणे 'यजमाने नवनवदिव्यरूपाणां आविष्काराय' इत्याद्यवधेयम्
१९१	साक्षात्सम्पर्करूपं ज्ञानं संज्ञानं प्रार्थ्यते देवेभ्य इति 'अव सृज' इत्यस्य विवरणे सूचनम् 'यज्वनो गृहे' मनःप्राणशरीरात्मके इति तत्त्वम्
१९३	चमू-चमसादिशब्दार्थरहस्यम्, द्रप्सशब्दार्थविचारः
१९४	स्त्रीदेवतानां पुरुषदेवतानां च विशेषस्य प्रदर्शनम्
१९७	अरुष-हरित्-रोहित्-शब्दानां साभिप्रायरथाश्वविशेषणानां तात्पर्यसूचनम्

पुटसङ्ख्या	
	ऋतुदेवता अधिकृत्य 'ऋतुना दिव्यसमयानुसारेणे'त्यादिगूढार्थप्रतिपादनम्
१९८	पोत्र-पोतृशब्दार्थविचारः रहस्यं च, तथा नेष्टृपदार्थप्रतिपादनम्
१९९	'योनिषु त्रिषु' इत्यत्र रहस्यार्थविवरणम् देवकामस्यान्तरुन्मेषशालिनः नित्यमिन्द्रसख्यमिति प्रतिपादनम्
२००-१	प्रकृतिभूतोऽध्वरः अग्निष्टोम इत्याद्युपन्यासेन अन्तर्यजने तात्पर्यप्रतिपादनम्, द्रविणशब्दार्थविचारः, 'देवेषु ता वनामहे' इत्यत्र तात्पर्ये स्वारस्यं, 'इष्यत' इष धातोर्न केवला गतिरर्थः, किंतु प्रेरणबलविशिष्टेति कथनम्
२०२	'तुरीयं यजामहे' इत्यत्र तात्पर्ये वैशिष्ट्यम् 'दीद्यग्नी अश्विना' अत्र अन्तरर्थानुसारेण युक्तिः
२०३	'गार्हपत्येन सन्त्य' तात्पर्यं अवधेयम्—'सन्त्य'शब्दनिर्वचनम् 'हरयः सूरचक्षसः' अत्रोपपादनम्
२०४-५	'धाना घृतस्नुवः' अत्र सविस्तरो विचार इन्द्राश्वौ अधिकृत्य
२०७	'गोभिरश्वैः काममा पृण' अत्र गूढार्थोऽवधेयः
२०८	इन्द्रस्य वरुणस्य च विशेषः प्रदर्शितः
२०९	'नेदिष्ठं ईमहे' अत्र तात्पर्यप्रतिपादने विचारः, युवाकुशब्दार्थविचारः
२१२-३	'कक्षीवन्तं य औशिजः' अत्र व्याख्याने वैशिष्ट्यम्, कक्षीवच्छब्दार्थः, अत्र यास्क-दुर्गभाष्यपङ्क्तीरुदाहृत्य सारनिर्देशः
२१३	'यो रेवान्' अत्र मन्त्रवाक्पतेर्देवस्य अन्तर्याजिनोपासकेन नित्यसंयोगः प्रार्थित इत्युपपादनम्
२१५	'दक्षिणा' सहजावबोधरूपिणी शक्तिरित्युक्तिः
२१६	'सदसस्पतिः अद्भुतः अग्निः' अत्र अद्भुत इत्यग्निलिङ्गं अवधेयम्, ऋषिरग्नेः सकाशादेव यजनतन्त्रं शिक्षत इति विवरणम्
२१७	'नराशंस'विचारः, 'सद्यमखसम्' अत्र निर्वचनादिविचारः
२१८	गोपीथशब्दार्थः, मरुत्स्वरूपस्य संक्षेपेण निर्देशः
२१९	'अर्कम्' अर्चनं ऋगात्मकं स्तोत्रमित्युक्तिः, उदकमिति सायणीयम्, इन्द्रमिति स्कन्दस्वा-

पुटसङ्ख्या	
	मीयमित्यादिनिर्देशः, मरुतां शुभ्रत्वविशेषण-स्वारस्यम्
२२०	मरुतां स्वरूपमधिकृत्य तेषां पर्वतचालनादीनां सूक्ष्मं तत्त्वम्
२२१-३	आर्भवसूक्तार्थविवरणाय पीठिका, ऋभूणां स्वरूपम्, इन्द्राश्वतक्षणनिष्पादनं मनुष्ये यजमाने तथा आश्विनरथतक्षणं, अमृतस्य दोग्ध्र्यः तक्षणं च
२२४	अखण्डप्रज्ञाया अमृतसुवो धेनोरवितेः स्वीयां वृत्तिं रूपीभवन्तीं मानुषे पुरुषे निष्पादयन्ति ऋभव इति संक्षेपेण प्रतिपादनम्
२२४-५	मातापित्रोः द्यावापृथिव्योः यौवनं संपादयन्ति ऋभव इत्यस्य तात्पर्यप्रतिपादनम्
२२५	ऋभुभिः सोमस्य सम्पादनं, तेषां इन्द्रादिभिः सङ्गमनमित्यादेस्तत्त्वम्
२२६	देवाश्चतुर्ऋहात्मके चमसे पानपात्रे सौम्यममृत-रसं पिबन्ति इत्यस्याशयः, मनुष्याय चतुर्ऋहात्मकसुखमयशरीरसम्पादनेन ऋभवस्तं सत्य-चिन्मयधामाधिवासक्षमं व्यधुरिति प्रतिपादनम्
२२७	मानुष्यां सिद्धायां प्रज्ञायां सदानन्दप्रवाहान् धारयितुमृभवः प्रभवन्तीति प्रतिपाद्य तेषां देवभाग-परिकल्पनदानवक्षत्वमपि वर्णितम्
२२९	'प्रचेतुने पदे' इत्यत्र विष्णोः परमं पदमेवोक्त-मित्युपपादनम्, ज्वलितऋतुभूतोऽग्निविभवः भास्वरचेतोभूत इन्द्रविभवः, उभाभ्यां सङ्गताभ्यां जागरूकाभ्यां लब्धव्यं तत्पदं नः शरणमिति 'तेन सत्येन' इति मन्त्रस्य सारांशः प्रत्यपादि
२३१	'या वां कशा' इत्यत्र कशा वागिति उपपादनं, कर्मठव्याख्यानिरीक्षणम्, 'न हि वामस्ति दूरके' अत्र तात्पर्यं उपपत्तिश्च
२३२	'अपां नपातं सवितार'मित्यत्र तात्पर्यविचारः उपपत्तिश्च
२३४	भारती बृहज्ज्योतिष ऋतभा, होत्रा वरूत्री धिषणा इत्यादीनां विवरणम्
२३५-६	'तयोरित्' अत्र विशिष्टा व्याख्या, 'गन्धर्वस्य ध्रुवे पदे' अत्र, यत्र ऋतरश्मिर्दीप्तो लसति स्थिरः च तस्मिन् पदे इति मन्त्रवर्णान्तरेणोपपादनम्

पुटसङ्ख्या	
२३७	'सप्त धामभिः' अत्र सप्ततत्त्वात्मिका विश्वसत्तेत्यादिविवरणम्, षण्णां वैष्णवीनामृचां विषय-सङ्ग्रहः
२३८	'तद्विष्णोः परमं पदं' अस्य भूमिकायां (पृ० ६७-६८) प्रसक्तिः स्मारिता
२३९	'तद्विप्रासः' अत्र व्याख्यायां तदुक्तमृषिणेत्याद्यौप-निषदवाक्यानां ईदृशा मन्त्रा बीजायन्त इति प्रतिपादनम्
२४३	पृश्निश्चित्रवर्णा गौरित्युपन्यस्य मरुतः पृश्निमा-तर इत्यस्य तात्पर्योपपादनम्
२४४	पौष्णतृचे 'आजा नष्टं यथा पशुम्' इति वृष्टान्त-विवरणेन गूढस्य सोमस्याहरणे दक्षः पूषेत्युप-पादनम्
२४५	'उतो स मह्यं' अत्र पूष्णो विभवः 'गोभिर्यवं न चर्कृषत्' इति वृष्टान्तेन प्रतिपादितः, तामसैर्देवा-रिभिरपहृत्य रहसि निहितं देवानामग्नं अमृतं सोममाहृत्य यजमानं पुष्णातीत्यादिरहस्योद्-घाटनम्
२४७	'अप्स्वन्तरमृतं' अत्र सङ्केतभूता आप इत्यादि-कथनम् 'अप्सु मे सोमो अब्रवीत्' व्याख्यायां विशेषोऽव-धेयः
२४८	'आपः पृणीत' निरन्तरं सूर्यदर्शनाय बलप्रदं भेषजं न लौकिकं भवति, दिव्यवैभवं आप्यं भेषज-मिति प्रतिपादनम्
२४९	आप्यसारतादात्म्यानुभवसम्पन्न ऋषिरिति 'आपो अद्य' इत्यस्य व्याख्यायां प्रतिपादितम्
२४९-५०	'सं माग्ने वर्चसा' इत्यस्य विवृतौ 'ऋषयो मानुष्यस्योद्धारायेन्द्रस्य सहकारिणः मनुष्या एव, देवभावं प्राप्ताः मानुष्याभिमानिनो देवर्षयो वा' इत्यादि प्रतिपादितम्
२५१	ऋषिः शुनःशेपः पाशबद्धमात्मानमवबुद्ध्य विमोचनाय कं देवं आह्वयामि इत्यारभते, अत्र अदितेर्विश्वमातुर्लाभस्य रहस्यं विवृतम्, 'भागं ईमहे' अत्र मन्त्रवर्णान्तरैः संगतिरुक्ता
२५३	'अबुध्ने राजा वरुणः' अत्र गूढार्थवैशिष्ट्यमवधेयम्
२५४	'वनस्तूपः' चिन्मयो भवति यस्मात् केतवः प्रस-

पुटसङ्ख्या	
	रन्ति,'स्तृपः सङ्घातः'इत्यादौ रहस्यानि विव्रियन्ते, 'वरुणः सूर्यायाध्वानं करोती'त्यत्रोपपादनम्
२५५	'हृवयाविधश्चित्' अस्य विवरणे वरुणस्य कृत्यं प्रदर्शितम्, निर्ऋतिः समष्टिगता जगद्व्यापार-वर्तिनी मृत्युदेवता सर्वपापमूलभूतेत्यादि प्रति-पादितम्
२५६	यद्यप्यध्यात्मं देवानां कर्माण्येव ऋषीणां प्राधा-न्येन लक्ष्याणि भवन्ति, तथापि जगद्व्यापारे देवानामधिकारोऽविचाल्य इत्यादिनिरूपणम्
२५७	'तदिन्नक्तं' अत्रर्चि 'तदयं केतो हृद आ विचष्टे' इत्यस्यात्यन्तप्राधान्यमाविष्कृतम्
२५८	'शुनःशेपो ह्याह्वत्' अस्य व्याख्यायां 'त्रिषु द्रुपदेषु' इत्यत्र रहस्यार्थविवरणम्
२५९	सूक्तस्यान्ते, पाशबन्धविमोचनविषये उपनिषदु-पदिष्टग्रन्थिभेदरहस्यं तान्त्रिकयोगमार्गोपदिष्ट-ग्रन्थिबन्धत्रयभेदतात्पर्यं च सामान्येन निर्दिष्टे, विप्रमोक्षोऽत्र वरुणदेवानुग्रहसाध्यो भवतीत्युक्तम्
२५९-६१	टिप्पण्यां शुनःशेपशब्दार्थप्रतिपादनम्, ऐतरेय-ब्राह्मणोक्तशुनःशेपकथाविस्तरः, तत्र सायण-भाष्यपङ्क्तीरुवाहृत्य नरवधकथाया दूषणम्, पुरुषमेधस्य तत्त्वम्, उव्वटभाष्यनिरीक्षा, अतिष्ठा-कामशब्दनिर्वचनम्, अतिष्ठाकामस्य पुरुषमेधाधि-कार इत्यादिबहुरहस्यविवरणम्
२६२	'परा हि मे वि मन्यवः' इत्यत्र धीवृत्तीनां उत्पतन-मधिकृत्य प्रसङ्गः
२६३-४	'तवित् समानं' अत्र तच्छब्दवाच्यं ऋतं ज्योति-रित्युपपादनम्, टिप्पण्यां 'वेनन्ता मित्रावरुणा'-वित्युपपादनम्
२६४	'वेदा यो वीनां पदं' अत्र व्याख्यावैशिष्ट्यम्
२६५	'वेद मासो धृतव्रतः' इत्यत्र सारांशकथनम्
२६६	'परि स्पशो निषेदिरे' अत्र हिरण्मयपात्राच्छादितं सत्यं ज्ञापयितुं निषण्णाः 'स्पशाः' प्रणिधय इव ज्ञापकाः रश्मयो विद्या विभूतयो वेति विवरणम्
२६७-८	'उत यो मानुषेष्वा' अस्या ऋचस्तात्पर्यविचारः
२७०	'उदुत्तमं मुमुग्धि' अत्र 'जीवसे' जीवनाय पाश-त्रयविमोचनप्रार्थना
२७२	'आ नो बर्ही' अत्र अन्तर्यागे मनुष्या इव देवाः

पुटसङ्ख्या	
	प्रत्यक्षीभूय व्यवहारयोग्या इति तात्पर्यनिर्देशः
२७३	अग्नियुक्तानां देवानामनुग्रहादेव अग्निं स्तोतुं ध्यातुं ज्ञातुं वा प्रभवन्ति मनुष्या इति 'स्वग्नयो हि वार्यं' इति ऋचस्तात्पर्ये सूचनम्
२७५	'वारवन्तम्' इत्यत्र विशेषणस्य प्रयोजनम्
२७६-७	'सिन्धोरूर्मा उपाक आ' अस्य दृष्टान्तस्य तात्प-र्योपपादनम्
२७८	'जराबोध' अत्र मन्त्रार्थे विचारः
२७९	'धूमकेतुः' निर्वचनम्, बलवेगभावस्पन्दनेनाग्नि-र्ज्ञायत इति भावाविष्कारः
२८०	नमो महद्भ्य इति मन्त्रे नमस्करण-यजन-शंस-नानां आराध्यभेदेनोपपादनम्
२८०-१	यत्र ग्रावेति सूक्ते यज्ञसाधनाभिधायकाः उलू-खलाधिषवणीयादयः प्रयुक्ताः, अत्र परोक्षा सूक्ष्मशः, प्रथमर्चस्तात्पर्यं बाह्यपक्षानुसारेणैव उपपादनम्
२८१	'द्वाविव जधना' इत्यत्र विवक्षाप्रदर्शनम्
२८२	उपच्यव-अपच्यवशब्दार्थः 'मन्थां' इत्यत्र सामान्यार्थः
२८५-८	सूक्तचर्चां प्रत्येकं गूढार्थानुसारेण तात्पर्यकथनम्, टिप्पण्यां इदमञ्जःसवसूक्तं ऐतरेयब्राह्मणे समु-पन्यस्तमिति तत्रस्थशुनःशेपकथाप्रसक्तिः, परोक्ष-वचनानां सूक्तस्थानां विशदीकरणम्, तैत्तिरीय-वाजसनेयादिश्रुतिवाक्योदाहरणेन सोमाभिषवा-दीनां रहस्योद्घाटनम्
२९०-२	'यच्चिद्धि सोमपा' इति 'मिथूदृशा' 'गर्दभ'-'कृक-दाश्वा'दि-परोक्षवचनानां अर्थाविष्कारः
२९३	इन्द्रः अनायासेन सोमं स्वीकर्तुं गच्छतीत्यत्र दृष्टान्तस्वारस्यम् तथा 'समुद्रो न व्यचो दधे इत्यस्य भावविवरणम्
२९४	इन्द्रो यजमाने रमते अत्र 'कपोत इव गर्भधिम् इति दृष्टान्तस्य विवरणम्
२९५	'ऊर्ध्वस्तिष्ठ' अत्र देवैः सह ऋषीणामन्तरङ्ग व्यवहारो लक्षितः
२९७-८	'रेवतीः' इत्यत्र व्याख्यातृणां विप्रतिपत्तिः, तत्र निर्णयः
२९८	'ऋणोरक्षं न चक्र्योः' अस्य विवरणे विचारः

पुटसङ्ख्या

२९९ 'ऋणोरक्षन्न शचीभिः' वृष्टान्तेन विवक्षा प्रदर्शिता

३०० 'शश्वदिन्द्र' इति ऋचस्तात्पर्यं ज्योतिर्मयेन रथेन दिव्यं धाम गच्छन्ति देवकामा ऋषय इति प्रतिपादनम्

३०१ 'न्यघ्न्यस्य मूर्धनि' अत्र विशिष्टं तात्पर्योपपादनम्

३०२ 'कस्त उषः कध प्रिये' अत्र साधारण उषःकालो नाभिप्रेत इत्युपपादनम्, अन्यथा गृहीतश्चेत् असामञ्जस्यप्रदर्शनम्, 'वयं हि ते अमन्महि' अत्र तात्पर्योपपत्तिरवधेया

३०३-४ 'विघ्नतापसः भ्राजदृष्टयः' मरुतः अग्नेरजायन्तेति कथनम्, अङ्गिरस्तमः द्विमाता इत्यादीनां निर्वचनं तात्पर्यं च

३०६ पुरूरवःशब्दार्थः

३०७ बहुधा जीवन्नग्निरेकायुरिति प्रतिपादनम्

३०८-९ 'उभयाय जन्मने' अत्र विवरणम्

३१० 'त्वं नो अग्ने' अत्र 'पित्रोरुपस्थे' अस्य तात्पर्योपपादनम्
'त्वमग्ने प्रमतिः' अत्र 'वयमुपासकास्तव बन्धवः' इति अग्निं प्रति ऋषेरुक्तिरवधेया

३११ आयु-नहुष-मनुष्यशब्दानां वैशिष्ट्यप्रतिपादनम्
इळायाः प्रसक्तिः, सा पश्यन्ती वागिति प्रतिपादनम्

३१२ 'त्वं नो अग्ने' अत्र 'गवां तोकस्य तनये अनिमेषं रक्षमाणः' इत्यस्य व्याख्यायां विचारः
चतुरक्षः अग्निः कथमिति विचारः

३१४ 'जोवयाजम्' इत्यादिप्रयोगस्य स्वरसताकथनम्

३१५ 'मर्त्यानां ऋषिकृत्' अत्र वैशिष्ट्यमवधेयम्

३१६ 'मनुष्वत्' 'अङ्गिरस्वत्' 'ययातिवत्' अत्र विवरणम्, नाम्नां निर्वचनानि
'एतेनाग्ने' अस्यास्तात्पर्ये 'स्तूयमाना देवताः स्तोतरि वर्धन्ते' इति प्रतिपादनम्

३१७ 'इन्द्रस्य नु वीर्याणि प्रवोचं' इति सूक्तारम्भः, अत्र ऋचां पदार्थदानं स्थूलरीत्या कृतम्, अन्ते गूढार्थविवरणं प्रतिज्ञातम्

३१८ 'वाश्रा इव धेनवः' वृष्टान्तस्य प्रयोजनम्
'त्रिकद्रुकेषु' ज्योतिः-गौरायुरिति गूढार्थस्य द्वारं प्रदर्शितम्

३२४ वृत्रहत्या गोलाभः सोमप्राप्तिः सप्तसिन्धुविमोचनमित्येतेषां सम्बन्धमधिकृत्य उत्तरत्र पश्याम इत्युक्तम्

३२५ 'अहेर्यातारं' अस्यामृचि व्याख्यायां सन्देहोत्थापनं समाधानं च

३२६ 'इन्द्रो यातः' अत्र 'शमस्य' 'शृङ्गिणः' इत्यादेः वैशिष्ट्यम्
अथ हिरण्यस्तूपस्य सूक्तद्वयं रहस्यार्थानुसारेण तात्पर्यवत् क्रियते, तत्र प्रथमं अङ्गिरोविचारः

३२७ सर्वथा आङ्गिरसं तत्त्वं अग्निवैभवसंबन्धीत्युपपादनम्, अङ्गिरसो देवाः मनुष्या ऋषयश्चेत्यत्र विचारः

३२८-९ अङ्गिरसां सप्त-सङ्ख्यया कीर्तनेऽपि बृहस्पतिरूपेणैषामेकरूपत्वप्रतिपादनम्, अथ वृत्रकथा, आङ्गिरसकथाया गवां विमोचनं मुख्यो विषयः, वृत्रकथायास्तु अपां विमोचनमित्यादीनां रहस्यविवरणम्

३३३ विव्यज्ञानरश्मिद्योतकगोलिप्सून् सखीन् प्रति ऋषेरुक्तिः पर्वतगुहाशब्दबोधिते जडगते तमसि निक्षिप्तानां गवां लाभाय परं ज्ञानमावश्यकमिति

३३४ तेजोबलाद्यपहारिणां असुराणां प्रसक्तिः

३३५ 'वधीर्हि दस्युं' अत्र वृत्रो धनीत्युक्तेः तात्पर्यविचारः

३३७ नवग्वाः दशग्वाः इति अङ्गिरसां भेदस्य विवरणम्

३३८ 'परि यदिन्द्र' अत्र सायणीयतात्पर्यस्यानुपपत्तिर्दर्शिता

३३९-४० 'न ये दिवः' अत्र व्याख्या विशिष्टा, 'गाव एव आपः' इति सायणोक्तं विचित्रम्

३४० 'नाव्यानां' अस्य अपां विशेषणस्य प्रयोजनम्

३४१ इलीबिश-शुष्णौ वृत्राद्यान्याविति सायणीयम्, तत्र नाङ्गीकारः

३४२ कुत्स-दशद्युः-श्वैत्रेयाणां प्रसक्तिः, तन्नाम्नां निर्वचनम्

३४३ 'आवः शमं' अस्य व्याख्या विशेषतो मुख्या, 'तुग्रघा'शब्दार्थविचारः, सायणोक्तेर्निरीक्षणम्

३४४-५ हिरण्यस्तूपस्य ऐन्द्रसूक्तद्वयस्य रहस्यार्थविचारः, पर्वतः, आपः, समुद्रः, गावः, उषः, सूर्यः, वृत्रवलपणयः—एवमादीनां बहिःसङ्केतरूपाणां अन्तर्गूढार्थानां विवरणम्

पुटसङ्ख्या	
३४६-७	प्रत्यृचं इन्द्रसूक्तस्य तात्पर्यप्रतिपादनम्
३४८	'नवेदसा'शब्दनिर्वचने कष्टं निर्विष्टम्, 'नवेदाः ज्ञाता' इति कथनम्
३४९	'हिम्येव वाससः' अत्र नव्यानामेकेषां आशयः, तत्र अयुक्तिप्रदर्शनम्
३५०	'त्रयः पवयः' ऋचो व्याख्यायां अविद्याच्छन्ना तमोव्याप्ता रात्रिः अधस्तनत्रैलोक्यावस्थानं लक्षयतीत्यादिविवरणम् 'त्रिरद्य यज्ञ'मित्यत्र वेहत्रयापेक्षयेति कथनम्
३५२	अश्विनोर्भार्या सूर्या तत्रथमारोहतीति प्रसिद्धेः स्मरणम् 'शंयुः' ऐतिहासिकः, रहस्यार्थे, तोकतनयादिशब्दानां च तात्पर्यम्, त्रिधातुशब्दार्थविचारः
३५३	'त्रिर्नो अश्विना' अत्र प्रार्थनासारांशकथनम्
३५३-४	'त्रिरश्विना सिन्धुभिः' अत्र सप्ततत्त्वात्मकचित्तेजोवाहिनीभिरित्यारभ्य तत्रक्ष्यतामित्यन्तं सूक्ष्मं तत्त्वं प्रतिपादितम्
३५५-६	'आ नासत्या' अत्र एकादश देवाः प्रस्तुताः के त इति विचारे मतभेदकथनम्
३५७	'आ कृष्णेन रजसा' अत्र मर्त्यस्य कार्यं यजनं अमृतस्य देवजातस्य कार्यं तु मर्त्योपकारकत्वमित्याद्युपपादनम्
३५९	'वि जनान्' अस्या ऋचस्तात्पर्ये ये न लब्धप्रकाशाः तेषां असूर्या नाम ते लोका इति प्रतिपादनम् 'तिस्रो द्यावः' ऋचि व्याख्याभेदः
३६०	'यमस्य भुवने' इत्यत्र विशेषतो विचारोऽवधातव्यः
३६१	'वि सुपर्णः' अत्र दिव्यं रहस्यं दुर्ज्ञेयं मनुष्यस्येति तात्पर्यकथनम्
३६१-२	'अष्टौ व्यख्यत्' अस्यां सायणव्याख्या अयुक्ता नाऽङ्गीकृता, तात्पर्यं उपपादितम्
३६३	यातुधानशब्दनिर्वचनम्
३६७	'त्वं घेमित्था' स्तोतुर्वाग्भिः हृदयस्थोऽग्निर्ज्वलित इति प्रतिपादनम्, अन्तर्यागे 'सप्त होत्राः' इत्यादेः रहस्यस्मरणम्
३६७-८	'घ्नन्तो वृत्रं' अत्र अग्निरश्व इति कथनस्योपपत्तिः, अत्र अवधेया व्याख्या
३७०-१	'ऊर्ध्व ऊ षु णः' अत्र व्याख्याने वैशिष्ट्यमवधेयम्, यूपस्थोऽग्निरिति याज्ञिकाः, यजमानशरीरस्थोऽग्निरिति प्रतिपादितम्
३७३-४	'अग्निना तुर्वशं' तुर्वशादिनाम्नां निर्वचनम्, नववास्त्व-बृहद्रथ-तुर्वीतयो व्याख्याताः
३७६	मरुद्गणतत्त्वग्रहणेन पृषत्यादीनां लाक्षणिकत्वं सुगममित्यारभ्य 'अञ्जिभिर्वाशीभिः साकं मरुतः ऋषेरन्तर्यागप्रवृत्तस्यार्थे प्रादुर्भवन्ती'त्युपपादितम्
३७७	'इहेव शृण्वे' अत्र तात्पर्योपपत्तिः
३७८	'प्र शंसा' अत्र ऋचस्तात्पर्ये, अन्तर्यजने मरुद्गणस्य प्रादुर्भावात्परं तस्य सोमरसेन वृद्धिर्भवतीत्युपपादनम्
३८०	'स्थिरं हि जानं' अत्र व्याख्यायां सङ्केतरहस्यानुसारेण मरुतः प्राणात्मकाः धीवृत्तिरूपतां प्राप्ता इत्यादिविवरणम्
३८२	'यद्ध यान्ति' अत्र मरुतां शब्दः न सर्वेषां श्रवणगोचरः, अन्तर्याजिनः कस्यचिदेवेत्युपपादनम्
३८३-४	'क्व नूनं कद्वो' अत्र तात्पर्योपपत्तिः
३८४	मरुतां मानवे जन्मलाभः स्मारितः
३८५	'मा वो मृगो न यवसे' तात्पर्यं अवधेयम्, सायणोऽन्यथा व्याचष्टे, 'मो षु णः' पूर्वयर्चा सङ्गतिर्ज्ञापिता, निर्ऋतिः पापदेवता मायात्मिका वेत्यादि व्याख्यायां प्रतिपादितम्
३८६	'वाश्रेव विद्युत्' अत्र अन्तर्यागे चलति, दशाविशेषेषु मध्यमस्थाने ज्योतिर्दर्शनमित्यादि प्रोक्तम्
३८७	'दिवा चित्तमः' अत्र अन्तर्यागे सत्यपि नित्ये ज्योतिर्विलासे रसवर्षातिरेकात् क्वचित् विश्वं तमोवृतमिव भवतीत्यादि रहस्यमुक्तम् 'अध स्वनात्' अत्र सर्वं सप्त सर्वयजमानशरीरमित्यादि प्रोक्तम्
३८८	'मरुतो वीळुपाणिभिः' अत्र कूलस्थानीयं शरीरं, नद्यः शक्तिधारावाहिन्यः प्राणस्थाना इति रहस्यं विवृतम्
३८८-९	'अच्छा वदा' अत्र 'अग्निः होतृवाग्विशिष्टोऽपि सर्वस्याश्च वाचो देवता' इत्यादिकं, स ब्रह्मणस्पतिश्च भवतीति चोक्तम्
३८९	'मिमीहि' अत्र वाचा स्तोत्रोच्चारणस्य वैभवं

पुटसङ्ख्या	
	देवताप्रीणनं भवतीत्युक्तम्
३९०	'प्र यदित्था' अत्र मरुतः पुष्यपुरुषं आविश्यानुगृह्णन्तीति तात्पर्योपपादनम्, 'मानम्' इत्यत्र विविधमाचक्षते चिन्तका इत्यादिपरीक्षणम्
३९१	'स्थिरा वः सन्तु' मारुतबलेनैव जयः संपाद्यत इत्युपपादनम् 'परा हि यत्' अत्र अन्नमयाद्यूर्ध्वकक्ष्याः मरुद्भिः प्रवेश्या इति प्रतिपादनम्
३९३	'उपो रथेषु' अत्र पृषतीनां त्रित्वं प्रति जिज्ञासा निर्णयश्चोक्तौ
३९४	'युष्मेषितः' अत्र अन्यव्याख्याया वैरस्यप्रदर्शनं अस्मत्तात्पर्योपपत्तिश्च
३९६-७	ब्रह्मणस्पतिस्वरूपविचारः, ब्रह्मणस्पतिः बृहस्पतिः ब्रह्मा इति त्रीणि नामानि एकां देवतां निर्दिशन्तीत्युपक्रम्य तत्र त्रयस्य वैशिष्ट्यं विचारितम्, त्रयाणां पृथक् अवस्थाभेदेन गुणभेदप्रतिपादनम्
३९८	'प्राशूः'शब्दार्थविचारे सायणमहीधरोव्वटानामुल्लेखनम्, अस्मदीयार्थोपपादनम्
३९९	'यो वाघते' अत्र यजमाने ब्रह्मणस्पतिरुत्थितः सन् तस्मै मन्त्रवाचमुच्चारयतीत्याद्युपपादनम्
४००	'प्र नूनम्' ब्रह्मणस्पतिना मन्त्रे उदीरिते देवाः पुरुषे स्वीयाधारस्थानानि कृत्वा तमनुग्रहीतुं प्रसन्ना भवन्तीति भाव आविष्कृतः, 'तमिद् वोचेम' अत्र 'इमां वाचं प्रतिहर्यथ' व्याख्याऽवधेया
४०१	'को देवयन्तं' व्याख्यायां सूक्ष्मोऽर्थः सायणीयाद्विद्यते
४०४	'स रत्नं' अत्र आदित्यानुग्रहपात्रभूतो यजमानः स्वप्रभावाद्विस्तृतो भूत्वा स्वं तेजोऽन्यत्र सङ्क्रमय्य स्वसदृशं सृजतीति प्रतिपादितम्
४०५	'कथा राधाम' किं प्सरो रूपं उत भक्षणमिहेति विचारः
४०५-७	'मा वो घ्नन्तं' तात्पर्यमवधेयम्, 'चतुरश्चित्' इत्यनया अर्थसङ्गतिः, मित्राविदेवताचतुष्टयं व्यूहात्मकं वेदे प्रसिद्धमित्युपपादनम्
४०७-८	पूषा विचार्यते
४०८	पूषा पतिः पृथिव्याः, पूर्वज उषसः, भ्रातेन्द्रस्य, यजमानस्य पथस्पतिः, यजमानगवेषणपरायणः,

पुटसङ्ख्या	
	यजनोद्यमप्रबोधनपरश्चेत्यादिपूषगुणोपपादनम्
४०९	'यो नः पूषन्' अत्र यागयात्रायां मार्गे बाधकं पापवर्गं अपसारयति पूषा
४१३	'कद्रुद्राय' अत्र 'हृदयस्यार्थे सुखकरं, हृदयनिष्ठाय हृदयभूताय रुद्रायेति वा' पङ्क्तिरवधेया
४१४	'यथा नो मित्रो वरुणः' अत्र मित्रादीनामस्मद्विषयकं ज्ञानं अनुग्रहार्थकं ज्ञेयमिति विवरणम्
४१५	'गाथपतिं' जलाषभेषजं-रुद्रसंबन्धि औषधं अलौकिकं सुखरूपम्
४१७-२०	रुद्रस्य तत्त्वमधिकृत्य सविस्तरविचारः, अन्ते मृत्युञ्जयरुद्रमन्त्रार्थचिन्तनम्, तत्रोपनिषद्वाक्यस्य मूलं प्रदर्शितम्
४२३	'सुशंसो बोधि' प्रस्कण्वस्यायुर्देवतार्थमेव विहितमिति प्रतिपादितम्
४२५	'अग्ने पूर्वा' महत ऋतस्य ज्योतिषः प्रादुर्भावात् पूर्वं बह्वृच उषसो भवन्तीति स्मारितम्
४२८	'त्वमग्ने' न केवलं वस्वादीन् देवान् यज, अभ्यञ्जन्तं मानुषं जनमपीति अग्नेः प्रार्थनायां तादृशस्य मनुजन्मनः देवतुल्यत्वं देवार्थजीवित्वं च विवक्षिते इति प्रदर्शितम्
४३१	'आ त्वा विप्राः' अन्तर्यजनरहस्यविदो विप्राः सिद्धाः मर्त्यानामुपकारिण इति दर्शितम्
४३२	तिरोअह्न्य-शब्दार्थः, अन्तर्यजने तात्पर्योपपादनम्
४३३	'वच्यन्ते वां' स्तुत्ये द्युलोके यदा अश्विनोः रथो गच्छति तदा अश्विनोरुत्कर्षाः स्पष्टाः लक्ष्यन्त इत्याद्युपपादनम्
४३४	'हविषा जारो' अत्र 'कुटस्य चर्षणिः' गृहस्य द्रष्टा पालकोऽग्निरिति प्रतिपादनम्
४३५	'या नः पीपरत्' 'तमस्तिरः' इत्यत्र सायणीयार्थस्यानादरः कार्य इति युक्तिः प्रदर्शिता
४३६-७	'दिवस्कण्वासः' अत्र 'हे अश्विनौ, युवां किं वसुस्थाने समुद्रे, उत सोमजन्मस्थाने दिवि स्वीयं रूपं शरीरं आविष्कृत्य प्रतिष्ठापयथः' इति प्रश्न ऋषिणा कृतः, अस्य विवक्षा तात्पर्ये प्रदर्शिता, 'कण्वासः' इति अश्विनोरेव संबोधनमिति सूचनेन सायणीयक्लेशस्य क्षतिरित्युपपादितम्

पुटसङ्ख्या

४३९ 'युवोरुषा' अत्र कथं ऋतवननं रात्रिभिर्भवतीति प्रश्नस्य समाधानम्

४४१ 'त्रिषधस्थे'शब्दार्थविचारः

४४२ 'सुदासे' अत्र समुद्रात् सत्त्वसमृद्धादखण्डमूलस्थानादित्याद्यवधेयम्

४४३ 'यन्नासत्या' अत्र 'अधि तुर्वशे' इत्यत्र विशिष्य विचारः, स वीरः पुरुषः यो देवभावकामः यज्वा अदैव्यान् अरीन् हिंसित्वा जयति, देवप्रियश्च भवतीत्यादि प्रतिपादितम्

४४६ 'अश्वावतीर्गोमतीः' अत्र राधसो लक्षणमधिकृत्योक्तम्, 'उवासोषा' 'समुद्रे न श्रवस्यवः' वृष्टान्तस्योपपत्तिर्विचारिता

४४७-८ 'उषो ये ते' अत्र सूक्ष्मोऽर्थः, स्थूलश्च निर्दिष्टः, 'उत घा योषेव' अत्र लोकान्तरगतिरत्रस्थस्यैव देहिनः सिध्यतीति रहस्योक्तिः, बाह्योऽर्थश्च दत्तः

४४८ 'वि या सृजति' वयः ज्ञानांशव ऊर्ध्वं गच्छन्तीत्यादि प्रतिपादनम्

४४९ 'विश्वमस्या' सूनरी, ज्योतिः कृणोतीत्यादीनां विशिष्टं विवरणम्

४५१ 'विश्वान् देवान्' अश्ववत् गोमत् सुवीर्यं वाजमित्यादीनां विवरणम्

४५३ 'उषो यदद्य' अन्तर्यजने स्वर्लोकस्य बहिर्द्वारं अन्तर्द्वारमिति द्वारत्रयमुषसोद्घाटितं भवतीति प्रतिपादनम्

४५४ 'उषो भद्रेभिः' अन्तर्याजिनः यज्ञगृहभूतं शरीरं इत्याविनिर्देशः

४५५ 'वयश्चित्ते' रहस्यपक्षे द्विपत्-चतुष्पच्छब्दार्थः प्रत्यपादि

४५६ 'उदु त्यं' अत्र 'सर्वेषां देवानामादिरन्तश्च सूर्यात्मना प्रतीकेने'त्युपक्रम्य 'अत एव वैदिकयोगनिष्ठाबाह्या मुह्यन्ति साधारणसूर्योदयादिवर्णनमात्रपरा मन्त्रा इति' इति प्रतिपादनम्

४५८ 'तरणिर्विश्व' अत्रोपनिषद्वाक्यानां बीजं द्रष्टव्यमिति सूचनम्

४५९ 'येना पावक' अत्र वरुणस्य पावकेति संबोधनं न लक्षितं सायणीये, ततः उत्तरर्चा संबन्धोऽपि नावेक्षितः

पुटसङ्ख्या

४६० 'वि द्यामेषि' बह्वृचः अन्तःप्रकाशदशाः अन्तर्याजिन इति स्मारितम्

४६१ 'उद्वयं' अत्र प्रतिपादितः सूर्यो न लौकिक इति सायणव्याख्याबलेनैव निरूपितं भूमिकायां, नव्या अपि अलौकिकः सूर्योऽयमित्यनुगृह्णन्तीति विवरणम्, 'उद्यन्नद्य' बाह्यशरीरस्यापि काचन सिद्धिरावश्यकीति मन्त्रद्रष्टृणां मतमित्यादि प्रदर्शितम्

४६२ 'शुकेषु मे हरिमाणं' व्याख्याऽवधेया, 'उदगादयं' 'भगवानेव मह्यं कर्तव्यं करोतु द्विषद्विषये' इत्युपपादनम्

४६३ 'अभि त्यं मेषं' अत्र मेषशब्दार्थो विचारितः

४६४ 'अभीमवन्वन्' अत्र ऋभवो मरुत इति सायणी योक्तिर्न युक्तेति दर्शितम्

४६५ अत्रि-विमद-गोत्रादयो निरुक्ताः रहस्यार्थं प्रतिपादयन्ति

४६६ 'त्वं मायाभिः' व्याख्या विशिष्टा, पिप्रुः ऋजिश्वा च निरुक्तौ व्याख्यातौ

४६७ 'त्वं कुत्सं' अतिथिग्वो व्याख्यातः, कुत्सशुष्णादयः निरुक्ताः स्मारिताः

४६९ 'अनुव्रताय' अत्र वम्रः स्तोत्रोद्गारशीलः, तात्पर्यविचारे सायणीयं परीक्षितम्

४७१ 'मन्दिष्ट' अत्र तात्पर्योपपादनं अवधेयम्

४७२ 'आ स्मा रथं' शर्यातिप्रसङ्गः
'अददा अभीं' तात्पर्योपपादनाय बहवो विषया उपन्यस्ताः, 'वृचया'शब्दार्थविचारः, धर्मार्थं पत्नीति संप्रदायस्य मूलं प्रदर्शितम्

४७४ 'इन्द्रो अश्रायि' इन्द्रो भगवानेव यजमानाय विविधानि धनानि संपादयतीत्युपपादनम्, 'वुर्यो यूपो न' वृष्टान्तस्य विवरणम्

४७६ 'स पर्वतो न' इन्द्रः वृत्रवधात्परं तेजोबलाविषु शक्तिषु मध्ये स्वयं अचलतयाऽवस्थित इति विवरणम्
'स हि द्वरः' स्वयं रसभरितः अस्मानपि रसेन पूरयितुं प्रभुरिन्द्र इति प्रतिपादनम्

४७८ 'अभि स्ववृष्टिं' अपां पुत्रः आप्त्यः त्रितः त्रिवृत्कृतस्य जगतः जडीभूतांशे गुप्तां शक्तिं उद्धर्तुं

पुटसङ्ख्या	
	तत्रावतीर्ण इत्यादि विवरणेन 'परिधीनिव त्रितः' इति दृष्टान्तो व्याख्यातः
४८०	'जघन्वान् उ' अत्र अन्वयोऽवधेयः, तथा सायणीयस्य च
४८२	'यदिन्विन्द्र' 'पृथिवी दशभुजिः' इत्यादीनां विवक्षा तात्पर्यं प्रतिपादिता
४८३	'त्वं भुवः प्रतिमानं' 'ऋष्ववीरस्य' अस्य विवरणभेदोऽवधेयः
४८५	'न्यू षु वाचं' अत्र ससतामिवेति वृष्टान्तस्योपपादनम्
४८७	'एभिर्धुभिः' यजमानकृतदानं इन्द्रस्य प्रतिदानमधिकृत्योक्तम्
४८८	'समिन्द्र राया' 'वीरशुष्मया गोअग्रया अश्वावत्या' तात्पर्योपपादनम्, विचित्रं सायणीयं चावेक्षितम्
४८९	'युधा युधं' नमुचिशब्दार्थः
४९०	'त्वमेतान् जनराज्ञः' वेदे वृत्तान्तान्वाख्यानस्य रहस्यार्थो लक्षणीय इत्युक्त्वा सुश्रवःशब्दार्थं प्रतिपाद्य ऋचस्तात्पर्योपपादनम्
४९२	'य उदृचीन्द्र' अन्तर्यागावसाने तत्परमपि देवरक्षिताः देवसखाः कल्याणतमाश्च सन्तो वयं तव भजकाः स्यामेति ऋषेरुक्तिः प्रतिपादिता
४९२-३	'मा नो अस्मिन्' एवञ्जातीयको वेदमन्त्रः 'भीषास्माद्वातः पवते' इत्याद्युपनिषद्वाक्यानां मूलमिति प्रतिपादनम्
४९५	'नि यत् वृणक्षि' प्राणवायोरूर्ध्वमूलस्थाने रसावर्जनेन विव्यभोगक्रियादिशक्तिसंपन्नो भवति प्राणवान् यजमानलोकः, तथा शुष्णस्यावर्जनात् स शुष्णत्वमेवोज्झतीत्यादिविवरणम्
४९६	'स घा राजा' इन्द्रशासनानुष्ठानफलं इन्द्रस्तुतिफलं चोक्ते, उपराशब्दार्थे विशेषोऽवधेयः
४९७	'असमं क्षत्रं' 'नेमे ये ते' इत्यत्र सायणोक्तिः, अस्मदर्थोपपत्तिश्च
४९८	'तुभ्येदेते' अद्रिः चमूषदः इत्यादेर्विवरणम् 'अपामतिष्ठत्' अपां सङ्केतरूपत्वानभ्युपगमे तात्पर्यानुपपत्तिरित्यादि प्रतिपादितम्
५००	'सो अर्णवः' अपां परिग्रहीता अपां राशिरिवेन्द्रस्ताः शक्तीर्वर्षति यजमानाय सोमकाम इत्युपपादनम्, 'ओजसा पनस्यते' बलेन महत्कर्म कर्तुमिच्छतीति विवृतम्, पनधातोरर्थे विचारः
५०१-२	'स इद्वने' नैष्ठिकानामन्तर्यागपराणां पूर्वेषां देवताभिः सह रहसि व्यवहार इत्याद्युपपादनम्, यदा इन्द्र एव वाचं स्तुतिलक्षणां प्रेरयति तदा स प्रीणयिता भवतीत्युपपादने सायणीयार्थस्य निरीक्षणम्
५०२	'स इन्महानि' 'श्रवस्मै धत्त स जनास इन्द्र' इति मन्त्रान्तरोदाहरणपूर्वकं श्रद्धारहस्योपपादनम्
५०३	'स हि श्रवस्युः' अवृकाणीत्यत्र विशिष्टोऽर्थः
५०४	'अप्रक्षितं' 'आवृतासो अवतासो न' इति वृष्टान्तस्य प्रयोजनम्
५०५	'एष प्र पूर्वीः' इन्द्रः स्वस्थानादवतीर्य यजमानस्वभूतान्नमयादिशरीरेषु चमसपदवेदनीयेषु अवस्थितः 'इषः' प्रेरणाशक्तीरूर्ध्वं नयतीत्यादिविवरणम् 'चम्रिषः' अस्य व्युत्पादने 'सोमलक्षणा इषः अन्नानी'ति बाह्यार्थोपपत्तिर्दर्शिता
५०६	'तं गूर्तयः' इन्द्रपदप्राप्तिः पर्वताधिरोहेणोपमितेत्यादिविवरणम्
५०७	'देवी यदि' 'अहेरिव्वणिः' अस्य निर्वचनं अर्थश्च
५०८	'त्वं दिवो धरुणं' 'पृथिव्याः सदनेषु' तात्पर्यकथनम्
५०९	'प्र मंहिष्ठाय' 'प्रवणे अपामिव' इति वृष्टान्तेन प्रतिपादितं तत्त्वमुक्तम्
५१०	'अस्मै भीमाय' अत्र 'हरितो न अयसे' वृष्टान्तेन विवक्षितं विचारितम्
५११-२	'भूरि त इन्द्र' इन्द्रस्य माहात्म्यं द्युलोकस्य प्रतिमानं इत्युपपादितम्
५१३	'नू चित्सहोजाः' पूर्वं ब्रह्माण्डे वर्तमानमपि प्राणायतनं अपां निधानस्थानं यजमानाय पिण्डाण्डे पुनरुत्पादयति तदग्निरित्यादिरहस्यविवरणम्
५१४	'आ स्वमद्म' अग्निः शुष्केषु काष्ठेषु आरोहतीत्यत्र रहस्यमुक्तम्
५१५	'वि वातजूतः' अग्नेर्गमनमार्गः कृष्णः कथमिति विचारितम्
५१६	'तपुर्जम्भः' स्वस्याल्पबलत्वं अग्नेः प्रबलत्वं च वीक्ष्य कम्पते उभयविधापि सृष्टिः

पुटसङ्ख्या	
	'वधुष्ट्वा' अङ्गिरसामिव भृगूणामपि देवत्वं मानुषत्वं च निर्दिष्टे
५१७	'होतारं सप्त' सप्त होतारः सप्ततत्त्वाभिमानिनः सप्तलोकाधिष्ठाना देवा इत्यादिप्रतिपादनम्
५२०	'बृहती इव सूनवे' वैश्वानरस्याग्नेर्द्यावापृथिव्योः प्रादुर्भावमधिकृत्य रहस्यं विवृतम्
५२१	'विवश्चित्ते' असुरैराक्रान्ते लोके, तान् जित्वा देवेभ्यो ददात्यग्निरित्यत्रोपपत्तिः, सायणीयतात्पर्यस्य परीक्षा
५२१-२	'वैश्वानरो महिम्ना' अत्र 'भरद्वाजेषु पौष्टिकसमृद्धियुक्तेषु' इत्याद्यवधेयम्, तथा शतवनिपुरुणीथशब्दार्थविवरणम्
५२२	'वह्निं यशसं' अत्र मातरिश्वा अग्निं भृगवे प्रादादित्युक्तेर्गूढमर्थं प्रतिपाद्य सायणव्याख्या निरीक्षिता
५२३	'अस्य शासुः' त्रैलोक्यादुपरि अग्नेः स्वगृहमित्यादि प्रदर्शितम्
५२३-४	'तं नव्यसी' अत्र हृदयादन्तःकरणमूलस्थानात् अन्तरात्मनिलयभूतात् जायमानोऽग्निः प्रतिपादितः
५२४	'उशिक् पावकः' अत्र 'वमूनाः गृहसुहृत्' इत्यादि उपपादितम्, यास्कानुसारेण दानमनस्क इति सायणः 'तं त्वा वयं' वाजम्भरं मर्जयन्त इत्यत्र दृष्टान्तोदाहरणेन अग्नेर्वहनप्रदेशं यजनस्थानं शोधयाम इत्यादि
५२५	'अस्मा इदु प्र तवसे' ऋषयः तेषां पूर्वेर्ऋषिभिः प्रयुक्तान् मन्त्रानपि इन्द्राय ब्रुवत इत्यादि
५२६	'अस्मा इदु प्रयः' 'आङ्गूषं' स्तोत्रात्मकं आघोषं हृदयेन मनसा मनीषया संस्कुर्वन्ति ऋषय इत्यादि
५२७	'अस्मा इदु स्तोमं' तत्सिनाय इत्यत्र पातञ्जलमहाभाष्यनिर्णीतः सिनशब्दार्थ उक्तः 'अस्मा इदु सप्तिमिव' यथा रथयुक्तोऽश्वः अभीष्टस्थानं प्राप्नोति प्रापयति च तथा वाग्युक्तो मन्त्रो विघ्नं भवणं सम्पादयतीत्यादि

पुटसङ्ख्या	
५२७-८	'अस्येदु मातुः' अत्र 'त्रीणि वाक्यखण्डानी'त्यारभ्य सायणीयार्थपरीक्षापूर्वकं 'यजमाने चिन्मयज्योतिर्बलादिवृष्टिक्षेत्रभूते अभीष्टं सर्वं दिव्यममृतमादधाती'त्यन्तं तात्पर्योपपादनं निरीक्षणीयम्
५३१	'अस्येदेव' यजमानस्य चेतसा स्वचेतः संयोज्य एकीकृत्य दिव्यश्रवणावेशं तस्मिन् दधाति भगवानिन्द्र इत्युपपादनम्
५३२	'अस्येदु त्वेषसा' तुर्वीतये गाधं धिष्ण्यं अकार्षीदित्यस्य तात्पर्यम्
५३३	'अस्येदु भिया' स्तुतिधारणसम्पत्तेर्निदर्शनभूतो नोधाः
५३४	'अस्मा इदु त्यत्' एतशः सूर्येण सह स्पर्धत इत्यस्य विचारः तात्पर्योपपत्तिश्च
५३६	'इन्द्रस्याङ्गिरसां' अत्र अङ्गिरः-सरमा-बृहस्पतयः प्रसक्ताः, तत्र सरमावृत्तान्तस्य रहस्यम्
५३७	सहजावबोधदृष्टेः सरमायाः सन्ततिः जागरितस्थाने 'धार्सि' धारकं प्रतिष्ठाभूतं पदं अलभतेत्यादितत्त्वप्रतिपादनम्
५३७-८	'स सुष्टुभा' अत्र अद्रि-फलिग-वलानां प्रसक्तिर्विचारिता
५३९	'तमु प्रत्यक्षतमं' अत्र चतस्रो नद्यः प्रस्तुताः, तत्र विचारः सायणीयार्थस्योल्लेखनम् 'द्विता वि वव्रे' अत्र अयास्यशब्दार्थं औपनिषदबलादाचख्यौ सायणः, तस्यैव अन्यथा पक्षान्तरनिर्वचनं साधीय इत्यभ्युपगम्य तात्पर्यं प्रतिपादितम्
५४०	इन्द्रप्रसादादेव लभ्य इन्द्रः इति रहस्योपपादनं, ईदृश्य ऋचः बीजं भवति 'नायमात्मा प्रवचनेन लभ्य' इत्याद्यौपनिषदवाक्यानामिति विवरणम्, ऊर्ध्वाधरचित्कक्ष्ययोः द्यावापृथिव्योरभिव्यक्तिर्यजमाने भवतीति रहस्यविवृतिः
५४१	'सनाद्दिवं' अन्तर्यागाध्वनि सर्वदा चित्प्रकाशस्थितिरेकरूपा न भवति, 'अहोरात्रे विरूपे' इत्यादिरहस्यविवरणम् 'सनेमि सख्यं' अस्यामृचि परोक्षवचनेनावेदितं किमपि रहस्यमधिकृत्य विचारितम्

पुटसङ्ख्या

५४२ 'सनात्सनीळाः' चिरकालादारभ्य अपामिव स्वसृणां सनाभित्वम्, ताः स्वसारः यजमानायेन्द्रेण कृतानि रक्षन्तीत्यादि

५४४ 'त्वं महानिन्द्र' इन्द्रः प्रादुर्भावमात्रेण यजमाने ऊर्ध्वाधरचित्कक्ष्ये सुप्रतिष्ठे विधत्ते इत्यादि

५४८ 'त्वं ह त्यदिन्द्र' एकैकस्मिन् लोके सप्त उपकक्ष्या भवन्ति, यद्यपि त्रैलोक्याक्रमणपटवो वृत्रादयः तथापि तेषां वृत्तिवैशिष्ट्यं मध्यमस्थाने इत्यादिविवरणम्

५४९ 'त्वं त्यां न इन्द्र' एषणाबलेनास्माकं जीवमात्मानं इन्द्रो धत्त इति वृष्टान्तेनोपपादनम्

५५० 'वृष्णे शर्धाय' वाग्रूपाविष्कारे स्तोतुर्धियः पूर्णतां यान्ति इति प्रतिपादनम्

५५०-१ 'ते जज्ञिरे' मरुतो रुद्रसूनवः 'ऋष्वासः' 'असुराः' इत्यादीनां वैशिष्ट्यप्रतिपादनम्

५५१-२ 'चित्रैरञ्जिभिः' अत्र मरुतां रहस्यमधिकृत्य विचारः

५५३ 'पिबन्त्यपो मरुतः' विदथः ज्ञानागमो ज्ञानगम्यस्थानं यजनमित्याद्युपन्यासः, 'घृतवत् दीप्तिमत्' 'पयो मधुमत्' इत्यादि सायणीयव्याख्योदाहरणम्

५५४ 'सिंहा इव' कथं मरुतो रात्रीरुल्लासयन्तीति विचारः

५५६ 'विश्ववेदसः' 'अत्र विरप्शिनः' इत्यादिशब्दार्थविचारः सायणीयोक्तिश्च

५५९ 'नू ष्ठिरं मरुतः' किमपि दिव्यं मारुतं धनमिति विशेषणैरुपपादितम्

५५९-६० 'पश्वा न तायुं' ऋचोऽस्या विवरणे वृष्टान्तोपपादनम्, अत्र केचन शब्दाः साङ्केतिका इत्यादिसूचनम्

५६१ 'ऋतस्य देवाः' सर्वेऽपि देवा अग्निमन्विष्य यदा प्राप्नुवन्ति तदा स प्रवृद्धो भुवमाक्रामन् द्योप्यत इत्याद्यवधेयम्

५६५ 'सेनेव सृष्टा' अर्थाविष्कारे, भूतं भव्यं च सर्वं द्रुन्तुं अग्निः, स एवानभिव्यक्तभावानां व्यञ्जयिता 'जारः कनीनां', उत्पादयित्रीणां शक्तीनां पतिः 'पतिर्जनीनां' इत्याद्युपपादनम्

पुटसङ्ख्या

५६७ 'हस्ते दधानः' सर्वदेवबलभूतोऽग्नेर्बलं सर्वधारकमित्यादि विवृतम्, अत्र मन्त्रवृष्टिरहस्यं सूचितमवधेयम्, तथा अग्नेरस्मदन्तर्निगूढवासः प्रत्यपादि, 'अजो न क्षां' ब्रह्माण्डे पिण्डाण्डे च रोदस्योः पूर्वमेव वर्तमानयोरपि तल्लक्षित-चित्कक्ष्याद्वयस्य स्तम्भनं धारणं च रहोयागरते मनुष्ये साधयितव्ये, तत्कर्तव्यमग्नेरिति प्रतिपादनम्

५६८ 'य ईं चिकेत' भगवतोऽग्नेः अन्तर्याजिनश्च आत्यन्तिकसंबन्धसम्पादनसाधनं रहस्यमुपविष्टम्

५६९ 'श्रीणन्नुपस्थात्' आत्मना सर्वदेवमहस्वान्याव्वन् ज्वलत्यग्निरित्यादि

५७० 'आदित्ते' नीरसप्राये जडे शरीरे रसवानग्निर्यदा प्रादुर्भवति तदा विश्वे 'देवत्वं नाम भजन्ते' इत्यादि

५७१ 'होता निषत्तः' अन्तर्याजिनामेकैकस्मिन्नपि आग्नेयं बीजमुप्तं भवतीत्यादि गहनं रहस्यं संक्षिप्योक्तम्

५७२ 'शुक्रः' सर्वदेवप्रतिनिधिर्भगवानग्निर्यजमाने जातः तस्य पुत्र उच्यते इत्यादि

५७३ 'पुत्रो न जातः' अग्नेः सर्वदेवात्मकत्वात् देवतासहबासिनि वृन्दे आहूते अग्निः स्वीयं सर्वदेवमयत्वं प्रकटयतीत्यादि

५७४ 'उषो न जारः' उपासकाय जनाय प्रदर्शितस्वरूपोऽग्निः स्वयं तस्य ज्ञाने प्रादुर्भवति, स्वर्गद्वारापावरणेन ज्योतिर्दर्शने गतिः संभवति—इत्यादि तात्पर्यमवधेयम्

५७५ 'वनेम पूर्वीः' मानुषोत्पत्तिरहस्यविज्ञोऽग्निरित्यादि

'गर्भो यो अपां' अत्र 'आपः वनं' इति सङ्केतशब्दौ क्रमशः शक्तीनां पुत्रः आनन्दानां पुत्र इति च प्रतिपादयतः, तथापि सर्वान्तर्यामी भगवानग्निः चराचरात्मकाज्जगतः यथाकालं यथाविधि यथास्वीयदैवरहस्यं प्रादुर्भवतीति प्रतिपादनम्

५७६ 'स हि क्षपावान्' अग्निर्देववृन्दप्रादुर्भावं तथा मर्त्यानां जन्मरहस्यं च जानातीति कथनम्

'वर्धान्यं' अत्र 'ऋतप्रवीतं' सत्यात्प्रादुर्भूयागतमिति तात्पर्यार्थोऽवधेयः

पुटसङ्ख्या	
५७७	'गोषु प्रशस्ति' यजमानस्यर्षेः ज्ञानप्रकाशवृत्तिषु सुखानुभूतिषु च अग्निप्रशंसा प्रतिष्ठिता भवतीत्यादि कथितम्, 'भरन्त विश्वे बलिं स्वर्णः' अस्य वाक्यस्य प्रतिध्वनिस्तैत्तिरीयश्रुतौ 'सर्वेऽस्मै देवा बलिमावहन्ति' इति प्रतिपादितम्
५७८	'उप प्र जिन्वन्' अत्र 'उषसं न गावः' इति नेदमुपमामात्रमित्युपन्यस्य सङ्केतार्थविवरणम्
५७९	'वीळु चित्' अस्मत्पितरः मन्त्रध्वनिना बहु अद्भुतं चक्रुरिति प्रतिपादनम्, अत्र सङ्केतशब्दाः स्पष्टाः कृताः
५७९-८०	'वधन्नृतं' शक्तयः क्रियापराः देवान् प्रति गच्छन्ति, तेन नव्यस्य दिव्यस्य जन्मन आनन्देन वर्धनं भवतीत्यावितात्पर्यविवरणम्
५८०	'मथीद्यदीं' अन्तर्धारितः पूरितो व्याप्तः प्राणः योगाग्निं मथित्वा प्रकटयतीत्यधुनातनयोगविद्यातत्त्वं चिरन्तनार्षरहस्यैकदेशभूतं बोध्यम्, 'भृगवाणः' इत्यादेर्वैशिष्ट्यमुक्तम्
५८१	'महे यत्पित्रे' दुर्बोधमृचस्तात्पर्यं विस्पष्टं विचारितमवधेयम्
५८२	'अग्निं विश्वा' देवेषु विषयऽस्माकं ज्ञानं सम्पादयेत्यादिकम्
५८३	'मनो' न अग्निना नीयमानस्य यजमानस्य यजनं यात्रा वा उत्तमे सौरे पदे पर्यवस्यतीति सूर्यो वर्णितः
५८४	'मा नो अग्ने' ऋषीणामाद्यानां अतिचिरन्तनमविच्छिन्नं किमपि रहस्यं अग्निसख्यम्, नेवं भौतिकाग्निसंबन्धीत्युपपादनम् 'नि काव्या' कविकर्माणि द्रष्टृप्रज्ञात्मकानि मन्त्ररूपस्तोत्राणि अस्मास्वन्तः प्रादुर्भावयत्यग्निरिति प्रतिपादनम्
५८६	'तिस्रो यदग्ने' यज्ञियनामधारणं अग्निपरध्यानलक्षणम्, 'तिस्रः' इति त्रैलोक्यापेक्षयेत्याद्युक्तिः, 'आ रोदसी' नेमधिताशब्दार्थविचारः
५८७	'संजानानाः' देवाः सर्वेऽपि प्रत्येकं सख्युरग्नेर्वृष्टौ रक्षिताः इत्यादि प्रतिपादितम्
५८८	'स्वाध्यो दिव आ' सरमासाधित-गोसमूह-गूढवृद्ध-स्वात्माधिगमेन हेतुना मानुषो जन्मी सुखमद्यानुभवतीत्यादिरहस्यप्रतिपादनम्
५८९	'आ ये विश्वा' अमृतत्वाय मार्गं कुर्वद्भिर्देवैः सह अदितिः पृथिवीं भर्तुं आगतेत्यादि प्रत्यपादि
५९०	'अधि श्रियं' तेजः सौन्दर्यं च दिव्यमक्षिद्वयं अग्नौ निक्षिप्तम्, तं अश्वाः महत्यो भोगसमर्थाः क्रियाशक्तयः नीचैः क्षरन्त्यः सिन्धव इव जानन्त्य उपासते इत्यादिसारांशप्रतिपादनम्
५९१	'देवो न यः' एकोऽपि भगवानग्निर्वीरगण इव लक्ष्यते
५९२	'वि पृक्षो' असुरैरपहृतं दिव्यं धनम्, तज्जयाय देवेषु भागो धारयितव्यः
५९३	'ऋतस्य हि' अत्र 'अद्रिः' 'ऋतस्य धेनवः' 'आपः' इत्यादयः सङ्केताः अवधेयाः
५९४	'यान् राये' विश्वस्मिन् भुवने छायेव सक्तो भवत्यग्निः
५९५	'उपप्रयन्तः' दूरादपि शृणोत्यग्निरस्मद्वाचम्, 'यः स्नीहितीषु' गयशब्दार्थो विचारितः
५९६	'उत ब्रुवन्तु' अग्निरन्तर्मथितस्तपसा हृदयाद्बृगतः प्रादुर्भूतः प्रत्यपादि
५९७-८	'त्वोतो वाजी' अग्नये स्वीयं सर्वमर्पितवान् पुरुषोऽन्यादृशो लक्ष्यते 'पूर्वस्मादपरः', अत्र सायणीयं निरीक्षितम्
५९८	'उत द्युमत्' उत्तमं ज्योतिरेव महद्धनम्, अन्यथा भवति सायणीये
५९९	'कस्ते जामिः' अत्र चतुर्भिः प्रश्नैः अग्निबन्धुत्वं न सुलभमित्यादि प्रतिपादितम्, अन्यथा प्रश्नस्य न भवेत्प्रयोजनमिति विवृतम्
६००-१	'यजा नो' अग्नेः सहजसिद्धमावासस्थानं 'सत्यं ऋतं बृहत्' उक्तम्
६०१	'का त उपेतिः' अत्र विवक्षितमन्यत् सायणविवरणमन्यत्, ऋजु तात्पर्यं प्रतिपादितम्
६०३	'कथा दाशेम' अग्निमुद्दिश्य या वागुच्यते सा इतरेषां देवानां सेवनीया स्यादित्युपपादनम्
६०४	'यो अध्वरेषु' मर्त्ये प्रबुद्धोऽमर्त्योऽग्निः तस्य जागरितप्रज्ञायां देवान् निर्मातीत्यादिकम्
६०५	'स हि ऋतुः' नित्ययोगिनो मर्त्याः प्रथममग्निमुपासत इत्यादिकम्

पुटसङ्ख्या	
६०७	'अग्निना आप्यायितं द्युम्नं' अग्नये समर्प्य बहुशः स्तौति मन्त्रद्रष्टा इत्यादि प्रतिपादितम्
६०९	'हिरण्यकेश' अत्र सायणीयस्य दुर्घटत्वात् अस्माभिरेव स्थूलार्थदानपूर्वकं रहस्यं विवृतमवधेयम्
६१०-११	'आ ते सुपर्णा' अत्र स्थूलार्थोपपादनपूर्वकं रहस्यार्थविवरणम्
६११	'यदीमृतस्य' अत्र 'उपरस्य योनौ' व्याख्याऽवधेया
६१५	'इत्था हि सोमा' अन्नमयात् शरीरात्, जगतः, जागरितस्थानात्, वृत्रं निर्गमितवानित्यत्र रहस्यमवधेयम्
६१६	'स त्वां' सोमहरणं प्रति कर्मठानां कथा, रहस्योपपादनम्
६२३	'इन्द्रो मदाय' यज्ञयात्राध्वनि विघ्नकरा राक्षसप्रभृतयः संग्रामे जेतव्याः, तत्र नालं पुरुषकारः, देवसाहाय्यमपेक्ष्यत इत्याद्युपपादितम्
६२६	'यो अर्यो मर्त' मानुषोपभोगक्षमो भागो लब्धव्य इन्द्रादित्याद्युक्तम् 'मदे मदे' गवां चिद्रश्मिरूपत्वं, वसुनश्च दिव्यसत्त्वात्मकत्वमवधेयम्, नेह साधारणगोधनादि विवक्षितमित्यवधेयम्
६२७	'एते त इन्द्र' यजनमकुर्वतां अदैव्यानां ज्ञानं धनं वा कीदृशमिति इन्द्रो वेद, अत्र विवरणमवधेयम्
६२८	'उपो षु' मन्त्रवर्णस्य प्रादुर्भाव ऋषेः, इन्द्रस्य प्रार्थनीयश्चेत्यादि
६२९	'अक्षन्नमीमदन्त' देवप्रीतिकरा ऋषयो दिव्यमन्नं भुक्त्वा तृप्ता अभवन्नित्यत्रोपपादने 'ते स्वभानवः' स्वप्रकाशा इति विप्रविशेषणमलं दिव्यान्नभोजनमिन्द्रदत्तमिति बोद्धुं इत्याद्यवधेयम् 'सुसन्दृशं' अस्मादृशस्तुतिभिरभिर्वाधितज्योतिर्बलादिसम्पत्कः सन् त्वत्कामानन्याननुग्रहीतुं प्रभवसीति ऋषिरिन्द्रं ब्रूत इत्युपपादनम्
६३०	'स घा तं' 'हारियोजनं' 'गोविदं' 'चिकेतति' इत्यादेर्विवरणमवधेयम्, अत्र सायणीयं परीक्ष्योद्धृतम्
६३१	'युक्तस्ते अस्तु' स्त्रीदेवता अधिकृत्योक्तम्
६३२	'अश्वावति' सऽकेतार्थो दृष्टान्तशब्दानां नोपपद्यत इति सूचनम्, 'विचेतसः' अत्र शब्दार्थ-

पुटसङ्ख्या	
	विचारः
६३३	'आपो न देवीः' देव्यः शक्तयोऽन्तर्याजिनः शरीरमुपयन्तीति प्रतिपादनम्
६३४	'अधि द्वयोः' अत्र 'स्रुक्' यज्ञपात्रविशेषः दर्विवत्, मुहुर्मुहुरुद्गता तीव्रा काङ्क्षा, उत्काङ्क्षा वा स्रुचा सऽकेत्यते
६३४-५	'आदङ्गिराः' 'यज्ञैरथर्वा' उभे ऋचौ अङ्गिरोवृत्तान्त-वृत्रवधादिकरहस्यार्थविषयिके, अत्र उशना भृगुरित्यादिविवरणं च
६३६	'बर्हिर्वा' अत्र ग्रावाणमधिकृत्य प्रज्वलितवागात्मकः सर्वानुभूतिरसनिष्पादकः यजमानहृदयोद्गतो वाग्रूप उक्थ इत्यादि विवृतम्
६३८	'इममिन्द्र' 'ऋतस्य सदने अमर्त्यं मदं' अत्र व्याख्याऽवधेया
६३९	'कदा मर्तमराधसं' व्याख्यायां वैशिष्ट्यं, सायण उदाहृतः, क्षुम्पशब्दार्थस्वारस्यम्
६४१	'ता अस्य' चित्रवर्णाः 'गावः' परमज्योतिष आगत्य इन्द्रेण संपृक्ता अवस्थातुं प्रारभन्त इत्यादि
६४२	'ता अस्य नमसा' आगामिविषये ऋषेः पूर्वदृष्टिरित्यादि
६४२-३	'इन्द्रो दधीचः' दध्यङ्शब्दार्थः, ऋचो रहस्यम्
६४३	'इच्छन्नश्वस्य' शर्यणावद्विचारः विस्तरशः कृतः
६४४	'अत्राह गोरमन्वत' चन्द्रमसो गृहमधिकृत्य तत्त्वमुक्तम्
६४५	'क ईषते' न कोऽपि परमार्थभक्तः अधिवचनं ब्रूयादित्यत्र विस्तरोऽवधेयः
६४६	'को अग्निं' अत्र 'हविर्घृतस्रुचः' कर्मानुष्ठानसामग्रयः रहस्यपक्षे सऽकेता इति प्रतिपादनम्
६४७-८	'प्र ये शुम्भन्ते' मरुतां स्वरूपविवरणम्
६४८	'त उक्षितासः' अत्रापि पूर्वोक्तलक्षणा मरुतः प्रोक्ताः
६४९	'गोमातरः' ऐन्द्रतेजोबलदीपिता धीवृत्तयो मरुत इत्यादि विवृतम्
६५०	'प्र यद्रथेषु' आरोचमानस्येन्द्रात्मनः सौरज्योतिषः सकाशात् ज्योतिर्बलादिधारा विमुञ्चन्ति मरुत इत्यादि प्रतिपादितम्
६५१	'तेऽवर्धन्त' यथा रुद्रस्य मरुतां पितुर्घोरव्यापार-

पुटसङ्ख्या	
	त्वेऽपि शिवङ्करत्वं, तथा विष्णोः सर्वथा सौम्यस्यापि रुद्रकर्मत्वम्, विष्णुर्मरुतां रक्षक इत्यादि च प्रतिपादितम्
६५२	'शूरा इव' मरुतो न केवलं चण्डकर्माणः, अपि तु 'त्वेषसंदृशः' ज्ञानशक्तिप्रकाशकाश्चेत्यादि निरूपणम्
६५३	'त्वष्टा यद्वज्रं' क्षीराब्धिरित्यादाविव अपामर्णव इत्यत्र समुद्रमात्रस्य विवक्षा 'ऊर्ध्वं नुनुद्रे' अत्र गोतमस्यर्षेरर्थे मरुद्भिः कूपोत्खननादेः गूढार्थः स्पष्टीकृतः
६५४	'जिह्मं नुनुद्रे' अत्र सर्वाङ्गसेचनेन तिरश्चीनगत्या अपः प्रेरयामासुरिति प्रतिपादनम्
६५६	'अस्य श्रोषन्' मारुतबलप्रेरिता एषणाः 'इषः' इत्याद्यवधेयम्
६५७	'यूयं तत्' 'तत्' महत् ज्योतिरित्युपपादनम्
६५८	'गूहता गुह्यं' 'तत् ज्योति'राविष्कुरुतेति प्रार्थनाऽवधेया
६५८-९	'प्र त्वक्षसः' मरुतां आदौ दर्शनं वर्णितम्
६६०	'विथुरा इव' व्यथिता भयाच्चलितेवेत्यर्थः, सायणस्तु 'भर्त्रा वियुक्ता निरालम्बा जायेव' इति व्याचष्ट इत्याद्यवधेयम्
६६१	'पितुः प्रत्नस्य' इन्द्रकार्यभागहरत्वादेव मरुतो यज्ञिया भवन्तीत्युपपादनम्
६६२-३	'तेऽरुणेभिः' जडस्य घनस्य शरीरस्य मार्दवापादनाय ऊर्ध्वतनशक्तिभिः कोऽपि प्रहारः प्रयुज्यते, तेन विद्युतेजोबलाद्यवतरणं सोढुं प्रभवति शरीरमिति रहस्यमुक्तम्
६६३	'श्रिये कं वः' सोमाभिषवणग्रावा 'इन्द्रवज्रलक्षितविद्युद्वाग्रूप' इत्यवधेयम्
६६३-४	'अहानि गृध्रा' उत्सधिः शरीरस्थप्राणशरीरमिति गूढार्थः प्रतिपादितः
६६४-५	'एतत्त्यन्न' अस्यास्तात्पर्यं गहनम्, विचारितमुपपादितम्
६६५	'एषा स्या' तात्पर्ये वैशिष्ट्यमवधेयम्, पूर्वव्याख्यातॄणां क्लिष्टकल्पना निवारिता
६६८	'स्वस्ति नः' अरिष्टनेमि-तार्क्ष्यशब्दार्थौ विचारितः
६६९	'भद्रं कर्णेभिः' भद्रशब्दार्थवैशिष्ट्यं स्मारितम्

पुटसङ्ख्या	
६७०	'शतमिन्नु' मानुषायुर्मानं शरदः शतमिति सामान्योक्तिः परीक्षिता, तैत्तिरीयसंहितावाक्यं उदाहृतम्
६७०-१	'अदितिद्यौः' अन्नमयाद्यानन्दमयान्तेषु लोकेषु जाताः वर्तमानाः पञ्चजना इति रहस्यः पक्षः प्रत्यपादि
६७२	'वि नः पथः' सुषितं दुरितप्रतिद्वन्द्वि उत्तमकल्याणार्थकं भद्रं अवधेयम् 'उत नो धियः' 'धियः गोअग्राः कुरुते'ति प्रार्थनायां चिद्रश्मिपुरस्सरा भवन्तु धीवृत्तय इत्यवदातम्
६७३	'मधु वाताः' सर्वस्मादपि वस्तुजातात् मधु गृहीत्वा तत्सम्पन्नाः स्यामेत्यर्थका ईदृशीर्ऋचः आधारीकृत्य औपनिषदं मधुब्राह्मणमुपदिष्टम्
६७६	'या ते धामानि' 'सोमस्य धामानि' तेजांसि दिवि भुवि अन्यत्र चावस्थितानीत्यादि अवधेयम्
६७७	'गयस्फानः' शब्दार्थविचारः
६८१	'सोमो धेनुं' सोमः अमृतस्य दोग्ध्रीं गोलक्षणां चिन्मरीचिं प्रयच्छतीति विवृतम्, 'सदन्यम्' 'सभेयम्' अर्थाविष्कारोऽवधेयः
६८३	'देवेन नो' 'उभयेभ्यः गविष्टौ' देवेभ्यो मनुष्येभ्यश्च हितार्थं गवेषणमित्यादि
६८४	'एता उ त्याः' यद्यपि सूक्तस्य स्थूलार्थः स्पष्टो लक्ष्यत एव तथापि रहस्यार्थमन्तरेण तत्र तत्र ऋजुतात्पर्यं न शक्यते बोद्धुम्, तथा विवरणम्, 'उदपप्तन्' अत्र गूढार्थोऽपि सूचितः
६८५	'अर्चन्ति' 'परावतः' परस्तात् परस्मात् ज्योतिषः प्रेरणाशक्तिमाहरन्त्युषस इत्यत्रापि गूढार्थः सूचितः, 'अधि पेशांसि' व्याख्याऽवधेया, अत्र सायणः 'पेशांसि कृष्णवर्णानि तमांसि' इति व्याचष्टे, पेशो रूपमित्येव गृहीत्वोपपादितम्
६८६	'प्रत्यर्चिः' 'स्वरुं न' वृष्टन्तोऽयं व्याख्यातोऽवधेयः
६८७	'अतारिष्म' एषा बाह्यार्थे गृहीता चेदुपहसनीयतां भजत इत्याद्युक्तम् 'भास्वती' अत्र 'अश्वबुध्यान्' 'गोअग्रान्' इति वाजविशेषणत्वयं लक्षणीयं व्याख्यायाम्
६८८	'उषस्तं' पुनश्च अश्वबुध्यादिशब्दाः गूढार्थपरा उपपादिताः

पुटसङ्ख्या	
	'विश्वानि' देवकामं पुरुषं बोधयत्युषा इत्यादि प्रतिपादितम्
६८९	'पुनः पुनः' मर्त्यस्यायुः कथमुषा 'जरयन्ती' इति विचारः, तत्रोपपत्तिरवधेया
६९२	'अश्विना वर्तिः' 'गोमत् हिरण्यवत्' चित्किरणयुक्तं सौरज्योतिर्द्योतकसुवर्णयुक्तं यथा भवति तथा रथमावर्तयतमिति अश्विनोः संबोधने प्रोक्तमवधेयम् 'यावित्था' 'आ चक्रथुः' आकारयुक्तं निष्पादितवन्तौ इत्यवधेयम्
६९३	'अग्नीषोमा यः' 'गवां पोषं स्वश्व्यं' अत्र गवाश्वैः ज्ञानक्रियात्मकशक्तित्रयं प्रतिपाद्यत इत्यवधेयम्
६९४	'अनीषोमा चेति' अत्र 'बृसयः' वृत्र एवेत्युपपादितं, सायणस्तु पुराणकथारीतिमवलम्ब्य बृसयः त्वष्टा तस्य शेषः अपत्यं वृत्र इत्याहेति निर्देशः
६९५	'आन्यं' अत्र श्येनः पक्षी जीवभूतोऽन्तरात्मैव, तेनोच्चैः पतनेन सोमः सम्पाद्याह्रियत इत्याद्युपपादनम्
६९७	'यो अग्नीषोमा' अन्तर्लब्धप्रवेशस्य प्रभूतं शर्मेत्यादिकं तात्पर्यमुपपादितम्
६९८	'अग्नीषोमा' प्राणबलानां परिपूरणं ज्ञानरश्मीनां प्रवर्धनं मघवत्सु देवेषु मनुष्येषु वा मध्ये बलप्रतिष्ठापनं च प्रार्थितानीति प्रतिपादनम्
६९९	'यस्मै त्वं' अत्र अंहतिर्वारिव्रघमिति सायणोक्तिरयुक्तेति प्रदर्शितम्
७००	'भरामेध्मं' अत्र 'जीवातवे' 'धियः साधय' तात्पर्यं अवधेयम्
७००-१	'विशां गोपाः' 'द्विपत्, चतुष्पत्'शब्दार्थविवृतिः, उषसोऽपि महत्तरोऽग्निरित्युपपादनम्
७०१	'त्वमध्वर्युः' अग्निर्जन्मना पुरोहित इत्यादिकं प्रोक्तम्
७०२	'यो विश्वतः' यजमानस्यान्तः अप्रकाशदशामतिघनामप्यतीत्य तमसः परस्तात् उज्ज्वलः पश्यत्यग्निः
७०३	'यदयुक्थाः' पृथ्वीरुहाणां दहनं, अग्निप्रादुर्भावप्रभावात् अन्नमयशरीरगतानां हेयानां सर्वेषां

पुटसङ्ख्या	
	विनष्टिं लक्षयतीति प्रतिपादनम्
७०४	'अध स्वनादुत' अत्र तात्पर्योपपत्तिर्निरीक्षणीया
७०७	'द्वे विरूपे' अग्निं अहश्च रात्रिश्च पोषयत इत्यत्र गूढार्थानुसारेणोपपत्तिः प्रदर्शिता
७०८	'दशेमं' एकत्र प्रादुर्भूतमग्निं स्वीयपोषणेन उक्तलक्षणा युवतयः परितः प्रभाभिः प्रसारयन्ति इत्यादि विवृतम्
७०९	'त्रीणि जाना' अग्नेस्त्रीणि जन्मानि सरहस्यं प्रतिपादितानि, 'पूर्वा प्र विशम्' इत्यत्र गूढार्थव्याख्या अवधेया
७१०	'क इमं वो निण्यं' अग्निर्मातृजनयतीत्यत्रोपपत्तिः
७१०-११	'उभे भद्रे' 'दक्षाणां दक्षपति'रित्यादौ 'दक्षिणतः अञ्जन्ति' इत्यत्र च रहस्यार्थपक्षः
७११	'उद्यंयमीति' सर्वत्र भूतजाते यो गुप्तोऽन्तर्हितो रसो वर्तते तं निर्गमय्य ऊर्ध्वगतिकं करोत्यग्निरिति प्रतिपादितम्
७१२	'त्वेषं रूपं' अग्निर्यदा ऊर्ध्वं मूलस्थानं शुद्धं विधत्ते तदा तद्देवसमागमस्थानं भवतीत्यादि विवृतम्
७१३	'धन्वन् स्रोतः' जडेऽन्तर्हिता आपः इत्यादेः रहस्यं स्पष्टं कृतम्
७१४	'स प्रत्नथा' मानुषे जने प्रादुर्भावात्पूर्वं ईदृशं द्रविणोदां देवाः स्वेषु धारयामासुरित्यादिकमुक्तम्
७१५	'स पूर्वया निविदा' अत्र 'कव्यता स्तुतिं कुर्वते'ति सायणीयवचनमनङ्गीकृत्य 'कव्यता कव्यं कवनं सत्यदर्शनं तत्कुर्वते'त्यादि प्रतिपादितम्
७१६	'नक्तोषासा' अहोरात्रे परस्परं 'आमेम्याने' हिंसन्त्यौ इत्यस्य रहस्यं, तथा अग्निं 'धापयेते' इत्यत्र च तात्पर्यमुपपादितम्
७२१	'वैश्वानरस्य' वैश्वानरः उपासकात् प्रादुर्भूतः सर्वं जगत् पश्यन् सत्यज्योतिरात्मना सूर्येण सङ्गतो भवतीति प्रतिपादितम्
७२२	'जातवेदसे' अयं तान्त्रिकैर्दुर्गामन्त्रत्वेनावृतः, एकर्चं सूक्तमिदमेकमेव ऋग्वेदे गीतम्
७२३	'स यो वृषा' 'सतीनसत्वा' अस्य व्युत्पत्तिः, सत्यसंबन्धिनः ज्योतिरासादयितेत्यर्थः
७२५	'स सूनुभिः' इन्द्रः शुद्धसत्त्वप्रधानभूतमनोभूमे-

पुटसङ्ख्या	
	दिवस्पतिः, तस्य भ्रातरः सखायः पुत्रा इव भवन्ति मरुत इत्याधिकमुक्तम्
७२६	'स मन्युभीः' सत्पतिः सतां व्याकृतानां वस्तूनां भूतजातानां पतिरित्यादिकमवधेयम्
७२७	'तमप्सन्त' तमसः परस्तात् ज्वलन्नुत्तमः सूर्यः सर्वेश्वरः सर्वान्तर्यामी च सन् अन्धे तमसि च गुप्तो भवति
	'स सव्येन' इन्द्रस्यातिबलत्वं वर्णितम्, अनुग्रहीता स्तोतृजनस्येत्यादिकम्
७३१	'रोहित् श्यावा' ऋज्राश्वशब्दार्थविचारः
७३२	'वस्यून् शिम्यून्' एते चासुरादयो न भूमिष्ठाः इत्यारभ्य तेषां विवरणम्
७३३	'विश्वाहेन्द्रः' अस्मद्वचनेऽपि इन्द्रस्यैव वचनं राजतामित्यादिकमवधेयम्
७३४	'यस्य द्यावा' इन्द्रस्य महत् पौंस्यं पृथिवी द्यौश्चेति प्रतिपाद्य सायणीयस्याध्याहारोऽनावश्यक इत्युपपादितम्
७३५	'यः शूरेभिः' विविधमवस्थितैः पुरुषैः तत्तदुपकाराय सेवनीयो विश्वसनीयश्चेन्द्र इत्यादिकमुक्तम्
७३६	'रुद्राणामेति' प्रथमं मरुतां क्षेत्रे इन्द्रदर्शनं इत्यादि तात्पर्यमुपपादितम्
७४०	'वयं जयेम' एकैकमपि यजनं यजमानभागस्योत्कर्षकमित्यादिकमुक्तम्
७४१	'नाना हि' असुरादीनपोद्धृत्य तैरपहृतं गवाश्वादिलक्षणं तेजोबलादिकं दिव्यस्वं जित्वा दातुं नः समर्थं इन्द्रस्य चित्तमिति तात्पर्यप्रतिपादनम्
७४२	'त्रिविष्टिधातु' त्रिधा भूरादिस्थानत्रये इन्द्रबलस्य प्रवेशनेनास्य धारणमिति प्रतिपादनम्
७४४-५	'तत्त इन्द्रियं' महान् ऋतुरग्निरूर्ध्वं प्रतिष्ठते, सौरं ज्योतिरधोऽवतरति, एवमुभयोः सङ्गमनं इन्द्रलिङ्गस्य द्योतकमित्युपपादितम्
७४६	'स धारयत्' वृत्रस्य रोहितत्वप्राप्तिरुपपादिता 'तवूचुषे' स्तुवते जनायेन्द्रो मानुषाणि युगानि कृतत्रेतादीनि विधत्त इति सायणीयोक्तिरयुक्तेति प्रदर्शिता, अन्यथा वाक्यान्वय ऋजुर्भवतीति प्रदर्श्य तात्पर्यमुपपादितम्
७४९	'योनिष्टे' 'अश्वाः' 'वयः' इत्यत्र तात्पर्यमवधेयम्

पुटसङ्ख्या	
७५०	'ओ त्ये नरः' अत्र वर्णशब्दार्थः सायणीयाद्भिन्नः प्रतिपादितः
७५०-१	'अव त्मना' ऋतानृतयोर्मिश्रणाधिकारः कुयवनाम्नोऽसुरस्येति प्रतिपादितम्, परार्धापरार्धऋतानृतादिविचारः कृतः
७५२	कुयवभार्ययोः क्षीरस्नानादिविचारितः, शिफायाः स्वरूपमुक्तम्
	'युयोप नाभिः' अत्र अञ्जसी-कुलिशी-वीरपत्नीनां विचारः
७५४	'स त्वं नः' उत्तमे ज्योतिष्यस्माकं भागं सम्पादयेति तात्पर्यमुपपादितम्
७५५	'मा नो वधीः' 'आण्डा' 'सहजानुषाणि' इत्यत्र तात्पर्यम्
७५६	'चन्द्रमाः' इति सूक्तस्य ऋषिः आप्त्यस्त्रितः कुत्सो वेति विचारः, चन्द्रमा इति प्रथमर्चो व्याख्यायां रहस्यं विस्पष्टं कृतम्
७५७	'चन्द्रमा अप्सु' अत्र हिरण्यनेमयः विद्युतः गूढार्थाः तथा चन्द्रमाश्च 'गन्धर्वस्य ध्रुवे पदे' 'इत्था चन्द्रमसो गृहे' एवमादिवर्णनविषयभूतो हिरण्यवर्णः तमसस्पररस्ताद्भासमानः परम इत्याद्युपपादितम्
७५८	'अर्थमिद्वा' 'परिवाय रसं दुहे' अत्र विशिष्टा व्याख्या, सायणव्याख्या नोपपन्नेति च निरूपितम्
७६१	'अमी ये सप्त' आप्त्यस्य त्रितस्य ऋषेर्नाभिरूर्ध्वमाततता अस्य विवरणं सरहस्यमुक्तम्
७६२	'अमी ये पञ्च' 'पञ्चोक्षणः' क इति विचारः
७६२	'सुपर्णा एते' जीवत एव त्रितस्यर्षेरूर्ध्वयात्रायां वृकस्यासुरस्य प्रतिषेधः देवानुग्रहात् सिध्यतीत्यादि विवृतम्
७६४	'ब्रह्मा कृणोति वरुणः' ऋषेः स्तोतुः हृदयद्वारा मन्त्रं प्रकाशयति वरुण इत्याद्यवधेयम्
७६५	'असौ यः' अत्र नायं बाह्यः सूर्यः इति स्पष्टं प्रतिपाद्यते
	'त्रितः कूपे' नायं बाह्यः कूप इत्याद्युपपादितम्
७६६	'अरुणो मा' जीवतामृषीणां ऊर्ध्वगमनं पुनरागमनमित्यादि स्पष्टम्
७६८	'अवन्तु नः' द्यावापृथिव्योः पुत्रा देवा इत्युपपादनम्

पुटसङ्ख्या	
७६९	'इन्द्रं कुत्सः' अत्र 'निबाळ्हः'कृतप्रयासः, न तु पातित इत्यादिविवरणम्
७७२	'चक्राथे हि' अग्निर्भुवि इन्द्रो दिवि, एवमुभौ द्यावापृथिव्योरध्यक्षौ नित्यसंयुक्तावित्यादिविवरणम्
७७३	'समिद्धेष्वग्निषु' कर्मपरार्थस्य स्पष्टावकाशे सत्यपि ऊर्ध्वं यजमानं गमयितुं इन्द्राग्नी एव तस्यान्तः सिद्धं कुरुत इत्यादि प्रतिपादितम्
७७४	'यदब्रवं' 'अयं नः सोमोऽसुरैर्विहव्यः' इत्यत्र विशिष्टोऽर्थोऽवधेयः
७७५	'यदिन्द्राग्नी' यदु-तुर्वश-द्रुह्यु-अनु-पूरुशब्दानां सायणीया व्युत्पत्तिरन्तरर्थप्रतिपादनोपयोगिनीति निरूपणम्
७७८	'मा छेद्म रश्मीन्' देवबन्धुत्वद्योतकान् परम्परागतान् रश्मीन् विच्छिन्नान् मा काष्मेति ऋषेः प्रार्थनाऽवधेया
७८१-८	कुत्सस्यार्भवसूक्ते द्वे व्याख्याते, रहस्यार्थो विवृतो मेधातिथेरार्भवसूक्त (१–२०) व्याख्यानुरोधेन
७८९	'ईळे द्यावापृथिवी' अत्र 'पूर्वचित्तये' द्यावापृथिव्योरग्नेश्च प्रार्थनारहस्यं विवृतम्
७९०	'युवं तासां' 'अस्वं धेनुं पिन्वथः' अत्र गूढार्थो दत्तः
७९१	'याभिः परिज्मा' 'तनयस्य मज्मना' 'द्विमाता' 'त्रिमन्तुः' इत्यादेर्विवरणमवधेयम् 'याभी रेभं' अत्र रेभवन्दनादयः अश्विनोरनुग्रहपात्रभूताः विवृताः
७९२	'याभिरन्तकं' अन्तक-भुज्यु-कर्कन्धुप्रभृतयोऽनुगृहीता अश्विभ्यां व्याख्याताः 'याभिः शुचन्ति' शुचन्तिः अत्रिः पृश्निगुः पुरुकुत्सः—एषां रहस्यार्थः
७९३	'याभिः शचीभिः' अन्धं श्रोणं परावृजं अधिकृत्य गूढार्थः, तथा वर्तिकाकथायाश्च सविस्तरो विचारः
७९४	'याभिः विश्पलां' विश्पला, वशः, अश्व्यः, प्रेणिः—एषां व्युत्पत्तिः, रहस्यं च
७९५	'याभिः सुदानू' अत्र 'वणिजे' 'दीर्घश्रवसे' इत्यादीनां रहस्यम्
७९६	'याभिः रसां' अनश्वं रथमित्यत्र विवरणम् 'याभिः सूर्यं' अत्र 'मन्धातारं' 'क्षेत्रपत्येषु' इत्यादेर्विवरणम्
७९७	'याभिर्मंहा' अतिथिग्व-दिवोदासशब्दार्थः 'याभिर्वज्रं वम्र-कलि-पृथिशब्दार्थाः
७९८	'याभिर्नरा' शयुर्विवृतः 'याभिः पठर्वा' ऋषेस्तपोबलेन तेजोमयमभूतस्य शरीरमित्याद्यवधेयम् 'याभिरङ्गिरः' 'गोअर्णसः' 'विवरे' इत्यत्र रहस्यम्
७९९	'याभिः पत्नीः' 'अरुणीः' 'सुदेव्यं' अत्र विवरणमवधेयम्
८००	'याभिः शन्तातीं' अधिगु-ओम्यावती-ऋतस्तुभां निर्वचनम् 'याभिः कृशानुं' कृशानुः सोमपालोऽग्निः, 'सरड्भ्यः' इत्यत्र विवरणम्
८०१	'याभिर्नरं' 'गोषुयुधं' इत्यादेर्गूढार्थः 'याभिः कुत्सं' कुत्समार्जुनेयमधिकृत्य विशेषः
८०२	'अप्नस्वतीं' वाचं क्रियायुक्तां वीर्यवतीं कुरुतमिति प्रार्थनायां वैशिष्ट्यम्
८०३	'इवं श्रेष्ठं' सङ्केतार्थानुसारेण अहःसूर्यराज्युषसां स्वरूपाणि ग्राह्याणीति सूचितम् 'रुशद्वत्सा वर्ण' 'आमिनाने' इत्यत्र विवरणं अवधेयम्
८०४	'समानो अध्वा' 'स्वस्रोः अध्वा' अनन्त इत्यस्य विवरणम्
८०६	'परायतीनां' बह्वीनामुषसां प्रादुर्भावप्रसक्तिः
८०७-८	'कियात्या यत्' बहुषु चित्प्रभातेषु पूर्वापरविरोधवर्जं प्रभातानां सर्वत्र परस्परसंयोगमूलकः संवाद इति विवक्षा प्रदर्शिता
८०८	'यावयद्द्वेषाः' 'सुम्नावरी' 'सूनृताः ईरयन्ती' इति विशेषणप्रयोजनं गूढार्थोपपादकं निर्विष्टम्
८१०	'व्यञ्जिभिः' चिद्वोधं पक्वानां संपादयत्युषा इति सूचितम्, 'अरुणेभिः अश्वैः' अत्र सङ्केतो विवृतः
८११	'उदीर्ध्वं जीवः' जीवस्यान्तरात्मनः प्रबोधाद्बहिरागमने ऋतस्य पन्थाः विविक्तः, अनृतात् पृथक्कृतो भवतीत्यादि रहस्यमुक्तम्
८१२	'या गोमती' प्रथमं गावः पश्चादश्वाः प्रोक्ताः, अनेन आदौ चित्प्रकाशं ततः परं तत्सवृशप्राण-

पुटसङ्ख्या

बलं यजमानाय प्रयच्छन्त्युषस इत्यादि विवृतम्

८१३ 'इमा रुद्राय' अत्र 'द्विपदे चतुष्पदे' —अस्य रहस्यं स्मारितम्

८१७ 'आरे ते' 'द्विबर्हाः' मानुषे दैव्ये च स्थाने वर्धित इत्यादिरहस्यम्

८१८ 'चित्रं देवानां' यद्यपि सूक्तमिदं आपाततो बाह्य-सूर्यपरं लक्ष्यते, तथापि ऋतस्य ज्योतिषः परमात्मनो दर्शने ऋषेर्वागियं प्रवर्तत इत्यसंशयमिति प्रतिपादितम्

८२१ 'नासत्याभ्यां' काक्षीवतेषु आश्विनसूक्तेषु आश्विनानुग्रहपात्राणां विमदादीनां प्रस्तावः, कुत्स-सूक्तेषु विवृतानि कथारहस्यानि स्मर्तव्यानीत्युक्तम्

८२३ 'तुग्रो ह भुज्युः' तुग्रभुज्युकथारहस्यं प्रतिपादितम्

८२८ 'तद्वां नरा' अत्र दध्यङ्ङाथर्वणः प्रस्तुतः—तत्र प्रोक्तं मधुविद्यारहस्यं, औपनिषदमधुब्राह्मण-सारांशो विवृतः

८३७ 'मध्वः सोमस्य' अस्मिन्नपि सूक्ते प्रसक्तानां वृत्तान्तकथानां तत्र तत्र रहस्याविष्करणं संक्षिप्तम्

पुटसङ्ख्या

८५१ 'उद्वन्दनं' प्रागुक्ताः च्यवन-भुज्यु-रेभादयः पुनः प्रस्तुताः

८५४ 'ऊर्ध्वा धीतिः' दिशः सर्वाश्चैकीभूय ऋषेर्दृष्टिमूर्ध्वगतां द्रढयन्तीत्यादि विवृतम्

८५६ 'युवं वन्दनं' 'विप्रं जनथ' इत्यत्र गर्भस्थस्य वामदेवस्य प्रसक्तिः, तत्र रहस्यम्

८६३ 'अध स्वप्नस्य' पारमार्थिकबुद्धिरावश्यकीति कक्षीवानृषिः सूक्तमुपसंहरति

८६४ 'कदित्था नून्' यजमाने देवतानुग्रहवैभवे विलसति सति, यजमानमाश्रिताः तदनुचराः शिष्याः पुत्रा वा तदनुग्रहस्वीकरणाय प्रभवन्तीत्याद्युक्तम् 'स्तम्भीत्' गवां प्रसवित्री 'अश्वस्य मेना' इत्यत्र गहनं रहस्यमुक्तम्

८६६ 'अस्य मदे' देवशत्रवः पणिवृत्रादयो देवकामानां मनुष्याणामेव द्रोहकारिणः, तैः पिहितानि द्वाराणि द्रोहकारीणीत्युपपत्तर्यते इत्याद्यवधेयम्

८६७ 'अध प्रजज्ञे' उत्तरोऽर्धर्चः सुदुर्बोध इत्युपक्रम्य रहस्यं तात्पर्यमुपपादितम्

८७१ 'त्वं सूरो' एतशमुज्ज्वलं सूर्याश्वमधिकृत्य प्रागुक्तं स्मारितम्

प्रथमाष्टकसूक्तानां ऋष्यादिसूची

सूक्तम्	ऋषिः	छन्दः	देवता
१	मधुच्छन्दाः	गायत्री	अग्निः
२	,,	,,	वायुः, इन्द्रवायू, मित्रावरुणौ
३	,,	,,	अश्विनौ, इन्द्रः, विश्वे देवाः, सरस्वती
४	,,	,,	इन्द्रः
५	,,	,,	,,
६	,,	,,	इन्द्रः, मरुतः
७, ८, ९	,,	,,	इन्द्रः
१०	,,	अनुष्टुप्	,,
११	जेता	,,	,,
१२	मेधातिथिः	गायत्री	अग्निः
१३	,,	,,	,, (आप्रियः)
१४	,,	,,	विश्वे देवाः
१५	,,	,,	ऋतवः, इन्द्रः, मरुतः, त्वष्टा, अग्निः, मित्रावरुणौ, अश्विनौ
१६	,,	,,	इन्द्रः
१७	,,	गायत्री, ४,५ पादनिचृत्	इन्द्रावरुणौ
१८	मेधातिथिः	गायत्री	ब्रह्मणस्पतिः, इन्द्रः, सोमः, दक्षिणा
१९	,,	,,	अग्निः मरुतश्च
२०	,,	,,	ऋभवः
२१	,,	,,	इन्द्र-अग्नी
२२	,,	,,	अश्विनौ, सविता, अग्निः, इन्द्राणी, वरुणानी, अग्नायी, द्यावापृथिव्यौ, पृथिवी, विष्णुः
२३	,,	गायत्री, १९पुर-उष्णिक्,	वायुः, इन्द्रवायू, मित्रावरुणौ,
२४	शुनःशेपः	त्रिष्टुप्, ३-५गायत्री	वरुणः, अग्निः, सविता
२५	,,	गायत्री	वरुणः
२६	,,	,,	अग्निः
२७	,,	गायत्री, १३ त्रिष्टुप्	इन्द्रः, विश्वे देवाः
२८	,,	अनुष्टुप्, ७-९ गायत्री	इन्द्रः, मुसलो-लूखले
२९	,,	पङ्क्तिः	इन्द्रः
३०	,,	गायत्री, ११पादनिचृत्, १६त्रिष्टुप्	इन्द्रः, अश्विनौ, उषाः
३१	हिरण्यस्तूपः	जगती, ८,१६,१८त्रिष्टुप्	अग्निः
३२	,,	त्रिष्टुप्	इन्द्रः
३३	,,	,,	,,
३४	,,	जगती, ९, १२ त्रिष्टुप्	अश्विनौ
३५	,,	त्रिष्टुप्, १, ९ जगती	सविता, अग्निः, मित्रावरुणौ, रात्रिः
३६	कण्वः	बृहती, सतो-बृहती (पर्यायेण)	अग्निः
३७	,,	गायत्री	मरुतः
३८	,,	,,	,,
३९	,,	बृहती, सतो-बृहती (पर्यायेण)	मरुतः
४०	,,	,,	ब्रह्मणस्पतिः
४१	,,	गायत्री	वरुण-मित्र-अर्यमाणः, आदित्याः
४२	,,	,,	पूषा

सूक्तम्	ऋषिः	छन्दः	देवता
४३	,,	गायत्री, ९ अनुष्टुप्	रुद्रः, मित्रा-वरुणौ, सोमः
४४	प्रस्कण्वः	बृहती, सतोबृहती (पर्यायेण)	अग्निः
४५	प्रस्कण्वः	अनुष्टुप्	अग्निः
४६	,,	गायत्री	अश्विनौ
४७	,,	बृहती, सतोबृहती (पर्यायेण)	,,
४८	,,	,,	उषाः
४९	,,	अनुष्टुप्	,,
५०	,,	गायत्री, १०, १३ अनुष्टुप्	सूर्यः
५१	सव्यः	जगती, १४, १५ त्रिष्टुप्	इन्द्रः
५२	,,	जगती, १३, १५ त्रिष्टुप्	,,
५३	,,	जगती, १०, ११ त्रिष्टुप्	,,
५४	,,	जगती, ६,८,९,११ त्रिष्टुप्	,,
५५	,,	जगती	,,
५६	,,	,,	,,
५७	,,	,,	,,
५८	नोधाः	जगती, ६, ९ त्रिष्टुप्	अग्निः
५९	नोधाः	त्रिष्टुप्	अग्निः वैश्वानरः
६०	,,	,,	,,
६१	,,	,,	इन्द्रः
६२	,,	,,	,,
६३	,,	,,	,,
६४	,,	जगती, १५ त्रिष्टुप्	मरुतः
६५	पराशरः	द्विपदा विराट्	अग्निः
६६	,,	,,	,,
६७	,,	,,	,,
६८	,,	,,	,,

सूक्तम्	ऋषिः	छन्दः	देवता
६९	,,	,,	,,
७०	,,	,,	,,
७१	,,	त्रिष्टुप्	,,
७२	,,	,,	,,
७३	,,	,,	,,
७४	राहूगणो गोतमः	गायत्री	अग्निः
७५	,,	,,	,,
७६	,,	त्रिष्टुप्	,,
७७	,,	,,	,,
७८	राहूगणो गोतमः	गायत्री	अग्निः
७९	,,	१-३ त्रिष्टुप्, ४-६ उष्णिक्, ७–१२ गायत्री	अग्निः
८०	,,	पङ्क्तिः	इन्द्रः
८१	,,	,,	,,
८२	,,	पङ्क्तिः, ६ जगती	,,
८३	,,	जगती	,,
८४	,,	१–६ अनुष्टुप्, ७–९ उष्णिक्, १०-१२ पङ्क्तिः, १३–१५ गायत्री, १६–१८ त्रिष्टुप् १९ बृहती, २० सतोबृहती	,,
८५	,,	जगती, ७, १२ त्रिष्टुप्	मरुतः
८६	,,	गायत्री	,,
८७	,,	जगती	,,
८८	,,	१, ६ प्रस्तार-पङ्क्तिः, ५ विराड्रूपा, २–४ त्रिष्टुप्	,,
८९	,,	जगती, ६ विराट्स्थाना, ८–१० त्रिष्टुप्	विश्वे देवाः

सूक्तम्	ऋषिः	छन्दः	देवता
९०	,,	गायत्री, ९ अनुष्टुप्	,,
९१	राहूगणो गोतमः	त्रिष्टुप्, ५–१६ गायत्री, १७ उष्णिक्	सोमः
९२	,,	जगती, ७–१२ त्रिष्टुप्, १३–१८ उष्णिक्	उषाः, अश्विनौ
९३	,,	१–३ अनुष्टुप्, ४-७, १२ त्रिष्टुप्, ८ त्रिष्टुप्-जगती, ९–११ गायत्री	अग्नीषोमौ
९४	कुत्सः	जगती, १५, १६ त्रिष्टुप्	अग्निः, देवाः, मित्रः, वरुणः, अदितिः, सिन्धुः, पृथिवी, द्यौः
९५	,,	त्रिष्टुप्	अग्निः
९६	,,	,,	,,
९७	,,	गायत्री	,,
९८	,,	त्रिष्टुप्	,,
९९	मारीचः कश्यपः	,,	,,
१००	ऋज्राश्व-प्रभृतयः	,,	इन्द्रः
१०१	कुत्सः	जगती, ८–१२ त्रिष्टुप्	,,
१०२	,,	जगती, ११ त्रिष्टुप्	,,
१०३	,,	त्रिष्टुप्	,,
१०४	कुत्सः	त्रिष्टुप्	इन्द्रः
१०५	कुत्सः त्रित आप्त्यो वा	पङ्क्तिः, ८ महाबृहती	विश्वे देवाः

सूक्तम्	ऋषिः	छन्दः	देवता
		यवमध्या, १९ त्रिष्टुप्	
१०६	,,	जगती, ७ त्रिष्टुप्	,,
१०७	,,	त्रिष्टुप्	,,
१०८	,,	,,	इन्द्र-अग्नी
१०९	,,	,,	,,
११०	,,	जगती, ८, ९ त्रिष्टुप्	ऋभवः
१११	,,	जगती, ५त्रिष्टुप्	,,
११२	,,	जगती, २४, २५ त्रिष्टुप्	द्यावापृथिव्यौ, अश्विनौ, अग्निः
११३	,,	त्रिष्टुप्	उषाः, उषा रात्रिश्च
११४	,,	जगती, १०, ११ त्रिष्टुप्	रुद्रः
११५	,,	त्रिष्टुप्	सूर्यः
११६-११८	कक्षीवान्	,,	अश्विनौ
११९	,,	जगती	,,
१२०	,,	१,१०-१२गायत्री, २ ककुप्, ३ का-विराट्, ४ नष्टरूपौ, ५ तनूशिराः, ६ उष्णिक्, ७ विष्टारबृहती, ८ कृतिः,९ विराट्	,,
१२१	,,	त्रिष्टुप्	इन्द्रः, विश्वे देवाः

प्रथमाष्टकमन्त्रवर्णानुक्रमणिका

	सूक्तम्	ऋक्	पुटः
अकारि त इन्द्र गोतमेभिः	६३	९	५४९
अक्षन्नमीमदन्त हि	८२	२	६२८
अक्षितोतिः सनेदिमं	५	९	१३९
अगच्छतं कृपमाणं पराव	११९	८	८५७
अग्निं वूतं वृणीमहे	१२	१	१७८
अग्निनाग्निः समिध्यते	१२	६	१८०
अग्निना तुर्वशं यदुं	३६	१८	३७३
अग्निना रयिमश्नवत्	१	३	९५
अग्निः पूर्वेभिः ऋषिभिः	१	२	९४
अग्निमग्निं हवीमभिः	१२	२	१७९
अग्निमीळे पुरोहितं	१	१	९३
अग्निर्वव्ने सुवीर्यमग्निः	३६	१७	३७३
अग्निर्होता कविक्रतुः	१	५	९६
अग्निं विश्वा अभि पृक्षः	७१	७	५८२
अग्नीषोमा चेति तद्	९३	४	६९४
अग्नीषोमा पिपृतं	९३	१२	६९८
अग्नीषोमा य आहुतिं	९३	३	६९४
अग्नीषोमा यो अद्य वां	९३	२	६९३
अग्नीषोमावनेन वां	९३	१०	६९७
अग्नीषोमाविमानि नो	९३	११	६९७
अग्नीषोमाविमं सु मे	९३	१	६९३
अग्नीषोमा सवेदसा	९३	९	६९७
अग्नीषोमा हविषः	९३	७	६९६
अग्ने तव त्यदुक्थ्यं	१०५	१३	७६३
अग्ने देवाँ इहा वह जज्ञानः	१२	३	१७९
अग्ने देवाँ इहा वह सादया	१५	४	१९९
अग्ने पत्नीरिहा वह	२२	९	२३३
अग्ने पूर्वा अनूषसो	४४	१०	४२५
अग्ने यं यज्ञमध्वरं	१	४	९६
अग्नेर्वयं प्रथमस्यामृतानां	२४	२	२५१
अग्ने वाजस्य गोमतः	७९	४	६१२
अग्ने विवस्वदुषसः	४४	१	४२०
अग्ने शुक्रेण शोचिषा	१२	१२	१८३
अग्ने सुक्षतमे रथे	१३	४	१८६
अच्छा वदा तना गिरा	३८	१३	३८८
अच्छिद्रा सूनो सहसो नो	५८	८	५१७
अजो न क्षां दाधार पृथिवीं	६७	३	५६७
अजोहवीदश्विना तौ	११७	१५	८४३
अजोहवीदश्विना वर्तिका	११७	१६	८४३
अजोहवीन्नासत्या करा वां	११६	१३	८३०
अतारिष्म तमसस्पारं	९२	६	६८६
अति नः सश्चतो नय	४२	७	४११
अतिष्ठन्तीनामनिवेश	३२	१०	३२२
अतो देवा अवन्तु नः	२२	१६	२३६
अतो विश्वान्यद्भुता	२५	११	२६५
अतः परिज्मन्नागहि	६	९	१४८
अत्यो नाज्मन्त्सर्गप्रतक्तः	६५	३	५६१
अत्राह गोरमन्वत	८४	१५	६४३
अथा ते अङ्गिरस्तमः	८५	२	५९९
अथा ते अन्तमानां	४	३	१२७
अथा न उभयेषां	२६	९	२७३
अददा अर्भां महते वचस्यवे	५१	१३	४७२
अदितिः द्यौरदितिरन्तरिक्षं	८९	१०	६७०
अदृश्रमस्य केतवः	५०	३	४५७
अद्या वूतं वृणीमहे	४४	३	४२१
अद्या देवा उदिता सूर्यस्य	११५	६	८२१
अद्रौ चिदस्मा अन्तर्दुरोणे	७०	२	५७५
अध ते विश्वमनुहासदिष्टय	५७	२	५०९
अध प्रजज्ञे तरणिर्ममत्तु	१२१	६	८६७
अध स्वनादुत बिभ्युः	९४	११	७०४
अध स्वनान्मरुतां विश्व	३८	१०	३८७
अध स्वप्नस्य निर्विदे	१२०	१२	८६३
अधा नो विश्वसौभग	४२	६	४११
अधा मन्ये श्रत्ते अस्मा	१०४	७	७५४
अधारयन्त वह्नयः	२०	८	२२७
अधि द्वयोरदधा उक्थ्यं	८३	३	६३३
अधि पेशांसि वपते	९२	४	६८५
अधि श्रियं निदधुश्चारु	७२	१०	५८९
अधि सानौ नि जिघ्नते	८०	६	६१७
अधेनुं दस्रा स्तर्यं विष	११७	२०	८४५

	सू.	ऋ.	पृ.
अनवद्यैरभिद्युभिः	६	८	१४७
अनारम्भणे तदवीरयेथां	११६	५	८२४
अनुकामन्तर्पयेथां	१७	३	२०८
अनु त्वा मही पाजसी	१२१	११	८७०
अनु प्रत्नस्यौकसः	३०	९	२९६
अनुव्रताय रन्धयन्नप	५१	९	४६९
अनु स्वधामक्षरन्नापो	३३	११	३४०
अप त्ये तायवो यथा	५०	२	४५७
अप त्यं परिपन्थिनं	४२	३	४०९
अप नः शोशुचदघं	९७	१	७१८
अपावहस्तो अपृतन्यत्	३२	७	३२०
अपामतिष्ठद्गरुणह्वरं	५४	१०	४९८
अपां नपातमवसे	२२	६	२३२
अपो देवीरुपह्वये	२३	१८	२४६
अप्नस्वतीमश्विना	११२	२४	८०१
अप्रक्षितं वसु बिभर्षि	५५	८	५०४
अप्सु मे सोमो अब्रवीत्	२३	२०	२४७
अप्स्वन्तरमृतमप्सु भेषजं	२३	१९	२४६
अबुध्ने राजा वरुणो	२४	७	२५३
अभि त्यं मेषं पुरुहूत	५१	१	४६३
अभि त्वा गोतमा गिरा	७८	१	६०७
अभि त्वा देव सवितः	२४	३	२५१
अभि त्वा पूर्वपीतये	१९	९	२२१
अभि नो देवीरवसा	२२	११	२३४
अभि यज्ञं गृणीहि नः	१५	३	१९८
अभिष्टने ते अद्रिवः	८०	१४	६२१
अभि सिध्मो अजिगात्	३३	१३	३४१
अभि सूयवसं नय	४२	८	४१२
अभि स्ववृष्टिं मदे अस्य	५२	५	४७८
अभीमवन्वन्स्वभिष्टि	५१	२	४६३
अभीवृतं कृशनैर्विश्वरूपं	३५	४	३५८
अभूदु पारमेतवे	४६	११	४३७
अभूदु भा उ अंशवे	४६	१०	४३७
अमी य ऋक्षा निहितास	२४	१०	२५५
अमी ये देवाः स्थन	१०५	५	७५९
अमी ये पञ्चोक्षणः	१०५	१०	७६२
अमी ये सप्तरश्मयः	१०५	९	७६१
अमूर्या उप सूर्ये	२३	१७	२४६
अयमु ते समतसि	३०	४	२९४
अयुक्त सप्त शुन्ध्युवः	५०	९	४६०
अयुयुत्सन्ननवद्यस्य सेनां	३३	६	३३६
अयोद्धेव दुर्मद आ हि जुह्वे	३२	६	३२०
अयं ते स्तोमो अग्रियः	१६	७	२०६
अयं देवाय जन्मने	२०	१	२२१
अयं मित्रस्य वरुणस्य	९४	१२	७०४
अयं वां मधुमत्तमः	४७	१	४४०
अयं समह मा तनू	१२०	११	८६३
अराधि होता स्वनिषत्त	७०	४	५७६
अरित्रं वां दिवस्पृथु	४६	८	४३६
अरुणो मा सकृद्वृकः	१०५	१८	७६६
अर्चन्ति नारीरपसो न	९२	३	६८५
अर्चा दिवे बृहते शूष्यं	५४	३	४९३
अर्चा शक्राय शाकिने	५४	२	४९३
अर्थमिद्वा उ अर्थिनः	१०५	२	७५८
अर्वाङ्बिरग्ने अर्वतो	७३	९	५९४
अर्वाङेहि सोमकामं त्वा	१०४	९	७५५
अर्वाञ्चं दैव्यं जनं	४५	१०	४३१
अर्वाञ्चा वां सप्तयः	४७	८	४४३
अव ते हेळो वरुण नमो	२४	१४	२५८
अव त्मना भरते केतवे	१०४	३	७५०
अवसृजा वनस्पते	१३	११	१९०
अवस्यते स्तुवते कृष्णि	११६	२३	८३५
अवा नो अग्न ऊतिभिः	७९	७	६१३
अवोचाम नमो अस्मा	११४	११	८१८
अवोचाम रहूगणाः	७८	५	६०८
अवन्तु नः पितरः सुप्रवाचना	१०६	३	७६८
अश्याम ते सुमतिं	११४	३	८१४
अश्वं हि भूरिदावत्तरा	१०९	२	७७७
अश्वावति प्रथमो गोषु	८३	१	६३२
अश्वावतीर्गोमतीर्विश्व	४८	२	४४५
अश्विना पिबतं मधु	१५	११	२०२
अश्विना पुरुवंससा	३	२	११२
अश्विना मधुमत्तमं	४७	३	४४१
अश्विना यज्वरीरिषः	३	१	१११

	सू.	ऋ.	पृ.
अश्विना वर्तिरस्मदा	९२	१६	६९२
अश्विनोरसनं रथं	१२०	१०	८६३
अश्वं न गूळ्हमश्विना	११७	४	८३८
अश्वं न त्वा वारवन्तं	२७	१	२७४
अश्व्यो वारो अभवः	३२	१२	३२३
अषाळ्हं युत्सु पृतनासु	९१	२१	६८२
अष्टा महो दिव आदो	१२१	८	८६९
अष्टौ व्यख्यत्ककुभः	३५	८	३६१
असमं क्षत्रमसमा मनी	५४	८	४९७
असामि हि प्रयज्यवः	३९	९	३९५
असाम्योजो बिभृथा	३९	१०	३९५
असावि सोम इन्द्र ते	८४	१	६३६
असि हि वीर सेन्यः	८१	२	६२३
असृग्रमिन्द्र ते गिरः	९	४	१६२
असौ यः पन्था आदित्यः	१०५	१६	७६५
अस्ति हि ष्मा मदाय वः	३७	१५	३८२
अस्मा इदु ग्नाश्चिदेव	६१	८	५३०
अस्मा इदु त्यदनु दाय्ये	६१	१५	५३४
अस्मा इदु त्यमुपमं	६१	३	५२६
अस्मा इदु त्वष्टा तक्षत्	६१	६	५२८
अस्मा इदु प्रतवसे तुराय	६१	१	५२५
अस्मा इदु प्र भरा तूतुजा	६१	१२	५३२
अस्मा इदु प्रय इव प्रयंसि	६१	२	५२६
अस्मा इदु सप्तिमिव श्रव	६१	५	५२७
अस्मा इदु स्तोमं सं हिनो	६१	४	५२७
अस्माकं शिप्रिणीनां	३०	११	२९७
अस्मान्त्सु तत्र चोदय	९	६	१६३
अस्मे धेहि श्रवो बृहत्	९	८	१६४
अस्मे वत्सं परिषन्तं न	७२	२	५८५
अस्मे सोम श्रियमधि	४३	७	४१६
अस्मै भीमाय नमसा	५७	३	५१०
अस्य पीत्वा शतक्रतो	४	८	१३१
अस्य मदे स्वर्यं वा ऋताय	१२१	४	८६६
अस्य वीरस्य बर्हिषि	८६	४	६५६
अस्य शासुरुभयासः	६०	२	५२३
अस्य श्रवो नद्यः सप्त	१०२	२	७३९
अस्य श्रोषन्त्वाभुवः	८६	५	६५६
अस्येदु त्वेषसा रन्त	६१	११	५३१
अस्येदु प्र ब्रूहि पूर्व्याणि	६१	१३	५३२
अस्येदु भिया गिरयश्च	६१	१४	५३३
अस्येदु मातुः सवनेषु	६१	७	५२८
अस्येदेव प्र रिरिचे	६१	९	५३०
अस्येदेव शवसा शुषन्तं	६१	१०	५३१
अहन्नहिं पर्वते शिश्रिया	३२	२८	३१७
अहन्वृत्रं वृत्रतरं	३२	५	३१९
अहानि गृध्राः पर्या वः	८८	४	६६३
अहेर्यातारं कमपश्य	३२	१४	३२५
अहं सो अस्मि यः पुरा सु	१०५	७	७६०
आकीं सूर्यस्य रोचनात्	१४	९	१९५
आ कृष्णेन रजसा	३५	२	३५७
आग्ना अग्न इहावसे	२२	१०	२३३
आ घ त्वावान्त्मनाप्तः	३०	१४	२९८
आ घा गमद्यदि श्रवत्	३०	८	२९५
आ घा योषेव सूनरी	४८	५	४४७
आ च वहासि तौ इह	७४	६	५९७
आतक्षत सातिमस्मभ्य	१११	३	७८७
आ तत्ते दस्र मन्तुमः	४२	५	४१०
आतिष्ठ वृत्रहन्रथं	८४	३	६३७
आ तू न इन्द्र कौशिक	१०	११	१७२
आ ते सुपर्णा अमिनन्त	७९	२	६१०
आ त्वा कण्वा अहूषत	१४	२	१९२
आ त्वा वहन्तु हरयः	१६	१	२०३
आ त्वा विप्रा अचुच्यवुः	४५	८	४३०
आ त्वा विशन्त्वाशवः	५	७	१३९
आ त्वेता नि षीदते	५	१	१३५
आथर्वणायाश्विना	११७	२२	८४६
आदह स्वधामनु	६	४	१४४
आदारो वां मतीनां	४६	५	४३४
आदित्ते विश्वे ऋतुं जुषन्त	६८	२	५६९
आदृष्णोति हविष्कृतिं	१८	८	२१६
आ दैव्यानि व्रता चिकि	७०	१	५७४
आवङ्गिराः प्रथमं दधिरे	७३	४	६३४
आ नासत्या गच्छतं हूय	३४	१०	३५५

	सू.	ऋ.	पृ.
आ नासत्या त्रिभिरेका	३४	११	३५५
आ नो अग्ने रयिं भर	७९	८	६१३
आ नो अग्ने सुचेतुना	७९	९	६१३
आ नो अश्विना त्रिवृता	३४	१२	३५६
आ नो नावा मतीनां	४६	७	४३५
आ नो बर्ही रिशादसः	२६	४	२७२
आ नो भज परमेषु	२७	५	२७६
आ नो भद्राः क्रतवो	८९	१	६६६
आ नो यज्ञाय तक्षत	१११	२	७८७
आन्यं दिवो मातरिश्वा	९३	६	६९५
आ पप्रौ पार्थिवं रजः	८१	५	६२५
आ पूषञ्चित्रबर्हिषं	२३	१३	२४४
आपो अद्यान्वचारिषं	२३	२३	२४९
आपो न देवीरुप यन्ति	८३	२	६३३
आपः पृणीत भेषजं	२३	२१	२४८
आप्यायस्व मदिन्तम	९१	१७	६८०
आप्यायस्व समेतु ते	९१	१६	६७९
आभरतं शिक्षतं वज्रबा	१०९	७	७८०
आभोगयं प्र यदिच्छन्त	११०	२	७८२
आ मनीषामन्तरिक्षस्य	११०	६	७८४
आयजी वाजसातमा	२८	७	२८३
आ यदिषे नृपतिं तेज आ	७१	८	५८२
आ यद् दुवः शतक्रतवा	३०	१५	२९९
आ यद्धरी इन्द्र विव्रता	६३	२	५४५
आ ये तन्वन्ति रश्मिभिः	१९	८	२२१
आ ये विश्वा स्वपत्या	७२	९	५८९
आ यं पृणन्ति दिवि सद्म	५२	४	४७७
आरे ते गोघ्नमुत पूरुषघ्नं	११४	१०	८१७
आ रोदसी बृहती वेवि	७२	४	५८६
आर्चन्नत्र मरुतः ससि्म	५२	१५	४८४
आ व इन्द्रं क्रिविं यथा	३०	१	२९२
आवहन्ती पोष्या वार्या	११३	१५	८१०
आ वां रथो अश्विना	११८	१	८४८
आ वां रथं दुहिता सूर्य	११६	१७	८३२
आ वां रथं पुरुमायं मनो	११९	१	८५३
आ वां रथं युवतिस्तिष्ठदत्र	११८	५	८५०
आ वां श्येनासो अश्विना	११८	४	८५०

	सू.	ऋ.	पृ.
आ विद्युन्मद्भिर्मरुतः	८८	१	६६२
आविष्टयो वर्धते चारु	९५	५	७१०
आ वो मक्षू तनाय कं	३९	७	३९३
आ वो वहन्तु सप्तयो रघुष्यदः	८५	६	६५०
आवः कुत्समिन्द्र यस्मिन्	३३	१४	३४२
आवः शमं वृषभं तुग्र्यासु	३३	१५	३४३
आ श्येनस्य जवसा	११८	११	८५३
आ श्रुत्कर्ण श्रुधी हवं	१०	९	१७१
आश्विनावश्वावत्यै	३०	१७	३००
आ सूर्ये न रश्मयो ध्रुवा	५९	३	५१९
आस्नो वृकस्य वर्तति	११६	१४	८३०
आ स्मा रथं वृषपाणे	५१	१२	४७१
आ स्वमद्म युवमानो	५८	२	५१३
आ हि ष्मा सूनवे पिता	२६	३	२७१
इच्छन्त रेतो मिथस्तनूषु	६८	४	५७०
इच्छन्नश्वस्य यच्छिरः	८४	१४	६४३
इतो वा सातिमीमहे	६	१०	१४८
इत्था हि सोम इन्मदे	८०	१	६१५
इदमापः प्र वहत	२३	२२	२४८
इदं नमो वृषभाय स्वराजे	५१	१५	४७४
इदं पित्रे मरुतामुच्यते	११४	६	८१५
इदं विष्णुर्विचक्रमे	२२	१७	२३७
इदं श्रेष्ठं ज्योतिषां ज्योतिरागा	११३	१	८०२
इन्द्र इद्धर्योः सचा	७	२	१५१
इन्द्रज्येष्ठा मरुद्गणाः	२३	८	२४२
इन्द्र तुभ्यमिदद्रिवो	८०	७	६१८
इन्द्र त्वोतास आ वयं	८	३	१५६
इन्द्रमिद् गाथिनो बृहत्	७	१	१५०
इन्द्रमिद्धरी वहतोऽप्रति	८४	२	६३७
इन्द्रमीशानमोजसा	११	८	१७७
इन्द्र वाजेषु नोऽव	७	३४	१५२
इन्द्रवायू इमे सुता	२	४	१०५
इन्द्रवायू बृहस्पतिं मित्रा	१४	३	१९२
इन्द्रवायू मनोजुवा	२३	३	२४०
इन्द्र सोमं पिब ऋतुना	१५	१	१९७
इन्द्रस्य नु वीर्याणि प्र वोचं	३२	१	३१७

	सू.	ऋ.	पृ.
इन्द्रस्याङ्गिरसां चेष्टौ	६२	३	५३६
इन्द्राय नूनमर्चत	८४	५	६३८
इन्द्रा याहि चित्रभानो	३	४	११६
इन्द्रा याहि तूतुजानः	३	६	११९
इन्द्रा याहि धियेषितो	३	५	११८
इन्द्रावरुण नू नु वां	१७	८	२११
इन्द्रावरुणयोरहं	१७	१	२०८
इन्द्रावरुण वामहं	१७	७	२११
इन्द्रेण सं हि दृक्षसे	६	७	१४७
इन्द्रेहि मत्स्यन्धसः	९	१	१६०
इन्द्रो अश्रायि सुध्यो निरेके	५१	१४	४७३
इन्द्रो दधीचो अस्थभिः	८४	१३	६४२
इन्द्रो दीर्घाय चक्षसे	७	३	१५१
इन्द्रो मदाय वावृधे	८१	१	६२३
इन्द्रो यातोऽवसितस्य राजा	३२	१५	३२६
इन्द्रो वृत्रस्य तविषीं	८०	१०	६१९
इन्द्रो वृत्रस्य दोधतः	८०	५	६१७
इन्द्रं कुत्सो वृत्रहणं शचीपतिं	१०६	६	७६९
इन्द्रं प्रातर्हवामहे	१६	३	२०५
इन्द्रं मित्रं वरुणमग्निमूतये	१०६	१	७६७
इन्द्रं वयं महाधने	७	५	१५२
इन्द्रं विश्वा अवीवृधन्	११	१	१७३
इन्द्रं वो विश्वतस्परि	७	१०	१५५
इन्द्रः सहस्रदाव्नां	१७	५	२१०
इममिन्द्र सुतं पिब	८४	४	६३७
इममू षु त्वमस्माकं	२७	४	२७६
इमा धाना घृतस्नुवः	१६	२	२०४
इमामग्ने शरणिं मीमृषो	३१	१६	३१४
इमा रुद्राय तवसे कपर्दिने	११४	१	८१३
इमां ते धियं प्र भरे महो महीम्	१०२	१	७३८
इमे चित्तस्य मन्यवे	८०	११	६२०
इमे त इन्द्र ते वयं पुरुष्टुत	५७	४	५११
इमे सोमास इन्दवः	१६	६	२०६
इमं मे वरुण श्रुधी	२५	१९	२६९
इमं यज्ञमिदं वचः	९१	१०	६७७
इमं स्तोममर्हते जातवेदसे	९४	१	६९८
इह त्वष्टारमग्रियं	१३	१०	१९०

	सू.	ऋ.	पृ.
इहेन्द्राग्नी उपह्वये	२१	१	२२७
इहेन्द्राणीमुपह्वये	२२	१२	२३५
इहेव शृण्व एषां	३७	३	३७७
इळा सरस्वती मही	१३	९	१८९
ईयुष्टे ये पूर्वतरामपश्यन्	११३	११	८०८
ईशानकृतो धुनयो रिशादसः	६४	५	५५२
ईळते त्वामवस्यवः	१४	५	१९३
ईळे द्यावापृथिवी पूर्वचित्तये	११२	१	७८९
उक्थमिन्द्राय शंस्यं	१०	५	१६८
उक्थेभिरर्वागवसे	४७	१०	४४४
उग्रा सन्ता हवामहे	२१	४	२२८
उच्छिष्टं चम्वोर्भर	२८	९	२८४
उत त्यं चमसं नवं	२०	६	२२५
उत द्युमत्सु वीर्यं	७४	९	५९८
उत नो धियो गोअग्राः	९०	५	६७२
उत नः सुभगाँ अरिः	४	६	१३०
उत ब्रुवन्तु जन्तवः	७४	३	५९६
उत ब्रुवन्तु नो निदो	४	५	१२८
उत यो मानुषेष्वा	२५	१५	२६७
उत वा यस्य वाजिनः	८६	३	६५५
उत स्म ते वनस्पते	२८	६	२८३
उत स्या वां मधुमन्मक्षिका	११९	९	८५७
उतो स मह्यमिन्दुभिः	२३	१५	२४५
उत्तिष्ठ ब्रह्मणस्पते	४०	१	३९७
उत्ते शतान्मघवन्नुच्च भूयसः	१०२	७	७४२
उदगादयमादित्यः	५०	१३	४६२
उदपप्तन्नरुणा भानवो वृथा	९२	२	६८४
उदीर्ध्वं जीवो असुर्न आगात्	११३	१६	८१०
उदुत्तमं मुमुग्धि नः	२५	२१	२७०
उदुत्तमं वरुण पाशमस्मत्	२४	१५	२५९
उदु त्ये सूनवो गिरः	३७	१०	३८०
उदु त्यं जातवेदसं	५०	१	४५६
उद्यन्नद्य मित्रमहः	५०	११	४६१
उद्यंयमीति सवितेव बाहू	९५	७	७११

	सू.	ऋ.	पृ.
उद्वयं तमसस्परि	५०	१०	४६१
उद्वन्वनमैरतं दंसनाभिः	११८	६	८५०
उप क्षत्रं पृञ्चीत हन्ति	४०	८	४०१
उप ते स्तोमान्पशुपा इवाकरं	११४	९	८१७
उप त्वाग्ने दिवे दिवे	१	७	९८
उप नो देवा अवसा गमन्तु	१०७	२	७७०
उप नः सुतमा गहि	१६	४	२०५
उप नः सवना गहि	४	२	१२६
उप प्र जिन्वन्नुशती	७१	१	५७८
उपप्रयन्तो अध्वरं	७४	१	५९५
उपह्वरेषु यदचिध्वं	८७	२	६५९
उपेदहं धनदामप्रतीतं	३३	२	३३४
उपो रथेषु पृषतीरयुग्ध्वं	३९	६	३९३
उपो षु शृणुही गिरः	८२	१	६२८
उभा देवा दिविस्पृशा	२३	२	२४०
उभा पिबतमश्विना	४६	१५	४३९
उभे भद्रे जोषयेते न मेने	९५	६	७१०
उरु ते ज्रयः पर्येति बुध्न	९५	९	७१२
उरुष्या णो अभिशस्तेः	९१	१५	६७९
उरुं हि राजा वरुणश्चकार	२४	८	२५४
उवासोषा उच्छाच्च नु	४८	३	४४६
उशिक् पावको वसुर्मानुषे	६०	४	५२४
उष आ भाहि भानुना	४८	९	४५०
उषस्तच्चित्रमाभर	९२	१३	६९०
उषस्तमश्यां यशसं सुवीरं	९२	८	६८८
उषो अद्येह गोमति	९२	१४	६९१
उषो भद्रेभिरागहि	४९	१	४५४
उषो न जारो विभावोरुः	६९	५	५७४
उषो यदग्निं समिधे चकर्थ	११३	९	८०७
उषो यदद्य भानुना	४८	१५	४५३
उषो ये ते प्र यामेषु	४८	४	४४७
उषो वाजं हि वंस्व	४८	११	४५१
ऊर्ध्वं ऊ षु ण ऊतये	३६	१३	३७०
ऊर्ध्वस्तिष्ठा न ऊतये	३०	६	२९५
ऊर्ध्वा धीतिः प्रत्यस्य प्रयाम	११९	२	८५४
ऊर्ध्वो नः पाह्यंहसः	३६	१४	३७१
ऊर्ध्वं नुनुद्रेऽवतं त ओजसा	८५	१०	६५३
ऋजुनीती नो वरुणः	९०	१	६७१
ऋतस्य देवा अनुव्रता	६५	२	५६०
ऋतस्य प्रेषा ऋतस्य धीतिः	६८	३	५७०
ऋतस्य हि धेनवो वावशानाः	७३	६	५९२
ऋतेन मित्रावरुणा	२	८	१०७
ऋतेन यावृतावृधा	२३	५	२४१
ऋभुक्षणमिन्द्रमाहुव ऊतये	१११	४	७८८
ऋभुर्न इन्द्रः शवसा नवीयान्	११०	७	७८४
ऋभुर्भराय संशिशातु सातिं	१११	५	७८८
ऋषिर्न स्तुभ्वा विक्षु प्रशस्तः	६६	२	५६३
ऋषिं नरावंहसः पाञ्चजन्यं	११७	३	८३७
एकस्या वस्तोरावतं रणाय	११६	२१	८३४
एतत्त्यत्त इन्द्र वृष्ण उक्थ्यं	१००	१७	७३१
एतत्त्यन्न योजनमचेति	८८	५	६६४
एता उ त्या उषसः केतुमक्रत	९२	१	६८३
एता चिकित्वो भूमा नि पाहि	७०	३	५७५
एता ते अग्न उचथानि वेधः	७३	१०	५९४
एतानि वामश्विना वीर्याणि	११७	२५	८४८
एतानि वां श्रवस्या सुदानू	११७	१०	८४०
एतायामोपगव्यन्तः	३३	१	३३३
एते त इन्द्र जन्तवः	८१	९	६२७
एतेनाग्ने ब्रह्मणा वावृधस्व	३१	१८	३१६
एनाङ्गूषेण वयमिन्द्रवन्तः	१०५	१९	७६६
एन्द्र सानसिं रयिं	८	१	१५६
एभिरग्ने दुवो गिरः	१४	१	१९१
एभिर्धुभिः सुमना एभिरिन्दु	५३	४	४८७
एमाशुमाशवे भर	४	७	१३०
एमेनं सृजता सुते	९	२	१६१
एवाग्निर्गोतमेभिर्ऋतावा	७७	५	६०६
एवा ते हारियोजना सुवृक्ति	६१	१६	५३४
एवा नो अग्ने समिधा वृधानः	९५	११	७१३
एवा नो अग्ने समिधा वृधानः	९६	९	७१८
एवा हि ते विभूतयः	८	९	१५९
एवा ह्यस्य काम्या	८	१०	१६०
एवा ह्यस्य सूनृता	८	८	१५९

	सू.	ऋ.	पृ.
एवेन्द्राग्नी पपिवांसा सुतस्य	१०८	१३	७७६
एष प्र पूर्वीरव तस्य चम्रिषः	५६	१	५०५
एषा दिवो दुहिता प्रत्यदर्शि	११३	७	८०६
एषायुक्त परावतः	४८	७	४४९
एषा स्या वो मरुतोऽनुभर्त्री	८८	६	६६५
एषो उषा अपूर्व्या	४६	१	४३२
एह देवा मयोभुवा	९२	१८	६९२
एहि स्तोमां अभि स्वर	१०	४	१६८
एह्यग्न इह होता	७६	२	६०१
ओ त्ये नर इन्द्रमूतये गुः	१०४	२	७५०
ओमासश्चर्षणीधृतो	३	७	११९
अंबयो यन्त्यध्वभिः	२३	१६	२४५
क इमं वो निण्यमा चिकेत	९५	४	७०९
क ईषते तुज्यते को	८४	१७	६४५
कथा दाशेमाग्नये	७७	१	६०३
कथा राधाम सखाय	४१	७	४०५
कदा क्षत्रश्रियं नरं	२५	५	२६३
कदा मर्तमराधसं	८४	८	६३९
कदित्था नृ॑: पात्रं देवयतां	१२१	१	८६४
कद्ध नूनं कध प्रियः	३८	१	३८३
कद्रुद्राय प्रचेतसे	४३	१	४१३
कद्व ऋतस्य धर्णसि	१०५	६	७६०
कविमग्निमुपस्तुहि	१२	७	१८१
कवी नो मित्रावरुणा	२	९	१०८
कस्त उषः कध प्रिये	३०	२०	३०१
कस्ते जामिर्जनानां	७५	३	५९९
कस्य नूनं कतमस्यामृतानां	२४	१	२५०
का त उपेतिर्मनसः	७६	१	६००
का राधद्धोत्राश्विना वां	१२०	१	८५८
कियात्या यत्समया भवाति	११३	१०	८०७
कुह यान्ता सुष्टुतिं काव्यस्य	११७	१२	८४१
केतुं कृण्वन्नकेतवे	६	३	१४३
को अग्निमीट्टे हविषा	८४	१८	६४५
को अद्य युङ्क्ते धुरि गा	८४	१६	६४४
को देवयन्तमश्नवत्	४०	७	४०१
को वो वर्षिष्ठ आ नरो	३७	६	३७८
क्रत्वा महाँ अनुष्वधं	८१	४	६२४
क्राणा रुद्रेभिर्वसुभिः पुरो हि	५८	३	५१४
क्रीळं वः शर्धो मारुतं	३७	१	३७५
क्व १ त्री चक्रा त्रिवृतो	३४	९	३५४
क्व नूनं कद्वो अर्थं	३८	२	३८३
क्व वः सुम्ना नव्यसे	३८	३	३८४
क्षत्राय त्वं श्रवसे त्वं महीया	११३	६	८०५
क्षपो राजन्नुत त्मना	७९	६	६१२
क्षेत्रमिव विममुस्तेजनेन	११०	५	७८३
गयस्फानो अमीवहा	९१	१२	६७८
गर्भो यो अपां गर्भः	७०	२	५७५
गन्तारा हि स्थोऽवसे	१७	२	२०८
गाथपतिं मेधपतिं	४३	४	४१४
गायन्ति त्वा गायत्रिणः	१०	१	१६५
गार्हपत्येन सन्त्य	१५	१२	२०३
गूहता गुह्यं तमः	८६	१०	६५८
गृणानो अङ्गिरोभिः	६२	५	५३८
गोजिता बाहू अमितक्रतुः	१०२	६	७४१
गोमातरो यच्छुभयन्ते	८५	३	६४९
गोषु प्रशस्ति वनेषु धिषे	७०	५	५७७
घनेव विष्वक् वि जह्या	३६	१६	३७२
घृतपृष्ठा मनोयुजः	१४	६	१९४
घृताहवन वीदिवः	१२	५	१८०
घृताहवन सन्त्येमा	४५	५	४२९
घृषुं पावकं वनिनं	६४	१२	५५७
घ्नन्तो वृत्रमतरन् रोदसी	३६	८	३६७
चक्राणासः परीणहं पृथिव्या	३३	८	३३८
चक्राथे हि सधमद्यङ् नाम भद्रं	१०८	३	७७२
चतुरश्चिद्ददमानात्	४१	९	४०६
चरित्रं हि वेरिवाच्छेदि पर्ण	११६	१५	८३१

	सू.	ऋ.	पृ.
चर्कृत्यं मरुतः पृत्सु	६४	१४	५५८
चित्रैरञ्जिभिर्वपुषे	६४	४	५५१
चित्रो यदभ्राट् श्वेतो न विक्षु	६६	३	५६४
चित्रं देवानामुदगादनीकं	११५	१	८१८
चोदयित्री सूनृतानां	३	११	१२२
चन्द्रमा अप्स्वन्तरा	१०५	१	७५७
जघन्वां उ हरिभिः सम्भृत	५२	८	४८०
जनासो अग्निं दधिरे सहः	३६	२	३६४
जयतामिव तन्यतुः	२३	११	२४३
जराबोध तद्विविड्ढि	२७	१०	२७८
जातवेदसे सुनवाम सोमं	९९	१	७२२
जामिः सिन्धूनां भ्रातेव	६५	४	५६२
जिह्मश्ये चरितवे मघोनी	११३	५	८०५
जिह्मं नुनुद्रेऽवतं तया	८५	११	६५४
जुजुरुषो नासत्योत वक्रिं	११६	१०	८२७
जुषस्व सप्रथस्तमं	७५	१	५९८
जुष्टो हि दूतो असि	४४	२	४२१
तं आदित्या आगता सर्वतातये	१०६	२	७६७
त उक्षितासो महिमानं	८५	२	६४८
तक्वा न भूर्णिर्वना	६६	१	५६३
तक्षद्यत्त उशना सहसा सहः	५१	१०	४७०
तक्षन्नासत्याभ्यां	२०	३	२२३
तक्षन्नयं सुवृतं विश्ननापसः	१११	१	७८६
ततं मे अपस्तदु तायते पुनः	११०	१	७८१
तत्त इन्द्रियं परमं पराचैः	१०३	१	७४४
तत्तविदश्विनोरवो	४६	१२	४३८
तत्ते भद्रं यत्समिद्धः	९४	१४	७०५
तत्त्वा यामि ब्रह्मणा वन्दमानः	२४	११	२५६
तत्सविता वोऽमृतत्वमासुवत्	११०	३	७८२
तत्सूर्यस्य देवत्वं तन्महित्वं	११५	४	८२०
तथा तदस्तु सोमपाः	३०	१२	२९७
तदस्येदं पश्यता भूरि पुष्टं	१०३	५	७४७
तदित्समानमाशाते	२५	६	२६३
तदिन्द्र प्रेव वीर्यं चकर्थ यत्	१०३	७	७४८
तदिन्नक्तं तद्दिवा महामाहुः	२४	१२	२५७
तदु प्रयक्षतममस्य	६२	६	५३८
तदूचुषे मानुषे मा युगानि	१०३	४	७४६
तद्वां नरा शंस्यं पज्रियेण	११७	६	८३९
तद्वां नरा शंस्यं राध्यं च	११६	११	८२७
तद्वां नरा सनये दंस उग्रं	११६	१२	८२८
तद्विप्रासो विपन्यवो	२२	२१	२३९
तद्विष्णोः परमं पदं	२२	२०	२३८
तन्मित्रस्य वरुणस्याभि	११५	५	८२०
तपुर्जम्भो वन आ वातचोदितः	५८	५	५१५
तमप्सन्त शवस उत्सवेषु	१००	८	७२६
तमित्सखित्वमीमहे	१०	६	१६९
तमित्सुहव्यमङ्गिरः	७४	५	५९६
तमिद्वोचेमा विदथेषु	४०	६	४००
तमीळत प्रथमं यज्ञसाधं	९६	३	७१५
तमीशानं जगतः	८९	५	६६८
तमु त्वा गोतमो गिरा	७८	२	६०७
तमु त्वा वाजसातमं	७८	३	६०७
तमु त्वा वृत्रहन्तमं	७८	४	६०८
तमूतयो रणयञ्छूरसातौ	१००	७	७२६
तयोरिदवसा वयं	१७	६	२१०
तयोरिद् घृतवत्पयः	२२	१४	२३५
तरणिर्विश्ववर्शतः	५०	४	४५८
तवाहं शूर रातिभिः	११	६	१७६
तस्य वज्रः क्रन्दति स्मत्स्वर्षा	१००	१३	७२९
ता अस्य नमसा सहः	४४	१२	६४१
ता अस्य पृशनायुवः	८४	११	६४१
ता नो अद्य वनस्पती	२८	८	२८४
तान्यजत्राँ ऋतावृधः	१४	७	१९४
तान्पूर्वया निविदा हूमहे	८९	३	६६७
ता महान्ता सदस्पती	२१	५	२२९
ता मित्रस्य प्रशस्तये	२१	३	२२८
ता यज्ञेषु प्रशंसते	२१	२	२२८
ता वां नरा स्ववसे सुजाता	११८	१०	८५२
ता विद्वांसा हवामहे वां	१२०	३	८५९
ता सुजिह्वा उप ह्वये	१३	८	१८८

	सू.	ऋ.	पृ.
तां उशतो वि बोधय	१२	४	१७९
तिस्रो द्यावः सवितुर्या	३५	६	३५९
तिस्रो यदग्ने शरदः	७२	३	५८५
तिस्रः क्षपस्त्रिरहाति व्रजद्भिः	११६	४	८२३
तीव्राः सोमास आगहि	२३	१	२३९
तुग्रो ह भुज्युमश्विनोदमेघे	११६	३	८२३
तुभ्येदेते बहुला अद्रिदुग्धाः	५४	९	४९७
तुभ्यं पयो यत्पितरावनीतां	१२१	५	८६७
तुञ्जे तुञ्जे य उत्तरे	७	७	१५४
ते अस्मभ्यं शर्म यंस	९०	३	६७२
ते जज्ञिरे दिव ऋष्वासः	६४	२	५५०
ते त्वा मदा अमदन्तानि वृण्या	५३	६	४८८
तेन नासत्या गतं	४७	९	४४४
तेन सत्येन जागृतं	२१	६	२२९
ते नो रत्नानि धत्तन	२०	७	२२६
तेऽरुणेभिर्वरमापिशङ्गैः	८८	२	६६२
तेऽवर्धन्त स्वतवसो	८५	७	६५१
ते हि वस्वो वसवानाः	९०	२	६७१
तं गूर्तयो नेमन्निषः परीणसः	५६	२	५०५
तं घेमित्था नमस्विना	३६	७	३६७
तं त्वा नरो वम आ	७३	४	५९१
तं त्वा वयं पतिमग्ने रयीणां	६०	५	५२४
तं त्वा वाजेषु वाजिनं	४	९	१३२
तं त्वा वयं विश्ववारा	३०	१०	२९६
तन्न इन्द्रस्तदुरुणस्तदग्निः	१०७	३	७७१
तन्नव्यसी हृद आ जायमानं	६०	३	५२३
तन्नो वातो मयोभु वातु	८९	४	६६७
तं वश्चराथा वयं वसत्याः	६६	५	५६५
तं स्मा रथं मघवन्ग्राव सातये	१०२	३	७३९
त्यं चिद् घा दीर्घं पृथुं	३७	११	३८१
त्यं सुमेधं महया स्वर्विदं शतं	५२	१	४७५
त्रयः पवयो मधुवाहने रथे	३४	२	३४९
त्रितः कूपेऽवहितो देवान्	१०५	१७	७६५
त्रिरश्विना सिन्धुभिः	३४	८	३५३
त्रिर्नो अश्विना दिव्यानि	३४	६	३५२
त्रिर्नो अश्विना यजता	३४	७	३५३
त्रिर्नो रयिं वहतमश्विना	३४	५	३५१
त्रिर्वर्तियातं त्रिरनुव्रते	३४	४	३५१
त्रिवन्धुरेण त्रिवृता रथेन	११८	२	८४९
त्रिवन्धुरेण त्रिवृता सुपेशसा	४७	२	४४०
त्रिविष्टिधातु प्रतिमानं	१०२	८	७४२
त्रिश्चिन्नो अद्या भवतं नवेदसा	३४	१	३४८
त्रिषधस्थे बर्हिषि	४७	४	४४१
त्रिः सप्त यद् गुह्यानि	७२	६	५८७
त्रीणि जाना परिभूषन्त्यस्य	९५	३	७०८
त्रीणि पदा विचक्रमे	२२	१८	२३७
त्वमग्न उरुशंसाय वाघ	३१	१४	३१३
त्वमग्ने प्रथमो अङ्गिरा	३१	१	३०३
त्वमग्ने प्रथमो अङ्गिरस्तमः	३१	२	३०४
त्वमग्ने प्रथमो मातरिश्वने	३१	३	३०४
त्वमग्ने प्रमतिः	३१	१०	३१०
त्वमग्ने प्रयतदक्षिणं	३१	१५	३१४
त्वमग्ने मनवे द्यामवाशयः	३१	४	३०५
त्वमग्ने यज्यवे पायुः	३१	१३	३१२
त्वमग्ने वसूंरिह	४५	१	४२७
त्वमग्ने वृजिनवर्तनिं	३१	६	३०७
त्वमग्ने वृषभः पुष्टिवर्धनः	३१	५	३०६
त्वमध्वर्युरुत होता	९४	६	७०१
त्वमपामपिधाना	५१	४	४६५
त्वमस्य पारे रजसो व्योमनः	५२	१२	४८२
त्वमायसं प्रति वर्तयो गोः	१२१	९	८६९
त्वमावित्थ नर्यं तुर्वशं यदुं	५४	६	४९५
त्वमावित्थ सुश्रवसं तवोति	५३	१०	४९१
त्वमिन्द्र नर्यो यां अवो नॄन्	१२१	१२	८७१
त्वमिमा ओषधीः सोम	९१	२२	६८२
त्वमेताञ्जनराज्ञो द्विर्दशा	५३	९	४९०
त्वमेतान् रुदतो जक्षतः	३३	७	३३७
त्वमङ्ग प्र शंसिषः	८४	१९	६४६
त्वष्टा यद्वज्रं सुकृता	८५	९	६५२
त्वामग्ने प्रथममायु	३१	११	३१०
त्वामिद्धि सहसस्पुत्र	४०	२	३९८
त्वायेन्द्र सोमं सुषुमा सुदक्ष	१०१	९	७३७

	सू.	ऋ.	पृ.
त्वां चित्रश्रवस्तमं	४५	६	४३०
त्वां देवेषु प्रथमं हवामहे	१०२	९	७४३
त्वां स्तोमा अवीवृधन्	५	८	१३९
त्वां ह त्यदिन्द्रार्णसातौ	६३	६	५४७
त्वं दिवो धरुणं धिष ओजसा	५६	६	५०८
त्वं दिवो बृहतः सानु कोपयः	५४	४	४९४
त्वन्नो अग्ने तव देव	३१	१२	३१२
त्वन्नो अग्ने पित्रोरुपस्थे	३१	९	३०९
त्वन्नो अग्ने सनये धनानां	३१	८	३०९
त्वं नो अस्या इन्द्र दुर्हणायाः	१२१	१४	८७२
त्वं नः सोम विश्वतो रक्षा	९१	८	६७७
त्वं भुवः प्रतिमानं पृथिव्याः	५२	१३	४८३
त्वं महाँ इन्द्र यो ह शुष्मै	६३	१	५४४
त्वं मायाभिरप मायिनो धमः	५१	५	४६६
त्वं वलस्य गोमतः	११	५	१७५
त्वं विश्वस्य मेधिर	२५	२०	२७०
त्वं सत्य इन्द्र धृष्णुरेता	६३	३	५४६
त्वं सुतस्य पीतये	५	६	१३८
त्वं सूरो हरितोऽरामयो नृन्	१२१	१३	८७१
त्वं सोम ऋतुभिः सुक्रतुः	९१	२	६७५
त्वं सोम प्र चिकितो	९१	१	६७४
त्वं सोम महे भगं	९१	७	६७७
त्वं सोमासि सत्पतिः	९१	५	६७६
त्वे अग्ने सुमतिं भिक्ष	७३	७	५९३
त्वे इदग्ने सुभगे यवि	३६	६	३६६
त्वे विश्वा तविषी सध्र्यग्घि	५१	७	४६७
त्वेषासो अग्नेरमवन्तो	३६	२०	३७५
त्वेषं रूपं कृणुत उत्तरं यत्	९५	८	७१२
त्वेषं वयं रुद्रं यज्ञसाधं	११४	४	८१४
त्वोतो वाज्यह्रयो	७४	८	५९७
त्वं कुरञ्जमुत पर्णयं वधीः	५३	८	४८९
त्वं कुत्सं शुष्णहत्येष्वाविथ	५१	६	४६७
त्वं गोत्रमङ्गिरोभ्यो वृणोरप	५१	३	४६४
त्वं च सोम नो वशः	९१	६	६७६
त्वं जामिर्जनानां	७५	४	५९९
त्वं जिगेथ न धना रुरोधिथ	१०२	१०	७४३
त्वं तमग्ने अमृतत्व	३१	७	३०८
त्वं तमिन्द्र पर्वतं न भोजसे	५५	३	५०१
त्वं तमिन्द्र पर्वतं महामुरु	५७	६	५१२
त्वं तस्य द्वयाविनो	४२	४	४१०
त्वं तं ब्रह्मणस्पते	१८	५	२१५
त्वं त्यां न इन्द्र देव चित्रा	६३	८	५४९
त्वं त्येभिरागहि	३०	२२	३०३
त्वं ह त्यदिन्द्र चोदीः	६३	४	५४६
त्वं ह त्यदिन्द्र सप्त युध्यन्	६३	७	५४८
त्वं ह त्यदिन्द्रारिषण्यन्	६३	५	५४७
त्वं हि विश्वतोमुख	९७	६	७२०
त्वं होता मनुर्हितः	१४	११	१९६
दधन्नृतं धनयन्नस्य	७१	३	५७९
दधुष्ट्वा भृगवे मानुषेष्वा	५८	६	५१६
दर्शं नु विश्वदर्शतं	२५	१८	२६९
दश रात्रीरशिवेना नव द्यून्	११६	२४	८३५
दशेमं त्वष्टुर्जनयन्त गर्भं	९५	२	७०८
दस्रा युवाकवः सुता	३	३	११३
दस्यूञ्छिम्यूंश्च पुरुहूत एवैः	१००	१८	७३२
दाधार क्षेममोको नर	६६	२	५६३
दानाय मनः सोमपावन्नस्तु ते	५५	७	५०३
दासपत्नीरहिगोपा अतिष्ठन्	३२	११	३२३
दिवश्चित्ते बृहतो जातवेदः	५९	५	५२०
दिवश्चिदस्य वरिमा वि पप्रथे	५५	१	४९९
दिवस्कण्वास इन्ववो	४६	९	४३६
दिवा चित्तमः कृण्वन्ति	३८	९	३८६
दिवो न यस्य रेतसो दुघानाः	१००	३	७२४
दिवो वराहमरुषं कपर्दिनं	११४	५	८१५
दुरो अश्वस्य दुर इन्द्र गोरसि	५३	२	४८६
दुरोकशोचिः क्रतुर्न	६६	३	५६४
दुहीयन्मित्रधितये युवाकुः	१२०	९	८६२
देवयन्तो यथा मति	६	६	१४६
देवानां भद्रा सुमतिर्ऋजूयतां	८९	२	६६६
देवासस्त्वा वरुणो मित्रो	३६	४	३६५
देवी यदि तविषी त्यावृधोतय	५६	४	५०७
देवेन नो मनसा देव सोम	९१	२३	६८३
देवैर्नो देव्यदितिर्नि पातु	१०६	७	७६९

	सू.	ऋ.	पृ.
देवो देवानामसि मित्रो	९४	१३	७०५
देवो न यः पृथिवीं	७३	३	५९१
देवो न यः सविता सत्य	७३	२	५९०
द्युभिरक्तुभिः परिपातमस्मा	११२	२५	८०२
द्यौश्चिदस्यामवां अहेः	५२	१०	४८१
द्रविणोदा ददातु नः	१५	८	२०१
द्रविणोदा द्रविणसः	१५	७	२००
द्रविणोदा द्रविणसस्तुरस्य	९६	८	७१७
द्रविणोदाः पिपीषति	१५	९	२०१
द्विता वि वव्रे सनजा सनीळे	६२	७	५३९
द्विषो नो विश्वतोमुखाति	९७	७	७२०
द्वे विरूपे चरतः स्वर्थे	९५	१	७०७
धम्वन्त्स्रोतः कृणुते गातुं	९५	१०	७१३
नकिरस्य सहन्त्य	२७	८	२७७
नकिष्ट एता व्रता	६९	४	५७३
नकिष्ट्वद्रथीतरः	८४	६	६३८
नक्तोषासा वर्णमामेम्याने	९६	५	७१६
नक्तोषासा सुपेशसा	१३	७	१८८
नक्षद्धमरुणीः पूर्व्यं राट्	१२१	३	८६५
नदं न भिन्नममुया शयानं	३२	८	३२१
न पूषणं मेथामसि	४२	१०	४१२
नमो महद्भ्यो	२७	१३	२७९
न यस्य देवा देवता न मर्ताः	१००	१५	७३०
न यस्य द्यावापृथिवी न	५२	१४	४८३
न ये दिवः पृथिव्या अन्तं	३३	१०	३३९
न योरुपब्दिरश्व्यः	७४	७	५९७
न यं दिप्सन्ति दिप्सवः	२५	१४	२६७
नराशंसमिह प्रियं	१३	३	१८५
नराशंसं वाजिनं वाजयन्निह	१०६	४	७६८
नराशंसं सुधृष्टमं	१८	९	२१७
न वेपसा न तन्यते	८०	१२	६२०
नव्यं तदुक्थ्यं हितं	१०५	१२	७६३
नहि ते क्षत्रं न सहो न मन्युं	२४	६	२५३
न हि त्वा रोदसी उभे	१०	८	१७०
नहि देवो न मर्त्यः	१९	२	२१८
नहि नु यावधीमसि	८०	१५	६२१
नहि वामस्ति दूरके	२२	४	२३१
नहि वः शत्रुर्विविदे	३९	४	३९२
नाना हि त्वा हवमाना	१०२	५	७४०
नासत्याभ्यां बर्हिरिव प्र वृञ्जे	११६	१	८२१
नास्मै विद्युन्न तन्यतुः	३२	१३	३२४
नि काव्या वेधसः शश्वत्	७२	१	५८४
नि त्वामग्ने मनुर्दधे	३६	१९	३७४
नि त्वा यज्ञस्य साधनं	४४	११	४२५
नि त्वा होतारमृत्विजं	४५	७	४३०
नि नो होता वरेण्यः	२६	२	२७१
नि यद् वृणक्षि श्वसनस्य मूर्धं	५४	५	४९४
नि येन मुष्टिहत्यया	८	२	१५६
निरिन्द्र भूम्या अधि	८०	४	६१६
नि वो यामाय मानुषः	३७	७	३७९
निश्चर्मण ऋभवो गामपिंशत	११०	८	७८५
निषसाद धृतव्रतः	२५	१०	२६५
निष्वापया मिथूदृशा	२९	३	२९०
नि सर्वसेन इषुधीँ	३३	३	३३४
नीचावया अभवद् वृत्रपुत्रे	३२	९	३२२
नू च पुरा च सदनं रयीणां	९६	७	७१७
नू चित्सहोजा अमृतो नि तुन्द	५८	१	५१२
नू ष्ठिरं मरुतो वीरवन्तं	६४	१५	५५८
न्यघ्न्यस्य मूर्धनि	३०	१९	३०१
न्याविध्यदिलीबिशस्य	३३	१२	३४०
न्यू ३ षु वाचं प्र महे भरामहे	५३	१	४८५
पतति कुण्डृणाच्या	२९	६	२९१
पतिर्ह्यध्वराणां	४४	९	४२४
परा चिच्छीर्षा ववृजुस्त इन्द्र	३३	५	३३६
परा मे यन्ति धीतयो	२५	१६	२६८
परायतीनामन्वेति पाथः	११३	८	८०६
परावतं नासत्यानुदेथां	११६	९	८२६
परा ह यत्स्थिरं हथ	३९	३	३९१
परा हि मे विमन्यवः	२५	४	२६२
परि त्वा गिर्वणो गिरः	१०	१२	१७३

	सू.	ऋ.	पृ.
परि यदिन्द्र रोदसी उभे	३३	९	३३८
परि यदेषामेको	६८	१	५६९
परिविष्टं जाहुषं विश्वतः सीं	११६	२०	८३३
परीं घृणा चरति तित्विषे शवः	५२	६	४७९
परेहि विग्रमस्तृत	४	४	१२७
पशून् चित्रा सुभगा	९२	१२	६९०
पश्वा न तायुं गुहा	६५	१	५५९
पावका नः सरस्वती	३	१०	१२२
पाहि नो अग्ने रक्षसः	३६	१५	३७१
पितुर्न पुत्राः ऋतुं	६८	५	५७१
पितुः प्रत्नस्य जन्मना	८७	५	६६०
पिन्वन्त्यपो मरुतः सुदानवः	६४	६	५५३
पुत्रो न जातो रण्वो	६९	३	५७३
पुनः पुनर्जायमाना	९२	१०	६८९
पुरा यत्सूरस्तमसो अपीतेः	१२१	१०	८७०
पुरां भिन्दुर्युवा कविः	११	४	१७५
पुरूतमं पुरूणामीशा	५	२	१३५
पुरू वर्पांस्यश्विना दधाना	११७	९	८४०
पुरन्दरा शिक्षतं वज्रहस्ता	१०९	८	७८०
पुष्टिनं रण्वा क्षितिनं	६५	३	५६१
पूर्वीभिर्हि ददाशिम	८६	६	६५६
पूर्वीरिन्द्रस्य रातयः	११	३	१७४
पूर्वो देवा भवतु	९४	८	७०२
पूर्व्य होतरस्य नो	२६	५	२७२
पूषा राजानमाघृणिः	२३	१४	२४४
पृषदश्वा मरुतः पृश्नि	८९	७	६६९
पृष्टो दिवि पृष्टो अग्निः	९८	२	७२१
प्र चर्षणिभ्यः पृतनाहवेषु	१०९	६	७७९
प्रजावता वचसा	७६	४	६०२
प्रति त्यं चारुमध्वरं	१९	१	२१७
प्रति यत्स्या नीथादर्शि	१०४	५	७५३
प्रत्यङ् देवानां विशः	५०	५	४५८
प्रत्यर्ची रुशदस्याः	९२	५	६८६
प्रत्वक्षसः प्रतवसः	८७	१	६५८
प्र त्वा दूतं वृणीमहे	३६	३	३६५
प्र नूनं ब्रह्मणस्पतिः	४०	५	४००
प्र नू महित्वं वृषभस्य	५९	६	५२१
प्र नू स मर्तः शवसा	६४	१३	५५७
प्र पूतास्तिग्मशोचिषे	७९	१०	६१४
प्र मन्धिने पितुमदर्चता	१०१	१	७३३
प्र मन्महे शवसानाय	६२	१	५३५
प्र मंहिष्ठाय बृहते बृहद्रये	५७	१	५०९
प्र यत्ते अग्ने सूरयः	९७	४	७१९
प्र यदग्नेः सहस्वतः	९७	५	७२०
प्र यदित्था परावतः	३९	१	३९०
प्र यद् भंविष्ठ एषां	९७	३	७१९
प्र यन्नयेषु पृषतीरयु	८५	५	६५०
प्र या घोषे भृगवाणेव सोमे	१२०	५	८६०
प्र यात शीभमाशुभिः	३७	१४	३८२
प्र ये शुम्भन्ते जनयो	८५	१	६४७
प्रवद्यामना सुवृता रथेन	११८	३	८४९
प्र वामश्नोतु सुष्टुतिः	१७	९	२११
प्र वां दंसांस्यश्विनाववोचं	११६	२५	८३६
प्र वेपयन्ति पर्वतान्	३९	५	३९२
प्र वो भ्रियन्त इन्दवः	१४	४	१९३
प्र वो महे महि नमो	६२	२	५३६
प्र वो यह्वं पुरूणां	३६	१	३६४
प्र वः शर्धाय धृष्वये	३७	४	३७७
प्र शंसा गोष्वघ्न्यं	३७	५	३७७
प्र सु विश्वान्नक्षसो	७६	३	६०१
प्रातर्याव्णः सहस्कृत	४५	९	४३१
प्रातर्युजा वि बोधय	२२	१	२३०
प्रियमेधवदत्रिवत्	४५	३	४२८
प्रियो नो अस्तु विश्पतिः	२६	७	२७३
प्रह्वाभीहि धृष्णुहि	८०	३	६१६
प्रैतु ब्रह्मणस्पतिः	४०	३	३९८
प्रैवामज्मेषु पृथिवी	८७	३	६५९
बर्हिर्वा यत्स्वपत्याय	८३	६	६३६
बिभ्रद् द्रापिं हिरण्ययं	२५	१३	२६६
बृहती इव सूनवे रोदसी	५९	४	५२०
बृहत्स्वश्चन्द्रममवद्यदुक्थ्यं	५२	९	४८०

	सू.	ऋ.	पृ.
बृहस्पते सदमिन्नः	१०६	५	७६८
ब्रह्मा कृणोति वरुणः	१०५	१५	७६४
ब्राह्मणादिन्द्र राधसः	१५	५	१९९
भं गभक्तस्य ते वयं	२४	५	२५२
भजन्त विश्वे देवत्वं	६८	२	५६९
भद्रा अश्वा हरितः सूर्यस्य	११५	३	८१९
भद्रं कर्णेभिः शृणुयाम	८९	८	६६९
भरामेध्मं कृणवा	९४	४	७००
भवा वरूथं गृणते	५८	९	५१८
भास्वती नेत्री सूनृतानां दिवः	९२	७	६८७
भास्वती नेत्री सूनृतानामचेति	११३	४	८०४
भूरिकर्मणे वृषभाय वृष्णे	१०३	६	७४८
भूरि त इन्द्र वीर्यं १ तव	५७	५	५११
मंत्स्वा सुशिप्र मन्दिभिः	९	३	१६१
मथीद्यदीं विभृतो	७१	४	५७०
मदेमदे हि नो	८१	७	६२६
मधु नक्तमुतोषसो	९०	७	६७३
मधुमन्तं तनूनपात्	१३	२	१८५
मधुमान्नो वनस्पतिः	९०	८	६७३
मधु वाता ऋतायते	९०	६	६७३
मध्वः सोमस्याश्विना मदाय	११७	१	८३६
मनुष्वदग्ने अङ्गिरस्वदङ्गिरः	३१	१७	३१५
मनो न योऽध्वनः	७१	९	५८३
मन्विष्ट यदुशने काव्ये सचाँ	५१	११	४७०
मन्द्रो होता गृहपतिः	३६	५	३६६
मरुतो यद्ध वो बलं	३७	१२	३८१
मरुतो यस्य हि क्षये	८६	१	६५५
मरुतो वीळुपाणिभिः	३८	११	३८७
मरुतः पिबत ऋतुना	१५	२	१९८
मरुत्वन्तं हवामहे	२३	७	२४१
मरुत्स्तोत्रस्य वृजनस्य गोपा	१०१	११	७३८
महां इन्द्रः परश्च नु	८	५	१५७
महिकेरव ऊतये	४५	४	४२९
महिषासो मायिनश्चित्र	६४	७	५५३
मही द्यौः पृथिवी च नः	२२	१३	२३५
मही वामूतिरश्विना मयोभू	११७	१९	८४५
महे यत्पित्र ईं रसं	७१	५	५८१
महो अर्णः सरस्वती	३	१२	१२३
मा कस्मै धातमभ्यमित्रिणे	१२०	८	८६२
मा छेद्म रश्मींरिति नाधमा	१०९	३	७७८
माता देवानामदिते	११३	१९	८१२
मा ते राधांसि मा त ऊतयो	८४	२०	६४७
मादयस्व सुते सचा	८१	८	६२७
मादयस्व हरिभिर्ये त इन्द्र	१०१	१०	७३७
मा नस्तोके तनये मा न आयौ	११४	८	८१६
मा नो अग्ने सख्या पित्र्या	७१	१०	५८३
मा नो अस्मिन्मघवन्	५४	१	४९२
मा नो मर्ता अभि द्रुहन्	५	१०	१४०
मा नो महान्तमुत मा नो अर्भं	११४	७	८१६
मा नो वधाय हत्नवे	२५	२	२६१
मा नो वधीरिन्द्र मा परा दा	१०४	८	७५५
मा नः शंसो अररुषो	१८	३	२१४
मा नः सोम परिबाधो	४३	८	४१६
मायाभिरिन्द्र मायिनं	११	७	१७७
मा वो घ्नन्तं मा शपन्तं	४१	८	४०५
मा वो मृगो न यवसे	३८	५	३८४
मा सा ते अस्मत्सुमतिर्वि दसत्	१२१	१५	८७२
मित्रं वयं हवामहे	२३	४	२४०
मित्रं हुवे पूतदक्षं	२	७	१०७
मिमीहि श्लोकमास्ये	३८	१४	३८९
मूर्धा दिवो नाभिरग्निः	५९	२	५१९
मृळा नो रुद्रोत नो मयस्कृधि	११४	२	८१३
मो षु णः परापरा	३८	६	३८५
मो षु देवा अदः स्वः	१०५	३	७५८
यं इन्द्राग्नी चित्रतमो रथो	१०८	१	७७१
य इन्द्राय वचोयुजा	२०	२	२२३
य ईंखयन्ति पर्वतान्	१९	७	२२०
य ईं चिकेत गुहा	६७	४	५६८
य उग्रा अर्कमानृचुः	१९	४	२१९
य उवृचीन्द्र देवगोपाः	५३	११	४९१
य एक इद्विदयते	८४	७	६३९

	सू.	ऋ.	पृ.
य एकश्चर्षणीनां	७	९	१५४
यच्चित्रमप्न उषसो वहन्ती	११३	२०	८१२
यच्चिद्धि ते विशो यथा	२५	१	२६०
यच्चिद्धि त्वं गृहेगृहे	२८	५	२८२
यच्चिद्धि शश्वता तना	२६	६	२७२
यच्चिद्धि सत्य सोमपा	२९	१	२८९
यजा नो मित्रावरुणा	७५	५	६००
यज्ञैरथर्वा प्रथमः	८३	५	६३५
यज्ञैर्वा यज्ञवाहसो	८६	२	६५५
यज्ञो देवानां प्रत्येति सुम्नं	१०७	१	७७०
यज्ञं पृच्छाम्यवमं	१०५	४	७५९
यत्र ग्रावा पृथुबुध्नः	२८	१	२८०
यत्र द्वाविव जघना	२८	२	२८१
यत्र नार्यपच्यवं	२८	३	२८१
यत्र मन्थां विबध्नते	२८	४	२८२
यत्त्वा तुरीयमृतुभिः	१५	१०	२०१
यत्सानोः सानुमारुहत्	१०	२	१६६
यथा नो अदितिः करत्	४३	२	४१३
यथा नो मित्रो वरुणः	४३	३	४१४
यथा विप्रस्य मनुषो	७६	५	६०३
यदब्रवं प्रथमं वां वृणानः	१०८	६	७७४
यदयातं दिवोदासाय वर्तिः	११६	१८	८३२
यदयुक्था अरुषा	९४	१०	७०३
यदङ्ग दाशुषे त्वं	१	६	९७
यदिन्द्राग्नी अवमस्यां	१०८	९	७७५
यदिन्द्राग्नी उदिता सूर्यस्य	१०८	१२	७७६
यदिन्द्राग्नी दिवि ष्ठो	१०८	११	७७६
यदिन्द्राग्नी परमस्यां	१०८	१०	७७५
यदिन्द्राग्नी मदथः स्वे	१०८	७	७७४
यदिन्द्राग्नी यदुषु	१०८	८	७७५
यदिन्द्राहन्प्रथमजा महीनां	३२	४	३१९
यदिन्विन्द्र पृथिवी दशभुजिः	२५	११	४८२
यदीमृतस्य पयसा	७९	३	६११
यदुदीरित आजयो	८१	३	६२४
यद्देवानां मित्रमहः पुरोहितः	४४	१२	४२६
यद्ध यान्ति मरुतः	३७	१३	३८१
यद्यूयं पृश्निमातरः	३८	४	३८४
यद्वातजूतो वना	६५	४	५६२
यद्वा मरुत्वः परमे सधस्थे	१०१	८	७३६
यद् वृत्रं तव चार्शनि	८०	१३	६२१
यन्नासत्या परावति	४७	७	४४३
यमग्निं मेध्यातिथिः	३६	११	३६९
यमग्ने पृत्सु मर्त्यं	२७	७	२७७
यमश्विना ददथुः श्वेतमश्वं	११६	६	८२५
यमो ह जातो यमो	६६	४	५६५
यवं वृकेणाश्विना वपन्ता	११७	२१	८४६
यश्चिद्धि त इत्था भगः	२४	४	२५२
यश्चिद्धि त्वा बहुभ्यः	८४	९	६४०
यस्तुभ्यं दाशाद्यो	६८	३	५७०
यस्त्वामग्ने हविष्पति	१२	८	१८१
यस्मादृते न सिध्यति	१८	७	२१६
यस्मै त्वमायजसे	९४	२	६९९
यस्मै त्वं सुद्रविणो	९४	१५	७०६
यस्य वूतो असि क्षये	७४	४	५९६
यस्य द्यावापृथिवी पौंस्यं	१०१	३	७३४
यस्य संस्थे न वृण्वते	५	४	१३७
यस्याजस्रं शवसा मानमुक्थं	१००	१४	७२९
यस्यानाप्तः सूर्यस्येव यामः	१००	२	७२३
यस्या रुशन्तो अर्चयः	४८	१३	४५२
या गोमतीरुषसः सर्ववीरा	११३	१८	८११
याति देवः प्रवता यात्युद्वता	३५	३	३५८
या ते धामानि दिवि	९१	४	६७५
या ते धामानि हवि	९१	१९	६८१
या दस्रा सिन्धुमातरा	४६	२	४३२
यानीन्द्राग्नी चक्रथुर्वीर्या	१०८	५	७७३
या नः पीपरदश्विना	४६	६	४३५
यान्नाये मर्तान्त्सुषूदो	७३	८	५९३
याभिरङ्गिरो मनसा	११२	१८	७९८
याभिरन्तकं जसमानं	११२	६	७९२
याभिर्नरा शयवे याभि	११२	१६	७९७
याभिर्नरं गोषुयुधं	११२	२२	८००
याभिर्मंहामतिथिग्वं	११२	१४	७९६
याभिर्वध्रिं विपिपानं	११२	१५	७९७
याभिर्विश्पलां धनसां	११२	१०	७९४
याभिः कण्वमभिष्टिभिः	४७	५	४४२

	सू.	ऋ.	पृ.
याभिः कृशानुमवसे	११२	२१	८००
याभिः कुत्समार्जुनेयं शतक्रतू	११२	२३	८०१
याभिः पठर्वा जठरस्य	११२	१७	७९८
याभिः पत्नीर्विमदाय	११२	१९	७९९
याभिः परिज्मा तनयस्य	११२	४	७९१
याभिः शचीभिर्वृषणा	११२	८	७९३
याभिः शन्तातो भवतो	११२	२०	७९९
याभिः शुचन्ति धनसां	११२	७	७९२
याभिः सिन्धुं मधुमन्तं	११२	९	७९४
याभिः सुदानू औशिजाय	११२	११	७९५
याभिः सूर्यं परियाथः	११२	१३	७९६
याभी रसां क्षोदसोद्नः	११२	१२	७९५
याभी रेभं निवृतं	११२	५	७९१
यामथर्वा मनुष्पिता	८०	१६	६२२
यावदिदं भुवनं विश्वं	१०८	२	७७२
यावयद्द्वेषा ऋतपा	११३	१२	८०८
या वां कशा मधुमती	२२	३	२३०
यावित्था श्लोकमा दिवो	९२	१७	६९२
या वः शर्म शशमानाय	८५	१२	६५४
या सुरथा रथीतमा	२२	२	२३०
यास्ते प्रजा अमृतस्य	४३	९	४१७
युक्तस्ते अस्तु दक्षिणा	८२	५	६३०
युक्ष्वा हि केशिना हरी	१०	३	१६७
युक्ष्वा हि वाजिनो	९२	१५	६९१
युक्ष्वा ह्यरुषी रथे	१४	१२	१९६
युञ्जन्ति ब्रध्नमरुषं	६	१	१४१
युञ्जन्त्यस्य काम्या	६	२	१४२
युधा युधमुप घेदेषि	५३	७	४८९
युनज्मि ते ब्रह्मणा	८२	६	६३१
युयोप नाभिरुपरस्यायोः	१०४	४	७५२
युवमेतानि दिवि	९३	५	६९५
युवं च्यवानमश्विना जरन्तं	११७	१३	८४२
युवं तासां विष्यस्य	११२	३	७९०
युवं तुग्राय पूर्व्येभिरेवैः	११७	१४	८४२
युवं दक्षं धृतव्रत	१५	६	२००
युवं धेनुं शयवे नाधिताय	११८	८	८५१
युवं नरा स्तुवते कृष्णियाय	११७	७	८३९
युवं नरा स्तुवते पज्रियाय	११६	७	८२५
युवमत्रयेऽवनीताय तप्तं	११८	७	८५१
युवं पेदवे पुरुवारमश्विना	११९	१०	८५८
युवं भुज्युं भुरमाणं विभिर्गतं	११९	४	८५५
युवं रेभं परिषूतेरुरुष्यथः	११९	६	८५६
युवं वन्दनं निर्ऋतं जरण्यया	११९	७	८५६
युवं श्यावाय रुषतीमदत्तं	११७	८	८४०
युवं श्वेतं पेदव इन्द्रजूतं	११८	९	८५२
युवं ह्यास्तं महो रन्युवं	१२०	७	८६१
युवाकु हि शचीनां	१७	४	२०९
युवाना पितरा पुनः	२०	४	२२४
युवानो रुद्रा अजरा	६४	३	५५१
युवाभ्यां देवी धिषणा मदाय	१०९	४	७७८
युवामिन्द्राग्नी वसुनो विभागे	१०९	५	७७९
युवोरश्विना वपुषे युवायुजं	११९	५	८५५
युवोरुषा अनुश्रियं	४६	१४	४३९
युवोर्दानाय सुभरा	११२	२	७९०
युष्मेषितो मरुतो मर्त्येषितः	३९	८	३९४
यूयं तत्सत्यशवसः	८६	९	६५७
ये चिद्धि त्वामृषयः पूर्वे	४८	१४	४५२
ये ते पन्थाः सवितः पूर्व्यासः	३५	११	३६३
ये नाकस्याधिरोचने	१९	६	२१९
येना पावक चक्षसा	५०	६	४५९
ये पृषतीभिर्ऋष्टिभिः	३७	२	३७६
ये महो रजसो विदुः	१९	३	२१८
ये यजत्रा य ईड्याः	१४	८	१९५
ये शुभ्रा घोरवर्पसः	१९	५	२१९
येषामज्मेषु पृथिवी	३७	८	३७९
यो अग्निं देववीतये	१२	९	१८२
यो अग्नीषोमा हविषा	९३	८	६९६
यो अध्वरेषु शन्तम	७७	२	६०४
यो अर्यो मर्तभोजनं	८१	६	६२५
यो अश्वानां यो गवां गोपति	१०१	४	७३४
योगेयोगे तवस्तरं	३०	७	२९५
योनिष्ट इन्द्र निषदे अकारि	१०४	१	७४९
यो नो अग्नेऽभिदास	७९	११	६१४
यो नः पृषन्नघो वृकः	४२	२	४०९

	सू.	ऋ.	पृ.
यो रायो ३ वनिर्महान्	४	१०	१३३
यो रेवान्यो अमीवहा	१८	२	२१३
यो वाघते ददाति सूनरं वसु	४०	४	३९९
यो वामश्विना मनसो जवीयान्	११७	२	८३७
यो विश्वतः सुप्रतीकः	९४	७	७०२
यो विश्वस्य जगतः	१०१	५	७३५
यो व्यंसं जाह्नषाणेन	१०१	२	७३३
यं त्वा देवासो मनवे दधुरिह	३६	१०	३६९
यन्नासत्या पराबति	४७	७	४४३
यं बाहुतेव पिप्रति	४१	२	४०२
यं यज्ञं नयथा नरः	४१	५	४०४
यं रक्षन्ति प्रचेतसः	४१	१	४०२
यः कुक्षिः सोमपातमः	८	७	१५८
यः शुक्र इव सूर्यो	४३	५	४१५
यः शूरेभिर्हव्यो यश्च भीरुभिः	१०१	६	७३५
यः सोम सख्ये तव	९१	१४	६७९
यः स्नीहितीषु पूर्व्यः	७४	२	५९५
रयिनं चित्रा सूरो न	६६	१	५६३
रयिनं यः पितृवित्तो	७३	१	५९०
रयिं सुक्षत्रं स्वपत्यमायुः	११६	१९	८३३
राजन्तमध्वराणां	१	८	९८
राज्ञो नु ते वरुणस्य	९१	३	६७५
रायस्पूर्धि स्वधावो	३६	१२	३७०
रायो बुध्नः सङ्गमनो	९६	६	७१७
रुद्राणामेति प्रदिशा विचक्ष	१०१	७	७३६
रुशद्वत्सा रुशती श्वेत्यागात्	११३	२	८०३
रेवतीर्नः सधमादः	३०	१३	२९७
रोदसी आववता	६४	९	५५५
रोहिच्छ्यावा सुमदंशुर्लला	१००	१६	७३०
वंक्यन्ते वां ककुहासः	४६	३	४३३
वधीर्हि दस्युं धनिनं घनेन	३३	४	३३५
वर्धेर्बुःशंसां अप	९४	९	७०३
वनेम पूर्वीरर्यो	७०	१	५७४
वनेषु जायुर्मतेषु	६७	१	५६६
वयश्चिन्ते पतत्रिणः	४९	३	४५५
वया इदग्ने अग्नयस्ते	५९	१	५१८
वयं जयेम त्वया युजा वृतं	१०२	४	७४०
वयं शूरेभिरस्तृभिः	८	४	१५७
वयं हि ते अमन्महि	३०	२१	३०२
वरुणः प्राविता भुवन्	२३	६	२४१
वर्धन्तीमापः पन्वा	६५	२	५६०
वर्धन्यं पूर्वीः क्षपो	७०	४	५७६
वसिष्वा हि मियेध्य	२६	१	२७०
वसोरिन्द्रं वसुपतिं	९	९	१६४
वह्निं यशसं विदथस्य	६०	१	५२२
वाजेभिर्नो वाजसातावविड्ढि	११०	९	७८६
वाय उक्थेभिर्जरन्ते	२	२	१०१
वायवायाहि दर्शत	२	१	१०१
वायविन्द्रश्च चेतथः	२	५	१०५
वायविन्द्रश्च सुन्वत	२	६	१०६
वायो तव प्रपृञ्चती	२	३	१०२
वावसाना विवस्व	४६	१३	४६८
वाश्रेव विद्युन्मिमाति	३८	८	३८६
वि जनाञ्छ्यावाः शितिपादो	३५	५	३५९
वि जानीह्यार्यान्ये च दस्यवः	५१	८	४३८
वि ते वज्रासो अस्थिरन्	८०	८	६१८
वि त्वा नरः पुरुत्रा	७०	५	५७७
विदन्तीमत्र नरो	६७	२	५६६
वि दुर्गा वि द्विषः पुरः	४१	३	४०३
विप्रा हि त्वा वृषन्तमं	१०	१०	१७१
वि ष्यामेषि रजस्पृथु	५०	७	४५९
विद्वां अग्ने वयुनानि	७२	७	५८८
विद्वांसाविद् दुरः पृच्छेत्	१२०	२	८५९
वि नः पथः सुविताय	९०	४	६७२
वि पृक्षो अग्ने मघवानो	७३	५	५९२
वि पृच्छामि पाक्या ३ न देवा	१२०	४	८६०
विभक्तारं हवामहे	२२	७	२३२
विभक्तासि चित्रभानो	२७	६	२७६
वि मृळीकाय ते मनः	२५	३	२६२
वि यस्तिरो धरुणमच्युतं	५६	५	५०७
वि या सृजति समनं	४८	६	४४८

	सू.	ऋ.	पृ.
वि ये भ्राजन्ते सुमखास	८५	४	६४९
वि यो वीरुत्सु रोध	६७	५	५६८
वि राय और्णोद् दुरः	६८	५	५७१
वि वातजूतो अतसेषु तिष्ठते	५८	४	५१५
विशां गोपा अस्य	९४	५	७००
वि श्रयन्तामृतावृधः	१३	६	१८७
विश्वमस्या नानाम चक्षसे	४८	८	४४९
विश्वमित्सवनं सुतं	१६	८	२०७
विश्ववेदसो रयिभिः	६४	१०	५५५
विश्वस्य हि प्राणनं जीवनं	४८	१०	४५०
विश्वानि देवी भुवना	९२	९	६८८
विश्वान्देवाँ आवह सोमपीत	४८	१२	४५१
विश्वान्देवान्हवामहे	२३	१०	२४३
विश्वाहेन्द्रो अधिवक्ता नो	१००	१९	७३२
विश्वाहेन्द्रो अधिवक्ता नो	१०२	११	७४४
विश्वे देवासो अप्तुरः	३	८	१२०
विश्वे देवासो अस्रिधः	३	९	१२१
विश्वेभिरग्ने अग्निभिः	२६	१०	२७४
विश्वेभिः सोम्यं मधु	१४	१०	१९५
विष्ट्वी शमी तरणित्वेन वाघ	११०	४	७८३
विष्णोः कर्माणि पश्यत	२२	१९	२३८
वि सुपर्णो अन्तरिक्षाण्यख्य	३५	७	३६१
वि ह्याख्यं मनसा वस्य इच्छ	१०९	१	७७७
वीळु चिदारुजत्नुभिः	६	५	१४५
वीळु चिद् दृळ्हा पितरो	७१	२	५७८
वीळुपत्मभिराशुहेमभिर्वा	११६	२	८२२
वृषायमाणो वृणीत सोमं	३२	३	३१८
वृषा यूथेव वंसगः	७	८	१५४
वृष्णे शर्धाय सुमखाय वेधसे	६४	१	५५०
वेद मासो धृतव्रतः	२५	८	२६४
वेद वातस्य वर्तनिं	२५	९	२६५
वेदा यो वीनां पदं	२५	७	२६४
वेधा अदृप्तो अग्निर्वि	६९	२	५७२
वैश्वानर तव तत्सत्यमस्तु	९८	३	७२२
वैश्वानरस्य सुमतौ स्याम	९८	१	७२१
वैश्वानरो महिम्ना विश्व	५९	७	५२१

	सू.	ऋ.	पृ.
वन्वस्व मारुतं गणं	३८	१५	३८९
व्यंजिभिर्दिव आतास्व	११३	१४	८०९
व्युच्छन्ती हि रश्मिभिः	४९	४	४५५
व्यूर्वती दिवो अन्तां	९२	११	६८९
शंकिम त्वा समिधं	९४	३	६९९
शग्धि पूर्धि प्रयंसि च	४२	९	४१२
शचीव इन्द्र पुरुकृद् द्युमत्तम	५३	३	४८६
शतमिन्नु शरदो	८९	९	६७०
शतं ते राजन्भिषजः सहस्रं	२४	९	२५५
शतं मेषान्वृक्ये चक्षदानं	११६	१६	८३१
शतं मेषान्वृक्ये मामहानं	११७	१७	८४४
शतं वा यः शुचीनां	३०	२	२९३
शरस्य चिदार्चत्कस्यावता	११६	२२	८३४
शशमानस्य वा नरः	८६	८	६५७
शश्वत्पुरोषा व्युवास देव्यथ	११३	१३	८०९
शश्वदिन्द्रः पोप्रुथद्भिर्जिगाय	३०	१६	२९९
शिप्रिन्वाजानां पते	२९	२	२८९
शुकेषु मे हरिमाणं	५०	१२	४६२
शुक्रः शुशुक्वां उषो	६९	१	५७२
शुनमन्धाय भरमह्वयत्सा	११७	१८	८४४
शुनःशेपो ह्यह्वद् गृभीतः	२४	१३	२५७
शुष्णं पिप्रुं कुयवं वृत्रमिन्द्र	१०३	८	७४९
शूरा इवेद्युयुधयो	८५	८	६५२
शृण्वन्तु स्तोमं मरुतः	४४	१४	४२७
शं नः करत्यर्वते	४३	६	४१५
शं नो मित्रः शं वरुणः	९०	९	६७४
श्रियसे कं भानुभिः	८७	६	६६१
श्रिये कं वो अधि तनूषु	८८	३	६६३
श्रीणन्नुपस्थादिवं	६८	१	५६९
श्रुतं गायत्रं तकवानस्याहं	१२०	६	८६१
श्रुधि श्रुत्कर्ण वह्निभिः	४४	१३	४२६
श्रुष्टीवानो हि दाशुषे	४५	२	४२८
श्रेष्ठं यविष्ठमतिथिं स्वाहुतं	४४	४	४२२
श्वसित्यप्सु हंसो न सीदन्	६५	५	५६२
स इद्वने नमस्युभिर्वचस्यते	५५	४	५०१
स इधानो वसुष्कविः	७९	५	६१२

	सू.	ऋ.	पृ.		सू.	ऋ.	पृ.
स इन्महानि समिथानि	५५	५	५०२	स पूर्वया निविदा काव्य	९६	२	७१४
सखाय आ निषीदत	२२	८	२३३	सप्त त्वा हरितो रथे	५०	८	४६०
सख्ये त इन्द्र वाजिनः	११	२	१७४	स प्रत्नथा सहसा जायमानः	९६	१	७१४
स ग्रामेभिः सनिता स रथेभि	१००	१०	७२७	स मन्युमीः स मदनस्य कर्ता	१००	६	७२५
स घा तं वृषणं रथमधि	८२	४	६२९	स मातरिश्वा पुरुवार	९६	४	७१६
स घा नः सूनुः शवसा	२७	२	२७५	समानयोजनो हि वां	३०	१८	३००
स घा नो योग आभुवत्	५	३	१३६	समाने अहन्त्रिरवद्यगोहना	३४	३	३५०
स घा राजा सत्पतिः	५४	७	४९६	समानो अध्वा स्वस्रोरनन्तः	११३	३	८०४
स घा वीरो न रिष्यति	१८	४	२१४	समिद्धेष्वग्निष्वानजाना	१०८	४	७७३
स जातूभर्मा श्रद्दधान ओजः	१०३	३	७४६	समिन्द्र गर्दभं मृण	२९	५	२९१
स जामिभिर्यत् समजाति	१००	११	७२८	समिन्द्र रायो समिषा रभेमहि	५३	५	४८७
सजोषा धीराः पदैरनु	६५	१	५५९	समोहे वा य आशत	८	६	१५८
स तुर्वणिर्महां अरेणु	५६	३	५०६	स यो वृषा वृष्ण्येभिः समोका	१००	१	७२३
सत्तो होता मनुष्वदा	१०५	१४	७६४	स रत्नं मर्त्यो वसु	४१	६	४०४
सत्यं त्वेषा अमवन्तः	३८	७	३८५	स रेवां इव विश्पतिः	२७	१२	२७९
स त्वमग्ने सौभगस्य	९४	१६	७०६	सर्वं परिक्रोशं जहि	२९	७	२९२
स त्वं न इन्द्र सूर्ये	१०४	६	७५३	स वज्रभृद्दस्युहा भीम उग्रः	१००	१२	७२८
स त्वामदद्वृषा मदः	८०	२	६१५	स वाजं विश्वचर्षणिः	२७	९	२७८
सदसस्पतिमद्भुतं	१८	६	२१५	सवितारमुषसमश्विना भगं	४४	८	४२४
सदा कवी सुमतिमा चके वां	११७	२३	८४७	स शेवृधमधि धा द्युम्नमस्मे	५४	११	४९९
स धारयत्पृथिवीं पप्रथच्च	१०३	२	७४५	स सव्येन यमति व्राधतः	१००	९	७२७
स नः पावक दीदिवः	१२	१०	१८२	ससन्तु त्या अरातयः	२९	४	२९०
स नः पितेव सूनवे	१	९	९९	स सुष्टुभा स स्तुभा	६२	४	५३७
स नः सिन्धुमिव	९७	८	७२०	स सूनुभिर्न रुद्रेभिर्ऋभ्वा	१००	५	७२५
स नः स्तवान आभर	१२	११	१८२	सह वामेन न उषो	४८	१	४४५
सनात्सनीळा अवनीरवा	६२	१०	५४२	सहस्रं साकमर्चत	८०	९	६१९
सनादेव तव रायो	६२	१२	५४३	सहस्राक्षो विचर्षणिः	७९	१२	६१४
सनाद्दिवं परि भूमा	६२	८	५४०	स हि क्रतुः स मर्यः	७७	३	६०५
सनायते गोतम इन्द्र	६२	१३	५४४	स हि क्षपावां अग्नी	७०	३	५७५
सनायुवो नमसा नव्यो	६२	११	५४२	स हि द्वरो द्वरिषु वव्र ऊधनि	५२	३	४७६
सनेमि सख्यं स्वपस्यमानः	६२	९	५४१	स हि श्रवस्युः सदनानि	५५	६	५०३
स नो दूराच्चासाच्च	२७	३	२७५	स हि स्वसृत्पृषदश्वो	८७	४	६६०
स नो नृणां नृतमो	७७	४	६०५	साधुर्न गृध्नुरस्तेव	७०	६	५७७
स नो महां अनिमानः	२७	११	२७८	सिन्धुर्न क्षोदः प्र	६६	५	५६५
स नो विश्वाहा सुक्रतुः	२५	१२	२६६	सिंहा इव नानदति	६४	८	५५४
स नो वृषन्नमुं चरुं	७	६	१५३	सुक्षेत्रिया सुगातुया	९७	२	७१९
स पर्वतो न धरुणेष्वव्युतः	५२	२	४७५	सुगः पन्था अनृक्षरः	४१	४	४०३

	सू.	ऋ.	पृ.
सुतपाव्ने सुता इमे	५	५	१३७
सुते सुते न्योकसे	९	१०	१६५
सुदासे दस्रा वसु बिभ्रता	४७	६	४४२
सुपर्णा एत आसते	१०५	११	७६२
सुपेशसं सुखं रथं	४९	२	४५४
सुभगः स प्रयज्यवो	८६	७	६५७
सुरूपकृत्नुमूतये	४	१	१२५
सुविवृतं सुनिरजं	१०	७	१६९
सुशंसो बोधि गृणते यविष्ठ्य	४४	६	४२३
सुषुप्वांसं न निर्ऋतेरुपस्थे	११७	५	८३८
सुसमिद्धो न आवह	१३	१	१८४
सुसन्दृशं त्वा वयं	८२	३	६२९
सूनोर्मानेनाश्विना गृणाना	११७	११	८४१
सूर्यो देवीमुषसं रोचमानां	११५	२	८१९
सेनेव सृष्टामं दधा	६६	४	५६५
सेमग्नः काममापृण	१६	९	२०७
सेमग्नः स्तोममागहि	१६	५	२०५
सो अर्णवो न नद्यः	५५	२	५००
सो अङ्गिरोभिरङ्गिरस्तमो	१००	४	७२४
सोम गीर्भिष्ट्वा	९१	११	६७८
सोम यास्ते मयोभुवः	९१	९	६७७
सोम रारन्धि नो हृदि	९१	१३	६७८
सोमानं स्वरणं	१८	१	२१२
सोमो धेनुं सोमो	९१	२०	६८१
सोमो न वेधा ऋतप्रजातः	६५	५	५६२
सं गोमदिन्द्र वाजवत्	९	७	१६४
सं चोदय चित्रमर्वाक्	९	५	१६२
सञ्जानाना उप सीदन्न	७२	५	५८६
सं ते पयांसि	९१	१८	६८०
सं नु वोचावहै पुनः	२५	१७	२६८
सं नो राया बृहता विश्वपेशसा	४८	१६	४५३
सं पूषन्नध्वनस्तिर	४२	१	४०८
सं माग्ने वर्चसा सृज	२३	२४	२४९
सं मा तपन्त्यभितः	१०५	८	७६१
सं यन्मदाय शुष्मिणः	३०	३	२९३
सं यन्मिथः पस्पृधानासो	११९	३	८५४
सं वो मदासो अग्मत	२०	५	२२५
सं सीदस्व महां असि	३६	९	३६८
स्तविष्यामि त्वामहं	४४	५	४२२
स्तृणीत बर्हिरानुषक्	१३	५	१८७
स्तोत्रं राधानां पते	३०	५	२९४
स्तंभीद्ध द्यां स धरुणं पृथाय	१२१	२	८६४
स्थिरं हि जानमेषां	३७	९	३७९
स्थिरा वः सन्तु नेमयः	३८	१२	३८८
स्थिरा वः सन्त्वायुधा परा	३९	२	३९०
स्यूमना वाच्य उदियर्ति वह्निः	११३	१७	८११
स्योना पृथिवि भव	२२	१५	२३६
स्व आ यस्तुभ्यं दम आ	७१	६	५८१
स्वग्नयो हि वार्यं	२६	८	२७३
स्वस्ति न इन्द्रो वृद्धश्रवा	८९	६	६६८
स्वादोरित्था विषूवतो	८४	१०	६४०
स्वाध्यो दिव आ सप्त	७२	८	५८८
स्वाहा यज्ञं कृणोतन	१३	१२	१९१
स्विध्मा यद्वनधितिरपस्यात्	१२१	७	८६८
हँत वृत्रं सुदानवः	२३	९	२४२
हविषा जारो अपां	४६	४	४३४
हस्काराद्विद्युतस्पर्यतो	२३	१२	२४३
हस्ते दधानो नृम्णा	६७	२	५६६
हिमेनाग्निं घ्रंसमवारयेथां	११६	८	८२६
हिरण्यकेशो रजसो	७९	१	६०८
हिरण्यपाणिमूतये	२२	५	२३१
हिरण्यपाणिः सविता	३५	९	३६२
हिरण्ययेभिः पविभिः	६४	११	५५६
हिरण्यहस्तमश्विना रराणा	११७	२४	८४७
हिरण्यहस्तो असुरः	३५	१०	३६३
होता निषत्तो मनो	६८	४	५७०
होतारं विश्ववेदसं	४४	७	४२३
होतारं सप्तजुह्वो ३ यजिष्ठं	५८	७	५१६
ह्वयं न हि त्वा न्यृषंत्यूर्मयः	५२	७	४७९
ह्वयाम्यग्निं प्रथमं	३५	१	३५६

अक्षरस्वरसंस्कारः

पुटः	ऋक्सङ्ख्या	अशुद्धम्	शुद्धम्
१७३	१२	वृ॒द्धयो॒	वृ॒द्धयो॒
२४०	३	इन्द्र॒वा॒यू	इन्द्र॒वा॒यू
२५७	१३	स्त्रि॒ष्वा॑	स्त्रि॒ष्वा॑
२७६	६	वि॒भ॒क्ता	वि॒भ॒क्ता
२७९	१२	बृ॒ह	बृ॒ह
२८२	५	गृ॒हेगृ॑ह॒	गृ॒हेगृ॑ह
३१८	३	वृणीत॒	ऽवृणीत॒
३२०	६	अयो॒द्धेव॑	अयो॒द्धेव॑
४३७	१०	अभू॑दु	अभू॑दु
५४४	१३	सु॒नी॒थाय॑	सु॒नी॒थाय॑
६४४	१६	हृ॒त्स्वसो॑	हृ॒त्स्वसो॑
६८९	१०	श्नथ्नी॑व॑	श्नथ्नी॑व॑
७३२	१८	पृथि॒व्यां	पृथि॒व्यां
७४०	४	मु॒दवा॒	मु॒दवा॒
७८८	४	म॒श्विना॒	म॒श्विना॒

संशोधनम्

पुटः	पङ्क्तिः	अशुद्धम्	शुद्धम्
१४	१५	कुत्स आङ्गिरसे	राहूगणे गोतम
३१	१७	क्रियते	क्रियन्ते
३२	२	रहस्यार्थं	रहस्यार्थं
४७	१८	सूक्तस्तथा	सूक्तस्था
४८	१०	पदै	पदैः
५६	४	अन्यश्च	अन्यच्च
६०	१४	वर्शिष्यते	वर्शयिष्यते
६२	७	पक्ष	पक्षे
६४	५	क्ङिति	क्ङिति
८५	१७	मित्येकेषां	मूचुषां
९५	९	तना	तनो
१२९	१८	उभयो	उभयोः
१३०	१९	द्वयो	द्वयोः
१४४	२१	मानुषे व्यष्टौ	मानुषव्यष्टौ
१४६	१९	उपचर्यते	उपचर्यन्ते
१४८	७	सांन्निध्यं	सान्निध्यं
१५३	२३	ववा	वावा
१६७	६	उभयो ऋचो	उभयोर्ऋचो
२०२	१०	पाद	पद
२५८	८	इलः	इलु:
२६०	टिप्पणी १८	उल्मुखेन	उल्मुकेन
२६८	२	विशेषतो	विशेषत
२७१	५	ऊर्क	ऊर्क्
२७३	२०	धारकानां	धारकाणां
२७८	१५	शस्यः	शपः
२८०	८	ए	ओ
२८७	टिप्पणी ९	भिन्द्यत्	भिन्द्यात्
२९५	२१	तवसः	तवस्
३१२	२२	निषङ्ग	निषङ्गः
३४०	२२	विनः	विनो लुक्
३४९	५	ङ्यादेशः	ङ्यादेशः
३५४	८	चित्तजो	चित्तेजो
३५९	१५	भुवनानि च	भुवनैः सह
३६१	१७	कथन्	कथन्
३६४	३	इतिः	इति
३७१	६	लक्षितैः	लक्षिताभिः
३७४	६	वस्त्व	वास्त्व
३८१	९	आवारको	आवरको
३८३	२५	घनन	घन
४००	२६	आडागमः	अडागमः

पुटः	पङ्क्तिः	अशुद्धम्	शुद्धम्	पुटः	पङ्क्तिः	अशुद्धम्	शुद्धम्
४०४	१४	धीयते	धीतये	५७६	१७	बह्वीः	बह्व्यः
४०७	२	देवताः	देवाः	५८०	२५	यदि	यदी
४०७	३	नोऽक्तः	नोक्तः	५९३	१०	परस्मै	आत्मने
४०८	१६	चकृषत्	चर्कृषत्	५९८	१५	१. ३१. १	१. ३१. ५
४१०	७	स्त्र	स्तृ	६०१	१९	व्याप्नुवन्त्यौ	व्याप्नुवत्यौ
४१०	१७	तपुषि	तपुषिम्	६०६	२१	१५३. ६	१५३. ३
४३०	१८	वसोः	वसुनः	६१६	६	मन्त्रं	मन्त्रः
४३३	७	वसोर्मूल	वसुनो मूल	६३९	७	परस्मै	आत्मने
४३९	१३	भरो	भरः	६४१	९	ङीप् ङीपि	ङीष् ङीषि
४४५	२	एसादेशः	ऐसादेशाभावः	६४३	१६	२९	२२
४७०	२०	कनिस्	कनस्	६८९	१६	२. १	२. १२. ५
४९०	१२	शयनिके	शायनिके	७४७	१५	केन्	केन्य
४९१	९	सिचो	सिपो	७७०	१५	आत्मने	परस्मै
५००	२१	पनिष्टम्	पनिष्ठम्	७७८	८	श्लुः	लुक्
५०३	१९	शेलोप	शेर्लोप	७७९	११	लेटि	लोटि
५१३	१४	एसभावः	ऐसभावः	७८०	९	भवथ	भवथः
५३९	१४	ह्व	ह्वृ	७८५	१	७	४
५४८	८	साय्य	असाय्य	७८५	१९	भुजं	जुवं
५५७	४	बुध्रकृत्	बुध्रकृतः	७८८	२०	से	क्से
५६०	१६	६२	४६	८०५	५	युक्	पुक्
५६०	२४	त्रन्	अत्रन्	८१२	५	दात्री	दात्रीः
५६३	२१	इत्यप्	इति त्यप्	८३२	२१	प्राप्नुवन्ती	प्राप्नुवती
५६६	८	श्लुः	श्नुः	८७५	१८	सूनृतानां न	सूनृतानां